॥४०॥ उत् तिष्ठ ब्रह्मणः पते देव ऽयंतः त्वा ईमहे उप प्र यंतु मरुतः सु ऽदानवः इंद्र प्राशूः भव सचा ॥१॥ त्वां इत् हि सहसः पुत्र मर्त्यः उप ऽब्रूते धने हिते सु ऽवीर्ये मरुतः आ सु ऽअश्व्यं दधीत यः वः आ ऽचके ॥२॥ प्र एतु ब्रह्मणः पतिः प्र देवी एतु सूनृता अच्छ वीरं नर्यं पंक्ति ऽराधसं देवाः यज्ञं नयंतु नः ॥३॥ यः वाघते ददाति सूनरं वसु सः धत्ते अक्षिति श्रवः

तस्मै इळां सुवीरां आ यजामहे सुऽप्रतूर्तिं अनेहसं ॥४॥ प्र नूनं ब्रह्मणः पतिः मंत्रं वदति उक्थ्यं यस्मिन् इंद्रः वरुणः मित्रः अर्यमा देवाः ओकांसि चक्रिरे ॥५॥२०॥ तं इत् वोचेम विदथेषु शंऽभुवं मंत्रं देवाः अनेहसं इमां च वाचं प्रतिऽहर्यथ नरः विश्वा इत् वामा वः अश्नवत् ॥६॥ कः देवऽयंतं अश्नवत् जनं कः वृक्तऽबर्हिषं प्रऽप्र दाश्वान् पस्त्याभिः अस्थित अंतःऽवावत् क्षयं दधे ॥७॥ उप क्षत्रं पृंचीत हंति राजऽभिः भये चित् सुऽक्षितिं दधे न अस्य वर्ता न तरुता महाऽधने न अर्भे अस्ति वज्रिणः ॥८॥२१॥

॥४१॥ यं रक्षंति प्रऽचेतसः वरुणः मित्रः अर्यमा नु चित् सः दभ्यते जनः ॥१॥ यं बाहुताऽइव पिप्रति पांति मर्त्यं रिषः अरिष्टः सर्वः एधते ॥२॥ वि दुःऽगा वि द्विषः पुरः घ्नंति राजानः एषां नयंति दुःऽइता तिरः ॥३॥ सुऽगः पंथाः अनृक्षरः आदित्यासः ऋतं यते न अर्च अवऽखादः अस्ति वः ॥४॥ यं यज्ञं नयथ नरः आदित्याः ऋजुना पथा प्र वः सः धीतये नशत् ॥५॥२२॥ सः रत्नं मर्त्यः वसु विश्वं तोकं उत त्मना अच्छ गच्छति अस्तृतः ॥६॥ कथा राधाम सखायः स्तोमं मित्रस्य अर्यम्णः महि प्सरः वरुणस्य ॥७॥ मा वः घ्नंतं मा शपंतं प्रति वोचे देवऽयंतं सुम्नैः इत् वः आ विवासे ॥८॥ चतुरः चित् ददमानात् बिभीयात् आ निऽधातोः न दुःऽउक्तायं स्पृहयेत् ॥९॥२३॥

॥४२॥ सं पूषन् अध्वनः तिर वि अंहः विऽमुचः नपात् सक्ष्व देव प्र नः पुरः ॥१॥ यः नः पूषन् अघः वृकः दुःऽशेवः

आऽदिदेशति अप स्म तं पथः जहि ॥२॥ अप त्यं परिऽपंथिनं मुषीवाणं हुरःऽचितं दूरं अधि स्रुतेः अज ॥३॥ त्वं तस्य द्रुया-विनः अघऽशंसस्य कस्य चित् पदा अभि तिष्ठ तपुंषिं ॥४॥ आ तत् ते दस्र मंतुऽमः पूषन् अवः वृणीमहे येन पितॄन् अचो-दयः ॥५॥२४॥ अध नः विश्वऽसौभग हिरण्यवाशीमत्ऽतम धनानि सुऽसना कृधि ॥६॥ अति नः सश्चतः नय सुऽगा नः सुऽपथा कृणु पूषन् इह क्रतुं विदः ॥७॥ अभि सुऽयवसं नय न नवऽज्वारः अध्वने पूषन् इह क्रतुं विदः ॥८॥ शग्धि पूर्धि प्र यंसि च शिशीहि प्रासिं उदरं पूषन् इह क्रतुं विदः ॥९॥ न पूषणं मेथामसि सुऽउक्तैः अभि गृणीमसि वसूनि दस्मं ईमहे ॥१०॥२५॥

॥४३॥ कत् रुद्राय प्रऽचेतसे मीळ्हुःऽतमाय तव्यसे वोचेम शंऽतमं हृदे ॥१॥ यथा नः अदितिः करत् पश्वे नृऽभ्यः यथा गवे यथा तोकाय रुद्रियं ॥२॥ यथा नः मित्रः वरुणः यथा रुद्रः चिकेतति यथा विश्वे सुऽजोषसः ॥३॥ गाथऽपतिं मेधऽपतिं रुद्रं जलाषऽभेषजं तत् शंऽयोः सुम्नं ईमहे ॥४॥ यः शुक्रःऽइव सूर्यः हिरण्यंऽइव रोचते श्रेष्ठः देवानां वसुः ॥५॥२६॥ शं नः करति अर्वते सुऽगं मेषाय मेष्ये नृऽभ्यः नारिऽभ्यः गवे ॥६॥ अस्मे सोम श्रियं अधि नि धेहि शतस्य नृणां महि श्रवः तुविऽनृम्णं ॥७॥ मा नः सोमऽपरिबाधः मा अरातयः जुहुरंत आ नः इंदो वाजे भज ॥८॥ याः ते प्रऽजाः अमृतस्य परस्मिन् धामन् ऋतस्य मूर्धा नाभा सोम वेनः आऽभूषंतीः सोम वेदः ॥९॥२७॥८॥

॥४४॥ अग्ने विवस्वत् उषसः चित्रं राधः अमर्त्य आ दाशुषे जातऽवेदः वह त्वं अद्य देवान् उषःऽबुधः ॥१॥ जुष्टः हि दूतः असि हव्यऽवाहनः अग्ने रथीः अध्वराणां सऽजूः अश्विऽभ्यां उषसा सुऽवीर्यं अस्मे धेहि श्रवः बृहत् ॥२॥ अद्य दूतं वृणीमहे वसुं अग्निं पुरुऽप्रियं धूमऽकेतुं भाःऽऋजीकं विऽउष्टिषु यज्ञानां अध्वरऽश्रियं ॥३॥ श्रेष्ठं यविष्ठं अतिथिं सुऽआहुतं जुष्टं जनाय दाशुषे देवान् अच्छ यातवे जातऽवेदसं अग्निं ईळे विऽउष्टिषु ॥४॥ स्तविष्यामि त्वां अहं विश्वस्य अमृत भोजन अग्ने चातारं अमृतं मियेध्य यजिष्ठं हव्यऽवाहन ॥५॥२८॥ सुऽशंसः बोधि गृणते यविष्ठ्य मधुऽजिह्वः सुऽआहुतः प्रस्कण्वस्य प्रऽतिरन् आयुः जीवसे नमस्य दैव्यं जनं ॥६॥ होतारं विश्वऽवेदसं सं हि त्वा विशः ईळते सः आ वह पुरुऽहूत प्रऽचेतसः अग्ने देवान् इह द्रवत् ॥७॥ सवितारं उषसं अश्विना भगं अग्निं विऽउष्टिषु क्षपः कण्वासः त्वा सुतऽसोमासः इन्धते हव्यऽवाहं सुऽअध्वर ॥८॥ पतिः हि अध्वराणां अग्ने दूतः विशां असि उषःऽबुधः आ वह सोमऽपीतये देवान् अद्य स्वःऽहशः ॥९॥ अग्ने पूर्वीः अनु उषसः विभाऽवसो॰ दीदेथ विश्वऽदर्शतः असि यामेषु अविता पुरःऽहितः असि यज्ञेषु मानुषः ॥१०॥२९॥ नि त्वा यज्ञस्य साधनं अग्ने होतारं ऋत्विजं मनुष्वत् देव धीमहि प्रऽचेतसं जीरं दूतं अमर्त्यं ॥११॥ यत् देवानां मित्रऽमहः पुरःऽहितः अन्तरः यासि दूत्यं सिंधोःऽइव प्रऽस्वनितासः ऊर्मयः अग्नेः भ्राजन्ते अर्चयः ॥१२॥ श्रुधि श्रुत्ऽकर्ण वह्निऽभिः देवैः अग्ने सयावऽभिः आ सीदन्तु बर्हिषि मित्रः अर्यमा प्रातःऽयावानः अध्वरं ॥१३॥ शृण्वन्तु स्तोमं

मरुतः सुऽदानवः अग्निऽजिह्वाः ऋतऽवृधः पिबतु सोमं वरुणः धृतऽव्रतः अश्विऽभ्यां उषसा सऽजूः ॥ १४ ॥ ३० ॥

॥ ४५ ॥ त्वं अग्ने वसून् इह रुद्रान् आदित्यान् उत यजं सुऽअध्वरं जनं मनुऽजातं घृतऽप्रुषं ॥ १ ॥ श्रुष्टीऽवानः हि दाशुषे देवाः अग्ने विऽचेतसः तान् रोहित्ऽअश्व गिर्वणः चयःऽचिंशतं आ वह ॥ २ ॥ प्रियमेधऽवत् अचिऽवत् जातंऽवेदः विरूपऽवत् अंगिरस्वत् महिऽव्रत प्रस्कण्वस्य श्रुधि हवं ॥ ३ ॥ महिऽकेरवः ऊतये प्रियऽमेधाः अहूषत राजंतं अध्वराणां अग्निं शुक्रेण शोचिषा ॥ ४ ॥ घृतऽआहवन संत्य इमाः ऊं सु श्रुधि गिरः याभिः कण्वस्य सूनवः हवंते अवसे त्वा ॥ ५ ॥ ३१ ॥ त्वां चित्रश्रवःऽतम हवंते विक्षु जंतवः शोचिःऽकेशं पुरुऽप्रिय अग्ने हव्याय वोळ्हवे ॥ ६ ॥ नि त्वा होतारं ऋत्विजं दधिरे वसुवित्ऽतमं श्रुत्ऽकर्णं सप्रथःऽतमं विप्राः अग्ने दिविष्टिषु ॥ ७ ॥ आ त्वा विप्राः अचुच्यवुः सुतऽसोमाः अभि प्रयः बृहत् भाः बिभ्रतः हविः अग्ने मर्ताय दाशुषे ॥ ८ ॥ प्रातःऽयावाणः सहःऽकृत सोमऽपेयाय संत्य इह अद्य दैव्यं जनं बर्हिः आ सादय वसो ॥ ९ ॥ अवोचं दैव्यं जनं अग्ने यक्ष्व सहूतिऽभिः अयं सोमः सुऽदानवः तं पात तिरःऽअह्नं ॥ १० ॥ ३२ ॥

॥ ४६ ॥ एषो उषाः अपूर्व्या वि उच्छति प्रिया दिवः स्तुषे वां अश्विना बृहत् ॥ १ ॥ या दस्रा सिंधुऽमातरा मनोतरा रयीणां धिया देवा वसुऽविदा ॥ २ ॥ वच्यंते वां ककुहासः

जूर्णायाँ अधि विष्टपि यत् वां रथः विऽभिः पतात् ॥३॥ हविषा जारः अपां पिपर्ति पपुरिः नरा पिता कुटस्य चर्षणिः ॥४॥ आऽदारः वां मतीनां नासत्या मतऽवचसा पातं सोमस्य धृष्णुऽया ॥५॥३३॥ या नः पीपरत् अश्विना ज्योतिष्मती तमः तिरः तां अस्मे रासाथां इषं ॥६॥ आ नः नावा मतीनां यातं पाराय गंतवे युंजाथाँ अश्विना रथं ॥७॥ अरिचँ वां दिवः पृथु तीर्थे सिंधूनां रथः धिया युयुज्रे इंदवः ॥८॥ दिवः कण्वासः इंदवः वसु सिंधूनां पदे स्वं वव्रिं कुह धित्सथः ॥९॥ अभूत् ऊं भाः ऊं अंशवे हिरण्यं प्रति सूर्यः वि अख्यत् जिह्वया असितः ॥१०॥३४॥ अभूत् ऊं पारं एतवे पंथाः ऋतस्य साधुऽया अदर्शि वि स्रुतिः दिवः ॥११॥ ततऽतंत इत् अश्विनोः अवः जरिता प्रति भूषति मदे सोमस्य पिप्रतोः ॥१२॥ ववसाना विवस्वति सोमस्य पीत्या गिरा मनुष्वत् शंऽभू० आ गतं ॥१३॥ युवोः उषाः अनु श्रियं परिऽज्मनोः उपऽआचरत् ऋता वनथः अक्तुऽभिः ॥१४॥ उभा पिबतं अश्विना उभा नः शर्म यच्छतं अविद्रियाभिः ऊतिऽभिः ॥१५॥३५॥३॥

॥ ४७ ॥ अयं वां मधुमत्ऽतमः सुतः सोमः ऋतऽवृधा तं अश्विना पिबतं तिरःऽअह्न्यं धत्तं रत्नानि दाशुषे ॥१॥ चिऽवंधुरेण चिऽवृता सुऽपेशसा रथेन आ यातं अश्विना कण्वासः वां ब्रह्म कृण्वंति अध्वरे तेषां सु शृणुतं हवं ॥२॥ अश्विना मधुमत्ऽतमं पातं सोमं ऋतऽवृधा अथ अद्य दस्रा वसु बिभ्रता रथे दाश्वांसं उप गच्छतं ॥३॥ चिऽसधस्थे बर्हिषि विश्वऽवेदसा मध्वा यज्ञं मिमिक्षतं कण्वासः वां सुतऽसोमाः अभिऽद्यवः

युवां हवंते अश्विना ॥४॥ याभिः कण्वं अभिष्टिऽभिः प्र आवतं युवं अश्विना ताभिः सु अस्मान् अवतं शुभः पती पातं सोमं ऋतऽवृधा ॥५॥१॥ सुऽदासे दस्रा वसु बिभ्रता रथे पृक्षः वहंतं अश्विना रयिं समुद्रात् उत वा दिवः परि अस्मे धत्तं पुरुऽस्पृहं ॥६॥ यत् नासत्या पराऽवति यत् वा स्थः अधि तुर्वशे अतः रथेन सुऽवृता नः आ गतं साकं सूर्यस्य रश्मिऽभिः ॥७॥ अर्वाचा वां सप्तयः अध्वरऽश्रियः वहंतु सवना इत् उप इषं पृंचंता सुऽकृते सुऽदानवे आ बर्हिः सीदतं नरा ॥८॥ तेन नासत्या आ गतं रथेन सूर्यऽत्वचा येन शश्वत् ऊहथुः दाशुषे वसु मध्वः सोमस्य पीतये ॥९॥ उक्थेभिः अर्वाक् अवसे पुरुऽवसू० अर्कैः च नि ह्वयामहे शश्वत् कण्वानां सदसि प्रिये हि कं सोमं पपथुः अश्विना ॥१०॥२॥

॥ ४८ ॥ सह वामेन नः उषः वि उच्छ दुहितः दिवः सह द्युम्नेन बृहता विभाऽवरि राया देवि दास्वती ॥१॥ अश्वऽवतीः गोऽमतीः विश्वऽसुविदः भूरि च्यवंत वस्तवे उत् ईरय प्रति मा सूनृताः उषः चोद राधः मघोनां ॥२॥ उवास उषाः उच्छात् च नु देवी जीरा रथानां ये अस्याः आऽचरणेषु दध्रिरे समुद्रे न श्रवस्यवः ॥३॥ उषः ये ते प्र यामेषु युंजते मनः दानाय सूरयः अत्र अह तत् कण्वः एषां कण्वऽतमः नाम गृणाति नृणां ॥४॥ आ घ योषाऽइव सूनरी उषाः याति प्रऽभुंजती जरयंती वृजनं पत्ऽवत् ईयते उत् पातयति पक्षिणः ॥५॥३॥ वि या सृजति समनं वि अर्थिनः पदं न वेति ओदती वयः नकिः ते पप्रिऽवांसः आसते विऽउष्टौ वाजिनीऽवति ॥६॥ एषा अयुक्त

परा ऽवर्तः सूर्यस्य उत् ऽअयनात् अधि शतं रथेभिः सु ऽभगा उषाः इयं वि याति अभि मानुषान् ॥७॥ विश्वं अस्याः ननाम चक्षसे जगत् ज्योतिः कृणोति सूनरी अप द्वेषः मघोनी दुहिता दिवः उषाः उच्छत् अप स्निधः ॥८॥ उषः आ भाहि भानुना चंद्रेण दुहितः दिवः आ ऽवहंती भूरि अस्मभ्यं सौभगं वि ऽउच्छंती दिविष्टिषु ॥९॥ विश्वस्य हि प्राणनं जीवनं त्वे वि यत् उच्छसि सूनरि सा नः रथेन बृहता विभा ऽवरि श्रुधि चित्र ऽमघे हवं ॥१०॥४॥ उषः वाजं हि वंस्व यः चित्रः मानुषे जने तेन आ वह सु ऽकृतः अध्वरान् उप ये त्वा गृणंति वह्नयः ॥११॥ विश्वान् देवान् आ वह सोम ऽपीतये अंतरिक्षात् उषः त्वं सा अस्मासु धाः गो ऽमत् अश्व ऽवत् उक्थ्यं उषः वाजं सु ऽवीर्यं ॥१२॥ यस्याः रुशंतः अर्चयः प्रति भद्राः अदृक्षत सा नः रयिं विश्व ऽवारं सु ऽपेशसं उषाः ददातु सुग्म्यं ॥१३॥ ये चित् हि त्वां ऋषयः पूर्वे ऊतये जुहूरे अवसे महि सा नः स्तोमान् अभि गृणीहि राधसा उषः सुक्रेण शोचिषा ॥१४॥ उषः यत् अद्य भानुना वि द्वारौ ऋणवः दिवः प्र नः यच्छतात् अवृकं पृथु छर्दिः प्र देवि गो ऽमती इषः ॥१५॥ सं नः राया बृहता विश्व ऽपेशसा मिमिक्ष्व सं इळाभिः आ सं द्युम्नेन विश्व ऽतुरा उषः महि सं वाजैः वाजिनी ऽवति ॥१६॥५॥

॥४९॥ उषः भद्रेभिः आ गहि दिवः चित् रोचनात् अधि वहंतु अरुण ऽप्सवः उप त्वा सोमिनः गृहं ॥१॥ सु ऽपेशसं सु ऽखं रथं यं अधि ऽअस्थाः उषः त्वं तेन सु ऽश्रवसं जनं प्र अव अद्य दुहितः दिवः ॥२॥ वयः चित् ते पतत्रिणः द्वि ऽपत् चतुः ऽपत्

अर्जुनि उषः प्र आरन् ऋतून् अनु दिवः अंतेभ्यः परि ॥३॥ विऽउच्छंती हि रश्मिऽभिः विश्वं आऽभासि रोचनं तां त्वां उषः वसुऽयवः गीःऽभिः कण्वाः अहूषत ॥४॥६॥

॥५०॥ उत् ऊं त्यं जातऽवेदसं देवं वहंति केतवः दृशे विश्वाय सूर्यं॥१॥ अप त्ये तायवः यथा नक्षंचा यंति अक्तुऽभिः सूराय विश्वऽचक्षसे ॥२॥ अदृश्रं अस्य केतवः वि रश्मयः जनान् अनु भाजंतः अग्नयः यथा॥३॥ तरणिः विश्वऽदर्शतः ज्योतिःऽकृत् असि सूर्य विश्वं आ भासि रोचनं॥४॥ प्रत्यङ् देवानाँ विशः प्रत्यङ् उत् एषि मानुषान् प्रत्यङ् विश्वं स्वः दृशे॥५॥७॥ येन पावक चक्षसा भुरण्यंतं जनान् अनु त्वं वरुण पश्यसि॥६॥ वि द्यां एषि रजः पृथु अहा मिमानः अक्तुऽभिः पश्यन् जन्मानि सूर्य॥७॥ सप्त त्वा हरितः रथे वहंति देव सूर्य शोचिःऽकेशं विऽचक्षण॥८॥ अयुक्त सप्त शुंध्युवः सूरः रथस्य नप्त्यः ताभिः याति स्वयुक्तिऽभिः॥९॥ उत् वयं तमसः परि ज्योतिः पश्यंतः उत्ऽतरं देवं देवऽत्रा सूर्यं अगन्म ज्योतिः उत्ऽतमं॥१०॥ उत्ऽयन् अद्य मित्रऽमहः आऽरोहन् उत्ऽतरां दिवं हृत्ऽरोगं मम सूर्य हरिमाणं च नाशय॥११॥ शुकेषु मे हरिमाणं रोपणाकासु दध्मसि अथो हारिद्रवेषु मे हरिमाणं नि दध्मसि॥१२॥ उत् अगात् अयं आदित्यः विश्वेन सहसा सह द्विषंतं मह्यं रंधयन् मो अहं द्विषते रधं॥१३॥८॥९॥

॥५१॥ अभि त्यं मेषं पुरुऽहूतं ऋग्मियं इंद्रं गीःऽभिः मदत वस्वः अर्णवं यस्य द्यावः न विऽचरंति मानुषा भुजे मंहिष्ठं

अभि विप्रं अर्चत ॥१॥ अभि ईं अवन्वन् सुऽअभिष्टिं ऊतयः अंतरिक्षऽप्रां तविषीभिः आऽवृतं इंद्रं दक्षासः ऋभवः मदऽच्युतं शतऽऋतुं जवनी सूनृता आ अरुहत् ॥२॥ त्वं गोत्रं अंगिरःऽभ्यः अवृणोः अप उत अचंये शतऽदुरेषु गातुऽवित् ससेन चित् विऽमदाय अवहः वसु आजौ अर्दिं ववसानस्य नर्तयन् ॥३॥ त्वं अपां अपिऽधानां अवृणोः अप अधारयः पर्वते दानुऽमत् वसु वृत्रं यत् इंद्र शवसा अवधीः अहिं आत् इत् सूर्यं दिवि आ अरोहयः दृशे ॥४॥ त्वं मायाभिः अप मायिनः अधमः स्वधाभिः ये अधि शुप्तौ अजुह्वत त्वं पिप्रोः नृऽमनः प्र अरुजः पुरः प्र ऋजिश्वानं दस्युऽहत्येषु आविथ ॥५॥९॥ त्वं कुत्सं शुष्णऽहत्येषु आविथ अरंधयः अतिथिऽग्वाय शंबरं महांतं चित् अर्बुदं नि क्रमीः पदा सनात् एव दस्युऽहत्याय जज्ञिषे ॥६॥ त्वे विश्वा तविषी सध्र्यक् हिता तव राधः सोमऽपीथाय हर्षते तव वज्रः चिकिते वाह्वोः हितः वृश्च शचोः अव विश्वानि वृष्ण्या ॥७॥ वि जानीहि आर्यान् ये च दस्यवः बर्हिष्मते रंधय शासत् अव्रतान् शाकी भव यजमानस्य चोदिता विश्वा इत् ता ते सधऽमादेषु चाकन ॥८॥ अनुऽव्रताय रंधयन् अपऽव्रतान् आऽभूभिः इंद्रः शृथयन् अनाभुवः वृद्धस्य चित् वर्धतः द्यां इनक्षतः स्तवानः वज्रः वि जघान संऽदिहः ॥९॥ तक्षत् यत् ते उशना सहसा सहः वि रोदसी मज्मना बाधते शवः आ त्वा वातस्य नृऽमनः मनःऽयुजः आ पूर्यमाणं अवहन् अभि श्रवः ॥१०॥१०॥ मंदिष्ट यत् उशने काव्ये सचा इंद्रः वंकू वंकुऽतरा अधि तिष्ठति उग्रः ययिं निः अपः स्रोतसा असृजत् वि शुष्णस्य दृंहिताः ऐरयत् पुरः ॥११॥ आ स्म रथं वृषऽपानेषु

तिष्ठसि शर्यातस्य प्रऽभृताः येषु मंदसे इंद्र यथा सुतऽसोमेषु चाकनः अनर्वाणं श्लोकं आ रोहसे दिवि ॥१२॥ अदंदाः अभीं महते वचस्यवे कक्षीवते वृचयां इंद्र सुन्वते मेना अभवः वृषणश्वस्य सुऽक्रतो° विश्वा इत् ता ते सवनेषु प्रऽवाच्या ॥१३॥ इंद्रः अश्रायि सुऽध्यः निरेके पज्रेषु स्तोमः दुर्यः न यूपः अश्वऽयुः गव्युः रथऽयुः वसुऽयुः इंद्रः इत् रायः क्षयति प्रऽयंता ॥१४॥ इदं नमः वृषभाय स्वऽराजे सत्यऽशुष्माय तवसे अवाचि अस्मिन् इंद्र वृजने सर्वऽवीराः स्मत् सूरिऽभिः तव शर्मन् स्याम ॥१५॥११॥

॥५२॥ त्यं सु मेषं महया स्वःऽविदं शतं यस्य सुऽभ्वः साकं ईरते अत्यं न वाजं हवनऽस्यदं रथं आ इंद्रं ववृत्यां अवसे सुवृक्तिऽभिः ॥१॥ सः पर्वतः न धरुणेषु अच्युतः सहस्रंऽऊतिः तविषीषु ववृधे इंद्रः यत् वृत्रं अवधीत् नदीऽवृतं उज्जन् अर्णांसि जहिषाणः अंधसा ॥२॥ सः हि द्वरः द्वरिषु ववः ऊधनि चंद्रऽवुभ्रः मदेऽवृधः मनीषिऽभिः इंद्रं तं अह्वे सुऽअपस्यया धिया मंहिष्ठऽरातिं सः हि पप्रिः अंधसः ॥३॥ आ यं पृणंति दिवि सद्मऽबर्हिषः समुद्रं न सुऽभ्वः स्वाः अभिष्टयः तं वृत्रऽहत्ये अनु तस्थुः ऊतयः शुष्माः इंद्रं अवाताः अहुतऽप्सवः ॥४॥ अभि स्वऽवृष्टिं मदे अस्य युध्यतः रघ्वीःऽइव प्रवणे ससुः ऊतयः इंद्रः यत् वज्री धृषमाणः अंधसा भिनत् वलस्य परिधीन्ऽइव त्रितः ॥५॥१२॥ परि ईं घृणा चरति तित्विषे शवः अपः वृत्वी रजसः वुध्नं आ अशयत् वृचस्य यत् प्रवणे दुःऽगृभिस्वनः निऽजघंथ हन्वोः इंद्र तन्यतुं ॥६॥ हृदं न हि त्वा निऽऋषंतं

ऊर्मयः ब्रह्माणि इंद्र तवं यानिं वर्धना त्वष्टा चित् ते युज्यं ववृधे शवः ततक्ष वज्रं अभिभूतिऽओजसं ॥७॥ जघन्वान् ऊं हरिऽभिः संभृतऽक्रतो॰ इंद्र वृचं मनुषे गातुऽयन् अपः अयच्छथाः बाह्वोः वज्रं आयसं अधारयः दिवि आ सूर्यं दृशे ॥८॥ बृहत् स्वऽचेंद्रं अमंऽवत् यत् उक्थ्यं अकृणवत भियसा रोहणं दिवः यत् मानुषऽप्रधनाः इंद्रं ऊतयः स्वः नृऽसाचः मरुतः अमदन् अनु ॥९॥ द्यौः चित् अस्य अमंऽवान् अहेः स्वनात् अयोयवीत् भियसा वज्रः इंद्र ते वृचस्य यत् बबधानस्य रोदसी मदे सुतस्य शवसा अभिनत् शिरः ॥१०॥१३॥ यत् इत् नु इंद्र पृथिवी दशंऽभुजिः अहानि विश्वा ततनंत कृष्टयः अचं अह ते मघऽवन् विऽश्रुतं सहः द्यां अनु शवसा बर्हणा भुवत् ॥११॥ त्वं अस्य पारे रजसः विऽओमनः स्वभूतिऽओजाः अवसे धृषत्ऽमनः चकृषे भूमिं प्रतिऽमानं ओजसः अपः स्वः॰ परिऽभूः एषि आ दिवं ॥१२॥ त्वं भुवः प्रतिऽमानं पृथिव्याः ऋष्वऽवीरस्य बृहतः पतिः भूः विश्वं आ अप्राः अंतरिक्षं महिऽत्वा सत्यं अद्धा नकिः अन्यः त्वाऽवान् ॥१३॥ न यस्य द्यावापृथिवी अनु व्यचः न सिंधवः रजसः अंतं आनशुः न उत स्वऽवृष्टिं मदे अस्य युध्यतः एकः अन्यत् चकृषे विश्वं आनुषक् ॥१४॥ आर्चन् अचं मरुतः सस्मिन् आजौ विश्वे देवासः अमदन् अनु त्वा वृचस्य यत् भृष्टिऽमता वधेन नि त्वं इंद्र प्रति आनं जघंथ ॥१५॥१४॥

॥५३॥ नि ऊं सु वाचं प्र महे भरामहे गिरः इंद्राय सदने विवस्वतः नु चित् हि रत्नं ससतांऽइव अविंदत् न दुःऽस्तुतिः

दूविणः॑ऽदेषु॑ शस्यते ॥१॥ दुरः॑ अश्व॑स्य दुरः॑ इंद्र॒ गोः॑ अ॒सि॒ दुरः॑ यव॑स्य वसु॑नः इ॒नः॑ पति॑ः शिक्षा॑ऽनरः॑ प्र॒ऽदि॒वः॑ अका॑मऽकर्श॒नः॑ सखा॑ सखि॑ऽभ्यः तं इ॒दं गृ॒णी॒म॒सि॒ ॥२॥ शची॑ऽवः इंद्र॒ पुरु॒ऽकृ॒त् द्यु॒म॒त्ऽत॒म॒ तव॑ इत् इ॒दं अ॒भि॒तः चे॒कि॒ते॒ वसु॑ अतः॑ सं॒ऽगृ॒भ्य॑ अ॒भि॒ऽभू॒ते॒ आ भ॑र् मा त्वा॒ऽय॒तः॑ ज॒रि॒तुः॑ काम॑ं ऊन॒यीः॑ ॥३॥ ए॒भिः॑ द्यु॒ऽभिः॑ सु॒ऽम॒नाः॑ ए॒भिः॑ इंदु॑ऽभिः नि॒ऽरु॒धा॒नः॑ अम॑तिं गो॒भिः॑ अ॒श्वि॒ना॑ इंद्रे॑ण दस्यु॑ं द॒र॒यं॑तः इंदु॑ऽभिः युत॒ऽद्वे॑षसः सं इ॒षा र॒भे॒म॒हि॒ ॥४॥ सं इंद्र॒ रा॒या सं इ॒षा र॒भे॒म॒हि॒ सं वाजे॑भिः पुरु॒ऽचं॑द्रैः अ॒भि॒द्यु॒ऽभिः॑ सं दे॒व्या प्र॒ऽम॒न्या॑ वीर॒ऽश्रु॒ष्मया॑ गो॒ऽअ॑श्यया॑ अश्व॑ऽवत्या र॒भे॒म॒हि॒ ॥५॥१५॥ ते त्वा॒ मदाः॑ अ॒म॒द॒न् तानि॑ वृष्ण्या॑ ते सोमा॑सः वृच॒ऽह॒त्ये॑षु सत्ऽप॒ते॒ यत् का॒रवे॑ दश॑ वृ॒चा॒णि॑ अ॒प्र॒ति॒ बर्हि॑ष्मते॒ नि सह॑स्राणि ब॒र्ह॒यः॑ ॥६॥ युधा॑ युधं॑ उप॑ घ॒ इत् ए॒षि॒ धृ॒ष्णु॒ऽया पु॒रा पुरं॑ सं इ॒दं हं॒सि॒ ओज॑सा नम्या॑ यत् इंद्र॒ सख्या॑ परा॑ऽवति॑ नि॒ऽव॒र्ह॒यः॑ नमु॑चिं नाम॑ मा॒यिन॑ं ॥७॥ त्वं क॒रं॑ज॑ं उत॒ प॒र्ण॒यं॑ व॒धीः॑ तेजि॑ष्ठया अति॒थि॒ऽग्व॒स्य॑ व॒र्त॒नी त्वं श॒ता वं॑गृ॒दस्य॑ अ॒भि॒न॒त् पुरः॑ अ॒न॒नु॒ऽदः॑ परि॑ऽसूताः ऋ॒जि॒श्वना॑ ॥८॥ त्वं ए॒ता॒न् ज॒न॒ऽरा॒ज्ञः॑ द्विः दश॑ अ॒ब॒ंधु॒ना॑ सु॒ऽश्र॒व॒सा॒ उप॒ऽज॒ग्मु॒षः॑ ष॒ष्टिं स॒हस्रा॑ न॒व॒तिं नव॑ श्रु॒तः॑ नि च॒क्रेण॑ रथ्या॑ दुः॒ऽपदा॑ अ॒वृ॒ण॒क् ॥९॥ त्वं आ॒वि॒थ॒ सु॒ऽश्र॒व॒सं तव॑ ऊ॒ति॒ऽभिः॑ तव॑ चाम॑ऽभिः इंद्र॒ तू॒र्व॒याणं॑ त्वं अ॒स्मै कुत्सं॑ अ॒ति॒थि॒ऽग्वं आयु॑ं म॒हे रा॒ज्ञे यू॒ने॑ अ॒र॒ं॒ध॒ना॒यः॑ ॥१०॥ ये उत्ऽऋ॑चिं इंद्र॒ देव॑ऽगोपाः सखा॑यः ते॒ शि॒व॒ऽत॒मा॒ः॑ असा॑म त्वां स्तो॒षा॒म॒ त्वया॑ सु॒ऽवी॒राः॑ द्राघी॑यः आयुः॑ प्र॒ऽत॒रं दधा॑नाः ॥११॥१६॥

॥५४॥ मा नः अस्मिन् मघऽवन् पृत्ऽसु अंहसि नहि ते अंतः शवसः परिऽनशे अक्रँदयः नद्यः रोरुवत् वना कथा न क्षोणीः भियसा सं आरत ॥१॥ अर्चं शक्राय शाकिनं शचीऽवते पृक्षयंतं इंद्रं महयन् अभि स्तुहि यः धृष्णुना शवसा रोदसी उभे वृषा वृषऽत्वा वृषभः निऽऋंजते ॥२॥ अर्चं दिवे बृहते शूष्यं वचः स्वऽक्षयं यस्य धृषतः धृषत् मनः बृहत्ऽश्रवाः असुरः बर्हणा कृतः पुरः हरिऽभ्यां वृषभः रथः हि सः ॥३॥ त्वं दिवः बृहतः सानु कोपयः अव त्मना धृषता शंबरं भिनत् यत् मायिनः वंदिनः मंदिना धृषत् शितां गभस्तिं अशनिं पृतन्यसि ॥४॥ नि यत् वृणक्षि श्वसनस्य मूर्धनि शुष्णस्य चित् वंदिनः रोरुवत् वना प्राचीनेन मनसा बर्हणाऽवता यत् अद्य चित् कृणवः कः त्वा परि ॥५॥१७॥ त्वं आविथ नर्यं तुर्वशं यदुं त्वं तुर्वीतिं वय्यं शतऽक्रतो० त्वं रथं एतशं कृत्व्ये धने त्वं पुरः नवतिं दंभयः नव ॥६॥ सः घ राजा सत्ऽपतिः शूशुवत् जनः रातऽहव्यः प्रति यः शासं इन्वति उक्था वा यः अभिऽगृणाति राधसा दानुः अस्मै उपरा पिन्वते दिवः ॥७॥ असमं क्षत्रं असमा मनीषा प्र सोमऽपाः अपसा संतु नेमे ये ते इंद्र ददुषः वर्धयंति महि क्षत्रं स्थविरं वृष्ण्यं च ॥८॥ तुभ्य इत् एते बहुलाः अद्रिऽदुग्धाः चमूऽसदः चमसाः इंद्रऽपानाः वि अश्नुहि तर्पय कामं एषां अथ मनः वसुऽदेयाय कृण्व ॥९॥ अपां अतिष्ठत् धरुणंऽहरं तमः अंतः वृचस्य जठरेषु पर्वतः अभि ईं इंद्रः नद्यः वविणा हिताः विश्वाः अनुऽस्थाः प्रवणेषु जिघ्नते ॥१०॥ सः शेऽवृधं अधि धाः द्युम्नं अस्मे महि क्षत्रं जनाषाट्

इंद्र तव्यँ रक्ष च नः मघोनः पाहि सूरीन् राये च नः सुऽअपत्यै इषे धाः ॥ ११ ॥ १८ ॥

॥ ५५ ॥ दिवः चित् अस्य वरिमा वि पप्रथे इंद्रँ न महा पृथिवी चन प्रति भीमः तुविष्मान् चर्षणिऽभ्यः आऽतपः शिशीते वज्रँ तेजसे न वंसगः ॥ १ ॥ सः अर्णवः न नद्यः समुद्रियः प्रति गृभ्णाति विऽश्रिताः वरीमऽभिः इंद्रः सोमस्य पीतये वृषऽयते सनात् सः युधमः ओजसा पनस्यते ॥ २ ॥ त्वं तं इंद्र पर्वतं न भोजसे महः नृम्णस्य धर्मणां इरज्यसि प्र वीर्येण देवता अति चेकिते विश्वस्मै उग्रः कर्मणे पुरःऽहितः ॥ ३ ॥ सः इत् वने नमस्युऽभिः वचस्यते चारु जनेषु प्रऽब्रुवाणः इंद्रियं वृषा छंदुः भवति हर्यतः वृषा क्षेमेण धेनां मघऽवा यत् इन्वति ॥ ४ ॥ सः इत् महानि संऽइथानि मज्मना कृणोति युधमः ओजसा जनेभ्यः अध चन श्रत् दधति त्विषिऽमते इंद्राय वज्रँ निऽघनिघ्नते वधं ॥ ५ ॥ १९ ॥ सः हि श्रवस्युः सदनानि कृत्रिमा क्षमया वृधानः ओजसा विऽनाशयन् ज्योतींषि कृण्वन् अवृकाणि यज्यवे अव सुऽक्रतुः सर्तवै अपः सृजत् ॥ ६ ॥ दानाय मनः सोमऽपावन् अस्तु ते अर्वाचा हरी वंदनऽश्रुत् आ कृधि यमिष्ठासः सारथयः ये इंद्र ते न त्वा केताः आ दभ्नुवंति भूर्णयः ॥ ७ ॥ अप्रऽक्षितं वसु बिभर्षि हस्तयोः अषाळ्हं सहः तन्वि श्रुतः दधे आऽवृतासः अवतासः न कर्तृऽभिः तनूषु ते क्रतवः इंद्र भूरयः ॥ ८ ॥ २० ॥

॥ ५६ ॥ एषः प्र पूर्वीः अव तस्य चम्रिषः अत्यः न योषाँ उत् अयंस्त भुर्वणिः दक्षं महे पाययते हिरण्ययँ रथं आऽवृत्य

हरिऽयोगं ऋभ्वसं ॥१॥ तं गूर्तयः नेमन्ऽइषः परीणसः समुद्रं न संऽचरणे सनिष्यवः पतिं दक्षस्य विदथस्य नु सहः गिरिं न वेनाः अधि रोह तेजसा ॥२॥ सः तुर्वणिः महान् अरेणु पौंस्ये गिरेः भृष्टिः न भ्राजते तुजा शवः येन शुष्णं मायिनं आयसः मदे दुधः आभूषु रमयत् नि दामनि ॥३॥ देवी यदि तविषी त्वाऽवृधा ऊतये इंद्रं सिसक्ति उषसं न सूर्यः यः धृष्णुना शवसा बाधते तमः इयर्ति रेणुं वृहत् अहरिऽस्वनिः ॥४॥ वि यत् तिरः धरुणं अच्युतं रजः अतिस्थिपः दिवः आतासु बर्हणा स्वःऽमीळ्हे यत् मदे इंद्र हर्ण्या अहन् वृत्रं निः अपां औब्जः अर्णवं ॥५॥ त्वं दिवः धरुणं धिषे ओजसा पृथिव्याः इंद्र सदनेषु माहिनः त्वं सुतस्य मदे अरिणाः अपः वि वृचस्य समया पाण्या अरुजः ॥६॥२१॥

॥५७॥ प्र मंहिष्ठाय बृहते बृहत्ऽरये सत्यऽशुष्माय तवसे मतिं भरे अपांऽइव प्रवणे यस्य दुःऽधरं राधः विश्वऽआयु शवसे अपऽवृतं ॥१॥ अध ते विश्वे अनु ह असत् इष्टये आपः निम्नाऽइव सवना हविष्मतः यत् पर्वते न संऽअशीत हर्यतः इंद्रस्य वज्रः श्वथिता हिरण्ययः ॥२॥ अस्मै भीमाय नमसा सं अध्वरे उषः न शुभ्र आ भर पनीयसे यस्य धाम श्रवसे नाम इंद्रियं ज्योतिः अकारि हरितः न अयसे ॥३॥ इमे ते इंद्र ते वयं पुरुऽस्तुत ये त्वा आऽरभ्य चरामसि प्रभुऽवसो॰ नहि त्वत् अन्यः गिर्वणः गिरः सघत् क्षोणीःऽइव प्रति नः हर्य तत् वचः ॥४॥ भूरि ते इंद्र वीर्यं तव स्मसि अस्य स्तोतुः मघऽवन् कामं आ पृण अनु ते द्यौः बृहती वीर्यं ममे इयं च ते पृथिवी

नेमे ओजसे ॥५॥ त्वं तं इंद्र पर्वतं महां उरुं वज्रेण वज्रिन् पर्वऽशः चकर्तिथ अव असृजः निऽवृताः सर्तवे अपः सचा विश्वं दधिषे केवलं सहः ॥६॥२२॥१०॥

॥५८॥ नु चित् सहःऽजाः अमृतः नि तुंदते होता यत् दूतः अभवत् विवस्वतः वि साधिष्ठेभिः पथिऽभिः रजः ममे आ देवऽताता हविषा विवासति ॥१॥ आ स्वं अग्ने युवमानः अजरः तृषु अविष्यन् अतसेषु तिष्ठति अत्यः न पृष्ठं प्रुषितस्य रोचते दिवः न सानु स्तनयन् अचिक्रदत् ॥२॥ क्राणा रुद्रेभिः वसुऽभिः पुरःऽहितः होता निऽसत्तः रयिषाट् अमर्त्यः रथः न विक्षु ऋंजसानः आयुषु वि आनुषक् वार्या देवः ऋण्वति ॥३॥ वि वातऽजूतः अतसेषु तिष्ठते वृथा जुहूभिः सृण्या तुविऽस्वनिः तृषु यत् अग्ने वनिनः वृषऽयसे कृष्णं ते एमं रुशत्ऽऊर्मे अजर ॥४॥ तपुःऽजंभः वने आ वातऽचोदितः यूथे न सह्वान् अव वाति वंसगः अभिऽव्रजन् अक्षितं पाजसा रजः स्थातुः चरथं भयते पतत्रिणः ॥५॥२३॥ दधुः त्वा भृगवः मानुषेषु आ रयिं न चारुं सुऽहवं जनेभ्यः होतारं अग्ने अतिथिं वरेण्यं मित्रं न शेवं दिव्याय जन्मने ॥६॥ होतारं सप्त जुह्वः यजिष्ठं यं वाघतः वृणते अध्वरेषु अग्निं विश्वेषां अरतिं वसूनां सपर्यामि प्रयसा यामि रत्नं ॥७॥ अच्छिद्रा सूनो सहसः नः अद्य स्तोतृऽभ्यः मित्रऽमहः शर्म यच्छ अग्ने गृणंते अंहसः उरुष्य ऊर्जः नपात् पूःऽभिः आयसीभिः ॥८॥ भव वरूथं गृणते विभाऽवः भव मघऽवन् मघवत्ऽभ्यः शर्म उरुष्य अग्ने अंहसः गृणंते प्रातः मक्षु धियाऽवसुः जगम्यात् ॥९॥२४॥

॥५९॥ वयाः इत् अग्ने अग्नयः ते अन्ये त्वे विश्वे अमृताः मादयंते वैश्वानर नाभिः असि क्षितीनां स्थूणाऽइव जनान् उपऽमित् ययंथ ॥१॥ मूर्धा दिवः नाभिः अग्निः पृथिव्याः अथ अभवत् अरतिः रोदस्योः तं त्वा देवासः अजनयंत देवं वैश्वानर ज्योतिः इत् आर्याय ॥२॥ आ सूर्ये न रश्मयः ध्रुवासः वैश्वानरे दधिरे अग्ना वसूनि या पर्वतेषु ओषधीषु अप्ऽसु या मानुषेषु असि तस्य राजा ॥३॥ बृहतीऽइव० सूनवे रोदसी गिरः होता मनुर्यः न दक्षः स्वःऽवते सत्यऽशुष्माय पूर्वीः वैश्वानराय नृऽतमाय यह्वीः ॥४॥ दिवः चित् ते बृहतः जातऽवेदः वैश्वानर प्र रिरिचे महिऽत्वं राजा कृष्टीनां असि मानुषीणां युधा देवेभ्यः वरिवः चकर्थ ॥५॥ प्र नु महिऽत्वं वृषभस्य वोचं यं पूरवः वृचऽहनं सचंते वैश्वानरः दस्युं अग्निः जघन्वान् अधूनोत् काष्ठाः अव शंबरं भेत् ॥६॥ वैश्वानरः महिम्ना विश्वऽकृष्टिः भरत्ऽवाजेषु यजतः विभाऽवा शातऽवनेये शतिनीभिः अग्निः पुरुऽनीथे जरते सूनृतांऽवान् ॥७॥२५॥

॥६०॥ वह्निं यशसं विदथस्य केतुं सुप्रऽअग्र्यं दूतं सद्यःऽअर्पे द्विऽजन्मानं रयिंऽइव प्रऽशस्तं रातिं भरत् भृगवे मातरिश्वा ॥१॥ अस्य शासुः उभयासः सचंते हविष्मंतः उशिजः ये च मर्ताः दिवः चित् पूर्वः नि असादि होता आऽपृच्छ्यः विशपतिः विक्षु वेधाः ॥२॥ तं नव्यसी हृदः आ जायमानं अस्मत् सुऽकीर्तिः मधुऽजिह्वं अश्याः यं ऋत्विजः वृजने मानुषासः प्रयस्वंतः आयवः जीजनंत ॥३॥ उशिक् पावकः वसुः मानुषेषु

वरेण्यः होता अधायि विक्षु दमूनाः गृहऽपतिः दमे आ अग्निः भुवत् रयिऽपतिः रयीणां ॥४॥ तं त्वा वयं पतिं अग्ने रयीणां प्र शंसामः मतिऽभिः गोतमासः आप्सुं न वाजंऽभरं मर्जयंतः प्रातः मक्षु धियाऽवसुः जगम्यात् ॥५॥२६॥

॥६१॥ अस्मै इत् ऊं प्र तवसे तुराय प्रयः न हर्मि स्तोमं माहिनाय ऋचीषमाय अर्भेऽगवे ओहैं इंद्राय ब्रह्माणि रातऽतमा ॥१॥ अस्मै इत् ऊं प्रयःऽइव प्र यंसि भरामि आंगूषं बाधे सुऽवृक्ति इंद्राय हृदा मनसा मनीषा प्रत्नाय पत्ये धियः मर्जयंत ॥२॥ अस्मै इत् ऊं त्यं उपऽमं स्वःऽसां भरामि आंगूषं आस्येन मंहिष्ठं अच्छोक्तिऽभिः मतीनां सुवृक्तिऽभिः सूरिं ववृधध्यै ॥३॥ अस्मै इत् ऊं स्तोमं सं हिनोमि रथं न तष्टाऽइव तत्ऽसिनाय गिरः च गिर्वाहसे सुऽवृक्ति इंद्राय विष्वंऽइन्वं मेधिराय ॥४॥ अस्मै इत् ऊं सप्तिंऽइव श्रवस्या इंद्राय अर्कं जुह्वा सं अंजे वीरं दानऽओकसं वंदध्यै पुरां गूर्तऽश्रवसं दर्माणं ॥५॥२७॥ अस्मै इत् ऊं त्वष्टा तक्षत् वज्रं स्वपःऽतमं स्वर्यं रणाय वृचस्यं चित् विदत् येन मर्मं तुजन् ईशानः तुजता कियेधाः ॥६॥ अस्य इत् ऊं मातुः सवनेषु सद्यः महः पितुं पपिऽवान् चारु अर्चा मुषायत् विष्णुः पचतं सहीयान् विध्यंत् वराहं तिरः अद्रिं अस्ता ॥७॥ अस्मै इत् ऊं माः चित् देवऽपत्नीः इंद्राय अर्कं अहिऽहत्ये ऊवुः० परि द्यावापृथिवी जभ्रे उर्वी न अस्य ते महिमानं परि ष्टः० ॥८॥ अस्य इत् एव प्र रिरिचे महिऽत्वं दिवः पृथिव्याः परि अंतरिक्षात् स्वऽराट् इंद्रः दमे आ विश्वऽगूर्तः सुऽअरिः अमंत्रः ववक्षे रणाय ॥९॥

अस्य इत् एव शवसा शुषंतं वि वृश्चत् वज्रेण वृत्रं इंद्रः गाः न व्राणाः अवनीः अमुंचत् अभि श्रवः दावने सऽचेताः ॥१०॥२८॥ अस्य इत् ऊं त्वेषसा रंत सिंधवः परि यत् वज्रेण सीं अयंच्छत् ईशानऽकृत् दाशुषे दशस्यन् तुर्वीतये गाधं तुर्वणिः कः० ॥११॥ अस्मै इत् ऊं प्र भर तूतुजानः वृत्राय वज्रं ईशानः किये धाः गोः न पर्वं वि रद तिरश्चा इष्यन् अर्णांसि अपां चरध्यै ॥१२॥ अस्य इत् ऊं प्र ब्रूहि पूर्व्याणि तुरस्य कर्माणि नव्यः उक्थ्यैः युधे यत् इष्णानः आयुधानि ऋघायमाणः निऽरिणाति शत्रून् ॥१३॥ अस्य इत् ऊं भिया गिरयः च दृळ्हाः द्यावा च भूम जनुषः तुजेते उपो वेनस्य जोगुवानः ओणिं सद्यः भुवत् वीर्याय नोधाः ॥१४॥ अस्मै इत् ऊं त्यत् अनु दायि एषां एकः यत् ववे भूरेः ईशानः प्र एतशं सूर्ये पस्पृधानं सौवश्व्ये सुस्विं आवत् इंद्रः ॥१५॥ एव ते हारिऽयोजन सुऽवृक्ति इंद्र ब्रह्माणि गोतमासः अक्रन् आ एषु विश्वऽपेशसं धियं धाः प्रातः मक्षु धियाऽवसुः जगम्यात् ॥१६॥२९॥४॥

॥ ६२ ॥ प्र मन्महे शवसानाय शूषं आंगूषं गिर्वणसे अंगिरस्वत् सुवृक्तिऽभिः स्तुवते ऋग्मियाय अर्चाम अर्कं नरे विऽश्रुताय ॥१॥ प्र वः महे महि नमः भरध्वं आंगूष्यं शवसानाय साम येन नः पूर्वे पितरः पदज्ञाः अर्चंतः अंगिरसः गाः अविंदन् ॥२॥ इंद्रस्य अंगिरसां च इष्टौ विदत् सरमा तनयाय धासिं बृहस्पतिः भिनत् अद्रिं विदत् गाः सं उस्रियाभिः वावशंत नरः ॥३॥ सः सुऽस्तुभा सः स्तुभा सप्त विप्रैः स्वरेण अद्रिं स्वर्यः नवऽग्वैः सरण्युऽभिः फलिऽगं इंद्र शक्र वलं

रवेण दरयः दशऽग्वैः ॥४॥ गृणानः अंगिरःऽभिः दस्म वि वः उषसः सूर्येण गोभिः अंधः वि भूम्याः अप्रथयः इंद्र सानु दिवः रजः उपरं अस्तभायः ॥५॥१॥ तत् ऊं प्रयक्षऽतमं अस्य कर्म दस्मस्य चारुऽतमं अस्ति दंसः उपऽह्वरे यत् उपराः अपिन्वत् मधुऽअर्णसः नद्यः चतस्रः ॥६॥ द्विता वि वव्रे सनऽजा सऽनीळः अयास्यः स्तवमानेभिः अर्कैः भगः न मेनें परमे विऽओमन् अधारयत् रोदसी सुऽदंसाः ॥७॥ सनात् दिवं परि भूमं विऽरूपे पुनःऽभुवा युवती स्वेभिः एवैः कृष्णेभिः अक्ता उषाः रुशत्ऽभिः वपुःऽभिः आ चरतः अन्याऽअन्या ॥८॥ सनेमि सख्यं सुऽअपस्यमानः सूनुः दाधार शवसा सुऽदंसाः आमासु चित् दधिषे पक्वं अंतः पयः कृष्णासु रुशत् रोहिणीषु ॥९॥ सनात् सऽनीळाः अवनीः अवाताः व्रता रक्षंते अमृताः सहःऽभिः पुरुसहस्राः जनयः न पत्नीः दुवस्यंति स्वसारः अह्रयाणं ॥१०॥२॥ सनाऽयुवः नमसा नव्यः अर्कैः वसुऽयवः मतयः दस्म दद्रुः पतिं न पत्नीः उशतीः उशंतं स्पृशंति त्वा शवसाऽवन् मनीषाः ॥११॥ सनात् एव तव रायः गभस्तौ न क्षीयंते न उप दस्यंति दस्म द्युऽमान् असि क्रतुऽमान् इंद्र धीरः शिक्ष शचीऽवः तव नः शचीभिः ॥१२॥ सनाऽयते गोतमः इंद्र नव्यं अतक्षत् ब्रह्म हरिऽयोजनाय सुऽनीथाय नः शवसान् नोधाः प्रातः मक्षु धियाऽवसुः जगम्यात् ॥१३॥३॥

॥६३॥ त्वं महान् इंद्र यः ह शुष्मैः द्यावा जज्ञानः पृथिवी अमे धाः यत् ह ते विश्वा गिरयः चित् अभ्वा भिया दळ्हासः किरणाः न ऐजन् ॥१॥ आ यत् हरी इंद्र विऽवंता वेः आ ते

वज्रँ जरिता बाह्वोः धात् येन अविहर्यतऽक्रतो० अमित्रान् पुरः इष्णासि पुरुऽहूत पूर्वीः ॥२॥ त्वं सत्यः इंद्र धृष्णुः एतान् त्वं ऋभुक्षाः नर्यः त्वं षाट् त्वं शुष्णं वृजने पृक्षे आणौ यूने कुत्साय द्युऽमते सचा अहन् ॥३॥ त्वं ह त्यत् इंद्र चोदीः सखा वृचं यत् वज्रिन् वृषऽकर्मन् उभ्नाः यत् ह शूर वृषऽमनः परा चैः वि दस्यून् योनौ अकृतः वृथाषाट् ॥४॥ त्वं ह त्यत् इंद्र अरिषण्यन् हव्हस्य चित् मतीनां अजुष्टौ वि अस्मत् आ काष्ठाः अर्वते वः घनाऽइव वज्रिन् श्रथिहि अमित्रान् ॥५॥४॥ त्वां ह त्यत् इंद्र अर्णेऽसातौ स्वःऽमीळ्हे नरः आजा हवंते तव स्वधाऽवः इयं आ सऽमर्ये ऊतिः वाजेषु अतसाय्या भूत् ॥६॥ त्वं ह त्यत् इंद्र सप्त युध्यन् पुरः वज्रिन् पुरुऽकुत्साय दर्दः० बर्हिः न यत् सुऽदासे वृथा वर्क् अंहोः राजन् वरिवः पूरवे कः० ॥७॥ त्वं त्यां नः इंद्र देव चित्रां इषं आपः न पीपयः परिऽज्मन् यया शूर प्रति अस्मभ्यं यंसि त्मनं ऊर्जे न विश्वध क्षरध्यै ॥८॥ अकारि ते इंद्र गोतमेभिः ब्रह्माणि आऽउक्था नमसा हरिऽभ्यां सुऽपेशसं वाजं आ भर नः प्रातः मक्षु धियाऽवसुः जग-म्यात् ॥९॥५॥

॥६४॥ वृष्णे शर्धाय सुऽमखाय वेधसे नोधः सुऽवृक्तिं प्र भर मरुत्ऽभ्यः अपः न धीरः मनसा सुऽहस्त्यः गिरः सं अंजे विदथेषु आऽभुवः ॥१॥ ते जज्ञिरे दिवः ऋष्वासः उक्षणः रुद्रस्य मर्याः असुराः अरेपसः पावकासः शुचयः सूर्याःऽइव सत्वानः न दृप्सिनः घोरऽवर्पसः ॥२॥ युवानः रुद्राः अजराः अभोक्ऽहनः ववक्षुः अधिऽगावः पर्वताःऽइव हव्हा चित् विश्वा भुवनानि

पार्थिवा प्र च्यवयंति दिव्यानि मज्मना ॥३॥ चित्रैः अंजिऽभिः वपुषे वि अंजते वक्षःऽसु रुक्मान् अधि येतिरे शुभे अंसेषु एषां नि मिमृक्षुः ऋष्टयः साकं जज्ञिरे स्वधया दिवः नरः ॥४॥ ईशानऽकृतः धुनयः रिशादसः वातान् विऽद्युतः तविषीभिः अक्रत दुहंति ऊधः दिव्यानि धूतयः भूमिं पिन्वंति पयसा परिऽज्रयः ॥५॥६॥ पिन्वंति अपः मरुतः सुऽदानवः पयः घृतऽवत् विदथेषु आऽभुवः अत्यं न मिहे वि नयंति वाजिनं उत्सं दुहंति स्तनयंतं अक्षितं ॥६॥ महिषासः मायिनः चित्रऽभानवः गिरयः न स्वऽतवसः रघुऽस्यदः मृगाःऽइव हस्तिनः खादथ वना यत् आरुणीषु तविषीः अयुग्ध्वं ॥७॥ सिंहाःऽइव नानदति प्रऽचेतसः पिशाःऽइव सुऽपिशः विश्वऽवेदसः क्षपः जिन्वंतः पृषतीभिः ऋष्टिऽभिः सं इत् सुऽबाधः शर्वसा अहिंऽमन्यवः ॥८॥ रोदसी आ वदत गणऽश्रियः नृऽसाचः शूराः शर्वसा अहिंऽमन्यवः आ बंधुरेषु अमतिः न दर्शता विऽद्युत् न तस्थौ मरुतः रथेषु वः ॥९॥ विश्वऽवेदसः रयिऽभिः संऽओकसः संऽमिश्लासः तविषीभिः विऽरप्शिनः अस्तारः इषुं दधिरे गभस्त्योः अनंतऽशुष्माः वृषऽखादयः नरः ॥१०॥७॥ हिरण्ययेभिः पविऽभिः पयःऽवृधः उत् जिघ्नंते आऽपथ्यः न पर्वतान् मखाः अयासः स्वऽसृतः ध्रुवऽच्युतः दुघ्रऽकृतः मरुतः भ्राजदृष्टयः ॥११॥ घृषुं पावकं वनिनं विऽचर्षणिं रुद्रस्य सूनुं हवसा गृणीमसि रजःऽतुरं तवसं मारुतं गणं ऋतजीषिणं वृषणं सश्चत श्रिये ॥१२॥ प्र नु सः मर्तः शर्वसा जनान् अति तस्थौ वः ऊती मरुतः यं आवत अर्वत्ऽभिः वाजं भरते धना नृऽभिः आऽपृक्षयं क्रतुं आ क्षेति

पुर्यन्ति ॥१३॥ चर्कृत्यँ मरुतः पृत्ऽसु दुस्तरँ द्युऽमंतँ शुष्मँ मघवंत्ऽसु धत्तन धनऽस्पृतँ उक्थ्यँ विश्वऽचर्षणिं तोकं पुष्येम तनयं शतं हिमाः॥१४॥ नु स्थिरं मरुतः वीरऽवँतं ऋतिऽसहँ रयिं अस्मासु धत्त सहस्रिणँ शतिनँ शूशुऽवांसँ प्रातः मक्षु धियाऽवसुः जगम्यात् ॥१५॥८॥११॥

॥ ६५ ॥ पश्वा न तायुं गुहा चतँतं नमः युजानं नमः वहँतं सऽजोषाः धीराः पदैः अनु ग्मन् उप त्वा सीदन् विश्वे यजचाः॥१॥ ऋतस्य देवाः अनु व्रता गुः भुवत् परिष्टिः द्यौः न भूम वर्धंति ईं आपः पन्वा सुऽशिंश्विं ऋतस्य योना गर्भे सुऽजातं॥२॥ पुष्टिः न रण्वा क्षितिः न पृथ्वी गिरिः न भुज्म क्षोदः न शंऽभु अत्यः न अज्मन् सर्गऽप्रतक्तः सिंधुः न क्षोदः कः ईं वरातेे॥३॥ जामिः सिंधूनां भ्राताऽइव स्वस्रां इभ्यान् न राजा वनानि अत्ति यत् वातऽजूतः वना वि अस्थात् अग्निः ह दाति रोमं पृथिव्याः॥४॥ श्वसिति अप्ऽसु हंसः न सीदन् क्रत्वा चेतिष्ठः विशां उषःऽभुत् सोमः न वेधाः ऋतऽप्रजातः पप्रुः न शिप्रा विऽभुः दूरेऽभाः ॥५॥९॥

॥ ६६ ॥ रयिः न चित्रा सूरः न संऽदृक् आयुः न प्राणः नित्यः न सूनुः तक्षा न भूर्णिः वना सिस्क्ति पयः न धेनुः शुचिः विभाऽवा ॥१॥ दाधार क्षेमं ओकः न रण्वः यवः न पक्वः जेता जनानां ऋषिः न स्तुभ्वा विक्षु प्रऽशस्तः वाजी न प्रीतः वयः दधाति ॥२॥ दुरोकऽशोचिः क्रतुः न नित्यः जायाऽइव योनौ अरं विश्वस्मै चित्रः यत् अभात् श्वेतः न विक्षु रथः न रुक्मी त्वेषः

सुमत्ऽसु ॥३॥ सेनाऽइव सृष्टा अमं दधाति अस्तुः न द्युत् त्वेषऽप्रतीका यमः ह जातः यमः जनिऽत्वं जारः कनीनां पतिः जनीनां ॥४॥ तं वः चराथा वयं वसत्या अस्तं न गावः नक्षंते द्रुहं सिंधुः न क्षोदः प्र नीचीः ऐनोत् नवंत गावः स्वः दृशीके ॥५॥१०॥

॥६७॥ वनेषु जायुः मतेषु मिचः वृणीते श्रुष्टिं राजाऽइव अजुर्ये क्षेमः न साधुः ऋतुः न भद्रः भुवत् सुऽआधीः होता हव्यऽवाट् ॥१॥ हस्ते दधानः नृम्णा विश्वानि अमे देवान् धात् गुहा निऽसीदन् विदंति ईं अचं नरः धियंऽधाः हृदा यत् तष्टान् मंचान् अशंसन् ॥२॥ अजः न क्षां दाधार पृथिवीं तस्तंभ द्यां मंत्रेभिः सत्यैः प्रिया पदानि पश्वः नि पाहि विश्वऽआयुः अग्ने गुहा गुहं गाः ॥३॥ यः ईं चिकेत गुहा भवंतं आ यः ससाद धारां ऋतस्य वि ये चृतंति ऋता सपंतः आत् इत् वसूनि प्र ववाच अस्मै ॥४॥ वि यः वीरुत्ऽसु रोधत् महिऽत्वा उत प्रऽजाः उत प्रऽसूषु अंतः चित्तिः अपां दमे विश्वऽआयुः सद्मऽइव धीराः संऽमाय चक्रुः ॥५॥११॥

॥६८॥ श्रीणन् उप स्थात् दिवं भुरण्युः स्थातुः चरथं अक्तून् वि ऊर्णोत् परि यत् एषां एकः विश्वेषां भुवत् देवः देवानां महिऽत्वा ॥१॥ आत् इत् ते विश्वे ऋतुं जुषंत शुष्कात् यत् देव जीवः जनिष्ठाः भजंत विश्वे देवऽत्वं नाम ऋतं सपंतः अमृतं एवैः ॥२॥ ऋतस्य प्रेषाः ऋतस्य धीतिः विश्वऽआयुः विश्वे अपांसि चक्रुः यः तुभ्यं दाशात् यः वा ते शिक्षात् तस्मै चिकि-

त्वान् रयिं दयस्व ॥ ३ ॥ होता निऽसत्तः मनोः अपत्ये सः चित् नु आसां पतिः रयीणां इच्छंत रेतः मिथः तनूषु सं जानत स्वैः दक्षैः अमूराः ॥ ४ ॥ पितुः न पुचाः ऋतुं जुषंत श्रोषन् ये अस्य शासं तुरासः वि रायः और्णोत् दुरः पुरुऽक्षुः पिपेश नाकं स्तृभिः दमूनाः ॥ ५ ॥ १२ ॥

॥ ६९ ॥ शुक्रः शुशुक्वान् उषः न जारः पप्रा संऽईची० दिवः न ज्योतिः परि प्रऽजातः ऋवा बभूथ भुवः देवानां पिता पुचः सन् ॥ १ ॥ वेधाः अदब्धः अग्निः विऽजानन् ऊधः न गोनां स्वाद्म पितूनां जने न शेवः आऽहूर्यः सन् मध्ये निऽसत्तः रण्वः दुरोणे ॥ २ ॥ पुचः न जातः रण्वः दुरोणे वाजी न प्रीतः विशः वि तारीत् विशः यत् अर्हे नृऽभिः सऽनीळाः अग्निः देवऽत्वा विश्वानि अश्याः ॥ ३ ॥ नकिः ते एता व्रता मिनंति नृऽभ्यः यत् एभ्यः श्रुष्टिं चकर्थ तत् तु ते दंसः यत् अहन् समानैः नृऽभिः यत् युक्तः विवेः रपांसि ॥ ४ ॥ उषः न जारः विभाऽवा उस्रः संज्ञातऽरूपः चिकैतत् अस्मै त्मना वहंतः दुरः वि ऋण्वन् नवंत विश्वे स्वः दृशीके ॥ ५ ॥ १३ ॥

॥ ७० ॥ वनेम पूर्वीः अर्यः मनीषा अग्निः सुऽशोकः विश्वानि अश्याः आ दैव्यानि व्रता चिकित्वान् आ मानुषस्य जनस्य जन्म ॥ १ ॥ गर्भः यः अपां गर्भः वनानां गर्भः च स्थातां गर्भः चरथां अद्रौ चित् अस्मै अंतः दुरोणे विशां न विश्वः अमृतः सुऽआधीः ॥ २ ॥ सः हि क्षपाऽवान् अग्निः रयीणां दाशत् यः अस्मै अरं सुऽउक्तैः एता चिकित्वः भूम नि पाहि देवानां जन्म

मर्तान् च विद्वान् ॥३॥ वर्धान् यं पूर्वीः क्षपः विऽरूपाः स्थातुः च रथं ऋतऽप्रवीतं अराधि होता स्वः निऽसत्तः कृण्वन् विश्वानि अपांसि सत्या ॥४॥ गोषु प्रऽशस्तिं वनेषु धिषे भरंत विश्वे बलिं स्वः नः वि त्वा नरः पुरुऽचा सपर्यन् पितुः न जिव्रेः वि वेदः भरंत ॥५॥ साधुः न गृभुः अस्ताऽइव शूरः यातांऽइव भीमः त्वेषः समत्ऽसु ॥६॥१४॥

॥७१॥ उप प्र जिन्वन् उशतीः उशंतं पतिं न नित्यं जनयः सऽनीळाः स्वसारः श्यावीं अरुषीं अजुषन् चितं उच्छंतीं उषसं न गावः ॥१॥ वीळु चित् दृळ्हा पितरः नः उक्थैः अद्रिं रुजन् अंगिरसः रवेण चक्रुः दिवः बृहतः गातुं अस्मे अहः स्वः विविदुः केतुं उस्राः ॥२॥ दधन् ऋतं धनयन् अस्य धीतिं आत् इत् अर्यः दिधिषवः विऽभृचाः अतृप्यंतीः अपसः यंति अच्छ देवान् जन्म प्रयसा वर्धयंतीः ॥३॥ मथीत् यत् ईं विऽभृतः मातरिश्वा गृहेऽगृहे श्येतः जेन्यः भूत् आत् ईं राज्ञे न सहीयसे सचा सन् आ दूत्यं भृगवाणः विवाय ॥४॥ महे यत् पित्रे ईं रसं दिवे कः अव त्सरत् पृश्न्यः चिकित्वान् सृजत् अस्ता धृषता दिद्युं अस्मै स्वायां देवः दुहितरि त्विषिं धात् ॥५॥१५॥ स्वे आ यः तुभ्यं दमे आ विऽभाति नमः वा दाशात् उशतः अनु द्यून् वधीं अग्ने वयः अस्य द्विऽबर्हाः यासत् राया सऽरथं यं जुनासि ॥६॥ अग्निं विश्वाः अभि पृक्षः सचंते समुद्रं न स्रवतः सप्त यह्वीः न जामिऽभिः वि चिकिते वयः नः विदाः देवेषु प्रऽमतिं चिकित्वान् ॥७॥ आ यत् इषे नृऽपतिं तेजः आनट् शुचि रेतः निऽसिक्तं द्यौः अभीके अग्निः शर्धं अनवद्यं

युवानं सुऽआध्यं जनयत् सूदयत् च ॥८॥ मनः न यः अध्वनः सद्यः एति एकः सचा सूरः वस्वः ईशे राजाना मित्रावरुणा सुऽपाणी० गोषु प्रियं अमृतं रक्षमाणा ॥९॥ मा नः अग्ने सख्या पित्र्याणि प्र मर्षिष्ठाः अभि विदुः कविः सन् नभः न रूपं जरिमा मिनाति पुरा तस्याः अभिऽशस्तेः अधि इहि॥१०॥१६॥

॥७२॥ नि काव्या वेधसः शश्वतः कः हस्ते दधानः नर्या पुरूणि अग्निः भुवत् रयिऽपतिः रयीणां सचा चक्राणः अमृतानि विश्वा॥१॥ अस्मे वत्सं परि षंतं न विंदन् इच्छंतः विश्वे अमृताः अमूराः श्रमऽयुवः पदऽव्यः धियंऽधाः तस्थुः पदे परमे चारु अग्नेः ॥२॥ तिस्रः यत् अग्ने शरदः त्वां इत् शुचिं घृतेन शुचयः सपर्यान् नामानि चित् दधिरे यज्ञियानि असूदयंत तन्वः सुऽजाताः॥३॥ आ रोदसी वृहती वेविदानाः प्र रुद्रिया जभ्रिरे यज्ञियासः विदत् मर्तः नेमऽधिता चिकित्वान् अग्निं पदे परमे तस्थिऽवांसं ॥४॥ संऽजानानाः उप सीदन् अभिऽज्ञु पत्नीऽवंतः नमस्यं नमस्यन् रिरिक्वांसः तन्वः कृण्वत स्वाः सखा सख्युः निऽमिषि रक्षमाणाः॥५॥१७॥ चित्रः सन्न यत् गुह्यानि वे इत् पदा अविदन् निऽहिता यज्ञियासः तेभिः रक्षंते अमृतं सऽजोषाः पश्यन् च स्थातॄन् चरथं च पाहि ॥६॥ विद्वान् अग्ने वयुनानि क्षितीनां वि आनुषक् पुरुधः जीवसे धाः अंतःऽविद्वान् अध्वनः देवऽयानान् अतंद्रः दूतः अभवः हविःऽवाट्॥७॥ सुऽआध्यः दिवः आ सन्न यह्वीः रायः दुरः वि ऋतऽज्ञाः अजानन् विदत् गव्यं सरमा दृळ्हं ऊर्वं येन नु कं मानुषी भोजते विट् ॥८॥ आ ये विश्वा सुऽअपत्यानि तस्थुः कृण्वानासः अमृ-

नऽत्वाय गातुं महा महत्ऽभिः पृथिवी वि तस्थे माता पुत्रैः अदितिः धायसे वेः० ॥९॥ अधि श्रियं नि दधुः चारुं अस्मिन् दिवः यत् अक्षी अमृताः अकृण्वन् अध क्षरंति सिंधवः न सृष्टाः प्र नीचीः अग्ने अरुषीः अजानन् ॥१०॥१८॥

॥७३॥ रयिः न यः पितृऽवित्तः वयःऽधाः सुऽप्रनीतिः चिकितुषः न शासुः स्योनऽशीः अतिथिः न प्रीणानः होताऽइव सद्म विधतः वि तारीत् ॥१॥ देवः न यः सविता सत्यऽमन्मा क्रत्वा निऽपाति वृजनानि विश्वा पुरुऽप्रशस्तः अमतिः न सत्यः आत्माऽइव शेवः दिधिषाय्यः भूत् ॥२॥ देवः न यः पृथिवीं विश्वऽधायाः उपऽक्षेति हितऽमित्रः न राजा पुरःऽसदः शर्मऽसदः न वीराः अनवद्या पतिंजुष्टाऽइव नारी ॥३॥ तं त्वा नरः दमे आ नित्यं इद्धं अग्ने सचंत क्षितिषु ध्रुवासु अधि द्युम्नं नि दधुः भूरि अस्मिन् भव विश्वऽआयुः धरुणः रयीणां ॥४॥ वि पृक्षः अग्ने मघऽवानः अश्युः वि सूरयः ददतः विश्वं आयुः सनेम वाजं संऽइत्येषु अर्यः भागं देवेषु श्रवसे दधानाः ॥५॥१९॥ ऋतस्य हि धेनवः वावशानाः स्मत्ऽऊधीः पीपयंत द्युऽभक्ताः पराऽवतः सुऽमतिं भिक्षमाणाः वि सिंधवः समया सस्रुः अद्रिं ॥६॥ त्वे अग्ने सुऽमतिं भिक्षमाणाः दिवि श्रवः दधिरे यज्ञियासः नक्ता च चक्रुः उषसा विऽरूपे० कृष्णं च वर्णं अरुणं च संधुः० ॥७॥ यान् राये मर्तान् सुषूदः अग्ने ते स्याम मघऽवानः वयं च छायाऽइव विश्वं भुवनं सिसक्षि आपप्रिऽवान् रोदसी अंतरिक्षं ॥८॥ अर्वत्ऽभिः अग्ने अर्वतः नृऽभिः नॄन् वीरैः वीरान् वनुयाम त्वाऽऊताः ईशानासः पितृऽवित्तस्य रायः वि

सूरयः शतऽहिमाः नः अश्युः॥९॥ एता ते अग्ने उचथानि वेधः जुष्टानि संतु मनसे हृदे च शकेम रायः सुऽधुरः यमं ते अधि श्रवः देवऽभक्तं दधानाः ॥१०॥२०॥१२॥

॥७४॥ उपऽप्रयंतः अध्वरं मंत्रं वोचेम अग्नये आरे अस्मे च शृण्वते॥१॥ यः स्नीहितीषु पूर्व्यः संऽजग्मानासु कृष्टिषु अरंक्षात् दाशुषे गयं ॥२॥ उत ब्रुवंतु जंतवः उत् अग्निः वृत्रऽहा अजनि धनंऽजयः रणेऽरणे॥३॥ यस्य दूतः असि क्षये वेषि हव्यानि वीतये दस्मत् कृणोषि अध्वरं॥४॥ तं इत् सुऽहव्यं अंगिरः सुऽदेवं सहसः यहो जनाः आहुः सुऽबर्हिषं॥५॥२१॥ आ च वहासि तान् इह देवान् उप प्रऽशस्तये हव्या सुऽचंद्र वीतये॥६॥ न योः उपब्दिः अश्वयः शृण्वे रथस्य कत् चन यत् अग्ने यासि दूत्यं॥७॥ त्वाऽऊतः वाजी अहयः अभि पूर्वस्मात् अपरः प्र दाशान् अग्ने अस्यात्॥८॥ उत द्युऽमत् सुऽवीर्यं बृहत् अग्ने विवाससि देवेभ्यः देव दाशुषे॥९॥२२॥

॥७५॥ जुषस्व सप्रथःऽतमं वचः देवप्सरःऽतमं हव्या जुह्वानः आसनि॥१॥ अथ ते अंगिरःऽतम अग्ने वेधःऽतम प्रियं वोचेम ब्रह्म सानसि॥२॥ कः ते जामिः जनानां अग्ने कः दाशुऽअध्वरः कः ह कस्मिन् असि श्रितः॥३॥ त्वं जामिः जनानां अग्ने मित्रः असि प्रियः सखा सखिऽभ्यः ईड्यः॥४॥ यज नः मित्रावरुणा यज देवान् ऋतं बृहत् अग्ने यक्षि स्वं दमं॥५॥२३॥

॥ ७६ ॥ का ते उपऽइतिः मनसः वराय भुवत् अग्ने शंऽतमा का मनीषा कः वा यज्ञैः परि दक्षं ते आप केन वा ते मनसा दाशेम ॥ १ ॥ आ इहि अग्ने इह होता नि सीद अदब्धः सु पुरःऽएता भव नः अवता त्वा रोदसी विश्वंऽइन्वे० यज महे सौमनसाय देवान् ॥ २ ॥ प्र सु विश्वान् रक्षसः धक्षि अग्ने भव यज्ञानां अभिशस्तिऽपावा अथ आ वह सोमऽपतिं हरिऽभ्यां आतिथ्यं अस्मै चकृम सुऽदाव्ने ॥ ३ ॥ प्रजाऽवता वचसा वह्निः आसा आ च हुवे नि च सत्सि इह देवैः वेषि होत्रं उत पोत्रं यजत्र बोधि प्रऽयंतः जनितः वसूनां ॥ ४ ॥ यथा विप्रस्य मनुषः हविःऽभिः देवान् अयजः कविऽभिः कविः सन् एव होतः सत्यऽतर त्वं अद्य अग्ने मंद्रया जुह्वा यजस्व ॥ ५ ॥ २४ ॥

॥ ७७ ॥ कथा दाशेम अग्नये का अस्मै देवऽजुष्टा उच्यते भामिने गीः यः मर्त्येषु अमृतः ऋतऽवा होता यजिष्ठः इत् कृणोति देवान् ॥ १ ॥ यः अध्वरेषु शंऽतमः ऋतऽवा होता तं ऊं नमःऽभिः आ कृणुध्वं अग्निः यत् वेः मर्ताय देवान् सः च बोधाति मनसा यजाति ॥ २ ॥ सः हि क्रतुः सः मर्यः सः साधुः मित्रः न भूत् अद्भुतस्य रथीः तं मेधेषु प्रथमं देवऽयंतीः विशः उप ब्रुवते दस्मं आरीः ॥ ३ ॥ सः नः नृणां नृऽतमः रिशादाः अग्निः गिरः अवसा वेतु धीतिं तना च ये मघऽवानः शविष्ठाः वाजेऽप्रसूताः इषयंत मन्म ॥ ४ ॥ एव अग्निः गोतमेभिः ऋतऽवा विप्रेभिः अस्तोष्ट जातऽवेदाः सः एषु द्युम्नं पीपयत् सः वाजैः सः पुष्टिं याति जोषं आ चिकित्वान् ॥ ५ ॥ २५ ॥

॥ ७८ ॥ अभि त्वा गोतमाः गिरा जातऽवेदः विऽचर्षणे द्युम्नैः अभि प्र नोनुमः ॥१॥ तं ऊं त्वा गोतमः गिरा रायःऽकामः दुवस्यति द्युम्नैः अभि प्र नोनुमः ॥२॥ तं ऊं त्वा वाजऽसातमं अंगिरस्वत् हवामहे द्युम्नैः अभि प्र नोनुमः ॥३॥ तं ऊं त्वा वृत्रहन्ऽतमं यः दस्यून् अवऽधूनुषे द्युम्नैः अभि प्र नोनुमः ॥४॥ अवोचाम रहूगणाः अग्नये मधुऽमत् वचः द्युम्नैः अभि प्र नोनुमः ॥५॥२६॥

॥ ७९ ॥ हिरण्यऽकेशः रजसः विऽसारे अहिः धुनिः वातःऽइव ध्रजीमान् शुचिऽभ्राजाः उषसः नवेदाः यशस्वतीः अपस्युवः न सत्याः ॥१॥ आ ते सुऽपर्णाः अमिनंत एवैः कृष्णः नोनावः वृषभः यदि इदं शिवाभिः न स्मयमानाभिः आ अगात् पतंति मिहः स्तनयंति अभ्रा ॥२॥ यत् ईं ऋतस्य पयसा पियानः नयन् ऋतस्य पथिऽभिः रजिष्ठैः अर्यमा मित्रः वरुणः परिऽज्मा त्वचं पृंचंति उपरस्य योनौ ॥३॥ अग्ने वाजस्य गोऽमतः ईशानः सहसः यहो अस्मे धेहि जातऽवेदः महि श्रवः ॥४॥ सः इधानः वसुः कविः अग्निः ईळेन्यः गिरा रेवत् अस्मभ्यं पुरुऽअनीक दीदिहि ॥५॥ क्षपः राजन् उत त्मना अग्ने वस्तोः उत उषसः सः तिग्मऽजंभ रक्षसः दह प्रति ॥६॥२७॥ अव नः अग्ने ऊतिऽभिः गायत्रस्य प्रऽभर्मणि विश्वासु धीषु वंद्य ॥७॥ आ नः अग्ने रयिं भर सत्राऽसहं वरेण्यं विश्वासु पृत्ऽसु दुस्तरं ॥८॥ आ नः अग्ने सुऽचेतुना रयिं विश्वायुऽपोषसं माडीकं धेहि जीवसे ॥९॥ प्र पूताः तिग्मऽशोचिषे वाचः गोतम अग्नये भरस्व सुम्नऽयुः गिरः ॥१०॥ यः नः अग्ने

अभिऽदासंति अंतिं दूरे पदीष्ट सः अस्माकँ इत् वृधे भव ॥११॥ सहस्रऽअक्षः विऽचर्षणिः अग्निः रक्षाँसि सेधति होता गृणीते उक्थ्यः ॥१२॥२८॥

॥८०॥ इत्था हि सोमे इत् मदे ब्रह्मा चकार वर्धनं शविष्ठ वज्रिन् ओजसा पृथिव्याः निः शशाः अहिँ अर्चन् अनु स्वऽराज्यँ ॥१॥ सः त्वा अमदत् वृषा मदः सोमः श्येनऽआभृतः सुतः येन वृत्रं निः अत्ऽभ्यः जघंथ वज्रिन् ओजसा अर्चन् अनु स्वऽराज्यँ ॥२॥ प्र इहि अभि इहि धृष्णुहि न ते वज्रः नि यंसते इंद्र नृम्णं हि ते शवः हनः वृत्रं जयाः अपः अर्चन् अनु स्वऽराज्यँ ॥३॥ निः इंद्र भूम्याः अधि वृत्रं जघंथ निः दिवः सृज मरुत्वंतीः अव जीवऽधन्याः इमाः अपः अर्चन् अनु स्वऽराज्यँ ॥४॥ इंद्रः वृत्रस्य दोधतः सानुं वज्रेण हीळितः अभिऽक्रम्य अव जिघ्नते अपः सर्माय चोदयन् अर्चन् अनु स्वऽराज्यँ ॥५॥२९॥ अधि सानौ नि जिघ्नते वज्रेण शतऽपर्वणा मंदानः इंद्रः अंधसः सखिऽभ्यः गातुं इच्छति अर्चन् अनु स्वऽराज्यँ ॥६॥ इंद्र तुभ्यँ इत् अद्रिऽवः अनुत्तं वज्रिन् वीर्यँ यत् ह त्यं मायिनँ मृगं तं ऊं त्वं मायया अवधीः अर्चन् अनु स्वऽराज्यँ ॥७॥ वि ते वज्रासः अस्थिरन् नवतिं नाव्याः अनु महत् ते इंद्र वीर्यँ बाह्वोः ते बलँ हितं अर्चन् अनु स्वऽराज्यँ ॥८॥ सहस्रँ साकं अर्चत परि स्तोभत विंशतिः शता एनं अनु अनोनवुः इंद्राय ब्रह्म उत्ऽयतं अर्चन् अनु स्वऽराज्यँ ॥९॥ इंद्रः वृत्रस्य तविषीं निः अहन् सहसा सहः महत् तत् अस्य पौंस्यँ वृत्रं जघन्वान् असृजत् अर्चन् अनु स्वऽराज्यँ ॥१०॥३०॥ इमे चित् तव मन्यवे वेपेते भि-

यस्मा मही' यत् इंद्र वज्रिन् ओजसा वृत्रं मरुत्वान् अवधीः अर्चन् अनु स्वऽराज्यं ॥११॥ न वेपसा न तन्यता इंद्र वृत्रः वि बीभयत् अभि एनं वज्रः आयसः सहस्रंऽभृष्टिः आयत अर्चन् अनु स्वऽराज्यं ॥१२॥ यत् वृत्रं तव च अशनिं वज्रेण संऽअयोधयः अहिं इंद्र जिघांसतः दिवि ते बद्बधे शवः अर्चन् अनु स्वऽराज्यं ॥१३॥ अभिऽस्तने ते अद्रिऽवः यत् स्थाः जगत् च रेजते त्वष्टा चित् तव मन्यवे इंद्र वेविज्यते भिया अर्चन् अनु स्वऽराज्यं ॥१४॥ नहि नु यात् अधिऽइमसि इंद्र कः वीर्या परः तस्मिन् नृम्णं उत क्रतुं देवाः ओजांसि सं दधुः अर्चन् अनु स्वऽराज्यं ॥१५॥ यां अथर्वा मनुः पिता दध्यङ् धियं अत्नत तस्मिन् ब्रह्माणि पूर्वऽथा इंद्र उक्था सं अग्मत अर्चन् अनु स्वऽराज्यं ॥१६॥३१॥५॥

॥ ८१ ॥ इंद्रः मदाय ववृधे शवसे वृत्रऽहा नृऽभिः तं इत् महत्ऽसु आजिषु उत ईं अभें हवामहे स वाजेषु प्र नः अविषत् ॥१॥ असि हि वीर सेन्यः असि भूरि पराऽदिः असि दभ्रस्य चित् वृधः यजमानाय शिक्षसि सुन्वते भूरि ते वसु ॥२॥ यत् उत्ऽईरते आजयः धृष्णवे धीयते धना युक्ष्व मदऽच्युता हरी' कं हनः कं वसौ दधः अस्मान् इंद्र वसौ दधः ॥३॥ ऋत्वा महान् अनुऽस्वधं भीमः आ ववृधे शवः श्रिये रुशत्ऽपाकयोः नि शिप्री हरिऽवान् दधे हस्तयोः वज्रं आयसं ॥४॥ आ पप्रौ पार्थिवं रजः बद्बधे रोचना दिवि न त्वाऽवान् इंद्र कः चन न जातः न जनिष्यते अति विश्वं ववक्षिथ ॥५॥१॥ यः अर्यः मर्तऽभोजनं पराऽददाति दाशुषे इंद्रः अस्मभ्यं शिक्षतु वि भज भूरि ते वसु

भक्षीय तव राधसः ॥ ६ ॥ मदेऽमदे हि नः ददिः यूथा गवाँ ऋजुऽऋतुः सं गृभाय पुरु शता उभयाहस्त्या वसु शिशीहि रायः आ भर ॥ ७ ॥ मादयस्व सुते सचा शवसे शूर राधसे विद्मा हि त्वा पुरुऽवसुं उप कामान् ससृज्महे अथ नः अविता भव ॥ ८ ॥ एते ते इंद्र जंतवः विश्वं पुष्यंति वार्यं अंतः हि ख्यः जनानां अर्यः वेदः अदाशुषां तेषां नः वेदः आ भर ॥ ९ ॥ २ ॥

॥ ८२ ॥ उपो सु शृणुहि गिरः मघऽवन् मा अतंथाःऽइव यदा नः सूनृताऽवतः करः आत् अर्थयासे इत् योजा नु इंद्र ते हरी ॥ १ ॥ अक्षन् अमीमदंत हि अव प्रियाः अधूषत अस्तोषत स्वऽभानवः विप्राः नविष्ठया मती योजा नु इंद्र ते हरी ॥ २ ॥ सुऽसंदृशं त्वा वयं मघऽवन् वंदिषीमहि प्र नूनं पूर्णऽवंधुरः स्तुतः याहि वशान् अनु योजा नु इंद्र ते हरी ॥ ३ ॥ सः घ तं वृषणं रथं अधि तिष्ठाति गोऽविदं यः पाजं हारिऽयोजनं पूर्ण इंद्र चिकेतति योजा नु इंद्र ते हरी ॥ ४ ॥ युक्तः ते अस्तु दक्षिणः उत सव्यः शतऽऋतो० तेन जायां उप प्रियां मंदानः याहि अंधसः योजा नु इंद्र ते हरी ॥ ५ ॥ युनज्मि ते ब्रह्मणा केशिना हरी उप प्र याहि दधिषे गभस्त्योः उत् त्वा सुतासः रभसाः अमंदिषुः पूषण्ऽवान् वज्रिन् सं ऊं पत्न्या अमत्दः ॥ ६ ॥ ३ ॥

॥ ८३ ॥ अश्वऽवति प्रथमः गोषु गच्छति सुप्रऽअवीः इंद्र मर्त्यः तव ऊतिऽभिः तं इत् पृणक्षि वसुना भवीयसा सिंधुं आपः यथा अभितः विऽचेतसः ॥ १ ॥ आपः न देवीः उप यंति होचियं अवः पश्यंति विऽततं यथा रजः प्राचैः देवासः प्र नयंति देवऽयुं

ब्रह्मऽप्रियं जोषयंते वराःऽइव ॥२॥ अधि द्वयोः अदधाः उक्थ्यं वचः यतऽस्रुचा मिथुना या सपर्यतः असंऽयत्तः वते ते क्षेति पुष्यति भद्रा शक्तिः यजमानाय सुन्वते ॥३॥ आत् अंगिराः प्रथमं दधिरे वयः इद्धऽअग्नयः शम्या ये सुऽकृत्यया सर्वं पणेः सं अविंदत भोजनं अश्वऽवंतं गोऽमंतं आ पशुं नरः ॥४॥ यज्ञैः अथर्वा प्रथमः पथः तते ततः सूर्यः व्रतऽपाः वेनः आ अजनि आ गाः आजत् उशना काव्यः सचा यमस्य जातं अमृतं यजामहे ॥५॥ बर्हिः वा यत् सुऽअपत्याय वृज्यते अर्कः वा श्लोकं आऽघोषते दिवि शावा यत् वदति कारुः उक्थ्यः तस्य इत् इंद्रः अभिऽपित्वेषु रण्यति ॥६॥४॥

॥ ८४ ॥ असावि सोमः इंद्र ते शविष्ठ धृष्णो आ गहि आ त्वा पृणक्तु इंद्रियं रजः सूर्यः न रश्मिऽभिः ॥१॥ इंद्र इत् हरी वहतः अप्रतिधृष्टऽशवसं ऋषीणां च स्तुतीः उप यज्ञं च मानुषाणां ॥२॥ आ तिष्ठ वृत्रऽहन् रथं युक्ता ते ब्रह्मणा हरी अर्वाचीनं सु ते मनः शावा कृणोतु वग्नुना ॥३॥ इमं इंद्र सुतं पिब ज्येष्ठं अमर्त्यं मदं शुक्रस्य त्वा अभि अक्षरन् धाराः ऋतस्य सदने ॥४॥ इंद्राय नूनं अर्चत उक्थानि च ब्रवीतन सुताः अमत्सुः इंदवः ज्येष्ठं नमस्यत सहः ॥५॥५॥ नकिः त्वत् रथिऽतरः हरी यत् इंद्र यच्छसे नकिः त्वा अनु मज्मना नकिः शुऽअश्वः आनशे ॥६॥ यः एकः इत् विऽदयते वसु मर्ताय दाशुषे ईशानः अप्रतिऽस्कुतः इंद्रः अंग ॥७॥ कदा मर्तं अराधसं पदा क्षुंपेऽइव स्फुरत् कदा नः शुश्रवत् गिरः इंद्रः अंग ॥८॥ यः चित् हि त्वा बहुऽभ्यः आ सुतऽवान् आऽविवासति उक्थं तत् पत्यते शवः इंद्रः अंग ॥९॥

स्वादोः इत्था विषुऽवतः मध्वः पिबंति गौर्यः याः इंद्रेण सऽयावरीः वृष्णा मदंति शोभसे वस्वीः अनु स्वऽराज्यं ॥१०॥६॥ ताः अस्य पृशनऽयुवः सोमं श्रीणंति पृश्नयः प्रियाः इंद्रस्य धेनवः वज्रं हिन्वंति सायकं वस्वीः अनु स्वऽराज्यं ॥११॥ ताः अस्य नमसा सहः सपर्यंति प्रऽचेतसः वृतानि अस्य सश्चिरे पुरूणि पूर्वऽचित्तये वस्वीः अनु स्वऽराज्यं ॥१२॥ इंद्रः दधीचः अस्थऽभिः वृत्राणि अप्रतिऽस्कुतः जघान नवतीः नव ॥१३॥ इच्छन् अश्वस्य यत् शिरः पर्वतेषु अपऽश्रितं तत् विदत् अश्वेनाऽवति ॥१४॥ अच अह गोः अमन्वत नाम त्वष्टुः अपीच्यं इत्था चंद्रमसः गृहे ॥१५॥७॥ कः अद्य युंक्ते धुरि गाः ऋतस्य शिमीऽवतः भामिनः दुःऽहृणायून् आसन्ऽईषून् हत्सुऽअसः मयःऽभून् यः एषां भृत्यां ऋणधत् सः जीवात् ॥१६॥ कः ईषते तुज्यते कः बिभाय कः मंसते संतं इंद्रं कः अंति कः तोकाय कः इभाय उत राये अधि ब्रवत् तन्वे कः जनाय ॥१७॥ कः अग्निं ईट्टे हविषा घृतेन स्रुचा यजात ऋतुऽभिः ध्रुवेभिः कस्मै देवाः आ वहान् आशु होमं कः मंसते वीतिऽहोत्रः सुऽदेवः ॥१८॥ त्वं अंग प्र शंसिषः देवः शविष्ठ मर्त्यं न त्वत् अन्यः मघऽवन् अस्ति मर्डिता इंद्र ब्रवीमि ते वचः ॥१९॥ मा ते राधांसि मा ते ऊतयः वसो अस्मान् कदा चन दभन् विश्वा च नः उपऽमिमीहि मानुष वसूनि चर्षणिऽभ्यः आ ॥२०॥८॥१३॥

॥ ८५ ॥ प्र ये शुंभंते जनयः न सप्तयः यामन् रुद्रस्य सूनवः सुऽदंससः रोदसी हि मरुतः चक्रिरे वृधे मदंति वीराः विदथेषु घृष्वयः ॥१॥ ते उक्षितासः महिमानं आशत दिवि रुद्रासः

अधि चक्रिरे सदः अर्चतः अर्कं जनयंतः इंद्रियं अधि श्रियः दधिरे पृश्निऽमातरः ॥२॥ गोऽमातरः यत् शुभयंते अंजिऽभिः तनूषु शुभ्राः दधिरे विरुक्मतः बाधंते विश्वं अभिऽमातिनं अप वर्त्मानि एषां अनु रीयते घृतं ॥३॥ वि ये भ्राजंते सुऽमखासः ऋष्टिऽभिः प्रऽच्यवयंतः अच्युता चित् ओजसा मनःऽजुवः यत् मरुतः रथेषु आ वृषऽव्रातासः पृषतीः अयुग्ध्वं ॥४॥ प्र यत् रथेषु पृषतीः अयुग्ध्वं वाजे अद्रिं मरुतः रंहयंतः उत अरुषस्य वि स्यंति धाराः चर्मऽइव उदऽभिः वि उंदंति भूम ॥५॥ आ वः वहंतु सप्तयः रघुऽस्यदः रघुऽपत्वानः प्र जिगात बाहुऽभिः सीदत आ बर्हिः उरु वः सदः कृतं मादयध्वं मरुतः मध्वः अंधसः ॥६॥९॥ ते अवर्धंत स्वऽतवसः महिऽत्वना आ नाकं तस्थुः उरु चक्रिरे सदः विष्णुः यत् ह आवत् वृषणं मदऽच्युतं वयः न सीदन् अधि बर्हिषि प्रिये ॥७॥ शूराःऽइव इत् युयुधयः न जग्मयः श्रवस्यवः न पृतनासु येतिरे भयंते विश्वा भुवना मरुत्ऽभ्यः राजानःऽइव त्वेषऽसंदृशः नरः ॥८॥ त्वष्टा यत् वज्रं सुऽकृतं हिरण्ययं सहस्रऽभृष्टिं सुऽअपाः अवर्तयत् धत्ते इंद्रः नरि अपांसि कर्तवे अहन् वृत्रं निः अपां औब्जत् अर्णवं ॥९॥ ऊर्ध्वं नुनुद्रे अवतं ते ओजसा दृंहाणं चित् बिभिदुः वि पर्वतं धमंतः वाणं मरुतः सुऽदानवः मदे सोमस्य रण्यानि चक्रिरे ॥१०॥ जिह्मं नुनुद्रे अवतं तया दिशा असिंचन् उत्सं गोतमाय तृष्णऽजे आ गच्छंति ईं अवसा चित्रऽभानवः कामं विप्रस्य तर्पयंत धामऽभिः ॥११॥ या वः शर्म शशमानाय संति त्रिऽधातूनि दाशुषे यच्छत अधि अस्मभ्यं तानि मरुतः वि यंत रयिं नः धत्त वृषणः सुऽवीरं ॥१२॥१०॥

॥ ८६॥ मरुतः यस्य हि क्षये पाथ दिवः विऽमहसः सः सुऽगोपातमः जनः ॥ १॥ यज्ञैः वा यज्ञऽवाहसः विप्रस्य वा मतीनां मरुतः शृणुत हवं॥२॥ उत वा यस्य वाजिनः अनु विप्रं अतक्षत सः गंता गोऽमति व्रजे ॥३॥ अस्य वीरस्य बर्हिषि सुतः सोमः दिविष्टिषु उक्थं मदः च शस्यते ॥४॥ अस्य श्रोषंतु आ भुवः विश्वाः यः चर्षणीः अभि सूरः चित् ससुषीः इषः ॥५॥११॥ पूर्वीभिः हि ददाशिम शरत्ऽभिः मरुतः वयं अवःऽभिः चर्षणीनां ॥६॥ सुऽभगः सः प्रऽयज्यवः मरुतः अस्तु मर्त्यः यस्य प्रयाँसि पर्षथ ॥७॥ शशमानस्य वा नरः स्वेदस्य सत्यऽशवसः विद् कामस्य वेनतः॥८॥ यूयं तत् सत्यऽशवसः आविः कर्त महिऽत्वना विध्यत विद्युता रक्षः॥९॥ गूहत गुह्यं तमः वि यात विश्वं अचिर्ण ज्योतिः कर्त यत् उश्मसि ॥१०॥१२॥

॥ ८७॥ प्रऽत्वक्षसः प्रऽतवसः विऽरप्शिनः अनानताः अविथुराः ऋजीषिणः जुष्टऽतमासः नृऽतमासः अंजिऽभिः वि आनञ्जे के चित् उसाःऽइव स्तृऽभिः ॥१॥ उपऽह्वरेषु यत् अचिध्वं ययिं वयःऽइव मरुतः केन चित् पथा श्योतंति कोशाः उप वः रथेषु आ घृतं उक्षत मधुऽवर्णं अर्चते ॥२॥ प्र एषां अज्मेषु विथुराऽइव रेजते भूमिः यामेषु यत् ह युंजते शुभे ते क्रीळयः धुनयः भ्राजत्ऽऋष्टयः स्वयं महिऽत्वं पनयंत धूतयः ॥३॥ सः हि स्वऽसृत् पृषत्ऽअश्वः युवा गणः अया ईशानः तविषीभिः आऽवृतः असि सत्यः ऋणऽयावा अनेद्यः अस्याः धियः प्रऽअविता अथ वृषा गणः ॥४॥ पितुः प्रत्नस्य जन्मना वदामसि सोमस्य जिह्वा प्र जिगाति चक्षसा यत् ईं इंद्रं शमि ऋक्वाणः

आशंत आत् इत् नामानि यज्ञियानि दधिरे ॥५॥ श्रियसे कं भानुऽभिः सं मिमिक्षिरे ते रश्मिऽभिः ते ऋक्वऽभिः सुऽखादयः ते वाशीऽमंतः इष्मिणः अभीरवः विद्रे प्रियस्य मारुतस्य धाम्नः ॥६॥१३॥

॥ ८८ ॥ आ विद्युन्मत्ऽभिः मरुतः सुऽअर्कैः रथेभिः यात ऋष्टिमत्ऽभिः अश्वऽपर्णैः आ वर्षिष्ठया नः इषा वयः न पप्रत सुऽमायाः ॥१॥ ते अरुणेभिः वरं आ पिशंगैः शुभे कं यांति रथतूःऽभिः अश्वैः रुक्मः न चित्रः स्वधितिऽवान् पव्या रथस्य जंघनंत भूम ॥२॥ श्रिये कं वः अधि तनूषु वाशीः मेधा वना न कृण्वंते ऊर्ध्वा युष्मभ्यं कं मरुतः सुऽजाताः तुविऽद्युम्नासः धनयंते अद्रिं ॥३॥ अहानि गृध्राः परि आ वः आ अगुः इमां धियं वार्कार्यां च देवीं ब्रह्म कृण्वंतः गोतमासः अर्कैः ऊर्ध्वं नुनुद्रे उत्सऽधिं पिबध्यै ॥४॥ एतत् त्यत् न योजनं अचेति सस्वः ह यत् मरुतः गोतमः वः पश्यन् हिरण्यऽचक्रान् अयःऽदंष्ट्रान् विऽधावतः वराहून् ॥५॥ एषा स्या वः मरुतः अनुऽभर्त्री प्रति स्तोभति वाघतः न वाणीं अस्तोभयत् वृषा आसां अनु स्वधां गभस्त्योः ॥६॥१४॥

॥ ८९ ॥ आ नः भद्राः क्रतवः यंतु विश्वतः अदब्धासः अपरिऽइतासः उत्ऽभिदः देवाः नः यथा सदा इत् वृधे असन् अप्रऽआयुवः रक्षितारः दिवेऽदिवे ॥१॥ देवानां भद्रा सुऽमतिः ऋजुऽयतां देवानां रातिः अभि नः नि वर्ततां देवानां सख्यं उप सेदिमा वयं देवाः नः आयुः प्र तिरंतु जीवसे ॥२॥ तान् पूर्वया निऽविदा हूमहे वयं भगं मित्रं अदितिं दक्षं अस्रिधं अर्यमणं वरुणं सोमं

अश्विना सरस्वती नः सुऽभगा मयः करत्॥३॥ तत् नः वातः मयः ऽभु वातु भेषजं तत् माता पृथिवी तत् पिता द्यौः तत् यावाणः सोमऽसुतः मयः ऽभुवः तत् अश्विना शृणुतं धिष्ण्या युवं॥४॥ तं ईशानं जगतः तस्थुषः पतिं धियंऽजिन्वं अवसे हूमहे वयं पूषा नः यथा वेदसां असत् वृधे रक्षिता पायुः अदब्धः स्वस्तये॥५॥१५॥ स्वस्ति नः इंद्रः वृद्धऽश्रवाः स्वस्ति नः पूषा विश्वऽवेदाः स्वस्ति नः तार्क्ष्यः अरिष्टऽनेमिः स्वस्ति नः बृहस्पतिः दधातु॥६॥ पृषत्-ऽअश्वाः मरुतः पृश्निऽमातरः शुभंऽयावानः विदथेषु जग्मयः अग्निऽजिह्वाः मनवः सूरऽचक्षसः विश्वे नः देवाः अवसा आ ग-मन् इह॥७॥ भद्रं कर्णेभिः शृणुयाम देवाः भद्रं पश्येम अक्षऽभिः यजत्राः स्थिरैः अंगैः तुष्टुऽवांसः तनूभिः वि अशेम देवऽहितं यत् आयुः॥८॥ शतं इत् नु शरदः अंति देवाः यत्र नः चक्रं जरसं तनूनां पुत्रासः यत्र पितरः भवंति मा नः मध्या रिरिषत आयुः गंतोः॥९॥ अदितिः द्यौः अदितिः अंतरिक्षं अदितिः माता सः पिता सः पुत्रः विश्वे देवाः अदितिः पंच जनाः अदितिः जातं अदितिः जनित्वं॥१०॥१६॥

॥९०॥ ऋजुऽनीती नः वरुणः मित्रः नयतु विद्वान् अर्यमा देवैः सऽजोषाः॥१॥ ते हि वस्वः वसवानाः ते अप्रऽमूराः महःऽभिः व्रता रक्षंते विश्वाहा॥२॥ ते अस्मभ्यं शर्म यंसन् अमृताः मर्त्येभ्यः बाधमानाः अप द्विषः॥३॥ वि नः पथः सुवितायं चियंतु इंद्रः मरुतः पूषा भगः वंद्यासः॥४॥ उत नः धियः गोऽअग्राः पूषन् विष्णो एवऽयावः कर्त नः स्वस्तिऽमतः॥५॥१७॥ मधु वाताः ऋतऽयते मधु क्षरंति सिंधवः माध्वीः नः

संतु ओषधीः ॥ ६ ॥ मधु नक्तं उत उषसः मधुऽमत् पार्थिवं रजः मधु द्यौः अस्तु नः पिताः ॥ ७ ॥ मधुऽमान् नः वनस्पतिः मधुऽमान् अस्तु सूर्यः माध्वीः गावः भवंतु नः ॥ ८ ॥ शं नः मित्रः शं वरुणः शं नः भवतु अर्यमा शं नः इंद्रः बृहस्पतिः शं नः विष्णुः उरुऽक्रमः ॥ ९ ॥ १८ ॥

॥ ९१ ॥ त्वं सोम प्र चिकितः मनीषा त्वं रजिष्ठं अनु नेषि पंथां तव प्रऽनीती पितरः नः इंदो देवेषु रत्नं अभजंत धीराः ॥ १ ॥ त्वं सोम क्रतुऽभिः सुऽक्रतुः भूः त्वं दक्षैः सुऽदक्षः विश्वऽवेदाः त्वं वृषा वृषऽत्वेभिः महिऽत्वा द्युम्नेभिः द्युम्नी अभवः नृऽचक्षाः ॥ २ ॥ राज्ञः नु ते वरुणस्य व्रतानि बृहत् गभीरं तव सोम धाम शुचिः त्वं असि प्रियः न मित्रः दक्षाय्यः अर्यमाऽइव असि सोम ॥ ३ ॥ या ते धामानि दिवि या पृथिव्यां या पर्वतेषु ओषधीषु अप्ऽसु तेभिः नः विश्वैः सुऽमनाः अहेळन् राजन् सोम प्रति हव्या गृभाय ॥ ४ ॥ त्वं सोम असि सत्ऽपतिः त्वं राजा उत वृचऽहा त्वं भद्रः असि क्रतुः ॥ ५ ॥ १९ ॥ त्वं च सोम नः वशः जीवातुं न मरामहे प्रियऽस्तोत्रः वनस्पतिः ॥ ६ ॥ त्वं सोम महे भगं त्वं यूने ऋतऽयते दक्षं दधासि जीवसे ॥ ७ ॥ त्वं नः सोम विश्वतः रक्ष राजन् अघऽयतः न रिष्येत् त्वाऽवंतः सखा ॥ ८ ॥ सोम याः ते मयःऽभुवः ऊतयः संति दाशुषे ताभिः नः अविता भव ॥ ९ ॥ इमं यज्ञं इदं वचः जुजुषाणः उपऽआगहि सोम त्वं नः वृधे भव ॥ १० ॥ २० ॥ सोम गीःऽभिः त्वा वयं वर्धयामः वचःऽविदः सुऽमृळीकः नः आ विश ॥ ११ ॥ गयऽस्फानः अमीवऽहा वसुऽवित् पुष्टिऽवर्धनः सुऽमित्रः सोम नः भव ॥ १२ ॥ सोम रारंधि नः हृदि गावः न

यवंसेषु आ मर्यः ऽइव स्वे ओक्ये॥१३॥ यः सोम सख्ये तव ररणत् देव मर्त्यः तं दक्षः सचते कविः ॥१४॥ उरुष्य नः अभिऽशस्तेः सोम नि पाहि अंहसः सखा सुऽशेवः एधि नः ॥१५॥२१॥ आ प्यायस्व सं एतु ते विष्वतः सोम वृष्ण्यं भव वाजस्य संऽगथे॥१६॥ आ प्यायस्व मदिन्ऽतम सोम विश्वेभिः अंशुऽभिः भव नः सु-श्रवःऽतमः सखा वृधे ॥१७॥ सं ते पयांसि सं ऊं यंतु वाजाः सं वृष्ण्यानि अभिमातिऽसहः आऽप्यायमानः अमृताय सोम दिवि श्रवांसि उत्ऽतमानि धिष्व ॥१८॥ या ते धामानि हविषा यजंति ता ते विश्वा परिऽभूः अस्तु यज्ञं गयऽस्फानः प्रऽतरणः सुऽवीरः अवीरऽहा प्र चर सोम दुर्यान्॥१९॥ सोमः धेनुं सोमः अर्वंतं आशुं सोमः वीरं कर्मण्यं ददाति सदन्यं विदथ्यं सभेयं पितृऽश्रवणं यः ददाशत् अस्मै ॥२०॥२२॥ अषाळ्हं युत्ऽसु पृतनासु पप्रिं स्वःऽसां अप्सां वृजनस्य गोपां भरेषुऽजां सुऽक्षितिं सुऽश्रवसं जयंतं त्वां अनु मदेम सोम ॥२१॥ त्वं इमाः ओषधीः सोम विश्वाः त्वं अपः अजनयः त्वं गाः त्वं आ ततंथ उरु अंतरिक्षं त्वं ज्योतिषा वि तमः ववर्थ ॥२२॥ देवेन नः मनसा देव सोम रायः भागं सहसाऽवन् अभि युध्य मा त्वा आ तनत् ईशिषे वीर्यस्य उभयेभ्यः प्र चिकित्स गोऽईष्टौ॥२३॥२३॥

॥९२॥ एताः ऊं त्याः उषसः केतुं अक्रत पूर्वे अर्धे रजसः भानुं अंजते निःऽकृण्वानाः आयुधानिऽइव धृष्णवः प्रति गावः अरुषीः यंति मातरः ॥१॥ उत् अपप्तन् अरुणाः भानवः वृथा सुऽआयुजः अरुषीः गाः अयुक्षत अक्रन् उषसः वयुनानि पूर्वऽथा रुशंतं भानुं अरुषीः अशिश्रयुः ॥२॥ अंचंति नारीः

अपसः न विष्टिऽभिः समानेन योजनेन आ पराऽवतः इषं वहंतीः सुऽकृते सुऽदानवे विश्वा इत् अह यजमानाय सुन्वते ॥३॥ अधि पेशांसि वपते नृतूःऽइव अप ऊर्णुते वक्षः उस्राऽइव बर्जहं ज्योतिः विश्वस्मै भुवनाय कृण्वती गावः न व्रजं वि उषाः आवः० तमः ॥४॥ प्रति अर्चिः रुशत् अस्याः अदर्शि वि तिष्ठते बाधते कृष्णं अभ्वं स्वरुं न पेशः विदथेषु अंजन् चित्रं दिवः दुहिता भानुं अश्रेत् ॥५॥२४॥ अतारिष्म तमसः पारं अस्य उषाः उच्छंती वयुना कृणोति श्रिये छंदः न स्मयते विऽभाती सुऽप्रतीका सौमनसाय अजीगः ॥६॥ भास्वती नेची सूनृतानां दिवः स्तवे दुहिता गोतमेभिः प्रजाऽवतः नृऽवतः अश्वऽबुध्यान् उषः गोऽअग्यान् उप मासि वाजान् ॥७॥ उषः तं अश्याः यशसं सुऽवीरं दासऽप्रवर्गं रयिं अश्वऽबुध्यं सुऽदंससा अवसा या विऽभासि वाजऽप्रसूता सुऽभगे बृहंतं ॥८॥ विश्वानि देवी भुवना अभिऽचक्ष्य प्रतीची चक्षुः उर्विया वि भाति विश्वं जीवं चरसे बोधयंती विश्वस्य वाचं अविदत् मनायोः ॥९॥ पुनःऽपुनः जायमाना पुराणी समानं वर्णं अभि शुंभमाना श्वघ्नीऽइव कृत्नुः विजः आऽमिनाना मर्तस्य देवी जरयंती आयुः ॥१०॥२५॥ विऽऊर्ध्वती दिवः अंतान् अबोधि अप स्वसारं सनुतः युयोति प्रऽमिनती मनुष्या युगानि योषा जारस्य चक्षसा वि भाति ॥११॥ पप्रून् न चित्रा सुऽभगा प्रथाना सिंधुः न क्षोदः उर्विया वि अश्वैत् अमिनती दैव्यानि व्रतानि सूर्यस्य चेति रश्मिऽभिः हशाना ॥१२॥ उषः तत् चित्रं आ भर अस्मभ्यं वाजिनीऽवति येन तोकं च तनयं च धामहे ॥१३॥ उषः अद्य इह गोऽमति अश्वऽवति विभाऽवरि रेवत् अस्मे वि उच्छ सूनृताऽवति ॥१४॥

युह्व हि वाजिनीऽवति अश्वान् अद्य अरुणान् उषः अथ नः विश्वा सौभगानि आ वह ॥ १५ ॥ २६ ॥ अश्विना वर्तिः अस्मत् आ गोऽमत् दस्रा हिरण्यऽवत् अर्वाक् रथं सऽमनसा नि यच्छ-तं ॥ १६ ॥ यौ इत्था श्लोकं आ दिवः ज्योतिः जनाय चक्रथुः आ नः ऊर्जं वहतं अश्विना युवं ॥ १७ ॥ आ इह देवा मयःऽभुवा दस्रा हिरण्यऽवर्तनी० उषःऽबुधः वहंतु सोमऽपीतये ॥ १८ ॥ २७ ॥

॥ ९३ ॥ अग्नीषोमौ इमं सु मे शृणुतं वृषणा हवं प्रति सुऽउक्तानि हर्यतं भवतं दाशुषे मयः ॥ १ ॥ अग्नीषोमा यः अद्य वां इदं वचः सपर्यति तस्मै धत्तं सुऽवीर्यं गवां पोषं सुऽअश्व्यं ॥ २ ॥ अग्नीषोमा यः आऽहुतिं यः वां दाशात् हविःऽकृतिं सः प्रऽजया सुऽवीर्यं विश्वं आयुः वि अश्नवत् ॥ ३ ॥ अग्नीषोमा चेतिं तत् वीर्यं वां यत् अमुष्णीतं अवसं पणिं गाः अव अतिरतं वत्सयस्य शेषः अविंदतं ज्योतिः एकं बहुऽभ्यः ॥ ४ ॥ युवं एतानि दिवि रोचनानि अग्निः च सोम सऽक्रतू० अधत्तं युवं सिंधून् अभिऽशस्तेः अवद्यात् अग्नीषोमौ अमुंचतं गृभीतान् ॥ ५ ॥ आ अन्यं दिवः मातरिश्वा जभार अमथ्नात् अन्यं परि श्येनः अद्रेः अग्नीषोमा ब्रह्मणा ववृधाना उरुं यज्ञाय चक्रथुः उ लोकं ॥ ६ ॥ २८ ॥ अग्नीषोमा हविषः प्रऽस्थितस्य वीतं हर्यतं वृषणा जुषेथां सुऽशर्माणा सुऽअवसा हि भूतं अथ धत्तं यजमानाय शं योः ॥ ७ ॥ यः अग्नीषोमा हविषा सपर्यात् देवद्रीचा मनसा यः घृतेन तस्य व्रतं रक्षतं पातं अंहसः विशे जनाय महि शर्म यच्छतं ॥ ८ ॥ अग्नीषोमा सऽवेदसा सऽहूती० वनतं गिरः सं देवऽत्रा बभूवथुः ॥ ९ ॥ अग्नीषोमौ अनेन वां यः वां घृतेन दाशति तस्मै दीदयतं बृहत्

॥१०॥ अग्नीषोमौ इमानि नः युवं हव्या जुजोषतं आ यातं उप नः सचा॥११॥ अग्नीषोमा पिपृतं अर्वतः नः आ प्यायंतां उस्रियाः हव्यऽसूदः अस्मे बलानि मघवत्ऽसु धत्तं कृणुतं नः अध्वरं श्रुष्टिऽमंतं॥१२॥ २९॥ १४॥

॥९४॥ इमं स्तोमं अर्हते जातऽवेदसे रथंऽइव सं महेम मनीषया भद्रा हि नः प्रऽमतिः अस्य संऽसदि अग्ने सख्ये मा रिषाम वयं तव॥१॥ यस्मै त्वं आऽयजसे सः साधति अनर्वा क्षेति दधते सुऽवीर्यं सः तूताव न एनं अंहोति अंहतिः अग्ने सख्ये मा रिषाम वयं तव॥२॥ शकेम त्वा संऽइधं साधया धियः त्वे देवाः हविः अदंति आऽहुतं त्वं आदित्यान् आ वह तान् हि उश्मसि अग्ने सख्ये मा रिषाम वयं तव॥३॥ भरामे इध्मं कृणवाम हवींषि ते चितयंतः पर्वणाऽपर्वणा वयं जीवातवे प्रऽतरं साधय धियः अग्ने सख्ये मा रिषाम वयं तव॥४॥ विशं गोपाः अस्य चरंति जंतवः द्विऽपत् च यत् उत चतुःऽपत् अक्तुऽभिः चिचः प्रऽकेतः उषसः महान् असि अग्ने सख्ये मा रिषाम वयं तव॥५॥ ३०॥ त्वं अध्वर्युः उत होता असि पूर्व्यः प्रऽशास्ता पोता जनुषा पुरःऽहितः विश्वा विद्वान् आर्त्विज्या धीर पुष्यसि अग्ने सख्ये मा रिषाम वयं तव॥६॥ यः विश्वतः सुऽप्रतीकः सऽदृङ् असि दूरे चित् सन् तळितऽइव अति रोचसे राज्याः चित् अंधः अति देव पश्यसि अग्ने सख्ये मा रिषाम वयं तव॥७॥ पूर्वैः देवाः भवतु सुन्वतः रयः अस्माकं शंसः अभि अस्तु दुःऽध्यः तत् आ जानीत उत पुष्यत वचः अग्ने सख्ये मा रिषाम वयं तव॥८॥ वधैः दुःऽशंसात् अप दुःऽध्यः जहि दूरे वा ये अंति वा के चित् अरिणः अप

यज्ञाय गृणते सुऽगं कृधि अग्ने सख्ये मा रिषाम वयं तव ॥ ९॥ यत् अयुक्थाः अरुषा रोहिता रथे वातऽजूता वृषभस्यऽइव ते रवः आत् इन्वसि वनिनः धूमऽकेतुना अग्ने सख्ये मा रिषाम वयं तव ॥ १०॥ ३१॥ अध स्वनात् उत विभ्युः पतत्रिणः द्रप्साः यत् ते यवसऽअदः वि अस्थिरन् सुऽगं तत् ते तावकेभ्यः रथेभ्यः अग्ने सख्ये मा रिषाम वयं तव ॥ ११॥ अयं मित्रस्य वरुणस्य धायसे अवऽयातां मरुतां हेळः अद्भुतः मृळ सु नः भूतु एषां मनः पुनः अग्ने सख्ये मा रिषाम वयं तव ॥ १२॥ देवः देवानां असि मित्रः अद्भुतः वसुः वसूनां असि चारुः अध्वरे शर्मन् स्याम तव सप्रथःऽतमे अग्ने सख्ये मा रिषाम वयं तव ॥ १३॥ तत् ते भद्रं यत् संऽइद्धः स्वे दमे सोमऽआहुतः जरसे मृळयत्ऽतमः दधासि रत्नं द्रविणं च दाशुषे अग्ने सख्ये मा रिषाम वयं तव ॥ १४॥ यस्मै त्वं सुऽद्रविणः ददाशः अनागाःऽत्वं अदिते सर्वऽताता यं भद्रेण शवसा चोदयासि प्रजाऽवता राधसा ते स्याम ॥ १५॥ सः त्वं अग्ने सौभगऽत्वस्य विद्वान् अस्माकं आयुः प्र तिर इह देव तत् नः मित्रः वरुणः ममहन्ता अदितिः सिंधुः पृथिवी उत द्यौः ॥ १६॥ ३२॥ ६॥

॥ ९५॥ द्वे विऽरूपे० चरतः सुऽअर्थे० अन्याऽअन्या वत्सं उप धापयेते हरिः अन्यस्यां भवति स्वधाऽवान् शुक्रः अन्यस्यां दृशे सुऽवर्चीः ॥ १॥ दश इमं त्वष्टुः जनयंत गर्भं अतंद्रासः युवतयः विऽभृचं तिग्मऽअनीकं स्वऽयशसं जनेषु विऽरोचमानं परि सीं नयंति ॥ २॥ चीणि जाना परि भूषंति अस्य समुद्रे एकं दिवि एकं अप्ऽसु पूर्वी अनु प्र दिशं पार्थिवानां ऋतून् प्रऽशा-

सत् वि दधौ अनुष्टु ॥ ३ ॥ कः इमं वः निण्यं आ चिकेत वत्सः मातृः जनयत स्वधाभिः बह्वीनां गर्भः अपसां उपऽस्थात् महान् कविः निः चरति स्वधाऽवान् ॥ ४ ॥ आविःऽत्यः वर्धते चारुः आसु जिह्मानौ ऊर्ध्वः स्वऽयशाः उपऽस्थे उभे त्वष्टुः विभ्यतुः जायमानात् प्रतीची सिंहं प्रति जोषयेते ॥ ५ ॥ १ ॥ उभे भद्रे जोषयेते न मेने गावः न वाश्राः उप तस्थुः एवैः सः दक्षाणां दक्षऽपतिः बभूव अंजंति यं दक्षिणतः हविःऽभिः ॥ ६ ॥ उत् यंयमीति सविताऽइव बाहू उभे सिचौ यतते भीमः ऋंजन् उत् शुक्रं अत्कं अजते सिमस्मात् नवा मातृऽभ्यः वसना जहाति ॥ ७ ॥ त्वेषं रूपं कृणुते उत्ऽतरं यत् संऽपृंचानः सदने गोभिः अत्ऽभिः कविः बुध्नं परि मर्मृज्यते धीः सा देवऽतातां संऽइतिः बभूव ॥ ८ ॥ उरु ते ज्रयः परि एति बुध्नं विऽरोचमानं महिषस्य धाम विश्वेभिः अग्ने स्वयशःऽभिः इद्धः अदब्धेभिः पायुऽभिः पाहि अस्मान् ॥ ९ ॥ धन्वन् स्रोतः कृणुते गातुं ऊर्मिं शुक्रैः ऊर्मिऽभिः अभि नक्षति क्षां विश्वा सनानि जठरेषु धत्ते अंतः नवासु चरति प्रऽसूषु ॥ १० ॥ एव नः अग्ने संऽइधा वृधानः रेवत् पावक श्रवसे वि भाहि तत् नः मित्रः वरुणः ममहंतां अदितिः सिंधुः पृथिवी उत द्यौः ॥ ११ ॥ २ ॥

॥ ९६ ॥ सः प्रत्नऽथा सहसा जायमानः सद्यः काव्यानि बद् अधत्त विश्वा आपः च मित्रं धिषणा च साधन् देवाः अग्निं धारयन् द्रविणःऽदां ॥ १ ॥ सः पूर्वया निऽविदा कव्यता आयोः इमाः प्रऽजाः अजनयत् मनूनां विवस्वता चक्षसा द्यां अपः च देवाः अग्निं धारयन् द्रविणःऽदां ॥ २ ॥ तं ईळत प्रथमं यज्ञऽसाधं

विशः आरीः आऽहुतं ऋंजसानं ऊर्जः पुत्रं भरतं सप्रऽदानुं देवाः अग्निं धारयन् द्रविणःऽदां ॥३॥ सः मातरिश्वा पुरुवारःऽपुष्टिः विदत् गातुं तनयाय स्वःऽवित् विशां गोपाः जनिता रोदस्योः देवाः अग्निं धारयन् द्रविणःऽदां ॥४॥ नक्तोषसा वर्णं आऽमेम्याने० धापयेते शिशुं एकं सऽईची० द्यावाक्षामा रुक्मः अंतः वि भाति देवाः अग्निं धारयन् द्रविणःऽदां ॥५॥३॥ रायः बुध्नः संऽगमनः वसूनां यज्ञस्य केतुः मन्मऽसाधनः वेः० अमृतऽत्वं रक्षमाणासः एनं देवाः अग्निं धारयन् द्रविणःऽदां ॥६॥ नु च पुरा च सदनं रयीणां जातस्य च जायमानस्य च क्षां सतः च गोपां भवतः च भूरेः देवाः अग्निं धारयन् द्रविणःऽदां ॥७॥ द्रविणःऽदाः द्रविणसः तुरस्य द्रविणःऽदाः मनुषस्य प्र यंसत् द्रविणःऽदाः वीरऽवतीं इषं नः द्रविणःऽदाः रासते दीर्घं आयुः ॥८॥ एव नः अग्ने संऽइधा वृधानः रेवत् पावक श्रवसे वि भाहि तत् नः मित्रः वरुणः ममहंतां अदितिः सिंधुः पृथिवी उत द्यौः ॥९॥४॥

॥ ९७ ॥ अप नः शोशुचत् अघं अग्ने शुशुग्धि आ रयिं अप नः शोशुचत् अघं ॥१॥ सुऽक्षेचिया सुगातुऽया वसुऽया च यजामहे अप नः शोशुचत् अघं ॥२॥ प्र यत् भंदिष्ठः एषां प्र अस्माकासः च सूरयः अप नः शोशुचत् अघं ॥३॥ प्र यत् ते अग्ने सूरयः जायेमहि प्र ते वयं अप नः शोशुचत् अघं ॥४॥ प्र यत् अग्नेः सहस्वतः विश्वतः यंति भानवः अप नः शोशुचत् अघं ॥५॥ त्वं हि विश्वतःऽमुख विश्वतः परिऽभुः असि अप नः शोशुचत् अघं ॥६॥ द्विषः नः विश्वतःऽमुख अति नावाऽइव

पारय अप नः शोशुचत् अघं ॥ ७ ॥ सः नः सिंधुंऽइव नावया अति पर्ष स्वस्तये अप नः शोशुचत् अघं ॥ ८ ॥ ५ ॥

॥ ९८ ॥ वैश्वानरस्य सुऽमतौ स्याम राजा हि कं भुवनानां अभिऽश्रीः इतः जातः विश्वं इदं वि चष्टे वैश्वानरः यतते सूर्येण ॥ १ ॥ पृष्टः दिवि पृष्टः अग्निः पृथिव्यां पृष्टः विश्वाः ओषधीः आ विवेश वैश्वानरः सहसा पृष्टः अग्निः सः नः दिवा सः रिषः पातु नक्तं ॥ २ ॥ वैश्वानर तव तत् सत्यं अस्तु अस्मान् रायः मघऽवानः सचंतां तत् नः मित्रः वरुणः ममहंतां अदितिः सिंधुः पृथिवी उत द्यौः ॥ ३ ॥ ६ ॥

॥ ९९ ॥ जातऽवेदसे सुनवाम सोमं अरातिऽयतः नि दहाति वेदः सः नः पर्षत् अति दुःऽगानि विश्वा नावाऽइव सिंधुं दुःऽइता अति अग्निः ॥ १ ॥ ७ ॥

॥ १०० ॥ सः यः वृषा वृष्ण्येभिः संऽओकाः महः दिवः पृथिव्याः च संऽराट् सतीनऽसत्वा हव्यः भरेषु मरुत्वान् नः भवतु इंद्रः ऊती ॥ १ ॥ यस्य अनाप्तः सूर्यस्यऽइव यामः भरेऽभरे वृत्रऽहा शुष्मः अस्ति वृषन्ऽतमः सखिऽभिः स्वेभिः एवैः मरुत्वान् नः भवतु इंद्रः ऊती ॥ २ ॥ दिवः न यस्य रेतसः दुघानाः पंथासः यंति शवसा अपरिऽइताः तरत्ऽद्वेषाः ससहिः पौंस्येभिः मरुत्वान् नः भवतु इंद्रः ऊती ॥ ३ ॥ सः अंगिरःऽभिः अंगिरःऽतमः भूत् वृषा वृषंऽभिः सखिऽभिः सखा सन् ऋग्मिऽभिः ऋग्मी गातुऽभिः ज्येष्ठः मरुत्वान् नः भवतु इंद्रः ऊती ॥ ४ ॥ सः सूनुऽभिः न रुद्रे-

भिः ऋभ्वा नृऽसह्ये सऽसह्वान् अमिऽवान् सऽनीळेभिः श्रवस्या-नि तूर्वन् मरुत्वान् नः भवतु इंद्रः ऊती ॥५॥८॥ सः मन्युऽमीः सु-ऽमर्दनस्य कर्ता अस्माकेभिः नृऽभिः सूर्ये सनत् अस्मिन् अहन् सत्ऽपतिः पुरुऽहूतः मरुत्वान् नः भवतु इंद्रः ऊती ॥६॥ तं ऊतयः रणयन् शूरऽसातौ तं क्षेमस्य क्षितयः कृण्वत चां सः विश्वस्य करुणस्य ईशे एकः मरुत्वान् नः भवतु इंद्रः ऊती ॥७॥ तं अप्सत शवसः उत्ऽसवेषु नरः नरं अवसे तं धनाय सः अंधे चित् तमसि ज्योतिः विदत् मरुत्वान् नः भवतु इंद्रः ऊती ॥८॥ सः सव्येन यमति व्राधतः चित् सः दक्षिणे संऽगृभीता कृतानि सः कीरि-णा चित् सनिता धनानि मरुत्वान् नः भवतु इंद्रः ऊती ॥९॥ सः यामेभिः सनिता सः रथेभिः विदे विश्वाभिः कृष्टिऽभिः नु अद्य सः पौंस्येभिः अभिऽभूः अशस्तीः मरुत्वान् नः भवतु इंद्रः ऊती ॥१०॥९॥ सः जामिऽभिः यत् संऽअजाति मीळ्हे अजामिऽभिः वा पुरुऽहूतः एवैः अपां तोकस्य तनयस्य जेषे मरुत्वान् नः भवतु इंद्रः ऊती ॥११॥ सः वज्रऽभृत् दस्युऽहा भीमः उग्रः सह-सऽचेताः शतऽनीथः ऋभ्वा चम्रीषः न शवसा पांचऽजन्यः मरुत्वान् नः भवतु इंद्रः ऊती ॥१२॥ तस्य वज्रः क्रंदति स्मत् स्वःऽसाः दिवः न त्वेषः रवथः शिमीऽवान् तं सचंते सनयः तं धनानि मरुत्वान् नः भवतु इंद्रः ऊती ॥१३॥ यस्य अजस्रं शवसा मानं उक्थं परिऽभुजत् रोदसी विश्वतः सीं सः पारिषत् क्र-तुऽभिः मंदसानः मरुत्वान् नः भवतु इंद्रः ऊती ॥१४॥ न यस्य देवाः देवता न मर्तीः आपः चन शवसः अंतं आपुः सः प्रऽरिक्वा त्वक्षसा क्षमः दिवः च मरुत्वान् नः भवतु इंद्रः ऊती ॥१५॥१०॥ रोहित् श्यावा सुमतऽअंभ्नुः लला़मीः द्युक्षा राये ऋज्रऽअं-

स्वस्य वृषणऽवंतं बिभ्रती धूःऽसु रथें मंद्रा चिकेत नाहुषीषु विक्षु ॥१६॥ एतत् त्यत् ते इंद्र वृष्णे उक्थं वार्षागिराः अभि गृणंति राधः ऋज्रऽअश्वः प्रष्टिऽभिः अंबरीषः सहऽदेवः भयमानः सुऽराधाः ॥१७॥ दस्यून् शिम्यून् च पुरुऽहूतः एवैः हत्वा पृथिव्यां शर्वा नि बर्हीत् सनंत क्षेचें सखिऽभिः श्वित्न्येभिः सनंत सूर्यें सनंत अपः सुऽवज्रः ॥१८॥ विश्वाहा इंद्रः अधिऽवक्ता नः अस्तु अपरिऽह्वृताः सनुयाम वाजें तत् नः मित्रः वरुणः ममहंतां अदितिः सिंधुः पृथिवी उत द्यौः ॥१९॥११॥

॥१०१॥ प्र मंदिनें पितुऽमत् अर्चत वचः यः कृष्णऽगर्भाः निःऽअहन् ऋजिश्वना अवस्यवः वृषणं वज्रंऽदक्षिणं मरुत्वंतं सख्याय हवामहे ॥१॥ यः विऽअंसं जहुषाणेन मन्युना यः शंबरं यः अहन् पिप्रुं अव्रतं इंद्रः यः शुष्णं अशुषं नि अवृणक् मरुत्वंतं सख्याय हवामहे ॥२॥ यस्य द्यावापृथिवी पौंस्यें महत् यस्य व्रते वरुणः यस्य सूर्यः यस्य इंद्रस्य सिंधवः सश्चंति व्रतं मरुत्वंतं सख्याय हवामहे ॥३॥ यः अश्वानां यः गवां गोऽपतिः वशी यः आरितः कर्मणिऽकर्मणि स्थिरः वीळोः चित् इंद्रः यः असुन्वतः वधः मरुत्वंतं सख्याय हवामहे ॥४॥ यः विश्वस्य जगंतः प्राणतः पतिः यः ब्रह्मणे प्रथमः गाः अविंदत् इंद्रः यः दस्यून् अधरान् अवऽअतिरत् मरुत्वंतं सख्याय हवामहे ॥५॥ यः भूरेभिः हव्यः यः च भीरुऽभिः यः धावत्ऽभिः हूयते यः च जिग्युऽभिः इंद्रं यं विश्वा भुवना अभि संऽदधुः मरुत्वंतं सख्याय हवामहे ॥६॥१२॥ रुद्राणां एति प्रऽदिशा विऽचक्षणः रुद्रेभिः योषा तनुते पृथु जयः इंद्रं मनीषा अभि अर्चति श्रुतं मरुत्वंतं सख्याय हवामहे ॥७॥

यत् वा मरुत्वः परमे सधऽस्थे यत् वा अवमे वृजने मादयासे अतः आ याहि अध्वरं नः अच्छ त्वाऽया हविः चकृम सत्यऽराधः ॥८॥ त्वाऽया इंद्र सोमं सुसुम सुऽदक्ष त्वाऽया हविः चकृम ब्रह्मऽवाहः अथ नियुत्वः सऽगणः मरुत्ऽभिः अस्मिन् यज्ञे बर्हिषि मादयस्व ॥९॥ मादयस्व हरिऽभिः ये ते इंद्र वि स्यस्व शिप्रे वि सृजस्व धेने आ त्वा सुऽशिप्र हरयः वहंतु उशन् हव्यानि प्रति नः जुषस्व ॥१०॥ मरुत्ऽस्तोचस्य वृजनस्य गोपाः वयं इंद्रेण सनुयाम वाजं तत् नः मित्रः वरुणः ममहंतां अदितिः सिंधुः पृथिवी उत द्यौः ॥११॥१३॥

॥ १०२ ॥ इमां ते धियं प्र भरे महः महीं अस्य स्तोत्रे धिषणा यत् ते आनजे तं उत्ऽसवे च प्रऽसवे च ससहिं इंद्रं देवासः शवसा अमदन् अनु ॥१॥ अस्य श्रवः नद्यः सप्त बिभ्रति द्यावाक्षामा पृथिवी दर्शतं वपुः अस्मे सूर्याचंद्रमसा अभिऽचक्षे श्रद्धे कं इंद्र चरतः विऽतर्तुरं ॥२॥ तं स्म रथं मघऽवन् प्र अव सातये जैत्रं यं ते अनुऽमदाम संऽगमे आजा नः इंद्र मनसा पुरुऽस्तुत त्वायत्ऽभ्यः मघऽवन् शर्म यच्छ नः ॥३॥ वयं जयेम त्वया युजा वृतं अस्माकं अंशं उत् अव भरेऽभरे अस्मभ्यं इंद्र वरिवः सुऽगं कृधि प्र शत्रूणां मघऽवन् वृष्ण्या रुज ॥४॥ नाना हि त्वा हवमानाः जनाः इमे धनानां धर्तः अवसा विपन्यवः अस्माकं स्म रथं आ तिष्ठ सातये जैत्रं हि इंद्र निऽभृतं मनः तव ॥५॥१४॥ गोऽजिता बाहू अमितऽक्रतुः सिमः कर्मन्ऽकर्मन् शतंऽऊतिः खजंऽकरः अकल्पः इंद्रः प्रतिऽमानं ओजसा अथ जनाः वि ह्वयंते सिसासवः ॥६॥ उत् ते शतात् मघऽवन् उत् च भूयसः

उत् सहस्रात् रिरिचे कृष्टिषु श्रवः अमाचं त्वा धिषणा तित्विषे मही अध वृचाणि जिघ्नसे पुरंऽदर ॥ ७ ॥ चिविष्टिऽधातु प्रतिऽमानं ओजसः तिस्रः भूमीः नृऽपते चीणि रोचना अति इदं विश्वं भुवनं ववक्षिथ अशत्रुः इंद्र जनुषा सनात् असि ॥ ८ ॥ त्वां देवेषु प्रथमं हवामहे त्वं बभूथ पृतनासु ससहिः सः इमं नः कारुं उपऽमन्युं उत्ऽभिदं इंद्रः कृणोतु प्रऽसवे रथं पुरः ॥ ९ ॥ त्वं जिगेथ न धना रुरोधिथ अभीषु आजा मघऽवन् महत्ऽसु च त्वां उयं अवसे सं शिशीमसि अथ नः इंद्र हवनेषु चोदय ॥ १० ॥ विश्वाहा इंद्रः अधिऽवक्ता नः अस्तु अपरिऽह्वृताः सनुयाम वाजं तत् नः मित्रः वरुणः ममहंतां अदितिः सिंधुः पृथिवी उत द्यौः ॥ ११ ॥ १५ ॥

॥ १०३ ॥ तत् ते इंद्रियं परमं पराचैः अधारयंत कवयः पुरा इदं क्षमा इदं अन्यत् दिवि अन्यत् अस्य सं ईं पृच्यते समनाऽइव केतुः ॥ १ ॥ सः धारयत् पृथिवीं पप्रथत् च वज्रेण हत्वा निः अपः ससर्ज अहन् अहिं अभिनत् रौहिणं वि अहन् विऽअंसं मघऽवा शचीभिः ॥ २ ॥ सः जातूऽभर्मा श्रत्ऽदधानः ओजः पुरः विऽभिंदन् अचरत् वि दासीः विद्वान् वज्रिन् दस्यवे हेतिं अस्य आर्यं सहः वर्धय द्युम्नं इंद्र ॥ ३ ॥ तत् ऊचुषे मानुषा इमा युगानि कीर्तेन्यं मघऽवा नाम बिभ्रत् उपऽप्रयन् दस्युऽहत्याय वज्री यत् ह सूनुः श्रवसे नाम दधे ॥ ४ ॥ तत् अस्य इदं पश्यत भूरि पुष्टं श्रत् इंद्रस्य धत्तन वीर्याय सः गाः अविंदत् सः अविंदत् अश्वान् सः ओषधीः सः अपः सः वनानि ॥ ५ ॥ १६ ॥ भूरिऽकर्मणे वृषभाय वृष्णे सत्यऽशुष्माय सुनवाम सोमं यः आऽहत्य परि-

पंथीऽइव शूरः अयज्वनः विऽभजन् एति वेदः ॥६॥ तत् इंद्र प्रऽइव वीर्यं चकर्थ यत् ससंतं वज्रेण अबोधयः अहिं अनु त्वा पत्नीः हृषितं वयः च विश्वे देवासः अमदन् अनु त्वा ॥७॥ शुष्णं पिप्रुं कुयवं वृचं इंद्र यदा अवधीः वि पुरः शंबरस्य तत् नः मित्रः वरुणः ममहंतां अदितिः सिंधुः पृथिवी उत द्यौः ॥८॥१७॥

॥१०४॥ योनिः ते इंद्र निऽसदे अकारि तं आ नि सीद् स्वानः न अर्वा विऽमुच्य वयः अवऽसाय अश्वान् दोषा वस्तोः वहीयसः प्रऽपित्वे ॥१॥ ओ त्ये नरः इंद्रं ऊतये गुः नु चित् तान् सद्यः अध्वनः जगम्यात् देवासः मन्युं दासस्य शश्वन् ते नः आ वक्षन् सुविताय वर्णं ॥२॥ अव त्मना भरते केतऽवेदाः अव त्मना भरते फेनं उदन् क्षीरेण स्नातः कुयवस्य योषे हते ते स्यातां प्रवणे शिफायाः ॥३॥ युयोप नाभिः उपरस्य आयोः प्र पूर्वाभिः तिरते राष्टि शूरः अंजसी कुलिशी वीरऽपत्नी पयः हिन्वानाः उदऽभिः भरंते ॥४॥ प्रति यत् स्या नीथा अदर्शि दस्योः ओकः न अच्छ सदनं जानती गात् अध स्म नः मघऽवन् चकृतात् इत् मा नः मघाऽइव निष्वपी परा दाः ॥५॥१८॥ सः त्वं नः इंद्र सुयें सः अप्ऽसु अनागाःऽत्वे आ भज जीवऽशंसे मा अंतरां भुजं आ रिरिषः नः अद्वितं ते महते इंद्रियाय ॥६॥ अध मन्ये श्रत् ते अस्मै अधायि वृषा चोदस्व महते धनाय मा नः अकृते पुरुऽहूत योनौ इंद्र क्षुध्यत्ऽभ्यः वयः आऽसुतिं दाः ॥७॥ मा नः वधीः इंद्र मा परा दाः मा नः प्रिया भोजनानि प्र मोषीः आंडा मा नः मघऽवन् शक्र निः भेत् मा नः पात्रा भेत् सहऽजानुषाणि ॥८॥ अर्वाङ् आ इहि सोमऽकामं त्वा आहुः अयं सुतः तस्य पिब

मदाय उरुऽव्यचाः जठरे आ वृषस्व पिताऽइव नः शृणुहि हूयमानः ॥९॥१९॥

॥१०५॥ चंद्रमाः अप्ऽसु अंतः आ सुऽपर्णः धावते दिवि न वः हिरण्यऽनेमयः पदं विंदंति विऽद्युतः वित्तं मे अस्य रोदसी ॥१॥ अर्थं इत् वै ऊं अर्थिनः आ जाया युवते पतिं तुंजाते वृष्णे पयः परिऽदाय रसं दुहे वित्तं मे अस्य रोदसी ॥२॥ मो सु देवाः अदः स्वः अव पादि दिवः परि मा सोम्यस्य शंऽभुवः शूने भूम कदा चन वित्तं मे अस्य रोदसी ॥३॥ यज्ञं पृच्छामि अवमं सः तत् दूतः वि वोचति क्व ऋतं पूर्व्ये गतं कः तत् बिभर्ति नूतनः वित्तं मे अस्य रोदसी ॥४॥ अमी ये देवाः स्थन त्रिषु आ रोचने दिवः कत् वः ऋतं कत् अनृतं क्व प्रत्ना वः आऽहुतिः वित्तं मे अस्य रोदसी ॥५॥२०॥ कत् वः ऋतस्य धर्णसि कत् वरुणस्य चक्षणं कत् अर्यम्णः महः पथा अति क्रामेम दुःऽध्यः वित्तं मे अस्य रोदसी ॥६॥ अहं सः अस्मि यः पुरा सुते वदामि कानि चित् तं मा व्यंति आऽध्यः वृकः न तृष्णऽजं मृगं वित्तं मे अस्य रोदसी ॥७॥ सं मा तपंति अभितः सपत्नीःऽइव पर्शवः मूषः न शिश्ना वि अदंति मा आऽध्यः स्तोतारं ते शतऽक्रतो° वित्तं मे अस्य रोदसी ॥८॥ अमी ये सप्त रश्मयः तत्र मे नाभिः आऽततंता चितः तत् वेद आप्नः सः जामिऽत्वाय एभति वित्तं मे अस्य रोदसी ॥९॥ अमी ये पंच उक्षणः मध्ये तस्थुः महः दिवः देवऽत्रा नु प्रऽवाच्यं सध्रीचीनाः नि ववृतुः वित्तं मे अस्य रोदसी ॥१०॥२१॥ सुऽपर्णाः एते आसते मध्ये आऽरोधने दिवः ते सेधंति पथः वृकं तरंतं यह्व-

तीः अपः वित्तं मे अस्य रोदसी ॥११॥ नव्यं तत् उक्थ्यं हितं देवासः सुऽप्रवाचनं ऋतं अर्षन्ति सिंधवः सत्यं तनान् सूर्यः वित्तं मे अस्य रोदसी ॥१२॥ अग्ने तव त्यत् उक्थ्यं देवेषु अस्ति आप्यं सः नः सत्तः मनुष्वत् आ देवान् यक्षि विदुःऽतरः वित्तं मे अस्य रोदसी ॥१३॥ सत्तः होता मनुष्वत् आ देवान् अच्छ विदुःऽतरः अग्निः हव्या सुसूदति देवः देवेषु मेधिरः वित्तं मे अस्य रोदसी ॥१४॥ ब्रह्म कृणोति वरुणः गातुऽविदं तं ईमहे वि ऊर्णोति हृदा मतिं नव्यः जायतां ऋतं वित्तं मे अस्य रोदसी ॥१५॥२२॥ असौ यः पंथाः आदित्यः दिवि प्रऽवाच्यं कृतः न सः देवाः अतिऽक्रमे तं मर्तासः न पश्यथ वित्तं मे अस्य रोदसी ॥१६॥ चितः कूपे अवऽहितः देवान् हवते ऊतये तत् शुश्राव बृहस्पतिः कृण्वन् अंहूरणात् उरु वित्तं मे अस्य रोदसी ॥१७॥ अरुणः मा सकृत् वृकः पथा यंतं ददर्श हि उत् जिहीते निऽच अय्य तष्टाऽइव पृष्टिऽआमयी वित्तं मे अस्य रोदसी ॥१८॥ एना आंगूषेण वयं इंद्रेऽवंतः अभि स्याम वृजनं सर्वऽवीराः तत् नः मित्रः वरुणः ममहंतां अदितिः सिंधुः पृथिवी उत द्यौः ॥१९॥२३॥१५॥

॥१०६॥ इंद्रं मित्रं वरुणं अग्निं ऊतये मारुतं शर्धः अदितिं हवामहे रथं न दुःऽगात् वसवः सुऽदानवः विश्वस्मात् नः अंहसः निः पिपर्तन ॥१॥ ते आदित्याः आ गत सर्वऽतातये भूत देवाः वृचऽतूर्येषु शंऽभुवः रथं न दुःऽगात् वसवः सुऽदानवः विश्वस्मात् नः अंहसः निः पिपर्तन ॥२॥ अवंतु नः पितरः सुऽप्रवाचनाः उत देवी देवऽपुत्रे० ऋतऽवृधा रथं न दुःऽगात् वसवः सुऽदानवः विश्वस्मात् नः अंहसः निः पिपर्तन ॥३॥ नराशंसं वा-

जिनँ वाजयंन् इह क्षयत्ऽवीरं पूषणँ सुम्नैः ईमहे रथँ न दुःऽगात् वसवः सुऽदानवः विश्वस्मात् नः अंहसः निः पिपर्तन ॥४॥ बृहस्पते सदँ इत् नः सुऽगं कृधि शं योः यत् ते मनुःऽहितं तत् ईमहे रथँ न दुःऽगात् वसवः सुऽदानवः विश्वस्मात् नः अंहसः निः पिपर्तन ॥५॥ इंद्रँ कुत्सः वृचऽहनँ शचीऽपतिँ काटे निऽबाळ्हः ऋषिः अह्वत् ऊतये रथँ न दुःऽगात् वसवः सुऽदानवः विश्वस्मात् नः अंहसः निः पिपर्तन ॥६॥ देवैः नः देवी अदितिः नि पातु देवः त्राता त्रायतां अप्रऽयुच्छन् तत् नः मित्रः वरुणः ममहंतां अदितिः सिंधुः पृथिवी उत द्यौः ॥७॥२४॥

॥१०७॥ यज्ञः देवानाँ प्रति एति सुम्नं आदित्यासः भवत मृळयंतः आ वः अर्वाचीं सुऽमतिः ववृत्यात् अंहोः चित् या वरिवोवित्ऽतरा असत् ॥१॥ उप नः देवाः अवसा आ गमंतु अंगिरसां सामऽभिः स्तूयमानाः इंद्रः इंद्रियैः मरुतः मरुत्ऽभिः आदित्यैः नः अदितिः शर्म यंसत्॥२॥ तत् नः इंद्रः तत् वरुणः तत् अग्निः तत् अर्यमा तत् सविता चनः धात् तत् नः मित्रः वरुणः ममहंतां अदितिः सिंधुः पृथिवी उत द्यौः ॥३॥२५॥

॥१०८॥ यः इंद्राग्नी चित्रऽतमः रथः वां अभि विश्वानि भुवनानि चष्टे तेन आ यातं सऽरथँ तस्थिऽवांसा अथ सोमस्य पिबतं सुतस्य ॥१॥ यावत् इदं भुवनं विश्वं अस्ति उरुऽव्यचा वरिमता गभीरं तावान् अयं पातवे सोमः अस्तु अरँ इंद्राग्नी मनसे युवऽभ्यां ॥२॥ चक्राथे हि सध्र्यक् नाम भद्रं सध्रीचीना वृचऽहनौ उत स्थः तौ इंद्राग्नी सध्र्यंचा निऽसद्य वृष्णः सोमस्य

वृषणा आ वृषेथां ॥३॥ संऽइद्धेषु अग्निषु आनजाना यतऽसुंचा बर्हिः ऊं तिस्तिराणा तीव्रैः सोमैः परिऽसिक्तेभिः अर्वाक् आ इंद्राग्नी सौमनसाय यातं ॥४॥ यानि इंद्राग्नी चक्रथुः वीर्याणि यानि रूपाणि उत वृष्ण्यानि या वां प्रत्नानि सख्या शिवानि तेभिः सोमस्य पिबतं सुतस्य ॥५॥ २६॥ यत् अब्रवं प्रथमं वां वृणानः अयं सोमः असुरैः नः विऽहव्यः तां सत्यां श्रद्धां अभि आ हि यातं अथ सोमस्य पिबतं सुतस्य ॥६॥ यत् इंद्राग्नी मदेथः स्वे दुरोणे यत् ब्रह्मणि राजनि वा यजत्रा अतः परि वृषणौ आ हि यातं अथ सोमस्य पिबतं सुतस्य ॥७॥ यत् इंद्राग्नी यदुषु तुर्वशेषु यत् द्रुह्युषु अनुषु पूरुषु स्थः अतः परि वृषणौ आ हि यातं अथ सोमस्य पिबतं सुतस्य ॥८॥ यत् इंद्राग्नी अवमस्यां पृथिव्यां मध्यमस्यां परमस्यां उत स्थः अतः परि वृषणौ आ हि यातं अथ सोमस्य पिबतं सुतस्य ॥९॥ यत् इंद्राग्नी परमस्यां पृथिव्यां मध्यमस्यां अवमस्यां उत स्थः अतः परि वृषणौ आ हि यातं अथ सोमस्य पिबतं सुतस्य ॥१०॥ यत् इंद्राग्नी दिवि स्थः यत् पृथिव्यां यत् पर्वतेषु ओषधीषु अप्ऽसु अतः परि वृषणौ आ हि यातं अथ सोमस्य पिबतं सुतस्य ॥११॥ यत् इंद्राग्नी उतऽइता सूर्यस्य मध्ये दिवः स्वधया मादयेथे अतः परि वृषणौ आ हि यातं अथ सोमस्य पिबतं सुतस्य ॥१२॥ एव इंद्राग्नी पपिऽवांसा सुतस्य विश्वा अस्मभ्यं सं जयतं धनानि तत् नः मित्रः वरुणः ममहंतां अदितिः सिंधुः पृथिवी उत द्यौः ॥१३॥२७॥

॥१०९॥ वि हि अख्यं मनसा वस्यः इच्छन् इंद्राग्नी जासः उत वा सऽजातान् न अन्या युवत् प्रऽमतिः अस्ति मह्यं सः

वां धियं वाजयंतीं अतक्षं ॥१॥ अश्रवं हि भूरिदावत्तरा वां विजामातुः उत वा घ स्यालात् अथ सोमस्य प्रयती युवभ्यां इंद्राग्नी स्तोमं जनयामि नव्यं ॥२॥ मा छेद्म रश्मीन् इति नाधमानाः पितॄणां शक्तीः अनुयच्छमानाः इंद्राग्निभ्यां कं वृषणः मदंति ता हि अद्रीं धिषणायाः उपस्थे ॥३॥ युवाभ्यां देवी धिषणा मदाय इंद्राग्नी सोमं उशती सुनोति तौ अश्विना भद्रहस्ता सुपाणी० आ धावतं मधुना पृङ्क्तं अप्सु ॥४॥ युवां इंद्राग्नी वसुनः विभागे तवस्तमा शुश्रव वृचहत्ये तौ आसद्य बर्हिषि यज्ञे अस्मिन् प्र चर्षणी मादयेथां सुतस्य ॥५॥२८॥ प्र चर्षणिभ्यः पृतनाहवेषु प्र पृथिव्याः रिरिचाथे दिवः च प्र सिंधुभ्यः प्र गिरिभ्यः महित्वा प्र इंद्राग्नी विश्वा भुवना अति अन्या ॥६॥ आ भरतं शिक्षतं वज्रबाहू० अस्मान् इंद्राग्नी अवतं शचीभिः इमे नु ते रश्मयः सूर्यस्य येभिः सपित्वं पितरः नः आसन् ॥७॥ पुरंदरा शिक्षतं वज्रहस्ता अस्मान् इंद्राग्नी अवतं भरेषु तत् नः मित्रः वरुणः ममहंतां अदितिः सिंधुः पृथिवी उत द्यौः ॥८॥२९॥

॥११०॥ ततं मे अपः तत् ऊं तायते पुनः स्वादिष्ठा धीतिः उचथाय शस्यते अयं समुद्रः इह विश्वदेव्यः स्वाहाकृतस्य सं ऊं तृप्णुत ऋभवः ॥१॥ आभोगयं प्र यत् इच्छंतः ऐतन अपाकाः प्राचः मम के चित् आपयः सौधन्वनासः चरित्रस्य भूमना अगच्छत सवितुः दाशुषः गृहं ॥२॥ तत् सविता वः अमृतत्वं आ असुवत् अगोह्यं यत् श्रवयंतः ऐतन त्यं चित् चमसं असुरस्य भक्षणं एकं संतं अकृणुत चतुःअवयं ॥३॥ विष्टी शमी तरणित्वेन

वाघतः मर्तासः संतः अमृतऽत्वं आनशुः सौधन्वनाः ऋभवः सूरऽचक्षसः संवत्सरे सं अपृच्यंत धीतिऽभिः ॥४॥ क्षेचैंऽइव विममुः तेजनेन एकं पात्रं ऋभवः जेहमानं उपऽस्तुताः उपऽमं नाधमानाः अमर्त्येषु श्रवः इच्छमानाः ॥५॥३०॥ आ मनीषां अंतरिक्षस्य नृऽभ्यः सुचाऽइव घृतं जुहवाम विद्मना तरणिऽत्वा ये पितुः अस्य सश्चिरे ऋभवः वाजं अरुहन् दिवः रजः ॥६॥ ऋभुः नः इंद्रः शवसा नवीयान् ऋभुः वाजेभिः वसुऽभिः वसुः ददिः युष्माकं देवाः अवसा अहनि प्रिये अभि तिष्ठेम पृत्सुतीः असुन्वतां ॥७॥ निः चर्मणः ऋभवः गां अपिंशत सं वत्सेन असृजत मातरं पुनः सौधन्वनासः सुऽअपस्यया नरः जिव्री युवाना पितरा अकृणोतन ॥८॥ वाजेभिः नः वाजऽसातौ अविड्ढि ऋभुऽमान् इंद्र चित्रं आ दर्षि राधः तत् नः मित्रः वरुणः ममहंतां अदितिः सिंधुः पृथिवी उत द्यौः ॥९॥३१॥

॥१११॥ तक्षन् रथं सुऽवृतं विद्मनाऽअपसः तक्षन् हरी इंद्रऽवाहा वृषणऽवसू० तक्षन् पितृऽभ्यां ऋभवः युवत् वयः तक्षन् वत्साय मातरं सचाऽभुवं ॥१॥ आ नः यज्ञाय तक्षत ऋभुऽमत् वयः ऋत्वे दक्षाय सुऽप्रजावतीं इषं यथा क्षयाम सर्वऽवीरया विशा तत् नः शर्धाय धासथ सु इंद्रियं ॥२॥ आ तक्षत सातिं अस्मभ्यं ऋभवः सातिं रथाय सातिं अर्वते नरः सातिं नः जैत्रीं सं महेत विश्वहा जामिं अजामिं पृतनासु सक्षणिं ॥३॥ ऋभुक्षणं इंद्रं आ हुवे ऊतये ऋभून् वाजान् मरुतः सोमऽपीतये उभा मित्रावरुणा नूनं अश्विना ते नः हिन्वंतु सातये धिये जिषे ॥४॥ ऋभुः भराय सं शिशातु सातिं समर्येऽजित् वाजः अस्मान्

अविष्टु तत् नः मित्रः वरुणः ममहंतां अदितिः सिंधुः पृथिवी उत द्यौः ॥५॥३२॥

॥११२॥ ईळे द्यावापृथिवी पूर्वऽचित्तये अग्निं घर्मे सुऽरुचं यामन् इष्टये याभिः भरे कारं अंशाय जिन्वथः ताभिः ऊं सु ऊतिऽभिः अश्विना आ गतं ॥१॥ युवोः दानाय सुऽभराः असश्चतः रथं आ तस्थुः वचसं न मंतवे याभिः धियः अवथः कर्मन् इष्टये ताभिः ऊं सु ऊतिऽभिः अश्विना आ गतं ॥२॥ युवं तासां दिव्यस्य प्रऽशासने विशां क्षयथः अमृतस्य मज्मना याभिः धेनुं अस्वं पिन्वथः नरा ताभिः ऊं सु ऊतिऽभिः अश्विना आ गतं ॥३॥ याभिः परिऽज्मा तनयस्य मज्मना ह्विऽमाता तूर्षु नरणिः विऽभूषति याभिः चिऽमंतुः अभवत् विऽचक्षणः ताभिः ऊं सु ऊतिऽभिः अश्विना आ गतं ॥४॥ याभिः रेभं निऽवृतं सितं अत्ऽभ्यः उत् वंदनं ऐरयतं स्वः दृशे याभिः कण्वं प्र सिसासंतं आवतं ताभिः ऊं सु ऊतिऽभिः अश्विना आ गतं ॥५॥३३॥ याभिः अंतकं जसमानं आऽअरणे भुज्युं याभिः अव्यथिऽभिः जिजिन्वथुः याभिः कर्कंधुं वय्यं च जिन्वथः ताभिः ऊं सु ऊतिऽभिः अश्विना आ गतं ॥६॥ याभिः शुचंतिं धनऽसां सुऽसंसदं तप्तं घर्मं ओम्याऽवंतं अत्रये याभिः पृश्निऽगुं पुरुऽकुत्सं आवतं ताभिः ऊं सु ऊतिऽभिः अश्विना आ गतं ॥७॥ याभिः शचीभिः वृषणा पराऽवृजं प्र अंधं श्रोणं चक्षसे एतवे कृथः याभिः वर्तिकां ग्रसितां अमुंचतं ताभिः ऊं सु ऊतिऽभिः अश्विना आ गतं ॥८॥ याभिः सिंधुं मधुऽमंतं असश्चतं वसिष्ठं याभिः अजरौ अजिन्वतं याभिः कुत्सं श्रुतर्यं नर्यं आवतं ताभिः ऊं सु ऊति-

ऽभिः अश्विना आ गतं ॥९॥ याभिः विश्पलां धनऽसां अथर्व्ये सहस्रऽमीळ्हे आजौ अजिन्वतं याभिः वशं अश्व्यं प्रेणिं आवतं ताभिः ऊं सु ऊतिऽभिः अश्विना आ गतं ॥१०॥३४॥ याभिः सुऽदानू० औशिजाय वणिजे दीर्घऽश्रवसे मधु कोशः अक्षरत् कक्षीवंतं स्तोतारं याभिः आवतं ताभिः ऊं सु ऊतिऽभिः अश्विना आ गतं ॥११॥ याभिः रसां क्षोदसा उद्नः पिपिन्वथुः अनश्वं याभिः रथं आवतं जिषे याभिः चिऽशोकः उस्रियाः उत्ऽआजत ताभिः ऊं सु ऊतिऽभिः अश्विना आ गतं ॥१२॥ याभिः सूर्यं परिऽयाथः पराऽवति मंधातारं क्षैवऽपत्येषु आवतं याभिः विप्रं प्रभरत्ऽवाजं आवतं ताभिः ऊं सु ऊतिऽभिः अश्विना आ गतं ॥१३॥ याभिः महां अतिथिऽग्वं कशःऽजुवं दिवःऽदासं शंबरऽहत्ये आवतं याभिः पूःऽभिद्ये चुसदस्युं आवतं ताभिः ऊं सु ऊतिऽभिः अश्विना आ गतं ॥१४॥ याभिः वम्रं विऽपिपानं उपऽस्तुतं कलिं याभिः वित्तऽजानिं दुवस्यथः याभिः विऽअश्वं उत पृथिं आवतं ताभिः ऊं सु ऊतिऽभिः अश्विना आ गतं ॥१५॥३५॥ याभिः नरा शयवे याभिः अत्रये याभिः पुरा मनवे गातुं ईषथुः याभिः शरीः आजतं स्यूमऽरश्मये ताभिः ऊं सु ऊतिऽभिः अश्विना आ गतं ॥१६॥ याभिः पठर्वा जठरस्य मज्मना अग्निः न अदीदेत् चितः इद्धः अज्मन् आ याभिः शयीतं अवथः महाऽधने ताभिः ऊं सु ऊतिऽभिः अश्विना आ गतं ॥१७॥ याभिः अंगिरः मनसा निऽरण्यथः अयं गच्छथः विऽवरे गोऽअर्णसः याभिः मनुं प्रूरं इषा संऽआवतं ताभिः ऊं सु ऊतिऽभिः अश्विना आ गतं ॥१८॥ याभिः पत्नीः विऽमदाय निऽऊहथुः आ घ वा याभिः अरुणीः अशिक्षतं या-

भिः सुऽदासे ऊहथुः सुऽदेव्यं ताभिः ऊं सु ऊतिऽभिः अश्विना आ गतं ॥१९॥ याभिः शंऽतातीo भवथः दाशुषे भुज्युं याभिः अवथः याभिः अध्रिऽगुं ओम्याऽवतीं सुऽभरां ऋतऽस्तुभं ताभिः ऊं सु ऊतिऽभिः अश्विना आ गतं ॥२०॥३६॥ याभिः कृशानुं असने दुवस्यथः जवे याभिः यूनः अर्वंतं आवतं मधु प्रियं भरथः यत् सरत्ऽभ्यः ताभिः ऊं सु ऊतिऽभिः अश्विना आ गतं ॥२१॥ याभिः नरं गोषुऽयुधं नृऽसह्ये क्षेत्रस्य साता तनयस्य जिन्वथः याभिः रथान् अवथः याभिः अर्वतः ताभिः ऊं सु ऊतिऽभिः अश्विना आ गतं ॥२२॥ याभिः कुत्सं आर्जुनेयं शतऽक्रतूo प्र तुर्वीतिं प्र च दभीतिं आवतं याभिः ध्वसंतिं पुरुऽसंतिं आवतं ताभिः ऊं सु ऊतिऽभिः अश्विना आ गतं ॥२३॥ अप्रऽस्वतीं अश्विना वाचं अस्मे कृतं नः दस्रा वृषणा मनीषां अद्यूत्ये अवसे नि ह्वये वां वृधे च नः भवतं वाजऽसातौ ॥२४॥ द्युऽभिः अक्तुऽभिः परि पातं अस्मान् अरिष्टेभिः अश्विना सौभगेभिः तत् नः मित्रः वरुणः ममहंतां अदितिः सिंधुः पृथिवी उत द्यौः ॥२५॥३७॥७॥

॥११३॥ इदं श्रेष्ठं ज्योतिषां ज्योतिः आ अगात् चित्रः प्रऽकेतः अजनिष्ट विऽभ्वा यथा प्रऽसूता सवितुः सवाय एव रात्री उषसे योनिं अरैक् ॥१॥ रुशत्ऽवत्सा रुशती श्वेत्या आ अगात् अरैक् कृष्णा सदनानि अस्याः समानऽबंधूo अमृते अनूची द्यावा वर्णं चरतः आऽमिनानेo ॥२॥ समानः अध्वा स्वस्रोः अनंतः तं अन्याऽअन्या चरतः देवऽशिष्टेo न मेथेते न तस्थतुः सुऽमेकेo नक्तोषसा समनसा विऽरूपेo ॥३॥ भा-

स्वंती नेची सूनृतानां अचेति चिचा वि दुरः नः आवः० प्र-ऽअर्पय जगत् वि ऊं नः रायः अख्यत् उषाः अजीगः भुवनानि विश्वा ॥४॥ जिह्मऽश्ये चरितवे मघोनी आऽभोगये इष्टये राये ऊं त्वं दृभं पश्यन्ऽभ्यः उर्विया विऽचक्षे उषाः अजीगः भुवनानि विश्वा ॥५॥१॥ क्षुचाय त्वं श्रवसे त्वं महीयै इष्टये त्वं अर्थ-ऽइव त्वं इत्यै विऽसदृशा जीविता अभिऽप्रचक्षे उषाः अजीगः भुवनानि विश्वा ॥६॥ एषा दिवः दुहिता प्रति अदर्शि विऽउच्छंती युवतिः शुक्रऽवासाः विश्वस्य ईशाना पार्थिवस्य वस्वः उषः अद्य इह सुऽभगे वि उच्छ ॥७॥ पराऽयतीनां अनु एति पाथः आऽयतीनां प्रथमा शश्वतीनां विऽउच्छंती जीवं उत्ऽईरयंती उषाः मृतं कं चन बोधयंती ॥८॥ उषः यत् अग्निं सऽइधे चकर्थ वि यत् आवः चक्षसा सूर्यस्य यत् मानुषान् यक्ष्यमाणान् अजीगः तत् देवेषु चकृषे भद्रं अह्नः ॥९॥ कियति आ यत् समया भवाति याः विऽऊषुः याः च नूनं विऽउच्छान् अनु पूर्वाः कृपते वावशाना प्रऽदीध्याना जोषं अन्याभिः एति ॥१०॥२॥ ईयुः ते ये पूर्वेऽतरां अपश्यन् विऽउच्छंतीं उषसं मर्त्यासः अस्माभिः ऊं नु प्रतिऽचक्ष्या अभूत् ओ ते यंति ये अपरीषु पश्यान् ॥११॥ यवयत्ऽद्वेषाः ऋतऽपाः ऋतेऽजाः सुम्नऽवरी सूनृताः ईरयंती सुऽमंगलीः विभ्रती देवऽवीतिं इह अद्य उषः श्रेष्ठऽतमा वि उच्छ ॥१२॥ शश्वत् पुरा उषाः वि उ-वास देवी अथो अद्य इदं वि आवः मघोनी अथो वि उच्छात् उत्ऽतरान् अनु द्यून् अजरा अमृता चरति स्वधाभिः ॥१३॥ वि अंजिऽभिः दिवः आतासु अद्यौत् अप कृष्णां निःऽनिजं देवी आवः० प्रऽबोधयंती अरुणेभिः अश्वैः आ उषाः याति सुऽयुजा

रथेन ॥ १४ ॥ आऽवहंती पोष्या वार्याणि चित्रं केतुं कृणुते चेकिताना ईयुषीणां उपऽमा शश्वतीनां विऽभातीनां प्रथमा उषाः वि अश्वैत् ॥ १५ ॥ ३ ॥ उत् ईर्ध्वं जीवः असुः नः आ अगात् अप प्र अगात् तमः आ ज्योतिः एति अरैक् पंथां यातवे सूर्याय अगन्म यत्र प्रऽतिरंते आयुः ॥ १६ ॥ स्यूमना वाचः उत् इयर्ति वह्निः स्तवानः रेभः उषसः विऽभातीः अद्य तत् उच्छ गृणते मघोनि अस्मे आयुः नि दिदीहि प्रजाऽवत् ॥ १७ ॥ याः गोऽमतीः उषसः सर्वऽवीराः विऽउच्छंति दाशुषे मर्त्याय वायोःऽइव सूनृतानां उत्ऽअर्के ताः अश्वऽदाः अश्नवत् सोमऽसुत्वा ॥ १८ ॥ माता देवानां अदितेः अनीकं यज्ञस्य केतुः बृहती वि भाहि प्रशस्तिऽकृत् ब्रह्मणे नः वि उच्छ आ नः जने जनय विश्वऽवारे ॥ १९ ॥ यत् चित्रं अत्नः उषसः वहंति ईजानाय शशमानाय भद्रं तत् नः मित्रः वरुणः ममहंतां अदितिः सिंधुः पृथिवी उत द्यौः ॥ २० ॥ ४ ॥

॥ ११४ ॥ इमाः रुद्राय तवसे कपर्दिने क्षयत्ऽवीराय प्र भरामहे मतीः यथा शं असत् द्विऽपदे चतुःऽपदे विश्वं पुष्टं ग्रामे अस्मिन् अनातुरं ॥ १ ॥ मृळ नः रुद्र उत नः मयः कृधि क्षयत्ऽवीराय नमसा विधेम ते यत् शं च योः च मनुः आऽयेजे पिता तत् अश्याम तव रुद्र प्रऽनीतिषु ॥ २ ॥ अश्याम ते सुऽमतिं देवऽयज्यया क्षयत्ऽवीरस्य तव रुद्र मीढ्वः सुम्नऽयन् इत् विशः अस्माकं आ चर अरिष्टऽवीराः जुहवाम ते हविः ॥ ३ ॥ त्वेषं वयं रुद्रं यज्ञऽसाधं वंकुं कविं अवसे नि ह्वयामहे आरे अस्मत् दैव्यं हेळः अस्यतु सुऽमतिं इत् वयं अस्य आ वृणी-

महे ॥ ४ ॥ दिवः वराहं अरुषं कपर्दिनं त्वेषं रूपं नमसा नि ह्वयामहे हस्ते बिभ्रत् भेषजा वार्याणि शर्म वर्म छर्दिः अस्मभ्यं यंसत् ॥ ५ ॥ ५ ॥ इदं पित्रे मरुतां उच्यते वचः स्वादोः स्वादीयः रुद्राय वर्धनं रास्व च नः अमृत मर्तऽभोजनं त्मने तोकाय तनयाय मृळ ॥ ६ ॥ मा नः महांतं उत मा नः अर्भकं मा नः उक्षंतं उत मा नः उक्षितं मा नः वधीः पितरं मा उत मातरं मा नः प्रियाः तन्वः रुद्र रिरिषः ॥ ७ ॥ मा नः तोके तनये मा नः आयौ मा नः गोषु मा नः अश्वेषु रिरिषः वीरान् मा नः रुद्र भामितः वधीः हविष्मंतः सदं इत् त्वा हवामहे ॥ ८ ॥ उप ते स्तोमान् पशुपाःऽईव आ अकरं रास्व पितः मरुतां सुम्नं अस्मे भद्रा हि ते सुऽमतिः मृळयत्ऽतमा अथ वयं अवः इत् ते वृणीमहे ॥ ९ ॥ आरे ते गोऽघं उत पुरुषऽघं क्षयत्ऽवीर सुम्नं अस्मे ते अस्तु मृळ च नः अधि च ब्रूहि देव अध च नः शर्म यच्छ द्विऽबर्हीः ॥ १० ॥ अवोचाम नमः अस्मै अवस्यवः शृणोतु नः हवं रुद्रः मरुत्वान् तत् नः मित्रः वरुणः ममहंतां अदितिः सिंधुः पृथिवी उत द्यौः ॥ ११ ॥ ६ ॥

॥ ११५ ॥ चित्रं देवानां उत् अगात् अनीकं चक्षुः मित्रस्य वरुणस्य अग्नेः आ अप्राः द्यावापृथिवी अंतरिक्षं सूर्यः आत्मा जगतः तस्थुषः च ॥ १ ॥ सूर्यः देवीं उषसं रोचमानां मर्यः न योषां अभि एति पश्चात् यत्र नरः देवऽयंतः युगानि विऽतन्वते प्रति भद्राय भद्रं ॥ २ ॥ भद्राः अश्वाः हरितः सूर्यस्य चित्राः एतऽग्वाः अनुऽमाद्यासः नमस्यंतः दिवः आ पृष्ठं अस्थुः परि द्यावापृथिवी यंति सद्यः ॥ ३ ॥ तत् सूर्यस्य देवऽत्वं तत् महिऽत्वं

मध्या कर्तोः विऽतंतं सं जभार् यदा इत् अयुक्त हरितः सधऽस्थात् आत् राची वासः तनुते सिमस्मै ॥४॥ तत् मित्रस्य वरुणस्य अभिऽचक्षे सूर्यः रूपं कृणुते द्योः उपऽस्थे अनंतं अन्यत् रुशत् अस्य पाजः कृष्णं अन्यत् हरितः सं भरंति ॥५॥ अद्य देवाः उतऽइता सूर्यस्य निः अंहसः पिपृत निः अवद्यात् तत् नः मित्रः वरुणः ममहंतां अदितिः सिंधुः पृथिवी उत द्यौः ॥६॥७॥११६॥

॥११६॥ नासत्याभ्यां बर्हिःऽइव प्र वृंजे स्तोमान् इयर्मि अभ्रियाऽइव वातः यौ अभिगाय विऽमदाय जायां सेनाऽजुर्वा निऽऊहतुः रथेन ॥१॥ वीळुपत्मंऽभिः आशुहेमंऽभिः वा देवानौ वा जूतिऽभिः शाशदाना तत् रासभः नासत्या सहस्रं आजा यमस्य प्रऽधने जिगाय ॥२॥ तुग्रः ह भुज्युं अश्विना उदऽमेघे रयिं न कः चित् ममृऽवान् अव अहाः तं ऊहथुः नौभिः आत्मन्ऽवतीभिः अंतरिक्षप्रुत्ऽभिः अपोऽउदकाभिः ॥३॥ तिस्रः क्षपः त्रिः अहा अतिव्रजत्ऽभिः नासत्या भुज्युं ऊहथुः पतंगैः समुद्रस्य धन्वन् आर्द्रस्य पारे त्रिऽभिः रथैः शतपत्ऽभिः षट्ऽअश्वैः ॥४॥ अनारंभणे तत् अवीरयेथां अनास्थाने अग्रभणे समुद्रे यत् अश्विनौ ऊहथुः भुज्युं अस्तं शतऽअरित्रां नावं आतस्थिऽवांसं ॥५॥८॥ यं अश्विना ददथुः श्वेतं अश्वं अघऽअश्वाय शश्वत् इत् स्वस्ति तत् वां दात्रं महि कीर्तेन्यं भूत् पैद्वः वाजी सदं इत् हव्यः अर्यः ॥६॥ युवं नरा स्तुवते पज्रियाय कक्षीवते अरदतं पुरंऽधिं कारोतरात् शफात् अश्वस्य वृष्णः शतं कुंभान् असिंचतं सुरायाः ॥७॥ हिमेन अग्निं घ्रंसं अवारयेथां पितुऽमतीं ऊर्जं अस्मै अधत्तं ऋबीसे अत्रिं अश्विना अवऽनीतं उत् निन्यथुः सर्वंऽगणं

स्वस्ति ॥८॥ परा अवर्तं नासत्या अनुदेथां उच्चाऽबुध्नं चक्रथुः जिह्मऽबारं क्षरन् आपः न पायनाय राये सहस्राय तृष्यते गोतमस्य ॥९॥ जुजुरुषः नासत्या उत वव्रिं प्र अमुंचतं द्रापिंऽइव च्यवानात् प्र अतिरतं जहितस्य आयुः दस्रा आत् इत् पतिं अकृणुतं कनीनां॥१०॥९॥ तत् वां नरा शंस्यं राध्यं च अभिष्टिऽमत् नासत्या वरूथं यत् विद्वांसा निधिंऽइव अपऽगूळ्हं उत् दर्शतात् ऊपथुः वंदनाय॥११॥ तत् वां नरा सनये दंसः उग्रं आविः कृणोमि तन्यतुः न वृष्टिं दध्यङ् ह यत् मधु आथर्वणः वां अश्वस्य शीर्ष्णा प्र यत् ईं उवाच॥१२॥ अजोहवीत् नासत्या करा वां महे यामन् पुरुऽभुजा पुरंऽधिः श्रुतं तत् शासुःऽइव वध्रिऽमत्याः हिरण्यऽहस्तं अश्विनौ अदत्तं ॥१३॥ आस्नः वृकस्य वर्तिकां अभीकें युवं नरा नासत्या अमुमुक्तं उतो कविं पुरुऽभुजा युवं ह कृपमाणं अकृणुतं विऽचक्षे ॥१४॥ चरित्रं हि वेःऽइव अच्छेदि पर्ण आजा खेलस्य परिऽतक्म्यायां सद्यः जंघां आयसीं विश्पलायै धनें हिते सर्तवे प्रतिं अधत्तं ॥१५॥१०॥ शतं मेषान् वृक्ये चक्षदानं ऋज्रऽअश्वं तं पिता अंधं चकार तस्मै अक्षी नासत्या विऽचक्षे आ अधत्तं दस्रा भिषजौ अनर्वन् ॥१६॥ आ वां रथं दुहिता सूर्यस्य कार्ष्मेऽइव अतिष्ठत् अर्वता जयंती विश्वे देवाः अनु अमन्यंत हृत्ऽभिः सं ऊं श्रिया नासत्या सचेथे ॥१७॥ यत् अयातं दिवःऽदासाय वर्तिः भरत्ऽवाजाय अश्विना हयंता रेवत् उवाह सचनः रथः वां वृषभः च शिंशुमारः च युक्ता॥१८॥ रयिं सुऽक्षत्रं सुऽअपत्यं आयुः सुऽवीर्यं नासत्या वहंता आ जह्नावीं सऽमनसा उप वाजैः चिः अहूः भागं दधतीं अयातं ॥१९॥ परिऽविष्टं जाहुषं विश्वतः सीं सुऽगेभिः नक्तं ऊह्यथुः रजःऽभिः

विऽभिंदुना नासत्या रथेन वि पर्वतान् अजरयू अयातं ॥२०॥११॥ एकस्याः वस्तोः आवतं रणाय वशं अश्विना सनये सहस्रा निः अहतं दुच्छुनाः इंद्रेऽवंता पृथुऽश्रवसः वृषणौ अरातीः ॥२१॥ शरस्य चित् आर्चतऽकस्य अवतात् आ नीचात् उच्चा चक्रथुः पातवे वाः० शयवे चित् नासत्या शचीभिः जसुरये स्तर्यं पिप्यथुः गां ॥२२॥ अवस्यते स्तुवते कृष्णियाय ऋजुऽयते नासत्या शचीभिः पप्रुं न नष्टंऽइव दर्शनाय विष्णाप्वं ददथुः विश्वकाय ॥२३॥ दश राचीः अश्विवेन नव द्यून् अवऽनद्धं भ्रथितं अप्ऽसु अंतः विऽप्रुतं रेभं उदनि प्रऽवृक्तं उत् निन्यथुः सोमेऽइव सुवेण ॥२४॥ प्र वां दंसांसि अश्विनौ अवोचं अस्य पतिः स्यां सुऽगवः सुऽवीरः उत पश्यन् अश्नुवन् दीर्घं आयुः अस्तेऽइव इत् जरिमाणं जगम्यां ॥२५॥१२॥

॥११७॥ मध्वः सोमस्य अश्विना मदाय प्रत्नः होता आ विवासते वां बर्हिष्मती रातिः विऽश्रिता गीः इषा यातं नासत्या उप वाजैः ॥१॥ यः वां अश्विना मनसः जवीयान् रथः सुऽअश्वः विशः आऽजिगाति येन गच्छथः सुऽकृतः दुरोणं तेन नरा वर्तिः अस्मभ्यं यातं ॥२॥ ऋषिं नरौ अंहसः पांचऽजन्यं ऋबीसात् अत्रिं मुंचथः गणेन मिनंता दस्योः अशिवस्य मायाः अनुऽपूर्वं वृषणा चोदयंता ॥३॥ अश्वं न गूळ्हं अश्विना दुःऽएवैः ऋषिं नरा वृषणा रेभं अप्ऽसु सं नं रिणीथः विऽप्रुतं दंसःऽभिः न वां जूर्यंति पूर्व्या कृतानि ॥४॥ सुसुप्वांसं न निःऽऋतेः उपऽस्थे सूर्यं न दस्रा तमसि क्षियंतं सुभे रुक्मं न दर्शतं निऽखातं उत् ऊपथुः अश्विना वंदनाय ॥५॥१३॥ तत् वां नरा

शंस्यं पज्रियेण कक्षीवता नासत्या परिऽज्मन् शफात् अश्वस्य वाजिनः जनाय शतं कुंभान् असिंचतं मधूनां ॥ ६॥ युवं नरा स्तुवते कृष्णियाय विष्णाप्वं ददथुः विश्वकाय घोषायै चित् पितृऽसदै दुरोणे पतिं जूर्यंत्यै अश्विनौ अदत्तं ॥ ७॥ युवं श्यावाय रुशंतीं अदत्तं महः क्षोणस्य अश्विना कण्वाय प्रऽवाच्यं तत् वृषणा कृतं वां यत् नार्षदाय श्रवः अधिऽअधत्तं ॥ ८॥ पुरु वर्पांसि अश्विना दधाना नि पेदवे ऊहथुः आप्सु अश्वं सहस्रऽसां वाजिनं अप्रतिऽइतं अहिऽहनं श्रवस्यं तरुत्रं ॥ ९॥ एतानि वां श्रवस्या सुऽदानू० ब्रह्म आंगूषं सदनं रोदस्योः यत् वां पज्रासः अश्विना हवंते यातं इषा च विदुषे च वाजं ॥ १०॥ १४॥ सूनोः मानेन अश्विना गृणाना वाजं विप्राय भुरणा रदंता अगस्त्यं ब्रह्मणा ववृधाना सं विश्पलां नासत्या अरिणीतं ॥ ११॥ कुह यांता सुऽस्तुतिं काव्यस्य दिवः नपाता वृषणा शयुऽत्रा हिरण्यस्यऽइव कलशं निऽखातं उत् ऊपथुः दशमे अश्विना अहन् ॥ १२॥ युवं च्यवानं अश्विना जरंतं पुनः युवानं चक्रथुः शचीभिः युवोः रथं दुहिता सूर्यस्य सह श्रिया नासत्या अवृणीत ॥ १३॥ युवं तुग्राय पूर्व्येभिः एवैः पुनः ऽमन्यौ अभवतं युवाना युवं भुज्युं अर्णसः निः समुद्रात् विऽभिः ऊहथुः ऋज्रेभिः अश्वैः ॥ १४॥ अजोहवीत् अश्विना तौग्र्यः वां प्रऽऊळ्हः समुद्रं अव्यथिः जगन्वान् निः तं ऊहथुः सुऽयुजा रथेन मनोःऽजवसा वृषणा स्वस्ति ॥ १५॥ १५॥ अजोहवीत् अश्विना वर्तिका वां आस्नः यत् सीं अमुंचतं वृकस्य वि जयुषा ययथुः सानु अद्रेः जातं विष्वाचः अहतं विषेण ॥ १६॥ शतं मेषान् वृक्ये ममहानं तमः प्रऽनीतं अश्विना पिचा आ अक्षी ऋज्रऽअंस्ये अश्विनौ अ-

धत्तं ज्योतिः अंधाय चक्रथुः विऽचक्षे ॥ १७ ॥ पुनं अंधाय भरं अह्वयत् सा वृकीः अश्विना वृषणा नरा इति जारः कनीनः ऽइव चक्षदानः ऋज्रऽअश्वः शतं एकं च मेषान् ॥ १८ ॥ मही वां ऊतिः अश्विना मयःऽभूः उत स्रामं धिष्णया सं रिणीथः अथ युवां इत् अह्वयत् पुरंऽधिः आ अगच्छतं सीं वृषणौ अवःऽभिः ॥ १९ ॥ अधेनुं दस्रा स्तर्यं विऽसक्तां अपिन्वतं शयवे अश्विना गां युवं शचीभिः विऽमदाय जायां नि ऊहथुः पुरुऽमित्रस्य योषां ॥ २० ॥ १६ ॥ यवं वृकेण अश्विना वपंता इषं दुहंता मनुषाय दस्रा अभि दस्युं बकुरेण धमंता उरु ज्योतिः चक्रथुः आर्याय ॥ २१ ॥ आथर्वणाय अश्विना दधीचे अश्व्यं शिरः प्रति ऐरयतं सः वां मधु प्र वोचत् ऋतऽयन् त्वाष्ट्रं यत् दस्रौ अपिऽकक्ष्यं वां ॥ २२ ॥ सदा कवी सुऽमतिं आ चके वां विश्वाः धियः अश्विना प्र अवतं मे अस्मे रयिं नासत्या बृहंतं अपत्यऽसाचं श्रुत्यं रराथां ॥ २३ ॥ हिरण्यऽहस्तं अश्विना रराणा पुत्रं नरा वध्रिऽमत्याः अदत्तं चिधा ह श्यावं अश्विना विऽकस्तं उत् जीवसे ऐरयतं सुऽदानू ॥ २४ ॥ एतानि वां अश्विना वीर्याणि प्र पूर्व्याणि आयवः अवोचन् ब्रह्म कृण्वंतः वृषणा युवऽभ्यां सुऽवीरासः विदथं आ वदेम ॥ २५ ॥ १७ ॥

॥ ११८ ॥ आ वां रथः अश्विना श्येनऽपत्वा सुऽमृळीकः स्वऽवान् यातु अर्वाङ् यः मर्त्यस्य मनसः जवीयान् चिऽवंधुरः वृषणा वातऽरंहाः ॥ १ ॥ चिऽवंधुरेण चिऽवृता रथेन चिऽचक्रेण सुऽवृता आ यातं अर्वाक् पिन्वंतं गाः जिन्वंतं अर्वंतः नः वर्धयंतं अश्विना वीरं अस्मे ॥ २ ॥ प्रवत्ऽयामना सुऽवृता रथेन

दस्रौ इमं शृणुतं श्लोकं अद्रेः किं अंग वां प्रति अवर्तिं गमिष्ठा आहुः विप्रासः अश्विना पुराऽजाः ॥ ३ ॥ आ वां श्येनासः अश्विना वहंतु रथे युक्तासः आशवः पतंगाः ये अपऽतुरः दिव्यासः न गृध्राः अभि प्रयः नासत्या वहंति ॥ ४ ॥ आ वां रथं युवतिः तिष्ठत् अच जुष्टी नरा दुहिता सूर्यस्य परि वां अश्वाः वपुषः पतंगाः वयः वहंतु अरुषाः अभीके ॥ ५ ॥ १८ ॥ उत् वंदनं ऐरतं दंसनाभिः उत् रेभं दस्रा वृषणा शचीभिः निः तौग्र्यं पारयथः समुद्रात् पुनः च्यवानं चक्रथुः युवानं ॥ ६ ॥ युवं अचये अवऽनीताय तप्तं ऊर्जं ओमानं अश्विनौ अधत्तं युवं कण्वाय अपिऽरिप्राय चक्षुः प्रति अधत्तं सुऽस्तुतिं जुजुषाणा ॥ ७ ॥ युवं धेनुं शयवे नाधितायं अपिन्वतं अश्विना पूर्व्याय अमुंचतं वर्तिकां अंहसः निः प्रति जंघां विश्पलायाः अधत्तं ॥ ८ ॥ युवं श्वेतं पेदवे इंद्रऽजूतं अहिऽहनं अश्विना अदत्तं अश्वं जोहूत्रं अर्यः अभिऽभूतिं उग्रं सहस्रऽसां वृषणं वीळुऽअंगं ॥ ९ ॥ ता वां नरा सु अवसे सुऽजाता हवामहे अश्विना नाधमानाः आ नः उप वसुंऽमता रथेन गिरः जुषाणा सुविताय यातं ॥ १० ॥ आ श्येनस्य जवसा नूतनेन अस्मे यातं नासत्या सऽजोषाः हवे हि वां अश्विना रातऽहव्यः श्वत्ऽनमायाः उषसः विऽउष्टौ ॥ ११ ॥ १९ ॥

॥ ११९ ॥ आ वां रथं पुरुऽमायं मनःऽजुवं जीरऽअश्वं यज्ञियं जीवसे हुवे सहस्रऽकेतुं वनिनं शतत्ऽवसुं श्रुष्टीऽवानं वरिवःऽधां अभि प्रयः ॥ १ ॥ ऊर्ध्वा धीतिः प्रति अस्य प्रऽयामनि अधायि शस्मन् सं अयंते आ दिशः स्वदामि घर्मं प्रति यंति ऊतयः आ वां ऊर्जानी रथं अश्विना अरुहत् ॥ २ ॥ सं यत् मिथः

पस्पृधानासः अग्मत शुभे मखाः अमिताः जायवः रणे युवोः अह प्रवणे चेकिते रथः यत् अश्विना वहथः सूरिं आ वरं ॥३॥ युवं भुज्युं भुरमाणं विऽभिः गतं स्वयुक्तिऽभिः निऽवहैता पितृऽभ्यः आ यासिष्टं वर्तिः वृषणा विऽजेन्यं दिवःऽदासाय महि चेति वां अवः ॥४॥ युवोः अश्विना वपुषे युवाऽयुजं रथं वाणी येमतुः अस्य शर्ध्यं आ वां पतिऽत्वं सख्याय जग्मुषी योषा अवृणीत जेन्या युवां पती ॥५॥२०॥ युवं रेभं परिऽसूतेः उरुष्यथः हिमेन घर्मं परिऽतप्तं अत्रये युवं शयोः अवसं पिप्यथुः गवि प्र दीर्घेण वंदनः तारिषत् आयुषा ॥६॥ युवं वंदनं निःऽऋतं जरण्यया रथं न दस्रा करणा सं इन्वथः क्षेचात् आ विप्रं जनथः विपन्यया प्र वां अत्र विधते दंसना भुवत् ॥७॥ अगच्छतं कृपमाणं पराऽवति पितुः स्वस्य त्यजसा निऽबाधितं स्वःऽवतीः इतः ऊतीः युवोः अह चित्राः अभीके अभवन् अभिष्टयः ॥८॥ उत स्या वां मधुऽमत् मक्षिका अरपत् मदे सोमस्य औशिजः हुवन्यति युवं दधीचः मनः आ विवासथः अथ शिरः प्रति वां अश्व्यं वदत् ॥९॥ युवं पेदवे पुरुऽवारं अश्विना स्पृधां श्वेतं तरुतारं दुवस्यथः शर्यैः अभिऽद्युं पृतनासु दुस्तरं चर्कृत्यं इंद्रंऽइव चर्षणिऽसहं ॥१०॥२१॥

॥१२०॥ का राधत् होत्रा अश्विना वां कः वां जोषे उभयोः कथा विधाति अप्रऽचेताः ॥१॥ विद्वांसौ इत् दुरः पृच्छेत् अविद्वान् इत्था अपरः अचेताः नु चित् नु मर्ते अक्रौ ॥२॥ ता विद्वांसा हवामहे वां ता नः विद्वांसा मन्म वोचेतं अद्य प्र आर्चत् दयमानः युवाकुः ॥३॥ वि पृच्छामि पाक्या न देवान् व-

षट्ऽकृतस्य अद्भुतस्य दस्रा पातं च सह्यसः युवं च रभ्यसः नः ॥४॥ प्र या घोषे भृगवाणे न शोभे यया वाचा यजति पज्रियः वां प्र इषऽयुः न विद्वान् ॥५॥२२॥ श्रुतं गायत्रं तक्वानस्य अहं चित् हि रिरभे अश्विना वां आ अक्षी शुभः पती दन् ॥६॥ युवं हि आस्तं महः रन् युवं वा यत् निःऽअतंसतं ता नः वसू सुऽगोपा स्यातं पातं नः वृकात् अघऽयोः ॥७॥ मा कस्मै धातं अभि अमिचिणे नः मा अकुचे नः गृहेभ्यः धेनवः गुः स्तनऽभुजः अशिश्वीः ॥८॥ दुहीयन् मित्रऽधितये युवाकु राये च नः मिमीतं वाजऽवत्यै इषे च नः मिमीतं धेनुऽमत्यै ॥९॥ अश्विनोः असनं रथे अनश्वं वाजिनीऽवतोः तेन अहं भूरि चाकन ॥१०॥ अयं समह मा तनु ऊह्याते जनान् अनु सोमऽपेये सुऽखः रथः ॥११॥ अध स्वप्नस्य निः विदे अभुंजतः च रेवतः उभा ता बस्रि नश्यतः ॥१२॥२३॥१७॥

॥ १२१ ॥ कत् इत्था नृन् पाचे देवऽयतां श्रवत् गिरः अंगिरसां तुरण्यन् प्र यत् आनट् विशः आ हर्म्यस्य उरु क्रंसते अध्वरे यजंचः ॥१॥ स्तंभीत् ह द्यां सः धरुणं मृषायत् ऋभुः वाजाय द्रविणं नरः गोः अनु स्वऽजां महिषः चक्षत् वां मेनां अश्वस्य परि मातरं गोः ॥२॥ नक्षत् हवं अरुणीः पूर्व्ये राट् तुरः विशां अंगिरसां अनु द्यून् तक्षत् वज्रं निऽयुतं तस्तंभत् द्यां चतुःऽपदे नर्याय द्विऽपादे ॥३॥ अस्य मदे स्वर्यं दाः ऋताय अपिऽवृतं उस्रियाणां अनीकं यत् ह प्रऽसर्गे चिऽककुप् निऽवर्तत् अप दुहः मानुषस्य दुरः वः० ॥४॥ तुभ्यं पयः यत् पितरौ अनीतां राधः सुऽरेतः तुरणे भुरण्यू शुचि यत् ते रक्णः आ अयंजंत सवःऽदु-

घायाः पयः उस्रियायाः ॥५॥२४॥ अध प्र जज्ञे तरणिः ममत्तु प्र रोचि अस्याः उषसः न सूरः इंदुः येभिः आष्टे स्वऽइदुहव्यैः सु-वेण सिंचन् जरणा अभि धाम ॥६॥ सुऽइध्मा यत् वनऽधितिः अपस्यात् सूरः अध्वरे परि रोधना गोः यत् ह प्रऽभासि कृत्व्यान् अनु द्यून् अनर्विशे पप्रुऽइषे तुरायं ॥७॥ अष्टा महः दिवः आदः हरी इह द्युम्नऽसहे अभि योधानः उत्सं हरिं यत् ते मंदिनं धुक्षन् वृधे गोऽरभसं अद्रिऽभिः वाताप्यं ॥८॥ त्वं आयसं प्रति वर्तयः गोः दिवः अश्मानं उपऽनीतं ऋभ्वा कुत्साय यच्च पुरुऽहूत वन्वन् शुष्णं अनतेः परिऽयासि वधः ॥९॥ पुरा यत् सूरः तमसः अपिऽइतेः तं अद्रिऽवः फलिऽगं हेतिं अस्य शुष्णस्य चित् परिऽहितं यत् ओजः दिवः परि सुऽअयथितं तत् आ अदः० ॥१०॥२५॥ अनु त्वा मही पाजसी अचक्रे द्यावाक्षामा मदतां इंद्र कर्मन् त्वं वृत्रं आऽशयानं सिरासु महः वज्रेण सिस्वपः वराहुं ॥११॥ त्वं इंद्र नर्यः यान् अवः नॄन् तिष्ठ वातस्य सुऽयुजः वहिष्ठान् यं ते काव्यः उशना मंदिनं दात् वृचऽहनं पार्यं ततक्ष वज्रं ॥१२॥ त्वं सूरः हरितः रमयः नॄन् भरत् चक्रं एतशः न अयं इंद्र प्रऽअस्य पारं नवतिं नाव्यानां अपिं कर्ते अवर्तयः अयज्यून् ॥१३॥ त्वं नः अस्याः इंद्र दुःऽहनायाः पाहि वज्रिऽवः दुःऽइतात् अभीके प्र नः वाजान् रथ्यः अश्वऽबुध्यान् इषे यंधि श्रवसे सूनृतायै ॥१४॥ मा सा ते अस्मत् सुऽमतिः वि दसत् वाजऽप्रमहः सं इषः वरंत आ नः भज मघऽवन् गोषु अर्यः महिष्ठाः ते सधऽमादः स्याम ॥१५॥२६॥८॥१॥

॥ १२२ ॥ प्र वः पांतं रघुऽमन्यवः अंधः यज्ञं रुद्राय मीळ्हुषे

भरध्वं दिवः अस्तोषि असुरस्य वीरैः इषुध्याऽइव मरुतः रोदस्योः॥१॥ पत्नीऽइव पूर्वऽहूतिं वृवृधध्यै उषसानक्ता पुरुधा विदाने स्तरीः न अत्कं विऽउतं वंसाना सूर्यस्य श्रिया सुऽदृशी हिरण्यैः॥२॥ ममत्तु नः परिऽज्मा वसर्हा ममत्तु वातः अपां वृषण्ऽवान् शिशीतं इंद्रापर्वता युवं नः तत् नः विश्वे वरिवस्यंतु देवाः॥३॥ उत त्या मे यशसा श्वेतनायै व्यंता पांता औशिजः हुवध्यै प्र वः नपातं अपां कृणुध्वं प्र मातरा रास्पिनस्य आयोः॥४॥ आ वः रुवण्युं औशिजः हुवध्यै घोषाऽइव शंसे अर्जुनस्य नंशे प्र वः पूष्णे दावने आ अच्छ वोचेय वसुऽतातिं अग्नेः॥५॥१॥ श्रुतं मे मित्रावरुणा हवा इमा उत श्रुतं सदने विश्वतः सीं श्रोतु नः श्रोतुऽरातिः सुऽश्रोतुः सुऽक्षेचा सिंधुः अत्ऽभिः॥६॥ स्तुषे सा वां वरुण मित्र रातिः गवां शता पृक्षऽयामेषु पज्रे श्रुतऽरथे प्रियऽरथे दधानाः सद्यः पुष्टिं निऽरुधानासः अग्मन्॥७॥ अस्य स्तुषे महिऽमघस्य राधः सचा सनेम नहुषः सुऽवीराः जनः यः पज्रेभ्यः वाजिनीऽवान् अश्वऽवतः रथिनः मह्यं सूरिः॥८॥ जनः यः मित्रावरुणौ अभिऽधुक् अपः न वां सुनोति अक्ष्णयाऽधुक् स्वयं सः यक्ष्मं हृदये नि धत्ते आपं यत् ईं होचाभिः ऋतऽवा॥९॥ सः व्राधतः नहुषः दंऽसुजूतः शर्धःऽतरः नरां गूर्तऽश्रवाः विसृष्टऽरातिः याति बाळ्हऽसृत्वा विश्वासु पृत्ऽसु सदं इत् शूरः॥१०॥२॥ अध ग्मंत नहुषः हवं सूरेः श्रोत राजानः अमृतस्य मंद्राः नभःऽजुवः यत् निरवस्य राधः प्रऽशस्तये महिना रथंऽवते॥११॥ एतं शर्धं धाम यस्य सूरेः इति अवोचन् दशऽतयस्य नंशे द्युम्नानि येषु वसुऽतातिः ररन् विश्वे सन्वंतु प्रऽभृथेषु वाजं॥१२॥ मंदामहे दश-

ऽतयस्य धासेः द्विः यत् पंचं बिभ्रतः यंति अच्चा किं इष्टऽअश्वः इष्टऽरश्मिः एते ईशानासः तरुषः क्रुंजते नृन् ॥ १३॥ हिरण्यऽकर्णो मणिऽग्रीवं अर्णः तत् नः विश्वे वरिवस्यंतु देवाः अर्यः गिरः सद्यः आ जग्मुषीः आ उषाः चाकंतु उभयेषु अस्मे ॥१४॥ चत्वारः मा मशर्शारस्य शिश्वः चयः राज्ञः आयवसस्य जिष्णोः रथः वां मित्रावरुणा दीर्घऽअप्साः स्यूमऽगभस्तिः सूरः न अद्यौत् ॥ १५॥ ३॥

॥१२३॥ पृथुः रथः दक्षिणायाः अयोजि आ एनं देवासः अमृतासः अस्थुः कृष्णात् उत् अस्थात् अर्या विऽहायाः चिकित्संती मानुषाय क्षयाय ॥१॥ पूर्वा विश्वस्मात् भुवनात् अबोधि जयंती वाजं बृहती सनुची उच्चा वि अख्यत् युवतिः पुनःऽभूः आ उषाः अगन् प्रथमा पूर्वऽहूतौ ॥२॥ यत् अद्य भागं विऽभजासि नृऽभ्यः उषः देवि मर्त्यऽचा सुऽजाते देवः नः अत्र सविता दमूनाः अनागसः वोचति सूर्याय ॥३॥ गृहंऽगृहं अहना याति अच्छ दिवेऽदिवे अधि नाम दधाना सिसासंती द्योतना शश्वत् आ अगात् अर्यंऽअयं इत् भजते वसूनां ॥४॥ भगस्य स्वसा वरुणस्य जामिः उषः सूनृते प्रथमा जरस्व पश्चा सः दध्याः यः अघस्य धाता जयेम तं दक्षिणया रथेन ॥५॥४॥ उत् ईरतां सूनृताः उत् पुरंधीः उत् अग्नयः शुशुचानासः अस्थुः स्पार्हा वसूनि तमसा अपऽगूळ्हा आविः कृण्वंति उषसः विऽभातीः ॥६॥ अप अन्यत् एति अभि अन्यत् एति विषुऽरूपे अहनी सं चरेते परिऽक्षितोः तमः अन्या गुहा अकः अद्यौत् उषाः शोशुचता रथेन ॥७॥ सऽदृशीः अद्य सऽदृशीः इत् ऊं श्वः दीर्घं सचंते वरु-

णस्य धाम॑ अनवद्याः चिंशतं॑ योज॑नानि एका॑ऽएका क्रतुं॑ परि॑ यंति॒ सद्यः॑॥८॥ जान॑ती अह्नः॑ प्रथ॒मस्य॑ नाम॑ शु॒क्रा कृ॒ष्णात् अ॒-जनि॑ष्ट श्वि॒ती॒ची ऋ॒तस्य॑ योषा॑ न मि॒ना॒ति॒ धाम॑ अहः॑ऽअह॒ः नि॒ः॒ऽकृ॒तं॑ आऽचर॑ंती॥९॥ क॒न्या॑ऽइव त॒न्वा॑ शाश॑दाना एषि॑ देवि॒ देव॑ं इ॒यक्ष॑माणं सं॑ऽस्मयमाना युव॒तिः पु॒रस्ता॑त् आ॒विः व॒क्षां॑सि कृणुषे॒ वि॒ऽभा॒ती ॥१०॥५॥ सु॒ऽसं॒का॒शा मा॒तृमृ॑ष्टाऽइव योषा॑ आ॒विः त॒न्वं॑ कृणुषे॒ दृ॒शे कं॑ भ॒द्रा त्वं उ॒षः॒ वि॒ऽत॒रं॑ वि उ॒च्छ॒ न तत् ते॒ अ॒न्याः उ॒षसः॑ नशंत ॥११॥ अश्व॑ऽवतीः गो॒ऽम॑तीः विश्व॒-ऽवा॑राः यत॑मानाः र॒श्मिऽभिः॑ सूर्य॑स्य परा॑ च॒ यंति॑ पुनः॑ आ च॒ यंति॒ भ॒द्रा नाम॑ वह॑माना॒ः उ॒षसः॑ ॥१२॥ ऋ॒तस्य॑ र॒श्मिं अ॒-नु॒ऽय॒च्छ॒मा॒ना भ॒द्रं॑ऽभद्रं क्रतुं॑ अ॒स्मासु॑ धे॒हि॒ उ॒षः॑ नः॒ अ॒द्य सु॒ऽह॒वा॑ वि उ॒च्छ॒ अ॒स्मासु॑ रा॒यः॑ म॒घव॑त्ऽसु च॒ स्यु॒ः॥१३॥ ६॥

॥१२४॥ उ॒षाः॒ उ॒च्छं॑ती सं॑ऽइ॒धा॒ने अ॒ग्नौ उ॒त्ऽय॒न् सूर्यः॑ उ॒र्वि॒-या ज्योति॑ः अ॒श्रे॒त् दे॒वः नः॒ अ॒च॒ स॒वि॒ता नु अ॒र्थं॑ प्र अ॒सा॒वी॒त् द्वि॒ऽप॒त् प्र च॑तुः॑ऽपत् इ॒त्यै ॥१॥ अमि॑नती दैव्या॑नि व्र॒ता॑नि प्र॒ऽमि॒न॒ती म॒नु॒ष्या॑ युगा॑नि ई॒युषी॑णां उ॒प॒मा श॒श्व॒ती॒नां आ॒-ऽय॒ती॒नां प्र॒थ॒मा उ॒षाः॒ वि अ॒द्यौ॒त्॥२॥ ए॒षा दि॒वः दु॒हि॒ता प्र॒ति॑ अ॒दृ॒श्रि॒ ज्योति॑ः वसा॑ना सम॒ना पु॒रस्ता॑त् ऋ॒तस्य॑ पंथा॑ अनु॑ ए॒ति॒ सा॒धु प्र॒जा॒न॒ती॒ऽइ॒व न दिशः॑ मि॒ना॒ति॒॥३॥ उषो॑ अदृश्रि॑ मघो॒नः॑ न वक्षः॑ नो॒धाः॑ऽइ॒व आ॒विः अ॒कृ॒त॒ प्रि॒याणि॑ अ॒ध्व॒ऽसत् न स॒स॒तः बो॒ध॒यं॑ती श॒श्व॒त्ऽत॒मा आ अ॒गा॒त् पुनः॑ आ॒ऽई॒युषी॑णां ॥४॥ पूर्वे॑ अर्धे॑ रज॑सः अ॒प्य॒स्य॑ गवां॑ जनि॑त्री अ॒कृ॒त॒ प्र केतुं॑ वि ऊं॑ प्र॒थ॒ते॒ वि॒ऽत॒रं॑ वरी॑यः आ उ॒भा पृ॒णंती॑ पि॒त्रोः उ॒प॒ऽस्था॑॥५॥७॥

एव इत् एषा पुरुऽतमा दृशे कं न अजामिं न परिं वृणक्ति जामिं अरेपसा तन्वा शाशदाना न अभीत् ईर्षते न मुहः विऽभाती ॥ ६॥ अभ्राताऽइव पुंसः एति प्रतीची गर्तऽआरुगिव सनयें धनानां जायाऽइव पत्यें उशती सुऽवासाः उषाः हस्राऽइव नि रिणीते अप्सः॥७॥ स्वसा स्वसें ज्यायस्यै योनिं अरैक् अप एति अस्याः प्रतिऽचक्ष्याऽइव विऽउच्छंती रश्मिऽभिः सूर्यस्य अंजि अंक्ते समनगाःऽइव व्राः ॥८॥ आसां पूर्वासां अहंऽसु स्वसृणां अपरा पूर्वी अभि एति पश्चात् ताः प्रत्नऽवत् नव्यसीः नूनं अस्मे रेवत् उच्छंतु सुऽदिनाः उषसः॥९॥ प्र बोधय उषः पृणतः मघोनि अबुध्यमानाः पणयः ससंतु रेवत् उच्छ मघवत्ऽभ्यः मघोनि रेवत् स्तोचे सूनृते जरयंती ॥१०॥ ८॥ अवं द्युं अश्वैत् युवतिः पुरस्तात् युंक्ते गवां अरुणानां अनीकं वि नूनं उच्छात् असति प्र केतुः गृहंऽगृहं उप तिष्ठाते अग्निः ॥११॥ उत् ते वयः चित् वसतेः अपप्तन् नरः च ये पितुऽभाजः विऽउष्टौ अमा सते वहसि भूरिं वामं उषः देवि दाशुषें मर्त्याय॥१२॥ अस्तोढ्वं स्तोम्याः ब्रह्मणा मे अवीवृधध्वं उशतीः उषसः युष्माकं देवीः अवसा सनेम सहस्रिणीं च शतिनं च वाजं॥१३॥९॥

॥१२५॥ प्रातः रत्नं प्रातःऽइत्वा दधाति तं चिकित्वान् प्रतिऽगृह्य नि धत्ते तेन प्रऽजां वर्धयमानः आयुः रायः पोषेण सचते सुऽवीरः ॥१॥ सुऽगुः अस्तत् सुऽहिरण्यः सुऽअश्वः बृहत् अस्मै वयः इंद्रः दधाति यः त्वा आऽयंतं वसुना प्रातःऽइत्वः मुक्षीजयाऽइव पदिं उत्ऽसिनाति॥२॥ आयं अद्य सुऽकृतं प्रातः इच्छन् इष्टेः पुत्रं वसुऽमता रथेन अंशोः सुतं पायय मत्सरस्य क्षयत्ऽवीरं

वर्धय सूनृताभिः ॥३॥ उप क्षरंति सिंधवः मयःऽभुवः ईजानं च यक्ष्यमाणं च धेनवः पृणंतं च पपुरिं च श्रवस्यवः घृतस्य धाराः उप यंति विश्वतः ॥४॥ नाकस्य पृष्ठे अधि तिष्ठति श्रितः यः पृणाति सः ह देवेषु गच्छति तस्मै आपः घृतं अर्षंति सिंधवः तस्मै इयं दक्षिणा पिन्वते सदा ॥५॥ दक्षिणाऽवतां इत् इमानि चित्रा दक्षिणाऽवतां दिवि सूर्यासः दक्षिणाऽवंतः अमृतं भजंते दक्षिणाऽवंतः प्र तिरंते आयुः ॥६॥ मा पृणंतः दुःऽइतं एनः आ अरन् मा जारिषुः सूरयः सुऽव्रतासः अन्यः तेषां परिऽधिः अस्तु कः चित् अपृणंतं अभि सं यंतु शोकाः ॥७॥१०॥

॥१२६॥ अमंदान् स्तोमान् प्रभरे मनीषा सिंधौ अधि क्षियंतः भाव्यस्य यः मे सहस्रं अमिमीत सवान् अतूर्तः राजा श्रवः इच्छमानः ॥१॥ शतं राज्ञः नाधमानस्य निष्कान् शतं अश्वान् प्रऽयतान् सद्यः आदं शतं कक्षीवान् असुरस्य गोनां दिवि श्रवः अजरं आ ततान ॥२॥ उप मा श्यावाः स्वनयेन दत्ताः वधूऽमंतः दश रथासः अस्युः षष्टिः सहस्रं अनु गव्यं आ अगात् सनंत् कक्षीवान् अभिऽपित्वे अहां ॥३॥ चत्वारिंशत् दशऽरथस्य शोणाः सहस्रस्य अग्रे श्रेणिं नयंति मदऽच्युतः कृशनऽवंतः अत्यान् कक्षीवंतः उत् अमृक्षंत पज्राः ॥४॥ पूर्वी अनु प्रऽयतिं आ ददे वः चीन् युक्तान् अष्टौ अरिऽधायसः गाः सुऽबंधवः ये विश्याःऽइव व्राः अनस्वंतः श्रवः ऐषंत पज्राः ॥५॥ आऽगंधिता परिऽगधिता या कशीकाऽइव जंगहे ददाति मह्यं यादुरी यास्पूनां भोज्या शता ॥६॥ उपऽउप मे परा मृश मा मे दभ्राणि मन्यथाः सर्वा अहं अस्मि रोमशा गंधारीणांऽइव अविका ॥७॥११॥१८॥

॥१२७॥ अग्निं होतारं मन्ये दास्वंतं वसुं सूनुं सहसः जातऽवेदसं विप्रं न जातऽवेदसं यः ऊर्ध्वया सुऽअध्वरः देवः देवाच्या कृपा घृतस्य विऽभाष्टिं अनु वष्टि शोचिषा आऽजुह्वानस्य सर्पिषः ॥१॥ यजिष्ठं त्वा यजमानाः हुवेम ज्येष्ठं अंगिरसां विप्र मन्मऽभिः विप्रेभिः शुक्र मन्मऽभिः परिज्मानंऽइव द्यां होतारं चर्षणीनां शोचिःऽकेशं वृषणं यं इमाः विशः प्र अवंतु जूतये विशः॥२॥ सः हि पुरु चित् ओजसा विरुक्मता दीद्यानः भवति द्रुहंऽतरः परशुः न द्रुहंऽतरः वीळु चित् यस्य संऽऋतौ श्रुवत् वनाऽइव यत् स्थिरं निःऽसहमानः यमते न अयते धन्वऽसहा न अयते ॥३॥ हव्हा चित् अस्मै अनु दुः यथा विदे तेजिष्ठाभिः अरणिऽभिः दाष्टि अवसे अग्नये दाष्टि अवसे प्र यः पुरूणि गाहते तक्षत् वनाऽइव शोचिषा स्थिरा चित् अन्ना नि रिणाति ओजसा नि स्थिराणि चित् ओजसा ॥४॥ तं अस्य पृक्षं उपरासु धीमहि नक्तं यः सुदर्शंऽतरः दिवाऽतरात् अप्रेऽआयुषे दिवाऽतरात् आत् अस्य आयुः यभंणऽवत् वीळु शर्मं न सूनवे भक्तं अभक्तं अवः व्यंतः अजराः अग्नयः व्यंतः अजराः ॥५॥१२॥ सः हि शर्धः न मारुतं तुविऽस्वनिः अप्नस्वतीषु उर्वरासु इष्टनिः आर्तनासु इष्टनिः आदत् हव्यानि आऽददिः यज्ञस्य केतुः अहेर्णा अध स्म अस्य हर्षतः हरीवतः विश्वे जुषंत पंथां नरः शुभे न पंथां॥६॥ ह्विता यत् ईं कीस्तासः अभिऽद्यवः नमस्यंतः उपऽवोचंत भृगवः मथ्नंतः दाशा भृगवः अग्निः ईशे वसूनां शुचिः यः धर्णिः एषां प्रियान् अपिऽधीन् वनिषीष्ट मेधिरः आ वनिषीष्ट मेधिरः ॥७॥ विश्वासां त्वा विशां पतिं हवामहे सर्वासां समानं ऽऽपतिं भुजे सत्यऽगिर्वाहसं भुजे अतिथिं मानुषाणां पितुः न

यस्य आसया अमी च विश्वे अमृतासः आ वयः हव्या देवेषु आ वयः॥८॥ त्वं अग्ने सहसा सहन्ऽतमः शुष्मिन्ऽतमः जायसे देवऽतातये रयिः न देवऽतातये शुष्मिन्ऽतमः हि ते मदः द्युम्निन्ऽतमः उत क्रतुः अध स्म ते परि चरंति अजर स्रुष्टीऽवानः न अजर॥९॥ प्र वः महे सहसा सहस्वते उषःऽबुधे पशुऽसे न अग्नये स्तोमः बभूतु अग्नये प्रति यत् ईं हविष्मान् विश्वासु क्षासु जोगुवे अग्ने रेभः न जरते कृषूणां जूर्णिः होता कृषूणां॥१०॥ सः नः नेदिष्ठं दहशानः आ भर अग्ने देवेभिः सऽचनाः सुऽचेतुना महः रायः सुऽचेतुना महि शविष्ठ नः कृधि संऽचक्षे भुजे अस्यै महि स्तोतृऽभ्यः मघऽवन् सुऽवीर्ये मथीः उग्यः न शवसा॥११॥१३॥

॥ १२८ ॥ अयं जायत मनुषः धरीमणि होता यजिष्ठः उशिजां अनु व्रतं अग्निः स्वं अनु व्रतं विश्वऽश्रुष्टिः सखिऽयते रयिःऽइव श्रवस्यते अदब्धः होता नि सदत् इळः पदे परिऽवीतः इळः पदे॥१॥ तं यज्ञऽसाधं अपि वातयामसि ऋतस्य पथा नमसा हविष्मता देवऽतातेा हविष्मता सः नः ऊर्जा उपऽआभृति आ-या कृपा न जूर्यति यं मातरिश्वा मनवे पराऽवतः देवं भाः० प-राऽवतः॥२॥ एवेन सद्यः परि एति पार्थिवं मुहुःऽगीः रेतः वृषभः कनिक्रदत् दधत् रेतः कनिक्रदत् शतं चक्षाणः अक्षऽभिः देवः वनेषु तुर्वणिः सदः दधानः उपरेषु सानुषु अग्निः परेषु सा-नुषु॥३॥ सः सुऽक्रतुः पुरःऽहितः दमेऽदमे अग्निः यज्ञस्य अध्व-रस्य चेतति क्रत्वा यज्ञस्य चेतति क्रत्वा वेधाः इषुऽयते विश्वा जातानि पस्पशे यतः घृतऽश्रीः अतिथिः अजायत वहिः वेधाः अजायत॥४॥ क्रत्वा यत् अस्य तविषीषु पृंचते अग्नेः अवेन म-

रुतौं न भोज्या इषिरायं न भोज्या सः हि स्म दानैं इन्वंति वसूनां च मज्मनां सः नः चासते दुःऽइतात् अभिऽहुतः शंसात् अघात् अभिऽहुतः ॥५॥१४॥ विश्वः विऽहायाः अरतिः वसुः दधे हस्ते दक्षिणे तरणिः न शिश्रथत् श्रवस्यया न शिश्रथत् विश्वस्मै इत् इषुध्यते देवऽचा हव्यं आ ऊहिषे विश्वस्मै इत् सुऽकृते वारं नृ-णंति अग्निः द्वारा वि नृणंति ॥६॥ सः मानुषे वृजने शंऽतमः हितः अग्निः यज्ञेषु जेन्यः न विश्पतिः प्रियः यज्ञेषु विश्पतिः सः हव्या मानुषाणां इळा कृतानि पत्यते सः नः चासते वरुणस्य धूर्तेः महः देवस्य धूर्तेः ॥७॥ अग्निं होतारं ईळते वसुऽधितिं प्रियं चेतिष्ठं अरतिं नि एरिरे हव्यऽवाहं नि एरिरे विश्वऽआयुं विश्वऽवेदसं होतारं यजतं कविं देवासः रण्वं अवसे वसुऽयवः गीः-ऽभिः रण्वं वसुऽयवः ॥८॥१५॥

॥१२९॥ यं त्वं रथं इंद्र मेधऽसातये अपाका संतं इषिर प्रऽनयसि प्र अनवद्य नयसि सद्यः चित् तं अभिष्टये करः वशः च वाजिनं सः अस्माकं अनवद्य तूतुजान वेधसां इमां वाचं न वेधसां ॥१॥ सः श्रुधि यः स्म पृतनासु कासु चित् दक्षाय्यः इंद्र भरऽहूतये नृऽभिः असि प्रऽतूर्तये नृऽभिः यः पूरुः स्वः० सनिता यः विप्रैः वाजं तरुता तं ईशानासः इरधंत वाजिनं पृक्षं अत्यं न वाजिनं ॥२॥ दंसः हि स्म वृषणं पिन्वसि त्वचं कं चित् यावीः अरुं शूर मर्त्यं परिऽवृणक्षि मर्त्यं इंद्र उत तुभ्यं तत् दिवे तत् रुद्राय स्वऽयंशसे मिचायं वोचं वरुणाय सुऽप्रथः सुऽमृळीकाय सुऽप्रथः ॥३॥ अस्माकं वः इंद्रं उश्मसि इष्टये सखायं विश्वऽआयुं प्रऽसहं युजं वाजेषु प्रऽसहं युजं अस्माकं ब्रह्म ऊतये अव पृत्सुषु

कासु चित् नहि त्वा शचुः स्तरते स्तृणोषि यं विश्वं शचुं स्तृणोषि यं ॥४॥ नि सु नम् अतिऽमतिं कयस्य चित् तेजिष्ठाभिः अरणिऽभिः न ऊतिऽभिः उग्राभिः उग्र ऊतिऽभिः नेषि नः यथा पुरा अनेनाः शूर मन्यसे विश्वानि पूरोः अप पर्षि वह्निः आसा वह्निः नः अच्छ ॥५॥१६॥ प्र तत् वोचेयं भव्याय इंदवे हव्यः न यः इषऽवान् मन्म रेजति रक्षःऽहा मन्म रेजति स्वयं सः अस्मत् आ निदः वधः अजेत दुःऽमतिं अव सवेत् अघऽशंसः अवऽतरं अव क्षुद्रंऽइव सवेत्॥६॥ वनेम तत् होचया चितंत्या वनेम रयिं रयिऽवः सुऽवीर्यं रण्वं संतं सुऽवीर्यं दुःऽमन्मानं सुमंतुऽभिः आ ईं इषा पृचीमहि आ सत्याभिः इंद्र द्युम्नहूतिऽभिः यजत्रं द्युम्नहूतिऽभिः ॥७॥ प्रऽप्र वः अस्मे स्वयंशःऽभिः ऊती परिऽवर्गे इंद्रः दुःऽमतीनां दरीमन् दुःऽमतीनां स्वयं सा रिषयध्यै या नः उपऽईषे अचैः हता ईं असत् न वक्षति क्षिप्रा जूर्णिः न वक्षति॥८॥ त्वं नः इंद्र राया परीणसा याहि पथा अनेहसा पुरः याहि अरक्षसा सचस्व नः पराके आ सचस्व अस्तंऽईके आ पाहि नः दूरात् आरात् अभिष्टिऽभिः सदा पाहि अभिष्टिऽभिः॥९॥ त्वं नः इंद्र राया तरुषसा उग्रं चित् त्वा महिमा सक्षत् अवसे महे मित्रं न अवसे ओजिष्ठ चातः अवितः रथं कं चित् अमर्त्य अन्यं अस्मत् रिरिषेः कं चित् अद्रिऽवः रिरिक्षंतं चित् अद्रिऽवः॥१०॥ पाहि नः इंद्र सुऽस्तुत स्निधः अवऽयाता सदं इत् दुःऽमतीनां देवः सन् दुःऽमतीनां हंता पापस्य रक्षसः त्राता विप्रस्य माऽवतः अध हि त्वा जनिता जीजनत् वसो रक्षःऽहनं त्वा जीजनत् वसो ॥११॥१७॥

॥१३०॥ आ इंद्र याहि उप नः पराऽवतः न अयं अच्छ विद-

थानिऽइव सतऽपतिः अस्ता राजाऽइव सतऽपतिः हवामहे त्वा वयं प्रयस्वंतः सुते सचा पुचासः न पितरं वाजऽसातये मंहिष्ठं वाजऽसातये॥१॥ पिब सोमं इंद्र सुवानं अद्रिऽभिः कोशेन सिक्तं अवतं न वंसगः ततृषाणः न वंसगः मदाय हर्यताय ते तुविःऽतमाय धायसे आ त्वा यच्छंतु हरितः न सूर्यं अहा विश्वाऽइव सूर्यं॥२॥ अविंदत् दिवः निऽहितं गुहा निऽधिं वेः न गर्भं परिऽवीतं अश्मनि अनंते अंतः अश्मनि व्रजं वज्री गवांऽइव सिसासन् अंगिरःऽतमः अप अवृणोत् इषः इंद्रः परिऽवृताः द्वारः इषः परिऽवृताः॥३॥ दृहाणः वज्रं इंद्रः गभस्त्योः क्षद्मऽइव तिग्मं असनाय सं श्यत् अहिऽहत्याय सं श्यत् संऽविव्यानः ओजसा शवःऽभिः इंद्र मज्मना तष्टाऽइव वृक्षं वनिनः नि वृश्चसि परश्वाऽइव नि वृश्चसि॥४॥ त्वं वृथा नद्यः इंद्र सर्तवे अच्छ समुद्रं असृजः रथांन्ऽइव वाजऽयतः रथांन्ऽइव इतः ऊतीः अयुंजत समानं अर्थं अक्षितं धेनूःऽइव मनवे विश्वऽदोहसः जनाय विश्वऽदोहसः॥५॥१८॥ इमां ते वाचं वसुऽयंतः आयवः रथं न धीरः सुऽअपाः अतक्षिषुः सुम्नाय त्वां अतक्षिषुः शुंभंतः जेन्यं यथा वाजेषु विप्र वाजिनं अत्यंऽइव शवसे सातये धनां विश्वा धनानि सातये॥६॥ भिनत् पुरः नवतिं इंद्र पूरवे दिवःऽदासाय महि दाशुषे नृतो वज्रेण दाशुषे नृतो अतिथिऽग्वाय शंबरं गिरेः उग्रः अव अभरत् महः धनानि दयमानः ओजसा विश्वा धनानि ओजसा॥७॥ इंद्रः समतऽसु यजमानं आर्यं प्र आवत् विश्वेषु शतंऽऊतिः आजिषु स्वःऽमीळ्हेषु आजिषु मनवे शासत् अव्रतान् त्वचं कृष्णां अरंधयत् धक्षत् न विश्वं ततृषाणं ओषति नि अर्शसानं ओषति॥८॥ सूरः चक्रं प्र

वृहत् जातः ओजसा प्रऽपित्वे वाचं अरुणः मुषायति ईशानः आ मुषायति उशना यत् पराऽवतः अजगन् ऊतये कवे सुम्नानि विश्वा मनुषाऽइव तुर्वणिः अहा विश्वाऽइव तुर्वणिः ॥ ९ ॥ सः नः नव्येभिः वृषऽकर्मन् उक्थैः पुरां दर्तः० पायुऽभिः पाहि शग्मैः दिवःऽदासेभिः इंद्र स्तवानः ववृधीथाः अहोभिःऽइव द्यौः ॥ १० ॥ १९ ॥

॥ १३१ ॥ इंद्राय हि द्यौः असुरः अनम्नत इंद्राय मही पृथिवी वरीमऽभिः द्युम्नऽसाता वरीमऽभिः इंद्रं विश्वे सऽजोषसः देवासः दधिरे पुरः इंद्राय विश्वा सवनानि मानुषा रातानि संतु मानुषा ॥ १ ॥ विश्वेषु हि त्वा सवनेषु तुंजते समानं एकं वृषऽमन्यवः पृथक् स्वः० सनिष्यवः पृथक् तं त्वा नावं न पर्षणिं भूषन्यं धुरि धीमहि इंद्रं न यज्ञैः चितयंतः आयवः स्तोमेभिः इंद्रं आयवः ॥ २ ॥ वि त्वा ततस्रे मिथुनाः अवस्यवः व्रजस्य साता गव्यस्य निःऽसृजः सक्षीतः इंद्र निःऽसृजः यत् गव्यंता ह्वा जना स्वः यंता संऽऊहसि आविः करिक्रत् वृषणं सचाऽभुवं वज्रं इंद्र सचाऽभुवं ॥ ३ ॥ विदुः ते अस्य वीर्यस्य पूरवः पुरः यत् इंद्र शारदीः अवऽअतिरः ससहानः अवऽअतिरः शासः तं इंद्र मर्त्यं अयज्युं शवसः पते महीं अमुष्णाः पृथिवीं इमाः अपः मंदसानः इमाः अपः ॥ ४ ॥ आत् इत् ते अस्य वीर्यस्य चर्किरन् मदेषु वृषन् उशिजः यत् आविथ सखिऽयतः यत् आविथ चकर्थ कारं एभ्यः पृतनासु प्रऽवंतवे ते अन्यांऽअन्यां नद्यः सनिष्णत श्रवस्यंतः सनिष्णत ॥ ५ ॥ उतो नः अस्याः उषसः जुषेत हि अर्कस्य बोधि हविषः हवीमऽभिः स्वःऽसाता हवीमऽभिः यत् इंद्र

हंतवे मृधः वृषा वज्रिन् चिकेतसि आ मे अस्य वेधसः नवीयसः मन्म श्रुधि नवीयसः॥ ६॥ त्वं तं इंद्र ववृधानः अस्मऽयुः अभिचऽयंतं तुविऽजात मर्यं वज्रेण भूर मर्यं जहि यः नः अघऽयति मृणुष्व सुश्रवःऽतमः रिष्टं न यामन् अप भूतु दुःऽमतिः विश्वा अप भूतु दुःऽमतिः ॥ ७ ॥ २० ॥

॥ १३२ ॥ त्वया वयं मघऽवन् पूर्व्ये धने इंद्रत्वाऽऊताः ससह्याम पृतन्यतः वनुयाम वनुष्यतः नेदिष्ठे अस्मिन् अहनि अधि वोच नु सुन्वते अस्मिन् यज्ञे वि चयेम भरे कृतं वाजऽयंतः भरे कृतं ॥१॥ स्वःऽजेषे भरे आप्रस्य वक्मनि उषःऽबुधः स्वस्मिन् अंजसि क्राणस्य स्वस्मिन् अंजसि अहन् इंद्रः यथा विदे शीर्ष्णाऽशीर्ष्णा उपऽवाच्यः अस्मऽचा ते सध्यक् संतु रातयः भद्राः भद्रस्य रातयः ॥२॥ तत् तु प्रयः प्रत्नऽथा ते शुशुक्वनं यस्मिन् यज्ञे वारं अकृण्वत क्षयं ऋतस्य वाः असि क्षयं वि तत् वोचेः अध ह्विता अंतः पश्यंति रश्मिऽभिः सः घ विदे अनु इंद्रः गोऽएषणः बंधुक्षितऽभ्यः गोऽएषणः ॥३॥ नु इत्था ते पूर्वऽथा च प्रऽवाच्यं यत् अंगिरःऽभ्यः अवृणोः अप व्रजं इंद्र शिक्षन् अप व्रजं आ एभ्यः समान्या दिशा अस्मभ्यं जेषि योत्सि च सुन्वतऽभ्यः रंधय कं चित् अव्रतं हृणायंतं चित् अव्रतं ॥ ४ ॥ सं यत् जनान् क्रतुऽभिः शूरः ईक्षयत् धने हिते तरुषंत श्रवस्यवः प्र यक्षंत श्रवस्यवः तस्मै आयुः प्रजाऽवत् इत् बाधे अर्चंति ओजसा इंद्रे ओक्यं दिधिषंत धीतयः देवान् अच्छ न धीतयः ॥५॥ युवं तं इंद्रापर्वता पुरःऽयुधा यः नः पृतन्यात् अप तंऽतं इत् हतं वज्रेण तंऽतं इत् हतं दूरे चत्ताय छंत्सत् गहनं यत्

इनक्षत् असाकँ शचून् परि पूर् विश्वतः दमा दर्षीष्ट विश्वतः ॥ ६ ॥ २१ ॥

॥१३३॥ उभे पुनामि रोदसी ऋतेन दुहः दहामि सं महीः अनिंद्राः अभिऽवुग्यं यच हताः अमिचाः वैलऽस्थानं परि तृङ्हाः अशेरन् ॥ १ ॥ अभिऽवुग्यं चित् अद्रिऽवः शीर्षा यातुऽमतीनां छिंधि वटूरिणा पदा महाऽवटूरिणा पदा ॥२॥ अव आसां मघऽवन् जहि शर्धः यातुऽमतीनां वैलऽस्थानके अर्मके महाऽवैलस्थे अर्मके ॥३॥ यासां तिस्रः पंचाशतः अभिऽवुंगैः अपऽअवपः तत् सु ते मनायति तकत् सु ते मनायति ॥ ४ ॥ पिशंगऽभृष्टिं अंभृणं पिशाचिं इंद्र सं मृण सवं रक्षः नि बर्हय ॥५॥ अवः महः इंद्र दद्हि अधि नः शुशोच हि द्यौः क्षाः न भीषा अद्रिऽवः घृणात् न भीषा अद्रिऽवः शुष्मिन्ऽतमः हि शुष्मिऽभिः वधैः उग्रेभिः ईयसे अपुरुषऽघ्नः अप्रतिऽइत् शूर सत्वऽभिः चिऽसप्तैः शूर सत्वऽभिः ॥ ६ ॥ वनोति हि सुन्वन् क्षयं परीणसः सुन्वानः हि स्म यजति अव द्विषः देवानां अव द्विषः सुन्वानः इत् सिसासति सहस्रा वाजी अवृतः सुन्वानाय इंद्रः ददाति आऽभुवं रयिं ददाति आऽभुवं ॥ ७ ॥ २२ ॥ १९ ॥

॥१३४॥ आ त्वा जुवः रहाणाः अभि प्रयः वायो वहंतु इह पूर्वऽपीतये सोमस्य पूर्वऽपीतये ऊर्ध्वा ते अनु सूनृता मनः तिष्ठतु जानती नियुत्वता रथेन आ याहि दावने वायो मखस्य दावने ॥१॥ मंदंतु त्वा मंदिनः वायो इंदवः अस्मत् क्राणासः सुऽकृता अभिऽद्यवः गोभिः क्राणाः अभिऽद्यवः यत् हु क्राणाः

इरध्यै दक्षं सचंते ऊतयः सध्रीचीनाः निऽयुतः दावने धियः उप ब्रुवते ईं धियः॥२॥ वायुः युंक्ते रोहिता वायुः अरुणा वायुः रथे अजिरा धुरि वोळ्हवे वहिष्ठा धुरि वोळ्हवे प्र बोधय पुरंऽधिं जारः आ ससतींऽईव प्र चक्षय रोदसी वासय उषसः अर्वसे वासय उषसः॥३॥ तुभ्यं उषसः शुचयः पराऽवति भद्रा वस्त्रा तन्वते दंऽसु रश्मिषु चित्रा नव्येषु रश्मिषु तुभ्यं धेनुः सबःऽदुघा विश्वा वसूनि दोहते अजनयः मरुतः वक्षणाभ्यः दिवः आ वक्षणाभ्यः॥४॥ तुभ्यं शुक्रासः शुचयः तुरण्यवः मदेषु उग्राः इषणंत भुर्वणिं अपां इषंत भुर्वणिं त्वां त्सारी दसमानः भगं ईट्टे तक्षऽवीर्ये त्वं विश्वस्मात् भुवनात् पासि धर्मणा असुर्यात् पासि धर्मणा ॥५॥ त्वं नः वायो एषां अपूर्व्यः सोमानां प्रथमः पीतिं अर्हसि सुतानां पीतिं अर्हसि उतो विहुत्मतीनां विशां ववर्जुषीणां विश्वाः इत् ते धेनवः दुहे आऽशिरं घृतं दुहते आऽशिरं॥६॥२३॥

॥१३५॥ स्तीर्णे बर्हिः उप नः याहि वीतये सहस्रेण निऽयुता नियुत्वते शतिनीभिः नियुत्वते तुभ्यं हि पूर्वऽपीतये देवाः देवाय येमिरे प्र ते सुतासः मधुऽमंतः अस्थिरन् मदाय क्रत्वे अस्थिरन् ॥१॥ तुभ्यं अयं सोमः परिऽपूतः अद्रिऽभिः स्वाहा वसानः परि कोशं अर्षति शुक्रा वसानः अर्षति तव अयं भागः आयुषु सोमः देवेषु हूयते वह वायो निऽयुतः याहि अस्मऽयुः जुषाणः याहि अस्मऽयुः॥२॥ आ नः नियुत्ऽभिः शतिनीभिः अध्वरं सहस्रिणीभिः उप याहि वीतये वायो हव्यानि वीतये तव अयं भागः ऋत्वियः सऽरश्मिः सूर्ये सचा अध्वर्युऽभिः भरमा-

णाः अयंसत वायौ शुक्राः अयंसत॥३॥ आ वां रथः नियुत्वान् वक्षत् अवसे अभि प्रयांसि सुऽधितानि वीतये वायौ हव्यानि वीतये पिबतं मध्वः अंधसः पूर्वेऽपेयं हि वां हितं वायौ आ चंद्रेण राधसा आ गतं इंद्रः च राधसा आ गतं ॥ ४ ॥ आ वां धियः ववृत्युः अध्वरान् उप इमं इंदुं मर्मृजंत वाजिनं आशुं अत्यं न वाजिनं तेषां पिबतं अस्मऽयू आ नः गंतं इह ऊत्या इंद्रवायू सुतानां अद्रिऽभिः युवं मदाय वाजऽदा युवं॥५॥२४॥ इमे वां सोमाः अप्ऽसु आ सुताः इह अध्वर्युऽभिः भरमाणाः अयंसत वायौ शुक्राः अयंसत एते वां अभि असृक्षत तिरः पविं आशवः युवाऽयवः अति रोमाणि अव्यया सोमासः अति अव्यया॥६॥ अति वायो ससतः याहि शश्वतः यं वां यावा वदति तं गच्छतं गृहं इंद्रः च गच्छतं वि सूनृता दद्दशे रीयते घृतं आ पूर्णया निऽयुता याथः अध्वरं इंद्रः च याथः अध्वरं॥७॥ अं अहं तत् वहेथे मध्वः आऽहुतिं यं अश्वत्थं उपऽतिष्ठंत जायवः अस्मे ते संतु जायवः साकं गावः सुवते पच्यते यवः न ते वायो उप दस्यंति धेनवः न अप दस्यंति धेनवः॥८॥ इमे ये ते सु वायो बाहुऽओजसः अंतःनदी ते पतयंति उक्षणः महि व्राधंतः उक्षणः धन्वन् चित् ये अनाशवः जीराः चित् अगिराऽओकसः सूर्यस्यऽइव रश्मयः दुःऽनियंतवः हस्तयोः दुःऽनियंतवः॥९॥२५॥

॥१३६॥ प्र सु ज्येष्ठं निऽचिराभ्यां बृहत् नमः हव्यं मतिं भरत मृळयत्ऽभ्यां स्वादिष्ठं मृळयत्ऽभ्यां ता संऽराजा घृतऽआसुती यज्ञेऽयज्ञे उपऽस्तुता अथ एनोः क्षत्रं न कुतः चन आऽधृषे देवऽत्वं नु चित् आऽधृषे॥१॥ अदर्शि गातुः उरवे वरीयसी पंथाः

ऋतस्य सं अयंस्त रश्मिऽभिः चक्षुः भगस्य रश्मिऽभिः द्युक्षं मित्रस्य सदनं अर्यम्णः वरुणस्य च अथ दधाते बृहत् उक्थ्यं वयः उपऽस्तुत्यं बृहत् वयः॥२॥ ज्योतिष्मतीं अदितिं धारयत्-ऽक्षितिं स्वःऽवतीं आ सचेते दिवेऽदिवे जागृऽवांसा दिवे-ऽदिवे ज्योतिष्मत् क्षत्रं आशाते आदित्या दानुनः पतीं मित्रः तयोः वरुणः यातयत्ऽजनः अर्यमा यातयत्ऽजनः॥३॥ अयं मित्राय वरुणाय शंऽतमः सोमः भूतु अवऽपानेषु आऽभगः देवः देवेषु आऽभगः तं देवासः जुषेरत विश्वे अद्य सऽजोषसः तथा राजाना करथः यत् ईमहे ऋतऽवाना यत् ईमहे॥४॥ यः मित्राय वरुणाय अविधत् जनः अनर्वाणं तं परि पातः अंहसः दाश्वांसं मर्तं अंहसः तं अर्यमा अभि रक्षति ऋजुऽयंतं अनु व्रतं उक्थैः यः एनोः परिऽभूषति व्रतं स्तोमैः आऽभूषति व्रतं॥५॥ नमः दिवे बृहते रोदसीभ्यां मित्राय वोचं वरुणाय मीळ्हुषे सु-ऽमृळीकाय मीळ्हुषे इंद्रं अग्निं उप स्तुहि द्युक्षं अर्यमणं भगं ज्योक् जीवंतः प्रऽजया सचेमहि सोमस्य ऊती सचेमहि॥६॥ ऊती देवानां वयं इंद्रंऽवंतः मंसीमहि स्वऽयशसः मरुत्ऽभिः अग्निः मित्रः वरुणः शर्म यंसन् तत् अश्याम मघऽवानः वयं च॥७॥२६॥१॥

॥१३७॥ सुसुम आ यातं अद्रिंऽभिः गोऽश्रीताः मत्सराः इमे सोमासः मत्सराः इमे आ राजाना दिविऽस्पृशा अस्मऽचा गंतं उप नः इमे वां मित्रावरुणा गोऽआशिरः सोमाः शुक्राः गो-ऽआशिरः॥१॥ इमे आ यातं इंदवः सोमासः दधिऽआशिरः सु-तासः दधिऽआशिरः उत वां उषसः बुधि साकं सूर्यस्य रश्मि-

ऽभिः सुतः मित्राय वरुणाय पीतये चारुः ऋताय पीतये॥२॥ तां वां धेनुं न वासरीं अꣳशुं दुहंति अद्रिऽभिः सोमं दुहंति अद्रिऽभिः अस्मऽचा गंतं उप नः अर्वाचा सोमऽपीतये अयं वां मित्रावरुणा नृऽभिः सुतः सोमः आ पीतये सुतः॥ ३ ॥ १॥

॥१३८॥ प्रऽप्र पूष्णः तुविऽजातस्य शस्यते महिऽत्वं अस्य तवसः न तंदते स्तोत्रं अस्य न तंदते अर्चामि सुम्नऽयन् अहं अंतिऽऊतिं मयःऽभुवं विश्वस्य यः मनः आऽयुयुवे मखः देवः आऽयुयुवे मखः॥१॥ प्र हि त्वा पूषन् अजिरं न यामनि स्तोमेभिः कृण्वे ऋणवः यथा मृधः उष्ट्रः न पीपरः मृधः हुवे यत् त्वा मयःऽभुवं देवं सख्याय मर्त्यः अस्माकं आंगूषान् द्युम्निनः कृधि वाजेषु द्युम्निनः कृधि॥२॥ यस्य ते पूषन् सख्ये विपन्यवः क्वा चित् संतः अवसा बुभुज्रिरे इति क्वा बुभुज्रिरे तां अनु त्वा नवीयसीं निऽयुतं रायः ईमहे अहेळमानः उरुऽशंस सरीं भव वाजेऽवाजे सरीं भव॥३॥ अस्याः ऊं सु नः उप सातये भुवः अहेळमानः रथिऽवान् अजऽअश्व अवस्यतां अजऽअश्व ओ सु त्वा ववृतीमहि स्तोमेभिः दस्म साधुऽभिः नहि त्वा पूषन् अतिऽमन्ये आघृणे न ते सख्यं अपऽहुवे॥ ४॥ २॥

॥१३९॥ अस्तु श्रौषट् पुरः अग्निं धिया दधे आ नु तत् शधः दिव्यं वृणीमहे इंद्रवायू वृणीमहे यत् ह क्राणा विवस्वति नाभा संऽदायि नव्यसी अध प्र सु नः उप यंतु धीतयः देवान् अच्छ न धीतयः॥१॥ यत् ह त्यत् मित्रावरुणौ ऋतात् अधि

आऽद्दाथे॰ अनृतं स्वेन मन्युना दक्षस्य स्वेन मन्युना युवोः इत्था अधि सद्मऽसु अपश्याम हिरण्ययै धीभिः चन मनसा स्वेभिः अक्षऽभिः सोमस्य स्वेभिः अक्षऽभिः ॥२॥ युवां स्तोमेभिः देवऽयंतः अश्विना आश्रवयंतःऽइव श्लोकं आयवः युवां हव्या अभि आयवः युवोः विश्वाः अधि श्रियः पृक्षः च विश्वऽवेदसा प्रुषायंते वां पवयः हिरण्ययै रथे दस्रा हिरण्ययै॥३॥ अचेति दस्रा वि ऊं नाकं ऋण्वथः युंजते वां रथऽयुजः दिविष्टिषु अध्वस्मानः दिविष्टिषु अधि वां स्थाम वंधुरे रथे दस्रा हिरण्ययै पथाऽइव यंतौ अनुऽशासता रजः अंजसा शासता रजः॥४॥ शचीभिः नः शचीऽवसू॰ दिवा नक्तं दशस्यतं मा वां रातिः उप दसत् कदा चन अस्मत् रातिः कदा चन ॥५॥३॥ वृषन् इंद्र वृषऽपानासः इंदवः इमे सुताः अद्रिऽसुतासः उतऽभिदः तुभ्यं सुतासः उतऽभिदः ते त्वा मंदंतु दावने महे चित्राय राधसे गीःऽभिः गिर्वाहः स्तवमानः आ गहि सुऽमृळीकः नः आ गहि॥६॥ ओ॰ सु नः अमे मृणुहि त्वं ईळितः देवेभ्यः ब्रवसि यज्ञियेभ्यः राजऽभ्यः यज्ञियेभ्यः यत् ह त्यां अंगिरःऽभ्यः धेनुं देवाः अदत्तन वि तां दुहे अर्यमा कर्तरि सचा एषः तां वेद मे सचा॥७॥ मो॰ सु वः अस्मत् अभि तानि पौंस्या सना भूवन् द्युम्नानि मा उत जारिषुः अस्मत् पुरा उत जारिषुः यत् वः चित्रं युगेऽयुगे नव्यं घोषात् अमर्त्यं अस्मासु तत् मरुतः यत् च दुस्तरं दिधृत यत् च दुस्तरं॥८॥ दध्यङ् ह मे जनुषं पूर्वः अंगिराः प्रियऽमेधः कण्वः अत्रिः मनुः विदुः ते मे पूर्वे मनुः विदुः तेषां देवेषु आऽयतिः अस्माकं तेषु नाभयः तेषां पदेन महि आ नमे गिरा इंद्राग्नी॰ आ नमे गिरा॥९॥ होता यक्षत् वनिनः वंत वार्यं बृ-

हस्पतिः यजति वेनः उक्षऽभिः पुरुऽवारेभिः उक्षऽभिः जगृभ्म दूरेऽआदिशं श्लोकं अद्रेः अध त्मना अधारयत् अररिंदानि सुऽऋतुः पुरु सद्मानि सुऽऋतुः ॥१०॥ ये देवासः दिवि एकादश स्थ पृथिव्यां अधि एकादश स्थ अप्सुऽक्षितः महिना एकादश स्थ ते देवासः यज्ञं इमं जुषध्वं ॥ ११ ॥ ४ ॥ २० ॥

॥ १४० ॥ वेदिऽसदे प्रियऽधामाय सुऽद्युते धासिंऽइव प्र भर योनिं अग्नये वस्त्रेणऽइव वासय मन्मना शुचिं ज्योतिःऽरयं सुऽऋऽवर्णि तमःऽहनं ॥ १ ॥ अभि द्विऽजन्मा चिऽवृत् अक्तुं चृज्यते संवत्सरे ववृधे जग्धं ईं पुनः अन्यस्य आसा जिह्वया जेन्यः वृषा नि अन्येन वनिनः मृष्ट वारणः ॥ २ ॥ कृष्णऽप्रुतौ वेविजे अस्य सऽक्षितौ उभा तरेते अभि मातरा शिशुं प्राचाऽजिह्मं ध्वसयंतं तृषुऽच्युतं आ साच्यं कुपयं वर्धनं पितुः ॥ ३ ॥ मुमुक्ष्वः मनवे मानवस्यते रघुऽद्रुवः कृष्णऽसीतासः ऊं जुवः अस्रमनाः अजिरासः रघुऽस्यदः वातऽजूताः उप युज्यंते आशवः ॥ ४ ॥ आत् अस्य ते ध्वसयंतः वृथा ईरते कृष्णं अभ्वं महि वर्पः करिक्रतः यत् सीं महीं अवनिं प्र अभि मर्मृशत् अभिऽस्वसन् स्तनयन् एति नानदत् ॥ ५ ॥ ५ ॥ भूषन् न यः अधि बभ्रूषु नर्यते वृषाऽइव पत्नीः अभि एति रोरुवत् ओजायमानः तन्वः च शुंभते भीमः न शृंगा दविधाव दुःऽगृभिः ॥ ६ ॥ सः संऽस्तिरः विऽस्तिरः सं गृभायति जानन् एव जानतीः नित्यः आ शये पुनः वर्धते अपि यंति देव्यं अन्यत् वर्पः पित्रोः कृण्वते सचा ॥ ७ ॥ तं अयुवः केशिनीः सं हि रेभिरे ऊर्ध्वाः तस्थुः मधुषीः प्र आयवे पुनः तासां जरां प्रऽमुंचन् एति नानदत् असुं परं जनयन् जीवं अस्तृतं ॥ ८ ॥ अधी-

वासं परि मातुः रिहन अह तुविऽग्रेभिः सत्वऽभिः याति वि ऋयः वयः दधत् पतऽवते रेरिहत् सदा अनु श्येनी सचते वर्तनिः अह ॥९॥ अस्माकं अग्ने मघवत्ऽसु दीदिहि अध स्वसीवान् वृषभः दमूनाः अवऽअस्य शिप्रुऽमतीः अदीदेः वमेऽइव युत्ऽसु परि-ऽजभ्रुराणः॥१०॥६॥ इदं अग्ने सुऽधितं दुःऽधितात् अधि प्रियात् ऊं चित् मन्मनः प्रेयः अस्तु ते यत् ते शुक्रं तन्वः रोचते शुचि तेन अस्मभ्यं वनसे रत्नं आ त्वं ॥११॥ रथाय नावं उत नः गृहाय नित्यऽअरित्रां पत्ऽवतीं रासि अग्ने अस्माकं वीरान् उत नः मघोनः जनान् च या पारयात् शर्म या च ॥१२॥ अभि नः अग्ने उक्थं इत् जुगुर्याः द्यावाक्षामा सिंधवः च स्वऽगूर्ताः गव्यं यव्यं यंतः दीर्घा अहा इषं वरं अरुण्यः वरंत ॥१३॥७॥

॥१४१॥ बट् इत्था तत् वपुषे धायि दर्शतं देवस्य भर्गः सहसः यतः जनि यत् ईं उप द्वरते साधते मतिः ऋतस्य धेनाः अनयंत सऽस्रुतः॥१॥ पृक्षः वपुः पितुऽमान् नित्यः आ शये द्वितीयं आ सप्तऽशिवासु मातृषु तृतीयं अस्य वृषभस्य दोहसे दशऽप्रमतिं जनयंत योषणः॥२॥ निः यत् ईं बुध्नात् महिषस्य वर्पसः ईशा-नासः शवसा क्रंत सूरयः यत् ईं अनु प्रऽदिवः मध्वः आऽधवे गुहा संतं मातरिश्वा मथायति॥३॥ प्र यत् पितुः परमात् नीयते परि आ पृक्षुधः वीरुधः दंऽसु रोहति उभा यत् अस्य जनुषं यत् इन्वतः आत् इत् यविष्ठः अभवत् घृणा शुचिः॥४॥ आत् इत् मातृः आ अविशत् यासु आ शुचिः अहिंस्यमानः उर्विया वि ववृधे अनु यत् पूर्वाः अरुहत् सनाऽजुवः नि नव्यसीषु अवरासु धावते ॥५॥८॥ आत् इत् होतारं वृणते दिविष्टिषु भगंऽइव

पपृचानासः ऋंजते देवान् यत् ऋत्वा मज्मना पुरुऽस्तुतः मतीं शंसं विश्वधा वेति धायसे ॥ ६ ॥ वि यत् अस्थात् यजतः वातंऽचोदितः हारः न वक्षा जरणाः अनाकृतः तस्य पत्मन् धक्षुषः कृष्णऽजंहसः पुचिऽजन्मनः रजः आ विऽअध्वनः ॥ ७ ॥ रथः न यातः शिक्वऽभिः कृतः द्यां अंगेभिः अरुषेभिः ईयते आत् अस्य ते कृष्णासः धक्षि सूरयः पूरस्यऽइव त्वेषथात् ईषते वयः ॥ ८ ॥ त्वया हि अग्ने वरुणः धृतऽव्रतः मित्रः शाशद्रे अर्यमा सुऽदानवः यत् सीं अनु क्रतुना विश्वऽथा विऽभुः अरान् न नेमिः परिऽभूः अजायथाः ॥ ९ ॥ त्वं अग्ने शशमानाय सुन्वते रत्नं यविष्ठ देवऽतातिं इन्वसि तं त्वा नु नव्यं सहसः युवन् वयं भगं न कारे महिऽरत्न धीमहि ॥ १० ॥ अस्मे रयिं न सुऽअर्थं दमूनसं भगं दक्षं न पपृचासि धर्णसिं रश्मीन्ऽइव यः यमति जन्मनी उभे देवानां शंसं ऋते आ च सुऽक्रतुः ॥ ११ ॥ उत नः सुऽद्योत्मा जीरऽअश्वः होता मंद्रः शृणवत् चंद्रऽरथः सः नः नेषत् नेषऽतमैः अमूरः अग्निः वामं सुवितं वस्यः अच्छ ॥ १२ ॥ अस्तावि अग्निः शिमीवत्ऽभिः अर्कैः सांऽराज्याय प्रऽतरं दधानः अमी च ये मघऽवानः वयं च मिहं न सूरः अति निः ततन्युः ॥ १३ ॥ ९ ॥

॥ १४२ ॥ संऽइद्धः अग्ने आ वह देवान् अद्य यतऽस्रुचे तंतुं तनुष्व पूर्व्यं सुतऽसोमाय दाशुषे ॥ १ ॥ घृतऽवंतं उप मासि मधुऽमंतं तनूऽनपात् यज्ञं विप्रस्य माऽवतः शशमानस्य दाशुषः ॥ २ ॥ शुचिः पावकः अद्भुतः मध्वा यज्ञं मिमिक्षति नराशंसः विः आ दिवः देवः देवेषु यज्ञियः ॥ ३ ॥ ईळितः अग्ने आ वह इंद्रं

चित्रं इह प्रियं इयं हि त्वा मतिः ममं अच्छं सुऽजिह्व वच्यते ॥४॥ स्तृणानासः यतऽसुचः बर्हिः यज्ञे सुऽअध्वरे वृंजे देवव्यचःऽतमं इंद्राय शर्मं सऽप्रथः ॥५॥ वि श्रयंतां ऋतऽवृधः प्रऽयै देवेभ्यः महीः पावकासः पुरुऽस्पृहः द्वारः देवीः असश्चतः ॥६॥१०॥ आ भंदमाने उषासे नक्तोषसा सुऽपेशसा यह्वी ऋतस्य मातरा सीदतां बर्हिः आ सुऽमत ॥७॥ मंद्रऽजिह्वा जुगुर्वणी होतारा दैव्या कवी यज्ञं नः यक्षतां इमं सिधं अद्य दिविऽस्पृशं ॥ ८ ॥ शुचिः देवेषु अर्पिता होत्रा मरुत्ऽसु भारती इळा सरस्वती महीं बर्हिः सीदंतु यज्ञियाः ॥९॥ तत् नः तुरीपं अद्भुतं पुरु वां अरं पुरु त्मना त्वष्टा पोषाय वि स्यतु राये नाभा नः अस्मऽयुः ॥१०॥ अवऽसृजन् उप त्मना देवान् यक्षि वनस्पते अग्निः हव्या सुसूदति देवः देवेषु मेधिरः ॥११॥ पूषण्ऽवते मरुत्वते विश्वऽदेवाय वायवे स्वाहा गायत्रऽवेपसे हव्यं इंद्राय कर्तन ॥ १२ ॥ स्वाहाऽकृतानि आ गहि उप हव्यानि वीतये इंद्र आ गहि शृधि हवं त्वां हवंते अध्वरे ॥ १३ ॥ ११ ॥

॥१४३॥ प्र तव्यसीं नव्यसीं धीतिं अग्नये वाचः मतिं सहसः सूनवे भरे अपां नपात् यः वसुऽभिः सह प्रियः होता पृथिव्यां नि असीदत् ऋत्वियः ॥ १ ॥ सः जायमानः परमे विऽओमनि आविः अग्निः अभवत् मातरिश्वने अस्य क्रत्वा समिंऽइधानस्य मज्मना प्र द्यावा शोचिः पृथिवी अरोचयत् ॥२॥ अस्य त्वेषाः अजराः अस्य भानवः सुऽसंदृशः सुऽप्रतीकस्य सुऽद्युतः भाऽत्वक्षसः अति अक्तुः न सिंधवः अग्नेः रेजंते असंसंतः अजराः ॥३॥ यं आऽईरिरे भृगवः विश्वऽवेदसं नाभा पृथिव्याः भुवनस्य

मज्मना अग्निं तं गीःऽभिः हिनुहि स्वे आ दमे यः एकः वस्वः वरुणः न राजति ॥४॥ न यः वराय मरुताँऽइव स्वनः सेनाऽइव सृष्टा दिव्या यथा अशनिः अग्निः जंभैः तिगितैः अत्ति भर्वति योधः न शत्रून् सः वना नि ऋंजते ॥५॥ कुवित् नः अग्निः उच-थस्य वीः असत् वसुः कुवित् वसुऽभिः कामै आऽवरत् चोदः कुवित् तुतुज्यात् सातये धियः शुचिऽप्रतीकं तं अया धिया गृणे ॥६॥ घृतऽप्रतीकं वः ऋतस्य धुःऽसदं अग्निं मित्रं न सं-ऽइधानः ऋंजते इंधानः अक्रः विदथेषु दीद्यत् शुक्रऽवर्णा उत् ऊं नः यंसते धियं ॥ ७ ॥ अग्रेऽयुच्छन् अग्रयुच्छत्ऽभिः अग्ने शिवेभिः नः पायुऽभिः पाहि शग्मैः अदब्धेभिः अहंपितेभिः इष्टे अनिमिषत्ऽभिः परि पाहि नः जाः ॥ ८ ॥ १२ ॥

॥१४४॥ एति प्र होता व्रतं अस्य मायया ऊर्ध्वा दधानः शु-चिऽपेशसं धियं अभि सुचः क्रमते दक्षिणाऽआवृतः याः अस्य धाम प्रथमं ह निंसते ॥१॥ अभि ईं ऋतस्य दोहनाः अनूषत योनौ देवस्य सदने परिऽवृताः अपां उपऽस्थे विऽभृतः यत् आ अवसत् अध स्वधाः अधयत् याभिः ईयते ॥ २ ॥ युयूषतः स-ऽवयसा तत् इत् वपुः समानं अर्थं विऽतरित्रता मिथः आत् ईं भगः न हव्यः सं अस्मत् आ वोळ्हुः न रश्मीन् सं अयंस्त सारथिः ॥३॥ यं ईं द्वा सऽवयसा सपर्यतः समाने योना मिथुना संऽओकसा दिवा न नक्तं पलितः युवा अजनि पुरु चरन् अजरः मानुषा युगा ॥४॥ तं ईं हिन्वंति धीतयः दश त्रिशः देवं मर्तासः ऊतये हवामहे धनोः अधि प्रऽवतः आ सः ऋण्वति अभिव्र-जत्ऽभिः वयुना नवा अधित ॥५॥ त्वं हि अग्ने दिव्यस्य राजसि

त्वं पार्थिवस्य पुपुषाःऽइव त्मना एनीं ते एते बृहती अभिऽश्रिया हिरण्ययीं वक्वरी बर्हिः आशाते ॥६॥ अग्ने जुषस्व प्रति हर्य तत् वचः मंद्र स्वधाऽवः ऋतंऽजात सुऽक्रतो० यः विश्वतः प्रत्यङ् असि दर्शतः रण्वः संऽदृष्टौ पितुमान्ऽइव क्षयः ॥७॥१३॥

॥ १४५ ॥ तं पृच्छत सः जगाम सः वेद सः चिकित्वान् ईयते सः नु ईयते तस्मिन् संति प्रऽशिषः तस्मिन् इष्टयः सः वाजस्य शवसः पुष्मिणः पतिः ॥१॥ तं इत् पृच्छंति न सिमः वि पृच्छति स्वेनऽइव धीरः मनसा यत् अयभीत् न मृष्यते प्रथमं न अपरं वचः अस्य ऋत्वा सचते अग्रंऽदपितः ॥२॥ तं इत् गच्छंति जुह्वः तं अवीतीः विश्वानि एकः पृणवत् वचांसि मे पुरुऽप्रैषः ततुरिः यज्ञऽसाधनः अच्छिद्रऽऊतिः शिप्रुः आ अदत्त संरभः ॥३॥ उपऽस्थायं चरति यत् संऽआरत सद्यः जातः तत्सार युज्येभिः अभिष्वांतं मृशते नांद्यै मुदे यत् ईं गच्छंति उशतीः अपिऽस्थितं ॥४॥ सः ईं मृगः अप्यः वनर्गुः उप त्वचि उपऽमस्यां नि धायि वि अब्रवीत् वयुना मर्त्येभ्यः अग्निः विद्वान् ऋतऽचित् हि सत्यः ॥५॥१४॥

॥ १४६ ॥ चिऽमूर्धानं सप्तऽरश्मिं गृणीषे अनूनं अग्निं पित्रोः उपऽस्थे निऽसत्तं अस्य चरतः ध्रुवस्य विश्वा दिवः रोचना आपप्रिऽवांसं ॥१॥ उक्षा महान् अभि ववक्षे एनं अजरः तस्थौ इतःऽऊतिः ऋष्वः उर्व्याः पदः नि दधाति सानौ रिहंति ऊधः अरुषासः अस्य ॥२॥ समानं वत्सं अभि संऽचरंती० विष्वक् धेनू वि चरतः सुऽमेके० अनपऽवृज्यान् अध्वनः मिमाने विश्वान् केतान् अधि महः दधाने ॥३॥ धीरासः पदं कवयः नयंति ना-

नो हृदा रक्षमाणाः अजुर्यं सिसासंतः परि अपश्यंत सिंधुं आविः एभ्यः अभवत् सूर्यः नृन् ॥४॥ दिदृक्षेण्यः परि काष्ठासु जेन्यः ईळेन्यः महः अर्भाय जीवसे पुरुऽचा यत् अभवत् सूः अह एभ्यः गर्भेभ्यः मघऽवा विश्वऽदर्शतः ॥ ५ ॥ १५ ॥

॥१४७॥ कथा ते अग्ने शुचयंतः आयोः ददाशुः वाजेभिः आशुषाणाः उभे यत् तोके तनये दधानाः ऋतस्य सामन् रणयंत देवाः ॥ १ ॥ बोध मे अस्य वचसः यविष्ठ मंहिष्ठस्य प्रऽभृतस्य स्वधाऽवः पीयंति त्वः अनु त्वः गृणाति वंदारुः ते तन्वं वंदे अग्ने ॥२॥ ये पायवः मामतेयं ते अग्ने पश्यंतः अंधं दुःऽइतात् अरक्षन् ररक्ष तान् सुऽकृतः विश्वऽवेदाः दिप्संतः इत् रिपवः न अह देभुः ॥३॥ यः नः अग्ने अररिऽवान् अघऽयुः अरातिऽवा मर्चयति द्वयेन मंत्रः गुरुः पुनः अस्तु सः अस्मै अनु मृक्षीष्ट तन्वं दुःऽउक्तैः ॥४॥ उत वा यः सहस्य प्रऽविद्वान् मतैः मतिं मर्चयति द्वयेन अतः पाहि स्तवमान स्तुवंतं अग्ने माकिः नः दुःऽइताय धायीः ॥ ५ ॥ १६ ॥

॥१४८॥ मथीत् यत् ईं विष्टः मातरिश्वा होतारं विश्वऽअप्सुं विश्वऽदेव्यं नि यं दधुः मनुष्यासु विक्षु स्वः न चित्रं वपुषे विभाऽवं ॥१॥ ददानं इत् न ददभंत मन्म अग्निः वरूथं मम तस्य चाकन् जुषंत विश्वानि अस्य कर्म उपऽस्तुतिं भरमाणस्य कारोः ॥२॥ नित्ये चित् नु यं सदने जगृभ्रे प्रशस्तिऽभिः दधिरे यज्ञियासः प्र सु नयंत गृभयंतः इष्टौ अश्वासः न रथ्यः रहाणाः ॥३॥ पुरूणि दस्मः नि रिणाति जंभैः आत् रोचते वने आ विभाऽवा आत् अस्य वातः अनु वाति शोचिः अस्तुः न शर्या असनां अनु

द्यून् ॥ ४ ॥ न यं रिपवः न रिषण्यवः गर्भे संतं रेषणाः रेषयंति अंधाः अपश्याः न दभन् अभिऽख्या नित्यासः ईं प्रेतारः अरक्षन् ॥ ५ ॥ १७ ॥

॥ १४९ ॥ महः सः रायः आ ईषते पतिः दन् इनः इनस्य वसुनः पदे आ उप ध्रजंतं अद्रयः विधन् इत् ॥ १ ॥ सः यः वृषा नरां न रोदस्योः श्रवःऽभिः अस्ति जीवपीतऽसर्गः प्र यः ससाणः शिश्नीत योनौ ॥ २ ॥ आ यः पुरं नार्मिणीं अदीदेत् अत्यः कविः नभन्यः न अर्वा सूरः न रुरुक्वान् शतऽआत्मा ॥ ३ ॥ अभि द्विऽजन्मा ची रोचनानि विश्वा रजांसि शुशुचानः अस्थात् होता यजिष्ठः अपां सधऽस्थे ॥ ४ ॥ अयं सः होता यः द्विऽजन्मा विश्वा दधे वार्याणि श्रवस्या मतीः यः अस्मै सुऽतुकः ददाश ॥ ५ ॥ १८ ॥

॥ १५० ॥ पुरु त्वा दाश्वान् वोचे अरिः अग्ने तव स्वित् आ तोदस्यऽइव शरणे आ महस्य ॥ १ ॥ वि अनिनस्य धनिनः प्रऽहोषे चित् अरंरुषः कदा चन प्रऽजिगातः अदेवऽयोः ॥ २ ॥ सः चंद्रः विप्र मर्त्यः महः व्राधन्ऽतमः दिवि प्रऽप्रं इत् ते अग्ने वनुषः स्याम ॥ ३ ॥ १९ ॥

॥ १५१ ॥ मित्रं न यं शिम्या गोषु गव्यवः सुऽआध्यः विदथे अप्ऽसु जीजनन् अरेजेतां रोदसी पाजसा गिरा प्रति प्रियं यजतं जनुषां अवः ॥ १ ॥ यत् ह त्यत् वां पुरुऽमीळ्हस्य सोमिनः प्र मित्रासः न दधिरे सुऽआभुवः अध क्रतुं विदतं गातुं अर्चते उत श्रुतं वृषणा पस्त्यऽवतः ॥ २ ॥ आ वां भूषन् क्षितयः जन्म

रोदस्योः प्रऽवाच्यं वृषण्या दक्षसे महे यत् ईं ऋताय भरथः यत् अर्वते प्रहोत्रया शिम्या वीथः अध्वरं॥३॥ प्र सा क्षितिः असुरा या महि प्रिया ऋतऽवानौ ऋतं आ घोषथः बृहत् युवं दिवः बृहतः दक्षं आऽभुवं गां न धुरि उप युंजाथे अपः ॥४॥ मही अच मह्ना वारे ऋणथः अरेणवः तुजः आ सद्मन् धेनवः स्वरंति ताः उपरऽतांति सूर्ये आ निऽमुचः उषसः तक्वीःऽइव ॥५॥२०॥ आ वां ऋताय केशिनीः अनूषत मित्र यत्र वरुण गातुं अर्चथः अव त्मना सृजतं पिन्वतं धियः युवं विप्रस्य मन्मनां इरज्यथः॥६॥ यः वां यज्ञैः शशमानः ह दाशति कविः होता यजति मन्मऽसाधनः उप अह तं गच्छथः वीथः अध्वरं अच्छ गिरः सुऽमतिं गंतं अस्मऽयू ॥७॥ युवां यज्ञैः प्रथमा गोभिः अंजते ऋतऽवाना मनसः न प्रऽयुक्तिषु भरंति वां मन्मना सं-ऽयता गिरः अहंऽपता मनसा रेवत् आशाथे ॥८॥ रेवत् वयः दधाथे रेवत् आशाथे नरा मायाभिः इतऽऊति माहिनं न वां द्यावः अहंऽभिः न उत सिंधवः न देवऽत्वं पणयः न आनशुः मघं ॥९॥२१॥

॥१५२॥ युवं वस्त्राणि पीवसा वसाथे युवोः अच्छिद्राः मंतवः ह सर्गाः अव अतिरंतं अनृतानि विश्वा ऋतेन मित्रावरुणा सचेथे ॥१॥ एतत् चन त्वः वि चिकेतत् एषां सत्यः मंत्रः कविऽशस्तः ऋघावान् चिःऽअस्थिं हंति चतुःऽअस्थिः उग्रः देवऽनिदः ह प्रथमाः अजूर्यन् ॥२॥ अपात् एति प्रथमा पतऽवतीनां कः तत् वां मित्रावरुणा आ चिकेत गर्भः भारं भरति आ चित् अस्य ऋतं पिपर्ति अनृतं नि तारीत् ॥३॥ प्रऽयंतं इत् परि जारं

कनीनाँ पश्यामसि न उपऽनिपद्यमानं अनवऽपृग्णा विऽततता वसानं प्रियं मित्रस्य वरुणस्य धामं ॥४॥ अनश्वः जातः अनभीष्युः अर्वा कनिक्रदत् पतयत् ऊर्ध्वऽसानुः अचित्तं ब्रह्म जुजुषुः युवानः प्र मित्रे धामं वरुणे गृणंतः ॥५॥ आ धेनवः मामतेयं अवंतीः ब्रह्मऽप्रियं पीपयन् सस्मिन् ऊधन् पित्वः भिक्षेत वयुनानि विद्वान् आसा आऽविवासन् अदितिं उरुष्येत् ॥६॥ आ वां मित्रावरुणा हव्यऽजुष्टिं नमसा देवौ अवसा ववृत्यां अस्माकं ब्रह्म पृतनासु सह्याः अस्माकं वृष्टिः दिव्या सुऽपारा ॥७॥२२॥

॥१५३॥ यजामहे वां महः सऽजोषाः हव्येभिः मित्रावरुणा नमःऽभिः घृतैः घृतऽस्नू० अध यत् वां अस्मे अध्वर्यवः न धीतिऽभिः भरंति ॥१॥ प्रऽस्तुतिः वां धामं न प्रऽयुक्तिः अयामि मित्रावरुणा सुऽवृक्तिः अनक्ति यत् वां विदथेषु होता सुम्नं वां सूरिः वृषणौ इयक्षन् ॥२॥ पीपाय धेनुः अदितिः ऋताय जनाय मित्रावरुणा हविःऽदे हिनोति यत् वां विदथे सपर्यन् सः रातऽहव्यः मानुषः न होता ॥३॥ उत वां विक्षु मद्यासु अंधः गावः आपः च पीपयंत देवीः उतो' नः अस्य पूर्व्यः पतिः दन् वीतं पातं पयसः उस्रियायाः ॥४॥२३॥

॥१५४॥ विष्णोः नु कं वीर्याणि प्र वोचं यः पार्थिवानि विऽममे रजाँसि यः अस्कभायत् उत्ऽतरं सधऽस्थं विऽचक्रमाणः त्रेधा उरुऽगायः ॥१॥ प्र तत् विष्णुः स्तवते वीर्येण मृगः न भीमः कुचरः गिरिऽस्थाः यस्य उरुषु त्रिषु विऽक्रमणेषु अधिऽक्षियंति भुवनानि विश्वा ॥२॥ प्र विष्णवे शूषं एतु मन्म गिरिऽक्षिते उरुऽगायाय वृष्णे यः इदं दीर्घं प्रऽयतं सधऽस्थं एकः

विऽममे चिऽभिः इत् पदेभिः॥३॥ यस्य ची पूर्णा मधुना पदानि अक्षीयमाणा स्वधया मदंति यः ऊं चिऽधातु पृथिवीं उत द्यां एकः दाधार भुवनानि विश्वा॥४॥ तत् अस्य प्रियं अभि पाथः अश्यां नरः यत्र देवऽयवः मदंति उरुऽक्रमस्य सः हि बंधुः इत्था विष्णोः पदे परमे मध्वः उत्सः॥५॥ ता वां वास्तूनि उश्मसि गमध्यै यत्र गावः भूरिऽशृंगाः अयासः अत्र अह तत् उरुऽगा-यस्य वृष्णः परमं पदं अव भाति भूरि॥६॥२४॥

॥१५५॥ प्र वः पांतं अंधसः धियाऽयते महे शूराय विष्णवे च अर्चत या सानुनि पर्वतानां अदाभ्या महः तस्थतुः अर्वता ऽइव साधुना॥१॥ त्वेषं इत्था समऽअरणं शिमीऽवतोः इंद्रा-विष्णू सुतऽपाः वां उरुष्यति या मर्त्याय प्रतिऽधीयमानं इत् कृशानोः अस्तुः असनां उरुष्यथः॥२॥ ताः ई वर्धंति महिं अस्य पौंस्यं नि मातरा नयति रेतसे भुजे दधाति पुत्रः अवरं परं पितुः नाम तृतीयं अधि रोचने दिवः॥३॥ तत्ऽतत् इत् अस्य पौंस्यं गृणीमसि द्यनस्य चातुः अवृकस्य मीळ्हुषः यः पार्थिवानि चि-ऽभिः इत् विगामऽभिः उरु क्रमिष्ट उरुऽगायाय जीवसे॥४॥ द्वे इत् अस्य क्रमणे स्वःऽदृशः अभिऽख्याय मर्त्यः भुरण्यति तृतीयं अस्य नकिः आ दधर्षति वयः चन पतयंतः पतत्रिणः॥५॥ चतुःऽभिः साकं नवतिं च नामऽभिः चक्रं न वृत्तं व्यतीन् अवीविपत् बृहत्ऽशरीरः विऽमिमानः ऋक्वऽभिः युवा अकुमारः प्रति एति आऽहवं॥६॥२५॥

॥१५६॥ भवं मित्रः न शेव्यः घृतऽआसुतिः विभूतऽद्युम्नः एवऽयाः ऊं सऽप्रथाः अध ते विष्णो विदुषा चित् अर्ध्यः स्तोमः

यज्ञः च॒ राध्यः॑ ह॒विष्म॑ता ॥१॥ यः पू॒र्व्याय॑ वे॒धसे॑ नवी॒यसे॒ सुम॑त्-ऽजानये विष्ण॑वे द॒दाश॑ति यः जा॒तं अ॒स्य॒ म॒ह॒तः महि॑ ब्रव॑त् सः इत् ऊं॑ श्रवः॑ऽभिः युज्यं॑ चित् अ॒भि अस॑त् ॥२॥ तं ऊं॑ स्तो॒तारः॒ पू॒र्व्यं॑ यथा॑ वि॒द ऋ॒तस्य॑ गर्भं॑ ज॒नुषा॑ पिपर्तन॒ आ अ॒स्य॒ जा॒नंतः॑ नाम॑ चित् वि॒वक्त॑न॒ महः॑ ते॒ विष्णो॑ सु॑ऽम॒तिं भ॒जा॒म॒हे॒ ॥ ३ ॥ तं अ॒स्य॒ राजा॑ वरु॑णः तं अ॒श्विना॑ क्रतुं॑ स॒चं॒त॒ मारु॑तस्य वे॒धसः॑ दा॒धार॑ दक्षं॑ उत्ऽत॒मं अ॒हः॑ऽविदं॑ व्र॒जं च॒ विष्णुः॑ सखि॑ऽवान् अ॒पऽऊ॑र्णुते ॥४॥ आ यः वि॒वाय॑ स॒चथा॑य दैव्यः॑ इंद्रा॑य विष्णुः॑ सु॑ऽकृते॑ सुकृ॑त्ऽतरः वे॒धाः अ॒जि॒न्व॒त् चि॒ऽस॒ध॒स्थः आ॒र्यं ऋ॒तस्य॑ भा॒गे यज॑मानं आ॒ अ॒भ॒ज॒त् ॥५॥२६॥२१॥

॥१५७॥ अबो॑धि अ॒ग्निः ज्म॑ः उत् ए॑ति॒ सूर्यः॑ वि उ॒षाः च॑ंद्रा म॒ही आ॒वः॒ अ॒र्चि॒षा॒ अ॒यु॒क्षा॒तां अ॒श्विना॑ यात॑वे रथं॑ प्र अ॒सा॒-वी॒त् दे॒वः स॒वि॒ता जग॑त् पृथ॑क् ॥१॥ यत् यु॒जाथे॑ वृषणं॑ अ॒श्वि॒ना॒ रथं॑ घृ॒तेन॑ नः॒ मधु॑ना क्ष॒त्रं उ॒क्ष॒तं॒ अ॒स्माकं॑ ब्रह्म॑ पृतना॒सु॒ जि॒न्व॒तं॒ व॒यं धना॑ प्रऽसाता॑ भजेमहि ॥ २ ॥ अ॒र्वाङ् चि॒ऽच॒क्रः मधु॑-ऽवाहनः॑ रथः॑ जी॒रऽअ॑श्वः अ॒श्विनोः॑ या॒तु॒ सु॒ऽस्तु॒तः चि॒ऽवं॒धुरः॑ मघ॑ऽवा॑ वि॒श्वऽसौ॑भगः॒ शं नः॒ आ व॑क्षत् द्वि॒ऽप॒दे॑ चतुः॑ऽपदे॑ ॥३॥ आ नः॒ ऊर्जं॑ वह॑तं अ॒श्वि॒ना॒ युवं॑ मधु॑ऽमत्या नः॑ कशया॑ मिमि-क्ष॒तं॒ प्र आयुः॑ तारिष्टं निः॑ रपाँ॑सि मृक्ष॒तं॒ सेधतं॑ द्वेषः॑ भवतं॑ स॒चा॒-ऽभुवा॑ ॥४॥ युवं ह॒ गर्भं॑ जग॑तीषु धत्थः॒ युवं विश्वे॑षु भुव॑नेषु अं॒तः॑ युवं अ॒ग्निं च॒ वृ॒ष॒णौ॒ अ॒पः च॒ वन॒स्पती॑न् अ॒श्वि॒नौ॒ ऐ॒र॒येथां॑ ॥५॥ युवं ह॒ स्थः॒ भि॒षजा॑ भेष॒जेभिः॑ अथो॑ ह॒ स्थः॒ र॒थ्या॑ र॒थ्ये॑भिः॑ अथो॑ ह॒ क्ष॒त्रं अधि॑ धत्थः॒ उ॒या॒ यः वां॑ ह॒विष्मा॑न् मन॑सा द॒दाश॑॥६॥२७॥२॥

॥ १५८ ॥ वसू॑ रुद्रा पुरु॑ऽमंतू॰ वृधंता दृ॒शस्यतं॑ नः वृष॒णो॒ अ॒भि॒ष्टौ॑ दस्रा॑ ह॒ यत् रेक्ण॑ः औ॒च॒थ्यः॑ वां॒ प्र यत् स॒स्राथे॑ अक॑-वाभिः ऊ॒ती ॥१॥ कः वां॒ दा॒श॒त् सु॒ऽम॒तये॑ चि॒त् अ॒स्यै वसू॑ यत् धेथे॑ नमंसा पदे॑ गोः जि॒गृ॒तं अ॒स्मे॑ रे॒वतीः॑ पुरं॑धीः काम॒प्रेण॑-ऽइव मनंसा चरंता ॥ २ ॥ युक्तः ह॒ यत् वां॒ तौ॒ग्र्याय॑ पे॒रुः वि मध्ये॑ अर्णसः धायि॑ प॒ज्रः उप॑ वां॒ अवः॑ शर॒णं ग॒मेय॑ शूरः॑ न अज्म॑ पतयंत॑ऽभिः एवैः॑ ॥ ३ ॥ उप॑ऽस्तुतिः औ॒च॒थ्यं उ॒रु॒ष्येत् मा मां॑ इमे॑ पत॒चिणी॑ वि दु॒ग्धां॒ मा मां॑ एधः दश॑ऽतयः चि॒तः धाक् प्र यत् वां॒ ब॒ड॒ः त्मनि॑ खादंति क्षां ॥४॥ न मा॒ गरन् नद्यः॑ मा॒-तृऽत॑मा॒ः दासाः॑ यत् ई॒ सु॒ऽसमु॑ब्धं अव॑ऽअधुः शिरः॑ यत् अ॒स्य॒ चै॒त॒नः वि॒ऽतक्षत् स्वयं॑ दासः॑ उरः॑ अंसौ॑ अपि॑ ग्ध॰॥५॥ दीर्घ॑-ऽतमाः मा॒मते॑यः जुजुर्वान् दशमे॑ युगे॑ अपां॑ अर्थं॑ यतीनां॑ ब्रह्मा भ॒वति॒ सार॑थिः ॥ ६ ॥ १ ॥

॥१५९॥ प्र द्यावा॑ यज्ञैः पृथि॒वी॑ ऋ॒त॒ऽवृधा॑ म॒ही॑ स्तु॒षे॒ वि-दथे॑षु प्रऽचेतसा देवेभिः ये॑ देव॒ऽपु॑त्रे॰ सु॒ऽदं॑ससा इ॒त्था धि॒या वार्या॑णि प्र॒ऽभूष॑तः॥१॥ उत॑ मन्ये पि॒तुः अ॒दुहः॑ मनः॑ मा॒तुः महि॑ स्व॒ऽत॑वः तत् हवी॑मऽभिः सु॒ऽरेत॑सा पि॒तरा॑ भूम॑ चक्रतुः उरु प्र॒ऽजायाः॑ अ॒मृत॑ं वरी॑मऽभिः॥२॥ ते सू॒नवः॑ सु॒ऽअप॑सः सु॒-ऽदं॑ससः म॒ही॑ जजु॒ः मा॒तरा॑ पू॒र्व॒ऽचि॒त्तये॑ स्था॒तुः च॒ सत्यं॑ जग॑तः च॒ धर्म॑णि पु॒चस्य॑ पा॒थः॑ पद॑ं अ॒ज्ञ॒याविनः॑ ॥ ३ ॥ ते मा॒यिनः॑ ममि॒रे॒ सु॒ऽप्रचे॑तसः जा॒मी॑ सऽयो॑नी॰ मि॒थु॒ना सं॑ऽओ॑कसा न-व्यं॑ऽनव्यं तंतुं॑ आ॒ त॒न्व॒ते॒ दि॒वि स॒मु॒द्रे अ॒॑॑तः॑ क॒वयः॑ सु॒ऽदी॒तयः॑ ॥४॥ तत् राधः॑ अ॒द्य स॒वि॒तुः वरे॑ण्यं व॒यं दे॒वस्य॑ प्र॒ऽस॒वे म॒ना-

मꣳहे अस्मभ्यं द्यावापृथिवी सुऽचेतुना रयिं धत्तं वसुऽमंतं शतुऽग्विनं ॥ ५ ॥ २ ॥

॥ १६० ॥ ते हि द्यावापृथिवी विश्वऽशंभुवा ऋतऽवरी० रजसः धारयत्ऽकवी० सुऽजन्मनी० धिषणे अंतः ईयते देवः देवी धर्मणा सूर्यः शुचिः ॥१॥ उरुऽव्यचसा महिनी असश्चता पिता माता च भुवनानि रक्षतः सुऽधृष्टमे० वपुर्ये न रोदसी पिता यत् सीं अभि रूपैः अवासयत् ॥२॥ सः वहिः पुचः पिचोः पविचंऽवान् पुनाति धीरः भुवनानि मायया धेनुं च पृश्निं वृषभं सुऽरेतसं विश्वाहा शुक्रं पयः अस्य धुक्षत ॥ ३ ॥ अयं देवानां अपसां अपःऽतमः यः जजान रोदसी विश्वऽशंभुवा वि यः ममे रजसी सुक्रतुऽयया अजरेभिः स्कंभनेभिः सं आनृचे ॥४॥ ते नः गृणाने महिनी महि श्रवः क्षत्रं द्यावापृथिवी धासथः बृहत् येन अभि कृष्टीः ततनाम विश्वहा पनाय्यं ओजः अस्मे सं इन्वतं ॥ ५ ॥ ३ ॥

॥ १६१ ॥ किं ऊं श्रेष्ठः किं यविष्ठः नः आ अजगन् किं ईयते दूत्यं कत् यत् ऊचिम न निंदिम चमसं यः महाऽकुलः अग्ने भ्रातः दुर्णः इत् भूतिं ऊदिम ॥१॥ एकं चमसं चतुरः कृणोतन तत् वः देवाः अब्रुवन् तत् वः आ अगमं सौधन्वनाः यदि एव करिष्यथ साकं देवैः यज्ञियासः भविष्यथ ॥२॥ अग्निं दूतं प्रति यत् अब्रवीतन अश्वः कर्वैः रथः उत इह कर्वैः धेनुः कर्वी युवशा कर्वी ङा तानि भ्रातः अनु वः कृत्वी आ इमसि ॥३॥ चकृऽवांसः ऋभवः तत् अपृच्छत क इत् अभूत् यः स्यः दूतः नः आ अजगन् यदा अवऽअख्यत् चमसान् चतुरः कृतान् आत् इत् त्वष्टा गासु अंतः

नि आनजे ॥४॥ हनाम एनान् इति त्वष्टा यत् अब्रवीत् चमसं ये देवऽपानं अनिंदिषुः अन्या नामानि कृण्वते सुते सचा अन्यैः एनान् कन्या नामऽभिः स्परत् ॥५॥४॥ इंद्रः हरी युयुजे अश्विना रथं बृहस्पतिः विश्वऽरूपां उप आजत ऋभुः विऽभ्वा वाजः देवान् अगच्छत सुऽअपसः यज्ञियं भागं ऐतन ॥६॥ निः चर्मणः गां अरिणीत धीतिऽभिः या जरंता युवशा ता अकृणोतन सौधन्वनाः अश्वात् अश्वं अतक्षत युक्ता रथं उप देवान् अयातन ॥७॥ इदं उदकं पिबत इति अब्रवीतन इदं वा घ पिबत मुंजऽनेजनं सौधन्वनाः यदि तत् नऽइव हर्यथ तृतीये घ सवने मादयाध्वै ॥८॥ आपः भूयिष्ठाः इति एकः अब्रवीत् अग्निः भूयिष्ठः इति अन्यः अब्रवीत् वधःऽयंतीं बहुऽभ्यः प्र एकः अब्रवीत् ऋता वदंतः चमसान् अपिंशत ॥९॥ श्रोणां एकः उदके गां अव अजति मांसं एकः पिंशति सूनया आऽभृतं आ निऽमुचः शकृत् एकः अप अभरत् किं स्वित् पुत्रेभ्यः पितरौ उप आवतुः ॥१०॥५॥ उद्वत्ऽसु अस्मै अकृणोतन तृणं निवत्ऽसु अपः सुऽअपस्यया नरः अगोह्यस्य यत् असंस्तन गृहे तत् अद्य इदं ऋभवः न अनु गच्छथ ॥११॥ संऽमील्य यत् भुवना परिऽअसर्पत कं स्वित् ताता पितरा वः आसतुः अशपत यः करत्नं वः आऽददे यः प्र अब्रवीत् प्रो तस्मै अब्रवीतन ॥१२॥ सुसुप्वांसः ऋभवः तत् अपृच्छत अगोह्य कः इदं नः अबूबुधत् श्वानं बस्तः बोधयितारं अब्रवीत् संवत्सरे इदं अद्य वि अख्यत ॥१३॥ दिवा यांति मरुतः भूम्या अग्निः अयं वातः अंतरिक्षेण याति अत्ऽभिः याति वरुणः समुद्रैः युष्मान् इच्छंतः श्वसः नपातः ॥१४॥६॥

॥१६२॥ मा नः मित्रः वरुणः अर्यमा आयुः इंद्रः ऋभुक्षाः मरुतः परि ख्यन् यत् वाजिनः देवऽजातस्य सप्तेः प्रऽवक्ष्यामः विदथे वीर्याणि ॥१॥ यत् निःऽनिजा रेक्णसा प्रावृतस्य रातिं गृभीतां मुखतः नयंति सुऽप्राङ् अजः मेम्यत् विश्वऽरूपः इंद्रापूष्णोः प्रियं अपि एति पाथः ॥२॥ एषः छागः पुरः अश्वेन वाजिना पूष्णः भागः नीयते विश्वऽदेव्यः अभिऽप्रियं यत् पुरोळाशं अर्वता त्वष्टा इत् एनं सौश्रवसाय जिन्वति ॥३॥ यत् हविष्यं ऋतुऽशः देवऽयानं चिः मानुषाः परि अश्वं नयंति अंच पूष्णः प्रथमः भागः एति यज्ञं देवेभ्यः प्रतिऽवेदयन् अजः ॥४॥ होता अध्वर्युः आऽवया अग्निंऽइंधः मावऽयाभः उत शंस्ता सुऽविप्रः तेन यज्ञेन सुऽस्वरंकृतेन सुऽइष्टेन वक्षणाः आ पृणध्वं ॥५॥७॥ यूपऽव्रस्काः उत ये यूपऽवाहाः चषालं ये अश्वऽयूपाय तक्षंति ये च अर्वते पचनं संऽभरंति उतो तेषां अभिऽगूर्तिः नः इन्वतु ॥६॥ उप प्र अगात् सुऽमत् मे अधायि मन्म देवानां आशाः उप वीतऽपृष्ठः अनु एनं विप्राः ऋषयः मदंति देवानां पुष्टे चकृम सुऽबंधुं ॥७॥ यत् वाजिनः दाम संऽदानं अर्वतः या शीर्षण्या रशना रज्जुः अस्य यत् वा घ अस्य प्रऽभृतं आस्ये तृणं सर्वा ता ते अपि देवेषु अस्तु ॥८॥ यत् अश्वस्य क्रविषः मक्षिका आश यत् वा स्वरौ स्वऽधितौ रिप्रं अस्ति यत् हस्तयोः शमितुः यत् नखेषु सर्वा ता ते अपि देवेषु अस्तु ॥९॥ यत् ऊवध्यं उदरस्य अपऽवाति यः आमस्य क्रविषः गंधः अस्ति सुऽकृता तत् शमितारः कृण्वंतु उत मेधं सृतऽपाकं पचंतु ॥१०॥८॥ यत् ते गाचात् अग्निना पच्यमानात् अभि शूलं निऽहितस्य अवऽधावति मा तत् भूम्यां आ श्रिषत् मा तृणेषु देवेभ्यः तत् उश-

त्ऽभ्यः रातं अस्तु ॥११॥ ये वाजिनं परिऽपश्यंति पक्वं ये ईं आहुः सुरभिः निः हरइति ये च अवैतः मांसऽभिक्षां उपऽआसते उतो तेषां अभिऽगूर्तिः नः इन्वतु ॥१२॥ यत् निऽईक्षणं मांस्पचन्याः उखायाः या पात्राणि यूष्णः आऽसेचनानि ऊष्मण्या अपिऽधानां चरूणां अंकाः सूनाः परिभूषंति अश्वं ॥१३॥ निऽक्रमणं निऽसदनं विऽवर्तनं यत् च पड्बीशं अवैतः यत् च पपौ यत् च घासिं जघास सर्वा ता ते अपि देवेषु अस्तु ॥१४॥ मा त्वा अग्निः ध्वनयीत् धूमऽगंधिः मा उखा भ्राजंती अभि विक्त जघ्रिः इष्टं वीतं अभिऽगूर्तं वषट्ऽकृतं तं देवासः प्रति गृभ्णंति अश्वं ॥१५॥९॥ यत् अश्वाय वासः उपऽस्तृणंति अधीवासं या हिरण्यानि अस्मै संऽदानं अवैतं पड्बीशं प्रिया देवेषु आ यमयंति ॥१६॥ यत् ते सादे महसा शूकृतस्य पाष्ण्यां वा कशया वा तुतोद सुचाऽइव ता हविषः अध्वरेषु सर्वा ता ते ब्रह्मणा सूदयामि ॥१७॥ चतुःऽचिंशत् वाजिनः देवऽबंधोः वंक्रीः अश्वस्य स्वऽधितिः सं एति अच्छिद्रा गात्रा वयुना कृणोत परुःपरुः अनुऽघुष्य वि शस्त ॥१८॥ एकः त्वष्टुः अश्वस्य विऽशस्ता द्वा यंतारा भवतः तथा ऋतुः या ते गात्राणां ऋतुऽथा कृणोमि ताऽता पिंडानां प्र जुहोमि अग्नौ ॥१९॥ मा त्वा तपत् प्रियः आत्मा अपिऽयंतं मा स्वऽधितिः तन्वः आ तिस्थिपत् ते मा ते गृध्नुः अविऽशस्ता अतिऽहाय छिद्रा गात्राणि असिना मिथु कः० ॥२०॥ न वै ऊं एतत् म्रियसे न रिष्यसि देवान् इत् एषि पथिऽभिः सुऽगेभिः हरी ते युंजा पृषती अभूतां उप अस्थात् वाजी धुरि रासभस्य ॥२१॥ सुऽगव्यं नः वाजी सुऽअश्व्यं पुंसः पुत्रान् उत विश्वऽपुष्यं रयिं अनागाःऽत्वं नः अदितिः कृणोतु क्षत्रं नः अश्वः वनतां हविष्मान् ॥२२॥१०॥

॥ १६३ ॥ यत् अक्रंदः प्रथमं जायमानः उतऽयन् समुद्रात् उत वा पुरीषात् श्येनस्य पक्षा हरिणस्य बाहू उपऽस्तुत्यं महि जातं ते अर्वन् ॥ १ ॥ यमेन दत्तं चितः एनं अयुनक् इंद्रः एनं प्रथमः अधि अतिष्ठत् गंधर्वः अस्य रशनां अगृभ्णात् सूरात् अश्वं वसवः निः अतष्ट ॥२॥ असि यमः असि आदित्यः अर्वन् असि चितः गुह्येन व्रतेन असि सोमेन समया विऽपृक्तः आहुः ते चीणि दिवि बंधनानि ॥३॥ चीणि ते आहुः दिवि बंधनानि चीणि अप्ऽसु चीणि अंतः समुद्रे उतऽइव मे वरुणः छंत्सि अर्वन् यत्र ते आहुः परमं जनित्रं ॥४॥ इमा ते वाजिन् अवऽमार्जनानि इमा शफानां सनितुः निऽधानां अत्र ते भद्राः रशनाः अपश्यं ऋतस्य याः अभिऽरक्षंति गोपाः ॥५॥११॥ आत्मानं ते मनसा आरात् अजानां अवः दिवा पतयंतं पतंगं शिरः अपश्यं पथिऽभिः सुऽगेभिः अरेणुऽभिः जेहमानं पतत्रि ॥६॥ अत्र ते रूपं उतऽतमं अपश्यं जिगीषमाणं इषः आ पदे गोः यदा ते मर्तः अनु भोगं आनंद् आत् इत् यसिष्ठः ओषधीः अजीगः ॥७॥ अनु त्वा रथः अनु मर्यः अर्वन् अनु गावः अनु भगः कनीनां अनु व्रातासः तव सख्यं ईयुः अनु देवाः ममिरे वीर्यं ते ॥८॥ हिरण्यऽशृंगः अयः अस्य पादाः मनःऽजवाः अवरः इंद्रः आसीत् देवाः इत् अस्य हविःऽअद्यं आयन् यः अर्वंतं प्रथमः अधिऽअतिष्ठत् ॥९॥ ईर्मेऽअंतासः सिलिकऽमध्यमासः सं शूरणासः दिव्यासः अत्याः हंसाःऽइव श्रेणिऽशः यतंते यत् आक्षिषुः दिव्यं अज्मं अश्वाः ॥१०॥१२॥ तव शरीरं पतयिष्णु अर्वन् तव चित्तं वातःऽइव ध्रजीमान् तव शृंगाणि विऽस्थिता पुरुऽत्रा अरण्येषु जर्भुराणा चरंति ॥११॥ उप प्र अगात् शसनं वाजी

अर्वा देवद्रीचा मनसा दीध्यानः अजः पुरः नीयते नाभिः अस्य अनु पश्चात् कवयः यंति रेभाः ॥१२॥ उप प्र अगात् परमं यत् सधऽस्थं अर्वान् अच्छ पितरं मातरं च अद्या देवान् जुष्टऽतमः हि गम्याः अथ आ शास्ते दाशुषे वार्याणि ॥१३॥१३॥

॥१६४॥ अस्य वामस्य पलितस्य होतुः तस्य भ्राता मध्यमः अस्ति अश्नः तृतीयः भ्राता घृतऽपृष्ठः अस्य अत्र अपश्यं विश्पतिं सप्तऽपुत्रं ॥१॥ सप्त युंजंति रथं एकऽचक्रं एकः अश्वः वहति सप्तऽनामा त्रिऽनाभि चक्रं अजरं अनर्वं यत्र इमा विश्वा भुवना अधि तस्थुः ॥२॥ इमं रथं अधि ये सप्त तस्थुः सप्तऽचक्रं सप्त वहंति अश्वाः सप्त स्वसारः अभि सं नवंते यत्र गवां निऽहिता सप्त नाम ॥३॥ कः ददर्श प्रथमं जायमानं अस्थन्ऽवंतं यत् अनस्था बिभर्ति भूम्याः असुः असृक् आत्मा क्व स्वित् कः विद्वांसं उप गात् प्रष्टुं एतत् ॥४॥ पाकः पृच्छामि मनसा अविऽजानन् देवानां एना निऽहिता पदानि वत्से बष्कये अधि सप्त तंतून् वि तन्निरे कवयः ओतवे ऊं ॥५॥१४॥ अचिकित्वान् चिकितुषः चित् अत्र कवीन् पृच्छामि विद्मने न विद्वान् वि यः तस्तंभ षट् इमा रजांसि अजस्य रूपे किं अपि स्वित् एकं ॥६॥ इह ब्रवीतु यः ई अंग वेद अस्य वामस्य निऽहितं पदं वेः० शीर्ष्णः क्षीरं दुहते गावः अस्य वव्रिं वसानाः उदकं पदा अपुः ॥७॥ माता पितरं ऋते आ बभाज धीती अग्ने मनसा सं हि जग्मे सा बीभत्सुः गर्भऽरसा निऽविद्धा नमस्वंतः इत् उपऽवाकं ईयुः ॥८॥ युक्ता माता आसीत् धुरि दक्षि-

णायाः अतिष्ठत् गर्भः वृजनीषु अंतः अमीमेत् वत्सः अनु गां अपश्यत् विश्वऽरूपं चिषु योजनेषु ॥ ९ ॥ तिस्रः मातॄः चीन् पितॄन् बिभ्रत् एकः ऊर्ध्वः तस्थौ न ईं अव ग्लपयंति मंचयंते दिवः अमुष्य पृष्ठे विश्वऽविदं वाचं अविश्वऽमिन्वां ॥ १० ॥ १५ ॥ द्वादशऽअरं नहि तत् जराय वर्वर्ति चक्रं परि द्यां ऋतस्य आ पुत्राः अग्ने मिथुनासः अत्र सप्त शतानि विंशतिः च तस्थुः ॥ ११ ॥ पंचऽपादं पितरं द्वादशऽआकृतिं दिवः आहुः परे अर्धे पुरीषिणं अथ इमे अन्ये उपरे विऽचक्षणं सप्तऽचक्रे षट्ऽअरे आहुः अर्पितं ॥ १२ ॥ पंचऽअरे चक्रे परिऽवर्तमाने तस्मिन् आ तस्थुः भुवनानि विश्वा तस्य न अक्षः तप्यते भूरिऽभारः सनात् एव न शीर्यते सऽनाभिः ॥ १३ ॥ सऽनेमि चक्रं अजरं वि ववृते उत्तानायां दश युक्ताः वहंति सूर्यस्य चक्षुः रजसा एति आ-ऽवृतं तस्मिन् आर्पिता भुवनानि विश्वा ॥ १४ ॥ साकंऽजानां सप्तथं आहुः एकऽजं षट् इत् यमाः ऋषयः देवऽजाः इति तेषां इष्टानि विऽहितानि धामऽशः स्थाचे रेजंते विऽकृतानि रूपऽशः ॥ १५ ॥ १६ ॥ स्त्रियः सतीः तान् ऊं मे पुंसः आहुः पश्यत् अक्षण्ऽवान् न वि चेतत् अंधः कविः यः पुचः सः ईं आ चिकेत यः ता विऽजानात् सः पितुः पिता असत् ॥ १६ ॥ अवः परेण परः एना अवरेण पदा वत्सं बिभ्रती गौः उत् अस्थात् सा कद्रीचीं कं स्वित् अर्धं परा अगात् क्व स्वित् सूते नहि यूथे अंतः ॥ १७ ॥ अवः परेण पितरं यः अस्य अनुऽवेद परः एना अवरेण कविऽयमानः कः इह प्र वोचत् देवं मनः कुतः अधि प्रऽजातं ॥ १८ ॥ ये अर्वाचः तान् ऊं पराचः आहुः ये पराचः तान् ऊं अर्वाचः आहुः इंद्रः च या चक्रथुः सोम तानि धुरा न युक्ताः रजसः

वहंति ॥१९॥ द्वा सुऽपर्णा सऽयुजा सखाया समानं वृक्षं परि सस्वजाते तयोः अन्यः पिप्पलं स्वादु अत्ति अनश्नन् अन्यः अभि चाकशीति ॥ २० ॥ १७ ॥ यच्चं सुऽपर्णाः अमृतस्य भागं अनिऽमेषं विदथा अभिऽस्वरंति इनः विश्वस्य भुवनस्य गोपाः सः मा धीरः पाकं अच्चं आ विवेश ॥२१॥ यस्मिन् वृक्षे मधुऽअदः सुऽपर्णाः निऽविशंते सुवंते च अधि विश्वे तस्य इत् आहुः पिप्पलं स्वादु अग्रे तत् न उत् नशत् यः पितरं न वेद ॥२२॥ यत् गायत्रे अधि गायत्रं आऽहितं त्रैस्तुभात् वा त्रैस्तुभं निःऽअतक्षत यत् वा जगत् जगति आऽहितं पदं ये इत् तत् विदुः ते अमृतऽत्वं आनशुः ॥२३॥ गायत्रेण प्रति मिमीते अर्कं अर्केण सामं त्रैस्तुभेन वाकं वाकेन वाकं द्विऽपदा चतुःऽपदा अक्षरेण मिमते सप्त वाणीः ॥२४॥ जगता सिंधुं दिवि अस्तभायत् रथंऽतरे सूर्यं परि अपश्यत् गायत्रस्य संऽइधः तिस्रः आहुः ततः महा प्र रिरिचे महिऽत्वा ॥ २५ ॥ १८ ॥ उप ह्वये सुऽदुघां धेनुं एतां सुऽहस्तः गोऽधुक् उत दोहत् एनां श्रेष्ठं सवं सविता साविषत् नः अभिऽइंद्रः घर्मः तत् ऊं सु प्र वोचं ॥२६॥ हिङ्ऽकृण्वती वसुऽपत्नीं वसूनां वत्सं इच्छंतीं मनसा अभि आ अगात् दुहां अश्विऽभ्यां पयः अघ्या इयं सा वर्धतां महते सौभगाय ॥ २७ ॥ गौः अमीमेत् अनु वत्सं मिषंतं मूर्धानं हिङ् अकृणोत् मातवे ऊं सृक्काणं घर्मं अभि वावशाना मिमाति मायुं पयते पयःऽभिः ॥ २८ ॥ अयं सः शिंक्ते येन गौः अभिऽवृता मिमाति मायुं ध्वसनौ अधि श्रिता सा चित्तिऽभिः नि हि चकार मर्त्यं विऽद्युत् भवंती प्रति वव्रिं औहत ॥२९॥ अनत् शये तुरऽगातु जीवं एजत् ध्रुवं मध्ये आ पस्त्यानां जीवः मृ-

तस्य चरति स्वधाभिः अमर्त्यः मर्त्येन सऽयोनिः ॥ ३० ॥ १९ ॥ अपश्यं गोपां अनिऽपद्यमानं आ च परा च पथिऽभिः चरंतं सः सध्रीचीः सः विषूचीः वसानः आ वरीवर्ति भुवनेषु अंतः ॥३१॥ यः ईं चकार न सः अस्य वेद यः ईं ददर्श हिरुक् इत् नु तस्मात् सः मातुः योना परिऽवीतः अंतः बहुऽप्रजाः निःऽऋतिं आ विवेश ॥३२॥ द्यौः मे पिता जनिता नाभिः अत्र बंधुः मे माता पृथिवी मही इयं उत्तानयोः चम्वोः योनिः अंतः अत्र पिता दुहितुः गर्भं आ अधात ॥३३॥ पृच्छामि त्वा परं अंतं पृथिव्याः पृच्छामि यत्र भुवनस्य नाभिः पृच्छामि त्वा वृष्णः अश्वस्य रेतः पृच्छामि वाचः परमं विऽओम ॥ ३४ ॥ इयं वेदिः परः अंतः पृथिव्याः अयं यज्ञः भुवनस्य नाभिः अयं सोमः वृष्णः अश्वस्य रेतः ब्रह्मा अयं वाचः परमं विऽओम ॥३५॥२०॥ सप्त अर्धऽगर्भाः भुवनस्य रेतः विष्णोः तिष्ठंति प्रऽदिशा विऽधर्मणि ते धीतिऽभिः मनसा ते विपःऽचितः परिऽभुवः परि भवंति विश्वतः ॥ ३६ ॥ न वि जानामि यत् ऽइव इदं अस्मि निण्यः संऽनद्धः मनसा चरामि यदा मा आ अगन् प्रथमऽजाः ऋतस्य आत् इत् वाचः अश्नुवे भागं अस्याः ॥ ३७ ॥ अपांङ् प्राङ् एति स्वधया गृभीतः अमर्त्यः मर्त्येन सऽयोनिः ता शश्वंता विषूचीना विऽयंता नि अन्यं चिक्युः न नि चिक्युः अन्यं ॥३८॥ ऋचः अक्षरे परमे विऽओमन् यस्मिन् देवाः अधि विश्वे निऽसेदुः यः तत् न वेद किं ऋचा करिष्यति ये इत् तत् विदुः ते इमे सं आसते ॥३९॥ सुयवसऽअत् भगऽवती हि भूयाः अथो वयं भगऽवंतः स्याम अद्धि तृणं अघ्ये विश्वऽदानीं पिब शुद्धं उदकं आऽचरंती ॥४०॥२१॥ गौरीः मिमाय सलिलानि तक्षती एकऽपदी द्विऽपदी सा चतुःऽपदी

अष्टाऽपदी नवऽपदी बभूवुषी सहस्राऽक्षरा परमे विऽओमन् ॥४१॥ तस्याः समुद्राः अधि वि क्षरंति तेन जीवंति प्रऽदिशः चतस्रः ततः क्षरति अक्षरं तत् विश्वं उप जीवति ॥४२॥ शकऽमयं धूमं आरात् अपश्यं विषुऽवता परः एना अवरेण उक्षाणं पृश्निं अपचंत वीराः तानि धर्माणि प्रथमानि आसन् ॥४३॥ चयः केशिनः ऋतुऽथा वि चक्षते संवत्सरे वपते एकः एषां विश्वं एकः अभि चष्टे शचीभिः ध्राजिः एकस्य ददृशे न रूपं ॥ ४४ ॥ चत्वारि वाक् परिऽमिता पदानि तानि विदुः ब्राह्मणाः ये मनीषिणः गुहा चीणि निऽहिता न इंगयंति तुरीयं वाचः मनुष्याः वदंति ॥४५॥ इंद्रं मित्रं वरुणं अग्निं आहुः अथो दिव्यः सः सुऽपर्णः गरुत्मान् एकं सत् विप्राः बहुधा वदंति अग्निं यमं मातरिश्वानं आहुः॥४६॥२२॥ कृष्णं निऽयानं हरयः सुऽपर्णाः अपः वसानाः दिवं उत् पतंति ते आ अववृत्रन् सदनात् ऋतस्य आत् इत् घृतेन पृथिवी वि उद्यते ॥४७॥ द्वादश प्रऽधयः चक्रं एकं चीणि नभ्यानि कः ऊं तत् चिकेत तस्मिन् साकं चिऽशताः न शंकवः अर्पिताः षष्टिः न चलाचलासः ॥ ४८ ॥ यः ते स्तनः शशयः यः मयःऽभूः येन विश्वा पुष्यसि वार्याणि यः रत्नऽधाः वसुऽवित् यः सुऽदत्रः सरस्वति तं इह धातवे कः॰ ॥४९॥ यज्ञेन यज्ञं अयजंत देवाः तानि धर्माणि प्रथमानि आसन् ते ह नाकं महिमानः सचंत यत्र पूर्वे साध्याः संति देवाः ॥ ५० ॥ समानं एतत् उदकं उत् च एति अव च अहऽभिः भूमिं पर्जन्याः जिन्वंति दिवं जिन्वंति अग्नयः॥५१॥ दिव्यं सुऽपर्णं वायसं बृहंतं अपां गर्भं दर्शतं ओषधीनां अभीपतः वृष्टिऽभिः तर्पयंतं सरस्वंतं अवसे जोहवीमि ॥५२॥२३॥२२॥

॥ १६५ ॥ कया शुभा सऽवयसः सऽनीलाः समान्या मरुतः सं मिमिक्षुः कया मती कुतः आऽइतासः एते अर्चन्ति शुष्मं वृषणः वसुऽया ॥ १॥ कस्य ब्रह्माणि जुजुषुः युवानः कः अध्वरे मरुतः आ ववर्तति श्येनानऽइव ध्रजतः अन्तरिक्षे केन महा मनसा रीरमाम ॥ २॥ कुतः त्वं इन्द्र माहिनः सन् एकः यासि सत्ऽपते किं ते इत्था सं पृच्छसे समऽराणः शुभानैः वोचेः तत् नः हरिऽवः यत् ते अस्मे ॥ ३॥ ब्रह्माणि मे मतयः शं सुतासः शुष्मः इयर्ति प्रऽभृतः मे अद्रिः आ शासते प्रति हर्यति उक्था इमा हरी वहतः ता नः अच्छ ॥ ४॥ अतः वयं अन्तमेभिः युजानाः स्वऽक्षेचेभिः तन्वः शुम्भमानाः महःऽभिः एतान् उप युज्महे नु इन्द्र स्वधां अनु हि नः बभूथ ॥५॥२४॥ क्व स्या वः मरुतः स्वधा आसीत् यत् मां एकं समऽअधत्त अहिऽहत्ये अहं हि उग्रः तविषः तुविष्मान् विश्वस्य शचोः अनमं वधऽस्नैः ॥ ६॥ भूरि चकर्थ युज्येभिः अस्मे समानेभिः वृषभ पौंस्येभिः भूरीणि हि कृणवाम शविष्ठ इन्द्र ऋत्वा मरुतः यत् वशाम ॥ ७॥ वधीं वृत्रं मरुतः इन्द्रियेण स्वेन भामेन तविषः बभूवान् अहं एताः मनवे विश्वऽचन्द्राः सुऽगाः अपः चकार वज्रऽबाहुः ॥ ८॥ अनुत्तं आ ते मघऽवन् नकिः नु न त्वाऽवान् अस्ति देवता विदानः न जायमानः नशते न जातः यानि करिष्या कृणुहि प्रऽवृद्ध ॥ ९॥ एकस्य चित् मे विऽभु अस्तु ओजः या नु दधृष्वान् कृणवै मनीषा अहं हि उग्रः मरुतः विदानः यानि च्यवे इन्द्रः इत् ईशे एषां ॥१०॥२५॥ अमंदत् मा मरुतः स्तोमः अत्र यत् मे नरः श्रुत्यं ब्रह्म चक्र इन्द्राय वृष्णे सुऽमखाय महां सख्ये सखायः तन्वे तनूभिः ॥११॥ एव इत् एते प्रति मा रोचमानाः अनेद्यः श्रवः आ इषः

दधानाः सं ऽचक्ष्य मरुतः चंद्र ऽवर्णाः अच्छांत मे छदयांथ च नूनं ॥१२॥ कः नु अर्च मरुतः ममहे वः प्र यातन सखीन् अच्छ सखायः मन्मानि चिचाः अपि ऽवातयंतः एषां भूत नवेदाः मे ऋतानां ॥१३॥ आ यत् दुवस्यात् दुवसे न कारुः अस्मान् चक्रे मान्यस्य मेधा ओ' सु वर्त मरुतः विप्रं अच्छ इमा ब्रह्माणि जरिता वः अर्चत् ॥१४॥ एषः वः स्तोमः मरुतः इयं गीः मांदार्यस्य मान्यस्य कारोः आ इषा यासीष्ट तन्वे वयां विद्याम इषं वृजनं जीर ऽदानुं ॥१५॥२६॥३॥

॥ १६६ ॥ तत् नु वोचाम रभसाय जन्मने पूर्वं महि ऽत्वं वृषभस्य केतवे एधाऽइव यामन् मरुतः तुवि ऽस्वनः युधाऽइव शुक्राः तविषाणि कर्तन ॥१॥ नित्यं न सूनुं मधु बिभ्रतः उप क्रीळंति क्रीळाः विदथेषु घृष्वयः नक्षंति रुद्राः अवसा नमस्विनं न मर्धंति स्व ऽतवसः हविः ऽकृतं ॥२॥ यस्मै ऊमासः अमृताः अरासत रायः पोषं च हविषा ददाशुषे उक्षंति अस्मे मरुतः हिताः ऽइव पुरु रजांसि पयसा मयः ऽभुवः ॥३॥ आ ये रजांसि तविषीभिः अव्यत प्र वः एवासः स्व ऽयंतासः अध्रजन् भयंते विश्वा भुवनानि हर्म्या चिचः वः यामः प्र ऽयंतासु कृष्टिषु ॥४॥ यत् त्वेष ऽयामाः नदयंत पर्वतान् दिवः वा पृष्ठं नयीः अचुच्यवुः विश्वः वः अज्मन् भयते वनस्पतिः रथियंतीं ऽइव प्र जिहीते ओषधिः ॥५॥७॥ यूयं नः उग्राः मरुतः सु ऽचेतुना अरिष्ट ऽयामाः सु ऽमतिं पिपर्तन यच्च वः दिद्युत् रदति त्रिविः ऽदती रिणाति पश्वः सुधिता ऽइव बर्हणा ॥६॥ प्र स्कंभ ऽदेष्णाः अनवभ ऽराधसः अलातृणासः विदथेषु सु ऽस्रुताः अर्चंति अर्कं

मदिरस्य पीतये विदुः वीरस्य प्रथमानि पौंस्या ॥ ७ ॥ शतभुजिऽभिः तं अभिऽहुतेः अघात् पूःऽभिः रक्षत मरुतः यं आवत जनं यं उग्राः तवसः विऽरप्शिनः पाथन शंसात् तनयस्य पुष्टिषु ॥ ८ ॥ विश्वानि भद्रा मरुतः रथेषु वः मिथस्पृध्याऽइव तविषाणि आऽहिता अंसेषु आ वः प्रऽपथेषु खादयः अक्षः वः चक्रा समया वि ववृते ॥ ९ ॥ भूरीणि भद्रा नर्येषु बाहुषु वक्षःऽसु रुक्माः रभसासः अंजयः अंसेषु एताः पविषु क्षुराः अधि वयः न पक्षान् वि अनु श्रियः धिरे ॥ १० ॥ २ ॥ महांतः महा विऽभ्वः विऽभूतयः दूरेऽदृशः ये दिव्याःऽइव स्तृऽभिः मंद्राः सुऽजिह्वाः स्वरिंतारः आसऽभिः संऽमिक्षाः इंद्रे मरुतः परिऽस्तुभः ॥ ११ ॥ तत् वः सुऽजाताः मरुतः महिऽत्वनं दीर्घं वः दाचं अदितेःऽइव व्रतं इंद्रः चन त्यजसा वि हुणाति तत् जनाय यस्मै सुऽकृते अरांध्वं ॥ १२ ॥ तत् वः जामिऽत्वं मरुतः परे युगे पुरु यत् शंसं अमृतासः आवत अया धिया मनवे श्रुष्टिं आप्यं साकं नरः दंसनैः आ चिकिचिरे ॥ १३ ॥ येन दीर्घं मरुतः शूशवाम युष्माकेन परीणसा तुरासः आ यत् ततनन् वृजने जनासः एभिः यज्ञेभिः तत् अभि इष्टिं अश्याम ॥ १४ ॥ एषः वः स्तोमः मरुतः इयं गीः मांदार्यस्य मान्यस्य कारोः आ इषा यासीष्ट तन्वे वयां विद्याम इषं वृजनं जीरऽदानुं ॥ १५ ॥ ३ ॥

॥ १६७ ॥ सहस्रं ते इंद्र ऊतयः नः सहस्रं इषः हरिऽवः गूर्तऽतमाः सहस्रं रायः मादयध्यै सहस्रिणः उप नः यंतु वाजाः ॥ १ ॥ आ नः अवःऽभिः मरुतः यांतु अच्छ ज्येष्ठेभिः वा बृहतऽदिवेः सुऽमायाः अध यत् एषां निऽयुतः परमाः समुद्रस्य चित् धनयंत

पारे ॥ २ ॥ मिम्यक्ष येषु सुऽधिता घृताची हिरण्यऽनिर्निक् उपरा न क्षरिः गुहा चरंती मनुषः न योषा सभाऽवती विदथ्याऽइव सं वाक् ॥३॥ परा शुभ्राः अयासः यव्या साधारण्याऽइव मरुतः मिमिक्षुः न रोदसी अप नुदंत घोराः जुषंत वृधं सख्याय देवाः ॥४॥ जोषत् यत् ई असुर्या सचध्यै विसितऽस्तुका रोदसी नृऽमनाः आ सूर्याऽइव विधतः रथं गात् त्वेषऽप्रतीका नभसः न इत्या ॥ ५ ॥ ४ ॥ आ अस्थापयंत युवतिं युवानः शुभे निऽमिश्लां विदथेषु पज्रां अर्कैः यत् वः मरुतः हविष्मान् गायत् गाथं सुतऽसोमः दुवस्यन् ॥ ६ ॥ प्र तं विवक्मि वक्म्यः यः एषां मरुतां महिमा सत्यः अस्ति सचा यत् ई वृषऽमनाः अहंऽयुः स्थिरा चित् जनीः वहंते सुऽभागाः ॥ ७ ॥ पांति मित्रावरुणौ अवद्यात् चयते ईं अर्यमो अप्रऽशस्तान् उत च्यवंते अच्युता ध्रुवाणि ववृधे ईं मरुतः दातिऽवारः ॥ ८ ॥ नहि नु वः मरुतः अंति अस्मे आरात्तात् चित् शवसः अंतं आपुः ते धृष्णुना शवसा शूशुऽवांसः अरीः न द्वेषः धृषता परि स्युः ॥ ९ ॥ वयं अद्य इंद्रस्य प्रेष्ठाः वयं श्वः वोचेमहि सऽमर्ये वयं पुरा महि च नः अनु द्यून् तत् नः ऋभुक्षाः नरां अनु स्यात् ॥ १० ॥ एषः वः स्तोमः मरुतः इयं गीः मांदार्यस्य मान्यस्य कारोः आ इषा यासीष्ट तन्वे वयां विद्याम इषं वृजनं जीरऽदानुं ॥ ११ ॥ ५ ॥

॥ १६८ ॥ यज्ञाऽयज्ञा वः समना तुतुर्वणिः धियंऽधियं वः देवऽयाः ऊं दधिध्वे आ वः अर्वाचः सुविताय रोदस्योः महे ववृत्यां अवसे सुवृक्तिऽभिः ॥ १ ॥ वव्रासः न ये स्वऽजाः स्वऽतवसः इषं स्वः अभिऽजायंत धूतयः सहस्रियासः अपां न ऊर्मयः आसा

गावः वंद्यासः न उक्षणः॥२॥ सोमासः न ये सुताः तृप्तऽअंशवः हृतऽसु पीतासः दुवसः न आसते आ एषां अंसेषु रंभिणीऽइव रभे हस्तेषु खादिः च कृतिः च सं दधे ॥३॥ अव स्वऽयुक्ताः दिवः आ वृथा ययुः अमर्त्याः कशया चोदत त्मना अरेणवः तुविऽजाताः अचुच्यवुः दृळ्हानि चित् मरुतः भ्राजतऽऋष्टयः ॥४॥ कः वः अंतः मरुतः ऋष्टिऽविद्युतः रेजति त्मना हन्वाऽइव जिह्वया धन्वऽच्युतः इषां न यामनि पुरुऽप्रैषाः अहन्यः न एतनशः॥५॥६॥ क्व स्वित् अस्य रजसः महः परं क्व अवरं मरुतः यस्मिन् आऽयय यत् च्यवयथ विथुराऽइव संऽहितं वि ऋद्रिणा पतथ त्वेषं अर्णवं॥६॥ सातिः न वः अमऽवती स्वःऽवती त्वेषा विऽपाका मरुतः पिपिष्वती भद्रा वः रातिः पृणतः न दक्षिणा पृथुऽज्रयी असुर्याऽइव जंजती ॥७॥ प्रति स्तोभंति सिंधवः पविऽभ्यः यत् अभियां वाचं उतऽईरयंति अव समयंत विऽद्युतः पृथिव्यां यदि घृतं मरुतः प्रुष्णुवंति॥८॥ असूत पृश्निः महते रणाय त्वेषं अयासां मरुतां अनीकं ते सप्सरासः अजनयंत अभ्वं आत् इत् स्वधां इषिरां परि अपश्यन्॥९॥ एषः वः स्तोमः मरुतः इयं गीः मांदार्यस्य मान्यस्य कारोः आ इषा यासीष्ट तन्वे वयां विद्याम इषं वृजनं जीरऽदानुं ॥१०॥७॥

॥ १६९ ॥ महः चित् त्वं इंद्र यतः एतान् महः चित् असि त्यजसः वरूता सः नः वेधः मरुतां चिकित्वान् सुम्ना वनुष्व तव हि प्रेष्ठा॥१॥ अयुजन् ते इंद्र विश्वऽकृष्टीः विदानासः निःऽसिधः मर्त्यऽचा मरुतां पृत्सुतिः हासमाना स्वःऽमीळ्हस्य प्रऽधनस्य सातौ ॥ २ ॥ अभ्यक् सा ते इंद्र ऋष्टिः अस्मे सनेमि अभ्वं

मरुतः जुनंति अभिः चित् हि स्म अतसे सुभुक्वान् आपः न द्वीपं दधति प्रयांसि ॥३॥ त्वं तु नः इंद्र तं रयिं दाः ओजिष्ठया दक्षिणयाऽइव रातिं स्तुतः च याः ते चकनंत वायोः स्तनं न मध्वः पीपयंत वाजैः ॥४॥ त्वे रायः इंद्र तोशऽतमाः प्रऽनेतारः कस्य चित् ऋतऽयोः ते सु नः मरुतः मृळयंतु ये स्म पुरा गातुयंतिऽइव देवाः ॥५॥८॥ प्रति प्र याहि इंद्र मीळ्हुषः नॄन् महः पार्थिवे सदने यतस्व अध यत् एषां पृथुऽबुध्नासः एताः तीर्थे न अर्यः पौंस्यानि तस्थुः ॥६॥ प्रति घोराणां एतानां अयासां मरुतां शृण्वे अाऽयतां उपब्दिः ये मर्त्यं पृतनाऽयंतं ऊमैः ऋणऽवानं न पतयंत सर्गैः ॥७॥ त्वं मानेभ्यः इंद्र विश्वऽजन्या रदं मरुतऽभिः शुरुधः गोऽअर्णसाः स्तवानेभिः स्तवसे देव देवैः विद्याम इषं वृजनं जीरऽदानुं ॥८॥९॥

॥१७०॥ न नूनं अस्ति नो श्वः कः तत् वेद यत् अद्भुतं अन्यस्य चित्तं अभि संऽचरेण्यं उत आऽधीतं वि नश्यति ॥१॥ किं नः इंद्र जिघांससि भ्रातरः मरुतः तव तेभिः कल्पस्व साधुऽया मा नः संऽअरणे वधीः ॥२॥ किं नः भ्रातः अगस्त्य सखा सन् अति मन्यसे विद्म हि ते यथा मनः अस्मभ्यं इत् न दित्ससि ॥३॥ अरं कृण्वंतु वेदिं सं अग्निं इंधतां पुरः तत्र अमृतस्य चेतनं यज्ञं ते तनवावहै ॥४॥ त्वं ईशिषे वसुऽपते वसूनां त्वं मित्राणां मित्रऽपते धेष्ठः इंद्र त्वं मरुतऽभिः सं वदस्व अध प्र अशान ऋतुऽया हवींषि ॥५॥१०॥

॥१७१॥ प्रति वः एना नमसा अहं एमि सुऽउक्तेन भिक्षे सु-

ऽमतिं तुराणाँ रराणता मरुतः वेद्याभिः नि हेळः धत्त वि मुचध्वं अश्वान् ॥१॥ एषः वः स्तोमः मरुतः नमस्वान् हृदा तष्टः मनसा धायि देवाः उप ईं आ यात मनसा जुषाणाः यूयं हि स्थ नमसः इत् वृधासः ॥२॥ स्तुतासः नः मरुतः मृळयंतु उत स्तुतः मघऽवा शंऽभविष्ठः ऊर्ध्वा नः संतु कोम्या वनानि अहानि विश्वा मरुतः जिगीषा ॥३॥ अस्मात् अहं तविषात् ईषमाणः इंद्रात् भिया मरुतः रेजमानः युष्मभ्यं हव्या निऽशितानि आसन् तानि आरे चकृम मृळत नः ॥४॥ येन मानासः चितयंते उक्षाः विऽउष्टिषु शवसा शश्वतीनां सः नः मरुतऽभिः वृषभ श्रवः धाः उग्रः उग्रेभिः स्थविरः सहःऽदाः ॥५॥ त्वं पाहि इंद्र सहीयसः नॄन् भव मरुतऽभिः अवयातऽहेळाः सुऽप्रकेतेभिः सससहिः दधानः विद्याम इषं वृजनं जीरऽदानुं ॥६॥११॥

॥१७२॥ चित्रः वः अस्तु यामः चित्रः ऊती सुऽदानवः मरुतः अहिंऽभानवः ॥१॥ आरे सा वः सुऽदानवः मरुतः ऋंजती शरुः आरे अश्मा यं अस्यथ ॥२॥ तृणऽस्कंदस्य नु विशः परि वृंक्त सुऽदानवः ऊर्ध्वान् नः कर्त जीवसे ॥३॥१२॥

॥१७३॥ गायत साम नभन्यं यथा वेः अर्चाम तत् ववृधानं स्वःऽवत् गावः धेनवः बर्हिषि अदब्धाः आ यत् सद्मानं दिव्यं विवासान् ॥१॥ अचैत् वृषा वृषऽभिः स्वऽइदुहव्यैः मृगः न अश्नः अति यत् जुगुर्यात् प्र मंदयुः मनां गूर्त होता भरते मयैः मिथुना यजंचः ॥२॥ नक्षत होता परि सद्म मिता यन् भरत् गर्भं आ शरदः पृथिव्याः क्रंदत् अश्वः नयमानः रुवत् गौः शंतः दूतः न

रोदसी॑ चरत् वाक् ॥३॥ ता कर्म॑ अषऽतरा अस्मै॑ प्र च्यौत्नाय॑ दे॒वऽयंतः भरंते जुजोषत् इंद्रः॑ द॒स्मऽवर्चाः नासत्याऽइव सुहस्त्यः॑ रथेऽस्थाः ॥४॥ तं ऊं॑ स्तुहि इंद्रं॑ यः ह॒ सत्वा॑ यः पूरः॑ मघऽवा॑ यः रथेऽस्थाः प्रतीचः॑ चित् योधीयान् वृषण्ऽवान् ववव्रुषः॑ चित् तमसः॑ विऽहंता ॥५॥१३॥ प्र यत् इ॒त्था म॒हि॒ना नृऽभ्यः॑ अस्ति॑ अरं॑ रोदसी॑ कक्ष्ये॑ न अस्मै॑ सं विव्ये॑ इंद्रः॑ वृजनं॑ न भूम॑ भंति॑ स्वधाऽवान् ओपशंऽइव द्यां ॥६॥ समतऽसुत्वा॑ शूरसतां॑ उराणं॑ प्रपथिनऽतमं॑ परिऽतंसयध्यै॑ सऽजोषसः इंद्रं॑ मदे॑ क्षो॒णीः सूरिं॑ चित् ये अनुऽमदंति वाजैः॑ ॥७॥ एव हि ते॑ शं सवना॑ समुद्रे॑ आपः॑ यत् ते॑ आसु॑ मदंति॑ देवीः॑ विश्वा॑ ते॑ अनु॑ जोष्या॑ भूत् गौः॑ सूरीन् चित् यदि॑ धिषा॑ वेषि॑ जनान् ॥८॥ असा॑म यथा॑ सुऽसखायः॑ एन॑ सुऽअभिष्टयः॑ नरां॑ न शंसैः॑ असत् यथा॑ नः॑ इंद्रः॑ वंदनेऽस्थाः॑ तुरः॑ न कर्मे॑ नयमानः॑ उक्था ॥९॥ विऽस्पर्धसः॑ नरां॑ न शंसैः॑ अस्माक॑ असत् इंद्रः॑ वज्रऽहस्तः॑ मिचऽयुवः॑ न पूःऽपतिं॑ सुऽशिष्टी॑ मध्यऽयुवः॑ उप॑ शिक्षंति॑ यज्ञैः॑ ॥१०॥१४॥ यज्ञः॑ हि स्म॑ इंद्रं॑ कः चित् ऋंधन् जुहुराणः॑ चित् मनसा॑ परिऽयन् तीर्थे॑ न अच्छ॑ ततृषाणं॑ ओकः॑ दीर्घः॑ न सिध्रं॑ आ कृणोति॑ अध्वा ॥११॥ मो॑ सु नः॑ इंद्र॑ अच॑ पृतऽसु॑ देवैः॑ अस्ति॑ हि स्म॑ ते॑ शुष्मिन् अवऽयाः॑ महः॑ चित् यस्य॑ मीळ्हुषः॑ यव्या॑ हविष्मतः॑ मरुतः॑ वंदते॑ गीः॑ ॥१२॥ एषः॑ स्तोमः॑ इंद्र॑ तुभ्यं॑ अस्मे॑ एतेन॑ गातुं॑ हरिऽवः॑ विदः॑ नः॑ आ नः॑ ववृत्याः॑ सुवितायं॑ देव॑ विद्याम॑ इषं॑ वृजनं॑ जीरऽदानुं॑ ॥१३॥१५॥

॥१७४॥ त्वं राजा॑ इंद्र॑ ये च॑ देवाः॑ रक्षा॑ नृन् पा॑हि॑ असुर॑ त्वं अस्मान् त्वं सतऽपतिः॑ मघऽवा॑ नः॑ तरुत्रः॑ त्वं सत्यः॑ वसवानः॑ सहः॑-

ऽदाः ॥१॥ दनः विशः इंद्र मृध्रऽवाचः सप्त यत् पुरः शर्म शारदीः दर्त् ऋणोः अपः अनवद्य अर्णीः यूने वृचं पुरुऽकुत्साय रंधीः ॥२॥ अजं वृतः इंद्र शूरऽपत्नीः द्यां च येभिः पुरुऽहूत नूनं रक्षो॑ अग्निं अप्सुषं तूर्वयाणं सिंहः न दमे अपांसि वस्तोः ॥३॥ शेषन् नु ते इंद्र सस्मिन् योनौ प्रऽशस्तये पवीरवस्य महा सृजत् अर्णः-सि अव यत् युधा गाः तिष्ठत् हरी॑ धृषता मृष्ट वाजान् ॥४॥ वहं कुत्सं इंद्र यस्मिन् चाकन् स्यूमन्यू॑ ऋजा वातस्य अश्वा प्र सूरः चक्रं वृहतात् अभीके अभि स्पृधः यासिषत् वज्रऽबाहुः ॥५॥१६॥ जघन्वान् इंद्र मिचेरून् चोदऽप्रवृद्धः हरिऽवः अदा-भून् प्र ये पश्यन् अर्यमणं सचा आयोः त्वया मूर्ताः वहमा-नाः अपत्यं ॥६॥ रपत् कविः इंद्र अर्कऽसातौ क्षां दासाय उप-ऽबर्हणीं कः॑ करत् तिस्रः मघऽवा दानुऽचिचाः नि दुर्योणे कु-यंवाचं मृधि श्रेत् ॥७॥ सना ता ते इंद्र नव्याः आ अगुः सहः नभः अविऽरणाय पूर्वीः भिनत् पुरः न भिदः अदेवीः ननमः वधः अदेवस्य पीयोः ॥८॥ त्वं धुनिः इंद्र धुनिऽमतीः ऋणोः अपः सीराः न स्रवंतीः प्र यत् समुद्रं अति शूर पर्षि पारया तु-र्वशं यदुं स्वस्ति ॥९॥ त्वं अस्माकं इंद्र विश्वधा स्याः अवृकऽतमः नरां नृऽपाता सः नः विश्वासां स्पृधां सहःऽदाः विद्यामं इषं वृजनं जीरऽदानुं ॥१०॥१७॥

॥१७५॥ मत्सि अपांयि ते महः पात्रस्यऽइव हरिऽवः मत्सरः मदः वृषा ते वृष्णे इंदुः वाजी सहस्रऽसातमः ॥१॥ आ नः ते गंतु मत्सरः वृषा मदः वरेण्यः सहऽवान् इंद्र सानसिः पृतना-षाट् अमर्त्यः ॥२॥ त्वं हि शूरः सनिता चोदयः मनुषः रयिं सह-

ऽवान् दस्युं अव्रतं ओषः पात्रं न शोचिषा ॥३॥ मुषाय सूर्यं कवे चक्रं ईशानः ओजसा वह शुष्णाय वधं कुत्सं वातस्य अश्वैः ॥४॥ शुष्मिन्ऽतमः हि ते मदः द्युम्निन्ऽतमः उत क्रतुः वृचऽघा वरिवःऽविदां मंसीष्ठाः अश्वऽसातमः ॥५॥ यथा पूर्वेभ्यः जरितृऽभ्यः इंद्र मयःऽइव आपः न तृष्यते बभूथ तां अनु त्वा निऽविदं जोहवीमि विद्यामं इषं वृजनं जीरऽदानुं॥६॥१८॥

॥१७६॥ मत्सि नः वस्यःऽइष्टये इंद्र इंदो वृषा आ विश ऋघायमाणः इन्वसि शत्रुं अंति न विंदसि ॥१॥ तस्मिन आ वेशय गिरः यः एकः चर्षणीनां अनु स्वधा यं उप्यते यवं न चकृषत् वृषा ॥२॥ यस्य विश्वानि हस्तयोः पंच क्षितीनां वसु स्पाशयस्व यः अस्मऽध्रुक् दिव्याऽइव अशनिः जहि ॥३॥ असुन्वंतं समं जहि दुःऽनशं यः न ते मयः अस्मभ्यं अस्य वेदनं दद्धि सूरिः चित् ओहते ॥४॥ आवः यस्य द्विऽबर्हसः अर्केषु सानुषक् असत् आजौ इंद्रस्य इंदो प्र आवः वाजेषु वाजिनं ॥५॥ यथा पूर्वेभ्यः जरितृऽभ्यः इंद्र मयःऽइव आपः न तृष्यते बभूथ तां अनु त्वा निऽविदं जोहवीमि विद्यामं इषं वृजनं जीरऽदानुं॥६॥१९॥

॥१७७॥ आ चर्षणिऽप्राः वृषभः जनानां राजा कृष्टीनां पुरुऽहूतः इंद्रः स्तुतः श्रवस्यन् अवसा उप मद्रिक् युक्ता हरी वृषणा आ याहि अर्वाङ् ॥१॥ ये ते वृषणः वृषभासः इंद्र ब्रह्मऽयुजः वृषऽरथासः अत्याः तान् आ तिष्ठ तेभिः आ याहि अर्वाङ् हवामहे त्वा सुते इंद्र सोमे॥२॥ आ तिष्ठ रथं वृषणं वृषा ते सुतः सोमः परिऽसिक्ता मधूनि युक्ता वृषऽभ्यां वृषभ क्षितीनां हरि-

ऽभ्यां याहि प्रऽवतो उप मद्रिक् ॥३॥ अयं यज्ञः देवऽयाः अयं मियेधः इमा ब्रह्माणि अयं इंद्र सोमः स्तीर्णं बर्हिः आ तु शक्र प्र याहि पिब निऽसद्य वि मुच हरी इह ॥४॥ ओ सुऽस्तुतः इंद्र याहि अर्वाङ् उप ब्रह्माणि मान्यस्य कारोः विद्याम वस्तोः अवसा गृणंतः विद्याम इषं वृजनं जीरऽदानुं ॥५॥२०॥

॥१७८॥ यत् ह स्या ते इंद्र श्रुष्टिः अस्ति ययां बभूथ जरितृऽभ्यः ऊती मा नः कामं महयंतं आ धक् विश्वा ते अश्यां परि आपः आयोः ॥१॥ न घ राजा इंद्रः आ दभत् नः या नु स्वसारा कृणवंत योनौ आपः चित् अस्मे सुऽतुकाः अवेषन् गमत् नः इंद्रः सख्या वयः च ॥२॥ जेता नृऽभिः इंद्रः पृतऽसु शूरः श्रोता हवं नाधमानस्य कारोः प्रऽभर्ता रथं दाश्वुषः उपाके उतऽयंता गिरः यदि च त्मना भूत ॥३॥ एव नृऽभिः इंद्रः सुऽश्रवस्या प्रऽखादः पृक्षः अभि मिचिणः भूत सऽमर्ये इषः स्तवते विऽवाचि सचाऽकरः यजमानस्य शंसः ॥४॥ त्वया वयं मघऽवन् इंद्र शत्रून् अभि स्याम महतः मन्यमानान् त्वं चाता त्वं ऊं नः वृधे भूः विद्याम इषं वृजनं जीरऽदानुं ॥५॥२१॥

॥१७९॥ पूर्वीः अहं शरदः शश्वमाणा दोषाः वस्तोः उषसः जरयंतीः मिनाति श्रियं जरिमा तनूनां अपि ऊं नु पत्नीः वृषणः जगम्युः ॥१॥ ये चित् हि पूर्वे ऋतऽसापः आसन् साकं देवेभिः अवदन् ऋतानि ते चित् अव असुः नहि अंतं आपुः सं ऊं नु पत्नीः वृषऽभिः जगम्युः ॥२॥ न मृषा श्रांतं यत् अवंति देवाः विश्वाः इत् स्पृधः अभि अश्मऽवाव् जयाव इत् अच शत-

ऽनींथं आजिं यत् सम्यंचा मिथुनौ अभि अजांव ॥३॥ नदस्य मा रुधतः कामः आ अगन् इतः आऽजातः अमुतः कुतः चित् लोपामुद्रा वृषणं निः रिणाति धीरं अधीरा धयति श्वसंतं ॥४॥ इमं नु सोमं अंतितः हृत्ऽसु पीतं उप ब्रुवे यत् सीं आगः चकृम तत् सु मृळतु पुलुऽकामः हि मर्त्यः ॥५॥ अगस्त्यः खनमानः खनित्रैः प्रऽजां अपत्यं बलं इच्छमानः उभौ वर्णौ ऋषिः उग्रः पुपोष सत्याः देवेषु आऽशिषः जगाम ॥६॥२२॥२३॥

॥१८०॥ युवोः रजांसि सुऽयमासः अश्वाः रथः यत् वां परि अर्णांसि दीयत् हिरण्ययाः वां पवयः मधुऽवायन् मध्वः पिबंतौ उषसः सचेथे ॥१॥ युवं अत्यस्य अव नक्षथः यत् विऽपतमनः नर्यस्य प्रऽयज्योः स्वसा यत् वां विष्वऽगूर्तिः भरति वाजाय ईट्टे मधुऽपौ इषे च ॥२॥ युवं पयः उस्रियायां अधत्तं पक्वं आमायां अव पूर्व्यं गोः अंतः यत् वनिनः वां चृतऽस्पूः द्वारः न शुचिः यजते हविष्मान् ॥३॥ युवं ह घर्मं मधुऽमंतं अत्रये अपः न क्षोदः अवृणीतं एषे तत् वां नरौ अश्विना पश्वःऽइष्टिः रथ्याऽइव चक्रा प्रति यंति मध्वः ॥४॥ आ वां दानाय ववृतीय दस्रा गोः ओहेन तौग्र्यः न जिव्रिः अपः क्षोणी सचते माहिना वां जूर्णिः वां अक्षुः अंहसः यजत्रा ॥५॥२३॥ नि यत् युवेथे निऽयुतः सुऽदानू उप स्वधाभिः सृजथः पुरंधिं प्रेषत् वेषत् वातः न सूरिः आ महे ददे सुऽव्रतः न वाजं ॥६॥ वयं चित् हि वां जरितारः सत्याः विपन्यामहे वि पणिः हितऽवान् अध चित् हि स्म अश्विनौ अनिंद्या पाथः हि स्म वृषणौ अंतिऽदेवं ॥७॥ युवां चित् हि स्म अश्विनौ अनु द्यून् विऽरुद्रस्य प्रऽसवणस्य सा-

तौ अगस्त्यः नरां नृषु प्रऽशस्तः काराधुनीऽइव चितयत् सहस्रैः ॥८॥ प्र यत् वहेथे महिना रथस्य प्र स्यंद्रा याथः मनुषः न होता धत्तं सूरिऽभ्यः उत वा सुऽअश्व्यं नासत्या रयिऽसाचः स्याम ॥९॥ तं वां रथं वयं अद्य हुवेम स्तोमैः अश्विना सुविताय नव्यं अरिष्टऽनेमिं परिद्यां इयानं विद्याम इषं वृजनं जीरऽदानुं ॥१०॥२४॥

॥१८१॥ कत् ऊं प्रेष्ठौ इषां रयीणां अध्वर्यंता यत् उतऽनिनीथः अपां अयं वां यज्ञः अकृत प्रऽशस्तिं वसुऽधिती० अविंतारा जनानां ॥ १ ॥ आ वां अश्वासः शुचयः पयःऽपाः वातंऽरंहसः दिव्यासः अत्याः मनःऽजुवः वृषणः वीतऽपृष्ठाः आ इह स्वऽराजः अश्विना वहंतु ॥२॥ आ वां रथः अवनिः न प्रवत्वान् सृप्रऽवंधुरः सुविताय गम्याः वृष्णः स्यातारा मनसः जवीयान् अहंऽपूर्वः यजतः धिष्ण्या यः ॥३॥ इहऽइह जाता सं अवावशीतां अरेपसा तन्वा नामऽभिः स्वैः जिष्णुः वां अन्यः सुऽमखस्य सूरिः दिवः अन्यः सुऽभगः पुचः ऊहे ॥४॥ प्र वां निऽचेरुः ककुहः वशान् अनु पिशंगऽरूपः सदनानि गम्याः हरी अन्यस्य पीपयंत वाजैः मथ्रा रजांसि अश्विना वि घोषैः ॥५॥२५॥ प्र वां शरतऽवान् वृषभः न निष्षाट् पूर्वीः इषः चरति मध्वः इष्णन् एवैः अन्यस्य पीपयंत वाजैः वेषंतीः ऊर्ध्वाः नद्यः नः आ अगुः ॥६॥ असर्जि वां स्थविरा वेधसा गीः बाळ्हे अश्विना चेधा क्षरंती उपऽस्तुती अवतं नाधमानं यामन् अयामन् शृणुतं हवं मे ॥७॥ उत स्या वां रुशंतः वप्ससः गीः चिऽबर्हिषि सदसि पिन्वते नॄन् वृषा वां मेघः वृषणा पीपाय गोः न सेकें मनुषः दशस्यन् ॥८॥ युवां पूषाऽइव अश्विना पुरंऽधिः अग्निं उषां न जरते हविः

ष्मान् हुवे यत् वां वरिवस्या गृणानः विद्याम इषं वृजनं जीरऽदानुं ॥ ९ ॥ २६ ॥

॥ १८२ ॥ अभूत इदं वयुनं ओ सु भूषत रथः वृषण्ऽवान् मदंत मनीषिणः धियंऽजिन्वा धिष्णया विश्पलावसू दिवः नपाता सुऽकृते शुचिऽव्रता ॥ १ ॥ इंद्रऽतमा हि धिष्णया मरुतऽतमा दस्रा दंसिष्ठा रथ्या रथिऽतमा पूर्णं रथं वहेथे मध्वः आऽचितं तेन दाश्वांसं उप याथः अश्विना ॥ २ ॥ किं अंग दस्रा कृणुथः किं आसाथे जनः यः कः चित् अहविः महीयते अति क्रमिष्टं जुरतं पणेः असुं ज्योतिः विप्राय कृणुतं वचस्यवे ॥ ३ ॥ जंभयंतं अभितः रायतः शुनः हतं मृधः विदथुः तानि अश्विना वाचंऽवाचं जरितुः रत्निनीं कृतं उभा शंसं नासत्या अवतं मम ॥ ४ ॥ युवं एतं चक्रथुः सिंधुषु प्लवं आत्मन्ऽवंतं पक्षिणं तौग्र्याय कं येन देवऽचा मनसा निःऽऊहथुः सुऽपप्तनि पेतथुः क्षोदसः महः ॥ ५ ॥ २७ ॥ अवंऽविडं तौग्र्यं अप्ऽसु अंतः अनारंभणे तमसि प्रऽविद्धं चतस्रः नावः जठलस्य जुष्टाः उत अश्विऽभ्यां इषिताः पारयंति ॥ ६ ॥ कः स्वित् वृक्षः निःऽस्थितः मध्ये अर्णसः यं तौग्र्यः नाधितः परिऽअसस्वजत पर्णा मृगस्य पतरोःऽइव आऽरभे उत अश्विनौ ऊहथुः श्रोमताय कं ॥ ७ ॥ तत् वां नरा नासत्यौ अनु स्यात् यत् वां मानासः उचथं अवोचन् अस्मात् अद्य सदसः सोम्यात् आ विद्याम इषं वृजनं जीरऽदानुं ॥ ८ ॥ २८ ॥

॥ १८३ ॥ तं युंजाथां मनसः यःजवीयान् चिऽवंधुरः वृषणा यः चिऽचक्रः येन उपऽयाथः सुऽकृतः दुरोणं चिऽधातुना पतथः

विः न पर्णैः ॥१॥ सुऽवृत् रथः वर्तते यन् अभि क्षां यत् तिष्ठथः ऋतुऽमंता अनु पृक्षे वपुः वपुष्या सचतां इयं गीः दिवः दुहिचा उषसा सचेथे ॥२॥ आ तिष्ठतं सुऽवृतं यः रथः वां अनु व्रतानि वर्तते हविष्मान् येन नरा नासत्या इषयध्यै वर्तिः याथः तनयाय त्मने च ॥३॥ मा वां वृकः मा वृकीः आ दधर्षीत् मा परि वर्क्तं उत मा अति धक्तं अयं वां भागः निऽहितः इयं गीः दस्रौ इमे वां निऽधयः मधूनां ॥४॥ युवां गोतमः पुरुऽमीळ्हः अत्रिः दस्रा हवते अवसे हविष्मान् दिशं न दिष्टां ऋजुयाऽइव यंता आ मे हवं नासत्या उप यातं ॥५॥ अतारिष्म तमसः पारं अस्य प्रति वां स्तोमः अश्विनौ अधायि आ इह यातं पथिऽभिः देवऽयानैः विद्याम इषं वृजनं जीरऽदानुं ॥ ६ ॥२९॥ ४ ॥

॥१८४॥ ता वां अद्य तौ अपरं हुवेम उच्छंत्यां उषसि वह्निः उक्थैः नासत्या कुह चित् संतौ अर्यः दिवः नपाता सुदाःऽतराय ॥१॥ अस्मे ऊं सु वृषणा मादयेथां उत पणीन् हतं ऊर्म्या मदंता श्रुतं मे अच्छोक्तिऽभिः मतीनां एष्टा नरा निऽचेतारा च कर्णैः ॥२॥ श्रिये पूषन् इषुकृताऽइव देवा नासत्या वहतुं सूर्यायाः वच्यंते वां ककुहाः अप्ऽसु जाताः युगा जूर्णाऽइव वरुणस्य भूरेः ॥३॥ अस्मे सा वां माध्वी रातिः अस्तु स्तोमं हिनोतं मान्यस्य कारोः अनु यत् वां श्रवस्या सुऽदानू सुऽवीर्याय चर्षणयः मदंति ॥४॥ एषः वां स्तोमः अश्विनौ अकारि मानेभिः मघऽवाना सुऽवृक्ति यातं वर्तिः तनयाय त्मने च अगस्त्ये नासत्या मदंता ॥५॥ अतारिष्म तमसः पारं अस्य प्रति वां स्तोमः अश्विनौ अधायि आ इह यातं पथिऽभिः देवऽयानैः विद्याम इषं वृजनं जीरऽदानुं ॥ ६ ॥१॥

॥१८५॥ कतरा पूर्वा कतरा अपरायोः कथा जाते कवयः कः वि वेद् विश्वं त्मना बिभृतः यत् ह नाम वि वर्तेते अहनी चक्रियाऽइव ॥१॥ भूरिं द्वे अचरंती चरंतं पतऽवंतं गर्भं अपदीं दधाते नित्यं न सूनुं पित्रोः उपऽस्थे द्यावा रक्षतं पृथिवी नःअभ्वात्॥२॥ अनेहः दात्रं अदितेः अनर्वं हुवे स्वःऽवत् अवधं नमस्वत् तत् रोदसी जनयतं जरित्रे द्यावा रक्षतं पृथिवी नः अभ्वात् ॥३॥ अतण्यमाने अवसा अवंती अनु स्याम रोदसी देवऽपुत्रे० उभे देवानां उभयेभिः अह्नां द्यावा रक्षतं पृथिवी नःअभ्वात्॥४॥ संऽगच्छमाने० युवती संऽअंते० स्वसारा जामी पित्रोः उपऽस्थे अभिऽजिघ्रंती० भुवनस्य नाभिं द्यावा रक्षतं पृथिवी नःअभ्वात्॥५॥२॥ उर्वी सद्मनी बृहती ऋतेन हुवे देवानां अवसा जनित्री दधाते ये अमृतं सुऽप्रतीके० द्यावा रक्षतं पृथिवी नः अभ्वात्॥६॥ उर्वी पृथ्वी बहुले दूरेऽअंते० उपब्रुवे नमसा यज्ञे अस्मिन् दधाते ये सुऽभगे० सुऽप्रतूर्ती० द्यावा रक्षतं पृथिवी नः अभ्वात् ॥७॥ देवान् वा यत् चकृम कत् चित् आगः सखायं वा सदं इत् जाःऽपतिं वा इयं धीः भूयाः अवऽयानं एषां द्यावा रक्षतं पृथिवी नः अभ्वात् ॥८॥ उभा शंसा नर्या मां अविष्टां उभे मां ऊती अवसा सचेतां भूरि चित् अर्यः सुदाःऽतराय इषा मदंतः इषयेम देवाः ॥९॥ ऋतं दिवे तत् अवोचं पृथिव्यै अभिऽश्रावाय प्रथमं सुऽमेधाः पातां अवद्यात् दुःऽइतात् अभीके पिता माता च रक्षतां अवःऽभिः ॥१०॥ इदं द्यावापृथिवी सत्यं अस्तु पितः मातः यत् इह उपऽब्रुवे वां भूतं देवानां अवमे अवःऽभिः विद्याम इषं वृजनं जीरऽदानुं ॥११॥३॥

॥ १८६ ॥ आ नः इळाभिः विदथे सुऽशस्ति विश्वानरः सविता देवः एतु अपि यथा युवानः मत्सथ नः विश्वे जगत् अभिऽपित्वे मनीषा ॥१॥ आ नः विश्वे आस्काः गमंतु देवाः मित्रः अर्यमा वरुणः सऽजोषाः भुवन् यथा नः विश्वे वृधासः करन् सुऽसहा विथुरं न शवः॥२॥ प्रेष्ठं वः अतिथिं गृणीषे अग्निं शस्तिऽभिः तुर्वणिः सऽजोषाः असत् यथा नः वरुणः सुऽकीर्तिः इषः च पर्षत् अतिऽगूर्तः सूरिः ॥३॥ उप वः आ ईषे नमसा जिगीषा उषसानक्ता सुदुघाऽइव धेनुः समाने अहन् विऽमिमानः अर्कं विषुऽरूपे पयसि सस्मिन् ऊधन् ॥४॥ उत नः अहिः बुध्यः मयः कः० शिप्रीं न पिप्युषीऽइव वेति सिंधुः येन नपातं अपां जुनाम मनःऽजुवः वृषणः यं वहंति ॥५॥४॥ उत नः ईं त्वष्टा आ गंतु अच्छ सत् सूरिऽभिः अभिऽपित्वे सऽजोषाः आ वृचऽहा इंद्रः चर्षणिऽप्राः तुविःऽतमः नरां नः इह गम्याः ॥६॥ उत नः ईं मतयः अश्वऽयोगाः शिप्रीं न गावः तरुणं रिहंति तं ईं गिरः जनयः न पत्नीः सुऽरभिःऽतमं नरां नसंत ॥७॥ उत नः ईं मरुतः वृद्धऽसेनाः सत् रोदसी सऽमनसः सदंतु पृषत्ऽअश्वासः अवनयः न रथाः रिशादसः मित्रऽयुजः न देवाः॥८॥ प्र नु यत् एषां महिना चिकित्रे प्र युंजते प्रऽयुजः ते सुऽवृक्ति अध यत् एषां सुऽदिने न शरुः विश्वं आ इरिणं प्रुषायंत सेनाः॥९॥ प्रो अश्विनौ अवसे कृणुध्वं प्र पूषणं स्वऽतवसः हि संति अद्वेषः विष्णुः वातः ऋभुक्षाः अच्छ सुम्नाय ववृतीय देवान् ॥१०॥ इयं सा वः अस्मे दीधितिः यजत्राः अपिऽप्राणी च सदनी च भूयाः नि या देवेषु यतते वसुऽयुः विद्याम इषं वृजनं जीरऽदानुं ॥११॥५॥

॥१८७॥ पितुं नु स्तोषं महः धर्माणं तविषीं यस्य चितः वि ओजसा वृत्रं विऽवर्वं अर्दयत् ॥१॥ स्वादोः पितो मधोः पितो वयं त्वा ववृमहे अस्माकं अविता भव ॥२॥ उप नः पितो आ चर शिवः शिवाभिः ऊतिऽभिः मयःऽभुः अद्विषेण्यः सखा सुऽशेवः अद्वयाः ॥३॥ तव त्ये पितो रसाः रजांसि अनु विऽस्थिताः दिवि वाताःऽइव श्रिताः ॥ ४ ॥ तव त्ये पितो ददतः तव स्वादिष्ठ ते पितो प्र स्वाद्मानः रसानां तुविग्रीवाःऽइव ईरते ॥५॥६॥ त्वे पितो महानां देवानां मनः हितं अकारि चारु केतुना तव अहिं अवसा अवधीत् ॥ ६ ॥ यत् अदः पितो अजगन् विवस्वं पर्वतानां अव चित् नः मधो पितो अरं भक्षाय गम्याः ॥७॥ यत् अपां ओषधीनां परिंशं आऽरिशामहे वातापे पीवः इत् भव ॥ ८ ॥ यत् ते सोम गोऽआशिरः यवऽआशिरः भजामहे वातापे पीवः इत् भव ॥९॥ करंभः ओषधे भव पीवः वृक्कः उदारथिः वातापे पीवः इत् भव ॥१०॥ तं त्वा वयं पितो वचःऽभिः गावः न हव्या सुसूदिम देवेभ्यः त्वा सधऽमादे अस्मभ्यं त्वा सधऽमादे ॥ ११ ॥ ७ ॥

॥ १८८ ॥ संऽइद्धः अद्य राजसि देवः देवैः सहसऽजित् दूतः हव्या कविः वह ॥१॥ तनूऽनपात् ऋतं यते मध्वा यज्ञः सं अज्यते दधत् सहस्रिणीः इषः ॥ २ ॥ आऽजुह्वानः नः ईड्यः देवान् आ वक्षि यज्ञियान् अग्ने सहस्रऽसाः असि ॥३॥ प्राचीनं बर्हिः ओजसा सहस्रऽवीरं अस्तृणन् यत्र आदित्याः विऽराजथ ॥४॥ विऽराट् संऽराट् विऽभ्वीः प्रऽभ्वीः बह्वीः च भूयसीः च याः दुः घृतानि अक्षरन् ॥५॥८॥ सुऽरुक्मे° हि सुऽपेशसा अधि श्रिया

विऽराजंतः उषसौ आ इह सीदतां॥६॥ प्रथमा हि सुऽवाचसा होतारा दैव्या कवी यज्ञं नः यक्षतां इमं॥७॥ भारति इळे सरस्वति याः वः सर्वाः उपऽब्रुवे ताः नः चोदयत श्रिये॥८॥ त्वष्टा रूपाणि हि प्रऽभुः पपून् विश्वान् संऽआनजे तेषां नः स्फातिं आ यज॥९॥ उप त्मन्या वनस्पते पाथः देवेभ्यः सृज अग्निः हव्यानि सिस्वदत्॥१०॥ पुरःऽगाः अग्निः देवानां गायत्रेण सं अज्यते स्वाहाऽकृतीषु रोचते॥११॥९॥

॥१८९॥ अग्ने नय सुऽपथा राये अस्मान् विश्वानि देव वयुनानि विद्वान् युयोधि अस्मत् जुहुराणं एनः भूयिष्ठां ते नमःऽउक्तिं विधेम॥१॥ अग्ने त्वं पारय नव्यः अस्मान् स्वस्तिऽभिः अति दुःऽगानि विश्वा पूः च पृथ्वी बहुला नः उर्वी भव तोकाय तनयाय शं योः॥२॥ अग्ने त्वं अस्मत् युयोधि अमीवाः अनग्निऽचाः अभि अमंत कृष्टीः पुनः अस्मभ्यं सुविताय देव क्षां विश्वेभिः अमृतेभिः यजत्र॥३॥ पाहि नः अग्ने पायुऽभिः अजस्रैः उत प्रिये सदने आ शुशुक्कान् मा ते भयं जरितारं यविष्ठ नूनं विदत् मा अपरं सहस्वः॥४॥ मा नः अग्ने अव सृजः अघाय अविष्यवे रिपवे दुच्छुनायै मा दत्वते दशते मा अदते नः मा रिषते सहसाऽवन् परा दाः॥५॥१०॥ वि घत्साऽवान् ऋतऽजात यंसत् गृणानः अग्ने तन्वे वरूथं विश्वात् रिरिक्षोः उत वा निनित्सोः अभिऽहुतां असि हि देव विष्पट्॥६॥ त्वं तान् अग्ने उभयान् वि विद्वान् वेषि प्रऽपित्वे मनुषः यजत्र अभिऽपित्वे मनवे शास्यः भूः मर्मृजेन्यः उशिक्ऽभिः न अक्रः॥७॥ अवो-

चाम निऽवचनानि अस्मिन् मानस्य सूनुः सहसाने अग्नौ वयं सहस्रं ऋषिऽभिः सनेम विद्याम इषं वृजनं जीरऽदानुं ॥ ८ ॥ ११ ॥

॥ १९० ॥ अनर्वाणं वृषभं मंद्रऽजिह्वं बृहस्पतिं वर्धय नव्यं अर्कैः गाथान्यः सुऽरुचः यस्य देवाः आऽशृण्वंति नवमानस्य मर्तीः ॥१॥ तं ऋत्वियाः उप वाचः सचंते सर्गः न यः देवऽयतां असर्जि बृहस्पतिः सः हि अंजः वरांसि विऽभ्वा अभवत् सं ऋते मातरिश्वा ॥२॥ उपऽस्तुतिं नमसः उत्ऽयतिं च श्लोकं यंसत् सविताऽइव प्र बाहू अस्य ऋत्वा अहन्यः यः अस्ति मृगः न भीमः अरक्षसः तुविष्मान् ॥३॥ अस्य श्लोकः दिवि ईयते पृथिव्यां अत्यः न यंसत् यक्षऽभृत् विऽचेताः मृगाणां न हेतयः यंति च इमाः बृहस्पतेः अहिऽमायान् अभि द्यून् ॥ ४ ॥ ये त्वा देव उस्रिकं मन्यमानाः पापाः भद्रं उपऽजीवंति पज्राः न दुःऽध्ये अनु ददासि वामं बृहस्पते चयसे इत् पियारुं ॥ ५ ॥ १२ ॥ सुऽप्रैतुः सुऽयवसः न पंथाः दुःऽनियंतुः परिऽप्रीतः न मित्रः अनर्वाणः अभि ये चक्षते नः अपिऽवृताः अपऽऊर्णुवंतः अस्युः ॥ ६ ॥ सं ये स्तुभः अवनयः न यंति समुद्रं न स्रवतः रोधऽचक्राः सः विद्वान् उभयं चष्टे अंतः बृहस्पतिः तरः आपः च गृध्रः ॥७॥ एव महः तुविऽजातः तुविष्मान् बृहस्पतिः वृषभः धायि देवः सः नः स्तुतः वीरऽवत् धातु गोऽमत् विद्याम इषं वृजनं जीरऽदानुं ॥ ८ ॥ १३ ॥

॥ १९१ ॥ कंकतः न कंकतः अथो सतीनऽकंकतः द्वौ इति

मुषीं इति नि अदृष्टाः अलिप्सत ॥१॥ अदृष्टान् हंति आऽयती अथो हंति पराऽयती अथो अवऽघ्नती हंति अथो पिनष्टि पिंषती ॥२॥ शरासः कुशरासः दर्भासः सैर्याः उत मौंजाः अदृष्टाः वैरिणाः सर्वे साकं नि अलिप्सत ॥३॥ नि गावः गोऽस्थे असदन् नि मृगासः अविक्षत नि केतवः जनानां नि अदृष्टाः अलिप्सत ॥४॥ एते ऊं त्ये प्रति अदृश्रन् प्रऽदोषं तस्कराःऽइव अदृष्टाः विश्वऽदृष्टाः प्रतिऽबुद्धाः अभूतन ॥५॥१४॥ द्यौः वः पिता पृथिवी माता सोमः भ्राता अदितिः स्वसा अदृष्टाः विश्वऽदृष्टाः तिष्ठत इळयत सुकं ॥६॥ ये अंस्याः ये अंग्याः सूचीकाः ये प्रऽकंकताः अदृष्टाः किं चन इह वः सर्वे साकं नि जस्यत ॥७॥ उत पुरस्तात् सूर्यः एति विश्वऽदृष्टः अदृष्टऽहा अदृष्टान् सर्वान् जंभयन् सर्वः च यातुऽधान्यः ॥८॥ उत अपप्रुत् असौ सूर्यः पुरु विश्वानि जूर्वन् आदित्यः पर्वतेभ्यः विश्वऽदृष्टः अदृष्टऽहा ॥९॥ सूर्ये विषं आ सजामि हतिं सुराऽवतः गृहे सः चित् नु न मराति नो वयं मराम आरे अस्य योजनं हरिऽस्थाः मधु त्वा मधुला चकार ॥१०॥१५॥ इयत्तिका शकुंतिका सका जघास ते विषं सो चित् नु न मराति नो वयं मराम आरे अस्य योजनं हरिऽस्थाः मधु त्वा मधुला चकार ॥११॥ चिः सप्र विष्पुलिंगकाः विषस्य पुष्यै अक्षन् ताः चित् नु न मरंति नो वयं मराम आरे अस्य योजनं हरिऽस्थाः मधु त्वा मधुला चकार ॥१२॥ नवानां नवतीनां विषस्य रोपुषीणां सर्वासां अयभं नाम आरे अस्य योजनं हरिऽस्थाः मधु त्वा मधुला चकार ॥ १३ ॥ चिः सप्र मयूयैः सप्र स्वसारः अयुवः ताः ते विषं वि जभ्रिरे उदकं कुंभिनीःऽइव ॥ १४ ॥ इयत्तकः कुषुंभकः तकं भिनद्मि अश्मना ततः विषं प्र

ववृते परांचीः अनु संऽवतः॥१५॥ कुषुंभकः तत् अब्रवीत् गिरेः प्रऽवर्तमानकः वृश्चिकस्य अरसं विषं अरसं वृश्चिक ते विषं ॥ १६ ॥ १६ ॥ २४ ॥ १ ॥

॥ इति प्रथमं मंडलं समाप्तं ॥

॥१॥ त्वं अग्ने द्युऽभिः त्वं आऽशुशुक्षणिः त्वं अद्भ्यः त्वं अश्मनः परि त्वं वनेभ्यः त्वं ओषधीभ्यः त्वं नृणां नृऽपते जायसे शुचिः ॥१॥ तवं अग्ने होत्रं तव पोत्रं ऋत्वियं तव नेष्ट्रं त्वं अग्नित् ऋतऽयतः तव प्रऽशास्त्रं त्वं अध्वरिऽयसि ब्रह्मा च असि गृहऽपतिः च नः दमे ॥२॥ त्वं अग्ने इंद्रः वृषभः सतां असि त्वं विष्णुः उरुऽगायः नमस्यः त्वं ब्रह्मा रयिऽवित् ब्रह्मणः पते त्वं विऽधर्तः॰ सचसे पुरंऽध्या ॥३॥ त्वं अग्ने राजा वरुणः धृतऽव्रतः त्वं मित्रः भवसि दस्मः ईड्यः त्वं अर्यमा सतऽपतिः यस्य संऽभुजं त्वं अंशः विदथे देव भाजयुः ॥४॥ त्वं अग्ने त्वष्टा विधते सुऽवीर्यं तवं मावः मित्रऽमहः सऽजात्यं त्वं आप्नुऽहेमा ररिषे सुऽअश्व्यं त्वं नरां शर्धः असि पुरुऽवसुः ॥५॥१७॥ त्वं अग्ने रुद्रः असुरः महः दिवः त्वं शर्धः मारुतं पृक्षः ईशिषे त्वं वातैः अरुणैः यासि शंऽगयः त्वं पूषा विधतः पासि नु त्मना ॥६॥ त्वं अग्ने द्रविणःऽदाः अरंऽकृते त्वं देवः सविता रत्नऽधाः असि त्वं भगः नृऽपते वस्वः ईशिषे त्वं पायुः दमे यः ते अविधत् ॥७॥ त्वां अग्ने दमे आ विशंपतिं विशः त्वां राजानं सुऽविदत्रं ऋंजते त्वं विश्वानि सुऽअनीक पत्यसे त्वं सहस्राणि शता दश प्रति ॥८॥ त्वां अग्ने पितरं इष्टिऽभिः नरः त्वां भाचाय शम्या तनूऽरुजं त्वं पुचः भवसि

यः ते अविधत् त्वं सखा सुऽशेवःपासि आऽधृषः ॥९॥ त्वं अग्ने ऋभुः आके नमस्यः त्वं वाजस्य क्षुऽमतः रायः ईशिषे त्वं वि भासि अनु धक्षि दावने त्वं विऽशिक्षुः असि यज्ञं आऽततिः ॥१०॥१८॥ त्वं अग्ने अदितिः देव दाशुषे त्वं होचा भारती वर्धसे गिरा त्वं इळा शतऽहिमा असि दक्षसे त्वं वृचऽहा वसुऽपते सरस्वती ॥११॥ त्वं अग्ने सुऽभृतः उत्ऽतमं वयः तव स्पार्हे वर्णे आ संऽदृशि श्रियः त्वं वाजः प्रऽतरणः बृहन् असि त्वं रयिः बहुलः विश्वतः पृथुः ॥१२॥ त्वां अग्ने आदित्यासः आस्यं त्वां जिह्वां शुचयः चक्रिरे कवे त्वां रातिऽसाचः अध्वरेषु सश्चिरे त्वे देवाः हविः अदंति आऽहुतं ॥१३॥ त्वे अग्ने विश्वे अमृतासः अद्रुहः आसा देवाः हविः अदंति आऽहुतं त्वया मर्तासः स्वदंते आऽसुतिं त्वं गर्भः वीरुधां जज्ञिषे शुचिः ॥१४॥ त्वं तान् सं च प्रति च असि मज्मना अग्ने सुऽजात प्र च देव रिच्यसे पृक्षः यत् अच महिना वि ते भुवत् अनु द्यावापृथिवी रोदसी उभे ॥१५॥ ये स्तोतृऽभ्यः गोऽअयां अश्वऽपेशसं अग्ने रातिं उपसृजंति सूरयः अस्मान् च तान् च प्र हि नेषि वस्यः आ बृहत् वदेम विदथे सुऽवीराः ॥१६॥१९॥

॥२॥ यज्ञेन वर्धत जातऽवेदसं अग्निं यजध्वं हविषा तना गिरा संऽइधानं सुऽप्रयसं स्वःऽनरं हुक्षं होतारं वृजनेषु धूःऽसदं॥१॥ अभि त्वा नक्तीः उषसः ववाशिरे अग्ने वत्सं न स्वसरेषु धेनवः दिवःऽइव इत् अरतिः मानुषा युगा आ क्षपः भासि पुरुऽवार संऽयतः॥२॥ तं देवाः बुभ्रे रजसः सुऽदंससं दिवःपृथिव्योः अरतिं नि एरिरे रथंऽइव वेद्यं शुक्रऽशोचिषं अग्निं मित्रं न क्षितिषु

प्रऽशंस्यं ॥३॥ तं उक्षमाणं रजसि स्वे आ दमे चंद्रंऽइव सुऽरुचं हरे आ दधुः पृश्न्याः पतरं चितयंतं अक्षऽभिः पाथः न पायुं जनसी उभे अनु ॥४॥ सः होता विश्वं परि भूतु अध्वरं तं ऊं हव्यैः मनुषः गृंजते गिरा हिरिऽशिप्रः वृधसानासु जर्भुरत् द्यौः न स्तृऽभिः चितयत् रोदसी अनु ॥५॥२०॥ सः नः रेवत् संऽइधानः स्वस्तये संऽददस्वान् रयिं अस्मासु दीदिहि आ नः कृणुष्व सुवितायं रोदसी अग्ने हव्या मनुषः देव वीतये ॥६॥ दाः नः अग्ने बृहतः दाः सहस्रिणः दुरः न वाजं श्रुत्यै अपं वृधि प्राचीं द्यावापृथिवी ब्रह्मणा कृधि स्वः न शुक्रं उषसः वि दिद्युतः ॥७॥ सः इधानः उषसः राम्याः अनु स्वः न दीदेत् अरुषेण भानुना होचाभिः अग्निः मनुषः सुऽअध्वरः राजा विशां अतिथिः चारुः आयवे ॥८॥ एव नः अग्ने अमृतेषु पूर्व्य धीः पीपाय बृहतऽदिवेषु मानुषा दुहाना धेनुः वृजनेषु कारवे त्मना शतिनं पुरुऽरूपं इषणि ॥९॥ वयं अग्ने अवैता वा सुऽवीर्यं ब्रह्मणा वा चितयेम जनान् अति अस्माकं द्युम्नं अधि पंच कृष्टिषु उच्चा स्वः न शुशुचीत दुस्तरं ॥१०॥ सः नः बोधि सहस्य प्रऽशंस्यः यस्मिन् सुऽजाताः इषयंत सूरयः यं अग्ने यज्ञं उपऽयंति वाजिनः नित्ये तोके दीदिऽवांसं स्वे दमे ॥११॥ उभयासः जातऽवेदः स्याम ते स्तोतारः अग्ने सूरयः च शर्मणि वस्वः रायः पुरुऽचंद्रस्य भूयसः प्रजाऽवंतः सुऽअपत्यस्य शग्धि नः ॥१२॥ ये स्तोतृऽभ्यः गोऽअश्वां अश्वऽपेशसं अग्ने रातिं उपऽसृजंति सूरयः अस्मान् च तान् च प्र हि नेषि वस्यः आ बृहत् वदेम विदथे सुऽवीराः ॥१३॥२१॥

॥३॥ संऽइद्धः अग्निः निऽहितः पृथिव्यां प्रत्यङ् विश्वानि भु-

वनानि अस्थात् होता पावकः प्रऽदिवः सुऽमेधाः देवः देवान् यजतु अग्निः अहैन् ॥१॥ नराशंसः प्रति धामानि अंजन् तिस्रः दिवः प्रति महा सुऽअर्चिः घृतऽप्रुषा मनसा हव्यं उंदन् मूर्धन् यज्ञस्य सं अनक्तु देवान् ॥ २ ॥ ईळितः अग्ने मनसा नः अहैन् देवान् यक्षि मानुषात् पूर्वः अद्य सः आ वह मरुतां शर्धः अच्युतं इंद्रं नरः बर्हिऽसदं यजध्वं ॥३॥ देव बर्हिः वर्धमानं सुऽवीरं स्तीर्णं राये सुऽभरं वेदीं अस्यां घृतेन अक्तं वसवः सीदत इदं विश्वे देवाः आदित्याः यज्ञियासः ॥४॥ वि श्रयंतां उर्विया हूयमानाः द्वारः देवीः सुप्रऽअयनाः नमःऽभिः व्यचस्वतीः वि प्रथंतां अजुर्याः वर्णं पुनानाः यशसं सुऽवीरं ॥५॥२२॥ साधु अपांसि सनता नः उक्षिते उषसानक्ता वय्याऽइव रण्विते तंतुं ततं संऽवयंती०संऽईची० यज्ञस्य पेशः सुऽदुघे० पयस्वती ॥६॥ दैव्या होतारा प्रथमा विदुःऽतरा ऋजु यक्षतः सं ऋचा वपुःऽतरा देवान् यजंतौ ऋतुऽथा सं अंजतः नाभा पृथिव्याः अधि सानुषु चिषु ॥७॥ सरस्वती साधयंती धियं नः इळा देवी भारती विश्वऽतूर्तिः तिस्रः देवीः स्वधया बर्हिः आ इदं अच्छिद्रं पांतु शरणं निऽसद्य ॥८॥ पिशंगऽरूपः सुऽभरः वयःऽधाः शुष्टी वीरः जायते देवऽकामः प्रऽजां त्वष्टा वि स्यतु नाभिं अस्मे अथ देवानां अपि एतु पाथः ॥९॥ वनस्पतिः अवऽसृजन् उप स्थात् अग्निः हविः सूदयाति प्र धीभिः चिधा संऽअक्तं नयतु प्रऽजानन् देवेभ्यः दैव्यः शमिता उप हव्यं ॥१०॥ घृतं मिमिक्षे घृतं अस्य योनिः घृते श्रितः घृतं ऊं अस्य धाम अनुऽस्वधं आ वह मादयस्व स्वाहाऽकृतं वृषभ वक्षि हव्यं ॥११॥२३॥

॥४॥ हुवे वः सुऽद्योत्मानं सुऽवृक्तिं विशां अग्निं अतिथिं सु-

ऽप्रयसं मित्रःऽइव यः दिधिषाय्यः भूत् देवः आऽदेवे जने जातऽवेदाः ॥१॥ इमं विधंतः अपां सधऽस्थे द्विता अदधुः भृगवः विक्षु आयोः एषः विश्वानि अभि अस्तु भूम देवानां अग्निः अरतिः जीरऽअध्वः ॥२॥ अग्निं देवासः मानुषीषु विक्षु प्रियं धुः क्षेष्यंतः न मित्रं सः दीदयत् उशतीः ऊम्र्योः आ दक्षाय्यः यः दास्वंते दमे आ ॥३॥ अस्य एषा स्वस्यऽइव पुष्टिः संऽदृष्टिः अस्य हियानस्य धक्षोः वि यः भरिभ्रत् ओषधीषु जिह्वां अत्यः न रथ्यः दोधवीति वारान् ॥४॥ आ यत् मे अभ्वं वनदः पनंत उशिक्ऽभ्यः न अग्मिमीत् वणीं सः चिचेण चिकिते रंऽसु भासा जुजुर्वान् यः मुहुः आ युवा भूत् ॥५॥२४॥ आ यः वना ततृषाणः न भाति वाः न पथा रथ्याऽइव स्वानीत् कृष्णऽअध्वा तपुः एषः चिकेत् द्यौःऽइव सयमानः नभःऽभिः ॥६॥ सः यः वि अस्यात् अभि धक्षत् उर्वीं पशुः न एति स्वऽयुः अगोपाः अग्निः शोचिष्मान् अतसानि उष्णन् कृष्णऽव्यथिः अस्वदयत् न भूम ॥७॥ नु ते पूर्वस्य अवसः अधिऽइतौ तृतीये विदथे मन्म शंसि अस्मे अग्ने संयतऽवीरं बृहंतं क्षुऽमंतं वाजं सुऽअपत्यं रयिं दाः ॥८॥ त्वया यथा गृत्सऽमदासः अग्ने गुहा वन्वंतः उपरान् अभि स्युः सुऽवीरासः अभिमातिऽसहः सत सूरिऽभ्यः गृणते तत् वयः धाः ॥९॥२५॥

॥५॥ होता अजनिष्ट चेतनः पिता पितृऽभ्यः ऊतये प्रऽयक्षन् जेन्यं वसु शकेम वाजिनः यमं ॥१॥ आ यस्मिन् सप्त रश्मयः ततः यज्ञस्य नेतरि मनुष्वत् दैव्यं अष्टमं पोता विश्वं तत् इन्वति ॥२॥ दधन्वे वा यत् ईं अनु वोचत् ब्रह्माणि वेः ऊं तत् परि

विश्वानि काव्या नेमिः चक्रंऽइव अभवत् ॥३॥ साकं हि शुचिना शुचिः प्रऽशास्ता क्रतुना अजनि विद्वान् अस्य व्रता ध्रुवा वयाःऽइव अनु रोहते ॥४॥ ताः अस्य वर्णी आयुवः नेष्टुः सचंत धेनवः कुवित् तिसृऽभ्यः आ वरं स्वसारः याः इदं ययुः ॥५॥ यदि मातुः उप स्वसा घृतं भरंती अस्थित तासां अध्वर्युः आऽगंती यवः वृष्टीऽइव मोदते ॥६॥ स्वः स्वाय धायसे कृणुतां ऋत्विक् ऋत्विजं स्तोमं यज्ञं च आत अरं वनेम रयिम वयं ॥७॥ यथा विद्वान् अरं करत् विश्वेभ्यः यजतेभ्यः अयं अग्ने त्वे अपि यं यज्ञं चकृम वयं ॥८॥ २६॥

॥ ६ ॥ इमां मे अग्ने संऽइधं इमां उपऽसदं वनेः० इमाः ऊं सु श्रुधि गिरः॥१॥ अया ते अग्ने विधेम ऊर्जः नपात् अश्वंऽइष्टे एना सुऽउक्तेन सुऽजात ॥२॥ तं त्वा गीःऽभिः गिर्वणसं द्रविणस्युं द्रविणःऽदः सपर्येम सपर्यवः ॥३॥ सः बोधि सूरिः मघऽवा वसुऽपते वसुऽदावन् युयोधि अस्मत् द्वेषांसि ॥४॥ सः नः वृष्टिं दिवः परि सः नः वाजं अनर्वाणं सः नः सहस्रिणीं इषः ॥५॥ ईळानाय अवस्यवे यविष्ठ दूत नः गिरा यजिष्ठ होतः आ गहि ॥६॥ अंतः हि अग्ने ईयसे विद्वान् जन्म उभया कवे दूतः जन्याऽइव मित्र्यः ॥७॥ सः विद्वान् आ च पिप्रयः यक्षि चिकित्वः आनुषक् आ च अस्मिन् सत्सि बर्हिषि ॥८॥२७॥

॥ ७ ॥ श्रेष्ठं यविष्ठ भारत अग्ने द्युऽमंतं आ भर वसोः पुरुऽस्पृहं रयिं ॥१॥ मा नः अरातिः ईशत देवस्य मर्त्यस्य च परि द्वेषः उत द्विषः॥२॥ विश्वाः उत त्वया वयं धाराः उदन्याःऽइव

अति गाहेमहि द्विषः ॥३॥ शुचिः पावक वंद्यः अग्ने बृहत् वि रोचसे त्वं घृतेभिः आऽहुतः॥४॥ त्वं नः असि भारत अग्ने वशाभिः उक्षऽभिः अष्टाऽपदीभिः आऽहुतः॥५॥ दुऽअवः सर्पिःऽआसुतिः प्रत्नः होता वरेण्यः सहसः पुचः अद्भुतः ॥६॥२८॥

॥८॥ वाजयन्ऽइव नु रथान् योगान् अग्नेः उप स्तुहि यशःऽतमस्य मीळ्हुषः ॥१॥ यः सुऽनीथः ददाशुषे अजुर्यः जरयन् अरिं चारुऽप्रतीकः आऽहुतः॥२॥ यः ऊं श्रिया दमेषु आ दोषा उषसि प्रऽशस्यते यस्य व्रतं न मीयते ॥३॥ आ यः स्वः न भानुना चिचः विऽभाति अर्चिषा अंजानः अजरैः अभि ॥४॥ अचिं अनु स्वऽराज्यं अग्निं उक्थानि ववृधुः विश्वाः अधि श्रियः दधे ॥५॥ अग्नेः इंद्रस्य सोमस्य देवानां ऊतिऽभिः वयं अरिष्यंतः सचेमहि अभि स्याम पृतन्यतः ॥६॥२९॥५॥

॥९॥ नि होता होतृऽसदने विदानः त्विषः दीदिऽवान् अस्दत् सुऽदक्षः अदब्धव्रतऽप्रमतिः वसिष्ठः सहस्रंऽभरः शुचिःऽजिह्वः अग्निः ॥१॥ त्वं दूतः त्वं ऊं नः परःऽपाः त्वं वस्यः आ वृषभ प्रऽनेता अग्ने तोकस्य नः तने तनूनां अप्रऽयुच्छन् दीद्यत् बोधि गोपाः ॥२॥ विधेम ते परमे जन्मन् अग्ने विधेम स्तोमैः अवरे सधऽस्थे यस्मात् योनेः उतऽआरिथ यजे तं प्र त्वे हवींषि जुहुरे संऽइद्धे ॥३॥ अग्ने यजस्व हविषा यजीयान् श्रुष्टी देवं अभि गृणीहि राधः त्वं हि असि रयिऽपतिः रयीणां त्वं शुक्रस्य वचसः मनोता ॥४॥ उभयं ते न क्षीयते वसव्यं दिवेऽदिवे जायमानस्य दस्म कृधि क्षुऽमंतं जरितारं अग्ने कृधि पतिं

सुऽअपत्यस्य रायः ॥५॥ सः एना अनींकेन सुऽविद्वः अस्मे यष्टा देवान् आऽयजिष्ठः स्वस्ति अदब्धः गोपाः उत नः परःऽपाः अग्ने द्युऽमत् उत रेवत् दिदीहि ॥६॥१॥

॥१०॥ जोहूवः अग्निः प्रथमः पिताऽईवऽइळः पदे मनुषा यत् संऽइद्धः स्रियं वसानः अमृतः विऽचेताः मर्मृजेन्यः स्रवस्यः सः वाजी ॥१॥ स्रुचा अग्निः चिचऽभानुः हवं मे विश्वाभिः गीःऽभिः अमृतः विऽचेताः श्यावा रथं वहतः रोहिता वा उत अरुषा अह चक्रे विऽभृचः ॥२॥ उत्तानायां अजनयन् सुऽसूतं भुवत् अग्निः पुरुऽपेशासु गर्भः शिरिणायां चित् अक्तुना महःऽभिः अपरिऽवृतः वसति प्रऽचेताः ॥३॥ जिघर्मि अग्निं हविषा घृतेन प्रतिऽक्षियंतं भुवनानि विश्वा पृथुं तिरश्चा वयसा बृहंतं व्यचिष्ठं अन्नैः रभसं दृशानं ॥४॥ आ विश्वतः प्रत्यंचं जिघर्मि अरक्षसा मनसा तत् जुषेत मयैऽश्रीः स्पृहयत्ऽवर्णः अग्निः न अभिऽमृशे तन्वा जभुराणः ॥५॥ इयाः भागं सहसानः वरेण त्वाऽदूतासः मनुऽवत् वदेम अनूनं अग्निं जुह्वा वचस्या मधुऽपृचं धनऽसाः जोहवीमि ॥६॥२॥

॥११॥ श्रुधि हवं इंद्र मा रिषण्यः स्याम ते दावने वसूनां इमाः हि त्वां ऊर्जः वर्धयंति वसुऽयवः सिंधवः न क्षरंतः ॥१॥ सृजः महीः इंद्र याः अपिन्वः परिऽस्थिताः अहिना पूर पूर्वीः अमर्त्यं चित् दासं मन्यमानं अव अभिनत् उक्थैः ववृधानः ॥२॥ उक्थेषु इत् नु पूर येषु चाकन् स्तोमेषु इंद्र रुद्रियेषु च तुभ्य इत् एताः यासु मंदसानः प्र वायवे सिस्रते न शुभ्राः ॥३॥ शुभं नु ते शुष्मं वर्धयंतः शुभं वज्रं बाह्वोः दधानाः शुभ्रः त्वं इंद्र ववृधानः अस्मे दासीः

विशः सूर्येण सह्याः॥४॥ गुहा हितं गुह्यं गूळ्हं अप्ऽसु अपि-ऽवृतं मायिनं क्षियंतं उतो अपः द्यां तस्तभ्वांसं अहन् अहिं शूर वीर्येण ॥५॥३॥ स्तवं नु ते इंद्र पूर्व्या महानि उत स्तवाम नूतना कृतानि स्तवं वज्रं बाह्वोः उशंतं स्तवं हरी सूर्यस्य केतू ॥६॥ हरी नु ते इंद्र वाजयंता घृतऽश्चुतं स्वारं अस्वार्ष्टा वि समना भूमिः अप्रथिष्ट अरंस्त पर्वतः चित् सरिष्यन् ॥७॥ नि पर्वतः सादि अग्रेऽयुच्छन् सं मातृऽभिः वावशानः अक्रान् दूरे पारे वाणीं वर्धयंतः इंद्रेऽइषितां धमनिं पप्रथन् नि ॥८॥ इंद्रः महां सिंधुं आऽशयानं मायाऽविनं वृचं अस्फुरत् निः अरेजेतां रोदसी भियाने कनिक्रदतः वृष्णः अस्य वज्रात् ॥९॥ अरो-रवीत् वृष्णः अस्य वज्रः अमानुषं यत् मानुषः निऽजूर्वीत् नि मायिनः दानवस्य मायाः अपादयत् पपिऽवान् सुतस्य ॥१०॥४॥ पिबऽपिब इत् इंद्र शूर सोमं मंदंतु त्वा मंदिनः सुतासः पृणंतः ते कुक्षी वर्धयंतु इत्था सुतः पौरः इंद्र आव ॥११॥ त्वे इंद्र अपि अभूम विप्राः धियं वनेम ऋतऽया सपंतः अवस्यवः धी-महि प्रऽशस्तिं सद्यः ते रायः दावने स्याम ॥१२॥ स्याम ते ते इंद्र ये ते ऊती अवस्यवः ऊर्जं वर्धयंतः शुष्मिन्ऽतमं यं चा-कनाम देव असे रयिं रासि वीरऽवंतं ॥१३॥ रासि क्षयं रासि मित्रं असे रासि शर्धः इंद्र मारुतं नः सऽजोषसः ये च मंदसा-नाः प्र वायवः पांति अस्यऽनीतिं ॥१४॥ श्रंतु इत् नु येषु मंदसानः तृपत् सोमं पाहि द्रह्यत् इंद्र असान् सु पृतऽसु आ तरुच अर्व-र्धयः द्यां बृहतऽभिः अर्कैः ॥१५॥५॥ बृहंतः इत् नु ये ते तरुच उक्थेभिः वा सुम्नं आऽविवासान् स्तृणानासः बर्हिः पस्त्यऽवत् त्वाऽऊताः इत इंद्र वाजं अग्मन् ॥१६॥ उग्रेषु इत् नु शूर मंदसानः

चिऽकंदुकेषु पाहि सोमं इंद्र प्रऽदोधुवत् शमश्नुषु प्रीणानः याहि हरिऽभ्यां सुतस्य पीतिं ॥१७॥ धिष्व शवः पूर येन वृत्रं अव-ऽअभिनत् दानुं और्णऽवाभं अपं अवृणोः ज्योतिः आर्याय नि सव्यतः सादि दस्युः इंद्र॥१८॥ सनेम ये ते ऊतिऽभिः तरंतः विश्वाः स्पृधः आर्येण दस्यून् अस्मभ्यं तत् त्वाष्ट्रं विश्वऽरूपं अरंधयः साख्यस्य चिताय ॥१९॥ अस्य सुवानस्य मंदिनः चितस्य नि अर्बुदं ववृधानः अस्तः० अवर्तयत् सूर्यः न चक्रं भिनत् वलं इंद्रः अंगिरस्वान्॥२०॥ नूनं सा ते प्रति वरं जरित्रे दुहीयत् इंद्र दक्षि-णा मघोनी शिक्षा स्तोतृऽभ्यः मा अति धक् भगः नः बृहत् वदेम विदथे सुवीराः ॥ २१ ॥ ६ ॥ १ ॥

॥१२॥ यः जातः एव प्रथमः मनस्वान् देवः देवान् क्रतुना परिऽअभूषत् यस्य शुष्मात् रोदसी अभ्यसेतां नृम्णस्य मह्ना सः जनासः इंद्रः ॥१॥ यः पृथिवीं व्यथमानां अदृंहत् यः पर्वतान् प्रऽकुपितान् अरंमणात् यः अंतरिक्षं विऽममे वरीयः यः द्यां अ-स्तभ्नात् सः जनासः इंद्रः ॥ २ ॥ यः हत्वा अहिं अरिणात् सप्त सिंधून् यः गाः उतऽआजत् अपऽधा वलस्य यः अश्मनोः अंतः अग्निं जजान संऽवृक् समत्ऽसु सः जनासः इंद्रः ॥३॥ येन इमा विश्वा च्यवना कृतानि यः दासं वर्णं अधरं गुहा अकः० श्वघ्नी-ऽइव यः जिगीवान् लक्षं आदत् अर्यः पुष्टानि सः जनासः इंद्रः॥४॥ यं स्म पृच्छंति कुह सः इति घोरं उत ईं आहुः न एषः अस्ति इति एनं सः अर्यः पुष्टीः विजःऽइव आ मिनाति प्रऽवत् असै धत्त सः जनासः इंद्रः ॥५॥७॥ यः रध्रस्य चोदिता यः कृशस्य यः ब्रह्मणः नाधमानस्य कीरेः युक्तऽग्रावणः यः अविता सुऽशिप्रः सुत-

ऽसोमस्य सः जनासः इंद्रः ॥६॥ यस्य अश्वासः प्रऽदिशि यस्य गावः यस्य यामाः यस्य विश्वे रथासः यः सूर्यं यः उषसं जजान यः अपां नेता सः जनासः इंद्रः ॥७॥ यं क्रंदसी संऽयती० विऽह्वयेते० परे अवरे उभयाः अमिचाः समानं चित् रथं आऽतस्थिऽवांसा नाना हवेते सः जनासः इंद्रः ॥८॥ यस्मात् न ऋते विऽजयंते जनासः यं युध्यमानाः अवसे हवंते यः विश्वस्य प्रतिऽमानं बभूव यः अच्युतऽच्युत् सः जनासः इंद्रः ॥९॥ यः शश्वतः महि एनः दधानान् अमन्यमानान् शवा जघान यः शर्धते न अनुऽददाति शृध्यां यः दस्योः हंता सः जनासः इंद्रः ॥१०॥८॥ यः शंबरं पर्वतेषु क्षियंतं चत्वारिंश्यां शरदि अनुऽअविंदत् ओजायमानं यः अहिं जघान दानुं शयानं सः जनासः इंद्रः ॥११॥ यः सप्तऽरश्मिः वृषभः तुविष्मान् अवऽअसृजत् सर्तवे सप्त सिंधून् यः रौहिणं अस्फुरत् वज्रऽबाहुः द्यां आऽरोहंतं सः जनासः इंद्रः ॥१२॥ द्यावा चित् अस्मै पृथिवी नमेते शुष्मात् चित् अस्य पर्वताः भयंते यः सोमऽपाः निऽचितः वज्रऽबाहुः यः वज्रऽहस्तः सः जनासः इंद्रः ॥१३॥ यः सुन्वंतं अवति यः पचंतं यः शंसंतं यः शशमानं ऊती यस्य ब्रह्म वर्धनं यस्य सोमः यस्य इदं राधः सः जनासः इंद्रः ॥१४॥ यः सुन्वते पचते दुध्रः आ चित् वाजं ददाति सः किल असि सत्यः वयं ते इंद्र विश्वहा प्रियासः सुऽवीरासः विदथं आ वदेम ॥१५॥ ९ ॥

॥१३॥ ऋतुः जनिंची तस्याः अपः परि मंसु जातः आ अविशत् यासु वर्धते तत् आहनाः अभवत् पिप्युषीं पयः अंशोः पीयुषं प्रथमं तत् उक्थ्यं ॥१॥ सध्री ईं आ यंति परि बिभ्रतीः पयः

विश्वऽप्न्याय प्र भरंत भोजंन समानः अध्वा प्रऽवतां अनुऽस्यदे यः ता अकृणोः प्रथमं सः असि उक्थ्यः ॥२॥ अनु एकः वदति यत् ददाति तत् रूपा मिनन् ततऽअपाः एकः ईयते विश्वाः एकस्य विऽनुदः तितिक्षते यः ता अकृणोः प्रथमं सः असि उक्थ्यः ॥३॥ प्रऽजाभ्यः पुष्टिं विऽभजंतः आसते रयिंऽइव पृष्ठं प्रऽभवंतं आऽयते असिन्वन् दंष्ट्रैः पितुः अत्ति भोजनं यः ता अकृणोः प्रथमं सः असि उक्थ्यः ॥४॥ अध अकृणोः पृथिवीं संऽदृशे दिवे यः धौतीनां अहिंऽहन् अरिणक् पथः तं त्वा स्तोमेभिः उद्ऽभिः न वाजिनं देवं देवाः अजनन् सः असि उक्थ्यः ॥५॥१०॥ यः भोजनं च दयसे च वर्धनं आर्द्रात् आ शुष्कं मधुऽमत् दुदोहिथ सः शेवऽधिं नि दधिषे विवस्वति विश्वस्य एकः ईशिषे सः असि उक्थ्यः ॥६॥ यः पुष्पिणीः च प्रऽस्वः च धर्मणा अधि दाने वि अवनीः अधारयः यः च असमाः अजनः द्युतः दिवः उरुः उर्वान् अभितः सः असि उक्थ्यः ॥७॥ यः नार्मरं सहऽवसुं निऽहंतवे पृक्षाय च दासऽवेशाय च अवहः ऊर्जयंत्याः अपरिऽविष्टं आस्यं उत एव अद्य पुरुऽकृत् सः असि उक्थ्यः ॥८॥ शतं वा यस्य दश साकं आ अद्यः एकस्य श्रुष्टौ यत् ह चोदं आविथ अरज्जौ दस्यून् सं उनप् दभीतये सुप्रऽअव्यः अभवः सः असि उक्थ्यः ॥९॥ विश्वा इत् अनु रोधनाः अस्य पौंस्यं ददुः असै दधिरे कृत्नवे धनं षट् अस्तभ्नाः विऽस्तरः पंच संऽदृशः परि परः अभवः सः असि उक्थ्यः ॥१०॥११॥ सुऽप्रवाचनं तव वीर वीर्यं यत् एकेन क्रतुना विंदसे वसु जातूऽस्थिरस्य प्र वयः सहस्वतः या चकर्थ सः इंद्र विश्वा असि उक्थ्यः ॥११॥ अरमयः सरंऽअपसः तराय कं तुर्वीतये च वय्याय च सु-

तिं नीचा संतमुत अनयः पराऽवृजं प्र अंधं श्रोणं अवर्यन् सः असि उक्थ्यः॥१२॥ अस्मभ्यं तत् वसो दानाय राधः सं अर्थयस्व बहु ते वसव्यं इंद्र यत् चित्रं अवस्याः अनु द्यून् बृहत् वदेम विदथे सुऽवीराः ॥१३॥१२॥

॥१४॥ अध्वर्यवः भरत इंद्राय सोमं आ अमत्रेभिः सिंचत मद्यं अंधः कामी हि वीरः सदं अस्य पीतिं जुहोत वृष्णे तत् इत् एषः वष्टि॥१॥ अध्वर्यवः यः अपः वव्रिऽवांसं वृत्रं जघान अशन्याऽइव वृक्षं तस्मै एतं भरत ततऽवशाय एषः इंद्रः अर्हति पीतिं अस्य॥२॥ अध्वर्यवः यः हभीकं जघान यः गाः उतऽआजत् अपं हि वलं वः तस्मै एतं अंतरिक्षे न वातं इंद्रं सोमैः आ ऊर्णुत जूः न वस्त्रैः॥३॥ अध्वर्यवः यः उरणं जघान नव चखांसं नवतिं च बाहून् यः अवुदं अव नीचा बबाधे तं इंद्रं सोमस्य भृथे हिनोत॥४॥ अध्वर्यवः यः सु अश्नं जघान यः शुष्णं अशुषं यः विऽअंसं यः पिप्रुं नमुचिं यः रुधिऽक्रां तस्मै इंद्राय अंधसः जुहोत॥५॥ अध्वर्यवः यः शतं शंबरस्य पुरः बिभेद अश्मनाऽइव पूर्वीः यः वर्चिनः शतं इंद्रः सहस्रं अपऽअवपत् भरत सोमं अस्मै॥६॥१३॥ अध्वर्यवः यः शतं आ सहस्रं भूम्याः उपऽस्थे अवपत् जघन्वान् कुत्सस्य आयोः अतिथिऽग्वस्य वीरान् नि अवृणक् भरत सोमं अस्मै॥७॥ अध्वर्यवः यत् नरः कमयाध्वे शुष्टी वहंतः नशथ तत् इंद्रे गभस्तिऽपूतं भरत शुताय इंद्राय सोमं यज्यवः जुहोत॥८॥ अध्वर्यवः कर्तेन शुष्टिं अस्मै वने निऽपूतं वने उत नयध्वं जुषाणः हस्त्यं अभि वावशे वः इंद्राय सोमं मदिरं जुहोत॥९॥ अध्वर्यवः पयसा ऊधः यथा गोः सोमेभिः ईं पृणत

भोजं इंद्रं वेद अहं अस्य निऽभृतं मे एतत् दित्सँतं भूयः यजतः चिकेत॥१०॥ अध्वर्यवः यः दिव्यस्य वस्वः यः पार्थिवस्य क्षम्यस्य राजा तं ऊर्दरं न पृणत यवेन इंद्रं सोमेभिः तत् अपः वः अस्तु ॥११॥ अस्मभ्यं तत् वसो दानाय राधः सं अर्थयस्व बहु ते वसव्यं इंद्र यत् चित् चकृषे अवस्याः अनु द्यून् बृहत् वदेम विदथे सुऽवीराः ॥१२॥१४॥

॥१५॥ प्र घ नु अस्य महतः महानि सत्या सत्यस्य करणानि वोचं चिऽकेतुकेषु अपिबत् सुतस्य अस्य मदे अहिं इंद्रः जघान ॥१॥ अवंशे द्यां अस्तभायत् बृहंतं आ रोदसी अपृणत् अंतरिक्षं सः धारयत् पृथिवीं पप्रथत् च सोमस्य ता मदे इंद्रः चकार ॥२॥ सद्मऽइव प्राचः वि मिमाय मानैः वज्रेण खानि अतृणत् नदीनां वृथा असृजत् पथिऽभिः दीर्घऽयाथैः सोमस्य ता मदे इंद्रः चकार ॥३॥ सः प्रऽवोळ्हन् परिऽगत्यं दभीतेः विश्वं अधाक् आयुधं इद्धे अग्नौ सं गोभिः अश्वैः असृजत् रथेभिः सोमस्य ता मदे इंद्रः चकार ॥४॥ सः ई महीं धुनिं एतोः अरम्णात् सः अस्नातॄन् अपारयत् स्वस्ति ते उत्ऽस्नाय रयिं अभि प्र तस्थुः सोमस्य ता मदे इंद्रः चकार ॥५॥१५॥ सः उदंचं सिंधुं अरिणात् महिऽत्वा वज्रेण अनः उषसः सं पिपेष अजवसः जविनीभिः विऽवृश्चन् सोमस्य ता मदे इंद्रः चकार॥६॥ सः विद्वान् अपऽगोहं कनीनां आविः भवन् उत् अतिष्ठत् पराऽवृक् प्रति श्रोणः स्थात् वि अनक् अचक्ष सोमस्य ता मदे इंद्रः चकार ॥७॥ भिनत् वलं अंगिरःऽभिः गृणानः वि पर्वतस्य दंहितानि ऐरत् रिणक् रोधाँसि कृचिमाणि एषां सोमस्य ता मदे इंद्रः

चकार ॥८॥ स्वप्नेन अभिऽउप्यं चुमुरिं धुनिं च जघंथ दस्युं प्र दभीतिं आवः रंभी चित् अत्र विविदे हिरण्यं सोमस्य ता मदे इंद्रः चकार ॥९॥ नूनं सा ते प्रति वरं जरित्रे दुहीयत इंद्र दक्षिणा मघोनी शिक्षा स्तोतृऽभ्यः मा अति धक् भगः नः बृहत् वदेम विदथे सुवीराः ॥ १० ॥ १६ ॥

॥ १६ ॥ प्र वः सतां ज्येष्ठऽतमाय सुऽस्तुतिं अग्नौऽइव संऽइधाने हविः भरे इंद्रं अजुर्यं जरयंतं उक्षितं सनात् युवानं अवसे हवामहे ॥१॥ यस्मात् इंद्रात् बृहतः किं चन ईं ऋते विश्वानि अस्मिन् संऽभृता अधि वीर्या जठरे सोमं तन्वि सहः महः हस्ते वज्रं भरति शीर्षणि क्रतुं ॥२॥ न क्षोणीभ्यां परिऽभ्वे ते इंद्रियं न समुद्रैः पर्वतैः इंद्र ते रथः न ते वज्रं अनु अश्नोति कः चन यत् आप्नुऽभिः यतसि योजना पुरु ॥३॥ विश्वे हि अस्मै यजताय धृष्णवे क्रतुं भरंति वृषभाय सश्चते वृषा यजस्व हविषा विदुःऽतरः पिब इंद्र सोमं वृषभेण भानुना ॥ ४ ॥ वृष्णः कोशः पवते मध्वः ऊर्मिः वृषभऽअन्नाय वृषभाय पातवे वृषणा अध्वर्यू वृषभासः अद्रयः वृषणं सोमं वृषभाय सुस्वति ॥५॥१७॥ वृषा ते वज्रः उत ते वृषा रथः वृषणा हरी वृषभाणि आयुधा वृष्णः मदस्य वृषभ त्वं ईशिषे इंद्र सोमस्य वृषभस्य तृप्णुहि ॥ ६ ॥ प्र ते नावं न समने वचस्युवं ब्रह्मणा यामि सवनेषु दधृषिः कुवित् नः अस्य वचसः निऽबोधिषत् इंद्रं उत्सं न वसुनः सिचामहे ॥ ७ ॥ पुरा संऽबाधात् अभि आ ववृत्स्व नः धेनुः न वत्सं यवसस्य पिप्युषी सकृत् सु ते सुमतिऽभिः शतऽक्रतो॰ सं पत्नीभिः न वृषणः नसीमहि ॥८॥ नूनं सा ते प्रति वरं जरित्रे दुहीयत इंद्र

दक्षिणा मघोनीं शिक्ष स्तोतृऽभ्यः मा अति धक् भगः नः बृहत् वदेम विदथे सुवीराः ॥ ९ ॥ १८ ॥

॥१७॥ तत् अस्मै नव्यं अंगिरस्वत् अर्चत शुष्माः यत् अस्य प्रत्नऽथा उतऽईरते विश्वा यत् गोचा सहसा परिऽवृता मदे सोमस्य दंहितानि ऐरयत् ॥१॥ सः भूतु यः ह प्रथमाय धायसे ओजः मिमानः महिमानं आ अतिरत् शूरः यः युतऽसु तन्वं परिऽव्यत शीर्षणि द्यां महिना प्रति अमुंचत ॥२॥ अध अकृणोः प्रथमं वीर्यं महत् यत् अस्य अग्ने ब्रह्मणा शुष्मं ऐरयः रथेऽस्येन हरिऽअस्वेन विऽच्युताः प्र जीरयः सिस्रते सध्यक् पृथक् ॥३॥ अध यः विश्वा भुवना अभि मज्मना ईशानऽकृत प्रऽवयाः अभि अवर्धत आत् रोदसी ज्योतिषा वह्निः आ अतनोत् सी-ष्यन् तमांसि दुधिता सं अव्ययत् ॥४॥ सः प्राचीनान् पर्वतान् दंहत् ओजसा अधराचीनं अकृणोत् अपां अपः अधारयत् पृथिवीं विश्वऽधायसं अस्तभ्नात् मायया द्यां अवऽअसः ॥५॥१९॥ सः अस्मै अरं बाहुऽभ्यां यं पिता अकृणोत् विश्वसात् आ जनुषः वेदसः परि येन पृथिव्यां नि क्रिविं शयध्यै वज्रेण हत्वी अवृणक् तुविऽस्वनिः ॥ ६ ॥ अमाजूःऽइव पित्वोः सचा सती समानात् आ सदसः त्वां इये भगं कृधि प्रऽकेतं उप मासि आ भर दद्धि भागं तन्वः येन ममहः ॥७॥ भोजं त्वां इंद्र वयं हुवेम ददिः त्वं इंद्र अपांसि वाजान् अविड्ढि इंद्र चिचया नः ऊती कृधि वृषन् इंद्र वस्यसः नः ॥८॥ नूनं सा ते प्रति वरं जरित्रे दुहीयत इंद्र दक्षिणा मघोनी शिक्ष स्तोतृऽभ्यः मा अति धक् भगः नः बृहत् वदेम विदथे सुवीराः ॥ ९ ॥ २० ॥

॥ १८ ॥ प्रातः रथः नवः योजि सस्निः चतुःऽयुगः त्रिऽकशः सप्तऽरश्मिः दशऽअरिचः मनुषः स्वःऽसाः सः इष्टिऽभिः मन्तिऽभिः रंह्यः भूत् ॥१॥ सः अस्मै अरं प्रथमं सः द्वितीयं उतो तृतीयं मनुषः सः होता अन्यस्याः गर्भे अन्ये ऊं जनंत सः अन्येभिः सचते जेन्यः वृषा ॥२॥ हरी नु कं रथे इंद्रस्य योजं आऽये सुऽउक्तेन वचसा नवेन मो सु त्वां अत्र बहवः हि विप्राः नि रीरमन् यजमानासः अन्ये ॥३॥ आ द्वाभ्यां हरिऽभ्यां इंद्र याहि आ चतुःऽभिः आ षट्ऽभिः हूयमानः आ अष्टाभिः दशऽभिः सोमऽपेयं अयं सुतः सुऽमख मा मृधः कः० ॥४॥ आ विंशत्या चिंशता याहि अर्वाङ् आ चत्वारिंशता हरिऽभिः युजानः आ पंचाशता सुऽरथेभिः इंद्र आ षष्ट्या सप्तत्या सोमऽपेयं॥५॥२१॥ आ अशीत्या नवत्या याहि अर्वाङ् आ शतेन हरिऽभिः उह्यमानः अयं हि ते शुनऽहोत्रेषु सोमः इंद्र त्वाऽया परिऽसिक्तः मदाय ॥६॥ मम ब्रह्म इंद्र याहि अच्छ विश्वा हरी धुरि धिष्व रथस्य पुरुऽचा हि विऽहव्यः बभूथ अस्मिन् सूर सवने माद्यस्व ॥७॥ न मे इंद्रेण सख्यं वि योषत् अस्मभ्यं अस्य दक्षिणा दुहीत उप ज्येष्ठे वरूथे गभस्तौ प्रायेऽप्राये जिगीवांसः स्याम ॥८॥ नूनं सा ते प्रति वरं जरित्रे दुहीयत् इंद्र दक्षिणा मघोनी शिक्षा स्तोतृऽभ्यः मा अति धक् भगः नः बृहत् वदेम विदथे सुवीराः ॥ ९ ॥ २२ ॥

॥ १९ ॥ अपांयि अस्य अंधसः मदाय मनीषिणः सुवानस्य प्रयसः यस्मिन् इंद्रः प्रऽदिवि ववृधानः ओकः दधे ब्रह्मण्यंतः चनरः॥१॥ अस्य मंदानः मघवः वज्रऽहस्तः अहिं इंद्रः अर्णःऽवृतं

वि वृश्चत् प्र यत् वयः न स्वसराणि अच्छ प्रयांसि च नदीनां चक्रमंत ॥२॥ सः माहिनः इंद्रः अर्णः अपां प्र ऐरयत् अहिऽहा अच्छ समुद्रं अजनयत् सूर्यं विदत् गाः अक्तुना अह्नां वयुनानि साधत ॥३॥ सः अप्रतीनि मनवे पुरूणि इंद्रः दाशत् दाशुषे हंति वृचं सद्यः यः नृऽभ्यः अतसाय्यः भूत् पस्पृधानेभ्यः सूर्यस्य सातौ ॥४॥ सः सुन्वते इंद्रः सूर्यं आ देवः रिणक् मर्त्याय स्तुवान् आ यत् रयिं गुहतऽअवद्यं अस्मै भरत् अंशः न एतशः दशस्यन् ॥५॥२३॥ सः रंधयत् सऽदिवः सारथये शुष्णं अशुषं कुयवं कुत्साय दिवःऽदासाय नवतिं च नव इंद्रः पुरः वि ऐरत् शंबरस्य ॥६॥ एव ते इंद्र उचथं अहेम अवस्या न त्मना वाजयंतः अश्याम तत् साप्नं आशुषाणाः ननमः वधः अदेवस्य पीयोः ॥७॥ एव ते गृत्सऽमदाः शूर मन्म अवस्यवः न वयुनानि तक्षुः ब्रह्मण्यंतः इंद्र ते नवीयः इषं ऊर्जं सुऽक्षितिं सुम्नं अश्युः ॥८॥ नूनं सा ते प्रति वरं जरित्रे दुहीयत् इंद्र दक्षिणा मघोनी शिक्षा स्तोतृऽभ्यः मा अति धक् भगः नः बृहत् वदेम विदथे सुवीराः ॥९॥२४॥

॥२०॥ वयं ते वयः इंद्र विडि सु नः प्र भरामहे वाजऽयुः न रथं विपन्यवः दीध्यतः मनीषा सुम्नं इयक्षंतः त्वाऽवंतः नृन् ॥१॥ त्वं नः इंद्र त्वाभिः ऊती त्वाऽयतः अभिष्टिऽपा असि जनान् त्वं इनः दाशुषः वरूता इत्थाऽधीः अभि यः नक्षति त्वा ॥२॥ सः नः युवा इंद्रः जोहूचः सखा शिवः नरां अस्तु पाता यः शंसंतं यः शशमानं ऊती पचंतं च स्तुवंतं च प्रऽनेषत् ॥३॥ तं ऊं स्तुषे इंद्रं तं गृणीषे यस्मिन् पुरा ववृधुः शाशदुः च सः वस्वः कामं पीपरत् इयानः ब्रह्मण्यतः नूतनस्य आयोः ॥४॥ सः अंगिरसां

उचथा जुजुष्वान् ब्रह्म तूतोत इंद्रः गातुं इष्णन् मुष्णन् उषसः सूर्येण स्तवान् अश्नस्य चित् शिश्नथत् पूर्व्याणि ॥५॥२५॥ सः ह श्रुतः इंद्रः नाम देवः ऊर्ध्वः भुवत् मनुषे दस्मऽतमः अव प्रियं अर्शसानस्य सद्मान् शिरः भरत् दासस्य स्वधाऽवान् ॥६॥ सः वृचऽहा इंद्रः कृष्णऽयोनीः पुरंऽदरः दासीः ऐरयत् वि अजनयत् मनवे क्षां अपः च सचा शंसं यजमानस्य तूतोत् ॥७॥ तस्मै तवस्यं अनु दायिसचा इंद्राय देवेभिः अर्णऽसातौ प्रति यत् अस्य वज्रं बाह्वोः धुः हत्वी दस्यून् पुरः आयसीः नि तारीत् ॥८॥ नूनं सा ते प्रति वरं जरित्रे दुहीयत् इंद्र दक्षिणा मघोनी शिक्षा स्तोतृऽभ्यः मा अति धक् भगः नः बृहत् वदेम विदथे सुवीराः ॥९॥२६॥

॥२१॥ विश्वऽजिते धनऽजिते स्वःऽजिते सचाऽजिते नृऽजिते उर्वराऽजिते अश्वऽजिते गोऽजिते अप्ऽजिते भर इंद्राय सोमं यजताय हर्यतं ॥१॥ अभिऽभुवे अभिऽभंगाय वन्वते अषाळ्हाय सहमानाय वेधसे तुविऽग्रये वहये दुस्तरीतवे सचाऽसहे नमः इंद्राय वोचत ॥२॥ सचाऽसहः जनऽभक्षः जनंऽसहः च्यवनः युध्मः अनु जोषं उक्षितः वृतंऽचयः सहुरिः विक्षु आरितः इंद्रस्य वोचं प्र कृतानि वीर्या ॥३॥ अननुऽदः वृषभः दोधतः वधः गंभीरः शृष्वः असमष्टऽकाव्यः रध्रऽचोदः अथनः वीळितः पृथुः इंद्रः सुऽयज्ञः उषसः स्वः जनत् ॥४॥ यज्ञेन गातुं अप्ऽतुरः विविदिरे धियः हिन्वानाः उशिजः मनीषिणः अभिऽस्वरा निऽसदा गाः अवस्यवः इंद्रे हिन्वानाः द्रविणानि आशत ॥५॥ इंद्र श्रेष्ठानि द्रविणानि धेहि चित्तिं दक्षस्य सुभगऽत्वं अस्मे पोषं रयीणां अरिष्टिं तनूनां स्वाद्मानं वाचः सुदिनऽत्वं अह्नां ॥६॥२७॥

॥२२॥ चिऽकंदुकेषु महिषः यवऽआशिरं तुविऽशुष्मः तृपत् सोमं अपिबत् विष्णुना सुतं यथा अवशत् सः ईं ममाद् महि कर्म कर्तवे महां उरुः सः एनं सश्चत् देवः देवं सत्यं इंद्रं सत्यः इंदुः ॥१॥ अध त्विषिऽमान् अभि ओजसा क्रिविं युधा अभवत् आ रोदसी अपृणत् अस्य मज्मना प्र ववृधे अधत्त अन्यं जठरे प्र ईं अरिच्यत सः एनं सश्चत् देवः देवं सत्यं इंद्रं सत्यः इंदुः ॥२॥ साकं जातः क्रतुना साकं ओजसा ववक्षिथ साकं वृद्धः वीर्यैः ससहिः मृधः विऽचर्षणिः दाता राधः स्तुवते काम्यं वसु सः एनं सश्चत् देवः देवं सत्यं इंद्रं सत्यः इंदुः॥३॥ तवत्यत् नर्यं नृतो अपः इंद्र प्रथमं पूर्व्यं दिवि प्रऽवाच्यं कृतं यत् देवस्य शवसा प्र अरिणाः असुं रिणन् अपः भुवत् विश्वं अभि अदेवं ओजसा विदात् ऊर्जं शतऽक्रतुः विदात् इषं ॥४॥२८॥२॥

॥२३॥ गणानां त्वा गणऽपतिं हवामहे कविं कवीनां उपमश्रवःऽतमं ज्येष्ठऽराजं ब्रह्मणां ब्रह्मणः पते आ नः शृण्वन् ऊतिऽभिः सीद सदनं॥१॥ देवाः चित् ते असुर्ये प्रऽचेतसः बृहस्पते यज्ञियं भागं आनशुः उस्राःऽइव सूर्यः ज्योतिषा महः विश्वेषां इत् जनिता ब्रह्मणां असि ॥२॥ आ विऽबाध्य परिऽरपः तमांसि च ज्योतिष्मंतं रथं ऋतस्य तिष्ठसि बृहस्पते भीमं अमिचऽदंभनं रक्षःऽहनं गोचऽभिदं स्वःऽविदं ॥३॥ सुनीतिऽभिः नयसि चायसे जनं यः तुभ्यं दाशात् न तं अंहः अश्नवत् ब्रह्मऽद्विषः तपनः मन्युऽमीः असि बृहस्पते महि तत् ते महिऽत्वनं ॥४॥ न तं अंहः न दुःऽइतं कुतः चन न अरातयः तितिरुः न द्वयाविनः विश्वाः इत् अस्मात् ध्वरसः वि बाधसे यं सुऽगोपाः

रक्षांसि ब्रह्मणः पते ॥५॥२९॥ त्वं नः गोपाः पथिऽकृत् विऽचक्षणः तव व्रताय मतिऽभिः जरामहे बृहस्पते यः नः अभि ह्वरः दधे स्वा तं मर्मर्तु दुच्छुना हरस्वती ॥६॥ उत वा यः नः मर्चयात् अनागसः अरातिऽवा मर्तः सानुकः वृकः बृहस्पते अप तं वर्तय पथः सुऽगं नः अस्यै देवऽवीतये कृधि ॥७॥ चातारं त्वा तनूनां हवामहे अवऽस्पर्तः अधिऽवक्तारं अस्मऽयुं बृहस्पते देवऽनिदः नि बर्हय मा दुःऽएवाः उत्ऽतरं सुम्नं उत् नशन् ॥८॥ त्वया वयं सुऽवृधा ब्रह्मणः पते स्याम हि वसु मनुष्या आ ददीमहि याः नः दूरे तळितः याः अरातयः अभि संति जंभय ताः अनप्नसः ॥९॥ त्वया वयं उत्ऽतमं धीमहे वयः बृहस्पते पक्षिणा सक्षिना युजा मा नः दुःऽशंसः अभिऽदिप्सुः ईशत प्र सुऽशंसाः मतिऽभिः तारिषीमहि ॥१०॥३०॥ अननुऽदः वृषभः जग्मिः आऽहवं निःऽतप्ता शत्रुं पृतनासु सस्हिः असि सत्यः ऋणऽया ब्रह्मणः पते उग्रस्य चित् दमिता वीळुऽहर्षिणः ॥११॥ अदेवेन मनसा यः रिषण्यति शासां उग्रः मन्यमानः जिघांसति बृहस्पते मा प्रणक् तस्य नः वधः नि कर्म मन्युं दुःऽएवस्य शर्धतः ॥१२॥ भरेषु हव्यः नमसा उपऽसद्यः गंता वाजेषु सनिता धनंऽधनं विश्वाः इत् अर्यः अभिऽदिप्स्वः मृधः बृहस्पतिः वि ववर्ह रथांनऽइव ॥१३॥ तेजिष्ठया तपनी रक्षसः तप ये त्वा निदे दधिरे दृष्टऽवीर्यं आविः तत् कृष्व यत् असत् ते उक्थ्यं बृहस्पते वि परिऽरपः अर्दय ॥१४॥ बृहस्पते अति यत् अर्यः अहीत् द्युऽमत् विऽभाति क्रतुऽमत् जनेषु यत् दीदयत् शवसा ऋतुऽप्रजात तत् अस्मासु द्रविणं धेहि चित्रं ॥१५॥३१॥ मा नः स्तेनेभ्यः ये अभि दुहः पदे निरामिणः रिपवः अब्रह्मेषु जगृधुः आ देवानां ओहते वि

व्रयः हृदि बृहस्पते न परः साम्नः विदुः ॥१६॥ विश्वेभ्यः हि त्वा भुवनेभ्यः परि त्वष्टा अजनत् साम्नः साम्नः कविः सः ऋणः चित् ऋणः याः ब्रह्मणः पतिः दुहः हंता महः ऋतस्य धर्तरि ॥१७॥ तव श्रिये वि अजिहीत पर्वतः गवां गोत्रं उत असृजः यत् अंगिरः इद्रिण युजा तमसा परिऽवृतं बृहस्पते निः अपां औब्जः अर्णवं ॥१८॥ ब्रह्मणः पते त्वं अस्य यंता सुऽउक्तस्य बोधि तनयं च जिन्व विश्वं तत् भद्रं यत् अवंति देवाः बृहत् वदेम विदथे सुऽवीराः ॥१९॥३२॥६॥

॥२४॥ सः इमां अविड्ढि प्रऽभृतिं यः ईशिषे अया विधेम नवया महा गिरा यथा नः मीढ्वान् स्तवते सखा तव बृहस्पते सीसधः सः उत नः मतिं ॥१॥ यः नंत्वानि अनमत् नि ओजसा उत अदृढः मन्युना शंबराणि वि प्र अच्यवयत् अच्युता ब्रह्मणः पतिः आ च अविशत् वसुऽमंतं वि पर्वतं ॥२॥ तत् देवानां देवऽतमाय कर्वे अभवन् हव्हा अवंदंत वीळिता उत् गाः आजत् अभिनत् ब्रह्मणा वलं अगूहत् तमः वि अचक्षयत् स्वः० ॥३॥ अश्मऽआस्यं अवतं ब्रह्मणः पतिः मधुऽधारं अभि यं ओजसा अतृणत् तं एव विश्वे पपिरे स्वःऽदृशः बहु साकं सिसिचुः उत्सं उद्रिणं ॥४॥ सनात् ता का चित् भुवना भवीत्वा मातऽभिः शरत्ऽभिः दुरः वरंत वः अयतंत चरतः अन्यतऽअन्यत इत् या चकार वयुना ब्रह्मणः पतिः ॥५॥७॥ अभिऽनक्षंतः अभि ये तं आनशुः निऽधिं पणीनां परमं गुहा हितं ते विद्वांसः प्रतिऽचक्ष्य अनृता पुनः यतः ऊं आयन् तत उत ईयुः आऽविशं ॥६॥ ऋतऽवानः प्रतिऽचक्ष्य अनृता पुनः आ अतः आ तस्युः कवयः महः पथः

ते बाहुऽभ्यां धमितं अग्निं अश्मनि नाकिः सः अस्ति अरणः जहुः हि तं ॥७॥ ऋतऽज्येन क्षिप्रेण ब्रह्मणः पतिः यत्र वष्टि प्र तत् अश्नोति धन्वना तस्य साध्वीः इषवः याभिः अस्यति नृऽचक्षसः दृशये कर्णऽयोनयः ॥८॥ सः संऽनयः सः विऽनयः पुरःऽहितः सः सुऽस्तुतः सः युधि ब्रह्मणः पतिः चाक्ष्मः यत् वाजं भरते मती धना आत् इत् सूर्यः तपति तप्यतुः वृथा ॥९॥ विऽभु प्रऽभु प्रथमं मेहनाऽवतः बृहस्पतेः सुऽविदत्राणि राध्या इमा सातानि वेन्यस्य वाजिनः येन जनाः उभये भुंजते विशः ॥१०॥२॥ यः अवरे वृजने विश्वऽथा विऽभुः महां ऊं रण्वः शवसा ववक्षिथ सः देवः देवान् प्रति पप्रथे पृथु विश्वा इत् ऊं ता परिऽभूः ब्रह्मणः पतिः ॥११॥ विश्वं सत्यं मघऽवाना युवोः इत् आपः चन प्र मिनंति व्रतं वां अच्छ इंद्राब्रह्मणस्पती हविः नः अन्नं युजाऽइव वाजिना जिगातं ॥१२॥ उत आशिष्ठाः अनु शृण्वंति वह्नयः सभेयः विप्रः भरते मती धना वीळुऽद्वेषाः अनु वशा ऋणं आऽददिः सः ह वाजी संऽइत्थे ब्रह्मणः पतिः ॥१३॥ ब्रह्मणः पतेः अभवत् यथाऽवशं सत्यः मन्युः महि कर्मा करिष्यतः यः गाः उतऽआजत् सः दिवे वि च अभजत् महीऽइव रीतिः शवसा असरत् पृथक् ॥१४॥ ब्रह्मणः पते सुऽयमस्य विश्वहा रायः स्याम रथ्यः वयस्वतः वीरेषु वीरान् उप पृङ्धि नः त्वं यत् ईशानः ब्रह्मणा वेषि मे हवं ॥१५॥ ब्रह्मणः पते त्वं अस्य यंता सुऽउक्तस्य बोधि तनयं च जिन्व विश्वं तत् भद्रं यत् अवंति देवाः बृहत् वदेम विदथे सुऽवीराः ॥ १६ ॥ ३ ॥

॥ २५ ॥ इंधानः अग्निं वनवत् वनुष्यतः कृतऽब्रह्मा शूशु-

वत् रातऽहव्यः इत् जातेन जातं अति सः प्र सर्सृते यंऽयं युजं कृणुते ब्रह्मणः पतिः॥१॥ वीरेभिः वीरान् वनवत् वनुष्यतः गोभिः रयिं पप्रथत् बोधति त्मना तोकं च तस्य तनयं च वर्धते यंऽयं युजं कृणुते ब्रह्मणः पतिः॥२॥ सिंधुः न क्षोदः शिमीऽवान् ऋघायतः वृषाऽइव वध्रीन् अभि वष्टि ओजसा अग्नेःऽइव प्रऽसितिः न अह वर्तवे यंऽयं युजं कृणुते ब्रह्मणः पतिः॥३॥ तस्मै अर्षति दिव्याः असश्चतः सः सत्वऽभिः प्रथमः गोषु गच्छति अनिभृष्टऽतविषिः हंति ओजसा यंऽयं युजं कृणुते ब्रह्मणः पतिः॥४॥ तस्मै इत् विश्वे धुनयंत सिंधवः अच्छिद्रा शर्म दधिरे पुरूणि देवानां सुम्ने सुऽभगः सः एधते यंऽयं युजं कृणुते ब्रह्मणः पतिः॥५॥४॥

॥२६॥ ऋजुः इत् शंसः वनवत् वनुष्यतः देवऽयन् इत् अदेवऽयंतं अभि असत् सुप्रऽअवीः इत् वनवत् पृत्ऽसु दुस्तरं यज्वा इत् अयज्योः वि भजाति भोजनं॥१॥ यजस्व वीर प्र विहि मनायतः भद्रं मनः कृणुष्व वृचऽतूर्यं हविः कृणुष्व सुऽभगः यथा असंसि ब्रह्मणः पतेः अवः आ वृणीमहे॥२॥ सः इत् जनेन सः विशा सः जन्मना सः पुचैः वाजं भरते धना नृऽभिः देवानां यः पितरं आऽविवासति श्रद्धाऽमनाः हविषा ब्रह्मणः पतिं॥३॥ यः अस्मै हव्यैः घृतवत्ऽभिः अविधत् प्रतं प्राचा नयति ब्रह्मणः पतिः उरुष्यति ईं अंहसः रक्षति रिषः अंहोः चित् अस्मै उरुऽचक्रिः अद्भुतः॥४॥५॥

॥२७॥ इमाः गिरः आदित्येभ्यः घृतऽस्नूः सनात् राजऽभ्यः जुह्वा जुहोमि शृणोतु मित्रः अर्यमा भगः नः तुविऽजातः वरुणः

दक्षः अंशः॥७॥ इमं स्तोमँसऽऋतवः मे अद्य मित्रः अर्यमा वरुणः जुषंत आदित्यासः भुवयः धारऽपूताः अवृजिनाः अनवद्याः अरिष्टाः॥२॥ ते आदित्यासः उरवः गभीराः अदब्धासः दिप्सँतः भूरिऽअक्षाः अंतः पश्यंति वृजिना उत साधु सर्वं राजऽभ्यः परमा चित् अंति ॥३॥ धारयँतः आदित्यासः जगत् स्थाः देवाः विश्वस्य भुवनस्य गोपाः दीर्घऽधियः रक्षमाणाः असुर्यं ऋतऽवानः चयमानाः ऋणानि॥४॥ विद्यां आदित्याः अवसः वः अस्य यत् अर्यमन् भये आ चित् मयःऽभु युष्माकँ मित्रावरुणा प्रऽनीतौ परि श्वभ्राऽइव दुःऽइतानि वृज्यां॥५॥६॥ सुऽगः हि वः अर्यमन् मित्र पंथाः अनृक्षरः वरुण साधुः अस्ति तेन आदित्याः अधि वोचत नः यच्छत नः दुःऽपरिहंतु शर्म॥६॥ पिपर्तु नः अदितिः राजऽपुत्रा अति द्वेषाँसि अर्यमा सुऽगेभिः बृहत् मित्रस्य वरुणस्य शर्म उप स्याम पुरुऽवीराः अरिष्टाः॥७॥ तिस्रः भूमीः धारयन् चीन् उत द्यून् चीणि व्रता विदथे अंतः एषां ऋतेन आदित्याः महि वः महिऽत्वं तत् अर्यमन् वरुण मित्र चारु॥८॥ चीरोचना दिव्या धारयंत हिरण्ययाः भुवयः धारऽपूताः अस्वप्नऽजः अनिऽमिषाः अदब्धाः उरुऽशंसाः ऋजवे मर्त्याय॥९॥ त्वं विश्वेषां वरुण असि राजा ये च देवाः असुर ये च मर्ताः शतं नः रास्व शरदः विऽचक्षे अश्यामं आयूँषि सुऽधितानि पूर्वा॥१०॥७॥ न दक्षिणा वि चिकिते न सव्या न प्राचीनं आदित्याः न उत पश्चा पाक्या चित् वसवः धीर्या चित् युष्माऽनीतः अभयं ज्योतिः अश्यां॥११॥ यः राजऽभ्यः ऋतनिऽभ्यः ददाश यं वर्धयंति पुष्टयः च नित्याः सः रेवान् याति प्रथमः रथेन वसुऽदावा विदथेषु प्रऽशस्तः॥१२॥ शुचिः अपः सुऽयवसाः अदब्धः उप क्षेति

वृङऽवयाः सुऽवीरः नकिः तं घ्नंति अंतितः न दूरात् यः आदित्यानां भवति प्रऽनीतौ ॥१३॥ अदिते मित्र वरुण उत मृळ यत् वः वयं चकृम कत् चित् आगः उरु अश्याम् अभयं ज्योतिः इंद्र मा नः दीर्घाः अभि नशन् तमिस्राः ॥१४॥ उभे अस्मै पीपयतः संऽईची० दिवः वृष्टिं सुऽभगः नाम पुष्यन् उभा क्षयौ आऽजयन् याति पृतऽसु उभौ अर्धौ भवतः साधू अस्मै ॥१५॥ याः वः मायाः अभिऽदुहे यजत्राः पाशाः आदित्याः रिपवे विऽचृत्ताः अश्वीऽइव तान् अति येषं रथेन अरिष्टाः उरौ आ शर्मन् स्याम ॥१६॥ मा अहं मघोनः वरुण प्रियस्य भूरिऽदावन्ः आ विदं पूनं आपेः मा रायः राजन् सुऽयमात् अव स्थां बृहत् वदेम विदथे सुऽवीराः ॥१७॥८॥

॥२८॥ इदं कवेः आदित्यस्य स्वऽराजः विश्वानि संति अभि अस्तु महा अति यः मंद्रः यजथाय देवः सुऽकीर्ति भिक्षे वरुणस्य भूरेः ॥१॥ तव व्रते सुऽभगासः स्याम सुऽआध्यः वरुण तुरस्तुऽवांसः उपऽअयने उषसां गोऽमतीनां अपयः न जरमाणाः अनु द्यून ॥२॥ तव स्याम पुरुऽवीरस्य शर्मन् उरुऽशंसस्य वरुण प्रऽनेतः० यूयं नः पुचाः अदितेः अदब्धाः अभि क्षमध्वं युज्याय देवाः ॥३॥ प्र सी आदित्यः असृजत् विऽधर्ता ऋतं सिंधवः वरुणस्य यंति न ष्वाम्यंति न वि मुचंति एते वयः न पप्तुः रघुऽया परिऽज्मन् ॥४॥ वि मत् अथय रश्नांऽइव आगः ऋध्याम ते वरुण खां ऋतस्य मा तंतुः छेदि वयतः धियं मे मा मात्रा शारि अपसः पुरा ऋतोः ॥५॥९॥ अपो सु म्यक्ष वरुण भियसं मत् संऽराट् ऋतंऽवः अनु मा गृभाय दामंऽइव वत्सात् वि मुमुग्धि

अंहः नहि त्वत् आरे निऽमिषः चन ईशे ॥६॥ मा नः वधैः वरुण ये ते इष्टौ एनः कृण्वंतं असुर भीर्णंति मा ज्योतिषः प्रऽवस्थानि गन्म वि सु मृधः शिश्रथः जीवसे नः ॥७॥ नमः पुरा ते वरुण उत नूनं उत अपरं तुविऽजात ब्रवाम त्वे इ हि कं पर्वते न श्रितानि अप्रऽच्युतानि दुःऽदभ व्रतानि ॥८॥ परा ऋणा सावीः अध मत्ऽकृतानि मा अहं राजन् अन्यऽकृतेन भोजं अविऽउष्टाः इत् नु भूयसीः उषसः आ नः जीवान् वरुण तासु शाधि ॥९॥ यः मे राजन् युज्यः वा सखा वा स्वप्ने भयं भीरवे मह्यं आह स्तेनः वा यः दिप्सति नः वृकः वा त्वं तस्मात् वरुण पाहि अस्मान् ॥१०॥ मा अहं मघोनः वरुण प्रियस्य भूरिऽदावुः आ विदं पूनं आपेः मा रायः राजन् सुऽयमात् अवस्थां बृहत् वदेम विदथे सुऽवीराः ॥११॥ १० ॥

॥ २९ ॥ धृतऽव्रताः आदित्याः इषिराः आरे मत् कर्त रहसूःऽइव आगः मृण्वतः वः वरुण मित्र देवाः भद्रस्य विद्वान् अवसे हुवे वः ॥१॥ यूयं देवाः प्रऽमतिः यूयं ओजः यूयं द्वेषांसि सनुतः युयोत अभिऽक्षत्तारः अभि च क्षमध्वं अद्य च नः मृळयत अपरं च ॥२॥ किं ऊं नु वः कृणवाम अपरेण किं सनेन वसवः आप्येन यूयं नः मित्रावरुणा अदिते च स्वस्तिं इंद्रामरुतः दधात ॥३॥ हये देवाः यूयं इत आपयः स्थ ते मृळत नाधमानाय मह्यं मा वः रथःमध्यमऽवाट् ऋते भूत मा युष्मावंतऽसु आपिषु श्रमिष्म ॥४॥ प्र वः एकः मिमय भूरि आगः यत् मा पिताऽइव कितवं शशास आरे पाशाः आरे अघानि देवाः मा मा अधि पुत्रे विंऽइव गभीष्ट ॥५॥ अवीचः अद्य भवत यजत्राः आ वः हार्दि भयमानः व्ययेयं चाध्वं

नःदेवाःनिऽजुरंःवृकस्यचाध्वंकर्तात्अवऽपदंःयजचाः॥६॥मा अहंमघोनंःवरुणप्रियस्यभूरिऽदावंःआविदंपूनंआपेःमा रायःराजन्सुऽयमात्अवस्यांबृहत्वदेमविदथेसुऽवीराः ॥७॥११॥

॥३०॥ऋतंदेवायकृण्वतेसविचेइंद्रायअहिऽघ्नेनरमंतेआपः अहंःऽअहःयातिअक्तुःअपांकियंतिआप्रथमःसर्गःआसां ॥१॥यःवृचायसिनंअचअभरिष्यत्प्रतंजनिंचीविदुषेउवाच पथःरदंतीःअनुजोषंअस्मैदिवेऽदिवेधुनयःयंतिअर्थं॥२॥ऊ-र्ध्वःहिअस्थात्अधिअंतरिक्षेअधवृचायप्रवधंजभारमिहं वसानःउपहिईंअदुद्रोत्तिग्मऽआयुधःअजयत्शचुंइंद्रः॥३॥ बृहस्पतेतपुषाअश्नाऽइवविध्यवृकऽह्रसःअसुरस्यवीरान् यथाजघंथधृषतापुराचित्एवजहिशचुंअस्माकंइंद्र॥४॥अव क्षिपदिवःअश्मानंउच्चायेनंशचुंमंदसानःनिऽजूवींःतोकस्य सातौतनयस्यभूरेंःअस्मान्अर्धकृणुतात्इंद्रगोनां॥५॥१२॥ प्रहिक्रतुंवृहथंःयंवनुथःरध्रस्यस्थःयजमानस्यचोदौइंद्रासो-मायुवंअस्मान्अविष्टंअस्मिन्भयऽस्थेकृणुतंऊंलोकं॥६॥ नमातमतनश्रमतनउततंद्रतनवोचामसुनोतइतिसोमं यःमेपृणात्यःददत्यःनिऽबोधात्यःमासुन्वंतंउपगोभिः आआयत॥७॥सरस्वतित्वंअस्मान्अविड्ढिमरुत्वतीधृषती जेषिशचूनत्यंचित्शर्धंतंतविषीऽयमाणंइंद्रःहंतिवृषभंशंडि-कानां॥८॥यःनःसनुत्यःउतवाजिघत्नुःअभिऽख्यायंतंतिगि-तेनविध्यबृहस्पतेआयुधैःजेषिशचून्दुहेरिषंतंपरिधेहिराजन् ॥९॥अस्माकेभिःसत्वऽभिःशूरशूरैःवीर्याकृधियानितेकर्त्वानि

ज्योक् अभूवन् अनुऽधूपितासः हुत्वी तेषाँ आ भर नः वसूनि ॥१०॥ तं वः शर्धं मारुतं सुम्नऽयुः गिरा उप ब्रुवे नमसा दैव्यं जनं यथा रयिं सर्वऽवीरं नशामहै अपत्यऽसाचं शुत्यं दिवेऽदिवे ॥११॥१३॥

॥३१॥ अस्माकँ मित्रावरुणा अवतं रथं आदित्यैः रुद्रैः वसुऽभिः सचाऽभुवा प्र यत् वयः न पप्रथन् वसवनः परि अवस्यवः हृषीऽवंतः वनऽसदः॥१॥ अध स्म नः उत अवत सऽजोषसः रथं देवासः अभि विक्षु वाजऽयुं यत् आशवः पद्याभिः तितुतः रजः पृथिव्याः सानौ जंघनंत पाणिऽभिः॥२॥ उत स्यः नः इंद्रः विश्वऽचर्षणिः दिवः शर्धेन मारुतेन सुऽक्रतुः अनु नु स्यात् अवृकाभिः ऊतिऽभिः रथं महे सनये वाजऽसातये॥३॥ उत स्यः देवः भुवनस्य सक्षणिः त्वष्टा गाभिः सऽजोषाः जूजुवत् रथं इळा भगः बृहत्ऽदिवा उत रोदसी पूषा पुरंऽधिः अश्विनौ अध पतीं॥४॥ उत त्ये देवी सुऽभगे मिथुऽदृशा उषासानक्ता जगतां अपिऽजुवा स्तुषे यत् वां पृथिवि नव्यसा वचः स्यातुः च वयः चिऽवयाः उपऽस्तिरे॥५॥ उत वः शंसं उशिजाँऽइव श्मसि अहिः बुध्यः अजः एकऽपात् उत चितः ऋभुक्षाः सविता चनः दधे अपां नपात् आशुऽहेमा धिया शमि॥६॥ एता वः वश्मि उतऽयता यजत्राः अतक्षन् आयवः नव्यसे सं अवस्यवः वाजं चकानाः सप्तिः न रथ्यः अहं धीतिं अश्याः॥७॥१४॥

॥३२॥ अस्य मे द्यावापृथिवी ऋतऽयतः भूतं अविची वचसः सिसासतः ययोः आयुः प्रऽतरं ते इदं पुरः उपऽस्तुते वसुऽयुः वां

महः दधे॥१॥ मा नः गुह्याः रिपः आयोः अहन् दभन् मा नः आभ्यः रीरधः दुच्छुनाभ्यः मा नः वि यौः सख्या विद्धि तस्य नः सुऽयता मनसा तत् त्वा ईमहे॥२॥ अहेळता मनसा शुष्टिं आ वह दुहानां धेनुं पिप्युषीं असश्चतं पद्याभिः आशुं वचसा च वाजिनं त्वां हिनोमि पुरुऽहूत विश्वहा॥३॥ राकां अहं सुऽहवां सुऽस्तुती हुवे शृणोतु नः सुऽभगा बोधतु त्मना सीव्यतु अपः सूच्या अच्छिद्यमानया ददातु वीरं शतऽदायं उक्थ्यं॥४॥ याः ते राके सुऽमतयः सुऽपेशसः याभिः ददासि दाशुषे वसूनि ताभिः नः अद्य सुऽमनाः उपऽआगहि सहस्रऽपोषं सुऽभगे रराणा॥५॥ सिनीवालि पृथुऽष्टुके या देवानां असि स्वसा जुषस्व हव्यं आऽहुतं प्रऽजां देवि दिदिड्ढि नः॥६॥ या सुऽबाहुः सुऽअंगुरिः सुऽसूमा बहुऽसूवरी तस्यै विश्पत्न्यै हविः सिनीवाल्यै जुहोतन॥७॥ या गुंगूः या सिनीवाली या राका या सरस्वती इंद्राणी अह्वे ऊतये वरुणानी स्वस्तये॥८॥१५॥३॥

॥३३॥ आ ते पितः मरुतां सुम्नं एतु मा नः सूर्यस्य संऽदृशः युयोथाः अभि नः वीरः अर्वति क्षमेत प्र जायेमहि रुद्र प्रऽजाभिः॥१॥ त्वाऽदत्तेभिः रुद्र शंऽतमेभिः शतं हिमाः अशीय भेषजेभिः वि अस्मत् द्वेषः विऽतरं वि अंहः वि अमीवाः चातयस्व विषूचीः॥२॥ श्रेष्ठः जातस्य रुद्र श्रिया असि तवःऽतमः तवसां वज्रऽबाहो° पर्षि नः पारं अंहसः स्वस्ति विश्वाः अभिऽइतीः रपसः युयोधि॥३॥ मा त्वा रुद्र चुक्रुधाम नमःऽभिः मा दुःऽस्तुती वृषभ मा सऽहूती उत नः वीरान् अर्पय भेषजेभिः भिषक्ऽतमं त्वा भिषजां शृणोमि॥४॥ हवींमऽभिः हवते यः हविःऽभिः अव स्तोमेभिः

रुद्रं दिषीय हृदूदरः सुऽहवः मा नः अस्यै बभुः सुऽशिप्रः रीरधत् मनायै॥५॥१६॥ उत् मा ममंद वृषभः मरुत्वान् त्वक्षीयसा वयसा नाधमानं घृणिऽइव छायां अरपाः अशीय आ विवासेयं रुद्रस्य सुम्नं॥६॥ क्व स्यः ते रुद्र मृळयाकुः हस्तः यः अस्ति भेषजः जलाषः अपऽभर्ता रपसः दैव्यस्य अभि नु मा वृषभ चक्षमीथाः॥७॥ प्र बभ्रवे वृषभाय श्वितीचे महः महीं सुऽस्तुतिं ईरयामि नमस्य कल्मलीकिनं नमःऽभिः गृणीमसि त्वेषं रुद्रस्य नाम॥८॥ स्थिरेभिः अंगैः पुरुऽरूपः उग्रः बभ्रुः शुक्रेभिः पिपिशे हिरण्यैः ईशानात् अस्य भुवनस्य भूरेः न वै ऊं योषत् रुद्रात् असुर्यं॥९॥ अहैन् विभर्षि सायकानि धन्व अहैन् निष्कं यजतं विश्वऽरूपं अहैन् इदं दयसे विश्वं अभ्वं न वै ओजीयः रुद्र त्वत् अस्ति॥१०॥१७॥ स्तुहि श्रुतं गर्तऽसदं युवानं मृगं न भीमं उपऽहत्नुं उग्रं मृळ जरित्रे रुद्र स्तवानः अन्यं ते अस्मत् नि वपंतु सेनाः॥११॥ कुमारः चित् पितरं वंदमानं प्रति ननाम रुद्र उपऽयंतं भूरेः दातारं सतऽपतिं गृणीषे स्तुतः त्वं भेषजा रासि अस्मे॥१२॥ या वः भेषजा मरुतः शुचीनि या शंऽतमा वृषणः या मयःऽभु यानि मनुः अवृणीत पिता नः ता शं च योः च रुद्रस्य वश्मि॥१३॥ परि नः हेतिः रुद्रस्य वृज्याः परि त्वेषस्य दुःऽमतिः मही गात् अव स्थिरा मघवत्ऽभ्यः तनुष्व मीढ्वः तोकाय तनयाय मृळ॥१४॥ एव बभ्रो वृषभ चेकितान यथा देव न हृणीषे न हंसि हवनऽश्रुत् नः रुद्र इह बोधि बृहत् वदेम विदथे सुऽवीराः॥१५॥१८॥

॥३४॥ धारावराः मरुतः धृष्णुऽओजसः मृगाः न भीमाः तविषीभिः अर्चिनः अयासः न शुशुचानाः ऋजीषिणः भृमिं धमंतः

अपं गाः अवृण्वत ॥१॥ द्यावः न स्तृऽभिः चितयंत खादिनः वि अभियाः न द्युतयंत वृष्टयः रुद्रः यत् वः मरुतः रुक्मऽवक्षसः वृषा अजनि पृश्न्याः शुक्रे ऊधनि ॥२॥ उक्षंते अश्वान् अत्यान्ऽइव आजिषु नदस्य कर्णैः तुरयंते आशुऽभिः हिरण्यऽशिप्राः मरुतः दविध्वतः पृक्षं याथ पृषतीभिः सऽमन्यवः ॥३॥ पृक्षे ता विश्वा भुवना ववक्षिरे मिचायं वा सदं आ जीरऽदानवः पृषत्ऽअश्वासः अनवभ्रऽराधसः ऋजिप्यासः न वयुनेषु धूःऽसदः ॥४॥ इंधन्वऽभिः धेनुऽभिः रप्शदूधऽभिः अध्वसऽभिः पथिऽभिः भ्राजत्ऽऋष्टयः आ हंसासः न स्वसराणि गंतन मधोः मदाय मरुतः सऽमन्यवः ॥५॥१९॥ आ नः ब्रह्माणि मरुतः सऽमन्यवः नरां न शंसः सवनानि गंतन अश्वाऽइव पिप्यत धेनुं ऊधनि कर्तं धियं जरित्रे वाजऽपेशसं ॥६॥ तं नः दात मरुतः वाजिनं रथे आपानं ब्रह्म चितयत दिवेऽदिवे इषं स्तोतृऽभ्यः वृजनेषु कारवे सनिं मेधां अरिष्टं दुस्तरं सहः ॥७॥ यत् युंजते मरुतः रुक्मऽवक्षसः अश्वान् रथेषु भगे आ सुऽदानवः धेनुः न शिश्वे स्वसरेषु पिन्वते जनाय रातऽहविषे महीं इषं ॥८॥ यः नः मरुतः वृकऽतातिं मर्त्यः रिपुः दधे वसवः रक्षत रिषः वर्तयत तपुषा चक्रियां अभि तं अव रुद्राः अशसः हंतन वधः" ॥९॥ चित्रं तत् वः मरुतः यामं चेकिते पृश्न्याः यत् ऊधः अपिं आपयः दुहुः यत् वा निदे नवमानस्य रुद्रियाः चितं जरायु जुरतां अदाभ्याः ॥१०॥२०॥ तान् वः महः मरुतः एवऽयावः विष्णोः एषस्य प्रऽभृथे हवामहे हिरण्यऽवर्णान् ककुहान् यतऽस्रुचः ब्रह्मण्यंतः शंस्यं राधः ईमहे ॥११॥ ते दशऽग्वाः प्रथमाः यज्ञं ऊहिरे ते नः हिन्वंतु उषसः विऽउष्टिषु उषाः न रामीः अरुणीः अपं ऊर्णुते महः ज्योतिषा शुचता गोऽअर्णसा ॥१२॥ ते

क्षोणीभिः अरुणेभिः न अंजिऽभिः रुद्राः ऋतस्य सदनेषु ववृधुः निऽमेघमानाः अत्येन पाजसा सुऽचंद्रं वर्णं दधिरे सुऽपेशसं ॥१३॥ तान् इयानः महि वरूथं ऊतये उप घ इत् एना नमसा गृणीमसि चितः न यान् पंच होतॄन् अभिष्टये आऽववर्तत् अवरान् चक्रिया अवसे ॥१४॥ ययां रध्रं पारयथ अति अंहः ययां निदः मुंचथ वंदितारं अर्वाचीं सा मरुतः या वः ऊतिः ओ सु वाश्राऽइव सुऽमतिः जिगातु ॥ १५ ॥ २१ ॥

॥३५॥ उप ई असृक्षि वाजऽयुः वचस्यां चनः दधीत नाद्यः गिरः मे अपां नपात् आशुऽहेमा कुवित् सः सुऽपेशसः करति जोषिषत् हि ॥१॥ इमं सु अस्मै हृदः आ सुऽतष्टं मंचं वोचेम कुवित् अस्य वेदत् अपां नपात् असुर्यस्य महा विश्वानि अर्यः भुवना जजान ॥२॥ सं अन्याः यंति उप यंति अन्याः समानं ऊर्वं नद्यः पृणंति तं ऊं शुचिं शुचयः दीदिऽवांसं अपां नपातं परि तस्थुः आपः ॥३॥ तं असेराः युवतयः युवानं मर्मृज्यमानाः परि यंति आपः सः शुक्रेभिः शिक्वऽभिः रेवत् असे दीदाय अनिध्मः घृतऽनिर्निक् अप्ऽसु ॥४॥ अस्मै तिस्रः अव्यथ्याय नारीः देवाय देवीः दिधिषंति अन्नं कृताःऽइव उप हि प्रऽसर्से अप्ऽसुसः पीयूषं धयति पूर्वऽसूनां ॥५॥२२॥ अश्वस्य अत्र जनिम अस्य च स्वः दुहः रिषः संऽपृचः पाहि सूरीन् आमासु पूषु परः अप्रऽमृष्यं न अरातयः वि नशन् न अनृतानि ॥६॥ स्वे आ दमे सुऽदुघा यस्य धेनुः स्वधां पीपाय सुऽभु अन्नं अत्ति सः अपां नपात् ऊर्जयन् अप्सु अंतः वसुऽदेयाय विधते वि भाति ॥७॥ यः अप्ऽसु आ शुचिना दैव्येन ऋतऽवा अजस्रः उर्विया विऽभाति वयाः इत् अन्या

भुवनानि अस्य प्र जायंते वीरुधः च प्रऽजाभिः॥८॥ अपां नपात् आ हि अस्थात् उपऽस्थे जिह्मानाम् ऊर्ध्वः विऽद्युतं वसानः तस्य ज्येष्ठं महिमानं वहंतीः हिरण्यऽवर्णाः परि यंति यह्वीः॥९॥ हिरण्यऽरूपः सः हिरण्यऽसंदृक् अपां नपात् सः इत् ऊं हिरण्यऽवर्णः हिरण्ययात् परि योनेः निऽसद्य हिरण्यऽदाः ददति अन्नं अस्मै॥१०॥२३॥ तत् अस्य अनीकं उत चारु नाम अपीच्यं वर्धते नप्तुः अपां यं इंधते युवतयः सं इत्था हिरण्यऽवर्णं घृतं अन्नं अस्य॥११॥ अस्मै वहूनां अवमाय सख्ये यज्ञैः विधेम नमसा हविःऽभिः सं सानु माज्मिं दिधिषामि विल्मैः दधामि अन्नैः परि वंदे ऋक्ऽभिः॥१२॥ सः ईं वृषा अजनयत् तासु गर्भं सः ईं शिप्रुः धयति तं रिहंति सः अपां नपात् अनभिम्लातऽवर्णः अन्यस्यऽइव इह तन्वा विवेष॥१३॥ अस्मिन् पदे परमे तस्थिऽवांसं अध्वसऽभिः विश्वहा दीदिऽवांसं आपः नप्त्रे घृतं अन्नं वहंतीः स्वयं अत्कैः परि दीयंति यह्वीः॥१४॥ अयांसं अग्ने सुऽक्षितिं जनाय अयांसं ऊं मघवत्ऽभ्यः सुऽवृक्तिं विश्वं तत् भद्रं यत् अवंति देवाः वृहत् वदेम विदथे सुऽवीराः॥ १५ ॥ २४ ॥

॥३६॥ तुभ्यं हिन्वानः वसिष्ट गाः अपः अधुक्षन् सीं अविऽभिः अद्रिऽभिः नरः पिब इंद्र स्वाहा प्रऽहुतं वषट्ऽकृतं होचात् आ सोमं प्रथमः यः ईशिषे॥१॥ यज्ञैः संऽमिष्ठाः पृषतीभिः ऋष्टिऽभिः यामन् शुभ्रासः अंजिषु प्रियाः उत आऽसद्य वर्हिः भरतस्य सूनवः पोचात् आ सोमं पिवत दिवः नरः॥२॥ अमाऽइव नः सुऽहवाः आ हि गंतन नि वर्हिषि सदतन रणिष्टन अथ मंदस्व जुजुषाणः अंधसः त्वष्टः देवेभिः जनिऽभिः सुमत्ऽगणः॥३॥ आ वक्षि

देवान् इह विप्र यक्षि च उशन् होतः नि सद् योनिषु चिषु प्रति वीहि प्रऽस्थितं सोम्यं मधु पिब आमींधात् तव भागस्य तृप्णुहि ॥४॥ एषः स्यः ते तन्वः नृम्णऽ वर्धनः सहः ओजः प्रऽदिवि बाह्वोः हितः तुभ्यं सुतः मघऽ वन तुभ्यं आऽभृतः त्वं अस्य ब्राह्मणात् आ तृपत् पिब ॥५॥ जुषेथां यज्ञं बोधतं हवस्य मे सत्तः होता निऽविदः पूर्व्याः अनु अच्छ राजाना नमः एति आऽवृतं प्रऽशास्तात् आ पिबतं सोम्यं मधु ॥ ६ ॥ २५ ॥ ७ ॥

॥३७॥ मंदस्व होचात् अनु जोषं अंधसः अध्वर्यवः सः पूर्णां वष्टि आऽसिचं तस्मै एतं भरत ततऽ वशः ददिः होचात् सोमं द्रविणःऽदः पिब ऋतुऽभिः ॥१॥ यं ऊं पूर्वं अहुवे तं इदं हुवे सः इत् ऊं हव्यः ददिः यः नाम पत्यते अध्वर्युऽभिः प्रऽस्थितं सोम्यं मधु पोचात् सोमं द्रविणःऽदः पिब ऋतुऽभिः ॥२॥ मेद्यंतु ते वहयः येभिः ईयसे अरिषण्यन् वीळयस्व वनस्पते आऽ यूयं धृष्णो अभिऽगूर्य त्वं नेष्टात् सोमंद्रविणःऽदःपिब ऋतुऽभिः ॥३॥ अपात् होचात् उत पोचात् अमत्त उत नेष्टात् अजुषत प्रयः हितं तुरीयं पाचं अमृक्तं अमर्त्यं द्रविणःऽदाः पिबतु द्राविणःऽदसः ॥४॥ अर्वाचं अद्य यय्यं नृऽ वाहनं रथं युंजाथां इह वां विऽमोचनं पृक्तं हवींषि मधुना आ हि कं गतं अथ सोमं पिबतं वाजिनीऽवसू॰ ॥५॥ जोषि अग्ने सऽइधं जोषि आऽहुतिं जोषि ब्रह्म जन्यं जोषि सुऽस्तुतिं विश्वेभिः विश्वान् ऋतुना वसो मंहः उशन् देवान् उशतः पायय हविः ॥ ६ ॥ १ ॥

॥३८॥ उत ऊं स्यः देवः सविता सुवाय शश्वतऽ तमं ततऽ अपाः

वह्निः अस्यात् नूनं देवेभ्यः वि हि धाति रत्नं अर्यः आ अभजत् वीतिऽहोत्रं स्वस्तौ॥१॥ विश्वस्य हि श्रुष्टये देवः ऊर्ध्वः प्र बाहवा पृथुऽपाणिः सिसर्ति आपः चित् अस्य व्रते आ निऽमृग्याः अयं चित् वातः रमते परिऽज्मन्॥२॥ आप्रुऽभिः चित् यान् वि मुचाति नूनं अरीरमत् अतमानं चित् एतोः अह्यर्षूणां चित् नि अयान् अविष्यां अनु व्रतं सवितुः मोकीं आ अगात्॥३॥ पुनः सं अव्यत् विऽततं वयंती मध्या कर्तोः नि अधात् शक्म धीरः उत् संऽहाय अस्यात् वि ऋतून् अदर्धः अरमतिः सविता देवः आ अगात्॥४॥ नाना ओकांसि दुर्यः विश्वं आयुः वि तिष्ठते प्रऽभवः शोकः अग्नेः ज्येष्ठं माता सूनवे भागं आ अधात् अनु अस्य केतं इषितं सविचा॥५॥२॥ संऽआववर्ति विऽस्थितः जिगीषुः विश्वेषां कामः चरतां अमा अभूत् शश्वान् अपः विऽकृतं हित्वी आ अगात् अनु व्रतं सवितुः दैव्यस्य॥६॥ त्वया हितं अपां अप्ऽसुभागं धन्व अनु आ मृगयसः वि तस्थुः वनानि विऽभ्यः नकिः अस्य तानि व्रता देवस्य सवितुः मिनंति॥७॥ यातऽराध्यं वरुणः योनिं अपां अनिऽशितं निऽमिषि जभुराणः विश्वः मार्ताडः व्रजं आ पप्रुः गात् स्थऽशः जन्मानि सविता वि आ अकः॥८॥ न यस्य इंद्रः वरुणः न मित्रः व्रतं अर्यमा न मिनंति रुद्रः न अरातयः तं इदं स्वस्ति हुवे देवं सवितारं नमःऽभिः॥९॥ भगं धियं वाजयंतः पुरंऽधिं नराशंसः मघः पतिः नः अव्याः आऽअये वामस्य संऽगथे रयीणां प्रियाः देवस्य सवितुः स्याम॥१०॥ अस्मभ्यं तत् दिवः अतऽभ्यः पृथिव्याः त्वया दत्तं काम्यं राधः आ गात् शं यत् स्तोतृऽभ्यः आपये भवाति उरुऽशंसाय सवितः जरित्रे ॥११॥३॥

॥३९॥ यावाणाऽइव तत इत अर्यो जरेथे गृधाऽइव वृक्षं निधिऽमंतं अच्छ ब्रह्माणाऽइव विदथे उक्थऽशसा दूताऽइव हव्या जन्या पुरुऽचा ॥१॥ प्रातःऽयावाना रथ्याऽइव वीरा अजाऽइव यमा वरे आ सचेथे मेनेऽइव० तन्वा शुंभमाने दंपतीऽइव० क्रतुऽविदा जनेषु॥२॥ शृंगाऽइव नः प्रथमा गंतं अर्वाक् शफौऽइव जर्भुराणा तरःऽभिः चक्रवाकाऽइव प्रति वस्तोःउस्रा अर्वाचा यातं रथ्याऽइव शक्रा ॥३॥ नावाऽइव नः पारयतं युगाऽइव नभ्याऽइव नः उपधीऽइव० प्रधीऽइव० श्वानाऽइव नः अरिषण्या तनूनां खृगलाऽइव विऽस्रसः पातं अस्मान् ॥४॥ वाताऽइव अजुर्या नद्याऽइव रीतिःअक्षीऽइव०चक्षुषा आ यातं अर्वाक् हस्तौऽइव तन्वे शंऽभविष्ठा पदाऽइव नः नयतं वस्यः अच्छ ॥५॥४॥ ओष्ठौऽइव मधु आस्ने वदंता स्तनौऽइव पिप्यतं जीवसे नः नासाऽइव नः तन्वः रक्षितारा कर्णौऽइव सुऽश्रुता भूतं अस्मे ॥६॥ हस्ताऽइव शक्तिं अभि संऽददी०नःक्षामऽइव नः सं अजतं रजांसि इमाः गिरः अश्विना युष्मऽयंतीः क्ष्णोचेणऽइव स्वऽधितिं सं शिशीतं॥७॥ एतानि वां अश्विना वर्धनानि ब्रह्म स्तोमं गृत्सऽमदासः अक्रन् तानि नरा जुजुषाणा उप यातं बृहत् वदेम विदथे सुऽवीराः ॥८॥५॥

॥४०॥ सोमापूषणा जनना रयीणां जनना दिवः जनना पृथिव्याः जातौ विश्वस्य भुवनस्य गोपौ देवाः अकृण्वन् अमृतस्य नाभिं ॥१॥ इमौ देवौ जायमानौ जुषंत इमौ तमांसि गूहतां अजुष्टा आभ्यां इंद्रः पक्वं आमासु अंतः सोमापूषऽभ्यां जनत उस्रियासु॥२॥ सोमापूषणा रजसः विऽमानं सप्तऽचक्रं रथं अ-

विश्वऽमिन्वं विषुऽवृतं मनसा युज्यमानं तं जिन्वथः वृषणा पंचऽरश्मिं॥३॥ दिवि अन्यः सदनं चक्रे उच्चा पृथिव्यां अन्यः अधि अंतरिक्षे तौ अस्मभ्यं पुरुऽवारं पुरुऽक्षुं रायः पोषं वि स्यतां नाभिं अस्मे॥४॥ विश्वानि अन्यः भुवना जजान विश्वं अन्यः अभिऽचक्षाणः एति सोमापूषणौ अवतं धियं मे युवाभ्यां विश्वाः पृतनाः जयेम॥५॥ धियं पूषा जिन्वतु विश्वंऽइन्वः रयिं सोमः रयिऽपतिः दधातु अवतु देवी अदितिः अनर्वा बृहत् वदेम विदथे सुऽवीराः॥६॥६॥

॥४१॥ वायोॅ ये ते सहस्रिणः रथासः तेभिः आ गहि नियुत्वान सोमंऽपीतये॥१॥ नियुत्वान् वायोॅ आ गहि अयं शुक्रः अयामि ते गंता असि सुन्वतः गृहं॥२॥ शुक्रस्य अद्य गोऽआशिरः इंद्रवायू नियुत्वतः आ यातं पिबतं नरा॥३॥ अयं वां मित्रावरुणा सुतः सोमः ऋतऽवृधा मम इत् इह श्रुतं हवं॥४॥ राजानौ अनभिऽद्रुहा ध्रुवे सदसि उतऽत्तमे सहस्रंऽस्थूणे आसाते॥५॥७॥ ता संऽराजा घृतऽआसुती॰ आदित्या दानुनः पतीॅ सचेते अनवऽह्वरं॥६॥ गोऽमत् ऊं सु नासत्या अश्वंऽवत् यातं अश्विना वर्तिः रुद्रा नृऽपाय्यं॥७॥ न यत् परः न अंतरः आऽदधर्षत् वृषण्ऽवसू॰ दुःऽशंसः मर्त्यः रिपुः॥८॥ ता नः आ वोळ्हं अश्विना रयिं पिशंगंऽसंदृशं धिष्ण्या वरिवःऽ विदं॥९॥ इंद्रः अंग महत् भयं अभि सत् अप चुच्यवत् सः हि स्थिरः विऽ चर्षणिः॥१०॥८॥ इंद्रः च मृळयाति नः न नः पश्चात् अघं नशत् भद्रं भवाति नः पुरः॥११॥ इंद्रः आशाभ्यः परि सर्वाभ्यः अभयं करत् जेता शचून् विऽ चर्षणिः॥१२॥ विश्वे देवासः आ गत शृणुत मे इमं हवं आ इदं

बर्हिः नि सीदत ॥१३॥ तीव्रः वः मधुऽमान् अयं शुनऽहोत्रेषु मत्सरः एतं पिबत काम्यं ॥१४॥ इंद्रऽज्येष्ठाः मरुतऽगणाः देवासः पूषऽरातयः विश्वे मम शृुतं हवं ॥१५॥९॥ अंबिऽतमे नदीऽतमे देविऽतमे सरस्वति अप्रशस्ताःऽइव स्मसि प्रऽशस्तिं अंब नः कृधि ॥१६॥ त्वे विश्वा सरस्वति श्रिता आयूंषि देव्यां शुनऽहोत्रेषु मत्स्व प्रऽजां देवि दिदिड्डि नः ॥१७॥ इमा ब्रह्म सरस्वति जुषस्व वाजिनीऽवति या ते मन्म गृत्सऽमदाः ऋतऽवरि प्रिया देवेषु जुह्वति ॥१८॥ प्र इतां यज्ञस्य शंऽभुवा युवां इत् आ वृणीमहे अग्निं च हव्यऽवाहनं ॥१९॥ द्यावा नः पृथिवी इमं सिधं अद्य दिविऽस्पृशं यज्ञं देवेषु यच्छतां ॥२०॥ आ वां उपऽस्थे अदुहा देवाः सीदंतु यज्ञियाः इह अद्य सोमऽपीतये ॥२१॥१०॥

॥४२॥ कनिक्रदत् जनुषं प्रऽब्रुवाणः इयर्ति वाचं अरिताऽइव नावं सुऽमंगलः च शकुने भवासि मा त्वा का चित् अभिऽभा विश्वा विदत ॥१॥ मा त्वा श्येनः उत वधीत् मा सुऽपर्णः मा त्वा विदत् इषुंऽमान् वीरः अस्ता पित्र्यां अनु प्रऽदिशं कनिक्रदत् सुऽमंगलः भद्रऽवादी वद इह ॥२॥ अव क्रंद दक्षिणतः गृहाणां सुऽमंगलः भद्रऽवादी शकुंते मा नः स्तेनः ईशत मा अघऽशंसः बृहत् वदेम विदथे सुऽवीराः ॥३॥११॥

॥४३॥ प्रऽदक्षिणित् अभि गृणंति कारवः वयः वदंतः ऋतुऽथा शकुंतयः उभे वाचौ वदंति सामगाःऽइव गायत्रं च त्रैस्तुभं च अनु राजति ॥१॥ उद्गाताऽइव शकुने सामं गायसि ब्रह्मऽपुचःऽइव सवनेषु शंससि वृषाऽइव वाजी शिप्रिंऽमतीः अपिऽइत्यं

सर्वतः नः शकुने भद्रं आ वद विश्वतः नः शकुने पुण्यं आ वद ॥२॥ आऽवदन् त्वं शकुने भद्रं आ वद तूष्णीं आसीनः सुऽमतिं चिकिद्धि नः यत् उतऽपतन् वदसि कर्करिः यथा बृहत् वदेम विदथे सुऽवीराः ॥३॥१२॥४॥२॥

॥ इति द्वितीयं मंडलं समाप्तं ॥

॥१॥ सोमस्य मा तवसं वक्षि अग्ने वह्निं चकर्थ विदथे यजध्ये देवान् अच्छ दीद्यत् युंजे अद्रिं शंऽआये अग्ने तन्वं जुषस्व ॥१॥ प्राञ्चं यज्ञं चकृम वर्धतां गीः समित्ऽभिः अग्निं नमसा दुवस्यन् दिवः शशासुः विदथा कवीनां गृत्साय चित् तवसे गातुं ईषुः ॥२॥ मयःदधे मेधिरः पूतऽदक्षः दिवःसुऽबंधुः जनुषा पृथिव्याः अविंदन् ऊं दर्शतं अप्ऽसु अंतः देवासः अग्निं अपसि स्वसृणां ॥३॥ अवर्धयन् सुऽभगं सप्त यह्वीः श्वेतं जज्ञानं अरुषं महिऽत्वा शिप्रुं न जातं अभि आरुः अश्वाः देवासः अग्निं जनिमन् वपुष्यन् ॥४॥ शुक्रेभिः अंगैः रजः आऽततन्वान् क्रतुं पुनानः कविऽभिः पवित्रैः शोचिः वसानः परि आयुः अपां श्रियः मिमीते बृहतीः अनूनाः ॥५॥१३॥ वव्राजं सीं अनदतीः अदब्धाः दिवः यह्वीः अवसानाः अनर्माः सना अच युवतयः सऽयोनीः एकं गर्भं दधिरे सप्त वाणीः ॥६॥ स्तीर्णाः अस्य संऽहतः विश्वऽरूपाः घृतस्य योनौ सरवये मधूनां अस्थुः अच धेनवः पिन्वमानाः महीं दस्मस्य मातरा संऽईची° ॥७॥ वभ्राणः सूनो सहसः वि अद्यौत् दधानः शुक्रा रभसा वपूंषि श्रोतंति धाराः मधुनः घृतस्य वृषा यत्र ववृधे

काव्येन॥८॥ पितुः चित् ऊधः जनुषा विवेद वि अस्य धाराः असृजत् वि धेनाः गुहा चरंतं सखिऽभिः शिवेभिः दिवः यह्वीभिः न गुहा बभूव॥९॥ पितुः च गर्भं जनितुः च बभ्रे पूर्वीः एकः अधयत् पीयानाः वृष्णे सऽपत्नीं० शुचये सऽबंधू० उभे अस्मै मनुषे नि पाहि॥ १०॥ १४॥ उरौ महान् अनिऽबाधे ववर्ध आपः अग्निं यशसः सं हि पूर्वीः ऋतस्य योनौ अशयत् दमूनाः जामीनां अग्निः अपसि स्वसॄणां॥११॥ अक्रः न बभ्रिः संऽइत्थे महीनां दिदृक्षेयः सूनवे भाःऽऋंजीकः उत् उस्रियाः जनिता यः जजान अपां गर्भः नृऽतमः यह्वः अग्निः॥१२॥ अपां गर्भं दर्शतं ओषधीनां वना जजान सुऽभगा विऽरूपं देवासः चित् मनसा सं हि जग्मुः पनिष्ठं जातं तवसं दुवस्यन्॥१३॥ बृहंतः इत् भानवः भाःऽऋंजीकं अग्निं सचंत विऽद्युतः न शुक्राः गुहाऽइव वृद्धं सदसि स्वे अंतः अपारे ऊर्वे अमृतं दुहानाः॥ १४॥ ईळे च त्वा यजमानः हविःऽभिः ईळे सखिऽत्वं सुऽमतिं निऽकामः देवैः अवः मिमीहि सं जरित्रे रक्ष च नः दम्येभिः अनीकैः॥१५॥१५॥ उपऽक्षेतारः तव सुऽप्रनीते अग्ने विश्वानि धन्या दधानाः सुऽरेतसा अवसा तुंजमानाः अभि स्याम पृतनाऽयून् अदेवान्॥१६॥ आ देवानां अभवः केतुः अग्ने मंद्रः विश्वानि काव्यानि विद्वान् प्रति मतीन् अवासयः दमूनाः अनु देवान् रथिरः यासि साधन्॥१७॥ नि दुरोणे अमृतः मर्त्यानां राजा ससाद विदथानि साधन् घृतऽप्रतीकः उर्विया वि अद्यौत् अग्निः विश्वानि काव्यानि विद्वान्॥१८॥ आ नः गहि सख्येभिः शिवेभिः महान् महीभिः ऊतिऽभिः सरण्यन् अस्मे रयिं बहुलं संऽतरुत्रं सुऽवाचं भागं यशसं कृधि नः॥१९॥ एता ते अग्ने जनिम सनानि प्र पूर्व्याय नूतनानि वोचं महांति

वृष्णे सवना कृता इमा जन्मन्ऽजन्मन् निऽहितः जातऽवेदाः ॥२०॥ जन्मन्ऽजन्मन् निऽहितः जातऽवेदाः विश्वामित्रेभिः इध्यते अजस्रः तस्य वयं सुऽमतौ यज्ञियस्य अपि भद्रे सौमनसे स्याम ॥२१॥ इमं यज्ञं सहसाऽवन् त्वं नः देवऽच धेहि सुऽक्रतो॰ ररांणः प्र यंसि होतः बृहतीः इषः नः अग्ने महि द्रविणं आ यजस्व ॥२२॥ इळां अग्ने पुरुऽदंसं सनिं गोः शश्वत्ऽतमं हवमानाय साध स्यात् नः सूनुः तनयः विजाऽवा अग्ने सा ते सुऽमतिः भूतु अस्मे॰ ॥२३॥१६॥

॥२॥ वैश्वानराय धिषणां ऋतऽवृधे घृतं न पूतं अग्नये जनामसि द्विता होतारं मनुषः च वाघतः धिया रथं न कुलिशः सं ऋण्वति ॥१॥ सः रोचयत् जनुषा रोदसी॰ उभे॰ सः माचोः अभवत् पुचः ईड्यः हव्यऽवाट् अग्निः अजरः चनःऽहितः दुःऽदभः विशां अतिथिः विभाऽवसुः ॥२॥ ऋत्वा दक्षस्य तरुषः विऽधर्मणि देवासः अग्निं जनयंत चित्तिऽभिः रुरुचानं भानुना ज्योतिषा महां अत्यं न वाजं सनिष्यन् उप ब्रुवे ॥३॥ आ मंद्रस्य सनिष्यंतः वरेण्यं वृणीमहे अह्रयं वाजं ऋग्मियं रातिं भृगूणां उशिजं कविऽक्रतुं अग्निं राजंतं दिव्येन शोचिषा ॥४॥ अग्निं सुम्नाय दधिरे पुरः जनाः वाजऽश्रवसं इह वृक्तऽबर्हिषः यतऽस्रुचः सुऽरुचं विश्वऽदेव्यं रुद्रं यज्ञानां साधंतऽइष्टिं अपसां ॥५॥१७॥ पावकऽशोचे तव हि क्षयं परि होतः यज्ञेषु वृक्तऽबर्हिषः नरः अग्ने दुवः इच्छमानासः आप्यं उप आसते द्रविणं धेहि तेभ्यः ॥६॥ आ रोदसी॰ अपृणत् आ स्वः महत् जातं यत् एनं अपसः अधारयन् सः अध्वराय परि नीयते कविः अत्यः न वाजऽसातये चनःऽहितः ॥७॥ नमस्यत

ह॒व्यऽदा॑तिं मु॒ऽअ॒ध्व॒रं दु॒व॒स्यत॑ दम्यं॑ जा॒तऽवे॑दसं र॒यीः ऋ॒तस्य॑ बृ॒ह॒तः विऽच॑र्षणिः अ॒ग्निः दे॒वानां॑ अभवत् पु॒रःऽहि॑तः॥८॥ ति॒स्रः यत्ह॒स्य सं॒ऽइ॒धः परि॑ऽज्मनः अ॒ग्नेः अ॒पु॒न॒न् उ॒शिजः॑ अमृत्यवः ता-सां॑ एकां॑ अ॒द॒धुः मर्त्यं॑ भुजं॑ ऊं॒ लो॒कं ऊं॒ इ॒वे॒ उप॑ जा॒मिं ई॒य॒तुः॥९॥ विशं॑ कविं॑ विश्पतिं॑ मानु॒षीः इ॒षः सं सी॒ अ॒कृ॒ण्व॒न् स्वऽधि॑तिं न तेज॑से सः उ॒त्ऽव॒तः नि॒ऽव॒तः या॒ति॒ वे॒वि॒ष॒त् सः गर्भं॑ ए॒षु भु-वने॑षु दीधरत्॥१०॥१८॥ सः जि॒न्व॒ते॒ ज॒ठरे॑षु प्र॒ऽजि॒ऽवान् वृषा॑ चि॒चे॒षु॒ नान॑दत् न सिंहः वै॒श्वा॒न॒रः पृथु॑ऽपाजाः अम॑र्त्यः वसु॑ र॒त्ना॑ दय॑मानः वि दा॒शु॒षे॥११॥ वै॒श्वा॒न॒रः प्र॒त्नऽथा॑ नाकं॑ आ अ॒रु॒ह॒त् दि॒वः पृ॒ष्ठं भं॑दमानः सु॒मन्म॑ऽभिः सः पू॒र्वऽव॑त् ज॒न॒य॒न् ज॒न्तवे॑ धनं॑ स॒मा॒नं अ॒ज्मं॑ परि॑ ए॒ति॒ जागृ॑विः॥१२॥ ऋ॒तऽवा॑नं य॒ज्ञिय॑ं विप्रं॑ उ॒क्थ्यं॑ आ यं दधे मा॒त॒रिश्वा॑ दि॒वि क्षय॑ं तं चि॒चऽया॑मं हरि॑ऽकेशं ई॒म॒हे॒ सु॒ऽदी॒तिं अ॒ग्निं सु॒वि॒ता॒य॒ नव्य॑से॥१३॥ शु॒चिं॑ न या॒मन् ह॒षि॒रं स्व॒ःऽदृशं॑ केतुं दि॒वः रो॒च॒न॒ऽस्थां उ॒षः॒ऽबुधं॑ अ॒ग्निं मू॒धानं॑ दि॒वः अ॒र॒तिऽस्कृ॑तं तं ई॒म॒हे॒ नम॑सा वा॒जिनं॑ बृ॒हत्॥१४॥ मं॒द्रं होता॑रं शु॒चिं॑ अ॒द्व॒या॒विनं॑ दमू॒नसं॑ उ॒क्थ्यं॑ वि॒श्वऽच॑र्षणिं॑ र॒थं॑ न चि॒त्रं व-पु॑षाय दर्श॒तं मनु॑ःऽहितं सदं॑ इत् रा॒यः ई॒म॒हे॒॥१५॥१९॥

॥३॥ वै॒श्वा॒न॒राय॑ पृथु॑ऽपाजसे विप॑ः र॒त्ना॑ वि॒धं॒त॒ ध॒रु॒णेषु॑ गा-तवे॑ अ॒ग्निः हि दे॒वान् अ॒मृ॒तः दु॒व॒स्यति॑ अथ॑ धर्मा॑णि स॒नता॑ न दू॒दु॒ष॒त्॥१॥ अं॒तः दू॒तः रोद॑सी॒ दस्मः॑ ई॒य॒ते॒ होता॑ नि॒ऽस॒त्तः मनु॑षः पुरः॑ऽहितः क्षयं॑ बृ॒हंतं॑ परि॑ भूषति द्यु॒ऽभिः दे॒वेभिः॑ अ॒ग्निः इ॒षि॒तः धि॒या॒ऽव॒सुः॥२॥ के॒तुं य॒ज्ञा॒नां॑ वि॒दथ॑स्य साधनं॑ विप्रा॑सः अ॒ग्निं म॒ह॒यं॒त॒ चित्ति॑ऽभिः अपां॑सि यस्मिन् अधि॑ सं॒ऽद॒धुः गिरः॑ त-

सिंन्सुम्नानिं यजमानः आ चके ॥३॥ पिता यज्ञानाँ असुरः विपः ऽचिताँ विऽमानँ अग्निः वयुनँ च वाघताँ आ विवेश रोदसी भूरिऽवर्पसा पुरुऽप्रियः भंदते धामंऽभिः कविः ॥४॥ चंद्रं अग्निं चंद्रऽरथंहरिऽव्रतं वैश्वानरं अप्सुऽसदं स्वःऽविदं विऽगाहं तूर्णिं तविषीभिः आऽवृतं भूर्णिं देवासः इह सुऽश्रियं दधुः ॥५॥२०॥ अग्निः देवेभिः मनुषः च जंतुऽभिः तन्वानः यज्ञं पुरुऽपेशसं धिया रथीः अंतः ईयते साधदिष्टिऽभिः जीरः दमूनाः अभिशस्तिऽचातनः ॥६॥ अग्ने जरस्व सुऽअपत्ये आयुनि ऊर्जा पिन्वस्व सं इषः दिदीहि नः वयाँसि जिन्व बृहतः च जागृवे उशिक् देवानाँ असि सुऽक्रतुः विपां ॥७॥ विश्पतिं यह्वं अतिथिं नरः सदा यंतारं धीनां उशिजं च वाघतां अध्वराणां चेतनं जातऽवेदसं प्र शंसंति नमसा जूतिऽभिः वृधे ॥ ८ ॥ विभाऽवा देवः सुऽरणः परि क्षितीः अग्निः बभूव शवसा सुमतऽरथः तस्य व्रतानि भूरिऽपोषिणः वयं उप भूषेम दमे आ सुवृक्तिऽभिः ॥९॥ वैश्वानर तव धामानि आ चके येभिः स्वःऽवित् अभवः विऽचक्षण जातः आ अपृणः भुवनानि रोदसी अग्ने ता विश्वा परिऽभूः असि त्मना ॥१०॥ वैश्वानरस्य दंसनाभ्यः बृहत् अरिणात् एकः सुऽअपस्यया कविः उभा पितरा महयन् अजायत अग्निः द्यावापृथिवी भूरिऽरेतसा ॥ ११ ॥ २१ ॥

॥४॥ समितऽसमित् सुऽमनाः बोधि अस्मे शुचाऽशुचा सुऽमतिं रासि वस्वः आ देव देवान् यजथाय वक्षि सखा सखीन् सुऽमनाः यक्षि अग्ने ॥१॥ यं देवासः चिः अहन् आऽयजंते दिवेऽदिवे वरुणः मित्रः अग्निः सः इमं यज्ञं मधुऽमंतं कृधि नः तनू-

ऽनपात् घृतऽयोनिं विधंतं॥२॥ प्र दीधितिः विश्वऽवारा जिगा-
ति होतारं इळः प्रथमं यजध्यै अच्छ नमःऽभिः वृषभं वंदध्यै सः
देवान् यक्षत् इषितः यजीयान्॥३॥ ऊर्ध्वः वां गातुः अध्वरे अका-
रि ऊर्ध्वा शोचींषि प्रऽस्थिता रजांसि दिवः वा नाभा नि असादि
होता स्तृणीमहि देवऽब्यचाः वि बर्हिः॥४॥ सप्त होत्राणि मनसा
वृणानाः इन्वंतः विश्वं प्रति यन् ऋतेन नृऽपेशसः विदथेषु प्र
जाताः अभि इमं यज्ञं वि चरंत पूर्वीः॥५॥२२॥ आ भंदमाने उषसौ
उपाके उत स्मयेते तन्वा विऽरूपे॰ यथा नः मित्रः वरुणः जुजो-
षत् इंद्रः मरुत्वान् उत वा महःऽभिः॥६॥ दैव्या होतारा प्रथमा
नि षेदे सप्त पृक्षासः स्वधया मदंति ऋतं शंसंतः ऋतं इत् ते
आहुः अनु व्रतं व्रतऽपाः दीध्यानाः॥७॥ आ भारती भारतीभिः
सऽजोषाः इळा देवैः मनुष्येभिः अग्निः सरस्वती सारस्वतेभिः
अर्वाक् त्रिस्रः देवीः बर्हिः आ इदं सदंतु॥८॥ तत् नः तुरीपं अध
पोषयित्नु देव त्वष्टः वि रराणः स्यस्व॰ यतः वीरः कर्मण्यः सुऽदक्षः
युक्तऽग्रावा जायते देवऽकामः॥९॥ वनस्पते अव सृज उप देवान्
अग्निः हविः शमिता सूदयाति सः इत् ऊं होता सत्यऽतरः यजा-
ति यथा देवानां जनिमानि वेद॥१०॥ आ याहि अग्ने संऽइधानः
अर्वाङ् इंद्रेण देवैः सऽरथं तुरेभिः बर्हिः नः आस्तां अदितिः सु-
ऽपुत्रा स्वाहा देवाः अमृताः मादयंतां॥११॥२३॥

॥५॥ प्रति अग्निः उषसः चेकितानः अबोधि विप्रः पदऽवीः
कवीनां पृथुऽपाजाः देवयतऽभिः संऽइद्धः अप द्वारा तमसः
वह्निः आवः॰॥१॥ प्र इत् ऊं अग्निः ववृधे स्तोमेभिः गीःऽभिः
स्तोतॄणां नमस्यः उक्थैः पूर्वीः ऋतस्य संऽदृशः चकानः सं दूतः

अद्यौत् उषसः विऽरोके॥२॥अधायि अग्निः मानुषीषु विक्षु अपां गर्भः मित्रः ऋतेन साधन् आ हर्यतः यजतः सानु अस्थात् अभूत ऊं विप्रः हव्यः मतीनां॥३॥ मित्रः अग्निः भवति यत् संऽइद्धः मित्रः होता वरुणः जातऽवेदाः मित्रः अध्वर्युः इषिरः दमूनाः मित्रः सिंधूनां उत पर्वतानां॥४॥ पाति प्रियं रिपः अयं पदं वेः पाति यह्वः चरणं सूर्यस्य पाति नाभा सप्तऽशीर्षाणं अग्निः पाति देवानां उपऽमादृक् ऋष्वः॥५॥२४॥ ऋभुः चक्रे ईड्यं चारु नाम विश्वानि देवः वयुनानि विद्वान् ससस्य चर्म घृतऽवत् पदं वेः तत इत् अग्निः रक्षति अप्रऽयुच्छन्॥६॥ आ योनिं अग्निः घृतऽवंतं अस्थात् पृथुऽप्रगानं उशंतं उशानः दीद्यानः शुचिः ऋष्वः पावकः पुनःऽपुनः मातरा नव्यसी कः॰॥७॥ सद्यः जातः ओषधीभिः ववक्षे यदि वर्धति प्रऽस्वः घृतेन आपःऽइव प्रऽवता शुंभमानाः उरुऽएत अग्निः पित्रोः उपऽस्थे॥८॥ उत ऊं स्तुतः संऽइधा यह्वः अद्यौत् वर्षभन् दिवः अधि नाभा पृथिव्याः मित्रः अग्निः ईड्यः मातरिश्वा आ दूतः वक्षत् यजथाय देवान्॥९॥ उत अस्तंभीत् संऽइधा नाकं ऋष्वः अग्निः भवन् उतऽतमः रोचनानां यदि भृगुंऽभ्यः परि मातरिश्वा गुहा संतं हव्यऽवाहं संऽईधे॥१०॥ इळां अग्ने पुरुऽदंसं सनिं गोः शश्वत्ऽतमं हवमानाय साध स्यात् नः सूनुः तनयः विजाऽवा अग्ने सा ते सुऽमतिः भूतु अस्मे॥११॥२५॥

॥६॥ प्र कारवः मनना वच्यमानाः देवद्रीचीं नयत देवऽयंतः दक्षिणाऽवाट् वाजिनीं प्राचीं एति हविःभरंती अग्नये घृताचीं॥१॥ आ रोदसी अपृणाः जायमानः उत प्र रिक्थाः अध नु प्रऽयज्यो॰ दिवः चित् अग्ने महिना पृथिव्याः वच्यंतां ते वह्नयः सप्र-

ऽजिह्वाः॥२॥ द्यौः च॒ त्वा॒ पृथि॒वी य॒ज्ञिया॑सः नि होता॑रं सा॒द॒यं॒ते॒ दमा॑य यदि॑ विशः॑ मानु॑षीः दे॒वऽ॑यंतीः प्रयस्वतीः ईळ॑ते सु॒म्नं अर्चिः॑॥३॥ म॒हान् स॒धऽस्थे॑ ध्रु॒वः आ निऽस॑त्तः अं॒तः द्यावा॑ मा॒हि॒ने॑ हर्यमाणः आस्के॑ सऽपत्नी॑° अ॒जरे॑ अमृ॒क्ते॑ सब॑ःऽदुघे° उ॒रुऽगा॒यस्य॑ धे॒नू॑॥४॥ व्र॒ता ते॒ अग्ने॒ म॒ह॒तः म॒हानि॑ तव॑ क्रत्वा॑ रो॒दसी॑ आ त॑तंथ॒ त्वं दू॒तः अ॒भ॒वः जा॒यमा॑नः त्वं ने॒ता वृ॒ष॒भ च॒र्ष॒णी॒नां॥५॥२६॥ ऋ॒तस्य॑ वा॒ के॒शि॒ना॑ यो॒ग्या॒भिः घृ॒तऽस्नु॑वा॑ रोहि॑ता धु॒रि धि॒ष्व॒ अथ॑ आ व॒ह॒ दे॒वान् दे॒व॒ विश्वा॑न् सु॒ऽअ॒ध्व॒रा कृ॒णु॒हि॒ जा॒तऽवे॑दः॥६॥ दि॒वः चि॒त् आ ते॒ रु॒च॒यं॒त॒ रो॒काः उ॒षः वि॒ऽभा॒ती॒ः अनु॑ भा॒सि॒ पू॒र्वीः अ॒पः यत् अग्ने॒ उ॒श॒धक् व॒ने॒षु॒ होतुः॑ मं॒द्र॒स्य॑ प॒न॒यं॒त॒ दे॒वाः॥७॥ उ॒रौ वा॒ ये अं॒त॒रि॒क्षे म॒दं॒ति॒ दि॒वः वा॒ ये रो॒च॒ने सं॑ति॒ दे॒वाः॑ ऊमाः॑ वा॒ ये सु॒ऽह॒वा॑सः यजं॑चाः॑ आऽये॑मिरे र॒थ्यः॑ अग्ने॒ अ॒श्वाः॑॥८॥ आ ए॒भिः॑ अग्ने॒ सऽर॑थं याहि॒ अ॒र्वाङ् ना॒नाऽर॑थं वा॒ वि॒ऽभ॒वः॑ हि अ॒श्वाः॑ पत्नी॑ऽवतः चिं॒श॒तं चीन् च॒ दे॒वान् अनु॑ऽस्वधं आ व॒ह॒ मा॒द॒य॒स्व॒॥९॥ सः होता॑ यस्य॑ रोद॒सी॑ चित् उ॒र्वी॑ य॒ज्ञं॑ऽयज्ञं अ॒भि वृ॒धे गृ॒णी॒तः प्राचीं॑ अ॒ध्व॒राऽइ॑व तस्थतुः सु॒ऽमेके॑° ऋ॒तऽव॑री° ऋ॒तऽजा॑तस्य स॒त्ये॑॥१०॥ इळा॑ अग्ने पुरु॒ऽद॒सं॑ स॒निं॑ गोः श॒श्व॒त्ऽत॒मं ह॒व॒मा॒ना॒य॒ सा॒ध॒ स्यात् नः॑ सू॒नुः त॒न॒यः वि॒जा॒ऽवा॑ अग्ने॑ सा ते॒ सु॒ऽम॒तिः॑भूतु अ॒स्मे॑॥११॥२७॥८॥२॥

॥७॥ प्र ये आ॒रुः शि॒ति॒ऽपृ॒ष्ठस्य॑ धा॒सेः॑आ मा॒तरा॑ वि॒वि॒श्रुः॑ सप्त॑ वाणीः॑ परि॑ऽक्षिता॑ पि॒तरा॑ सं॑ चरे॑ते॑ प्र॑ सर्स्राते॑ दी॒र्घं आयुः॑ प्र॒ऽयक्षे॑॥१॥ दि॒वक्ष॑सः धे॒नवः॑ वृष्णः॑ अश्वाः॑ देवीः॑ आ त॒स्थौ॒ मधु॑ऽमत् वहं॑तीः ऋ॒तस्य॑ त्वा॒ सद॑सि क्षे॒मु॒ऽय॒तं॑ परि॑ एका॑ चरति॒ वर्त॑-

निंगोः॥२॥ आ सीं अरोहत सुऽयमाः भवंतीः पतिः चिकित्वान् रयिऽवित् रयीणां प्रनीलऽपृष्ठः अतसस्य धासेः ताः अवासयत् पुरुधऽप्रतीकः॥३॥ महिं त्वाष्ट्रं ऊर्जयंतीः अजुर्यं स्तभुऽयमानं वहंतः वहंति वि अंगेभिः दिद्युतानः सधऽस्थे एकाँऽइव रोदसी आ विवेश॥४॥ जानंति वृष्णः अरुषस्य शेवं उत ब्रध्नस्य शासनि रणंति दिवःऽरुचः सुऽरुचः रोचमानाः इळा येषां गण्या माहिना गीः॥५॥१॥ उतो पितृऽभ्यां प्रऽविदा अनु घोषं महः महत्ऽभ्यां अनयंत सूषं उक्षा ह यत्र परि धानं अक्तोः अनु स्वं धाम जरितुः ववक्ष॥६॥ अध्वर्युऽभिः पंचऽभिः सप्त विप्राः प्रियं रक्षंते निऽहितं पदं वेः प्राचः मदंति उक्षणः अजुर्याः देवाः देवानां अनु हि व्रता गुः॥७॥ दैव्या होतारा प्रथमा नि षेदतुः सप्त पृक्षासः स्वधया मदंति ऋतं शंसंतः ऋतं इत् ते आहुः अनु व्रतं व्रतऽपाः दीध्यानाः॥८॥ वृषऽयतें महे अत्याय पूर्वीः वृष्णे चिचाय रश्मयः सुऽयामाः देव होतः मंद्रऽतरः चिकित्वान् महः देवान् रोदसी आ इह वक्षि॥९॥ पृक्षऽप्रयजः द्रविणः सुऽवाचः सुऽकेतवः उषसः रेवत् ऊषुः उतो चित् अग्ने महिना पृथिव्याः कृतं चित् एनः सं महे दशस्य॥१०॥ इळां अग्ने पुरुऽदंसं सनिं गोः शश्वत्ऽतमं हवमानाय साध स्यात् नः सूनुः तनयः विजाऽवा अग्ने सा ते सुऽमतिः भूतु अस्मे॥११॥२॥

॥८॥ अंजंति त्वां अध्वरे देवऽयंतः वनस्पते मधुना दैव्येन यत् ऊर्ध्वः तिष्ठाः द्रविणा इह धत्तात् यत् वा क्षयः मातुः अस्याः उपऽस्थे॥१॥ संऽइद्धस्य श्रयमाणः पुरस्तात् ब्रह्म वन्वानः अजरैः सुऽवीरैः आरे अस्मत् अमतिं बाधमानः उत् श्रयस्व महते सौभ-

गाय॥२॥ उत् त्वयस्व वनस्पते वर्ष्मन् पृथिव्याः अधि सुऽमितौ मीयमानः वचैः धाः यज्ञऽवाहसे॥३॥ युवा सुऽवासाः परिऽवीतः आ अगात् सः उं श्रेयान् भवति जायमानः तं धीरासः कवयः उत् नयंति सुऽआध्यः मनसा देवऽयंतः॥४॥ जातः जायते सुदिनऽत्वे अह्नां सऽमर्ये आ विदथे वर्धमानः पुनंति धीराः अपसः मनीषा देवऽयाः विप्रः उत् इयर्ति वाचं॥५॥३॥ यान् वः नरः देवऽयंतः निऽमिम्युः वनस्पते स्वऽधितिः वा ततक्ष ते देवासः स्वरवः तस्थिऽवांसः प्रजाऽवत् असे दिधिषंतु रत्नं॥६॥ ये वृक्णासः अधि क्षमि निऽमितासः यतऽस्रुचः ते नः व्यंतु वार्यं देवऽत्रा क्षेत्रऽसाधसः॥७॥ आदित्याः रुद्राः वसवः सुऽनीथाः द्यावाक्षामा पृथिवी अंतरिक्षं सऽजोषसः यज्ञं अवंतु देवाः ऊर्ध्वं कृण्वंतु अध्वरस्य केतुं॥८॥ हंसाःऽइव श्रेणिऽशः यतानाः शुक्रा वसानाः स्वरवः नः आ अगुः उतऽनीयमानाः कविऽभिः पुरस्तात् देवाः देवानां अपि यंति पाथः॥९॥ शृंगाणिऽइव इत् शृंगिणां सं दृक्षे चषालऽवंतः स्वरवः पृथिव्यां वाघतऽभिः वा विऽहवे श्रोषमाणाः अस्मान् अवंतु पृतनाज्येषु॥१०॥ वनस्पते शतऽवल्शः वि रोह सहस्रऽवल्शाः वि वयं रुहेम यं त्वां अयं स्वऽधितिः तेजमानः प्रऽनिनाय महते सौभगाय॥११॥४॥

॥९॥ सखायः त्वा ववृमहे देवं मर्तासः ऊतये अपां नपातं सुऽभगं सुऽदीदितिं सुऽप्रतूर्तिं अनेहसं॥१॥ कायमानः वना त्वं यत् मातॄः अजगन् अपः न तत् ते अग्ने प्रऽमृषे निऽवर्तनं यत् दूरे सन् इह अभवः॥२॥ अतिं तृष्टं ववक्षिथ अथ एव सुऽमनाः असि प्रऽप्र अन्ये यंति परि अन्ये आसते येषां सख्ये असि श्रितः॥३॥ ईयि-

ऽवांसं अति स्रिधः शश्वतीः अति सश्चतः अनु ईं अविंदन् निऽचिरासः अदुहः अपऽसु सिंहंऽइव श्रितं ॥ ४ ॥ ससृवांसंऽइव त्मना अग्निं इत्था तिरःऽहितं आ एनं नयत् मातरिश्वा पराऽवतः देवेभ्यः मथितं परि ॥ ५ ॥ ५ ॥ तं त्वा मर्ताः अगृभ्णत देवेभ्यः हव्यऽवाहन विश्वान् यत् यज्ञान् अभिऽपासि मानुष तव क्रत्वा यविष्ठ्य ॥ ६ ॥ तत् भद्रं तव दंसना पाकाय चित् छदयति त्वां यत् अग्ने पशवःसंऽआसति संऽइद्धं अपिऽशर्वरे ॥ ७ ॥ आ जुहोत सुऽअध्वरं शीरं पावकऽशोचिषं आशुं दूतं अजिरं प्रत्नं ईड्यं श्रुष्टी देवं सपर्यत ॥ ८ ॥ चीणि शता ची सहस्राणि अग्निं त्रिंशत् च देवाः नव च असपर्यन् औक्षन् घृतैः अस्तृणन् बर्हिः अस्मै आत इत् होतारं नि असादयंत ॥ ९ ॥ ६ ॥

॥ १० ॥ त्वां अग्ने मनीषिणः संऽराजं चर्षणीनां देवं मर्तासः इंधते सं अध्वरे ॥ १ ॥ त्वां यज्ञेषु ऋत्विजं अग्ने होतारं ईळते गोपाः ऋतस्य दीदिहि स्वे दमे ॥ २ ॥ सः घ यः ते ददाशति संऽइधा जातऽवेदसे सः अग्ने धत्ते सुऽवीर्यं सः पुष्यति ॥ ३ ॥ सः केतुः अध्वराणां अग्निः देवेभिः आ गमत् अंजानः सप्त होतृऽभिः हविष्मते ॥ ४ ॥ प्र होत्रे पूर्व्यं वचः अग्नये भरत बृहत् विपां ज्योतींषि बिभ्रते न वेधसे ॥ ५ ॥ ७ ॥ अग्निं वर्धंतु नः गिरः यतः जायंते उक्थ्यः महे वाजाय द्रविणाय दर्शतः ॥ ६ ॥ अग्ने यजिष्ठः अध्वरे देवान् देवऽयते यज होतां मंद्रः वि राजसि अति स्रिधः ॥ ७ ॥ सः नः पावक दीदिहि द्युऽमत् अग्ने सुऽवीर्यं भव स्तोतृऽभ्यः अंतमः स्वस्तये ॥ ८ ॥ तं त्वा विप्राः विपन्यवः जागृऽवांसः सं इंधते हव्यऽवाहं अमर्त्यं सहःऽवृधं ॥ ९ ॥ ८ ॥

॥११॥ अग्निः होता पुरःऽहितः अध्वरस्य विऽचर्षणिः सः वेद् यज्ञं आनुषक्॥१॥ सः हव्यऽवाट् अमर्त्यः उशिक् दूतः चनःऽहितः अग्निः धिया सं ऋण्वति॥२॥ अग्निः धिया सः चेतति केतुः यज्ञस्य पूर्व्यः अर्थं हि अस्य तरणिं॥३॥ अग्निं सूनुं सनऽश्रुतं सहसः जातऽवेदसं वहिं देवाः अकृण्वत॥४॥ अदाभ्यः पुरःऽएता विशां अग्निः मानुषीणां तूर्णिः रथः सदा नवः॥५॥९॥ सद्मान् विश्वाः अभिऽयुजः क्रतुः देवानां अमृक्तः अग्निः तुविश्ववःऽतमः॥६॥ अभि प्रयांसि वाहसा दाश्वान् अश्नोति मर्त्यः क्षयं पावकऽशोचिषः॥७॥ परि विश्वानि सुऽधिता अग्नेः अश्याम मन्मऽभिः विप्रासः जातऽवेदसः॥८॥ अग्ने विश्वानि वार्या वाजेषु सनिषामहे त्वे देवासः आ ईरिरे॥ ९ ॥ १० ॥

॥१२॥ इंद्राग्नी आ गतं सुतं गीःऽभिः नभः वरेण्यं अस्य पातं धिया इषिता॥१॥ इंद्राग्नी जरितुः सचा यज्ञः जिगाति चेतनः अया पातं इमं सुतं॥२॥ इंद्रं अग्निं कविऽछदा यज्ञस्य जूत्या वृणे ता सोमस्य इह तृंपतां॥३॥ तोशा वृचऽहना हुवे सऽजित्वाना अपराऽजिता इंद्राग्नी वाजऽसातमा॥४॥ प्र वां अर्चंति उक्थिनः नीथऽविदः जरितारः इंद्राग्नी इषः आ वृणे॥५॥११॥ इंद्राग्नी नवतिं पुरः दासऽपत्नीः अधूनुतं साकं एकेन कर्मणा॥६॥ इंद्राग्नी अपसः परि उप प्र यंति धीतयः ऋतस्य पथ्याः अनु॥७॥ इंद्राग्नी तविषाणि वां सधऽस्थानि प्रयांसि च युवोः अप्ऽस्तूर्यं हितं॥८॥ इंद्राग्नी रोचना दिवः परि वाजेषु भूषथः तत् वां चेति प्र वीर्यं ॥ ९ ॥ १२ ॥ १ ॥

॥१३॥ प्र वः देवाय अग्नये बर्हिष्ठं अर्चे असै गमत् देवेभिः आ

सः नः यजिष्ठः बर्हिः आ सदत्॥१॥ ऋतऽवा यस्य रोदसी दक्षं सचेते ऊतयः हविष्मंतः तं ईळते तं सनिष्यंतः अवसे॥२॥ सः यंता विप्रः एषां सः यज्ञानां अथ हि सः अग्निं तं वः दुवस्यत दाता यः वनिता मघं॥३॥ सः नः शर्मणि वीतये अग्निः यच्छतु शंऽतमा यतः नः प्रुष्णवत् वसु दिवि क्षितिऽभ्यः अप्ऽसु आ॥४॥ दीदिऽवांसं अपूर्व्यं वस्वीभिः अस्य धीतिऽभिः ऋक्वाणः अग्निं ईधते होतारं विशपतिं विशां॥५॥ उत नः ब्रह्मन् अविषः उक्थेषु देवऽहूतमः शं नः शोच मरुतऽवृधः अग्ने सहस्रऽसातमः॥६॥ नु नः रास्व सहस्रऽवत् तोकऽवत् पुष्टिऽमत् वसु द्युऽमत् अग्ने सुऽवीर्यं वर्षिष्ठं अनुपऽक्षितं ॥ ७ ॥ १३ ॥

॥१४॥ आ होता मंद्रः विदथानि अस्थात् सत्यः यज्वा कविऽतमः सः वेधाः विद्युतऽरथः सहसः पुत्रः अग्निः शोचिःऽकेशः पृथिव्यां पाजः अश्रेत्॥१॥ अयामि ते नमःऽउक्तिं जुषस्व ऋतऽवः तुभ्यं चेतते सहस्वः विद्वान् आ वक्षि विदुषः नि सत्सि मध्ये आ बर्हिः ऊतये यज च॥२॥ द्रवतां ते उषसा वाजयंती अग्ने वातस्य पथ्याभिः अच्छ यत् सीं अंजंति पूर्व्यं हविःऽभिः आ वंधुराऽइव तस्थतुः दुरोणे॥३॥ मित्रः च तुभ्यं वरुणः सहस्वः अग्ने विश्वे मरुतः सुम्नं अर्चन् यत् शोचिषा सहसः पुत्र तिष्ठाः अभि क्षितीः प्रथयन् सूर्यैः नॄन्॥४॥ वयं ते अद्य ररिम हि कामं उत्तानऽहस्ताः नमसा उपऽसद्य यजिष्ठेन मनसा यक्षि देवान् अस्रेधता मन्मना विप्रः अग्ने ॥५॥ त्वत् हि पुत्र सहसः वि पूर्वीः देवस्य यंति ऊतयः वि वाजाः त्वं देहि सहस्रिणं रयिं नः अद्रोघेण वचसा सत्यं अग्ने॥६॥ तुभ्यं दक्ष कविऽक्रतो॰ यानिं इमा देव मर्तासः अध्वरे

अकर्मे त्वं विश्वस्य सुऽरथस्य बोधि सर्वं तत् अग्ने अमृत स्वद् इह ॥ ७ ॥ १४ ॥

॥१५॥ वि पाजसा पृथुना शोशुचानः बाधस्व द्विषः रक्षसः अमीवाः सुऽशर्मणः बृहतः शर्मणि स्यां अग्नेः अहं सुऽहवस्य प्रऽनीतौ॥१॥ त्वं नः अस्याः उषसः विऽउष्टौ त्वं सूरे उतऽइते बोधि गोपाः जन्मऽइव नित्यं तनयं जुषस्व स्तोमं मे अग्ने तन्वा सुजात ॥२॥ त्वं नृऽचक्षाः वृषभ अनु पूर्वीः कृष्णासु अग्ने अरुषः वि भाहि वसोः नेषि च पर्षि च अति अंहः कृधि नः राये उशिजः यविष्ठ ॥३॥ अषाळ्हः अग्ने वृषभः दिदीहि पुरः विश्वाः सौभगा संऽजिगीवान् यज्ञस्य नेता प्रथमस्य पायोः जातऽवेदः बृहतः सुऽप्रणीते ॥४॥ अच्छिद्रा शर्म जरितः पुरूणि देवान् अच्छ दीद्यानः सुऽमेधाः रथः न सस्निः अभि वक्षि वाजं अग्ने त्वं रोदसी नः सुऽमेके° ॥५॥ प्र पीपय वृषभ जिन्व वाजान् अग्ने त्वं रोदसी नः सुऽदोघे° देवेभिः देव सुऽरुचा रुचानः मा नः मर्तस्य दुःऽमतिः परि स्यात् ॥६॥ इळां अग्ने पुरुऽदंसं सनिं गोः शश्वत्ऽतमं हवमानाय साध स्यात् नः सूनुः तनयः विजाऽवा अग्ने सा ते सुऽमतिः भूतु अस्मे ॥ ७ ॥ १५ ॥

॥१६॥ अयं अग्निः सुऽवीर्यस्य ईशे महः सौभगस्य रायः ईशे सुऽअपत्यस्य गोऽमतः ईशे वृत्रऽहथानां ॥१॥ इमं नरः मरुतः सश्चत वृधं यस्मिन् रायः शेऽवृधासः अभि ये संति पृतनासु दुःऽध्यः विश्वाहा शत्रुं आऽदभुः ॥२॥ सः त्वं नः रायः शिशीहि मीढ्वः अग्ने सुऽवीर्यस्य तुविऽद्युम्न बर्षिष्ठस्य प्रजाऽवतः अनमीवस्य

ष्मिणः॥३॥ चक्रिः यः विश्वा भुवना अभि ससहिः चक्रिः देवेषु आ दुवः आ देवेषु यतते आ सुऽवीर्ये आ शंसे उत नृणां॥४॥ मा नः अग्ने अमंतये मा अवीरतायै रीरधः मा अगोतायै सहसः पुत्र मा निदे अप द्वेषांसि आ कृधि॥५॥ शग्धि वाजस्य सुऽभग प्रजाऽवतः अग्ने बृहतः अध्वरे सं राया भूयसा सृज मयःऽभुना तुविऽद्युम्न यशस्वता॥६॥१६॥

॥१७॥ संऽइध्यमानः प्रथमा अनु धर्मं सं अक्तुऽभिः अज्यते विश्वऽवारः शोचिःऽकेशः घृतऽनिर्निक् पावकः सुऽयज्ञः अग्निः यजथाय देवान्॥१॥ यथा अयजः होत्रं अग्ने पृथिव्याः यथा दिवः जातऽवेदः चिकित्वान् एव अनेन हविषा यक्षि देवान् मनुष्वत् यज्ञं प्र तिर इमं अद्य॥२॥ चीणि आयूंषि तव जातऽवेदः तिस्रः आऽजानीः उषसः ते अग्ने ताभिः देवानां अवः यक्षि विद्वान् अथ भव यजमानाय शं योः॥३॥ अग्निं सुऽदीतिं सुऽदृशं गृणंतः नमस्यामः त्वा ईड्यं जातऽवेदः त्वां दूतं अरतिं हव्यऽवाहं देवाः अकृण्वन् अमृतस्य नाभिं॥४॥ यः त्वत् होता पूर्वः अग्ने यजीयान् द्विता च सत्ता स्वधया च शंऽभुः तस्य अनु धर्म प्र यज चिकित्वः अथ नः धाः अध्वरं देवऽवीतौ॥५॥१७॥

॥१८॥ भव नः अग्ने सुऽमनाः उपेऽइती सखाऽइव सख्ये पितराऽइव साधुः पुरुऽदुहः हि क्षितयः जनानां प्रति प्रतीचीः दहतात् अरातीः॥१॥ तपोः सु अग्ने अंतरान् अमित्रान् तप शंसं अरुषः परस्य तपोः वसोः चिकितानः अचित्तान् वि ते तिष्ठंतां अजराः अयासः॥२॥ इध्मेन अग्ने इच्छमानः घृतेन जुहोमि हव्यं

तरसे बलाय यावत् ईशे ब्रह्मणा वंदमानः इमां धियं शतऽसेयाय देवीं ॥३॥ उत शोचिषा सहसः पुच स्तुतः बृहत् वयः शशमानेषु धेहि रेवत् अग्ने विश्वामित्रेषु शं योः मर्मृज्म ते तन्वं भूरि कृत्वः ॥४॥ कृधि रत्नं सुऽसनितः धनानां सः घ इत् अग्ने भवसि यत् सं-ऽइद्धः स्तोतुः दुरोणे सुऽभगस्य रेवत् सप्रा करत्ना दधिषे वपूंषि ॥५॥१८॥

॥१९॥ अग्निं होतारं प्र वृणे मियेधे गृत्सं कविं विश्वऽविदं अमूरं सः नः यक्षत् देवऽताता यजीयान् राये वाजाय वनते मघानि ॥१॥ प्र ते अग्ने हविष्मतीं इयर्मि अच्छ सुऽद्युम्नां रातिनीं घृताचीं प्रऽदक्षिणित् देवऽतातिं उराणः सं रातिऽभिः वसुऽभिः यज्ञं अश्रेत् ॥२॥ सः तेजीयसा मनसा त्वाऽऊतः उत शिक्ष सुऽअपत्यस्य शिक्षोः अग्ने रायः नृऽतमस्य प्रऽभूतौ भूयाम ते सुऽस्तुतयः च वस्वः ॥३॥ भूरीणि हि त्वे दधिरे अनीका अग्ने देवस्य यज्यवः जनासः सः आ वह देवऽतातिं यविष्ठ शर्धः यत् अद्य दिव्यं यजांसि ॥४॥ यत् त्वा होतारं अनजन् मियेधे निऽसादयंतः यजथाय देवाः सः त्वं नः अग्ने अविता इह बोधि अधि अवांसि धेहि नः तनूषु ॥५॥१९॥

॥२०॥ अग्निं उषसं अश्विना दधिऽक्रां विऽउष्टिषु हवते वह्निः उक्थैः सुऽज्योतिषः नः शृण्वंतु देवाः सऽजोषसः अध्वरं वावशानाः ॥१॥ अग्ने ची ते वाजिना ची सधऽस्था तिस्रः ते जिह्वाः ऋतऽजात पूर्वीः तिस्रः ऊं ते तन्वः देवऽवाताः ताभिः नः पाहि गिरः अप्रऽयुच्छन् ॥२॥ अग्ने भूरीणि तव जातऽवेदः देव स्वधाऽवः

अमृतस्य नाम याः च मायाः मायिनां विश्वंऽइन्वत्वे पूर्वीः संऽदधुः पृष्टऽबंधो° ॥३॥ अग्निः नेता भगःऽइव क्षितीनां दैवीनां देवः ऋतुऽपाः ऋतऽवा सः वृचऽहा सनयः विश्वऽवेदाः पर्षत् विश्वा अतिदुःऽइता गृणंतं ॥४॥ दधिऽक्रां अग्निं उषसं च देवीं बृहस्पतिं सवितारं च देवं अश्विना मित्रावरुणा भगं च वसून् रुद्रान् आदित्यान् इह हुवे ॥५॥२०॥

॥२१॥ इमं नः यज्ञं अमृतेषु धेहि इमा हव्या जातऽवेदः जुषस्व स्तोकानां अग्ने मेदसः घृतस्य होतः° प्र अशान प्रथमः निऽसद्य ॥१॥ घृतऽवंतः पावक ते स्तोकाः श्वोतंति मेदसः स्वऽधर्मन् देवऽवीतये श्रेष्ठं नः धेहि वार्यं ॥२॥ तुभ्यं स्तोकाः घृतऽश्चुतः अग्ने विप्राय संत्य ऋषिः श्रेष्ठः सं इध्यसे यज्ञस्य प्रऽअविता भव ॥३॥ तुभ्यं श्वोतंति अध्रिऽगो° शचीऽवः स्तोकासः अग्ने मेदसः घृतस्य कविऽशस्तः बृहता भानुना आ अगाः हव्या जुषस्व मेधिर ॥४॥ ओजिष्ठं ते मध्यतः मेदः उत्ऽभृतं प्र ते वयं ददामहे श्वोतंति ते वसो° स्तोकाः अधि त्वचि प्रति तान् देवऽशः विहि ॥५॥२१॥

॥२२॥ अयं सः अग्निः यस्मिन् सोमं इंद्रः सुतं दधे जठरे वावशानः सहस्रिणं वाजं अत्यं न सप्तिं ससऽवान् सन् स्तूयसे जातऽवेदः ॥१॥ अग्ने यत् ते दिवि वर्चः पृथिव्यां यत् ओषधीषु अप्ऽसु आ यजत्र येन अंतरिक्षं उरु आऽततंथ त्वेषः सः भानुः अर्णवः नृऽचक्षाः ॥२॥ अग्ने दिवः अर्णं अच्छ जिगासि अच्छ देवान् ऊचिषे धिष्ण्याः ये याः रोचने परस्तात् सूर्यस्य याः च अवस्तात् उपऽतिष्ठंते आपः ॥३॥ पुरीष्यासः अग्नयः प्रवणेभिः सऽजोषसः जु-

षंतां यज्ञं अदुहः अनमीवाः इषः महीः ॥४॥ इळां अग्ने पुरुऽदंसं सनिं गोः शश्वत्ऽतमं हवमानाय साध स्यात् नः सूनुः तनयः विजाऽवा अग्ने सा ते सुऽमतिः भूतु अस्मे ॥५॥२२॥

॥२३॥ निःऽमंथितः सुऽधितः आ सधऽस्थे युवा कविः अध्वरस्य प्रऽनेता जूर्यतऽसु अग्निः अजरः वनेषु अच दधे अमृतं जातऽवेदाः॥१॥ अमंथिष्टां भारता रेवत् अग्निं देवऽश्रवाः देवऽवातः सुऽदक्षं अग्ने वि पश्य बृहता अभि राया इषां नः नेता भवतात् अनु द्यून्॥२॥ दश क्षिपः पूर्व्यं सीं अजीजनन् सुऽजातं मातृषु प्रियं अग्निं स्तुहि देवऽवातं देवऽश्रवः यः जनानां असत् वशी॥३॥ नि त्वा दधे वरे आ पृथिव्याः इळायाः पदे सुदिनऽत्वे अह्नां दृषत्ऽवत्यां मानुषे आपयायां सरस्वत्यां रेवत् अग्ने दिदीहि॥४॥ इळां अग्ने पुरुऽदंसं सनिं गोः शश्वत्ऽतमं हवमानाय साध स्यात् नः सूनुः तनयः विजाऽवा अग्ने सा ते सुऽमतिः भूतु अस्मे ॥५॥२३॥

॥२४॥ अग्ने सहस्व पृतनाः अभिऽमातीः अप अस्य दुस्तरः तरन् अरातीः वर्चः धाः यज्ञऽवाहसे॥१॥ अग्ने इळा सं इध्यसे वीतिऽहोत्रः अमर्त्यः जुषस्व सु नः अध्वरं॥२॥ अग्ने द्युम्नेन जागृवे सहसः सूनो आऽहुत आ इदं बर्हिः सदः मम ॥३॥ अग्ने विश्वेभिः अग्निऽभिः देवेभिः महय गिरः यज्ञेषु ये जं चायवः॥४॥ अग्ने दाः दाशुषे रयिं वीरऽवंतं परीणसं शिशीहि नः सूनुऽमतः॥५॥२४॥

॥२५॥ अग्ने दिवः सूनुः असि प्रऽचेताः तना पृथिव्याः उत विश्वऽवेदाः ऋधक् देवान् इह यज चिकित्वः ॥१॥ अग्निः सनोति

वीर्याणि विद्वान् सनोति वाजं अमृताय भूषन् सः नः देवान् आ इह वह पुरुऽक्षो०॥२॥ अग्निः द्यावापृथिवी विश्वऽजन्ये० आभाति देवी अमृते अमूरः क्षयन् वाजैः पुरुऽचंद्रः नमःऽभिः ॥३॥ अग्ने इंद्रः च दाशुषः दुरोणे सुतऽवतः यज्ञं इह उप यातं अमर्धता सोमऽपेयाय देवा ॥४॥ अग्ने अपां सं इध्यसे दुरोणे नित्यः सूनो सहसः जातऽवेदः सधऽस्थानि महयमानः ऊती ॥५॥२५॥

॥२६॥ वैश्वानरं मनसा अग्निं निऽचाय्य हविष्मंतः अनुऽसत्यं स्वःऽविदं सुऽदानुं देवं रथिरं वसुऽयवः गीःऽभिः रण्वं कुशिकासः हवामहे ॥१॥ तं शुभ्रं अग्निं अवसे हवामहे वैश्वानरं मातरिश्वानं उक्थ्यं बृहस्पतिं मनुषः देवऽतातये विप्रं श्रोतारं अतिथिं रघुऽस्यदं॥२॥ अश्वः न क्रंदन् जनिऽभिः सं इध्यते वैश्वानरः कुशिकेभिः युगेऽयुगे सः नः अग्निः सुऽवीर्यं सुऽअश्व्यं दधातु रत्नं अमृतेषु जागृविः॥३॥ प्र यंतु वाजाः तविषीभिः अग्नयः शुभे संऽमिश्लाः पृषंतीः अयुक्षत बृहतऽउक्षः मरुतः विश्वऽवेदसः प्र वेपयंति पर्वतान् अदाभ्याः॥४॥ अग्निऽश्रियः मरुतः विश्वऽकृष्टयः आ त्वेषं उग्रं अवः ईमहे वयं ते स्वानिनः रुद्रियाः वर्षऽनिर्निजः सिंहाः न हेषऽऋतवः सुऽदानवः ॥५॥२६॥ वातंऽवातं गणंऽगणं सुशस्तिऽभिः अग्नेः भामं मरुतां ओजः ईमहे पृषंतऽअश्वासः अनवभ्रऽराधसः गंतारः यज्ञं विदथेषु धीराः॥६॥ अग्निः अस्मि जन्मना जातऽवेदाः घृतं मे चक्षुः अमृतं मे आसन् अर्कः चिऽधातुः रजसः विऽमानः अजस्रः घर्मः हविः अस्मि नाम ॥७॥ चिऽभिः पविभैः अपुपोत हि अर्कैः हृदा मतिं ज्योतिः अनु प्रऽजानन् वसिष्ठं रत्नं अकृत स्वधाभिः आत इत् द्यावापृथिवी परि अपश्यत्॥८॥ श-

तऽधारं उत्सं अक्षीयमाणं विपःऽचितं पितरं वक्वानां मेळिं मदंतं पिचोः उपऽस्थे तं रोदसी पिपृतं सत्यऽवाचं ॥ ९ ॥ २७ ॥

॥२७॥ प्र वः वाजाः अभिऽद्यवः हविष्मंतः घृताच्या देवान् जिगाति सुम्नयुः॥१॥ ईळे अग्निं विपःऽचितं गिरा यज्ञस्य साधनं श्रुष्टीऽवानं धितऽवानं॥२॥ अग्ने शकेम ते वयं यमं देवस्य वाजिनः अति द्वेषांसि तरेम॥३॥ संऽइध्यमानः अध्वरे अग्निः पावकः ईड्यः शोचिःऽकेशः तं ईमहे॥४॥ पृथुऽपाजाः अमर्त्यः घृतऽनिर्निक्सुऽआहुतः अग्निः यज्ञस्य हव्यऽवाट्॥५॥२८॥ तं सऽवाधः यतऽसुचः इत्था धिया यज्ञऽवंतः आ चक्रुः अग्निं ऊतये॥६॥ होता देवः अमर्त्यः पुरस्तात् एति मायया विदथानि प्रऽचोदयन्॥७॥ वाजी वाजेषु धीयते अध्वरेषु प्र नीयते विप्रः यज्ञस्य साधनः॥८॥ धिया चक्रे वरेण्यः भूतानां गर्भं आ दधे दक्षस्य पितरं तना॥९॥ नि त्वा दधे वरेण्यं दक्षस्य इळा सहःऽकृत अग्ने सुऽदीतिं उशिजं॥१०॥२९॥ अग्निं यंतुरं अप्ऽतुरं ऋतस्य योगे वनुषः विप्राः वाजैः सं इंधते॥११॥ ऊर्जः नपातं अध्वरे दीदिऽवांसं उप द्यवि अग्निं ईळे कविऽक्रतुं॥१२॥ ईळेन्यः नमस्यः तिरः तमांसि दर्शतः सं अग्निः इध्यते वृषा॥१३॥ वृषो अग्निः सं इध्यते अश्वः न देवऽवाहनः तं हविष्मंतः ईळते॥१४॥ वृषणं त्वा वयं वृषन् वृषणः सं इधीमहि अग्ने दीद्यतं बृहत्॥१५॥३०॥

॥२८॥ अग्ने जुषस्व नः हविः पुरोळाशं जातऽवेदः प्रातःऽसावे धियाऽवसो॰॥१॥ पुरोळाः अग्ने पचतः तुभ्यं वा घ परिऽकृतः तं जुषस्व यविष्ठ्य॥२॥ अग्ने वीहि पुरोळाशं आऽहुतं तिरःऽअह्न्यं

सहसः सूनुः असि अध्वरे हितः॥३॥ माध्यंदिने सवने जातऽवेद. पुरोळाशं इह कवे जुषस्व अग्ने यह्वस्य तव भागऽधेयं न प्र मिनंति विदथेषु धीराः॥४॥ अग्ने तृतीये सवने हि कानिषः पुरोळाशं सहसः सूनो आऽहुतं अद्या देवेषु अध्वरं विपन्यया धाः रत्नऽवंतं अमृतेषु जागृविं॥५॥ अग्ने वृधानः आऽहुतिं पुरोळाशं जातऽवेदः जुषस्व तिरःऽअह्न्यं॥६॥३१॥

॥२९॥ अस्ति इदं अधिऽमंथनं अस्ति प्रऽजननं कृतं एतां विश्पत्नीं आ भर अग्निं मंथाम पूर्वऽथा॥१॥ अरण्योः निऽहितः जातऽवेदाः गर्भःऽइव सुऽधितः गर्भिणीषु दिवेऽदिवे ईड्यः जागृवतऽभिः हविष्मतऽभिः मनुष्येभिः अग्निः॥२॥ उत्तानायां अव भर चिकित्वान् सद्यः प्रऽवीता वृषणं जजान अरुषऽस्तूपः रुशत् अस्य पाजः इळायाः पुचः वयुने अजनिष्ट॥३॥ इळायाः त्वा पदे वयं नाभा पृथिव्याः अधि जातऽवेदः नि धीमहि अग्ने हव्याय वोळ्हवे॥४॥ मंथत नरः कविं अद्वयंतं प्रऽचेतसं अमृतं सुऽप्रतीकं यज्ञस्य केतुं प्रथमं पुरस्तात् अग्निं नरः जनयत सुऽशेवं॥५॥३२॥ यदि मंथंति बाहुऽभिः वि रोचते अश्वः न वाजी अरुषः वनेषु आ चिचः न यामन् अश्विनोः अनिवृतः परि वृणक्ति अश्मनः तृणा दहन्॥६॥ जातः अग्निः रोचते चेकितानः वाजी विप्रः कविऽशस्तः सुऽदानुः यं देवासः ईड्यं विश्वऽविदं हव्यऽवाहं अदधुः अध्वरेषु॥७॥ सीद होतः स्वे ऊं लोके चिकित्वान् सादया यज्ञं सुऽकृतस्य योनौ देवऽअवीः देवान् हविषा यजासि अग्ने बृहत् यजमाने वयः धाः॥८॥ कृणोत धूमं वृषणं सखायः असेधंतः इतन वाजं अच्छ अयं अग्निः पृतनाषाट् सुऽवीरः येन देवासः असहंत

दस्यून्॥९॥ अयं ते योनिः ऋत्वियः यतः जातः अरोचथाः तं जानन अग्ने आ सीद अथ नः वर्धय गिरः॥१०॥३३॥ तनूऽनपात् उच्यते गर्भः आसुरः नराशंसः भवति यत् विऽ जायते मातरिश्वा यत् अमिमीत मातरि वातस्य सर्गः अभवत् सरीमणि॥११॥ सुनिःऽमथा निःऽमथितः सुऽनिधा निऽहितः कविः अग्ने सुऽअध्वरा कृणु देवान् देवऽयते यज॥१२॥ अजीजनन अमृतं मर्त्यासः अस्रेमाणं तरणिं वीळुऽजंभं दश स्वसारः अयुवः सऽईचीः पुमांसं जातं अभि सं रभंते॥१३॥ प्र सप्तऽहोता सनकात् अरोचत मातुः उपऽस्थे यत् अशोचत ऊधनि न नि मिषति सुऽरणः दिवेऽदिवे यत् असुरस्य जठरात् अजायत॥१४॥ अमिचऽयुधः मरुतांऽइव प्रऽयाः प्रथमऽजाः ब्रह्मणः विश्वे इत् विदुः द्युम्नऽवत् ब्रह्म कुशिकासः आ ईरिरे एकःऽएकः दमे अग्निं सं ईधिरे॥१५॥ यत् अद्य त्वा प्रऽयति यज्ञे अस्मिन् होतः चिकित्वः अवृणीमहि इह ध्रुवं अयाः ध्रुवं उत अशमिष्ठाः प्रऽजानन् विद्वान् उप याहि सोमं॥१६॥३४॥१॥२॥

॥ ३० ॥ इच्छंति त्वा सोम्यासः सखायः सुन्वंति सोमं दधति प्रयांसि तितिक्षंते अभिऽशस्तिं जनानां इंद्र त्वत् आ कः चन हि प्रऽकेतः॥१॥ न ते दूरे परमा चित् रजांसि आ तु प्र याहि हरिऽवः हरिऽभ्यां स्थिराय वृष्णे सवना कृता इमा युक्ताः यावाणः संऽइधाने अग्नौ॥२॥ इंद्रः सुऽशिप्रः मघऽवा तरुचः महाऽवीतः तुविऽकूर्मिः ऋघावान् यत् उग्रः धाः बाधितः मर्त्येषु कं त्या ते वृषभ वीर्याणि॥३॥ त्वं हि स्म च्यवयन् अच्युतानि एकः वृचा चरसि जिघ्नमानः तव द्यावापृथिवी पर्वतासः अनु व्रताय नि-

मिताऽइव तस्थुः॥४॥ उत अभये पुरुऽहूत श्रवःऽभिः एकः दृळ्हं अवदः वृचऽहा सनइमे चित् इंद्र रोदसी अपारे यत् संऽगृभ्णाः मघऽवन् काशिः इत् ते॥५॥१॥ प्र मु ते इंद्र प्रऽवता हरिऽभ्यां प्र ते वज्रः प्रऽमृणन् एतु शत्रून् जहि प्रतीचः अनूचः पराचः विश्वं सत्यं कृणुहि विष्टं अस्तु॥६॥ यस्मै धायुः अदधाः मर्त्याय अभक्तं चित् भजते गेह्यं सः भद्रा ते इंद्र सुऽमतिः घृताची सहस्रऽदाना पुरुऽहूत रातिः॥७॥ सहऽदानुं पुरुऽहूत क्षियंतं अहस्तं इंद्र सं पिणक् कुणारुं अभि वृचं वर्धमानं पियारुं अपादं इंद्र तवसा जघंथ॥८॥ निसामनां इषिरां इंद्र भूमिं मही अपारां सदने ससत्थ अस्तभ्नात् द्यां वृषभः अंतरिक्षं अधैतु आपः त्वया इह प्रऽसूताः॥९॥ अलातृणः वलः इंद्र व्रजः गोः पुरा हंतोः भयमानः वि आर सुऽगान् पथः अकृणोत् निःऽअजे गाः प्र आवन् वाणीः पुरुऽहूतं धमंतीः॥१०॥२॥ एकः द्वे वसुऽमती० संऽईची० इंद्रः आ पप्रौ पृथिवी उत द्यां उत अंतरिक्षात् अभि नः संऽईके इषः रथीः सऽयुजः पूर वाजान्॥११॥ दिशः सूर्यः न मिनाति प्रऽदिष्टाः दिवेऽदिवे हर्यश्वऽप्रसूताः सं यत् आनट् अध्वनः आत् इत् अश्वैः विऽमोचनं कृणुते तत् तु अस्य॥१२॥ दिदृक्षंते उषसः यामन् अक्तोः विवस्वत्याः महि चित्रं अनीकं विश्वे जानंति महिना यत् आ अगात् इंद्रस्य कर्म सुऽकृता पुरूणि॥१३॥ महि ज्योतिः निऽहितं वक्षणासु आमा पक्वं चरति बिभ्रती गौः विश्वं स्वाद्म संऽभृतं उस्रियायां यत् सीं इंद्रः अदधात् भोजनाय॥१४॥ इंद्र दह्यामऽकोशाः अभूवन् यज्ञाय शिक्ष गृणते सखिऽभ्यः दुःऽमायवः दुःऽएवाः मर्त्यासः निषंगिणः रिपवः हंत्वासः॥१५॥३॥ सं घोषः शृण्वे अवमैः अमित्रैः जहि नि एषु अशनिं तपिष्ठां वृश्च ई अधस्तात् वि रुज सहस्व

जहि रक्षः मघऽवन् रंधयस्व ॥१६॥ उत वृह रक्षः सहऽमूलं इंद्र वृश्च मध्यं प्रति अयं पृणीहि आ कीवंतः सललूकं चकर्थ ब्रह्मऽद्विषे तपुषिं हेतिं अस्य ॥१७॥ स्वस्तये वाजिऽभिः च प्रऽनेतः संयत महीः इषः आऽसत्सि पूर्वीः रायः वंतारः बृहतः स्याम अस्मे अस्तु भगः इंद्र प्रजाऽवान् ॥१८॥ आ नः भर भगं इंद्र द्युऽमंतं नि ते देष्णस्य धीमहि प्रऽरेके ऊर्वःऽइव पप्रथे कामः अस्मे तं आ पृण वसुऽपते वसूनां ॥१९॥ इमं कामं मंदय गोभिः अश्वैः चंद्रऽवता राधसा पप्रथः च स्वःऽयवः मतिऽभिः तुभ्यं विप्राः इंद्राय वाहः कुशिकासः अक्रन ॥२०॥ आ नः गोचा दृंहि गोऽपते गाः सं अस्मभ्यं सनयः यंतु वाजाः दिवक्षाः असि वृषभ सत्यऽशुष्मः अस्मभ्यं सु मघऽवन् बोधि गोऽदाः ॥२१॥ शुनं हुवेम मघऽवानं इंद्रं अस्मिन् भरे नृऽतमं वाजऽसातौ शृण्वंतं उग्रं ऊतये समत्ऽसु घ्नंतं वृत्राणि संऽजितं धनानां ॥२२॥४॥

॥३१॥ शासत् वह्निः दुहितुः नप्त्यं गात् विद्वान् ऋतस्य दीधितिं सपर्यन् पिता यत्र दुहितुः सेकं ऋंजन् सं शग्म्येन मनसा दधन्वे ॥१॥ न जामये तान्वः रिक्थं अरैक् चकार गर्भं सनितुः निऽधानं यदि मातरः जनयंत वह्निं अन्यः कर्ता सुऽकृतोः अन्यः ऋंधन ॥२॥ अग्निः जज्ञे जुह्वा रेजमानः महः पुचान् अरुषस्य प्रऽयक्षे महान् गर्भः महि आ जातं एषां मही प्रऽवृत हरिऽअश्वस्य यज्ञैः ॥३॥ अभि जैत्रीः असचंत स्पृधानं महि ज्योतिः तमसः निः अजानन् तं जानतीः प्रति उत आयन् उषसः पतिः गवां अभवत् एकः इंद्रः ॥४॥ वीळौ सतीः अभि धीराः अतृंदन् प्राचा अहिन्वन् मनसा सप्त विप्राः विश्वा अविंदन् पथ्या ऋतस्य प्र-

ऽजानन् इत् ता नमसा आ विवेश ॥५॥५॥ विदत् यदि सरमा रुग्णं अद्रेः महि पाथः पूर्व्यं सध्र्यक्कः० अयं नयत् सुऽपदी अक्षराणां अच्छ रवं प्रथमा जानती गात् ॥६॥ अगच्छत् ऊं विप्रऽतमः सखिऽयन् असूदयत् सुऽकृते गभं अद्रिः ससान मर्यः युवऽभिः मखस्यन् अथ अभवत् अंगिराः सद्यः अर्चन् ॥७॥ सतःऽसंतः प्रतिऽमानं पुरःऽभूः विश्वा वेद जनिम हंति शुष्णं प्र नः दिवः पदऽवीः गव्युः अर्चन् सखा सखीन् अमुंचत् निः अवद्यात् ॥८॥ नि गव्यता मनसा सेदुः अर्कैः कृण्वानासः अमृतऽत्वाय गातुं इदं चित् नु सदनं भूरि एषां येन मासान् असिसासन् ऋतेन ॥९॥ संऽपश्यमानाः अमदन् अभि स्वं पयः प्रत्नस्य रेतसः दुघानाः वि रोदसी अतपत् घोषः एषां जाते निःऽस्थां अदधुः गोषु वीरान् ॥१०॥६॥ सः जातेभिः वृत्रऽहा सः इत् ऊं हव्यैः उत उस्रियाः असृजत् इंद्रः अर्कैः उरूची असै घृतऽवत् भरंती मधु स्वाद्म दुदुहे जेन्या गौः ॥११॥ पिचे चित् चक्रुः सदनं सं असै महि त्विषिऽमत् सुऽकृतः वि हि ख्यन् विऽस्कभंतः स्कंभनेन जनिची आसीनाः ऊर्ध्वं रभसं वि मिन्वन् ॥१२॥ मही यदि धिषणा शिश्नथे धात् सद्यःऽवृधं विऽभ्वं रोदस्योः गिरः यस्मिन् अनवद्याः संऽईचीः विश्वाः इंद्राय तविषीः अनुत्ताः ॥१३॥ महि आ ते सख्यं वश्मि शक्तीः आ वृत्रऽघ्ने निऽयुतः यंति पूर्वीः महि स्तोत्रं अवः आ अगन्म सूरेः असाकं सु मघऽवन् बोधि गोपाः ॥१४॥ महि क्षेत्रं पुरु चंद्रं विविद्वान् आत इत् सखिऽभ्यः चरथं सं ऐरत् इंद्रः नृऽभिः अजनत् दीद्यानः साकं सूर्यं उषसं गातुं अग्निं ॥१५॥७॥ अपः चित् एषः विऽभ्वः दमूनाः प्र सध्रीचीः असृजत् विष्वऽचंद्राः मध्वः पुनानाः कविऽभिः पविऽत्रैः द्युऽभिः हिन्वंति अक्तुऽभिः धनुचीः

॥१६॥ अनु कृष्णे वसुऽधिती० जिहाते उभे सूर्यस्य मंहना यजत्रे परि यत् ते महिमानं वृजध्यै सखायः इंद्र काम्याः ऋजिप्याः ॥१७॥ पतिःभव वृचऽहन सूनृतानां गिरां विश्वऽआयुः वृषभः वयःऽधाः आ नः गहि सख्येभिः शिवेभिः महान् महीभिः ऊतिऽभिःसरण्यन् ॥१८॥ तं अंगिरस्वत् नमसा सपर्यन् नव्यं कृणोमि सन्यसे पुराऽजां दुहः वि याहि बहुलाः अदेवीः स्वः० च नः मघऽवन् सातये धाः ॥१९॥ मिहः पावकाः प्रऽततताः अभूवन् स्वस्ति नः पिपृहि पारं आसां इंद्र त्वं रथिरः पाहि नः रिषः मक्षुऽमक्षु कृणुहि गोऽजितः नः ॥२०॥ अदेदिष्ट वृचऽहा गोऽपतिः गाः अंतः० कृष्णान् अरुषैः धामऽभिः गात् प्र सूनृताः दिशमानः ऋतेन दुरः च विश्वाः अवृणोत् अप स्वाः ॥२१॥ शुनं हुवेम मघऽवानं इंद्रं अस्मिन् भरे नृऽतमं वाजऽसातौ शृण्वंतं उग्रं ऊतये समत्ऽसु घ्नंतं वृत्राणि संऽजितं धनानां ॥ २२ ॥ ८ ॥

॥३२॥ इंद्र सोमं सोमऽपते पिब इमं माध्यंदिनं सवनं चारु यत् ते प्रऽप्रुथ्य शिप्रे० मघऽवन् ऋजीषिन् विऽमुच्य हरी० इह मादयस्व ॥१॥ गोऽआशिरं संथिनं इंद्र शुक्रं पिब सोमं ररिम ते मदाय ब्रह्मऽकृता मारुतेन गणेन सऽजोषाः रुद्रैः तृपत् आ वृषस्व ॥२॥ ये ते शुष्मं ये तविषी अवर्धन् अचंतः इंद्र मरुतः ते ओजः माध्यंदिने सवने वज्रऽहस्त पिब रुद्रेभिः सऽगणः सुऽशिप्र ॥३॥ ते इत् नु अस्य मधुऽमत् विविप्रे इंद्रस्य शर्धः मरुतः ये आसन् येभिः वृचस्य इषितः विवेद अमर्मणः मन्यमानस्य ममे ॥४॥ मनुष्वत् इंद्र सवनं जुषाणः पिब सोमं शश्वते वीर्याय सः आ ववृत्स्व हरिऽअश्व यज्ञैः सरण्युऽभिः अपः अर्णो सिसर्षि ॥५॥ ९ ॥ त्वं अपः यत् ह

वृचं जघन्वान् अत्यान्ऽइव प्र असृजः सर्तवे आजौ शयानं इंद्र चरता वधेन वव्रिऽवांसं परिदेवीः अदेवं॥६॥ यजामः इत् नमसा वृद्धं इंद्रं बृहंतं ऋष्वं अजरं युवानं यस्य प्रिये ममतुः यज्ञियस्य न रोदसी महिमानं ममातें॥७॥ इंद्रस्य कर्म सुऽकृता पुरूणि व्रतानि देवाः न मिनंति विश्वे दाधारं यः पृथिवीं द्यां उत इमां जजानं सूर्यं उषसं सुऽदंसाः॥८॥ अद्रोघ सत्यं तव तत् महिऽत्वं सद्यः यत् जातः अपिबः हसोमैन द्यावः इंद्र तवसः ते ओजः न अहानि मासाः शरदः वरंत॥९॥ त्वं सद्यः अपिबः जातः इंद्र मदाय सोमं परमे विऽओमन यत् ह द्यावापृथिवी आ अविवेशीः अथ अभवः पूर्व्यः कारुऽधायाः॥१०॥१०॥ अहन् अहिं परिऽशयानं अर्णः ओजायमानं तुविऽजात तव्यान् न ते महिऽत्वं अनु भूत् अध द्यौः यत् अन्यया स्फिग्या क्षां अवस्थाः॥११॥ यज्ञः हि ते इंद्र वर्धनः भूत् उत प्रियः सुतऽसोमः मियेधः यज्ञेन यज्ञं अव यज्ञियः सन् यज्ञः ते वज्रं अहिऽहत्ये आवत्॥१२॥ यज्ञेन इंद्रं अवसा आ चक्रे अर्वाक् आ एनं सुम्नाय नव्यसे ववृत्यां यः स्तोमेभिः ववृधे पूर्व्येभिः यः मध्यमेभिः उत नूतनेभिः॥१३॥ विवेष यत् मा धिषणा जजानं स्तवै पुरा पारयात् इंद्रं अहूः अंहसः यत्र पीपरत् यथा नः नावाऽइव यांतं उभये हवंते॥१४॥ आऽपूर्णः अस्य कलशः स्वाहा सेक्ताऽइव कोशं सिसिचे पिबध्यै संऽउ प्रियाः आ अववृचन् मदाय प्रऽदक्षिणित् अभि सोमासः इंद्रं॥१५॥ न त्वा गभीरः पुरुऽहूत सिंधुः न अद्रयः परि संतः वरंत इत्था सखिऽभ्यः इषितः यत् इंद्र आ हऽअहं चित् अरुजः गव्यं ऊर्वं॥१६॥ सुनं हुवेम मघऽवानं इंद्रं अस्मिन् भरे नृऽतमं वाजऽसातौ शृण्वंतं उग्रं ऊतये समत्ऽसु घ्नंतं वृत्राणि संऽजितं धनानां॥१७॥११॥

॥३३॥ प्र पर्वतानां उशती उपऽस्थात् अश्वेऽइव० विऽसिते० हासमाने गावोऽइव शुभ्रे मातरा रिहाणे विऽपाट् शुतुद्री पयसा जवेते ॥१॥ इंद्रेऽइषिते० प्रऽसवं भिक्षमाणे अच्छ समुद्रं रथ्याऽइव याथः संऽआराणे० ऊर्मिऽभिः पिन्वमाने अन्या वां अन्यां अपि एति शुभ्रे ॥२॥ अच्छ सिंधुं मातृऽतमां अयासं विऽपाशं उर्वीं सुऽभगां अगन्म वत्संऽइव मातरा संऽरिहाणे० समानं योनिं अनु संऽचरंती० ॥३॥ एना वयं पयसा पिन्वमानाः अनु योनिं देवऽकृतं चरंतीः न वर्तवे प्रऽसवः सर्गऽतक्तः किंऽयुः विप्रः नद्यः जोहवीति ॥४॥ रमध्वं मे वचसे सोम्याय ऋतंऽवरीः उप मुहूर्तं एवैः प्र सिंधुं अच्छ बृहती मनीषा अवस्युः अह्वे कुशिकस्य सूनुः ॥५॥१२॥ इंद्रः अस्मान् अरदत् वज्रंऽबाहुः अप अहन् वृचं परिऽधिं नदीनां देवः अनयत् सविता सुऽपाणिः तस्य वयं प्रऽसवे यामः उर्वीः ॥६॥ प्रऽवाच्यं शश्वधा वीर्यं तत् इंद्रस्य कर्मं यत् अहिं विऽवृश्चत् वि वज्रेण परिऽसदः जघान् आयन् आपः अयनं इच्छमानाः ॥७॥ एतत् वचः जरितः मा अपि मृष्ठाः आ यत् ते घोषान् उतऽतरा युगानि उक्थेषु कारो प्रति नः जुषस्व मा नः नि कः पुरुषऽचा नमः ते ॥८॥ ओ सु स्वसारः कारवे शृणोत ययौ वः दूरात् अनसा रथेन नि सु नमध्वं भवत सुऽपाराः अधःऽअक्षाः सिंधवः स्रोत्याभिः ॥९॥ आ ते कारो शृणवाम वचांसि ययाथ दूरात् अनसा रथेन नि ते नंसै पीप्यानाऽइव योषा मयीयऽइव कन्या शश्वचै ते० ॥१०॥१३॥ यत् अंग त्वा भरताः संऽतरेयुः गव्यन् यामः इषितः इंद्रऽजूतः अर्षात् अह प्रऽसवः सर्गऽतक्तः आ वः वृणे सुऽमतिं यज्ञियानां ॥११॥ अतारिषुः भरताः गव्यवः सं अभक्त विप्रः सुऽमतिं नदीनां प्र पिन्वध्वं इषयंतीः सुऽराधाः

आ वक्षणाः पृणध्वं यात शीभं ॥१२॥ उत् वः ऊर्मिः शम्याः हंतु आपः योक्त्राणि मुंचत मा अदुःऽकृतौ विऽएनसा अघ्यौ पूनै आ अरतां ॥ १३ ॥ १४ ॥

॥३४॥ इंद्रः पूःऽभित् आ अतिरत् दासं अर्कैः विदत्ऽवसुः दयमानः वि शत्रून् वज्रंऽजूतः तन्वा ववृधानः भूरिऽदाचः आ अपृणत् रोदसी उभे ॥१॥ मखस्य ते तविषस्य प्र जूतिं इयर्मि वाचं अमृताय भूषन् इंद्र क्षितीनां असि मानुषीणां विशां दैवीनां उत पूर्वऽयावा ॥२॥ इंद्रः वृचं अवृणोत् शर्धऽनीतिः प्र मायिनां अमिनात् वर्पऽनीतिः अहन् विऽअंसं उशधक् वनेषु आविः धेनाः अकृणोत् राम्याणां ॥३॥ इंद्रः स्वःऽसाः जनयन् अहानि जिगाय उशिक्ऽभिः पृतनाः अभिष्टिः प्र अरोचयत् मनवे केतुं अह्नां अविंदत् ज्योतिः बृहते रणाय ॥४॥ इंद्रः तुजः बर्हणाः आ विवेश नृऽवत् दधानः नयौ पुरूणि अचेतयत् धियः इमाः जरित्रे प्र इमं वर्णं अतिरत् शुक्रं आसां ॥५॥१५॥ महः महानि पनयंति अस्य इंद्रस्य कर्म सुऽकृता पुरूणि वृजनेन वृजिनान् सं पिपेष मायाभिः दस्यून् अभिभूतिऽओजाः ॥६॥ युधा इंद्रः महा वरिवः चकार देवेभ्यः सतऽपतिः चर्षणिऽप्राः विवस्वतः सदने अस्य तानि विप्राः उक्थेभिः कवयः गृणंति ॥७॥ सचाऽसहं वरेण्यं सहःऽदां ससऽवांसं स्वः अपः च देवीः ससानं यः पृथिवीं द्यां उत इमां इंद्रं मदंति अनु धीऽरणासः ॥८॥ ससानं अत्यान् उत सूर्यं ससानं इंद्रः ससानं पुरुऽभोजसं गां हिरण्ययं उत भोगं ससानं हत्वी दस्यून् प्र आर्यं वर्णं आवत् ॥९॥ इंद्रः ओषधीः असनोत् अहानि वनस्पतीन् असनोत् अंतरिक्षं विभेद वलं नुनुदे विऽवाचः

अर्थं अभवत् दमिता अभिऽक्रतूनां ॥१०॥ शुनं हुवेम मघऽवानं इंद्रं अस्मिन् भरे नृऽतमं वाजंऽसातौ शृण्वंतं उग्रं ऊतये समत्-ऽसु घ्नंतं वृत्राणि संऽजितं धनानां ॥११॥१६॥

॥३५॥ तिष्ठ हरी॑ रथे आ युज्यमाना याहि वायुः न निऽयुतः नः अच्छ पिबासि अंधः अभिऽसृष्टः अस्मे इंद्र स्वाहा रयिं ते मदाय ॥१॥ उप अजिरा पुरुऽहूताय सप्ती हरी रथस्य धूःऽसु आ युनज्मि वृषत् यथा संऽभृतं विश्वतः चित् उप इमं यज्ञं आ वहातः इंद्र ॥२॥ उपो नयस्व वृषणा तपुःऽपा उत ईं अव त्वं वृषभ स्वधाऽवः यस्ते तां अश्वा वि मुच इह शोणा दिवेऽदिवे सदृशीः अद्रि धानाः ॥३॥ ब्रह्मणा ते ब्रह्मऽयुजा युनज्मि हरी सखाया सधऽमादे आशू स्थिरं रथं सुऽखं इंद्र अधिऽतिष्ठन् प्रऽजानन् विद्वान् उप याहि सोमं ॥४॥ मा ते हरी वृषणा वीतऽपृष्ठा नि रीरमन् यजमानासः अन्ये अतिऽआयाहि शश्वतः वयं ते अरं सुतेभिः कृणवाम सोमैः ॥५॥१७॥ तव अयं सोमः त्वं आ इहि अर्वाङ् शश्वत्ऽतमं सुऽमनाः अस्य पाहि अस्मिन् यज्ञे बर्हिषि आ निऽसद्य दधिष्व इमं जठरे इंदुं इंद्र ॥६॥ स्तीर्णे ते बर्हिः सुतः इंद्र सोमः कृताः धानाः अत्तवे ते हरिऽभ्यां ततऽओकसे पुरुऽशाकाय वृष्णे मरुत्वते तुभ्यं राता हवींषि ॥७॥ इमं नरः पर्वताः तुभ्यं आपः सं इंद्र गोभिः मधुऽमंतं अक्रन् तस्य आऽगत्य सुऽमनाः ऋष्व पाहि प्रऽजानन् विद्वान् पथ्याः अनु स्वाः ॥८॥ यान् आ अभजः मरुतः इंद्र सोमे ये त्वां अवर्धन् अभवन् गणः ते तेभिः एतं सऽजोषाः वावशानः अग्नेः पिब जिह्वया सोमं इंद्र ॥९॥ इंद्र पिब स्वधया चित् सुतस्य अग्नेः वा पाहि जिह्वया यजत्र अध्वर्योः वा प्रऽयतं शक्र

हस्तात् होतुः वा यज्ञं हविषः जुषस्व ॥१०॥ पुनं हुवेम मघऽवानं इंद्रं अस्मिन् भरे नृऽतमं वाजऽसातौ पृणंतं उग्रं ऊतये समत्-ऽसु घ्नंतं वृत्राणि संऽजितं धनानां ॥ ११ ॥ १८ ॥

॥३६॥ इमां ऊं सु प्रऽभृतिं सातये धाः शश्वत्ऽशश्वत् ऊति-ऽभिः यादमानः सुतेऽसुते ववृधे वर्धनेभिः यः कर्मऽभिः महत्-ऽभिः सुऽश्रुतः भूत् ॥१॥ इंद्राय सोमाः प्रऽदिवः विदानाः ऋभुः येभिः वृषऽपर्वा विऽहायाः प्रऽयम्यमानान् प्रति सु गृभाय इंद्र पिब वृषऽधूतस्य वृष्णः॥२॥ पिब वर्धस्व तव घ सुतासः इंद्र सोमासः प्रथमाः उत इमे यथा अपिबः पूर्व्यान इंद्र सोमान् एव पाहि पन्यः अद्य नवीयान्॥३॥ महान् असंचः वृजने विऽरप्शी उग्रं शवः पत्यते धृष्णु ओजः न अह विव्याच पृथिवी चन एनं यत् सोमासः हरिऽअश्वं अमंदन्॥४॥ महान् उग्रः ववृधे वीर्याय संऽआचक्रे वृषभः काव्येन इंद्रः भगः वाजऽदाः अस्य गावः प्र जायंते दक्षिणाः अस्य पूर्वीः॥५॥१९॥ प्र यत् सिंधवः प्रऽसवं यथा आयन् आपः समुद्रं रथ्याऽइव जग्मुः अतः चित् इंद्रः सदसः वरीयान् यत् ईं सोमः पृणति दुग्धः अंशुः ॥६॥ समुद्रेण सिंधवः यादमानाः इंद्राय सोमं सुऽसुतं भरंतः अंशुं दुहंति हस्तिनः भरित्रैः मध्वः पुनंति धारया पवित्रैः ॥ ७ ॥ हृदाःऽइव कुक्षयः सोमऽधानाः सं ईं विव्याच सवना पुरूणि अन्वा यत् इंद्रः प्रथमा विऽआश वृत्रं जघन्वान् अवृणीत सोमं॥८॥ आ तुभर माकिः एतत् परिऽस्थात् विद्म हि त्वा वसुऽपतिं वसूनां इंद्र यत् ते माहिनं दत्रं अस्ति असमभ्यं तत् हरिऽअश्व प्र यंधि॥९॥ असे प्र यंधि मघऽवन् ऋजीषिन् इंद्र रायः विश्वऽवारस्य भूरेः असे शतं शरदः जीवसे धाः असे

वीरान् शश्वतः इंद्र शिप्रिन् ॥१०॥ शुनं हुवेम मघऽवानं इंद्रं अस्मिन् भरे नृऽतमं वाजऽसातौ शृण्वंतं उग्रं ऊतये समत्ऽसु घ्नंतं वृत्राणि संऽजितं धनानां ॥११॥२०॥

॥३७॥ वार्चंऽहत्याय शवसे पृतनाऽसह्याय च इंद्र त्वा आ वर्तयामसि ॥१॥ अर्वाचीनं सु ते मनः उत चक्षुः शतऽक्रतो० इंद्र कृण्वंतु वाघतः ॥२॥ नामानि ते शतऽक्रतो० विश्वाभिः गीःऽभिः ईमहे इंद्र अभिमातिऽसह्ये ॥३॥ पुरुऽस्तुतस्य धामऽभिः शतेन महयामसि इंद्रस्य चर्षणिऽधृतः ॥४॥ इंद्रं वृत्राय हंतवे पुरुऽहूतं उप ब्रुवे भरेषु वाजऽसातये ॥५॥२१॥ वाजेषु ससहिः भव त्वां ईमहे शतऽक्रतो० इंद्र वृत्राय हंतवे ॥६॥ द्युम्नेषु पृतनाज्ये पृत्सुतूर्षु श्रवःऽसु च इंद्र साक्ष्व अभिऽमातिषु ॥७॥ शुष्मिन्ऽतमं नः ऊतये द्युम्निनं पाहि जागृविं इंद्र सोमं शतऽक्रतो० ॥८॥ इंद्रियाणि शतऽक्रतो० या ते जनेषु पंचऽसु इंद्र तानि ते आ वृणे ॥९॥ अगन इंद्र श्रवः बृहत द्युम्नं दधिष्व दुष्टरं उत ते शुष्मं तिरामसि ॥१०॥ अर्वाऽवतः नः आ गहि अथो शक्र पराऽवतः ऊं लोकः यः ते अद्रिऽवः इंद्र इह ततः आ गहि ॥११॥२२॥

॥३८॥ अभि तष्टाऽइव दीधय मनीषां अत्यः न वाजी सुऽधुरः जिहानः अभि प्रियाणि मर्मृशत् पराणि कुवीन इच्छामि संऽदृशे सुऽमेधाः ॥१॥ इना उत पृच्छ जनिम कवीनां मनःऽधृतः सुऽकृतः तक्षत द्यां इमाः ऊं ते प्रऽन्यः वर्धमानाः मनःऽवाताः अध नु धर्मणि ग्मन् ॥२॥ नि सी इत् अच गुह्या दधानाः उत क्षुचाय रोदसी सं अंजन् सं माचाभिः ममिरे येमुः उर्वी अंतः मही

संऽऋते॰ धायसे धुः॰ ॥३॥ आऽतिष्ठंतं परि विश्वे अभूषन् श्रियः वसानः चरति स्वऽरोचिः महत् तत् वृष्णः असुरस्य नाम आ विश्वऽरूपः अमृतानि तस्थौ ॥४॥ असूत पूर्वः वृषभः ज्यायान् इमाः अस्य शुरुधः संति पूर्वीः दिवः नपाता विदथस्य धीभिः क्षत्रं राजाना प्रऽदिवः दधाथे॰ ॥५॥२३॥ चीणि राजाना विदथे पुरूणि परि विश्वानि भूषथः सदांसि अपश्यं अत्र मनसा जगन्वान् व्रते गंधर्वान् अपि वायुऽकेशान् ॥६॥ तत् इत् नु अस्य वृषभस्य धेनोः आ नामऽभिः ममिरे सक्म्यं गोः अन्यतऽअन्यत् असुर्यं वसानाः नि मायिनः ममिरे रूपं अस्मिन् ॥७॥ तत् इत् नु अस्य सवितुः नकिः मे हिरण्ययीं अमतिं यां अशिश्रेत् आ सुऽस्तुती रोदसी॰ विश्वंऽइन्वे॰ अपिऽइव योषा जनिमानि वव्रे ॥८॥ युवं प्रत्नस्य साधथः महः यत् दैवीं स्वस्तिः परिनः स्यातं गोपाजिह्वस्य तस्थुषः विऽरूपा विश्वे पश्यंति मायिनः कृतानि ॥९॥ शुनं हुवेम मघऽवानं इंद्रं अस्मिन् भरे नृऽतमं वाजऽसातौ शृण्वंतं उग्रं ऊतये समत्ऽसु घ्नंतं वृत्राणि संऽजितं धनानां ॥१०॥२४॥३॥

॥३९॥ इंद्रं मतिः हृदः आ वच्यमाना अच्छ पतिं स्तोमऽतष्टा जिगाति या जागृविः विदथे शस्यमाना इंद्र यत् ते जायते विद्मा तस्य ॥१॥ दिवः चित् आ पूर्व्या जायमाना वि जागृविः विदथे शस्यमाना भद्रा वस्त्राणि अर्जुना वसाना सा इयं अस्मे॰ सनऽजा पित्र्या धीः ॥२॥ यमा चित् अत्र यमऽसूः असूत जिह्वायाः अग्रं पतत् आ हि अस्थात् वपूंषि जाता मिथुना सचेते॰ तमः ऽहना तपुषः बुध्ने आऽइता ॥३॥ नकिः एषां निंदिता मर्त्येषु ये अस्माकं पितरः गोषु योधाः इंद्रः एषां हंहिता माहिनऽवान् उत् गोत्रा-

णिं समृजे दंसनाऽवान् ॥४॥ सखा ह यच्छ सखिऽभिः नवऽग्वैः अभिऽज्ञु आ सत्वऽभिः गाः अनुऽग्मन् सत्यं तत् इंद्रः दशऽभिः दशऽग्वैः सूर्यं विवेद तमसि क्षियंतं॥५॥२५॥ इंद्रः मधु संऽभृतं उस्रियायां पतऽवत् विवेद शफऽवत् नमे गोः गुहा हितं गुह्यं गूळ्हं अप्ऽसु हस्ते दधे दक्षिणे दक्षिणऽवान्॥६॥ ज्योतिः वृणीत तमसः विऽजानन् आरे स्याम दुःऽइतात् अभीके इमाः गिरः सोमऽपाः सोमऽवृद्ध जुषस्व इंद्र पुरुऽतमस्य कारोः॥७॥ ज्योतिः यज्ञाय रोदसी अनु स्यात् आरे स्याम दुःऽइतस्य भूरेः भूरि चित् हि तुजतः मर्त्यस्य सुऽपारासः वसवः बर्हणाऽवत्॥८॥ पुनं हुवेम मघऽवानं इंद्रं अस्मिन् भरे नृऽतमं वाजऽसातौ शृण्वंतं उग्रं ऊतये समत्ऽसु घ्नंतं वृत्राणि संऽजितं धनानां ॥९॥ २६ ॥ २ ॥

॥४०॥ इंद्रं त्वा वृषभं वयं सुते सोमे हवामहे सः पाहि मध्वः अंधसः ॥१॥ इंद्र क्रतुऽविदं सुतं सोमं हर्य पुरुऽस्तुत पिब आ वृषस्व ततृपिं॥२॥ इंद्र प्र नः धितऽवानं यज्ञं विश्वेभिः देवेभिः तिरः स्तवान विश्पते॥३॥ इंद्र सोमाः सुताः इमे तव प्र यंति सतऽपते क्षयं चंद्रासः इंदवः॥४॥ दधिष्व जठरे सुतं सोमं इंद्र वरेण्यं तव द्युक्षासः इंदवः॥५॥१॥ गिर्वणः पाहि नः सुतं मधोः धाराभिः अज्यसे इंद्र त्वाऽदातं इत् यशः॥६॥ अभि द्युम्नानि वनिनः इंद्रं सचंते अक्षिता पीत्वी सोमस्य ववृधे॥७॥ अर्वाऽवतः नः आ गहि पराऽवतः च वृचऽहन् इमाः जुषस्व नः गिरः॥८॥ यत् अंतरा पराऽवतं अर्वाऽवतं च हूयसे इंद्र इह ततः आ गहि ॥९॥ २ ॥

॥४१॥ आ तु नः इंद्र मद्रिक् हुवानः सोमऽपीतये हरिऽभ्यां याऽ

हि अद्रिऽवः॥१॥ सत्तः होता नः ऋत्वियः तिस्तिरे बर्हिः आनुषक् अयुज्रन् प्रातः अद्रयः॥२॥ इमा ब्रह्म ब्रह्मऽवाहः क्रियंते आ बर्हिः सीद वीहि शूर पुरोळाशं॥३॥ रंधि सवनेषु नः एषु स्तोमेषु वृत्र-ऽहन् उक्थेषु इंद्र गिर्वणः॥४॥ मतयः सोमऽपां उरु रिहंति शवसः पतिं इंद्रं वत्सं न मातरः॥५॥३॥ सः मंदस्व हि अंधसः राधसे तन्वा महे न स्तोतारं निदे करः॥६॥ वयं इंद्र त्वाऽयवः हविष्मंतः जरामहे उत त्वं अस्मऽयुः वसो॥७॥ मा आरे अस्मत् थि मुमुचः हरिऽप्रिय अर्वाङ् याहि इंद्र स्वधाऽवः मत्स्व इह॥८॥ अर्वाचं त्वा सुऽखे रथे वहंतां इंद्र केशिना घृतऽस्नू० बर्हिः आऽसदे॥९॥४॥

॥४२॥ उप नः सुतं आ गहि सोमं इंद्र गोऽआशिरं हरिऽभ्यां यः ते अस्मऽयुः॥१॥ तं इंद्र मदं आ गहि बर्हिःऽस्यां यावऽभिः सुतं कु-वित् नु अस्य तृप्णवः॥२॥ इंद्रं इत्था गिरः मम अच्छ अगुः इषिताः इतः आऽवृतं सोमऽपीतये॥३॥ इंद्रं सोमस्य पीतये स्तोमैः इह हु-वामहे उक्थेभिः कुवित् आऽगमत्॥४॥ इंद्र सोमाः सुताः इमे तान् दधिष्व शतऽक्रतो० जठरे वाजिनीऽवसो०॥५॥५॥ विद्म हि त्वा धनंऽजयं वाजेषु दधृषं कवे अध ते सुम्नं ईमहे॥६॥ इमं इंद्र गोऽआशिरं यवऽआशिरं च नः पिब आऽगत्य वृषऽभिः सुतं॥७॥ तुभ्यं इत इंद्र स्वे ओक्ये सोमं चोदामि पीतये एषः रंतु ते हृदि॥८॥ त्वां सुतस्य पीतये प्रत्नं इंद्र हवामहे कुशिकासः अवस्यवः॥९॥६॥

॥४३॥ आ याहि अर्वाङ् उप वंधुरेऽस्याः तव इत् अनु प्रऽदि-वः सोमऽपेयं प्रिया सखाया वि मुच उप बर्हिः त्वां इमे हव्यऽवा-

हः हवंते ॥१॥ आ याहि पूर्वीः अति चर्षणीः आ अर्यः आऽशिषः उप नः हरिऽभ्यां इमाः हि त्वा मतयः स्तोमऽतष्टाः इंद्र हवंते सख्यं जुषाणाः ॥२॥ आ नः यज्ञं नमःऽवृधं सऽजोषाः इंद्र देव हरिऽभिः याहि तूयं अहं हि त्वा मतिऽभिः जोहवीमि घृतऽप्रयाः सधऽमादे मधूनां ॥३॥ आ च त्वां एता वृषणा वहातः हरी सखायाः सुऽधुरा सुऽअंगा धानाऽवत् इंद्रः सवनं जुषाणः सखा सख्युः शृणवत् वंदनानि ॥४॥ कुवित् मा गोपां करसे जनस्य कुवित् राजानं मघऽवन् ऋजीषिन् कुवित् मा ऋषिं पपिऽवांसं सुतस्य कुवित् मे वस्वः अमृतस्य शिक्षाः ॥५॥ आ त्वा बृहंतः हरयः युजानाः अर्वाक् इंद्र सधऽमादः वहंतु प्र ये द्विता दिवः ऋंजंति आताः सुऽसंमृष्टासः वृषभस्य मूराः ॥६॥ इंद्र पिब वृषऽधूतस्य वृष्णः आ यं ते श्येनः उशते जभार यस्य मदे च्यवयसि प्र कृष्टीः यस्य मदे अप गोत्रा ववर्थ ॥७॥ शुनं हुवेम मघऽवानं इंद्रं अस्मिन् भरे नृऽतमं वाजऽसातौ शृण्वंतं उग्रं ऊतये समत्ऽसु घ्नंतं वृत्राणि संऽजितं धनानां ॥८॥७॥

॥४४॥ अयं ते अस्तु हर्यतः सोमः आ हरिऽभिः सुतः जुषाणः इंद्र हरिऽभिः नः आ गहि आ तिष्ठ हरितं रथं ॥१॥ हर्यन उषसं अर्चयः सूर्यं हर्यन् अरोचयः विद्वान् चिकित्वान् हरिऽअश्व वर्धसे इंद्र विश्वाः अभि श्रियः ॥२॥ द्यां इंद्रः हरिऽधायसं पृथिवीं हरिऽवर्पसं अधारयत् हरितोः भूरिभोजनं ययोः अंतः हरिः चरत् ॥३॥ जज्ञानः हरितः वृषा विश्वं आ भाति रोचनं हरिऽअश्वः हरितं धत्ते आयुधं आ वज्रं बाह्वोः हरिं ॥४॥ इंद्रः हर्यतं अर्जुनं वज्रं पुक्षुः अभिऽवृतं अप अवृणोत् हरिऽभिः अद्रिऽभिः सुतं उत् गाः हरिऽभिः आजत् ॥ ५ ॥ ८ ॥

॥४५॥ आ मंद्रैः इंद्र हरिऽभिः याहि मयूररोमऽभिः मा त्वा के चित् नि यमन् विं न पाशिनः अति धन्वऽइव तान् इहि॥१॥ वृचऽखादः वलंऽरुजः पुरां दर्मः अपां अजः स्याता रथस्य हयोः अभिऽस्वरे इंद्रः दृळ्हा चित् आऽरुजः॥२॥ गंभीरान् उदधीनऽइव क्रतुं पुष्यसि गाःऽइव प्रसुऽगोपाः यवसं धेनवः यथा हृदं कुल्याःऽइव आशत॥३॥ आ नः तुजं रयिं भर अंशं न प्रतिऽजानते वृक्षं पक्वं फलं अंकीऽइव धूनुहि इंद्र संऽपारणं वसु॥४॥ स्वऽयुः इंद्र स्वऽराट् असि स्मत्ऽदिष्टिः स्वयंशःऽतरः सः ववृधानः ओजसा पुरुऽस्तुत भव नः सुश्रवःऽतमः ॥५॥९॥

॥४६॥ युध्मस्य ते वृषभस्य स्वऽराजः उग्रस्य यूनः स्थविरस्य घृष्वेः अजूर्यतः वज्रिणः वीर्याणि इंद्र श्रुतस्य महतः महानि॥१॥ महान् असि महिष वृष्ण्येभिः धनऽस्पृत् उग्र सहमानः अन्यान् एकः विश्वस्य भुवनस्य राजा सः योधय च क्षुधय च जनान्॥२॥ प्र माचाभिः रिरिचे रोचमानः प्र देवेभिः विश्वतः अप्रतिऽइतः प्र मज्मना दिवः इंद्रः पृथिव्याः प्र उरोः महः अंतरिक्षात् ऋजीषी॥३॥ उरुं गभीरं जनुषा अभि उग्रं विश्वऽव्यचसं अवतं मतीनां इंद्रं सोमासः प्रऽदिवि सुतासः समुद्रं न स्रवतः आ विशंति॥४॥ यं सोमं इंद्र पृथिवीद्यावा गर्भं न माता बिभृतः त्वाऽया तं ते हिन्वंति तं ऊं ते मृजंति अध्वर्यवः वृषभ पातवे ऊं ॥५॥१०॥

॥४७॥ मरुत्वान् इंद्र वृषभः रणाय पिब सोमं अनुऽस्वधं मदाय आ सिंचस्व जठरे मध्वः ऊर्मिं त्वं राजा असि प्रऽदिवः सुतानां॥१॥ सऽजोषाः इंद्र सऽगणः मरुत्ऽभिः सोमं पिब वृचऽहा शूर विऽ

इन्द्रान् जहि शचूंन् अपं मृधःनुदस्व अथं अभयं कृणुहि विश्वतःनः ॥२॥ उत ऋतुऽभिः ऋतुऽपाः पाहि सोमं इंद्र देवेभिः सखिऽभिः सुतं नः यान् आ अभजः मरुतः ये त्वा अनु अहन् वृत्रं अदधुः तुभ्यं ओजः ॥३॥ ये त्वा अहिऽहत्ये मघऽवन् अवर्धन् ये शंबरे हरिऽवः ये गोऽइष्टौ ये त्वा नूनं अनुऽमदंति विप्राः पिब इंद्र सोमं सऽगणः मरुतऽभिः ॥४॥ मरुत्वंतं वृषभं ववृधानं अकवऽअरिं दिव्यं शासं इंद्रं विश्वऽसहं अवसे नूतनाय उग्रं सहःऽदां इह तं हुवेम ॥५॥११॥

॥४८॥ सद्यः ह जातः वृषभः कनीनः प्रऽभर्तुं आवत् अंधसः सुतस्य साधोः पिब प्रतिऽकामं यथा ते रसऽआशिरः प्रथमं सोम्यस्य ॥१॥ यत् जायथाः तत् अहः अस्य कामे अंशोः पीयूषं अपिबः गिरिऽस्थां तं ते माता परि योषा जनित्री महः पितुः दमे आ असिंचत् अयें ॥२॥ उपऽस्थाय मातरं अन्नं ऐट्ट तिग्मं अपश्यत् अभि सोमं ऊधः प्रऽयवयन् अचरत् गृत्सः अन्यान् महानि चक्रे पुरुधऽप्रतीकः ॥३॥ उग्रः तुराषाट् अभिभूतिऽओजाः यथावशं तन्वं चक्रे एषः त्वष्टारं इंद्रः जनुषा अभिऽभूय आऽमुष्य सोमं अपिबत् चमूषु ॥४॥ शुनं हुवेम मघऽवानं इंद्रं अस्मिन् भरे नृऽतमं वाजऽसातौ शृण्वंतं उग्रं ऊतये समत्ऽसु घ्नंतं वृत्राणि संऽजितं धनानां ॥५॥१२॥

॥४९॥ शंसं महां इंद्रं यस्मिन् विश्वाः आ कृष्टयः सोमऽपाः कामं अव्यन् यं सुऽक्रतुं धिषणे विभ्वऽतष्टं घनं वृत्राणां जनयंत देवाः ॥१॥ यं नु नकिः पृतनासु स्वऽराजं द्विता तरति नृऽतमं हरिऽस्थां इनऽतमः सत्वऽभिः यः ह शूषैः पृथुऽज्रयाः अमिनात् आयुः द-

स्योः॥२॥ सहऽवा पृतऽसुतरणिः न अर्वा विऽआनशिः रोदसी मेहनाऽवान् भगः न कारेहव्यः मतीनां पिताऽइव चारुः सुऽहवः वयःऽधाः॥३॥ धर्ता दिवः रजसः पृष्टः ऊर्ध्वः रथः न वायुः वसुऽभिः नियुत्वान् क्षपां वस्ता जनिता सूर्यस्य विऽभक्ता भागं धिषणाऽइव वाजं॥४॥ श्रुतं हुवेम मघऽवानं इंद्रं अस्मिन् भरे नृऽतमं वाजऽसातौ शृण्वंतं उग्रं ऊतये समतऽसु घ्नंतं वृत्राणि संऽजितं धनानां॥५॥१३॥

॥५०॥ इंद्रः स्वाहा पिबतु यस्य सोमः आऽगत्य तुम्रः वृषभः मरुत्वान् आ उरुऽव्यचाः पृणतां एभिः अन्नैः आ अस्य हविः तन्वः कामं कृध्याः॥१॥ आ ते सपर्यू जवसे युनज्मि ययोः अनु प्रऽदिवः श्रुष्टिं आवः इह त्वा धेयुः हरयः सुऽशिप्र पिब तु अस्य सुऽसुतस्य चारोः॥२॥ गोभिः मिमिक्षुं दधिरे सुऽपारं इंद्रं ज्यैष्ठ्याय धायसे गृणानाः मंदानः सोमं पपिऽवान् ऋजीषिन् सं अस्मभ्यं पुरुधा गाः इषण्य॥३॥ इमं कामं मंदय गोभिः अश्वैः चंद्रऽवता राधसा पप्रथः च स्वःऽयवः मतिऽभिः तुभ्यं विप्राः इंद्राय वाहः कुशिकासः अक्रन्॥४॥ श्रुतं हुवेम मघऽवानं इंद्रं अस्मिन् भरे नृऽतमं वाजऽसातौ शृण्वंतं उग्रं ऊतये समतऽसु घ्नंतं वृत्राणि संऽजितं धनानां॥५॥१४॥

॥५१॥ चर्षणिऽधृतं मघऽवानं उक्थ्यं इंद्रं गिरः बृहतीः अभि अनूषत ववृधानं पुरुऽहूतं सुवृक्तिऽभिः अमर्त्यं जरमाणं दिवेऽदिवे॥१॥ शतऽक्रतुं अर्णवं शाकिनं नरं गिरः मे इंद्रं उप यंति विश्वतः वाजऽसनिं पूःऽभिदं तूर्णिं अप्ऽतुरं धामऽसाचं अभि-

ऽसाचँ स्वःऽविदँ॥२॥ आऽकरे वसोः जरिता पनस्यते अनेहसः स्तुभः इंद्रः दुवस्यति विवस्वतः सदने आ हि पिप्रिये सचाऽसहँ अभिमातिऽहनँ स्तुहि॥३॥ नृणां ऊं त्वा नृऽतमं गीःऽभिः उक्थैः अभि प्र वीरं अर्चत सऽबाधः सं सहसे पुरुऽमायः जिहीते नमः अस्य प्रऽदिवः एकः ईशे॥४॥ पूर्वीः अस्य निःऽसिधः मर्त्येषु पुरु वसूनि पृथिवी बिभर्ति इंद्राय द्यावः ओषधीः उत आपः रयिं रक्षंति जीरयः वनानि॥५॥१५॥ तुभ्यँ ब्रह्माणि गिरः इंद्र तुभ्यं सचा दधिरे हरिऽवः जुषस्व बोधि आपिः अवसः नूतनस्य सखे वसो जरितृऽभ्यः वयः धाः॥६॥ इंद्र मरुत्वः इह पाहि सोमँ यथा शार्याते अपिबः सुतस्य तव प्रऽनीती तव शूर शर्मन आ विवासंति कवयः सुऽयज्ञाः॥७॥ सः वावशानः इह पाहि सोमँ मरुतऽभिः इंद्र सखिऽभिः सुतं नः जातं यत् त्वा परिदेवाः अभूषन् महे भराय पुरुऽहूत विश्वे॥८॥ अप्ऽतूर्यँ मरुतः आपिः एषः अमंदन इंद्रं अनु दातिऽवाराः तेभिः साकं पिबतु वृत्रऽखादः सुतं सोमँ दाशुषः स्वे सधऽस्थे॥९॥ इदं हि अनु ओजसा सुतं राधानां पते पिब तु अस्य गिर्वणः॥१०॥ यः ते अनु स्वधां असत सुते नि यच्छ तन्वँसः त्वा ममत्तु सोम्यं॥११॥ प्र ते अश्नोतु कुक्ष्योः प्र इंद्र ब्रह्मणा शिरः प्र बाहू शूर राधसे॥१२॥१६॥

॥५२॥ धानाऽवँतं करंभिणँ अपूपऽवँतं उक्थिनं इंद्र प्रातः जुषस्व नः॥१॥ पुरोळाशं पचत्यं जुषस्व इंद्र आ गुरस्व च तुभ्यं हव्यानि सिस्रते॥२॥ पुरोळाशं च नः घसः जोषयासे गिरः च नः वधूयुःऽइव योषणां॥३॥ पुरोळाशं सनऽश्रुत प्रातःऽसावे जुषस्व नः इंद्र क्रतुः हि ते बृहन्॥४॥ माध्यंदिनस्य सवनस्य धानाः

पुरोळाशं इंद्र कृष्व इह चारुं प्र यत् स्तोता जरिता तूर्णिरश्र्यः वृषायमाणः उप गीःभिः ईट्टे ॥५॥१७॥ तृतीये धानाः सवने पुरुष्टुत पुरोळाशं आहुतं ममहस्व नः ऋभुमंतं वाजवंतं त्वा कवे प्रयस्वंतः उप शिक्षेम धीतिभिः ॥६॥ पूषण्वते ते चकृम करंभं हरिवते हरिवश्र्याय धानाः अपूपं अद्धि सगणः मरुत्वभिः सोमं पिब वृत्रहा शूर विद्वान् ॥७॥ प्रति धानाः भरत तूयं अस्मै पुरोळाशं वीरवत्तमाय नृणां दिवेदिवे सदृशीः इंद्र तुभ्यं वर्धतु त्वा सोमपेयाय धृष्णो ॥ ८ ॥ १८ ॥

॥५३॥ इंद्रापर्वता बृहता रथेन वामीः इषः आ वहतं सुवीराः वीतं हव्यानि अध्वरेषु देवा वर्धेथां गीःभिः इळया मदंता ॥१॥ तिष्ठ सु कं मघवन् मा परा गाः सोमस्य नु त्वा सुसुतस्य यक्षि पितुः न पुचः सिचं आ रभे ते इंद्र स्वादिष्ठया गिरा शचीवः ॥२॥ शंसाव अध्वर्यो प्रति मे गृणीहि इंद्राय वाहः कृणवाव जुष्टं आ इदं बर्हिः यजमानस्य सीद अथ च भूत उक्थं इंद्राय शस्तं ॥३॥ जाया इत् अस्तं मघवन् सा इत् ऊं योनिः तत इत् त्वा युक्ताः हरयः वहंतु यदा कदा च सुनवाम सोमं अग्निः त्वा दूतः धन्वाति अच्छ ॥४॥ परा याहि मघवन् आ च याहि इंद्र भ्रातः उभयत्र ते अर्थं यत् च रथस्य बृहतः निधानं विमोचनं वाजिनः रासभस्य ॥५॥१९॥ आपाः सोमं अस्तं इंद्र प्र याहि कल्याणीः जाया सुरणं गृहे ते यत्र रथस्य बृहतः निधानं विमोचनं वाजिनः दक्षिणावत् ॥६॥ इमे भोजाः अंगिरसः विरूपाः दिवः पुचासः असुरस्य वीराः विश्वामित्राय ददतः मघानि सहस्रसावे प्र तिरंते आयुः ॥७॥ रूपं-

ऽरूपं मघऽवा बोभवीति माया: कृण्वान: तन्वं परि स्वां चि: यत् दिव: परि मुहूर्तं आ अगात् स्वै: मंत्रै: अनृतुऽपा: ऋतऽवा ॥८॥ महान् ऋषि: देवऽजा: देवऽजूत: अस्तभ्नात् सिंधुं अर्णवं नृऽचक्षा: विश्वामित्र: यत् अवहत् सुऽदासं अप्रियायत कुशिकेभि: इंद्र: ॥९॥ हंसा:ऽइव कृणुथ श्लोकं अद्रिऽभि: मदंत: गी:ऽभि: अध्वरे सुते सचा देवेभि: विप्रा: ऋषय: नृऽचक्षस: वि पिबध्वं कुशिका: सोम्यं मधु ॥१०॥२०॥ उप प्र इत कुशिका: चेतयध्वं अश्वं राये प्र मुंचत सुऽदास: राजा वृचं जघन्वत् प्राक् अपाक् उदक् अथ यजाते वरे आ पृथिव्या: ॥११॥ य: इमे रोदसी उभे अहं इंद्रं अतुष्टवं विश्वामित्रस्य रक्षति ब्रह्म इदं भारतं जनं ॥१२॥ विश्वामित्रा: अरासत ब्रह्म इंद्राय वज्रिणे करत् इत न: सुऽराधस: ॥१३॥ किं ते कृण्वंति कीकटेषु गाव: न आऽशिरं दुह्रे न तपंति घर्मं आ न: भर प्रऽमगंदस्य वेद: नै चाऽशाखं मघऽवन् रंधय न: ॥१४॥ ससर्परी: अमतिं बाधमाना बृहत् मिमाय जमदग्निऽदत्ता आ सूर्यस्य दुहिता ततान श्रव: देवेषु अमृतं अजुर्यं ॥१५॥२१॥ ससर्परी: अभरत् तूयं एभ्य: अधि श्रव: पांचऽजन्यासु कृष्टिषु सा पक्ष्या नव्यं आयु: दधाना यां मे पलस्तिऽजमदग्नय: ददु: ॥१६॥ स्थिरौ गावौ भवतां वीळु: अक्ष: मा ईषा वि वर्हि मा युगं वि शारि इंद्र: पातल्यै ददतां शरीतो: अरिष्टऽनेमे अभि न: सचस्व ॥१७॥ बलं धेहि तनूषु न: बलं इंद्र अनक्रुतऽसु न: बलं तोकाय तनयाय जीवसे त्वं हि बलदा: असि ॥१८॥ अभि व्ययस्व खदिरस्य सारं ओज: धेहि स्यंदने शिंशपायां अक्ष वीळो वीळित वीळयस्व मा यामात् अस्मात् अव जीहिप: न: ॥१९॥ अयं अस्मान् वनस्पति: मा च हा: मा च रिरिषत् स्वस्ति आ गृहेभ्य: आ अवऽसे आ विऽमो-

चनात॥२०॥२२॥ इंद्र ऊतिऽभिः बहुलाभिः नः अद्य यातऽश्रेष्ठाभिः मघऽवन् पूर जिन्व यः नः द्वेष्टि अधरः सः पदीष्ट यं ऊं द्विष्मः तं ऊं प्राणः जहातु॥२१॥ परुं चित् वि तपति शिंबलं चित् वि वृश्चति उखा चित् इंद्र येषंती प्रऽयस्ता फेनं अस्यति॥२२॥ न सायकस्य चिकिते जनासः लोधं नयंति पशु मन्यमानाः न अवाजिनं वाजिना हासयंति न गर्दभं पुरः अश्वात् नयंति॥२३॥ इमे इंद्र भरतस्य पुत्राः अपऽपित्वं चिकितुः न प्रऽपित्वं हिन्वंति अश्वं अरणं न नित्यं ज्याऽवाजं परि नयंति आजौ॥२४॥२३॥४॥

॥५४॥ इमं महे विदथ्याय शूषं शश्वत् कृत्वः ईड्याय प्र जभ्रुः पृणोतु नः दम्यैभिः अनीकैः पृणोतु अग्निः दिव्यैः अजस्रः॥१॥ महि महे दिवे अर्चे पृथिव्यै कामः मे इच्छन् चरति प्रऽजानन् ययोः ह स्तोमे विदथेषु देवाः सपर्यवः मादयंते सचा आयोः॥२॥ युवोः ऋतं रोदसी सत्यं अस्तु महे सु नः सुविताय प्र भूतं इदं दिवे नमः अग्ने पृथिव्यै सपर्यामि प्रयसा यामि रत्नं॥३॥ उतो हि वां पूर्व्याः आऽविविद्रे ऋतऽवरी रोदसी सत्यऽवाचः नरः चित् वां संऽइष्टौ शूरऽसातौ ववंदिरे पृथिवि वेविदानाः॥४॥ कः अद्धा वेद कः इह प्र वोचत देवान् अच्छ पथ्या का सं एति दक्षे एषां अवमा सदांसि परेषु या गुह्येषु व्रतेषु॥५॥२४॥ कविः नृऽचक्षाः अभि सीं अचष्ट ऋतस्य योना विऽघृते मदंती नाना चक्राते सदनं यथा वेः समानेन ऋतुना संऽविदाने॥६॥ समान्या विऽयुते दूरेऽअंते ध्रुवे पदे तस्थतुः जागरूके उत स्वसारा युवती भवंती आत ऊं ब्रुवाते मिथुनानि नामं॥७॥ विश्वा इत् एते जनिम सं विविक्तः महः देवान् बिभ्रती न व्यथेते एजत् ध्रुवं पत्यते विश्वं

एकँ चरत् पतचि विषुणं वि जातं ॥८॥ सना पुराणं अधि एमि आरात् महः पितुः जनितुः जामि तत् नः देवासः यच्च पनितारः एवैः उरौ पथि विऽउते तस्थुः अंतः ॥९॥ इमं स्तोमँ रोदसी प्र ब्रवीमि ऋतूदराः शृणवन् अग्निऽजिह्वाः मित्रः संऽराजः वरुणः युवानः आदित्यासः कवयः पप्रथानाः ॥१०॥२५॥ हिरण्यऽपाणिः सविता सुऽजिह्वः चित्रः आ दिवः विदथे पत्यमानः देवेषु च सवितः श्लोकँ अश्रेः आत अस्मभ्यं आ सुव सर्वऽतातिं ॥११॥ सुऽकृत् सुऽपाणिः स्वऽवान् ऋतऽवा देवः त्वष्टा अवसे तानि नः धात् पूषणऽवंतः ऋभवः मादयध्वं ऊर्ध्वऽग्रावाणः अध्वरं अतष्ट ॥१२॥ विद्युतऽरथाः मरुतः ऋष्टिऽमंतः दिवः मर्याः ऋतऽजाताः अयासः सरस्वती शृणवन् यज्ञियासः धात रयिं सहऽवीरं तुरासः ॥१३॥ विष्णुं स्तोमासः पुरुऽदस्मं अर्काः भगस्यऽइव कारिणः यामनिग्मन् उरुऽक्रमः ककुहः यस्य पूर्वीः न मर्धति युवतयः जनिचीः ॥१४॥ इंद्रः विश्वैः वीर्यैः पत्यमानः उभे आ पप्रौ रोदसी महिऽत्वा पुरंऽदरः वृत्रऽहा धृष्णुऽसेनः संऽगृभ्य नः आ भर भूरि पश्वः ॥१५॥२६॥ नासत्या मे पितरा बंधुऽपृच्छा सऽजात्यं अश्विनोः चारु नाम युवं हि स्थः रयिऽदौ नः रयीणां दाचं रक्षेथे अकवैः अदब्धा ॥१६॥ महत् तत् वः कवयः चारु नाम यत् ह देवाः भवथ विश्वे इंद्रे सखा ऋभुऽभिः पुरुऽहूत प्रियेभिः इमां धियं सातये तक्षत नः ॥१७॥ अर्यमा नः अदितिः यज्ञियासः अदब्धानि वरुणस्य व्रतानि युयोत नः अनपत्यानि गंतोः प्रजाऽवान् नः पशुऽमान् अस्तु गातुः ॥१८॥ देवानां दूतः पुरुध प्रऽसूतः अनागान नः वोचतु सर्वऽतातां शृणोतु नः पृथिवी द्यौः उत आपः सूर्यः नक्षत्रैः उरु अंतरिक्षं ॥१९॥ शृण्वंतु नः वृषणः पर्वतासः ध्रुवऽक्षेमासः इळया

मदंतः आदित्यैः नः अदितिः शृणोतु यच्छंतु नः मरुतः शर्म भद्रं ॥२०॥ सदा सुऽगः पितुऽमान अस्तु पंथाः मध्वा देवाः ओषधीः संपिपृक्त भगः मे अग्ने सख्ये न मृध्याः उत रायः अश्यां सदनं पुरुऽक्षोः ॥२१॥ स्वदस्व हव्या सं इषः दिदीहि अस्मद्र्यक् सं मिमीहि श्रवांसि विश्वान अग्ने पृतऽसु तान जेषि शचून अहा विश्वा सुऽमनाः दीदिहि नः ॥ २२ ॥ २७ ॥

॥५५॥ उषसः पूर्वाः अध यत वि ऽजुघुः महत वि जज्ञे अक्षरं पदे गोः व्रता देवानां उप नु प्रऽभूषन महत देवानां असुरऽत्वं एकं ॥१॥ मो सु नः अत्र जुहुरंत देवाः मा पूर्वे अग्ने पितरः पदज्ञाः पुराण्योः सद्मनोः केतुः अंतः महत देवानां असुरऽत्वं एकं ॥२॥ वि मे पुरुऽचा पतयंति कामाः शमि अच्छ दीद्ये पूर्व्याणि संऽइद्धे अग्नौ ऋतं इत वदेम महत देवानां असुरऽत्वं एकं ॥३॥ समानः राजा विऽभृतः पुरुऽचा शये शयासु प्रऽयुतः वना अनु अन्या वत्सं भरंति क्षेति माता महत देवानां असुरऽत्वं एकं ॥४॥ आऽक्षित पूर्वासु अपराः अनूरुत सद्यः जातासु तरुणीषु अंतः अंतःऽवंतीः सुवते अप्रऽवीताः महत देवानां असुरऽत्वं एकं ॥५॥२८॥ शयुः परस्तात अध नु द्विऽमाता अबंधनः चरति वत्सः एकः मिचस्यंता वरुणस्य व्रतानि महत देवानां असुरऽत्वं एकं ॥६॥ द्विऽमाता होता विदथेषु संऽराट अनु अयं चरति क्षेति बुध्नः प्र रण्यानि रण्यऽवाचः भरंते महत देवानां असुरऽत्वं एकं ॥७॥ पूरस्यऽइव युध्यतः अंतमस्य प्रतीचीनं ददृशे विश्वं आऽयत अंतः मतिः चरति निःऽसिधं गोः महत देवानां असुरऽत्वं एकं ॥८॥ नि वेवेति

पलितः दूतः आसु अंतः महान् चरति रोचनेन वपूंषि बिभ्रत् अभि नः वि चष्टे महत् देवानाँ असुरऽत्वं एकं॥९॥ विष्णुः गोपाः परमं पाति पाथः प्रिया धामानि अमृता दधानः अग्निः ता विश्वा भुवनानि वेद् महत् देवानाँ असुरऽत्वं एकं॥१०॥२९॥ नाना चक्राते यम्या वपूंषि तयोः अन्यत् रोचते कृष्णं अन्यत् श्यावीं च यत् अरुषी च स्वसारौ महत् देवानाँ असुरऽत्वं एकं॥११॥ माता च यत्र दुहिता च धेनू सबःऽदुघे॰ धापयेते संऽईची॰ ऋतस्य ते सदसि ईळे अंतः महत् देवानाँ असुरऽत्वं एकं॥१२॥ अन्यस्याः वत्सं रिहती मिमाय कया भुवा नि दधे धेनुः ऊधः ऋतस्य सा पयसा अपिन्वत इळा महत् देवानाँ असुरऽत्वं एकं॥१३॥ पद्या वस्ते पुरुऽरूपा वपूंषि ऊर्ध्वा तस्थौ चिऽअवि रेरिहाणा ऋतस्य सद्म वि चरामि विद्वान् महत् देवानाँ असुरऽत्वं एकं॥१४॥ पदेऽइव॰ निऽहिते॰ दृस्से अंतः तयोः अन्यत् गुह्यं आविः अन्यत् सधीचीना पथ्या सा विषूची महत् देवानाँ असुरऽत्वं एकं॥१५॥३०॥ आ धेनवः धुनयंतां अशिश्वीः सबःऽदुघाः शशयाः अप्रऽदुग्धाः नव्याःऽनव्याः युवतयः भवंतीः महत् देवानाँ असुरऽत्वं एकं॥१६॥ यत् अन्यासु वृषभः रोरवीति सः अन्यस्मिन् यूथे नि दधाति रेतः सः हि क्षपाऽवान् सः भगः सः राजा महत् देवानाँ असुरऽत्वं एकं॥१७॥ वीरस्य नु सुऽअश्वं जनासः प्र नु वोचाम विदुः अस्य देवाः षोळ्हा युक्ताः पंचऽपंच आ वहंति महत् देवानाँ असुरऽत्वं एकं॥१८॥ देवः त्वष्टा सविता विश्वऽरूपः पुपोष प्रऽजाः पुरुधा जजान इमा च विश्वा भुवनानि अस्य महत् देवानाँ असुरऽत्वं एकं॥१९॥ मही संऽऐरत् चम्वा संऽईची॰ उभे ते अस्य वसुना निऽचष्टे॰ शृण्वे वीरः विंदमानः वसूनि महत् देवानाँ असुरऽत्वं एकं॥२०॥ इमां

च नः पृथिवी विश्वऽधायाः उप क्षेति हितऽमित्रः न राजा पुरः-ऽसदः शर्मऽसदः न वीराः महत देवानाँ असुरऽत्वं एकं॥२१॥ निः-ऽसिध्वरीः ते ओषधीः उत आपः रयिं ते इंद्र पृथिवी बिभर्ति सखा-यः ते वामऽभाजः स्याम महत देवानाँ असुरऽत्वं एकं॥२२॥३१॥३॥

॥५६॥ न ता मिनंति मायिनः न धीराः व्रता देवानाँ प्रथमा ध्रु-वाणि न रोदसी अदुहा वेद्याभिः न पर्वताः निऽनमे तस्थिऽवांसः॥१॥ षट् भारान् एकः अचरन् बिभर्ति ऋतं वर्षिष्ठं उप गावः आ अगुः तिस्रः महीः उपराः तस्थुः अत्याः गुहा द्वे निऽहिते॰ दर्शि एका॥२॥ त्रिऽपाजस्यः वृषभः विश्वऽरूपः उत त्रिऽउधा पु-रुध प्रजाऽवान् त्रिऽऋनीकः पत्यते माहिनऽवान् सः रेतःऽधाः वृषभः शश्वतीनां॥३॥ अभीकं आसां पदऽवीः अबोधि आदि-त्यानाँ अद्वे चारु नाम आपः चित् अस्मै अरमंत देवीः पृथक् व्रजंतीः परि सीं अवृंजन्॥४॥ ची सधऽस्थां सिंधवः चित् कवीनां उत त्रिऽमाता विदथेषु संऽराट् ऋतऽवरीः योषणाः तिस्रः अ-प्याः चित् आ दिवः विदथे पत्यमानाः॥५॥ चित् आ दिवः सवितः वार्याणि दिवेऽदिवे आ सुव चित् नः अहः त्रिऽधातु रायः आ सुव वसूनि भग चातः धिषणे सातये धाः॥६॥ चित् आ दिवः सविता सोसवीति राजाना मित्रावरुणा सुऽपाणी॰ आपः चित् अस्य रोदसी चित् उर्वी रत्नं भिक्षंत सवितुः सवाय॥७॥ चित् उतऽत-मा दुऽनशा रोचनानि चयः राजंति असुरस्य वीराः ऋतऽवानः ऋषिराः दुःऽदभासः चित् आ दिवः विदथे संतु देवाः॥८॥७॥

॥५७॥ प्र मे विविक्वान् अविदत् मनीषां धेनुं चरंतीं प्रऽयुतां

ऋगोपां सद्यः चित् या दुदुहे भूरि धासेः इंद्रः तत् अग्निः पनितारः अस्याः ॥१॥ इंद्रः सु पूषा वृषणा सुऽहस्ता दिवः न प्रीताः शशयं दुदुहे विश्वे यत् अस्यां रणयंत देवाः प्र वः अच वसवः सुम्नं अश्याम् ॥२॥ याः जामयः वृष्णे इच्छंति शक्तिं नमस्यंतीः जानते गर्भं अस्मिन् अच्छ पुत्रं धेनवः वावशानाः महः चरंति बिभ्रतं वपूंषि ॥३॥ अच्छ विवक्मि रोदसी सुऽमेकं० यावणः युजानः अध्वरे मनीषा इमा ऊं ते मनवे भूरिऽवाराः ऊर्ध्वाः भवंति दर्शताः यजत्राः ॥४॥ या ते जिह्वा मधुऽमती सुऽमेधाः अग्ने देवेषु उच्यते उरूची तया इह विश्वान् अवसे यजत्रान् आ सादय पायय च मधूनि ॥५॥ या ते अग्ने पर्वतस्यऽइव धारा असश्चंती पीपयत् देव चित्रा तां अस्मभ्यं प्रऽमतिं जातऽवेदः वसो रास्व सुऽमतिं विश्वऽजन्यां ॥ ६ ॥ २ ॥

॥५८॥ धेनुः प्रत्नस्य काम्यं दुहाना अंतः पुत्रः चरति दक्षिणायाः आ द्योतनिं वहति शुभ्रऽयामा उषसः स्तोमः अश्विनौ अजीगः ॥१॥ सुऽयुक् वहंति प्रति वां ऋतेन ऊर्ध्वाः भवंति पितराऽइव मेधाः जरेथां अस्मत् वि पणेः मनीषां युवोः अवः चकृम आ यातं अर्वाक् ॥२॥ सुयुक्ऽभिः अश्वैः सुऽवृता रथेन दस्रौ इमं शृणुतं श्लोकं अद्रेः किं अंग वां प्रति अवर्तिं गमिष्ठा आहुः विप्रासः अश्विना पुराऽजाः ॥३॥ आ मन्येथां आ गतं कत् चित् एवैः विश्वे जनासः अश्विना हवंते इमा हि वां गोऽऋजीका मधूनि प्र मिचासः न दृतुः उस्राः अग्ने ॥४॥ तिरः पुरु चित् अश्विना रजांसि आंगूषः वां मघऽवाना जनेषु आ इह यातं पथिऽभिः देवऽयानैः दस्रौ इमे वां निऽधयः मधूनां ॥५॥३॥ पुराणं श्लोकः सख्यं शिवं वां

युवोः नरा द्रविणं जहाव्यां पुनः कृण्वानाः सख्या शिवानि मध्वा मदेम सह नु समानाः ॥६॥ अश्विना वायुना युवं सुऽदक्षा नियुतऽभिः चसऽजोषसा युवाना नासत्या तिरःऽअह्न्यं जुषाणा सोमं पिबतं अस्रिधा सुऽदानू० ॥७॥ अश्विना परि वां इषः पुरूचीः ईयुः गीःऽभिः यतमानाः अमृध्राः रथः ह वां ऋतऽजाः अद्रिऽजूतः परि द्यावापृथिवी याति सद्यः ॥८॥ अश्विना मधुसुतऽतमः युवाकुः सोमः तं पातं आ गतं दुरोणे रथः ह वां भूरि वपुः करिक्रत् सुतऽवतः निःऽकृतं आऽगमिष्ठः ॥ ९ ॥ ४ ॥

॥५९॥ मित्रः जनान् यातयति ब्रुवाणः मित्रः दाधार पृथिवीं उत द्यां मित्रः कृष्टीः अनिऽमिषा अभि चष्टे मित्राय हव्यं घृतऽवत् जुहोत ॥१॥ प्र सः मित्र मर्तः अस्तु प्रयस्वान् यः ते आदित्य शिक्षति व्रतेन न हन्यते न जीयते त्वाऽऊतः न एनं अंहः अश्नोति अंतितः न दूरात् ॥२॥ अनमीवासः इळया मदंतः मितऽज्ञवः वरिमन् आ पृथिव्याः आदित्यस्य व्रतं उपऽक्षियंतः वयं मित्रस्य सुऽमतौ स्याम ॥३॥ अयं मित्रः नमस्यः सुऽशेवः राजा सुऽक्षत्रः अजनिष्ट वेधाः तस्य वयं सुऽमतौ यज्ञियस्य अपि भद्रे सौमनसे स्याम ॥४॥ महान् आदित्यः नमसा उपऽसद्यः यातयतऽजनः गृणते सुऽशेवः तस्मै एतत् पन्यऽतमाय जुष्टं अग्नौ मित्राय हविः आ जुहोत ॥५॥५॥ मित्रस्य चर्षणिऽधृतः अवः देवस्य सानसि द्युम्नं चित्रश्रवःऽतमं ॥६॥ अभि यः महिना दिवं मित्रः बभूव सऽप्रथाः अभि श्रवःऽभिः पृथिवीं ॥७॥ मित्राय पंच येमिरे जनाः अभिष्टिऽशवसे सः देवान् विश्वान् बिभर्ति ॥८॥ मित्रः देवेषु आयुषु जनाय वृक्तऽबर्हिषे इषः इष्टऽव्रताः अकः० ॥ ९ ॥ ६ ॥

॥६०॥ इहऽइह वः मनसा बंधुता नरः उशिजः जग्मुः अभि तानि वेदसा याभिः मायाभिः प्रतिजूतिऽ वर्पसः सौधन्वनाः यज्ञियं भागं आनशु ॥१॥ याभिः शचीभिः चमसान् अपिंशत यया धिया गां अरिंणीत चर्मणः येन हरी मनसा निःऽ अतक्षत तेन देवऽत्वं ऋभवः सं आनशु ॥२॥ इंद्रस्य सख्यं ऋभवः सं आनशुः मनोः नपातः अपसः दधन्विरे सौधन्वनासः अमृतऽत्वं आ ईरिरे विष्टी शमीभिः सुऽ कृतः सुऽ कृत्यया ॥३॥ ईंद्रेण याथ सऽरथं सुते सचा अथो वशानां भवथ सह श्रिया न वः प्रतिऽमै सुऽ कृतानि वाघतः सौधन्वनाः ऋभवः वीर्याणि च ॥४॥ इंद्र ऋभुऽभिः वाजवतऽभिः संऽउक्षितं सुतं सोमं आ वृषस्व गभस्त्योः धिया इषितः मघऽवन् दाशुषः गृहे सौधन्वनेभिः सह मत्स्व नृऽभिः ॥५॥ इंद्र ऋभुऽमान् वाजऽवान् मत्स्व इह नः अस्मिन् सवने शच्या पुरुऽस्तुत इमानि तुभ्यं स्वसराणि येमिरे व्रता देवानां मनुषः च धर्मऽभिः ॥६॥ इंद्र ऋभुऽभिः वाजिऽभिः वाजयन् इह स्तोमं जरितुः उप याहि यज्ञियं शतं केतेभिः इषिरेभिः आयवे सहस्रऽनीथः अध्वरस्य होमनि ॥७॥७॥

॥६१॥ उषः वाजेन वाजिनि प्रऽचेताः स्तोमं जुषस्व गृणतः मघोनि पुराणी देवि युवतिः पुरंऽधिः अनुव्रतं चरसि विश्वऽवारे ॥१॥ उषः देवि अमर्त्या वि भाहि चंद्रऽरथा सूनृताः ईरयंती आ वहंतु सुऽ यमासः अश्वाः हिरण्यऽ वर्णा पृथुऽ पाजसः ये ॥२॥ उषः प्रतीची भुवनानि विश्वा ऊर्ध्वा तिष्ठसि अमृतस्य केतुः समानं अर्थं चरणीयमाना चक्रंऽइव नव्यसि आ ववृत्स्व ॥३॥ अव स्यूमंऽइव चिन्वती मघोनी उषाः याति स्वसरस्य पत्नी स्वः जनंती

सुऽभगा सुऽदंसाः आ अंतात् दिवः पप्रथे आ पृथिव्याः॥४॥ अच्छ वः देवीं उषसं विऽभातीं प्र वः भरध्वं नमसा सुऽवृक्तिं ऊर्ध्वं मधुधा दिवि पाजः अश्रेत् प्र रोचना रुरुचे रण्वऽसंदृक्॥५॥ ऋतऽवरी दिवः अर्कैः अबोधि आ रेवतीं रोदसी चित्रं अस्थात् आऽयतीं अग्ने उषसं विऽभातीं वामं एषि द्रविणं भिक्षमाणः॥६॥ ऋतस्य बुध्ने उषसां इषण्यन् वृषा मही रोदसी आ विवेश मही मित्रस्य वरुणस्य माया चंद्राऽइव भानुं वि दधे पुरुऽचा ॥ ७ ॥ ८ ॥

॥६२॥ इमाः ऊं वां भृमयः मन्यमानाः युवाऽवते न तुज्याः अभूवन् क्रत्यत इंद्रावरुणा यशः वां येन स्म सिनं भरथः सखिऽभ्यः ॥१॥ अयं ऊं वां पुरुऽतमः रयिऽयन् शश्वतऽतमं अवसे जोहवीति सऽजोषौ इंद्रावरुणा मरुतऽभिः दिवा पृथिव्या शृणुतं हवं मे॥२॥ अस्मे तत् इंद्रावरुणा वसु स्यात् अस्मे रयिः मरुतः सर्वऽवीरः अस्मान् वरूत्रीः शरणैः अवंतु अस्मान् होत्रा भारती दक्षिणाभिः॥३॥ बृहस्पते जुषस्व नः हव्यानि विश्वऽदेव्य रास्व रत्नानि दाशुषे॥४॥ शुचिं अर्कैः बृहस्पतिं अध्वरेषु नमस्यत अनामि ओजः आ चक्रे॥५॥९॥ वृषभं चर्षणीनां विश्वऽरूपं अदाभ्यं बृहस्पतिं वरेण्यं॥६॥ इयं ते पूषन् आघृणे सुऽस्तुतिः देव नव्यसी अस्माभिः तुभ्यं शस्यते॥७॥ तां जुषस्व गिरं मम वाजऽयंतीं अव धियं वधूयुःऽइव योषणां ॥८॥ यः विश्वा अभि विऽपश्यति भुवना सं च पश्यति सः नः पूषा अविता भुवत्॥९॥ तत् सवितुः वरेण्यं भर्गः देवस्य धीमहि धियः यः नः प्रऽचोदयात् ॥१०॥१०॥ देवस्य सवितुः वयं वाजऽयंतः पुरंध्या भर्गस्य रातिं ईमहे ॥११॥ देवं

नरः सवितारं विप्राः यज्ञैः सुवृक्तिऽभिः नमस्यंति धिया इषिताः ॥१२॥ सोमः जिगाति गातुऽवित् देवानां एति निःऽकृतं ऋतस्य योनिं आऽसदं॥१३॥ सोमः अस्मभ्यं द्विऽपदे चतुःऽपदे च पशवे अनमीवाः इषः करत्॥१४॥ अस्माकं आयुः वर्धयन् अभिऽमातीः सहमानः सोमः सधऽस्थं आ असदत्॥१५॥ आ नः मित्रावरुणा घृतैः गव्यूतिं उक्षतं मध्वा रजांसि सुऽक्रतू॰॥१६॥ उरुऽशंसा नमःऽवृधा मह्ना दक्षस्य राजथः द्राघिष्ठाभिः शुचिऽव्रता॥१७॥ गृणाना जमत्ऽअग्निना योनौ ऋतस्य सीदतं पातं सोमं ऋतःऽवृधा॥१८॥११॥५॥३॥

॥ इति तृतीयं मंडलं समाप्तं ॥

॥१॥ त्वां हि अग्ने सदं इत् सऽमन्यवः देवासः देवं अरतिं निऽएरिरे इति क्रत्वा निऽएरिरे अमर्त्यं यजत मर्त्येषु आ देवं आऽदेवं जनत प्रऽचेतसं विश्वं आऽदेवं जनत प्रऽचेतसं॥१॥ सः भ्रातरं वरुणं अग्ने आ ववृत्स्व देवान् अच्छ सुऽमती यज्ञऽवनसं ज्येष्ठं यज्ञऽवनसं ऋतऽवानं आदित्यं चर्षणिऽधृतं राजानं चर्षणिऽधृतं॥२॥ सखे सखायं अभि आ ववृत्स्व आप्युं न चक्रं रथ्याऽइव रंह्या अस्मभ्यं दस्म रंह्या अग्ने मृळीकं वरुणे सचा विदः मरुतऽसु विश्वऽभानुषु तोकाय तुजे शुशुचान शं कृधि अस्मभ्यं दस्म शं कृधि॥३॥ त्वं नः अग्ने वरुणस्य विद्वान् देवस्य हेळः अव यासिसीष्ठाः यजिष्ठः वह्निऽतमः शोशुचानः विश्वा द्वेषांसि प्र मुमुग्धि अस्मत्॥४॥ सः त्वं नः अग्ने अवमः भव ऊती नेदिष्ठः अस्याः उषसः विऽउष्टौ अव

यक्ष्व नः वरुणं रराणः वीहि मृळीकं सुऽहवः नः एधि ॥५॥१२॥
अस्य श्रेष्ठा सुऽभगस्य संऽदृक् देवस्य चिचऽतमा मर्त्येषु शुचि
घृतं न तप्तं अघ्न्यायाः स्याहा देवस्य मंहनाऽइव धेनोः ॥६॥ चिः
अस्य ता परमा संति सत्या स्याहा देवस्य जनिमानि अग्नेः अनंते
अंतः परिऽवीतः आ अगात् शुचिः शुक्रः अर्यः रोरुचानः ॥७॥ सः
दूतः विश्वा इत् अभि वष्टि सद्म होता हिरण्यऽरथः रंऽसुजिह्वः रो-
हितऽअश्वः वपुष्यः विभाऽवा सदा रण्वः पितुमतीऽइव संऽसत्
॥८॥ सः चेतयत् मनुषः यज्ञऽबंधुः प्र तं मह्या रणनया नयंति सः
क्षेति अस्य दुर्यासु साधन् देवः मर्तस्य सधनिऽत्वं आप ॥९॥ सः तु
नः अग्निः नयतु प्रऽजानन् अच्छ रत्नं देवऽभक्तं यत् अस्य धिया
यत् विश्वे अमृताः अकृण्वन् द्यौः पिता जनिता सत्यं उक्षन्
॥१०॥१३॥ सः जायत प्रथमः पस्त्यासु महः बुध्ने रजसः अस्य योनौ
अपात् अशीर्षा गुहमानः अंता आऽयोयुवानः वृषभस्य नीळे
॥११॥ प्र शर्धः आर्ते प्रथमं विपन्या ऋतस्य योना वृषभस्य नीळे
स्याहः युवा वपुष्यः विभाऽवा सप्त प्रियासः सजनयंत वृष्णे ॥१२॥
अस्माकं अत्र पितरः मनुष्याः अभि प्र सेदुः ऋतं आशुषाणाः अ-
श्मऽव्रजाः सुऽदुघाः वव्रे अंतः उत् उस्राः आजन् उषसः हुवानाः
॥१३॥ ते मर्मृजत दृहऽवांसः अद्रिं तत् एषां अन्ये अभितः वि वो-
चन् पश्वऽयंवासः अभि कारं अर्चन् विदंत ज्योतिः चकृपंत धी-
भिः ॥१४॥ ते गव्यता मनसा दृध्रं उब्धं गाः येमानं परि संतं अद्रिं
दृळ्हं नरः वचसा दैव्येन व्रजं गोऽमंतं उशिजः वि वव्रुः॰॥१५॥१४॥
ते मन्वत प्रथमं नाम धेनोः चिः सप्त मातुः परमाणि विंदन् तत
जानतीः अभि अनूषत व्राः आविः भुवत् अरुणीः यशसा गोः
॥१६॥ नेशत् तमः दुधितं रोचत द्यौः उत् देव्याः उषसः भानुः अर्त

आ सूर्यः बृहतः तिष्ठत् अज्रान् ऋजु मर्तेषु वृजिना च पश्यन् ॥१७॥ आत् इत् पश्चा बुबुधानाः वि अख्यन् आत् इत् रत्नं धारयंत द्युऽभक्तं विश्वे विश्वासु दुर्यासु देवाः मित्र धिये वरुण सत्यं अस्तु ॥१८॥ अच्छ वोचेय शुशुचानं अग्निं होतारं विश्वऽभरसं यजिष्ठं शुचि ऊधः अतृणत् न गवां अंधः न पूतं परिऽसिक्तं अंशोः ॥१९॥ विश्वेषां अदितिः यज्ञियानां विश्वेषां अतिथिः मानुषाणां अग्निः देवानां अवः आऽवृणानः सुऽमृळीकः भवतु जातऽवेदाः ॥ २० ॥ १५ ॥

॥२॥ यः मर्त्येषु अमृतः ऋतऽवा देवः देवेषु अरतिः निऽधायि होता यजिष्ठः महा शुचध्यै हव्यैः अग्निः मनुषः ईरयध्यै ॥१॥ इह त्वं सूनो सहसः नः अद्य जातः जातान् उभयान् अंतः अग्ने दूतः ईयसे युयुजानः ऋष्व ऋजुऽमुष्कान् वृषणः शुक्रान् च ॥२॥ अत्या वृधऽसानू० रोहिता घृतऽसानू० ऋतस्य मन्ये मनसा जविष्ठा अंतः ईयसे अरुषा युजानः युष्मान् च देवान् विशः आ च मर्तान् ॥३॥ अर्यमणं वरुणं मित्रं एषां इंद्राविष्णू मरुतः अश्विना उत सुऽअश्वः अग्ने सुऽरथः सुऽराधाः आ इत् ऊं वह सुऽहविषे जनाय ॥४॥ गोऽमान् अग्ने अविऽमान् अश्वी यज्ञः नृवतऽसखा सदं इत् अप्रऽमृष्यः इळाऽवान् एषः अमुर प्रजाऽवान् दीर्घः रयिः पृथुऽबुध्नः सभाऽवान् ॥५॥१६॥ यः ते इध्मं जभरत् सिस्विदानः मूर्धानं वा ततपते त्वाऽया भुवः तस्य स्वऽतवान् पायुः अग्ने विश्वस्मात् सीं अघऽयतः उरुष्य ॥६॥ यः ते भरात् अन्नियते चित् अन्नं निऽशितं मंद्रं अतिथिं उतऽईरत् आ देवऽयुः इनधते दुरोणे तस्मिन् रयिः ध्रुवः अस्तु दास्वान् ॥७॥ यः त्वा दोषा यः उषसि प्रऽशंसात्

सात् प्रियं वात्वा कृणवते हविष्मान् अश्वः न स्वे दमे आ हेम्या-
ऽवान् तं अंहसः पीपरः दाश्वांसं॥८॥यः तुभ्यं अग्ने अमृताय दाशत्
दुवः त्वे कृणवते यतऽसुक् न सः राया शश्वमानः वि योषत् न एनं
अंहः परि वरत् अघऽयोः॥९॥ यस्य त्वं अग्ने अध्वरं जुजोषः देवः
मर्तस्य सुऽधितं ररांणः प्रीता इत् असत् होचासा यविष्ठ असाम
यस्य विधतः वृधासः॥१०॥१७॥ चित्तिं अचित्तिं चिनवत् वि विद्वान्
पृष्ठाऽइव वीता वृजिना च मर्तान् राये च नः सुऽअपत्याय
देव दितिं च रास्व अदितिं उरुष्य॥११॥ कविं शशासुः कवयः अदब्धाः
निऽधारयंतः दुर्यासु आयोः अतः त्वं दृश्यान् अग्ने एतान् पट्-
ऽभिः पश्येः अङ्गुतान् अर्यः एवैः॥१२॥ त्वं अग्ने वाघते सुऽप्रनीतिः
सुतऽसोमाय विधते यविष्ठ रत्नं भर शशमानाय घृष्वे पृथु चंद्रं
अवसे चर्षणिऽप्राः॥१३॥ अध ह यत् वयं अग्ने त्वाऽया पट्ऽभिः
हस्तेभिः चकृम तनूभिः रथं न क्रंतः अपसा भुरिजोः ऋतं येमुः
सुऽध्यः आप्नुषाणाः॥१४॥अध मातुः उषसः सप्त विप्राः जायेमहि
प्रथमाः वेधसः नृन् दिवः पुचाः अंगिरसः भवेम अद्रिं रुजेम धनिनं
शुचंतः॥१५॥१८॥अध यथा नः पितरः परासः प्रत्नासः अग्ने
ऋतं आशुषाणाः शुचिं इत् अयन् दीधितिं उक्थऽशसः क्षामं
भिंदंतः अरुणीः अपं व्रन्॥१६॥ सुऽकर्मांणः सुऽरुचः देवऽयंतः
अयः न देवाः जनिम धमंतः शुचंतः अग्निं ववृधंतः इंद्रं ऊर्वं गव्यं
परिऽसदंतः अग्मन्॥१७॥ आ यूथाऽइव क्षुऽमति पप्थः अख्यत्
देवानां यत् जनिम अंति उग्र मर्तानां चित् उर्वशीः अकृप्रन् वृधे
चित् अर्यः उपरस्य आयोः॥१८॥अकर्म ते सुऽअपसः अभूम ऋतं
अवस्रन् उषसः विभातीः अनूनं अग्निं पुरुधा सुऽचंद्रं देवस्य मर्मृजतः चारु चक्षुः॥१९॥ एता ते अग्ने उचथानि वेधः अवोचाम

कवये ता जुषस्व उत शोचस्व कृणुहि वस्यसः नः महः रायः पुरुऽवार प्र यंधि ॥ २० ॥ १९ ॥

॥३॥ आ वः राजानं अध्वरस्य रुद्रं होतारं सत्यऽयजं रोदस्योः अग्निं पुरा तनयित्नोः अचित्तात् हिरण्यऽरूपं अवसे कृणुध्वं ॥१॥ अयं योनिः चकृम यं वयं ते जायाऽइव पत्ये उशती सुऽवासाः अर्वाचीनः परिऽवीतः नि सीद इमाः ऊं ते सुऽअपाक प्रतीचीः ॥२॥ आऽपृणते अवपिताय मन्म नृऽचक्षसे सुऽमृळीकाय वेधः देवाय शस्तिं अमृताय शंस यावाऽइव सोता मधुऽसुत् यं ईळे ॥३॥ त्वं चित् नः शम्यै अग्ने अस्याः ऋतस्य बोधि ऋतऽचित् सुऽआधीः कदा ते उक्था सधऽमाद्यानि कदा भवंति सख्या गृहे ते ॥४॥ कथा ह तत् वरुणाय त्वं अग्ने कथा दिवे गर्हसे कत् नः आगः कथा मित्राय मीळ्हुषे पृथिव्यै ब्रवः कत् अर्यम्णे कत् भगाय ॥५॥२०॥ कत् धिष्ण्यासु वृधसानः अग्ने कत् वाताय प्रऽतवसे शुभंऽये परिऽज्मने नासत्याय क्षे ब्रवः कत् अग्ने रुद्राय नृऽघ्ने ॥६॥ कथा महे पुष्टिंऽभराय पूष्णे कत् रुद्राय सुऽमखाय हविःऽदे कत् विष्णवे उरुऽगायाय रेतः ब्रवः कत् अग्ने शरवे बृहत्यै ॥७॥ कथा शर्धाय मरुतां ऋताय कथा सूरे बृहते पृच्छ्यमानः प्रति ब्रवः अदितये तुराय साध दिवः जातऽवेदः चिकित्वान् ॥८॥ ऋतेन ऋतं निऽयतं ईळे आ गोः आमा सचा मधुऽमत् पक्वं अग्ने कृष्णा सती रुशता धासिना एषा जामर्येण पयसा पीपाय ॥९॥ ऋतेन हि स्म वृषभः चित् अक्तः पुमान् अग्निः पयसा पृष्ठ्येन अस्पंदमानः अचरत् वयःऽधाः वृषा शुक्रं दुदुहे पृश्निः ऊधः ॥१०॥२१॥ ऋतेन अद्रिं वि असन् भिदंतः सं अंगिरसः नवंत गो-

भिः शुनं नरः परि षदन् उषसं आविः स्वः अभवत् जाते अग्नौ ॥११॥ ऋतेन देवीः अमृताः अमृक्ताः अर्णोऽभिः आपः मधुमत्-ऽभिः अग्ने वाजी न सर्गेषु प्रऽस्तुभानः प्र सदः इत् सविंतवे दधन्युः ॥१२॥ मा कस्य यक्षं सदः इत् हुरः गाः मा वेशस्य प्रऽमिनतः मा आपेः मा भ्रातुः अग्ने अनृजोः ऋणं वेः मा सख्युः दक्षं रिपोः भुजेम ॥१३॥ रक्षं नः अग्ने तव रक्षणेभिः ररक्षाणः सुऽमख प्रीणानः प्रति स्फुर वि रुज वीळु अंहः जहि रक्षः महि चित् ववृधानं ॥१४॥ एभिः भव सुऽमनाः अग्ने अर्कैः इमान् स्पृश मन्मऽभिः शूर वाजान् उत ब्रह्माणि अंगिरः जुषस्व सं ते शस्तिः देवऽवाता जरेत ॥१५॥ एता विश्वा विदुषे तुभ्यं वेधः नीथानि अग्ने निण्या वचांसि निऽवचना कवये काव्यानि अशंसिषं मतिऽभिः विप्रः उक्थैः ॥१६॥२२॥

॥ ४ ॥ कृणुष्व पाजः प्रऽसितिं न पृथ्वी याहि राजाऽइव अमऽवान् इभेन तृष्वी अनु प्रऽसितिं द्रूणानः अस्ता असि विध्य रक्षसः तपिष्ठैः ॥१॥ तव भ्रमासः आशुऽया पतंति अनु स्पृश धृषता शोशुचानः तपूंषि अग्ने जुह्वा पतंगान् असंऽदितः वि सृज विष्वक् उल्काः ॥२॥ प्रति स्पशः वि सृज तूर्णिऽतमः भव पायुः विशः अस्याः अदब्धः यः नः दूरे अघऽशंसः यः अंति अग्ने माकिः ते व्यथिः आ दधर्षीत् ॥३॥ उत अग्ने तिष्ठ प्रति आ तनुष्व नि अमित्रान् ओषतात् तिग्मऽहेते यः नः अरातिं समिधान चक्रे नीचा तं धक्षि अतसं न शुष्कं ॥४॥ ऊर्ध्वः भव प्रति विध्य अधि अस्मत् आविः कृणुष्व दैव्यानि अग्ने अव स्थिरा तनुहि यातुऽजूनां जामिं अजामिं प्र मृणीहि शत्रून् ॥५॥२३॥ सः ते जानाति सुऽमतिं

यविष्ठ यः ईवते ब्रह्मणे गातुं ऐरत् विश्वानि अस्मै सुऽदिनानि रायः द्युम्नानि अर्यः वि दुरः अभि द्यौत्॥६॥ सः इत् अग्ने अस्तु सुऽभगः सुऽदानुः यः त्वा नित्येन हविषा यः उक्थैः पिप्रीषति स्वे आयुषि दुरोणे विश्वा इत् अस्मै सुऽदिना सा असत् इष्टिः॥७॥ अर्चामि ते सुऽमतिं घोषि अर्वाक् सं ते ववाता जरतां इयं गीः सुऽअश्वाः त्वा सुऽरथाः मर्जयेम अस्मे क्षत्राणि धारयेः अनु द्यून्॥८॥ इह त्वा भूरि आ चरेत् उप त्मन् दोषाऽवस्तः दीदिऽवांसं अनु द्यून् क्रीळंतः त्वा सुऽमनसः सपेम अभि द्युम्ना तस्थिऽवांसः जनानां॥९॥ यः त्वा सुऽअश्वः सुऽहिरण्यः अग्ने उपऽयाति वसुऽमता रथेन तस्य चाता भवसि तस्य सखा यः ते आतिथ्यं आनुषक् जुजोषत्॥१०॥२४॥ महः रुजामि बंधुता वचःऽभिः तत् मा पितुः गोतमात् अनु इयाय त्वं नः अस्य वचसः चिकिद्धि होतः यविष्ठ सुऽक्रतो॰ दमूनाः॥११॥ अस्वप्नऽजः तरणयः सुऽशेवाः अतंद्रासः अवृकाः अश्रमिष्ठाः ते पायवः सध्र्यंचः निऽसद्य अग्ने तव नः पांतु अमूर॥१२॥ ये पायवः मामतेयं ते अग्ने पश्यंतः अंधं दुःऽइतात् अरक्षन् रक्ष तान् सुऽकृतः विश्वऽवेदाः दिप्संतः इत् रिपवः न अहं देभुः॥१३॥ त्वया वयं सऽधन्यः त्वाऽऊताः तव प्रऽनीती अश्याम वाजान् उभा शंसा सूदय सत्यऽताते अनुष्ठुया कृणुहि अह्रयाण॥१४॥ अया ते अग्ने संऽइधा विधेम प्रति स्तोमं शस्यमानं गृभाय दह अशसः रक्षसः पाहि अस्मान् दुहः निदः मित्रऽमहः अवद्यात्॥१५॥२५॥४॥

॥५॥ वैश्वानराय मीळ्हुषे सऽजोषाः कथा दाशेम अग्नये बृहत् भाः अनूनेन बृहता वक्षथेन उप स्तभायत् उपऽमित् न रोधः॥१॥

॥५४॥ अभूत देवः सविता वंद्यः नु नः इदानीं अहः उपऽवाच्यः नृऽभिः वि यः रत्ना भजति मानवेभ्यः श्रेष्ठं नः अच द्रविणं यथा दधत् ॥१॥ देवेभ्यः हि प्रथमं यज्ञियेभ्यः अमृतऽत्वं सुवसि भागं उतऽतमं आत इत दामानं सवितः वि ऊर्णुषे अनूचीना जीविता मानुषेभ्यः ॥२॥ अचित्ती यत चकृम दैव्ये जने दीनैः दक्षैः प्रऽभूती पुरुषत्वता देवेषु च सवितः मानुषेषु च त्वं नः अच सुवतात अनागसः ॥३॥ न प्रऽमिये सवितुः दैव्यस्य तत यथा विश्वं भुवनं धारयिष्यति यत पृथिव्याः वरिमन् आ सुऽअंगुरिः वर्ष्मन् दिवः सुवति सत्यं अस्य तत ॥ ४ ॥ इंद्रऽज्येष्ठान बृहतऽभ्यः पर्वतेभ्यः क्षयान एभ्यः सुवसि पस्त्यऽवतः यथाऽयथा पतयंतः विऽयेमिरे एव एव तस्थुः सवितः सवाय ते ॥५॥ ये ते चिः अहन सवितः सवासः दिवेऽदिवे सौभगं आऽसुवंति इंद्रः द्यावापृथिवी सिंधुः अतऽभिः आदित्यैः नः अदितिः शर्म यंसत ॥ ६ ॥ ५ ॥

॥५५॥ कः वः चाता वसवः कः वरूता द्यावाभूमी अदिते चासीथां नः सहीयसः वरूथं मित्र मतीत कः वः अध्वरे वरिवः धाति

देवाः॥१॥ प्र ये धामानि पूर्व्याणि अचीन् वि यत् उच्छान् विऽयोतारः अमूराः विऽधातारः वि ते दधुः अजसाः ऋतऽधीतयः रुरुचंत दस्माः॥२॥ प्र पस्त्यां अदितिं सिंधुं अर्कैः स्वस्तिं ईळे सख्याय देवीं उभे यथा नः अहनी निऽपातः उषसानक्ता करतां अदब्धे॥३॥ वि अर्यमा वरुणः चेति पंथां इषः पतिः सुवितं गातुं अग्निः इंद्राविष्णू नृऽवत् ऊं सु स्तवाना शर्म नः यंतं अमंऽवत् वरूथं॥४॥ आ पर्वतस्य मरुतां अवांसि देवस्य चातुः अत्रिभगस्य पात पतिः जन्यात् अंहसः नः मित्रः मित्रियात् उत नः उरुष्येत् ॥५॥६॥ नु रोदसी अहिना बुध्येन स्तुवीत देवी अर्येभिः इष्टैः समुद्रं न संऽचरणे सनिष्यवः घर्मेऽस्वरसः नद्यः अपवन्॥६॥ देवैः नः देवी अदितिः नि पातु देवः चाता चायतां अप्रऽयुच्छन् नहि मित्रस्य वरुणस्य धासिं अहर्मसि प्रऽमियं सानु अग्नेः॥७॥ अग्निः ईशे वसव्यस्य अग्निः महः सौभगस्य तानि अस्मभ्यं रासते ॥८॥ उषः मघोनि आ वह सूनृते वार्या पुरु अस्मभ्यं वाजिनीऽवति॥९॥ तत् सु नः सविता भगः वरुणः मित्रः अर्यमा इंद्रः नः राधसा आ गमत् ॥ १० ॥ ७ ॥

॥५६॥ मही द्यावापृथिवी इह ज्येष्ठे रुचा भवतां शुचयत्ऽभिः अर्कैः यत् सी वरिष्ठे बृहती विऽमिन्वन् रुवत् ह उक्षा पप्रथानेभिः एवैः ॥१॥ देवी देवेभिः यजते यजत्रैः अमिनती तस्थतुः उक्षमाणे ऋतऽवरी० अदुहा देवऽपुत्रे० यज्ञस्य नेत्री शुचयंतऽभिः अर्कैः॥२॥ सः इत् सुऽअपाः भुवनेषु आस यः इमे द्यावापृथिवी जजान उर्वी गभीरे रजसी सुऽमेके०अवंशे धीरः शच्या समैरत॥३॥ नु रोदसी बृहतऽभिः नः वरूथैः पत्नीवतऽभिः

इषयंती सऽजोषाः उरूची विश्वे यजते नि पातं धिया स्याम रथ्यः सदाऽसाः॥४॥ प्र वां महि द्यवी अभि उपऽस्तुतिं भरामहे शुची उप प्रऽशस्तये॥५॥ पुनाने तन्वा मिथः स्वेन दक्षेण राजथः ऊह्याथे सनात ऋतं॥६॥ मही मित्रस्य साधथः तरंती पिप्रती ऋतं परि यज्ञं नि सेदथुः॥ ७॥ ८॥

॥५७॥ क्षेत्रस्य पतिना वयं हितेनऽइव जयामसि गां अश्वं पोषयित्नु आ सः नः मृळाति ईदृशे॥१॥ क्षेत्रस्य पते मधुऽमंतं ऊर्मिं धेनुःऽइव पयः अस्मासु धुक्ष्व मधुऽश्चुतं घृतंऽइव सुऽपूतं ऋतस्य नः पतयः मृळयंतु॥२॥ मधुऽमतीः ओषधीः द्यावः आपः मधुऽमत् नः भवतु अंतरिक्षं क्षेत्रस्य पतिः मधुऽमान् नः अस्तु अरिष्यंतः अनु एनं चरेम॥३॥ सुनं वाहाः सुनं नरः सुनं कृषतु लांगलं सुनं वरत्राः बध्यंतां सुनं अष्ट्राः उत् इंगय॥४॥ सुनासीरा इमां वाचं जुषेथां यत् दिवि चक्रथुः पयः तेन इमां उप सिंचतं॥५॥ अर्वाची सुऽभगे भव सीते वंदामहे त्वा यथा नः सुऽभगा अससि यथा नः सुऽफला अससि॥६॥ इंद्रः सीतां नि गृह्णातु तां पूषा अनु यच्छतु सा नः पयस्वती दुहां उत्तरांऽउत्तरां समां॥७॥ सुनं नः फालाः वि कृषंतु भूमिं सुनं कीनाशाः अभि यंतु वाहैः सुनं पर्जन्यः मधुना पयःऽभिः सुनासीरा सुनं अस्मासु धत्तं॥ ८॥ ९॥

॥५८॥ समुद्रात् ऊर्मिः मधुऽमान् उत् आरत् उप अंशुना सं अमृतऽत्वं आनट् घृतस्य नाम गुह्यं यत् अस्ति जिह्वा देवानां अमृतस्य नाभिः॥१॥ वयं नाम प्र ब्रवाम घृतस्य अस्मिन् यज्ञे

धारयामनमःऽभिः उपब्रह्मा शृणवत् शस्यमानं चतुःऽशृंगः अवमीत् गौरः एतत्॥२॥ चत्वारि शृंगा त्रयः अस्य पादाः द्वे शीर्षे सप्त हस्तासः अस्य त्रिधा बद्धः वृषभः रोरवीति महः देवः मर्त्यान् आ विवेश॥३॥ त्रिधा हितं पणिऽभिः गुह्यमानं गवि देवासः घृतं अनु अविंदन् इंद्रः एकं सूर्यः एकं जजान वेनात् एकं स्वधया निः ततक्षुः॥४॥ एताः अर्षंति हृद्यात् समुद्रात् शतऽव्रजाः रिपुणा न अवऽचक्षे घृतस्य धाराः अभि चाकशीमि हिरण्ययः वेतसः मध्ये आसां॥५॥१०॥ सम्यक् स्रवंति सरितः न धेनाः अंतः हृदा मनसा पूयमानाः एते अर्षंति ऊर्मयः घृतस्य मृगाःऽइव क्षिपणोः ईषमाणाः॥६॥ सिंधोःऽइव प्रऽअध्वने पूघनासः वातऽप्रमियः पतयंति यह्वाः घृतस्य धाराः अरुषः न वाजी काष्ठाः भिंदन् ऊर्मिऽभिः पिन्वमानः॥७॥ अभि प्रवंत समनाऽइव योषाः कल्याणयः सयमानासः अग्निं घृतस्य धाराः संऽइधः नसंत ताः जुषाणः हर्यति जातऽवेदाः॥८॥ कन्याःऽइव वहतुं एतवै ऊं अंजि अंजानाः अभि चाकशीमि यत्र सोमः सूयते यत्र यज्ञः घृतस्य धाराः अभि तत् पवंते॥९॥ अभि अर्षत सुऽस्तुतिं गव्यं आजिं अस्मासु भद्रा द्रविणानि धत्त इमं यज्ञं नयत देवता नः घृतस्य धाराः मधुऽमत् पवंते॥१०॥ धामन् ते विश्वं भुवनं अधि श्रितं अंतः समुद्रे हृदि अंतः आयुषि अपां अनीके संऽइधे यः आऽभृतः तं अश्याम मधुऽमंतं ते ऊर्मिं॥११॥११॥५॥४॥

॥ इति चतुर्थ मंडलं समाप्तं ॥

॥१॥ अबोधि अग्निः सꣳइधा जनानां प्रति धेनुꣳइव आऽयती उषसं यह्वाःऽइव प्र वयां उतऽजिहानाः प्र भानवः सिस्रते नाकं अच्छ ॥१॥ अबोधि होता यजथाय देवान् ऊर्ध्वः अग्निः सुऽमनाः प्रातः अस्थात् संऽइद्धस्य रुशत् अदर्शि पाजः महान् देवः तमसः निः अमोचि ॥२॥ यत् ईं गणस्य रशनां अजीगः शुचिः अंक्ते शुचिऽभिः गोभिः अग्निः आत् दक्षिणा युज्यते वाजऽयंतीं उत्तानां ऊर्ध्वः अधयत् जुहूभिः ॥३॥ अग्निं अच्छ देवऽयतां मनाँसि चक्षूँषिऽइव सूर्यं सं चरंति यत् ईं सुवाते उषसा विऽरूपे श्वेतः वाजी जायते अग्रे अह्नां ॥४॥ जनिष्ट हि जेन्यः अग्रे अह्नां हितः हितेषु अरुषः वनेषु दमेऽदमे सप्त रत्ना दधानः अग्निः होता नि ससाद यजीयान् ॥५॥ अग्निः होता नि असीदत् यजीयान् उपऽस्थे मातुः सुरभौ ऊं लोके युवा कविः पुरुनिःऽस्थः ऋतऽवा धर्ता कृष्टीनां उत मध्ये इद्धः ॥६॥१२॥ प्र नु त्यं विप्रं अध्वरेषु साधुं अग्निं होतारं ईळते नमःऽभिः आ यः ततान रोदसी ऋतेन नित्यं मृजंति वाजिनं घृतेन ॥७॥ मार्जाल्यः मृज्यते स्वे दमूनाः कविऽप्रशस्तः अतिथिः शिवः नः सहस्रऽशृंगः वृषभः ततऽओजाः विश्वान् अग्ने सहसा प्र असि अन्यान् ॥८॥ प्र सद्यः अग्ने अति एषि अन्यान् आविः यस्मै चारुऽतमः बभूथ ईळेन्यः वपुष्यः विभाऽवा प्रियः विशां अतिथिः मानुषीणां ॥९॥ तुभ्यं भरंति क्षितयः यविष्ठ बलिं अग्ने अंतितः आ उत दूरात् आ भंदिष्ठस्य सुऽमतिं चिकिद्धि बृहत् ते अग्ने महि शर्म भद्रं ॥१०॥ आ अद्य रथं भानुऽमः भानुऽमंतं अग्ने तिष्ठ यजतेभिः संऽअंतं विद्वान् पथीनां उरु अंतरिक्षं आ इह देवान् हविःऽअद्याय वक्षि ॥११॥ अवोचाम कवये मेध्याय वचः वंदारु वृषभाय वृष्णे

गविष्ठिरः नमसा स्तोमं अग्नौ दिविऽइव रुक्मं उरुऽव्यंचं अश्रेत् ॥ १२ ॥ १३ ॥

॥२॥ कुमारं माता युवतिः संऽउब्धं गुहा बिभर्ति न ददाति पित्रे अनीकं अस्य न मिनत् जनासः पुरः पश्यंति निऽहितं अरतौ ॥१॥ कं एतं त्वं युवते कुमारं पेषीं बिभर्षि महिषी जजान पूर्वीः हि गर्भः शरदः ववर्ध अपश्यं जातं यत् असूत माता ॥२॥ हिरण्यऽदंतं शुचिऽवर्णं आरात् क्षेचांत् अपश्यं आयुधा मिमानं ददानः अस्मै अमृतं विपृक्षत् किं मां अनिंद्राः कृण्वन् अनुक्थाः ॥३॥ क्षेचांत् अपश्यं सनुतः चरंतं सुऽमत् यूथं न पुरु शोभमानं न ताः अगृभ्रन् अजनिष्ट हि सः पलिक्नीः इत् युवतयः भवंति ॥४॥ के मे मर्यकं वि यवंत गोभिः न येषां गोपाः अरणः चित् आस ये ईं जगृभुः अव ते सृजंतु आ अजाति पस्वः उप नः चिकित्वान् ॥५॥ वसां राजानं वसतिं जनानां अरातयः नि दधुः मर्त्येषु ब्रह्माणि अत्रेः अव तं सृजंतु निंदितारः निंद्यासः भवंतु ॥६॥१४॥ पुनःऽशेपं चित् निऽदितं सहस्रात् यूपात् अमुंचः अशमिष्ट हि सः एव असत् अग्ने वि मुमुग्धि पाशान् होतः चिकित्वः इह तु निऽसद्य ॥७॥ हृणीयमानः अप हि मत् ऐयेः प्र मे देवानां व्रतऽपाः उवाच इंद्रः विद्वान् अनु हि त्वा चचक्ष तेन अहं अग्ने अनुऽशिष्टः आ अगां ॥८॥ वि ज्योतिषा बृहता भाति अग्निः आविः विश्वानि कृणुते महिऽत्वा प्र अदेवीः मायाः सहते दुःऽएवाः शिशीते शृंगे रक्षसे विऽनिक्षे ॥९॥ उत स्वानासः दिवि संतु अग्नेः तिग्मऽआयुधाः रक्षसे हंतवे ऊं मदे चित् अस्य प्र रुजंति भामाः न वरंते परिऽबाधः अदेवीः ॥१०॥ एतं ते स्तोमं तु-

विऽजात॒ विप्रः॒ रथं॑ न धीरः॑ सुऽअपाः॑ अत॒क्षं॒ यदि॑ इत॒ अग्ने॒ प्रति॑ त्वं दे॒व ह॒र्यीः॒ स्वः॑ऽवतीः॒ अप॒ः एन॒ जये॑म ॥११॥ तुवि॑ऽग्रीवः॑ वृष॒भः व॒वृधा॒नः॒ अश॒चु अ॒र्यः॒ सं अ॒जा॒ति॒ वेदः॑ इति॑ इ॒मं अ॒ग्निं अ॒मृता॑ः अ॒वो॒च॒न् ब॒र्हिष्म॑ते मन॑वे शर्म॑ यं॒स॒त् ह॒विष्म॑ते मन॑वे शर्म॑ यं॒स॒त् ॥ १२ ॥ १५ ॥

॥३॥ त्वं अ॒ग्ने॒ वरु॑णः जाय॑से यत् त्वं मि॒त्रः भ॒व॒सि॒ यत् सं॑ऽइ॑द्धः त्वे॑ विश्वे॑ सह॒सः पु॒च॒ दे॒वाः त्वं इ॑ळे॒ दा॒शुषे॑ मर्त्या॑य ॥१॥ त्वं अ॒र्य॒मा भ॒व॒सि॒ यत् क॒नीना॑ं नाम॑ स्वधाऽवन् गु॒ह्यं॑ बिभर्षि॒ अ॒ञ्जंति॑ मि॒त्रं सुऽधि॑तं न गो॒भिः॒ यत् दं॒ऽप॒ती॑ सऽम॑नसा कृ॒णोषि॑ ॥२॥ तव॑ श्रि॒ये मरु॑तः मृ॒ज्ये॒यं॒त॒ रु॒द्र॒ यत् ते॒ जनि॑म चारु॒ चि॒त्रं पदं॒ यत् विष्णोः॒ उ॒-पऽमं नि॒ऽधायि॑ ते॒न॑ पा॒सि॒ गु॒ह्यं॑ नाम॑ गो॒नां ॥३॥ तव॑ श्रि॒या सु॒ऽदृ॒शः॒ दे॒व॒ दे॒वाः॒ पु॒रु॒ दधा॑नाः अ॒मृत॑ं सपंत॒ होता॑रं अ॒ग्निं मनु॑षः नि से॒दुः॒ द॒श॒स्यंतः॒ उ॒शिजः॑ शंस॑ आ॒योः॑ ॥४॥ नत्वत् होता॑ पू॒र्वः॒ अ॒ग्ने॒ यजी॑यान् न काव्यैः॒ परः॑ अ॒स्ति॒ स्व॒धा॒ऽवः॒ वि॒शः॒ च॒ यस्याः॑ अति॑-थिः॒ भवा॑सि सः॒ य॒ज्ञेन॑ व॒न॒व॒त् दे॒व॒ मर्ता॑न् ॥५॥ व॒यं अ॒ग्ने॒ व॒नु॒या॒म॒ त्वाऽऊ॑ताः॒ व॒सु॒ऽयवः॑ ह॒विषा॑ बुध्यमानाः॒ व॒यं सु॒ऽम॒र्ये॑ वि॒दथे॑षु अह्वा॑ं व॒यं रा॒या स॒ह॒सः॒ पु॒च॒ मर्ता॑न् ॥६॥१६॥ यः नः॒ आगः॑ अ॒भि एनः॑ भरा॑ति अधि इत् अ॒धं अ॒घऽशं॑से दधात॒ ज॒हि॒ चि॒कि॒त्वः॒ अ॒-भिऽश॑स्तिं एतां अ॒ग्ने॒ यः नः॒ म॒र्च॒यंति॒ द्वये॑न ॥७॥ त्वां अ॒स्याः॒ वि॒ऽउ॒षि॒ दे॒व॒ पू॒र्वे॒ दू॒तं कृ॒ण्वा॒नाः॒ अ॒य॒ज॒ंत॒ ह॒व्यैः॒ सं॑ऽस्थे यत् अ॒ग्ने॒ ईय॑से र॒यीणां॑ देवः॒ मर्तैः॑ वसु॒ऽभिः॒ इ॒ध्यमा॑नः ॥८॥ अव॑ स्पृधि॒ पि॒त॒रं योधि॑ विद्वान् पु॒चः॒ यः ते॒ स॒ह॒सः॒ सू॒नो॒ ऊहे॑ क॒दा चि॒कि॒त्वः॒ अ॒भि च॒क्ष॒से नः॒ अग्ने॑ क॒दा क्र॒तु॒ऽचि॒त् या॒त॒या॒से ॥९॥ भूरि॑ नाम॑ वंदमानः द॒-

धाति पिता वसो॑ यदि॑ तत् जोषया॑से कुवित् देवस्य॑ सहसा च॒कानः॒ मुक्षं॑ अग्निः॒ वनते॑ ववृधा॒नः॥१०॥ त्वं अ॑ग जरि॒तारं॑ यविष्ठ विश्वा॑नि अग्ने दुः॒इ॒ता अति॑ पर्षि॒ स्तेना॑ः अद॒ृश्रन् रि॒पवः॑ जना॑सः अज्ञा॑तऽकेताः वृजि॒नाः॒ अभू॑वन्॥११॥ इ॒मे यामा॑सः त्वद्रिक् अभूवन् वसवे वा॒ तत इत् आ॑गः॒ अवा॑चि॒ न अह॑ अ॒यं अग्निः॒ अ॒भिऽशस्त॑ये नः॒ न रि॑षते ववृधा॒नः परा॑ दात्॥१२॥१७॥

॥४॥ त्वां अ॑ग्ने वसु॒ऽपति॑ं वसू॑नां अभि॒ प्र मं॑दे अध्वरेषु॑ राजन् त्वया॑ वाजं॑ वाज॒ऽयं॑तः॒ जये॑म अभि॑ स्याम पृत्सु॒तीः॒ मर्त्या॑नां॥१॥ ह॒व्यऽवाट् अग्निः॒ अज॑रः॒ पिता॑ नः॒ विऽभुः॒ विभा॑ऽवा॒ सु॒ऽदृशी॑कः॒ अस्मे॑ सु॒ऽगार्ह॑पत्याः॒ सं इ॑षः॒ दि॒दी॒हि॒ अस्म॒द्र्यक्सं मि॑मीहि॒ श्रवां॑सि॥२॥ विशां॑ कविं॑ विश्पति॑ं मानु॒षीणां॑ शुचिं॑ पावकं॑ घृत॒ऽपृ॑ष्ठं अग्निं॑ नि होता॑रं विश्व॒ऽविदं॑ दधिध्वे॒ सः दे॒वेषु॑ वनते॒ वार्या॑णि॥३॥ जुष॑स्व अग्ने इ॒ळया॑ स॒ऽजोषाः॑ यत॑मानः॒ रश्मि॑ऽभिः॒ सूर्य॑स्य जुष॑स्व नः॒ सं॒ऽइ॒धे जा॑त॒ऽवेदः॒ आ च॑ देवान् ह॒विः॒ऽअद्या॑य वक्षि॥४॥ जुष्टः॑ दमू॑नाः॒ अति॑थिः॒ दुरो॑णे इ॒मं नः॒ यज्ञं॒ उप॑ याहि॒ विद्वान् विश्वाः॑ अग्ने अभि॒ऽयुजः॑ विऽहत्य॑ शत्रु॒ऽयता॑ं आ॒ भ॒र॒ भोज॑नानि॥५॥१८॥ वधे॑न दस्यु॑ं प्र॒ हि चा॑तयस्व वयः॑ कृण्वा॑नः॒ तन्वे॑ स्वा॒यै पि॒॑पर्षि॒ यत् सह॑सः पुत्र॒ देवान् सः अग्ने॑ पाहि॒ नृत॑म॒ वाजे॑ अस्मान्॥६॥ वयं॑ ते अग्ने उक्थैः॑ विधेम॒ वयं॑ ह॒व्यैः॑ पावक भद्र॒ऽशो॒चे॒ अस्मे॑ र॒यिं॑ विश्व॒ऽवा॑रं सं इ॒न्व॒ अस्मे॑ विश्वा॑नि द्रविणा॒नि धे॒हि॥७॥ अस्मा॑कं अग्ने अध्व॑रं जुषस्व सह॑सः सूनो॑ चिऽसधस्थ ह॒व्यं वयं॑ दे॒वेषु॑ सु॒ऽकृ॑तः स्याम॒ शर्म॑णा नः॒ चि॒ऽव॒रू॒थेन॑ पाहि॥८॥ विश्वा॑नि नः॒ दुः॒ऽगहा॑ जात॒ऽवेदः॒ सिंधु॑ं न नावा॑ दुः॒ऽइ॒ता अति॑ पर्षि॒ अग्ने॑

अचिऽवत् नमसा गृणानः अस्माकं बोधि अविता तनूनां ॥९॥
यः त्वा हृदा कीरिणा मन्यमानः अमर्त्यं मर्त्यः जोहवीमि जात-
ऽवेदः यशः अस्मासु धेहि प्रऽजाभिः अग्ने अमृतऽत्वं अश्यां ॥१०॥
यस्मै त्वं सुऽकृते जातऽवेदः ऊं लोकं अग्ने कृणवः स्योनं अश्विनं
सः पुचिणं वीरऽवंतं गोऽमंतं रयिं नशते स्वस्ति ॥११॥१९॥

॥५॥ सुऽसमिद्धाय शोचिषे घृतं तीव्रं जुहोतन अग्नये जातऽवे-
दसे ॥१॥ नराशंसः सुसूदति इमं यज्ञं अदाभ्यः कविः हि मधुऽह-
स्त्यः ॥२॥ ईळितः अग्ने आ वह इंद्रं चित्रं इह प्रियं सुऽखैः रथेभिः
ऊतये ॥३॥ ऊर्णऽमदाः वि प्रथस्व अभि अर्काः अनूषत भव नः
शुभ्र सातये ॥४॥ देवीः द्वारः वि श्रयध्वं सुप्रऽअयनाः नः ऊतये
प्रऽप्र यज्ञं पृणीतन ॥५॥ २० ॥ सुऽप्रतीके॰ वयःऽवृधा यह्वी
ऋतस्य मातरा दोषां उषसं ईमहे ॥६॥ वातस्य पत्मन् ईळिता
दैव्या होतारा मनुषः इमं नः यज्ञं आ गतं ॥७॥ इळा सरस्वती म-
ही तिस्रः देवीः मयःऽभुवः बर्हिः सीदंतु अस्रिधः ॥८॥ शिवः त्वष्टः
इह आ गहि विऽभुः पोषे उत त्मना यज्ञेऽयज्ञे नः उत अव ॥९॥
यच्चं वेत्थ वनस्पते देवानां गुह्या नामानि तच्चं हव्यानि गमय
॥१०॥ स्वाहा अग्नये वरुणाय स्वाहा इंद्राय मरुतऽभ्यः स्वाहा
देवेभ्यः हविः ॥ ११ ॥ २१ ॥

॥६॥ अग्निं तं मन्ये यः वसुः अस्तं यं यंति धेनवः अस्तं अर्वंतः
आशवः अस्तं नित्यासः वाजिनः इषं स्तोतृऽभ्यः आ भर ॥१॥ सः
अग्निः यः वसुः गृणे सं यं आऽयंति धेनवः सं अर्वंतः रघुऽद्रुवः सं
सुऽजातासः सूरयः इषं स्तोतृऽभ्यः आ भर ॥२॥ अग्निः हि वाजिनं

विशे दद॑ति विश्वऽचर्षणिः अग्निः राये सुऽआभुवं सः प्रीतः याति वार्यं इषं स्तोतृऽभ्यः आ भर॥३॥ आ ते अग्ने इधीमहि द्युऽमंतं देव अजरं यत् ह स्या ते पनीयसी संऽइत् दीदयति द्यवि इषं स्तोतृऽभ्यः आ भर॥४॥ आ ते अग्ने ऋचा हविः शुक्रस्य शोचिषः पते सुऽचंद्र दस्म विश्पते हव्यऽवाट् तुभ्यं हूयते इषं स्तोतृऽभ्यः आ भर॥५॥२२॥ प्रो॰ त्ये अग्नयः अग्निषु विश्वं पुष्यंति वार्यं ते हिन्विरे ते इन्विरे ते इषण्यंति आनुषक् इषं स्तोतृऽभ्यः आ भर॥६॥ तवं त्ये अग्ने अर्चयः महिं व्राधंत वाजिनः ये पत्वऽभिः शफानां व्रजा भुरंत गोनां इषं स्तोतृऽभ्यः आ भर॥७॥ नवाः नः अग्ने आ भर स्तोतृऽभ्यः सुऽक्षितीः इषः ते स्याम ये आनृचुः त्वाऽदूतासः दमेऽदमे इषं स्तोतृऽभ्यः आ भर॥८॥ उभे॰ सुऽचंद्र सर्पिषः दर्वी॰ श्रीणीषे आसनि उतो॰ नः उत पुपूर्याः उक्थेषु शवसः पते इषं स्तोतृऽभ्यः आ भर॥९॥ एव अग्निं अजुर्यमुः गीःऽभिः यज्ञेभिः आनुषक् दधत् असे॰ सुऽवीर्यं उत त्यत् आपुऽअस्यं इषं स्तोतृऽभ्यः आ भर॥१०॥२३॥

॥७॥ सखायः सं वः सम्यंचं इषं स्तोमं च अग्नये वर्षिष्ठाय क्षितीनां ऊर्जः नप्त्रे सहस्वते॥१॥ कुवं चित् यस्य संऽजूतौ रणाः नरः नृऽसदने अहंतः चित् यं इंधते संऽजनयंति जंतवः॥२॥ सं यत् इषः वनामहे सं हव्या मानुषाणां उत द्युम्नस्य शवसा ऋतस्य रश्मिं आ ददे॥३॥ सः स्म कृणोति केतुं आ नक्तं चित् दूरे आ सते पावकः यत् वनस्पतीन् प्र स्म मिनाति अजरः॥४॥ अवं स्म यस्य वेषणे स्वेदं पथिषु जुह्वति अभि ईं अह स्वऽजेन्यं भूमं पृष्ठाऽइव रुरुहुः॥५॥२४॥ यं मर्त्यः पुरुऽस्पृहं विदत् विश्वस्य धायसे प्र स्वा-

दंनं पितॄनां अस्तंऽतातिं चित् आयवे ॥६॥ सः हि स्मधन्व आ-ऽक्षितं दाता न दाति आ पशुः हिरिऽश्मश्रुः शुचिंऽदन् ऋभुः अनिभृष्टऽतविषिः ॥७॥ शुचिः स्मयस्मै अचिऽवत् प्र स्वधितिः-ऽइव रीयते सुऽसूः असूत माता क्राणा यत् आनशे भगं ॥८॥ आ यः ते सर्पिःऽआसुते अग्ने शं अस्ति धायसे आ एषु द्युम्नं उत श्रवः आ चित्तं मर्त्येषु धाः ॥९॥ इति चित् मन्युं अधिजः त्वाऽदातं आ पशुं ददे आत् अग्ने अपृणतः अचिः ससह्यात् दस्यून् इषः ससह्यात् नॄन् ॥ १० ॥ २५ ॥

॥८॥ त्वां अग्ने ऋतऽयवः सं ईधिरे प्रत्नं प्रत्नासः ऊतये सहः-ऽकृत पुरुऽचंद्रं यजतं विश्वऽधायसं दमूनसं गृहऽपतिं वरेण्यं ॥१॥ त्वां अग्ने अतिथिं पूर्व्यं विशः शोचिःऽकेशं गृहऽपतिं नि सेदिरे बृहत्ऽकेतुं पुरुऽरूपं धनऽस्पृतं सुऽशर्माणं सुऽअवसं जरत्ऽविषं ॥ २ ॥ त्वां अग्ने मानुषीः ईळते विशः होत्राऽविदं विविचिं रत्नऽधातमं गुहा संतं सुऽभग विश्वऽदर्शतं तुविऽस्वनसं सुऽयजं घृतऽश्रियं ॥३॥ त्वां अग्ने धर्णसिं विश्वधा वयं गीःऽभिः गृणंतः नमसा उप सेदिम सः नः जुषस्व संऽइधानः अंगिरः देवः मर्तस्य यशसा सुदीतिऽभिः ॥ ४ ॥ त्वं अग्ने पुरुऽरूपः विशेऽविशे वयः दधासि प्रत्नऽथा पुरुऽस्तुत पुरूणि अत्रा सहसा वि राजसि त्विषिः सा ते तित्विषाणस्य न आऽधृषे ॥५॥ त्वां अग्ने संऽइधानं यविष्ठ्य देवाः दूतं चक्रिरे हव्यऽवाहनं उरुऽज्रयसं घृतऽयोनिं आऽहुतं त्वेषं चक्षुः दधिरे चोदयतऽमति ॥६॥ त्वां अग्ने प्रऽदिवः आऽहुतं घृतैः सुम्नऽयवः सुऽसमिधा सं ईधिरे सः ववृधानः ओषधीभिः उक्षितः अभि ज्रयांसि पार्थिवा वि तिष्ठसे ॥७॥२६॥८॥३॥

॥९॥ त्वां अग्ने हविष्मंतः देवं मर्तासः ईळते मन्ये त्वा जातऽवेदसं सः हव्या वक्षि आनुषक् ॥१॥ अग्निः होता दास्वंतः क्षयस्य वृक्तऽबर्हिषः सं यज्ञासः चरंति यं सं वाजासः श्रवस्यवः ॥२॥ उत स्म यं शिप्शुं यथा नवं जनिष्ट अरणी धर्तारं मानुषीणां विशां अग्निं सुऽअध्वरं ॥३॥ उत स्म दुःऽगृभीयसे पुचः न ह्वार्याणां पुरुयः दग्धा असि वना अग्ने पशुः न यवसे ॥४॥ अध स्म यस्य अर्चयः सम्यक् संऽयंति धूमिनः यत् ईं अह चितः दिवि उप धमातऽइव धमंति शिशीते धमातरि यथा ॥५॥ तव अहं अग्ने ऊतिऽभिः मित्रस्य च प्रशस्तिऽभिः द्वेषःऽयुतः न दुःऽइता तुर्याम मर्त्यानां ॥६॥ तं नः अग्ने अभिनरः रयिं सहस्वः आ भर सः क्षेपयत् सः पोषयत् भुवत् वाजस्य सातये उत एधि पृतऽसु नः वृधे ॥७॥१॥

॥१०॥ अग्ने ओजिष्ठं आ भर द्युम्नं अस्मभ्यं अधिऽगो° प्रनः राया परीणसा रत्सि वाजाय पंथां ॥१॥ त्वं नः अग्ने अद्भुत क्रत्वा दक्षस्य मंहना त्वे अमृर्यं आ अरुहत् क्राणा मित्रः न यज्ञियः ॥२॥ त्वं नः अग्ने एषां गयं पुष्टिं च वर्धय ये स्तोमेभिः प्र सूरयः नरः मघानि आनशुः ॥३॥ ये अग्ने चंद्र ते गिरः शुंभंति अश्वऽराधसः शुष्मेभिः शुष्मिणः नरः दिवः चित् येषां बृहत् सुऽकीर्तिः बोधति त्मना ॥४॥ तव त्ये अग्ने अर्चयः भाजंतः यंति धृष्णुऽया परिऽज्मानः न विऽद्युतः स्वानः रथेः न वाजऽयुः ॥५॥ नु नः अग्ने ऊतये सऽबाधसः च रातये अस्माकासः च सूरयः विश्वाः आशाः तरीषणिं ॥६॥ त्वं नः अग्ने अंगिरः स्तुतः स्तवानः आ भर होतः विभ्वऽसहं रयिं स्तोतृऽभ्यः स्तवसे च नः उत एधि पृतऽसु नः वृधे ॥७॥२॥

॥११॥ जनस्य गोपाः अजनिष्ट जागृविः अग्निः सुऽदक्षः सुविताय नव्यसे घृतऽप्रतीकः बृहता दिविऽस्पृशा द्युऽमत् वि भाति भरतेभ्यः शुचिः ॥१॥ यज्ञस्य केतुं प्रथमं पुरःऽहितं अग्निं नरः चिऽसधस्थे सं ईधिरे ईद्रेण देवैः सऽरथं सः बर्हिषि सीदत् नि होता यजथाय सुऽक्रतुः ॥२॥ असंऽमृष्टः जायसे मातोः शुचिः मंद्रः कविः उत् अतिष्ठः विवस्वतः घृतेन त्वा अवर्धयन् अग्ने आऽहुत धूमः ते केतुः अभवत् दिवि श्रितः ॥३॥ अग्निः नः यज्ञं उप वेतु साधुऽया अग्निं नरः वि भरंते गृहेऽगृहे अग्निः दूतः अभवत् हव्यऽवाहनः अग्निं वृणानाः वृणते कविऽक्रतुं ॥४॥ तुभ्यं इदं अग्ने मधुमत्ऽतमं वचः तुभ्यं मनीषा इयं अस्तु शंहृदे त्वां गिरः सिंधुंऽइव अवनीः महीः आ पृणंति शवसा वर्धयंति च ॥५॥ त्वां अग्ने अंगिरसः गुहा हितं अनु अविंदन् निऽश्रियाणं वनेऽवने सः जायसे मथ्यमानः सहः महत् त्वां आहुः सहसः पुत्रं अंगिरः ॥६॥३॥

॥१२॥ प्र अग्नये बृहते यज्ञियाय ऋतस्य वृष्णे असुराय मन्म घृतं न यज्ञे आस्ये सुऽपूतं गिरं भरे वृषभाय प्रतीचीं ॥१॥ ऋतं चिकित्वः ऋतं इत् चिकिद्धि ऋतस्य धाराः अनु तृंधि पूर्वीः न अहं यातुं सहसा न द्वयेन ऋतं सपामि अरुषस्य वृष्णः ॥२॥ कया नः अग्ने ऋतयन् ऋतेन भुवः नवेदाः उचथस्य नव्यः वेदः मे देवः ऋतुऽपाः ऋतूनां न अहं पतिं सनितुः अस्य रायः ॥३॥ के ते अग्ने रिपवे बंधनासः के पायवः सनिषंत द्युऽमंतः के धासिं अग्ने अनृतस्य पांति के असंतः वचसः संति गोपाः ॥४॥ सखायः ते विषुणाः अग्ने एते शिवासः संतः अशिवाः अभूवन् अधूर्षत स्वयं एते वचःऽभिः ऋजुऽयते वृजिनानि ब्रुवंतः ॥५॥ यः ते अग्ने नमसा

यज्ञं ईट्टे ऋतं सः पाति अरुषस्य वृष्णः तस्य क्षयः पृथुः आ साधुः एतु प्रऽसस्राणस्य नहुषस्य शेषः ॥ ६ ॥ ४ ॥

॥१३॥ अचैतः त्वा हवामहे अचैतः सं इधीमहि अग्ने अचैतः ऊतये॥१॥ अग्नेः स्तोमं मनामहे सिध्रं अद्य दिविऽस्पृशः देवस्य द्रविणस्यवः॥२॥ अग्निः जुषत नः गिरः होता यः मानुषेषु आ सः यक्षत् दैव्यं जनं॥३॥ त्वं अग्ने सऽप्रथाः असि जुष्टः होता वरेण्यः त्वया यज्ञं वि तन्वते॥४॥ त्वां अग्ने वाजऽसातमं विप्राः वर्धन्ति सुऽस्तुतं सः नः रास्व सुऽवीर्यं॥५॥ अग्ने नेमिः अरान्ऽइव देवान् त्वं परिऽभूः असि आ राधः चित्रं ऋंजसे ॥ ६ ॥ ५ ॥

॥१४॥ अग्निं स्तोमेन बोधय समिधानः अमर्त्यं हव्या देवेषु नः दधत्॥१॥ तं अध्वरेषु ईळते देवं मर्ताः अमर्त्यं यजिष्ठं मानुषे जने ॥२॥ तं हि शश्वतः ईळते सुचा देवं घृतऽश्चुता अग्निं हव्याय वोळ्हवे॥३॥ अग्निः जातः अरोचत घ्नन् दस्यून् ज्योतिषा तमः अविंदत् गाः अपः स्वः॰॥४॥ अग्निं ईळेन्यं कविं घृतऽपृष्ठं सपर्यत वेतु मे शृणवत् हवं॥५॥ अग्निं घृतेन वावृधुः स्तोमेभिः विश्वऽचर्षणिं सुऽआधीभिः वचस्युऽभिः ॥ ६ ॥ ६ ॥ १ ॥

॥१५॥ प्र वेधसे कवये वेद्याय गिरं भरे यशसे पूर्व्याय घृतऽप्रसत्तः असुरः सुऽशेवः रायः धर्ता धरुणः वस्वः अग्निः॥१॥ ऋतेन ऋतं धरुणं धारयंत यज्ञस्य शाके परमे विऽओमन् दिवः धर्मन् धरुणे सेदुषः नॄन् जातैः अजातान् अभि ये ननक्षुः॥२॥ अंहःऽयुवः तन्वः तन्वते वि वयः महत् दुस्तरं पूर्व्याय सः सऽवतः नवऽजातः तुतु-

र्यात् सिंहं न क्रुद्धं अभितः परि ष्युः॥३॥ माताऽईव यत् भरसे प्र-
प्रथानः जनंऽजनं धायसे चक्षसे च वयःऽवयः जरसे यत् दधानः
परित्मना विषुऽरूपः जिगासि॥४॥ वाजः नु ते शवसः पातु अंतं
उरु दोधं धरुणं देव रायः पदं न तायुः गुहा दधानः महः राये चि-
तयन् अचिं अस्यः॰ ॥ ५ ॥ ७ ॥

॥१६॥ बृहत् वयः हि भानवे अर्चं देवाय अग्नये यं मित्रं न प्र-
शस्तिऽभिः मतासः दधिरे पुरः॥१॥ सः हि द्युऽभिः जनानां होता
दक्षस्य बाह्वोः वि हव्यं अग्निः आनुषक् भगः न वारं ऋण्वति॥२॥
अस्य स्तोमे मघोनः सख्ये वृङ्ऽशोचिषः विश्वा यस्मिन् तुवि-
ऽस्वनि संअर्ये पुष्मं आऽदधुः॥३॥ अध हि अग्ने एषां सुऽवीर्यस्य
मंहना तं इत् यह्वं न रोदसी परि श्रवः बभूवतुः॥४॥ नु नः आ इहि
वार्यं अग्ने गृणानः आ भर ये वयं ये च सूरयः स्वस्ति धामहि सचा
उत एधि पृतऽसु नः वृधे ॥ ५ ॥ ८ ॥

॥१७॥ आ यज्ञैः देव मर्त्यैः इत्था तव्यांसं ऊतये अग्निं कृते सु-
ऽअध्वरे पूरुः ईळीत अवसे॥१॥ अस्य हि स्वयंशःऽतरः आसा
विऽधर्मन् मन्यसे तं नाकं चिचऽशोचिषं मंद्रं परः मनीषया॥२॥
अस्य वै असौ ऊं अर्चिषा यः अयुक्त तुजा गिरा दिवः न यस्य रे-
तसा बृहत् शोचंति अर्चयः॥३॥ अस्य क्रत्वा विऽचेतसः दस्मस्य
वसु रथे आ अध विश्वासु हव्यः अग्निः विक्षु प्र शस्यते॥४॥ नु नः
इत् हि वार्यं आसा सचंत सूरयः ऊर्जः नपात् अभिष्टये पाहि श-
ग्धि स्वस्तये उत एधि पृतऽसु नः वृधे ॥ ५ ॥ ९ ॥

॥१८॥ प्रातः अग्निः पुरुऽप्रियः विशः स्तवेत अतिथिः विश्वा-

नि यः अमर्त्यः हव्या मर्तेषु रण्यति ॥१॥ द्विताय मृक्षऽवाहसे स्वस्य दक्षस्य मंहना इंदुः सः धत्ते आनुषक् स्तोता चित् ते अमर्त्य ॥२॥ तं वः दीर्घायुऽशोचिषं गिरा हुवे मघोनां अरिष्टः येषां रथः विअश्वऽदावन् ईयते॥३॥ चित्रा वा येषु दीधितिः आसन् उक्था पांति ये स्तीर्णं बर्हिः स्वःऽनरे अवांसि दधिरे परि॥४॥ ये मे पंचाशतं ददुः अश्वानां सधऽस्तुति द्युऽमत् अग्ने महि अवः बृहत् कृधि मघोनां नृऽवत् अमृत नृणां ॥५॥ १०॥

॥१९॥ अभि अवऽस्याः प्र जायंते प्र वव्रेः वव्रिः चिकेत उपऽस्थे मातुः वि चष्टे ॥१॥ जुहूरे वि चितयंतः अनिंऽमिषं नृम्णं पांति आ द्रुह्यां पुरं विविष्णुः॥२॥ आ श्वैचेयस्य जंतवः द्युऽमत् वधंत कृष्टयः निष्कऽग्रीवः बृहतऽउक्थः एना मध्वा न वाजऽयुः॥३॥ प्रियं दुग्धं न काम्यं अजामि जाम्योः सचा घर्मः न वाजंऽजठरः अदब्धः शश्वतः दभः॥४॥ क्रीळं न नः रश्मे आ भुवः संभसंना वायुना वेविदानः ताः अस्य सन् धृषजः न तिग्माः सुऽसंशिताः वक्ष्यः वक्षणेऽस्थाः ॥५॥ ११॥

॥२०॥ यं अग्ने वाजऽसातमं त्वं चित् मन्यसे रयिं तं नः गीःऽभिः श्रवाय्यं देवऽत्रा पनय युजं॥१॥ ये अग्ने न ईरयंति ते वृद्धाः उग्रस्य शवसः अप द्वेषः अप ह्वरः अन्यऽव्रतस्य सश्चिरे॥२॥ होतारं त्वा वृणीमहे अग्ने दक्षस्य साधनं यज्ञेषु पूर्व्य गिरा प्रयस्वंतः हवामहे॥३॥ इत्था यथा ते ऊतये सहसाऽवन् दिवेऽदिवे राये कृतायं सुऽक्रतो॰ गोभिः स्याम सधऽमादः वीरैः स्याम सधऽमादः ॥४॥ १२॥

॥२१॥ मनुष्वत् त्वा नि धीमहि मनुष्वत् सं इधीमहि अग्ने मनुष्वत् अंगिरः देवान् देवऽयते यज ॥१॥ त्वं हि मानुषे जने अग्ने सुऽप्रीतः इध्यसे सुचः त्वा यंति आनुषक् सुऽजात सर्पिःऽआसुते ॥२॥ त्वां विश्वे सऽजोषसः देवासः दूतं अक्रत सपर्यंतः त्वा कवे यज्ञेषु देवं ईळते ॥३॥ देवं वः देवऽयज्यया अग्निं ईळीत मर्त्यः संऽइंधः शुक्र दीदिहि ऋतस्य योनिं आ असदः ससस्य योनिं आ असदः ॥ ४ ॥ १३ ॥

॥२२॥ प्र विश्वऽसामन् अचिऽवत् अर्चे पावकऽशोचिषे यः अध्वरेषु ईड्यः होता मंद्रऽतमः विशि ॥१॥ नि अग्निं जातऽवेदसं दधात देवं ऋत्विजं प्र यज्ञः एतु आनुषक् अद्य देवव्यचःऽतमः ॥२॥ चिकित्वतऽमनसं त्वा देवं मर्तासः ऊतये वरेण्यस्य ते अवसः इयानासः अमन्महि ॥३॥ अग्ने चिकिद्धि अस्य नः इदं वचः सहस्य तं त्वा सुऽशिप्र ईंऽपते स्तोमैः वर्धंति अर्चयः गीःऽभिः शुंभंति अर्चयः ॥ ४ ॥ १४ ॥

॥२३॥ अग्ने सहंतं आ भर द्युम्नस्य प्रऽसहा रयिं विश्वाः यः चर्षणीः अभि आसा वाजेषु सस्हत ॥१॥ तं अग्ने पृतनाऽसहं रयिं सहस्वः आ भर त्वं हि सत्यः अद्भुतः दाता वाजस्य गोऽमतः ॥२॥ विश्वे हि त्वा सऽजोषसः जनासः वृक्तऽबर्हिषः होतारं सद्मऽसु प्रियं व्यंति वार्यं पुरु ॥३॥ सः हि स्म विश्वऽचर्षणिः अभिऽमाति सहः दधे अग्ने एषु क्षयेषु आ रेवत् नः शुक्र दीदिहि द्युऽमत् पावक दीदिहि ॥ ४ ॥ १५ ॥

॥२४॥ अग्ने त्वं नः अंतमः उत त्राता शिवः भव वरूथ्यः वसुः

अग्निः वसुऽश्रवाः अच्छ नक्षि द्युमत्ऽतमं रयिं दाः॥१॥२॥ सः नः बोधि श्रुधि हवं उरुष्य नः अघऽयतः समस्मात् तं त्वा शोचिष्ठ दीदिऽवः सुम्नाय नूनं ईमहे सखिऽभ्यः ॥ ३ ॥ ४ ॥ १६ ॥

॥२५॥ अच्छ वः अग्निं अवसे देवं गासि सः नः वसुः रासत् पुचः ऋषूणां ऋतऽवा पर्षति द्विषः॥१॥ सः हि सत्यः यं पूर्वे चित् देवासः चित् यं ईधिरे होतारं मंद्रऽजिह्वं इत् सुदीतिऽभिः विभाऽवसुं ॥२॥ सः नः धीती वरिष्ठया श्रेष्ठया च सुऽमत्या अग्ने रायः दिदीहि नः सुवृक्तिऽभिः वरेण्य ॥३॥ अग्निः देवेषु राजति अग्निः मर्तेषु आऽविशन् अग्निः नः हव्यऽवाहनः अग्निं धीभिः सपर्यत ॥४॥ अग्निः तुविश्रवःऽतमं तुविऽब्रह्माणं उतऽतमं अतूर्तं श्रवयतऽपतिं पुचं ददाति दाशुषे॥५॥१७॥ अग्निः ददाति सतऽपतिं ससाह यः युधा नृऽभिः अग्निः अत्यं रघुऽस्यदं जेतारं अपराऽजितं॥६॥ यत् वाहिष्ठं तत् अग्नये बृहत् अर्च विभाऽवसो॰ महिषीऽइव त्वत् रयिः त्वत् वाजाः उत ईरते ॥७॥ तव द्युऽमंतः अर्चयः यावाऽइव उच्यते बृहत् उतो॰ ते तन्यतुः यथा स्वानः अर्त त्मना दिवः॥८॥ एव अग्निं वसुऽयवः सहसानं ववंदिम सः नः विश्वाः अति द्विषः पर्षत् नावाऽइव सुऽक्रतुः ॥ ९ ॥ १८ ॥

॥२६॥ अग्ने पावक रोचिषा मंद्रया देव जिह्वया आ देवान् वक्षि यक्षि च॥१॥ तं त्वा घृतऽस्नो॰ ईमहे चिचऽभानो॰ स्वःऽदृशं देवान् आ वीतये वह॥२॥ वीतिऽहोत्रं त्वा कवे द्युऽमंतं सं ईधीमहि अग्ने बृहंतं अध्वरे॥३॥ अग्ने विश्वेभिः आ गहि देवेभिः हव्यऽदातये होतारं त्वा वृणीमहे ॥४॥ यजमानाय सुन्वते आ अग्ने

सुऽवीर्यं वह देवैः आ सत्सि बर्हिषि ॥५॥१९॥ संऽइध्यानः सहस्र-ऽजित् अग्ने धर्माणि पुष्यसि देवानां दूतः उक्थ्यः ॥६॥ नि अग्निं जातऽवेदसं होचऽवाहं यविष्ठ्यं दधात देवं ऋत्विजं ॥७॥ प्र यज्ञः एतु आनुषक् अद्य देवव्यचःऽतमः स्तृणीत बर्हिः आऽसदे ॥८॥ आ इदं मरुतः अश्विना मिचः सीदंतु वरुणः देवासः सवया विशा ॥ ९ ॥ २० ॥

॥२७॥ अनस्वंता सतऽपतिः ममहे मे गावा चेतिष्ठः असुरः मघोनः चैवृष्णः अग्ने दशऽभिः सहस्रैः वैश्वानर चिऽअरुणः चिकेत ॥१॥ यः मे शता च विंशतिं च गोनां हरी च युक्ता सुऽधुरा ददाति वैश्वानर सुऽस्तुतः ववृधानः अग्ने यच्छ चिऽअरुणाय शर्म ॥२॥ एव ते अग्ने सुऽमतिं चकानः नविष्ठाय नवमं चसदस्युः यः मे गिरः तुविऽजातस्य पूर्वीः युक्तेन अभि चिऽअरुणः गृणाति ॥३॥ यः मे इति प्रऽवोचति अश्वऽमेधाय सूरये ददत् ऋचा सनिं यते ददत् मेधां ऋतऽयते ॥४॥ यस्य मा परुषाः शतं उतऽहर्षयंति उक्षणः अश्वऽमेधस्य दानाः सोमाःऽइव चिऽआशिरः ॥५॥ इंद्राग्नी शतदाव्नि अश्वऽमेधे सुऽवीर्यं क्षत्रं धारयतं बृहत् दिवि सूर्यऽइव अजरं ॥ ६ ॥ २१ ॥

॥२८॥ संऽइद्धः अग्निः दिवि शोचिः अश्रेत् प्रत्यङ् उषसं उर्विया विभाति एति प्राचीं विश्वऽवारा नमःऽभिः देवान ईळाना हविषा घृताचीं ॥१॥ संऽइध्यमानः अमृतस्य राजसि हविः कृण्वंतं सचसे स्वस्तये विश्वं सः धत्ते द्रविणं यं इन्वसि आतिथ्यं अग्ने नि च धत्ते इत् पुरः ॥२॥ अग्ने शर्धं महते सौभगाय तव द्युम्ना-

निं उतऽतमानिं संतु संजाःऽपत्यं मुऽयमँ आ कृणुष्व शचुऽयतां अभि तिष्ठ महाँसि॥३॥ संऽइद्धस्य प्रऽमहसः अग्ने वंदे तवं श्रियं वृषभः द्युम्नऽवान असिसं अध्वरेषुं इध्यसे॥४॥ संऽइद्धः अग्ने आ-ऽहुत देवान यक्षिसुऽअध्वरत्वं हि हव्यऽवाट् असि॥५॥ आ जुहोत दुवस्यत अग्निं प्रऽयति अध्वरे वृणीध्वं हव्यऽवाहनं ॥६॥२२॥

॥२९॥ ची अर्यमा मनुषः देवऽतांता ची रोचना दिव्या धारयंत अचैति त्वा मरुतः पूतऽदक्षाः त्वं एषां ऋषिः इंद्र असि धीरः॥१॥ अनु यत ईं मरुतः मंदसानं आचैन इंद्रं पपिऽवांसं सुतस्य आ अदत्त वज्रं अभि यत अहिं हन अपः यह्वीः असृजत सर्तवे ऊं ॥२॥ उत ब्रह्माणः मरुतः मे अस्य इंद्रः सोमस्य सुऽसुतस्य पेयाः तत हि हव्यं मनुषे गाः अविंदत अहन अहिं पपिऽवान इंद्रः अस्य ॥३॥ आत रोदसी विऽतरं वि स्कभायत संऽविव्यानः चित भियसे मृगं कः॰ जिगर्ति इंद्रः अपऽजगुरिणः प्रति श्वसंतं अव दानवं हन्॰॥४॥ अध क्रत्वा मघऽवन तुभ्यं देवाः अनु विश्वे अददुः सोमऽपेयं यत सूर्यस्य हरितः पतंतीः पुरः सतीः उपराः एतशे कः॰ ॥५॥२३॥ नव यत अस्य नवतिं च भोगान साकं वज्रेण मघऽवा विऽवृश्चत अचैति इंद्रं मरुतः सधऽस्थे चैस्तुभेन वचसा बाधत द्यां॥६॥ सखा सख्ये अपचत तूयं अग्निः अस्य क्रत्वा महिषा ची शतानि ची साकं इंद्रः मनुषः सरांसि सुतं पिबत वृचऽहत्याय सोमं॥७॥ ची यत शता महिषाणां अघः माः ची सरांसि मघऽवा सोम्या अपाः कारं न विश्वे अह्वंत देवाः भरं इंद्राय यत अहिं जघानं॥८॥ उशना यत सहस्यैः अयातं गृहं इंद्र जूजुवानेभिः अश्वैः वन्वानः अत्र सऽरथं ययाथ कुत्सेन देवैः अवनोः ह शुष्णं

॥९॥ प्र अन्यत् चक्रं अवृहः सूर्यस्य कुत्साय अन्यत् वरिवः यातवे अकः० अनासः दस्यून् अमृणः वधेन नि दुर्योणे अवृणक् मृध-ऽवाचः ॥१०॥२४॥ स्तोमासः त्वा गौरिऽवीतेः अवर्धन् अरंधयः वैदथिनाय पिप्रुं आ त्वां ऋजिश्वा सख्याय चक्रे पचन् पक्तीः अपिबः सोमं अस्य ॥११॥ नवऽग्वासः सुतऽसोमासः इंद्रं दश-ऽग्वासः अभि अर्चति अर्कैः गव्यं चित् ऊर्वं अपिधानऽवंतं तं चित् नरः शशमानाः अप व्रन् ॥१२॥ कथो नु ते परि चराणि विद्वान् वीर्या मघऽवन् या चकर्थ या चो नु नव्या कृणवः शविष्ठ प्र इत् ऊं ता ते विदर्थेषु ब्रवाम ॥१३॥ एता विश्वा चकृऽवान् इंद्र भूरि अपरिऽइतः जनुषा वीर्येण या चित् नु वज्रिन् कृणवः दधृष्वान् न ते वर्ता तविषाः अस्ति तस्याः ॥१४॥ इंद्र ब्रह्म क्रियमा-णा जुषस्व या ते शविष्ठ नव्याः अकर्म वस्त्राऽइव भद्रा मुऽकृता वसुऽयुः रथं न धीरः सुऽअपाः अतक्षं ॥ १५ ॥ २५ ॥

॥३०॥ कक्षस्यः वीरः कः अपश्यत् इंद्रं सुखऽरथं ईयमानं हरिऽभ्यां यः राया वज्री सुतऽसोमं इच्छन् तत् ओकः गंता पुरुऽहूतः ऊती ॥१॥ अव अचचक्षं पदं अस्य सस्वः उयं निऽधातुः अनु आयं इच्छन् अपृच्छं अन्यान् उत ते मे आहुः इंद्रं नरः बुबुधानाः अशेम ॥२॥ प्र नु वयं सुते या ते कृतानि इंद्रं ब्रवाम यानि नः जुजोषः वेदत् अविद्वान् शृणवत् च विद्वान् वहते अयं मघऽवा सर्वऽसेनः ॥३॥ स्थिरं मनः चकृषे जातः इंद्र वेषि इत् एकः युधये भूयसः चित् अश्मानं चित् शवसा दिद्युतः वि विदः गवां ऊर्वं उस्रियाणां ॥४॥ परः यत् त्वं परमः आऽजनिष्ठाः पराऽवति श्रुत्यं नाम बिभ्रत् अतः चित् इंद्रात् अभयंत देवाः विश्वाः अपः अजयत् दासऽपत्नीः

त्नीः॥५॥२६॥तुभ्यं इत एते मरुतः सुऽशेवाः अचैंति अर्कं सुन्वंति अंधः अहिं ओहानं अपः आऽशयानं प्र मायाभिः मायिनं सक्षत इंद्रः॥६॥ वि सु मृधः जनुषा दानं इन्वन् अहन् गवा मघऽवन् संऽचकानः अच दासस्य नमुचेः शिरः यत् अवर्तयः मनवे गातुं इच्छन्॥७॥ युजं हि मां अकृथाः आत इत इंद्र शिरः दासस्य नमुचेः मथायन् अश्मानं चित् स्वर्यं वर्तमानं प्र चक्रियाऽइव रोदसी मरुतऽभ्यः॥८॥ स्त्रियः हि दासः आयुधानि चक्रे किं मा करन् अबलाः अस्य सेनाः अंतः हि अख्यत् उभे अस्य धेने अथ उप प्र ऐत् युधये दस्युं इंद्रः॥९॥ सं अच गावः अभितः अनवंत इहऽइह वत्सैः विऽयुताः यत् आसन् सं ताः इंद्रः असृजत् अस्य शाकैः यत् ईं सोमासः सुऽसुताः अमंदन्॥१०॥२७॥ यत् ईं सोमाः बभ्रुऽधूताः अमंदन् अरोरवीत् वृषभः सदनेषु पुरंऽदरः पपिऽवान् इंद्रः अस्य पुनः गवां अदात् उस्रियाणां॥११॥ भद्रं इदं रुशमाः अग्ने अक्रन् गवां चत्वारि ददतः सहस्रा ऋणंऽचयस्य प्रऽयता मघानि प्रति अयभीष्म नृऽतमस्य नृणां॥१२॥ सुऽपेशसं मा अव सृजंति अस्तं गवां सहस्रैः रुशमासः अग्ने तीव्राः इंद्रं अममंदुः सुतासः अक्तोः विऽउष्टौ परिऽतक्म्यायाः॥१३॥ औच्छत् सा रात्री परिऽतक्म्या या ऋणंऽचये राजनि रुशमानां अत्यः न वाजी रघुः अज्यमानः बभ्रुः चत्वारि असनत् सहस्रा॥१४॥ चतुःऽसहस्रं गव्यस्य पश्वः प्रति अयभीष्म रुशमेषु अग्ने घर्मः चित् तप्तः प्रऽवृजे यः आसीत् अयस्मयः तं ऊं आदाम विप्राः॥१५॥२८॥

॥३१॥ इंद्रः रथाय प्रऽवतं कृणोति यं अधिऽअस्थात् मघऽवा

वाजऽयंतं यूथाऽइव पश्वः वि उनोति गोपाः अरिष्टः याति प्रथमः सिसासन्॥१॥ आ प्र द्रव हरिऽवः मा वि वेनः पिशंगऽराते अभिनः सचस्व नहित्वत इंद्र वस्यः अन्यत् अस्ति अमेनान् चित् जनिऽवतः चकर्थ॥२॥ उत् यत् सहः सहसः आ अजनिष्ट देदिष्टे इंद्रः इंद्रियाणि विश्वा प्र अचोदयत् सुऽदुघाः ववे अंतः वि ज्योतिषा संऽववृत्वत् तमः अवः०॥३॥ अनवः ते रथं अश्वाय तक्षन् त्वष्टा वज्रं पुरुऽहूत द्युऽमंतं ब्रह्माणः इंद्र महयंतः अर्कैः अवर्धयन् अहये हंतवे ऊं॥४॥ वृष्णे यत् ते वृषणः अर्क अर्चान् इंद्र यावाणः अदितिः सऽजोषाः अनश्वासः ये पवयः अरथाः इंद्रऽइषिताः अभि अवर्तंत दस्यून्॥५॥२९॥ प्र ते पूर्वाणि करणानि वोचं प्र नूतना मघऽवन् या चकर्थ शक्तिऽवः यत् विऽभराः रोदसी उभे जयन् अपः मनवे दानुऽचिचाः॥६॥ तत् इत् नु ते करणं दस्म विप्र अहिं यत् घ्नन् ओजः अचं अमिमीथाः शुष्णस्य चित् परिमायाः अगृभ्णाः प्रऽपित्वं यन् अप दस्यून् असेधः॥७॥ त्वं अपः यदवे तुर्वशाय अरमयः सुऽदुघाः पारः इंद्र उग्र अयातं अवहः ह कुत्सं संह यत् वां उशना अरंत देवाः॥८॥ इंद्राकुत्सा वहमाना रथेन आ वां अत्याः अपि कर्णे वहंतु निः सी अतऽभ्यः धमथः निः सधऽस्थात् मघोनः हृदः वरुथः तमांसि॥९॥ वातस्य युक्तान् सुऽयुजः चित् अश्वान् कविः चित् एषः अजगन् अवस्युः विश्वे ते अत्र मरुतः सखायः इंद्र ब्रह्माणि तविषी अवर्धन्॥१०॥३०॥ सूरः चित् रथं परिऽतक्म्यायां पूर्वं करत् उपरं जूजुऽवांसं भरत् चक्रं एतशः सं रिणाति पुरः दधत् सनिष्यति क्रतुं नः॥११॥ आ अयं जनाः अभिऽचक्षे जगाम इंद्रः सखायं सुतऽसोमं इच्छन् वदन् यावा अवेदिं भियाते यस्य जीरं अध्वर्यवः चरंति॥१२॥ ये चाकनंत चा-

कनँत नु ते मतीः अमृत मो ते अंहः आ अरन् ववंधि यज्यून् उत
तेषु धेहि ओजः जनेषु येषु ते स्याम ॥ १३ ॥ ३१ ॥

॥३२॥ अर्दः उत्सं असृजः वि खानि त्वं अर्णवान् बद्बधानान्
अरम्णाः महांतं इंद्र पर्वतं वि यत् वः सृजः वि धाराः अव दानवं
हन० ॥ १ ॥ त्वं उत्सान् ऋतुऽभिः बद्बधानान् अरँहः ऊधः पर्वतस्य
वज्रिन् अहिं चित् उप्र प्रऽयुतं शयानं जघन्वान् इंद्र तविषी अ-
धत्थाः ॥ २ ॥ त्यस्य चित् महतः निः मृगस्य वधः जघान तविषीभिः
इंद्रः यः एकः इत् अप्रतिः मन्यमानः आत् अस्मात् अन्यः अज-
निष्ट तव्यान् ॥ ३ ॥ त्यं चित् एषां स्वधया मदंतं मिहः नपातं सुऽवृधं
तमः ऽगां वृषऽप्रभर्मा दानवस्य भामं वज्रेण वज्री नि जघान शुष्णं ॥ ४ ॥ त्यं चित् अस्य क्रतुऽभिः निऽसत्तं अमर्मणः विदत् इत् अस्य
मर्मं यत् ईं सुऽक्षत प्रऽभृता मदस्य युयुत्संतं तमसि हर्म्ये धाः ॥ ५ ॥
त्यं चित् इत्था कत्पयं शयानं असूर्ये तमसि ववृधानं तं चित् मं-
दानः वृषभः सुतस्य उच्चैः इंद्रः अपऽगूर्यं जघान ॥ ६ ॥ ३२ ॥ उत यत्
इंद्रः महते दानवाय वधः यमिष्टे सहः अप्रतिऽइतं यत् ईं वज्रस्य
प्रऽभृतौ ददाभ विश्वस्य जंतोः अधमं चकार ॥ ७ ॥ त्यं चित् अर्णं
मधुऽपं शयानं असिन्वं वव्रं महि आदत् उग्रः अपादं अचं महता
वधेन नि दुर्योणे अवृणक् मृधऽवाचं ॥ ८ ॥ कः अस्य शुष्मं तविषी
वराते एकः धना भरते अप्रतिऽइतः इमे चित् अस्य जयसः नु
देवी इंद्रस्य ओजसः भियसा जिहाते ॥ ९ ॥ नि अस्मै देवी स्व-
धितिः जिहीते इंद्राय गातुः उशतीऽइव येमे सं यत् ओजः युवते
विश्वं आभिः अनु स्वधाऽवे क्षितयः नमंत ॥ १० ॥ एकं नु त्वा सत-
ऽपतिं पांचऽजन्यं जातं शृणोमि यशसं जनेषु तं मे जगृभ्रे आ-

ऽशंसःनविष्ठं दोषा वस्तोःहवमानासःइंद्रं॥११॥एव हि त्वां ऋतुऽथा यातयंतं मघा विप्रेभ्यःददतं शृणोमि किं ते ब्रह्माणःगृहते सखायः ये त्वाऽया निऽदधुः कामं इंद्र ॥१२॥३३॥१॥२॥

॥३३॥महिं महे तवसे दीध्ये नृन इंद्राय इत्था तवसे अतव्यान् यःअस्मै सुऽमतिं वाजऽसातौ स्तुतःजनेसऽमर्यःचिकेत॥१॥सः त्वं नःइंद्र धियसानःअर्कैः हरीणां वृषन् योक्त्रे अष्टेः याः इत्था मघऽवन् अनु जोषं वक्षःअभि प्र अर्यःसक्षि जनान॥२॥न ते ते इंद्र अभि अस्मत् ऋष्व अयुक्तासःअब्रह्मता यत् असन् तिष्ठ रथं अधि तं वज्रऽहस्त आ रश्मिं देव यमसे सुऽअश्वः॥३॥पुरु यत् ते इंद्र संति उक्था गवे चकर्थ उर्वरासु युध्यन् ततक्षे सूर्याय चित् ओकःसि स्वे वृषा समतऽसु दासस्य नाम चित्॥४॥वयं ते ते इंद्र ये च नरःशधैःजज्ञानाः याताः च रथाः आ अस्मान् जगम्यात् अहिऽशुष्म सत्वा भगःन हव्यःप्रऽभृथेषु चारुः॥५॥१॥पपृक्षेण्यं इंद्र त्वे हि ओजः नृम्णानि च नृतमानः अमर्तः सः नःएनीं वसवानः रयिं दाः प्र अर्यः स्तुषे तुविऽमघस्य दानं॥६॥एव नःइंद्र ऊतिऽभिः अव पाहि गृणतः पूर कारून् उत त्वचं ददतः वाजऽसातौ पिप्रीहि मध्वः सुऽसुतस्य चारोः॥७॥उत त्ये मा पौरुऽकुत्स्यस्य सूरेः चसदस्योः हिरण्यैनः रराणाः वहंतु मा दश श्येतासः अस्य गौरिऽक्षितस्य ऋतुऽभिःनु सश्चे॥८॥उत त्ये मा मारुतऽअश्वस्य शोणाः ऋत्वाऽमघासः विदथस्य रातौ सहस्रा मे चयवतानःददानःआनूकं अर्यः वपुषे न आर्चत्॥९॥उत त्ये मा ध्वन्यस्य जुष्टाःलक्ष्मण्यस्य सुऽरुचः यतानाःमहा रायःसंऽवरणस्य ऋषेः व्रजं न गावः प्रऽयंताः अपि ग्मन्॥१०॥२॥

॥३४॥ अजातऽशत्रुं अजरा स्वःऽवती अनु स्वधा अमिता दस्मं ईयते सुनोतन पचत ब्रह्मऽवाहसे पुरुऽस्तुतायं प्रऽतरं दधातन ॥१॥ आ यः सोमेन जठरं अपिप्रत अमंदत मघऽवा मध्वः अंधसः यत् ई मृगाय हंतवे महाऽवधः सहस्रऽभृष्टिं उशना वधं यमत्॥२॥ यः अस्मै घ्रंसे उत वा यः ऊधनि सोमं सुनोति भवति द्युऽमान् अह अपऽअप शक्रः ततनुष्टिं ऊहति तनूऽपुधं मघऽवा यः कवऽसखः॥३॥ यस्य अवधीत् पितरं यस्य मातरं यस्य शक्रः भ्रातरं न अतः ईषते वेति इत् ऊं अस्य प्रऽयता यतंऽकरः न किल्बिषात् ईषते वस्वः आऽकरः॥४॥ न पंचऽभिः दशऽभिः वष्टि आऽरभे न असुन्वता सचते पुष्यता चन जिनाति वा इत् अमुया हंति वा धुनिः आ देवऽयुं भजति गोऽमति व्रजे॥५॥३॥ विऽत्वक्षणः संऽऋतौ चक्रंऽआसजः असुन्वतः विषुणः सुन्वतः वृधः इंद्रः विश्वस्य दमिता विऽभीषणः यथाऽवशं नयति दासं आर्यः ॥६॥ सं ई पणेः अजति भोजनं मुषे वि दाशुषे भजति सूनरं वसु दुःऽगे चन ध्रियते विश्वः आ पुरुजनः यः अस्य तविषी अचुक्रुधत् ॥७॥ सं यत् जनौ सुऽधनौ विश्वऽशर्धसौ अवेत् इंद्रः मघऽवा गोषु शुभ्रिषु युजे हि अन्यं अकृत प्रऽवेपनी उत ई गव्यं सृजते सत्वऽभिः धुनिः॥८॥ सहस्रऽसां आमिऽवेशिं गृणीषे शचिं अग्ने उपऽमां केतुं अर्यः तस्मै आपः संऽयतः पीपयंत तस्मिन् क्षत्रं अमऽवत् त्वेषं अस्तु ॥९॥४॥

॥३५॥ यः ते साधिष्ठः अवसे इंद्र ऋतुः तं आ भर अस्मभ्यं चर्षणिऽसहं सत्रा वाजेषु दुस्तरं॥१॥ यत् इंद्र ते चतसः यत् शूर संति तिस्रः यत् वा पंच क्षितीनां अवः तत् सुनः आ भर॥२॥ आ ते अवः

वरेण्यं वृषन्ऽतमस्य हूमहे वृषऽजूतिः हि जज्ञिषे आऽभूभिः इंद्र तुर्वणिः॥३॥ वृषा हि असि राधसे जज्ञिषे वृष्णि ते शवः स्वऽक्षं ते धृषत् मनः सचाऽहं इंद्र पौंस्यं॥४॥ त्वं तं इंद्र मर्त्यं अमित्रऽयंतं अद्रिऽवः सर्वऽरथा शतऽक्रतो॰ नि याहि शवसः पते॥५॥५॥ त्वां इत् वृत्रहन्ऽतम जनासः वृक्तऽबर्हिषः उग्रं पूर्वीषु पूर्व्य हवंते वाजंऽसातये॥६॥ अस्माकं इंद्र दुस्तरं पुरःऽयावानं आजिषु सऽयावानं धनेऽधने वाजऽयंतं अव रथं॥७॥ अस्माकं इंद्र आ इहि नः रथं अव पुरंऽध्या वयं शविष्ठ वार्यं दिवि श्रवः दधीमहि दिवि स्तोमं मनामहे॥८॥६॥

॥३६॥ सः आ गमत् इंद्रः यः वसूनां चिकेतत् दातुं दामनः रयीणां धन्वऽचरः न वंसगः तृषाणः चकमानः पिबतु दुग्धं अंशुं॥१॥ आ ते हनूं हरिऽवः शूर शिप्रे रुहत् सोमः न पर्वतस्य पृष्ठे अनु त्वा राजन् अवैतः न हिन्वन् गीःऽभिः मदेम पुरुऽहूत विश्वे॥२॥ चक्रं न वृत्तं पुरुऽहूत वेपते मनः भिया मे अमतेः इत् अद्रिऽवः रथात् अधि त्वा जरिता सदाऽवृध कुवित् नु स्तोषत् मघऽवन् पुरुऽवसुः॥३॥ एषः यावाऽइव जरिता ते इंद्र इयर्ति वाचं बृहत् आप्नुषाणः प्र सव्येन मघऽवन् यंसि रायः प्र दक्षिणित् हरिऽवः मा वि वेनः॥४॥ वृषा त्वा वृषणं वर्धतु द्यौः वृषा वृषऽभ्यां वहसे हरिऽभ्यां सः नः वृषा वृषऽरथः सुऽशिप्र वृषऽक्रतो॰ वृषा वजिन् भरे धाः॥५॥ यः रोहितौ वाजिनौ वाजिनीऽवान् चिऽभिः शतैः सचमानौ अदिष्ट यूने सं अस्मै क्षितयः नमंतां ध्रुतऽरथाय मरुतः दुवःऽया॥६॥७॥

॥३७॥ सं भानुना यतते सूर्यस्य आऽजुह्वानः घृतऽपृष्ठः सुऽअं-

चाः तस्मै अमृध्राः उषसः वि उच्छान् यः इंद्राय सुनवाम इति आह ॥१॥ समिद्धऽअग्निः वनवत् स्तीर्णऽबर्हिः युक्तऽग्रावा सुत-ऽसोमः जराते यावाणः यस्य इषिरं वदंति अयत् अध्वर्युः हविषा अव सिंधुं ॥२॥ वधूः इयं पतिं इच्छंती एति यः ईं वहाते महिषी इषिरा आ अस्य श्रवस्यात् रथः आ च घोषात् पुरु सहस्रा परि वर्तयाते ॥३॥ न सः राजा व्यथते यस्मिन् इंद्रः तीव्रं सोमं पिबति गोऽसखायं आ सत्वनिः अजति हंति वृचं क्षेति क्षितीः सुऽभगः नाम पुष्यन् ॥४॥ पुष्यात् क्षेमे अभियोगे भवाति उभे वृतौ संऽयती॰ सं जयाति प्रियः सूर्ये प्रियः अग्ना भवाति यः इंद्राय सुत-ऽसोमः ददाशत् ॥ ५ ॥ ८ ॥

॥३८॥ उरोः ते इंद्र राधसः विऽभ्वी रातिः शतऽक्रतो॰ अध नः विश्वऽचर्षणे द्युक्षा सुऽक्षत्र मंहय ॥१॥ यत् ईं इंद्र श्रवाय्यं इषं शविष्ठ दधिषे प्रऽथे दीर्घश्रुत्ऽतमं हिरण्यऽवर्णं दुस्तरं ॥२॥ सुष्मासः ये ते अद्रिऽवः महना केतुऽसापः उभा देवी अभिष्टये दिवः चग्मः च राजथः ॥३॥ उतो नः अस्य कस्य चित् दक्षस्य तव वृचऽहन् अस्मभ्यं नृम्णं आ भर अस्मभ्यं नृऽमनस्यसे ॥४॥ नु ते आभिः अभिष्टिऽभिः तव शर्मन् शतऽक्रतो॰ इंद्र स्याम सुऽगोपाः शूर स्याम सुऽगोपाः ॥ ५ ॥ ९ ॥

॥३९॥ यत् इंद्र चित्र महना अस्ति त्वाऽदातं अद्रिऽवः राधः तत् नः विदत्ऽवसो॰ उभयाहस्त्या भर ॥१॥ यत् मन्यसे वरेण्यं इंद्र द्युक्षं तत् आ भर विद्याम तस्य ते वयं अकूपारस्य दावने ॥२॥ यत् ते दित्सु प्रऽराध्यं मनः अस्ति श्रुतं बृहत् तेन दृळ्हा चित् अद्रिऽवः

आ वाजं दर्षि सातये ॥३॥ मंहिष्ठं वः मघोनां राजानं चर्षणीनां इंद्रं उप प्रऽशस्तये पूर्वीभिः जुजुषे गिरः ॥४॥ अस्मै इत् काव्यं वचः उक्थं इंद्राय शंस्यं तस्मै ऊं ब्रह्मऽवाहसे गिरः वर्धंति अचयः गिरः पुंभंति अचयः ॥ ५ ॥ १० ॥

॥४०॥ आ याहि अद्रिंऽभिः सुतं सोमं सोमऽपते पिब वृषन् इंद्र वृषंऽभिः वृचहन्ऽतम ॥१॥ वृषा यावा वृषा मदः वृषा सोमः अयं सुतः वृषन् इंद्र वृषंऽभिः वृचहन्ऽतम ॥२॥ वृषा त्वा वृषणं हुवे वज्रिन् चित्राभिः ऊतिऽभिः वृषन इंद्र वृषंऽभिः वृचहन्ऽतम ॥३॥ ऋजीषी वज्री वृषभः तुराषाट् शुष्मी राजा वृचऽहा सोमऽपावा युक्ता हरिऽभ्यां उप यासत् अर्वाङ् माध्यंदिने सवने मत्सत् इंद्रः ॥४॥ यत् त्वा सूर्ये स्वःऽभानुः तमसा अविध्यत् आसुरः अक्षेचऽवित् यथा मुग्धः भुवनानि अदीधयुः ॥५॥ ११ ॥ स्वःऽभानोः अध यत् इंद्र मायाः अवः दिवः वर्तमानाः अवऽअहन् गूळ्हं सूर्यं तमसा अपऽव्रतेन तुरीयेण ब्रह्मणा अविंदत् अत्रिः ॥६॥ मा मां इमं तव संतं अत्रे इरस्या दुग्धः भियसा नि गारीत् त्वं मित्रः असि सत्यऽराधाः तौ मा इह अवतं वरुणः च राजा ॥७॥ याव्णः ब्रह्मा युयुजानः सपर्यन् कीरिणा देवान् नमसा उपऽशिक्षन् अत्रिः सूर्यस्य दिवि चक्षुः आ अधात् स्वःऽभानोः अप मायाः अघुक्षत् ॥८॥ यं वै सूर्यं स्वःऽभानुः तमसा अविध्यत् आसुरः अत्रयः तं अनु अविंदन् नहि अन्ये अशक्नुवन् ॥ ९ ॥ १२ ॥

॥४१॥ कः नु वां मित्रावरुणौ ऋतऽयन दिवः वा महः पार्थि-

वस्य वा दे ऋतस्य वा सदसि चासीयां नः यज्ञऽयते वा पशुऽसः न वाजान्॥१॥ ते नः मित्रः वरुणः अर्यमा आयुः इंद्रः ऋभुक्षाः मरुतः जुषंत नमःऽभिः वा ये दधते सुऽवृक्तिं स्तोमं रुद्राय मीळ्हुषे सऽजोषाः॥२॥आ वां येष्ठा अश्विना हुवध्यै वातस्य पत्मन रथ्यस्य पुष्टौ उत वा दिवः असुराय मन्म प्र अंधांसिऽइव यज्यवे भरध्वं ॥३॥ प्र सक्षणः दिव्यः कण्वऽहोता चितः दिवःसऽजोषाः वातः अग्निः पूषा भगः प्रऽभृथे विश्वऽभोजाः आजिं न जग्मुः आशुऽशत्मा ऽतमाः॥४॥ प्र वः रयिं युक्तऽअश्वं भरध्वं रायः एषे अवसे दधीत धीः सुऽशेवः एवैः औशिजस्य होता ये वः एवाः मरुतः तुराणां ॥५॥१३॥ प्र वः वायुं रथऽयुजं कृणुध्वं प्र देवं विप्रं पनितारं अर्कैः इषुध्यवः ऋतऽसापः पुरंऽधीः वस्वीः नः अच पत्नीः आ धिये धुः॰ ॥६॥ उप वः एषे वंद्येभिः शूषैः प्र यह्वी दिवः चितयंतऽभिः अर्कैः उषसानक्ता विदुषीऽइव॰ विश्वं आ ह वहतः मर्त्याय यज्ञं ॥७॥ अभि वः अर्चे पोथाऽवंतः नृन वास्तोः पतिं त्वष्टारं रराणः धन्या सऽजोषाः धिषणा नमःऽभिः वनस्पतीन ओषधीः रायः एषे ॥८॥ तुजे नः तने पर्वताः संतु स्वऽएतवः ये वसवः न वीराः पनितः आप्यः यजतः सदा नः वर्धंत नः शंसं नयेः अभिष्टौ॥९॥ वृष्णः अस्तोषि भूम्यस्य गर्भं चितः नपातं अपां सुऽवृक्ति गृणीते अग्निः एतरि न शूषैः शोचिःऽकेशः नि रिणाति वना॥१०॥१४॥ कया महे रुद्रियाय ब्रवाम कत राये चिकितुषे भगाय आपः ओषधीः उत नः अवंतु द्यौः वना गिरयः वृक्षऽकेशाः॥११॥ शृणोतु नः ऊर्जी पतिः गिरः सः नभः तरीयान इषिरः परिऽज्मा शृण्वंतु आपः पुरः न शुभ्राः परि सुचः बबृहाणस्य अद्रेः॥१२॥ विद चित नु महांतः ये वः एवाः ब्रवाम दस्माः वायं दधानाः वयः चन सुऽभ्वः

आ अवं यंतिं क्षुभा मतीं अनुऽयतं वधऽस्नैः॥१३॥ आ दैव्यानि पार्थिवानि जन्म अपः च अच्छ सुऽमखाय वोचं वर्धतां द्यावः गिरः चंद्रऽअयाः उदा वर्धतां अभिऽसांताः अर्णीः॥१४॥ पदेऽपदे मे जरिमा नि धायि वरूची वा शक्वा या पायुऽभिः च सिसक्तु माता मही एसा नः स्मत सूरिऽभिः चृजुऽहस्ता चृजुऽवनिः॥१५॥१५॥ कथा दाशेम नमसा सुऽदानून् एवऽया मरुतः अच्छऽउक्तौ प्रऽअवसः मरुतः अच्छऽउक्तौ मा नः अहिः बुध्यः रिषे धात अस्माकं भूत उपमातिऽवनिः॥१६॥ इति चित नु प्रऽजायै पशुऽमत्यै देवासः वनते मर्त्यः वः आ देवासः वनते मर्त्यः वः अच शिवां तन्वः धासिं अस्याः जरां चित मे निःऽचृतिः जयसीत ॥१७॥ तां वः देवाः सुऽमतिं ऊर्जयंती इषं अश्याम वसवः शसा गोः सा नः सुऽदानुः मृळयंती देवी प्रति द्रवंती सुविताय गम्याः ॥१८॥ अभि नः इळा यूथस्य माता स्मत नदीभिः उर्वशी वा गृणातु उर्वशी वा बृहतऽदिवा गृणाना अभिऽऊर्वाना प्रऽभृथस्य आयोः ॥१९॥ सिसक्तु नः ऊर्जव्यस्य पुष्टेः ॥ २० ॥ १६ ॥

॥४२॥ प्र शंऽतमा वरुणं दीधिती गीः मित्रं भगं अदितिं नूनं अश्याः पृषतऽयोनिः पंचऽहोता शृणोतु अतूर्तऽपंथाः असुरः मयःऽभुः॥१॥ प्रति मे स्तोमं अदितिः जगृभ्यात सूनुं न माता हृद्यं सुऽशेवं ब्रह्म प्रियं देवऽहितं यत् अस्ति अहं मित्रे वरुणे यत् मयःऽभु॥२॥ उत ईय कविऽतमं कवीनां उनत्त एनं अभि मध्वा घृतेन सः नः वसूनि प्रऽयता हितानि चंद्राणि देवः सविता सुवाति॥३॥ सं इंद्र नः मनसा नेषि गोभिः सं सूरिऽभिः हरिऽवः सं स्वस्ति सं ब्रह्मणा देवऽहितं यत् अस्ति सं देवानां सुऽमत्या य-

ज्रियानां ॥४॥ देवः भगः सविता रायः अंशः इंद्रः वृचस्य संऽजितः धनानां ऋभुक्षाः वाजः उत वा पुरंऽधिः अवंतु नः अमृतासः तुरासः ॥५॥१७॥ मरुत्वंतः अप्रतिऽइतस्य जिष्णोः अजूर्यतः प्र ब्रवाम कृतानि न ते पूर्वे मघऽवन् न अपरासः न वीर्यं नूतनः कः चन आप ॥६॥ उप स्तुहि प्रथमं रत्नऽधेयं बृहस्पतिं सनितारं धनानां यः शंसते स्तुवते शंऽभविष्ठः पुरुऽवसुः आऽगमत् जोहुवानं ॥७॥ तव ऊतिऽभिः सचमानाः अरिष्टाः बृहस्पते मघऽवानः सुऽवीराः ये अश्वऽदाः उत वा संति गोऽदाः ये वस्त्रऽदाः सुऽभगाः तेषु रायः ॥८॥ विऽसर्माणं कृणुहि वित्तं एषां ये भुंजते अपृणंतः नः उक्थैः अपंऽवतान् प्रऽसवे ववृधानान् ब्रह्मऽद्विषः सूर्यात् यवयस्व ॥९॥ यः ओहते रक्षसः देवऽवीतौ अचक्रेभिः तं मरुतः नि यात यः वः शमीं शशमानस्य निंदात् तुच्छ्यान् कामान् करते सिस्विदानः ॥१०॥१८॥ तं ऊं स्तुहि यः सुऽइषुः सुऽधन्वा यः विश्वस्य क्षयति भेषजस्य यक्ष्व महे सौमनसाय रुद्रं नमःऽभिः देवं असुरं दुवस्य ॥११॥ दमूनसः अपसः ये सुऽहस्ताः वृष्णः पत्नीः नद्यः विभ्वऽतष्टाः सरस्वती बृहतऽदिवा उत राका दशस्यंतीः वरिवस्यंतु शुभ्राः ॥१२॥ प्र सु महे सुऽशरणाय मेधां गिरं भरे नव्यसीं जायमानां यः आहनाः दुहितुः वक्षणासु रूपा मिनानः अकृणोत् इदं नः ॥१३॥ प्र सुऽस्तुतिः स्तनयंतं रुवंतं इळः पतिं जरितः नूनं अश्याः यः अब्दिऽमान् उदनिऽमान् इयर्ति प्र विऽद्युता रोदसी उक्षमाणः ॥१४॥ एषः स्तोमः मारुतं शर्धः अच्छ रुद्रस्य सूनून युवन्यून उत अश्याः कामः रायेऽहवते मा स्वस्ति उप स्तुहि पृषतऽअश्वान् अयासः ॥१५॥ प्र एषः स्तोमः पृथिवीं अंतरिक्षं वनस्पतीन् ओषधीः राये अश्याः देवःऽदेवः सुऽहवः भूतु मह्यं मा नः माता पृ-

थिवी दुःऽमतौ धात् ॥१६॥ उरौ देवाः अनिऽवाधे स्याम ॥१७॥ सं अश्विनोः अवसा नूतनेन मयःऽभुवा सुऽप्रनीती गमेम आ नः रयिं वहतं आ उत वीरान् आ विश्वानि अमृता सौभगानि ॥ १८ ॥ १९ ॥

॥४३॥ आ धेनवः पयसा तूर्णिऽअर्थाः अमंधतीः उप नः यंतु मध्वा महः रये वृहतीः सप्त विप्रः मयःऽभुवः जरिता जोहवीति ॥१॥ आ सुऽस्तुती नमसा वर्तयध्यै द्यावा वाजाय पृथिवी अमृधे पिता माता मधुऽवचाः सुऽहस्ता भरेऽभरे नः यशसौ अविष्टां ॥२॥ अध्वर्यवः चकृऽवांसः मधूनि प्र वायवे भरत चारु शुक्रं होतांऽइव नः प्रथमः पाहि अस्य देव मध्वः ररिम ते मदाय ॥३॥ दश क्षिपः युंजते बाहू अद्रिं सोमस्य या शमितारा सुऽहस्ता मध्वः रसं सुऽगभस्तिः गिरिऽस्थां चनिष्ठदत् दुदुहे शुक्रं अंशुः ॥४॥ असावि ते जुजुषाणाय सोमः ऋत्वे दक्षाय बृहते मदाय हरी रथे सुऽधुरा योगे अर्वाक् इंद्र प्रिया कृणुहि हूयमानः ॥५॥२०॥ आ नः मही अरमतिं सऽजोषाः मां देवी नमसा रातऽहव्यां मधोः मदाय बृहती ऋतऽज्ञां आ अग्ने वह पथिऽभिः देवऽयानैः ॥६॥ अंजंति यं प्रथयंतः न विप्राः वपाऽवंतं न अग्निना तपंतः पितुः न पुचः उपसि प्रेष्ठः आ घर्मः अग्निं ऋतयन् असादि ॥७॥ अच्छ मही बृहती शंऽतमा गीः दूतः न गंतु अश्विना हुवध्यै मयःऽभुवा सऽरथा आ यातं अर्वाक् गंतं निऽधिं धुरं आणिः न नाभिं ॥८॥ प्र तव्यसः नमःऽउक्तिं तुरस्य अहं पूष्णः उत वायोः अदिक्षि या राधसा चोदितारा मतीनां या वाजस्य द्रविणःऽदौ उत त्मन ॥९॥ आ नासंऽभिः मरुतः वक्षि विश्वान् आ रूपेभिः जातऽवेदः हुवानः

यज्ञं गिरः जरितुः सुऽस्तुतिं च विश्वे गंत मरुतः विश्वे ऊती॥१०॥२१॥
आ नः दिवः बृहतः पर्वतात् आ सरस्वती यजता गंतु यज्ञं हवं देवी जुजुषाणा घृताचीं शग्मां नः वाचं उशती शृणोतु॥११॥ आ वेधसं नीलऽपृष्ठं बृहंतं बृहस्पतिं सदने सादयध्वं सादतऽयोनिं दमें आ दीदिऽवांसं हिरण्यऽवर्णं अरुषं सपेम॥१२॥ आ धर्णसिः वृहतऽदिवः ररांणः विश्वेभिः गंतु ओमंऽभिः हुवानः माः वसानः ओषधीः अमृधः चिधातुऽशृंगः वृषभः वयःऽधाः॥१३॥ मातुः पदे परमे शुक्र आयोः विपन्यवः रास्पिरासः अग्मन् सुऽशेव्यं नमसा रातऽहव्याः शिशुं मृजंति आयवः न वासे॥१४॥ बृहत् वयः बृहते तुभ्यं अग्ने धियाऽजुरः मिथुनासः सचंत देवःऽदेवः सुऽहवः भूतु मह्यं मा नः माता पृथिवी दुःऽमतौ धात्॥१५॥ उरौ देवाः अनि-ऽबाधे स्याम॥१६॥ सं अश्विनोः अवसा नूतनेन मयःऽभुवा सुऽप्रनीती गमेम आ नः रयिं वहतं आ उत वीरान् आ विश्वानि अमृता सौभगानि॥१७॥२२॥

॥४४॥ तं प्रत्नऽथा पूर्वऽथा विश्वऽथा इमऽथा ज्येष्ठऽतातिं बर्हिऽसदं स्वःऽविदं प्रतीचीनं वृजनं दोहसे गिरा आशुं जयंतं अनु यासु वर्धसे॥१॥ श्रिये सुऽदृशीः उपरस्य याः स्वः विऽरोचमानः क्रकुभां अचोदते सुऽगोपाः असि न दभाय सुऽक्रतो॰ परः मायाभिः ऋते आस नामं ते॥२॥ अत्यं हविः सचते सत् च धातु च अरिष्टऽगातुः सः होता सहःऽभरिः प्रऽसर्सृाणः अनु बर्हिः वृषा शिशुः मध्ये युवा अजरः विऽसुहा हितः॥३॥ प्र वः एते सुऽयुजः यामन् इष्टये नीचीः अमुष्मै यम्यः ऋतऽवृधः सुयंतुऽभिः सर्वऽशासैः अभीशुऽभिः क्रिविः नामानि प्रवणे मुषायति॥४॥ सं-

ऽजभुराणः तरुऽभिः सुतेऽगृभं वयाकिनं चित्तऽगर्भासु मुऽस्वरुः धारऽवाकेषु ऋजुऽगाथ शोभसे वर्धस्व पत्नीः अभि जीवः अध्वरे ॥५॥२३॥ यादृक् एव ददृशे तादृक् उच्यते सं छायया दधिरे सिध्रया अपऽसु आ महीं असभ्यं उरुऽसां उरु ज्रयः बृहत सुऽवीरं अनपऽच्युतं सहः ॥६॥ वेति अयुः जनिऽवान् वै अतिस्पृधः सऽमर्यता मनसा सूर्यः कविः घ्रंसं रक्षंतं परि विश्वतः गयं असाकं शर्म वनवत् स्वऽवसुः ॥७॥ ज्यायांसं अस्य यतुनस्य केतुना ऋषिऽस्वरं चरति यासु नाम ते यादृश्मिन् धायि तं अपस्यया विदत यः ऊं स्वयं वहंते सः अरं करत ॥८॥ समुद्रं आसां अवतस्थे अग्मिना न रिष्यति सवनं यस्मिन् आऽयता अच न हार्दि क्रवणस्य रेजते यच मतिः विद्यते पूतऽबंधनी ॥९॥ सः हि क्षुचस्य मनसस्य चित्तिऽभिः एवऽवदस्य यजतस्य सधेः अवऽत्सारस्य स्पृणवाम रण्वऽभिः शविष्ठं वाजं विदुषा चित् अध्यै ॥१०॥२४॥ श्येनः आसां अदितिः कक्ष्यः मदः विश्वऽवारस्य यजतस्य मायिनः सं अन्यंऽअन्यं अर्थयंति एतवे विदुः विऽसानं परिऽपानं अंति ते ॥११॥ सदाऽपृणः यजतः वि ह्विषः वधीत् बाहुऽवृक्तः श्रुतऽवित् तयैः वः सचा उभा सः वरा प्रति एति भाति च यत् ईं गणं भजते सुप्रयावऽभिः ॥१२॥ सुतंऽभरः यजमानस्य सत्ऽपतिः विश्वासां ऊधः सः धियां उतऽअंचनः भरत् धेनुः रसऽवत् शिश्रिये पयः अनुऽब्रुवाणः अधि एति नस्वपन् ॥१३॥ यः जागार तं ऋचः कामयंते यः जागार तं ऊं सामानि यंति यः जागार तं अयं सोमः आह तव अहं अस्मि सख्ये निऽओकाः ॥१४॥ अग्निः जागार तं ऋचः कामयंते अग्निः जागार तं ऊं सामानि यंति अग्निः जागार तं अयं सोमः आह तव अहं अस्मि सख्ये निऽओकाः ॥१५॥२५॥३॥

॥४५॥ विदाः दिवः विऽस्यन् अद्रिं उक्थैः आऽयत्याः उषसः अर्चिनः गुः अप अवृत व्रजिनीः उत स्वः गात् वि दुरः मानुषीः देवः आवः॰॥१॥ वि सूर्यः अमतिं न श्रियं सात् आ ऊर्वात् गवां माता जानती गात् धन्वऽअर्णसः नद्यः खादःऽअर्णाः स्थूणाऽइव सुऽमिता दृंहत द्यौः ॥२॥ अस्मै उक्थाय पर्वतस्य गर्भः महीनां जनुषे पूर्व्याय वि पर्वतः जिहीत साधत द्यौः आऽविवासंतः दसयंत भूम ॥३॥ सुऽउक्तेभिः वः वचःऽभिः देवऽजुष्टैः इंद्रा नु अग्नी अवसे हुवध्यै उक्थेभिः हि स्म कवयः सुऽयज्ञाः आऽविवासंतः मरुतः यजंति ॥४॥ एतो नु अद्य सुऽध्यः भवाम प्र दुच्छुनाः मिनवाम वरीयः आरे द्वेषांसि सनुतः दधाम अयाम प्राचः यजमानं अच्छ ॥५॥२६॥ आ इत धियं कृणवाम सखायः अप या माता ऋणुत व्रजं गोः ययां मनुः विशिऽशिप्रं जिगाय ययां वणिक् वंकुः आप पुरीषं ॥६॥ अनूनोत अच हस्तऽयतः अद्रिः आचैन येन दश मासः नवऽग्वाः ऋतं यती सरमा गाः अविंदत् विश्वानि सत्या अंगिराः चकार ॥७॥ विश्वे अस्याः विऽउषि माहिनायाः सं यत् गोभिः अंगिरसः नवंत उत्सः आ मां परमे सधऽस्थे ऋतस्य पथा सरमा विदत् गाः॥८॥ आ सूर्यः यातु सप्तऽअश्वः क्षेत्रं यत् अस्य उर्विया दीर्घऽयाये रघुः श्येनः पतयत् अंधः अच्छ युवा कविः दीदयत् गोषु गच्छन् ॥९॥ आ सूर्यः अरुहत् शुक्रं अर्णः अयुक्त यत् हरितः वीतऽपृष्ठाः उद्ना न नावं अनयंत धीराः आऽपृणंतीः आपः अर्वाक् अतिष्ठन् ॥१०॥ धियं वः अप्ऽसु दधिषे स्वःऽसां ययां अतरन् दश मासः नवऽग्वाः अया धिया स्याम देवऽगोपाः अया धिया तुतुर्याम अतिं अंहः ॥११॥२७॥

॥४६॥ हयंःन विद्वान् अयुजि स्वयं धुरि तां वहामि प्रऽतरणी अवस्युवं न अस्याः वशिम विऽमुचं न आऽवृतं पुनः विद्वान् पथः पुरःऽएता ऋजु नेषति ॥१॥ अग्मे इंद्र वरुण मित्र देवाः शर्धः प्र यंत मारुत उत विष्णो उभा नासत्या रुद्रः अधग्माः पूषा भगः सरस्वती जुषंत ॥२॥ इंद्राग्नी मित्रावरुणा अदितिं स्वः० पृथिवीं द्यां मरुतः पर्वतान् अपः हुवे विष्णुं पूषणं ब्रह्मणः पतिं भगं नु शंसं सवितारं ऊतये ॥३॥ उत नः विष्णुः उत वातः अस्मिधः दृविणःऽदाः उत सोमः मयः करत् उत ऋभवः उत रये नः अश्विना उत त्वष्टा उत विऽभ्वा अनु मंसते ॥४॥ उत त्यत् नः मारुतं शर्धः आ गमत् दिविऽक्षयं यजतं बर्हिः आऽसदे बृहस्पतिः शर्म पूषा उत नः यमत् वरूथ्यं वरुणः मित्रः अर्यमा ॥५॥ उत त्ये नः पर्वतासः सुऽशस्तयः सुऽदीतयः नद्यः चामणे भुवन् भगः विऽभक्ता शवसा अवसा आ गमत् उरुऽव्यचाः अदितिः श्रोतु मे हवं ॥६॥ देवानां पत्नीः उशतीः अवंतु नः प्र अवंतु नः तुजये वाजऽसातये याः पार्थिवासः याः अपां अपि व्रते ताः नः देवीः सुऽहवाः शर्म यच्छत ॥७॥ उत माः व्यंतु देवऽपत्नीः इंद्राणी अग्मायीं अश्विनीं राट् आ रोदसी वरुणानी शृणोतु व्यंतु देवीः यः ऋतुः जनीनां ॥८॥२८॥२॥

॥४७॥ प्रऽयुंजती दिवः एति ब्रुवाणा मही माता दुहितुः बोधयंती आऽविवासंती युवतिः मनीषा पितृऽभ्यः आ सदने जोहुवाना ॥१॥ अजिरासः ततऽअपः ईयमानाः आतस्थिऽवांसः अमृतस्य नाभिं अनंतासः उरवः विश्वतः सीं परि द्यावापृथिवी यंति पंथाः ॥२॥ उक्षा समुद्रः अरुषः सुऽपर्णः पूर्वस्य योनिं पितुः आ विवेश मध्ये दिवः निऽहितः पृश्निः अश्मा वि चक्रमे रज-

सः पाति अंतौ ॥३॥ चत्वारः ईं बिभ्रति क्षेमऽयंतः दश गर्भं चरसे धापयंते चिऽधातवः परमाः अस्य गावः दिवः चरंति परि सद्मः अंतान् ॥४॥ इदं वपुः निऽवचनं जनासः चरंति यत् नद्यः तस्थुः आपः इह यत ईं बिभृतः मातुः अन्ये इहऽईह जाते यम्याः सऽबंधू० ॥५॥ वि तन्वते धियः अस्मै अपांसि वस्त्रा पुचाय मातरः वयंति उपऽप्रक्षे वृषणः मोदमानाः दिवः पथा वध्वः यंति अच्छ ॥६॥ तत् अस्तु मित्रावरुणा तत् अग्ने शं योः अस्मभ्यं इदं अस्तु शस्तं अशीमहि गाधं उत प्रतिऽस्यां नमः दिवे बृहते सदनाय ॥७॥१॥

॥४८॥ कत् ऊं प्रियाय धाम्ने मनामहे स्वऽक्षाय स्वऽयशसे महे वयं आऽमेन्यस्य रजसः यत् अभ्रे आ अपः वृणाना विऽतनोति मायिनी ॥१॥ ताः अत्नत वयुनं वीरऽवक्षणं समान्या वृतया विश्वं आ रजः अपो अपाचीः अपराः अप ईजते प्र पूर्वीभिः तिरते देवऽयुः जनः ॥२॥ आ यावऽभिः अह्न्येभिः अक्तुऽभिः वरिष्ठं वज्रं आ जिघर्ति मायिनि शतं वा यस्य प्रऽचरन् स्वे दमे सऽवर्तयंतः वि च वर्तयन् अहा ॥३॥ तां अस्य रीतिं परुषोऽइव प्रति अनीकं अख्यं भुजे अस्य वर्पसः सचा यदि पितुमंतऽइव क्षयं रत्नं दधाति भरऽहूतये विशे ॥४॥ सः जिह्वया चतुःऽअनीकः ऋंजते चारु वसानः वरुणः यतन् अरिं न तस्य विद्म पुरुष्टवता वयं यतः भगः सविता दाति वार्यं ॥५॥२॥

॥४९॥ देवं वः अद्य सवितारं आ ईषे भगं च रत्नं विऽभजंतं आयोः आ वां नरा पुरुऽभुजा ववृत्यां दिवेऽदिवे चित् अश्विना सखिऽयन् ॥१॥ प्रति प्रऽयानं असुरस्य विद्वान् सुऽउक्तैः देवं स-

वितारं दुवस्य उप ब्रुवीत नमसा विऽजानन् ज्येष्ठं च रत्नं विऽभजंतं आयोः॥२॥ अद्चऽया दयते वार्याणि पूषा भगः अदितिः वस्ते उस्राः इंद्रः विष्णुः वरुणः मित्रः अग्निः अहानि भद्रा जनयंत दस्माः॥३॥ तत् नः अनर्वा सविता वरूथं तत् सिंधवः इषयंतः अनुग्मन् उप यत् वोचे अध्वरस्य होता रायः स्याम पतयः वाजऽरत्नाः॥४॥ प्र ये वसुंऽभ्यः ईवत् आ नमः दुः ये मित्रे वरुणे सूक्तऽवाचः अव एतु अभ्वं कृणुत वरीयः दिवः पृथिव्योः अवसा मदेम ॥ ५ ॥ ३ ॥

॥५०॥ विश्वः देवस्य नेतुः मर्तः वुरीत सख्यं विश्वः राये इषुध्यति द्युम्नं वृणीत पुष्यसे॥१॥ ते ते देव नेतः ये च इमान् अनुऽशसे ते राया ते हि आऽपृचे सचेमहि सचथ्यैः॥२॥ अतः नः आ नृन् अतिथीन् अतः पत्नीः दशस्यत आरे विश्वं पथेऽस्यां द्विषः युयोतु युयुविः॥३॥ यच्च वह्निः अभिऽहितः दुद्रवत् द्रोण्यः पशुः नृऽमनाः वीरऽपस्त्यः अणीधीराऽइव सनिता॥४॥ एषः ते देव नेतः रथःपतिः शं रयिः शं राये शं स्वस्तये इषःऽस्तुतः मनामहे देवऽस्तुतः मनामहे ॥ ५ ॥ ४ ॥

॥५१॥ अग्ने सुतस्य पीतये विश्वैः ऊमेभिः आ गहि देवेभिः हव्यऽदातये॥१॥ ऋतऽधीतयः आ गत सत्यऽधर्माणः अध्वरं अग्नेः पिबत जिह्वया॥२॥ विप्रेभिः विप्र संत्य प्रातर्यावऽभिः आ गहि देवेभिःसोमऽपीतये॥३॥ अयंसोमः चमू सुतः अमत्रे परिसिच्यते प्रियः इंद्राय वायवे॥४॥ वायो आ याहि वीतये जुषाणः हव्यऽदातये पिब सुतस्य अंधसः अभि प्रयः॥५॥५॥ इंद्रः च वायो एषां

सुतानां पीतिं अर्हथः तान् जुषेथां अरेपसौ अभि प्रयः॥६॥ सुताः इंद्राय वायवे सोमासः दधिऽआशिरः निम्नं न यंति सिंधवः अभि प्रयः॥७॥ सऽजूः विश्वेभिः देवेभिः अश्विऽभ्यां उषसा सऽजूः आ याहि अग्ने अचिऽवत् सुते रण ॥ ८ ॥ सऽजूः मित्रावरुणाभ्यां सऽजूः सोमेन विष्णुना आ याहि अग्ने अचिऽवत् सुते रण ॥९॥ सऽजूः आदित्यैः वसुंऽभिः सऽजूः इंद्रेण वायुना आ याहि अग्ने अचिऽवत् सुते रण॥१०॥६॥ स्वस्ति नः मिमीतां अश्विना भगः स्वस्ति देवी अदितिः अनर्वणः स्वस्ति पूषा असुरः दधातु नः स्वस्ति द्यावापृथिवी सुऽचेतुना॥११॥ स्वस्तये वायुं उप ब्रवामहै सोमं स्वस्ति भुवनस्य यः पतिः बृहस्पतिं सर्वऽगणं स्वस्तये स्वस्तये आदित्यासः भवंतु नः ॥१२॥ विश्वे देवाः नः अद्य स्वस्तये वैश्वानरः वसुंऽअग्निः स्वस्तये देवाः अवंतु ऋभवः स्वस्तये स्वस्ति नः रुद्रः पातु अंहसः ॥१३॥ स्वस्ति मित्रावरुणा स्वस्ति पथ्ये रेवति स्वस्ति नः इंद्रः च अग्निः च स्वस्ति नः अदिते कृधि ॥१४॥ स्वस्ति पंथां अनु चरेम सूर्याचंद्रमसौऽइव पुनः ददता अघ्नता जानता सं गमेमहि ॥ १५ ॥ ७ ॥

॥५२॥ प्र शर्यावऽअश्व धृष्णुऽया अर्चे मरुतऽभिः ऋक्वऽभिः ये अद्रोघं अनुऽस्वधं श्रवः मदंति यज्ञियाः॥१॥ ते हि स्थिरस्य शवसः संखायः संति धृष्णुऽया ते यामन् आ धृषतऽविनः त्मना पांति शश्वतः॥२॥ ते स्यंद्रासः न उक्षणः अति स्कंदंति शर्वरीः मरुतां अध महः दिवि क्षमा च मन्महे॥३॥ मरुतऽसु वः दधीमहि स्तोमं यज्ञं च धृष्णुऽया विश्वे ये मानुषा युगा पांति मर्त्यरिषः॥४॥ अर्हंतः ये सुऽदानवः नरः असामिऽशवसः प्र यज्ञं यज्ञियेभ्यः दिवः अर्चे

मरुत्ऽभ्यः॥५॥८॥ आ रुक्मैः आ युधा नरः ऋष्वाः ऋष्टीः असृक्षत अनु एनान् अह विऽद्युतः मरुतः जऋह्रतीःऽइव भानुः अर्त आत्मना दिवः॥६॥ ये ववृधंत पार्थिवाः ये उरौ अंतरिक्षे आ वृजने वा नदीनां सधऽस्थे वा महः दिवः॥७॥ शर्धः मारुतं उत शंस सत्यऽशवसं ऋभ्वसं उत स्म ते शुभे नरः प्र स्यंद्राः युजत त्मना॥८॥ उत स्म ते परुष्ण्यां ऊर्णीः वसत शुंध्यवः उत पव्या रथानां अर्द्रिं भिंदंति ओजसा॥९॥ आऽपथयः विऽपथयः अंतःऽपथा अनुऽपथाः एतेभिः महां नामऽभिः यज्ञं विऽस्तारः ओहते॥१०॥९॥ अध नरः नि ओहते अध निऽयुतः ओहते अध पारावताः इति चिचा रुपाणि दश्यौ॥११॥ छंदःऽस्तुभः कुभन्यवः उत्सं आ कीरिणः नृतुः ते मे के चित् न तायवः ऊमाः आसन् दृशि त्विषे॥१२॥ ये ऋष्वाः ऋष्टिऽविद्युतः कवयः संति वेधसः तं ऋषे मारुतं गणं नमस्य रमय गिरा॥१३॥ अच्छ ऋषे मारुतं गणं दाना मित्रं न योषणां दिवः वा धृष्णवः ओजसा स्तुताः धीभिः इषण्यत॥१४॥ नु मन्वानः एषां देवान अच्छ न वक्षणा दाना सचेत सूरिऽभिः यामंऽश्रुतेभिः अंजिऽभिः॥१५॥ प्र ये मे बंधुऽएषे गां वोचंत सूरयः पृश्निं वोचंत मातरं अध पितरं इषिमणं रुद्रं वोचंत शिक्वसः॥१६॥ सप्त मे सप्त शाकिनः एकंऽएका शता ददुः यमुनायां अधि श्रुतं उत राधः गव्यं मृजे नि राधः अश्व्यं मृजे॥१७॥१०॥

॥५३॥ कः वेद जानं एषां कः वा पुरा सुम्नेषु आस मरुतां यत् युयुज्रे किला स्यः॥१॥ आ एतान् रथेषु तस्थुषः कः शुश्राव कथा ययुः कस्मै ससुः सुऽदासे अनु आपयः इळाभिः वृष्टयः सह॥२॥ ते मे आहुः ये आऽययुः उप द्युऽभिः विऽभिः मदे नरः मयोः अरे-

पर्सः इमान् पश्यन् इति स्तुहि ॥३॥ ये अंजिषु ये वाशीषु स्वऽभानवः स्रक्षु रुक्मेषु खादिषु श्रायाः रथेषु धन्वऽसु ॥४॥ युष्माकं स्म रथान् अनु मुदे दधे मरुतः जीरऽदानवः वृष्टी द्यावः यतीःऽइव ॥५॥११॥ आ यं नरः सुऽदानवः ददाशुषे दिवः कोशं अचुच्यवुः वि पर्जन्यं सृजंति रोदसी अनु धन्वना यंति वृष्टयः ॥६॥ ततृदानाः सिंधवः क्षोदसा रजः प्र सस्रुः धेनवः यथा स्यन्दाः अश्वाःऽइव अध्वनः विऽमोचने वि यत् वर्तंते एन्यः ॥७॥ आ यात मरुतः दिवः आ अंतरिक्षात् अमात उत मा अवं स्यात पराऽवतः ॥८॥ मा वः रसा अनितभा कुभा क्रुमुः मा वः सिंधुः नि रीरमत् मा वः परि स्थात् सरयुः पुरीषिणी अस्मे इत् सुम्नं अस्तु वः ॥९॥ तं वः शर्धं रथानां त्वेषं गणं मारुतं नव्यसीनां अनु प्र यंति वृष्टयः ॥१०॥१२॥ शर्धऽशर्ध वः एषां व्रातंऽव्रातं गणंऽगणं सुशस्तिऽभिः अनु क्रामेम धीतिऽभिः ॥११॥ कस्मै अद्य सुऽजाताय रातऽहव्याय प्र ययुः एना यामेन मरुतः ॥१२॥ येन तोकाय तनयाय धान्यं बीजं वहध्वे अक्षितं असभ्यं तत् धत्तन यत् वः ईमहे राधः विश्वऽआयु सौभगं ॥१३॥ अति इयाम निदः तिरः स्वस्तिऽभिः हित्वा अवद्यं अरातीः वृष्टी शं योः आपः उस्रि भेषजं स्याम मरुतः सह ॥१४॥ सुऽदेवः समह असति सुऽवीरः नरः मरुतः सः मर्त्यः यं च आयध्वे स्याम ते ॥१५॥ स्तुहि भोजान् स्तुवतः अस्य यामनि रणन् गावः न यवसे यतः पूर्वीनऽइव सखीन् अनु ह्वय गिरा गृणीहि कामिनः ॥ १६ ॥ १३ ॥

॥५४॥ प्र शर्धाय मारुताय स्वऽभानवे इमां वाचं अनज पर्वतऽच्युते घर्मऽस्तुभे दिवः आ पृष्ठऽयज्वने द्युम्नऽश्रवसे महि नृम्णं

अर्चत ॥१॥ प्र वः मरुतः तविषाः उत्ऽन्यवः वयःऽवृधः अश्वऽयुजः परिऽज्रयः सं विऽद्युतः दधति वाशतिः चितः स्वरंति आपः अवनाः परिऽज्रयः ॥२॥ विद्युतऽमहसः नरः अश्मऽदिद्यवः वातऽत्विषः मरुतः पर्वतऽच्युतः अर्ष्टऽया चित् मुहुः आ ह्रादुनिऽवृतः स्तनयंतऽअमाः एभसाः उतऽओजसः ॥३॥ वि अक्तून रुद्राः वि अहानि शिक्वसः वि अंतरिक्षं वि रजांसि धूतयः वि यत् अजान अजथ नावः ईं यथा वि दुःऽगानि मरुतः न अह रिष्यथ ॥४॥ तत् वीर्यं वः मरुतः महिऽत्वनं दीर्घं ततानऽसूर्यः न योजनं एताः न यामे अगृभीतऽशोचिषः अनश्वऽदां यत् निऽअयातन गिरिं ॥५॥१४॥ अभ्राजि शर्धः मरुतः यत् अर्णसं मोषथ वृक्षं कपनाऽइव वेधसः अध स्म नः अरमतिं सऽजोषसः चक्षुःऽइव यंतं अनु नेषथ सुऽगं ॥६॥ न सः जीयते मरुतः न हन्यते न सेधति न व्यथते न रिष्यति न अस्य रायः उप दस्यंति न ऊतयः ऋषिं वा यं राजानं वा सुसूदथ ॥७॥ नियुत्वंतः याम्ऽअजितः यथा नरः अर्यमणः न मरुतः कबंधिनः पिन्वंति उत्सं यत् इनासः अस्वरन् वि उंदंति पृथिवीं मध्वः अंधसा ॥८॥ प्रवत्वती ईयं पृथिवी मरुतऽभ्यः प्रवत्वती द्यौः भवति प्रयतऽभ्यः प्रवत्वतीः पथ्याः अंतरिक्ष्याः प्रवत्वंतः पर्वताः जीरऽदानवः ॥९॥ यत् मरुतः सऽभरसः स्वःऽनरः सूर्यं उतऽईते मदथ दिवः नरः न वः अश्वाः अयुयंत अह सिस्नतः सद्यः अस्य अध्वनः पारं अश्नुथ ॥१०॥१५॥ अंसेषु वः ऋष्टयः पतऽसु खादयः वक्षःऽसु रुक्माः मरुतः रथे शुभः अग्निऽभ्राजसः विऽद्युतः गभस्त्योः शिप्राः शीर्षऽसु विऽततताः हिरण्ययीः ॥११॥ तं नाकं अर्यः अगृभीतऽशोचिषं रशत् पिप्पलं मरुतः वि धूनुथ सं अच्यंत वृजना अतिंविषंत यत् स्वरंति घोषं विऽततं ऋतऽयवः ॥१२॥ युष्माऽदत्तस्य

मरुतः विऽचेतसः रायः स्याम रथ्यः वयस्वतः नयः युच्छंति तिर्यः यथा दिवः असे रंत मरुतः सहस्रिणं ॥१३॥ यूयं रयिं मरुतः स्याहेऽवीरं यूयं ऋषिं अवथ सामऽविप्रं यूयं अर्वंतं भरताय वाजं यूयं धत्थ राजानं शुष्टिऽमंतं ॥१४॥ तत् वः यामि द्रविणं सद्यःऽऊतयः येन स्वः न ततनाम नृन् अभि इदं सु मे मरुतः हर्यत वचः यस्य तरेम तरसा शतं हिमाः ॥१५॥१६॥

॥५५॥ प्रऽयंज्यवः मरुतः भाजंतऽऋष्टयः बृहत् वयः दधिरे रुक्मऽवक्षसः ईयंते अश्वैः सुऽयमेभिः आशुऽभिः शुभं यातां अनु रथाः अवृत्सत ॥१॥ स्वयं दधिध्वे तविषी यथा विद बृहत् महांतः उर्विया वि राजथ उत अंतरिक्षं ममिरे वि ओजसा शुभं यातां अनु रथाः अवृत्सत ॥२॥ साकं जाताः सुऽभवः साकं उक्षिताः श्रिये चित् आ प्रऽतरं ववृधुः नरः विऽरोकिणः सूर्यस्यऽइव रश्मयः शुभं यातां अनु रथाः अवृत्सत ॥३॥ आऽभूषेण्यं वः मरुतः महिऽत्वनं दिदृक्षेण्यं सूर्यस्यऽइव चक्षणं उतो अस्मान् अमृतऽत्वे दधातन शुभं यातां अनु रथाः अवृत्सत ॥४॥ उत ईरयथ मरुतः समुद्रतः यूयं वृष्टिं वर्षयथ पुरीषिणः न वः दस्राः उप दस्यंति धेनवः शुभं यातां अनु रथाः अवृत्सत ॥५॥१७॥ यत् अश्वान् धूःऽसु पृषतीः अयुग्ध्वं हिरण्ययान् प्रति अत्कान् अमुग्ध्वं विश्वाः इत् स्पृधः मरुतः वि अस्यथ शुभं यातां अनु रथाः अवृत्सत ॥६॥ न पर्वताः न नद्यः वरंत वः यत्र अचिध्वं मरुतः गच्छथ इत् ऊं तत् उत द्यावापृथिवी याथन परि शुभं यातां अनु रथाः अवृत्सत ॥७॥ यत् पूर्व्य मरुतः यत् च नूतनं यत् उद्यते वसवः यत् च शस्यते विश्वस्य तस्य भवथ नवेदसः शुभं यातां अनु रथाः अवृत्सत ॥८॥ मृळत

नः मरुतः मा वधिष्टन अस्मभ्यं शर्म बहुलं वि यंतन अधि स्तोचस्य सख्यस्य गातन शुभं यातां अनु रथाः अवृत्सत ॥९॥ यूयं अस्मान् नयत वस्यः अच्छ निः अंहतिऽभ्यः मरुतः गृणानाः जुषध्वं नः हव्यऽदातिं यजत्राः वयं स्याम पतयः रयीणां ॥१०॥१८॥

॥५६॥ अग्ने शर्धंतं आ गणं पिष्टं रुक्मेभिः अंजिभिः विशः अद्य मरुतां अवह्वये दिवः चित् रोचनात् अधि ॥१॥ यथा चित् मन्यसे हृदा तत् इत् मे जग्मुः आऽशसः ये ते नेदिष्ठं हवनानि आऽगमन् तान् वर्धभीमऽसंदृशः ॥२॥ मीळ्हुष्मंतीऽइव पृथिवी पराऽहता मदंती एति अस्मत् आ ऋक्षः न वः मरुतः शिमीऽवान् अमः दुघः गौःऽइव भीमऽयुः ॥३॥ नि ये रिणंति ओजसा वृथा गावः न दुःऽधुरः अश्मानं चित् स्वर्यं पर्वतं गिरिं प्र च्यवयंति यामऽभिः ॥४॥ उत् तिष्ठ नूनं एषां स्तोमैः संऽउक्षितानां मरुतां पुरुऽतमं अपूर्व्यं गवां सर्गःऽइव ह्वये ॥५॥१९॥ युंग्ध्वं हि अरुषीः रथे युंग्ध्वं रथेषु रोहितः युंग्ध्वं हरी अजिरा धुरि वोळ्हवे वहिष्ठा धुरि वोळ्हवे ॥६॥ उत स्यः वाजी अरुषः तुविऽस्वनिः इह स्म धायि दर्शतः मा वः यामेषु मरुतः चिरं करत् प्र तं रथेषु चोदत ॥७॥ रथं नु मारुतं वयं श्रवस्युं आ हुवामहे आ यस्मिन् तस्थौ सुऽरणानि बिभ्रती सचा मरुत्ऽसु रोदसी ॥८॥ तं वः शर्धं रथेऽशुभं त्वेषं पनस्युं आ हुवे यस्मिन् सुऽजाता सुऽभगा महीयते सचा मरुत्ऽसु मीळ्हुषी ॥९॥२०॥४॥

॥५७॥ आ रुद्रासः इंद्रेऽवंतः सऽजोषसः हिरण्यऽरथाः सुविताय गंतन इयं वः अस्मत् प्रति हर्यते मतिः तृष्णऽजे न दिवः

उत्साः उद्न्यवे ॥१॥ वाशींऽमंतः ऋष्टिऽमंतः मनीषिणः सुऽधन्वानः इषुऽमंतः निषंगिणः सुऽअश्वाः स्थ सुऽरथाः पृश्निऽमातरः सुऽआयुधाः मरुतः याथन शुभं ॥२॥ धूनुथ द्यां पर्वतान दाशुषे वसु नि वः वना जिहते यामनः भिया कोपयथ पृथिवी पृश्निऽमातरः शुभे यत उग्राः पृषतीः अयुग्ध्वं ॥३॥ वातऽत्विषः मरुतः वर्षऽनिर्निजः यमाःऽइव सुऽसदृशः सुऽपेशसः पिशंगाऽअश्वाः अरुणाऽअश्वाः अरेपसः प्रऽतक्षसः महिना द्यौःऽइव उरवः ॥४॥ पुरुऽद्रप्साः अंजिऽमंतः सुऽदानवः त्वेषऽसंदृशः अनवभ्रऽराधसः सुऽजातासः जनुषा रुक्मऽवक्षसः दिवः अर्काः अमृतं नाम भेजिरे ॥५॥२१॥ ऋष्टयः वः मरुतः अंसयोः अधि सहः ओजः बाह्वोः वः बलं हितं नृम्णा शीर्षऽसु आयुधा रथेषु वः विश्वा वः श्रीः अधि तनूषु पिपिशे ॥६॥ गोऽमत अश्वऽवत रथऽवत सुऽवीरं चंद्रऽवत राधः मरुतः ददनः प्रऽशस्तिं नः कृणुत रुद्रियासः भक्षीय वः अवसः दैव्यस्य ॥७॥ हुवेनरः मरुतः मृळत नः तुविऽमघासः अमृताः ऋतऽज्ञाः सत्यऽश्रुतः कवयः युवानः बृहतऽगिरयः बृहत उक्षमाणाः ॥८॥२२॥

॥५८॥ तं ऊं नूनं तविषीऽमंतं एषां स्तुषे गणं मारुतं नव्यसीनां ये आप्नुऽअश्वाः अमऽवत वहंते उत ईशिरे अमृतस्य स्वऽराजः ॥१॥ त्वेषं गणं तवसं खादिऽहस्तं धुनिऽव्रतं मायिनं दातिऽवारं मयःऽभुवः ये अमिताः महिऽत्वा वंदस्व विप्र तुविऽराधसः नॄन् ॥२॥ आ वः यंतु उदऽवाहासः अद्य वृष्टिं ये विश्वे मरुतः जुनंति अयं यः अग्निः मरुतः संऽइंद्धः एतं जुषध्वं कवयः युवानः ॥३॥ यूयं राजानं इर्यं जनाय विभ्वऽतष्टं जनयथ यजत्राः युष्मत एति मु-

ष्टिऽहा बाहुऽजूतः युष्मत्सत्ऽअश्वः मरुतः सुऽवीरः॥४॥ अराः-ऽइव इत् अचरमाः अहाऽइव प्रऽप्र जायंते अकवाः महःऽभिः पृश्नेः पुचाः उपऽमासः रभिष्ठाः स्वया मत्या मरुतः सं मिमिक्षुः ॥५॥ यत् प्र अयासिष्ट पृषतीभिः अश्वैः वीळुपविऽभिः मरुतः रथेभिः क्षोदंते आपः रिणते वनानि अव उस्रियः वृषभः क्रंदतु द्यौः॥६॥ प्रथिष्ट यामन् पृथिवी चित् एषां भतौऽइव गर्भं स्वं इत् शवः धुः वातान् हि अश्वान् धुरि आऽयुयुज्रे वर्षं स्वेदं चक्रिरे रुद्रियासः॥७॥ हये नरः मरुतः मृळत नः तुविऽमघासः अमृताः ऋतऽज्ञाः सत्यऽश्रुतः कवयः युवानः बृहत्ऽगिरयः बृहत् उक्षमाणाः ॥ ८ ॥ २३ ॥

॥५९॥ प्र वः स्पट् अक्रन् सुविताय दावने अर्चं दिवे प्र पृथिव्यै ऋतं भरे उक्षंते अश्वान् तरुषंते आ रजः अनु स्वं भानुं अथयंते अर्णवैः॥१॥ अमात् एषां भियसा भूमिः एजति नौः न पूर्णा क्षरति व्यथिः यती दूरेऽदृशः ये चितयंते एमऽभिः अंतः महे विदथे येतिरे नरः॥२॥ गवांऽइव श्रियसे शृंगं उत्ऽतमं सूर्यः न चक्षुः रजसः विऽसर्जने अत्याःऽइव सुऽभ्वः चारवः स्थन मयीःऽइव श्रियसे चेतथ नरः॥३॥ कः वः महांति महतां उत् अश्नवत् कः काव्या मरुतः कः ह पौंस्या यूयं ह भूमिं किरणं न रेजथ प्र यत् भरध्वे सुविताय दावने॥४॥ अश्वाःऽइव इत् अरुषासः सऽबंधवः सूराःऽइव प्रऽयुधः प्र उत युयुधुः मयीःऽइव सुऽवृधः ववृधुः नरः सूर्यस्य चक्षुः प्र मिनंति वृष्टिऽभिः॥५॥ ते अज्येष्ठाः अकनिष्ठासः उत्ऽभिदः अमध्यमासः महसा वि ववृधुः सुऽजातासः जनुषा पृश्निऽमातरः दिवः मयीः आ नः अच्छ जिगातन॥६॥ वयःन ये श्रेणीः पप्तुः ओजसा अंतान् दिवः बृहतः सानुनः परि अश्वासः

एषां उभये यथा विदुः प्र पर्वतस्य नभनून् अचुच्यवुः॥७॥ मिमातु द्यौः अदितिः वीतये नः सं दानुऽचिचाः उषसः यतंतां आ अचुच्यवुः दिव्यं कोशं एते ऋषे रुद्रस्य मरुतः गृणानाः॥८॥२४॥

॥६०॥ ईळे अग्निं सुऽअवसं नमःऽभिः इह प्रऽसत्तः वि चयत कृतं नः रथैःऽइव प्रभरे वाजयतऽभिः प्रऽदक्षिणित् मरुतां स्तोमं ऋध्यां ॥१॥ आ ये तस्थुः पृषतीषु श्रुतासु सुऽखेषु रुद्राः मरुतः रथेषु वना चित् उग्राः जिहते नि वः भिया पृथिवी चित् रेजते पर्वतः चित्॥२॥ पर्वतः चित् महि वृद्धः बिभाय दिवः चित् सानु रेजत स्वने वः यत् क्रीळथ मरुतः ऋष्टिऽमंतः आपःऽइव सध्यंचः धवध्वे॥३॥ वराःऽइव इत् रेवतासः हिरण्यैः अभि स्वधाभिः तन्वः पिपिश्रे श्रिये श्रेयांसः तवसः रथेषु सचा महांसि चक्रिरे तनूषु॥४॥ अज्येष्ठासः अकनिष्ठासः एते सं भ्रातरः ववृधुः सौभगाय युवा पिता सुऽअपाः रुद्रः एषां सुऽदुघा पृश्निः सुऽदिना मरुतऽभ्यः॥५॥ यत् उतऽतमे मरुतः मध्यमे वा यत् वा अवमे सुऽभगासः दिवि स्थ अतः नः रुद्राः उत वा नु अस्य अग्ने विज्ञात् हविषः यत् यजाम॥६॥ अग्निः च यत् मरुतः विष्वऽवेदसः दिवः वहध्वे उतऽतरात् अधि सुऽभिः ते मंदसानाः धुनयः रिशादसः वामं धत्त यजमानाय सुन्वते॥७॥ अग्ने मरुतऽभिः शुभयतऽभिः ऋक्वऽभिः सोमं पिब मंदसानः गणश्रिऽभिः पावकेभिः विश्वंऽइन्वेभिः आयुऽभिः वैश्वानर प्रऽदिवा केतुना सऽजूः ॥ ८ ॥ २५ ॥

॥६१॥ के स्य नरः श्रेष्ठऽतमाः ये एकःऽएकः आऽअयय परमस्याः

परा३वर्तः॥१॥ क्व वः अश्वाः क्व अभीशवः कथं शेक कथा यय पृष्ठे सदः नसोः यमः॥२॥ जघने चोदः एषां वि सक्थानि नरः यमुः पुच३कृथे न जनयः॥३॥ परा वीरासः इतन मर्यासः भद्र३जानयः अग्नि३तपः यथा असथ॥४॥ सनत्सा अश्वं पप्रुं उत गव्यं शत३अवयं श्यावाश्व३स्तुताय या दोः वीराय उप३बबृहत्॥५॥२६॥ उत त्वा स्त्री शशीयसी पुंसः भवति वस्यसी अदेव३चात अराधसः॥६॥ वि या जानाति जसुरिं वि तृष्यंतं वि कामिनं देव३चा कृणुते मनः॥७॥ उत घ नेमः अस्तुतः पुमान इति ब्रुवे पणिः सः वैर३देये इत्समः॥८॥ उत मे अरपत् युवतिः ममंदुषी प्रति श्यावाय वर्तनिं वि रोहिता पुरु३मीळ्हाय येमतुः विप्राय दीर्घ३यशसे॥९॥ यः मे धेनूनां शतं वैदत३अश्विः यथा ददत् तरंतः३इव मंहना॥१०॥२७॥ ये ई वहंते आशुभिः पिबंतः मदिरं मधु अच श्रवांसि दधिरे॥११॥ येषां श्रिया अधिरोदसी वि३भ्राजंते रथेषु आ दिवि रुक्मः३इव उपरि॥१२॥ युवा स मारुतः गणः त्वेष३रथः अनेद्यः शुभं३यावा अप्रति३स्कुतः॥१३॥ कः वेद नूनं एषां यच्च मदंति धूतयः ऋत३जाताः अरेपसः॥१४॥ यूयं मतीं विपन्यवः प्र३नेतारः इत्था धिया श्रोतारः याम३हूतिषु॥१५॥२८॥ ते नः वसूनि काम्या पुरुचंद्राः रिशादसः आ यज्ञियासः ववृत्तन॥१६॥ एतं मे स्तोमं ऊर्म्ये दार्भ्याय परा वह गिरः देवि रथीः३इव॥१७॥ उत मे वोचतात् इति सुत३सोमे रथ३वीतौ न कामः अप वेति मे॥१८॥ एषः क्षेति रथ३वीतिः मघ३वा गो३मतीः अनु पर्वतेषु अप३श्रितः॥१९॥२९॥

॥६२॥ ऋतेन ऋतं अपिहितं ध्रुवं वां सूर्यस्य यत्र वि३मुचंति अश्वान् दश शता सह तस्थुः तत् एकं देवानां श्रेष्ठं वपुषां अपश्यं

॥१॥ तत् सु वां मित्रावरुणा महित्वं ईर्मा तस्थुषीः अहंऽभिः दुदुह्रे विश्वाः पिन्वथः स्वसरस्य धेनाः अनु वां एकः पविः आ ववर्त ॥२॥ अधारयतं पृथिवीं उत द्यां मित्रऽराजाना वरुणा महःऽभिः वर्धयतं ओषधीः पिन्वतं गाः अव वृष्टिं सृजतं जीरऽदानू॰ ॥३॥ आ वां अश्वासः शुऽयुजः वहंतु यतऽरश्मयः उप यंतु अर्वाक् घृतस्य निःऽनिक् अनु वर्तते वां उप सिंधवः प्रऽदिवि क्षरंति ॥४॥ अनु श्रुतां अमतिं वर्धत् उर्वीं बर्हिःऽइव यजुषा रक्षमाणा नमस्वंता धृतऽदक्षा अधि गर्ते मित्र आसाथे वरुण इळासु अंतः॰ ॥५॥३०॥ अक्रविऽहस्ता सुऽकृते परःऽपा यं चासाथे वरुणा इळासु अंतः॰ राजाना क्षत्रं अहृणीयमाना सहस्रऽस्थूणं बिभृथः सह द्वौ ॥६॥ हिरण्यऽनिर्निक् अयः अस्य स्थूणा वि भ्राजते दिवि अश्वाजनीऽइव भद्रे क्षेत्रे निऽमिता तिल्विले वा सनेम मध्वः अधिऽगर्त्यस्य ॥७॥ हिरण्यऽरूपं उषसः विऽउष्टौ अयःऽस्थूणं उतऽइता सूर्यस्य आ रोहथः वरुण मित्र गर्तं अतः चक्षाथे अदितिं दितिं च ॥८॥ यत् बंहिष्ठं न अतिऽविधे सुऽदानू॰ अच्छिद्रं शर्म भुवनस्य गोपा तेन नः मित्रावरुणौ अविष्टं सिसासंतः जिगीवांसः स्याम ॥ ९ ॥ ३१ ॥ ३ ॥

॥६३॥ ऋतस्य गोपौ अधि तिष्ठथः रथं सत्यऽधर्माणा परमे विऽओमनि यं अत्र मित्रावरुणा अवथः युवं तस्मै वृष्टिः मधुऽमत् पिन्वते दिवः ॥१॥ सं॒ऽराजौ अस्य भुवनस्य राजथः मित्रावरुणा विदथे स्वःऽदृशा वृष्टिं वां राधः अमृतऽत्वं ईमहे द्यावापृथिवी वि चरंति तन्यवः ॥२॥ सं॒ऽराजौ उग्या वृषभा दिवः पती पृथिव्याः मित्रावरुणा विऽचर्षणी॰ चित्रेभिः अभ्रैः उप तिष्ठथः

रवं द्यां वर्षयथः असुरस्य मायया ॥३॥ माया वां मित्रावरुणा दिवि श्रिता सूर्यः ज्योतिः चरति चित्रं आयुधं तं अभ्रेण वृष्ट्या गूहथः दिवि पर्जन्य द्रप्साः मधुऽमंतः ईरते ॥४॥ रथं युंजते मरुतः शुभे सुऽखं शूरः न मित्रावरुणा गोऽइष्टिषु रजाँसि चित्रा वि चरंति तन्यवः दिवः संऽराजा पयसा नः उक्षतं ॥५॥ वाचं सु मित्रावरुणौ इराऽवतीं पर्जन्यः चित्रां वदति त्विषिऽमतीं अभ्रा वसत मरुतः सुमायया द्यां वर्षयतं अरुणां अरेपसं ॥६॥ धर्मणा मित्रावरुणा विपःऽचिता व्रता रक्षेथे असुरस्य मायया ऋतेन विश्वं भुवनं वि राजथः सूर्यं आ धत्थः दिवि चित्र्यं रथं ॥७॥१॥

॥६४॥ वरुणं वः रिशादसं ऋचा मित्रं हवामहे परिव्रजाऽइव बाह्वोः जगन्वांसा स्वःऽनरं ॥१॥ ता वाहवा सुऽचेतुना प्र यंतं अस्मै अर्चते शेवं हि जारयै वां विश्वासु क्षासु जोगुवे ॥२॥ यत् नूनं अश्यां गतिं मित्रस्य यायां पथा अस्य प्रियस्य शर्मणि अहिंसानस्य सश्चिरे ॥३॥ युवाभ्यां मित्रावरुणा उपऽमं धेयां ऋचा यत् ह क्षये मघोनां स्तोतॄणां च स्पूर्धसे ॥४॥ आ नः मित्र सुदीतिऽभिः वरुणः च सधऽस्थे आ स्वे क्षये मघोनां सखीनां च वृधसे ॥५॥ युवं नः येषु वरुणा क्षत्रं बृहत् च बिभृथः उरु नः वाजऽसातये कृतं राये स्वस्तये ॥६॥ उच्छंत्यां मे यजता देवऽक्षत्रे रुशत्ऽगवि सुतं सोमं न हस्तिऽभिः आ पदऽभिः धावतं नरा बिभ्रती अर्चनानसं ॥७॥२॥

॥६५॥ यः चिकेत सः सुऽक्रतुः देवऽत्रा सः ब्रवीतु नः वरुणः यस्य दर्शतः मित्रः वा वनते गिरः ॥१॥ ता हि श्रेष्ठऽवर्चसा राजाना

दीर्घश्रुत्तमा ता सत्पतीऽऋतावृधा ऋतावानाजनेजने ॥२॥ ता वां इयानः अवसे पूर्वोऽउप ब्रुवे सचा सुऽअश्वासः सुचेतुना वाजान् अभि प्र दावने ॥३॥ मित्रः अंहोः चित् आत् उरुष्यायगातुं वनते मित्रस्य हि प्रऽतूर्वतः सुऽमतिः अस्ति विधतः ॥४॥ वयं मित्रस्य अवसि स्याम सप्रथःऽतमे अनेहसः त्वाऽऊतयः सचा वरुणऽशेषसः ॥५॥ युवं मित्रा इमं जनं यतथः सं च नयथः मा मघोनः परि ख्यतं मो अस्माकं ऋषीणां गोऽपीथे नः उरुष्यतं ॥ ६ ॥ ३ ॥

॥६६॥ आ चिकितान सुऽक्रतू देवी मर्ते रिशादसा वरुणाय ऋतऽयेशसे दधीत प्रयसे महे ॥१॥ ता हि क्षत्रं अविऽहुतं सम्यक् असुर्यं आशाते अधव्रताऽइव मानुषं स्वः न धायि दर्शतं ॥२॥ ता वां एषे रथानां उर्वीं गव्यूतिं एषां रातऽहव्यस्य सुऽस्तुतिं दधृक् स्तोमैः मनामहे ॥३॥ अध हि काव्या युवं दक्षस्य पूःऽभिः अद्भुता नि केतुना जनानां चिकेथे पूतऽदक्षसा ॥४॥ तत् ऋतं पृथिवि बृहत् श्रवःऽएषे ऋषीणां जरयानौ अरं पृथु अति क्षरंति यामऽभिः ॥५॥ आ यत् वां ईयऽचक्षसा मित्रा वयं च सूरयः व्यचिष्ठे बहुऽपाय्ये यतेमहि स्वऽराज्ये ॥ ६ ॥ ४ ॥

॥६७॥ वद् इत्था देवा निःऽकृतं आदित्या यजतं बृहत् वरुण मित्र अर्यमन् वर्षिष्ठं क्षत्रं आशाथे ॥१॥ आ यत् योनिं हिरण्ययं वरुण मित्र सदथः धर्तारा चर्षणीनां यंतं सुम्नं रिशादसा ॥२॥ विश्वे हि विश्वऽवेदसः वरुणः मित्रः अर्यमा व्रता पदाऽइव सश्चिरे पांति मर्त्यं रिषः ॥ ३ ॥ ते हि सत्याः ऋतऽस्पृशः ऋतऽवानः

जनेऽजने सुऽनीथासः सुऽदानवः अंहोः चित् उरूऽचक्रयः ॥४॥ कः नु वां मित्र अस्तुतः वरुणः वा तनूनां तत् सु वां आ ईषते मतिः अचिंऽभ्यः आ ईषते मतिः ॥ ५ ॥ ५ ॥

॥६८॥ प्र वः मित्राय गायत वरुणाय विपा गिरा महिंऽक्षत्रौ क्षतं बृहत् ॥१॥ संऽराजा या घृतऽयोनी० मित्रः च उभा वरुणः च देवा देवेषु प्रऽशस्ता ॥२॥ ता नः शक्तं पार्थिवस्य महः रायः दिव्यस्य महि वां क्षत्रं देवेषु ॥३॥ क्षतं क्षतेन सपंता इषिरं दक्षं आशाते अदुहा देवौ वर्धेते ॥४॥ वृष्टिऽद्यावा रीतिऽआपा इषः पतीं दानुऽमत्याः बृहंतं गर्तं आशाते ॥ ५ ॥ ६ ॥

॥६९॥ त्री रोचना वरुण त्रीन् उत द्यून् त्रीणि मित्र धारयथः रजाँसि ववृधानौ अमतिं क्षत्रियस्य अनु व्रतं रक्षमाणौ अजुर्यं ॥१॥ इराऽवतीः वरुण धेनवः वां मधुऽमत् वां सिंधवः मित्र दुहे क्षयः तस्थुः वृषभासः तिसृणां धिषणानां रेतःऽधाः वि द्युऽमंतः ॥२॥ प्रातः देवीं अदितिं जोहवीमि मध्यंदिने उतऽइता सूर्यस्य राये मित्रावरुणा सर्वऽतातां ईळे तोकाय तनयाय शं योः ॥३॥ या धर्तारा रजसः रोचनस्य उत आदित्या दिव्या पार्थिवस्य न वां देवाः अमृताः आ मिनंति व्रतानि मित्रावरुणा ध्रुवाणि ॥ ४ ॥ ७ ॥

॥७०॥ पुरुऽउरुणा चित् हि अस्ति अवः नूनं वां वरुण मित्र वंसि वां सुऽमतिं ॥१॥ ता वां सम्यक् अदुहाणा इषं अश्याम धायसे वयं ते रुद्रा स्याम ॥२॥ पातं नः रुद्रा पायुऽभिः उत त्रायेथां

सुऽचाचा तुर्यामं दस्यून् तनूभिः॥३॥ मा कस्य अङ्गुतऽक्रतूः यक्षं भुजेम तनूभिः मा शेषसा मा तनसा ॥ ४ ॥ ८ ॥

॥७१॥ आ नः गंतं रिशादसा वरुण मिच बर्हणा उप इमं चारुं अध्वरं॥१॥ विश्वस्य हि प्रऽचेतसा वरुण मिच राजथः ईशाना पिप्यतं धियः॥२॥ उप नः सुतं आ गतं वरुण मिच दाशुषः अस्य सोमस्य पीतये ॥ ३ ॥ ९ ॥

॥७२॥ आ मिचे वरुणे वयं गीःऽभिः जुहुमः अचिऽवत् नि बर्हिषि सदतं सोमऽपीतये ॥१॥ व्रतेन स्थः ध्रुवऽक्षेमा धर्मणा यातयतऽजना नि बर्हिषि सदतं सोमऽपीतये ॥२॥ मिचः च नः वरुणः च जुषेतां यज्ञं इष्टये नि बर्हिषि सदतां सोमऽपीतये ॥ ३ ॥ १० ॥ ५ ॥

॥७३॥ यत् अद्य स्थः पराऽवति यत् अर्वाऽवति अश्विना यत् वा पुरु पुरुऽभुजा यत् अंतरिक्षे आ गतं॥१॥ इह त्या पुरुऽभूतमा पुरु दंसांसि बिभ्रता वरस्या यामि अध्रिऽगूः हुवे तुविःऽतमा भुजे ॥२॥ ईमा अन्यत् वपुषे वपुः चक्रं रथस्य येमथुः परि अन्या नाहुषा युगा महा रजांसि दीयथः॥३॥ तत् ऊं सु वां एना कृतं विश्वा यत् वां अनु ष्टवे नाना जातौ अरेपसा सं अस्मे बंधुं आ ईयथुः॥४॥ आ यत् वां सूर्या रथं तिष्ठत् रघुऽस्यदं सदा परि वां अरुषाः वयः घृणा वरंते आऽतपः॥५॥११॥ युवोः अचिः चिकेतति नरा सुम्नेन चेतसा घर्मं यत् वां अरेपसं नासत्या आस्ना भुरण्यति ॥६॥ उयः वां ककुहः यथिः मृण्वे यामेषु संऽतनिः यत् वां दंसःऽभिः

अश्विना अचिः नरा आऽववर्तति॥७॥ मध्वः ऊं सु मधुऽयुवा रुद्रा सिसक्ति पिप्युषी यत् समुद्रा अति पर्षथः पक्काः पृक्षः भरंत वां ॥८॥ सत्यं इत् वै ऊं अश्विना युवां आहुः मयःऽभुवा ता यामन् यामऽहूतमा यामन् आ मृळयतऽतमा ॥९॥ इमा ब्रह्माणि वर्धना अश्विऽभ्यां संतु शंऽतमा या तक्षाम रथानऽइव अवोचाम बृहत् नमः ॥ १० ॥ १२ ॥

॥७४॥ कूऽस्थः देवौ अश्विना अद्य दिवः मनावसू तत् श्रवथः वृषणऽवसू० अचिः वां आ विवासति॥१॥ कुह त्या कुह नु श्रुता दिवि देवा नासत्या कस्मिन् आ यतथः जने कः वां नदीनां सचा ॥२॥ कं याथः कं ह गच्छथः कं अच्छ युंजाथे रथं कस्य ब्रह्माणि रण्यथः वयं वां उश्मसि इष्टये॥३॥ पौरं चित् हि उदऽप्रुतं पौरं पौराय जिन्वथः यत् ईं गृभीतऽतातये सिंहंऽइव द्रुहः पदे॥४॥ प्र च्यवानात् जुजुरुषः वव्रिं अक्तं न मुंचथः युवा यदि कृथः पुनः आ कामं ऋण्वे वध्वः॥५॥१३॥ अस्ति हि वां इह स्तोता स्मसि वां संऽदृशि श्रिये नु श्रुतं मे आ गतं अवःऽभिः वाजिनीऽवसू० ॥६॥ कः वां अद्य पुरूणां आ ववृे मर्त्यानां कः विप्रः विप्रऽवाहसा कः यज्ञैः वाजिनीऽवसू० ॥७॥ आ वां रथः रथानां येष्ठः यातु अश्विना पुरु चित् अस्मऽयुः तिरः आंगूषः मर्त्येषु आ ॥८॥ शं ऊं सु वां मधुऽयुवा अस्माकं अस्तु चर्कृतिः अर्वाचीना विऽचेतसा विऽभिः श्येनाऽइव दीयतं॥९॥ अश्विना यत् ह कर्हि चित् शुश्रुयातं इमं हवं वस्वीः ऊं सु वां भुजः पृंचंति सु वां पृचः ॥ १० ॥ १४ ॥

॥७५॥ प्रति प्रियऽतमं रथं वृषणं वसुऽवाहनं स्तोता वां अश्वि-

नो॒ ऋषिः॒ स्तोमे॑न प्रति॑ भूषति॒ माध्वी॑ मम॑ श्रुतं॒ हवं॑ ॥१॥ अ॒ति॒ऽआया॑तं अ॒श्वि॒ना॒ ति॒रः॒ विश्वा॑ः अ॒हं सना॑ दस्रा॑ हिर॑ण्यऽवर्तनी॰ सु॒ऽसु॒म्ना सिं॑धु॒ऽवा॒ह॒सा॒ माध्वी॑ मम॑ श्रुतं॒ हवं॑ ॥२॥ आ नः॒ रत्ना॑नि बिभ्रतौ अ॒श्वि॒ना॒ ग॒च्छ॒तं॒ युवं॑ रु॒द्रा हिर॑ण्यऽवर्तनी॰ जु॒षा॒णा वा॒॒ज॒िनी॒ऽव॒सू॰ माध्वी॑ मम॑ श्रुतं॒ हवं॑ ॥३॥ सु॒ऽस्तु॒भः॒ वां॒ वृ॒ष॒ण्ऽव॒सू॰ रथे॑ वाणी॑ची॒ आऽहि॑ता उ॒त वां॒ क॒कु॒हः॒ मृगः॑ पृक्षः॑ कृणोति॒ वा॒॒ पु॒षः॒ माध्वी॑ मम॑ श्रुतं॒ हवं॑ ॥४॥ बो॒धि॒तऽम॑नसा र॒थ्या॑ इ॒षि॒रा ह॒व॒न॒ऽश्रु॒ता॑ विऽभिः॒ च्यवा॑नं अ॒श्वि॒ना॒ नि या॑थः अ॒ङ्ग॒या॒विनं माध्वी॑ मम॑ श्रुतं॒ हवं॑ ॥५॥१५॥ आ वां॑ नरा॒ मन॑ः॒ऽयुजः॑ अ॒श्वा॑सः॒ प्रु॒॒षि॒तऽप्स॑वः॒ वय॑ः वह॑न्तु पी॒तये॑ स॒ह सु॒म्नेभिः॒ अ॒श्वि॒ना॒ माध्वी॑ मम॑ श्रुतं॒ हवं॑ ॥६॥ अ॒श्वि॒नौ॒ आ इ॒ह ग॒च्छ॒तं॒ नास॑त्या मा॒ वि वे॑न॒तं॒ ति॒रः॒ चि॒त् अ॒र्यः॒ऽया॒ परि॑ऽवर्तिः॒ या॒तं॒ अ॒दा॒भ्या॒ माध्वी॑ मम॑ श्रुतं॒ हवं॑ ॥७॥ अ॒स्मिन् य॒ज्ञे अ॒दा॒भ्या॒ ज॒रि॒तारं॑ शुभः॒ पती॑ अ॒व॒स्युं अ॒श्वि॒ना॒ युवं॑ गृ॒णंत॑ं उप॑ भूषथः॒ माध्वी॑ मम॑ श्रुतं॒ हवं॑ ॥८॥ अभू॑त् उ॒षाः॒ रु॒श॒त्ऽप॒श्युः॒ आ अ॒गि॒ः॒ अ॒धा॒यि॒ ऋ॒त्वियः॑ अयोजि वां॒ वृ॒ष॒ण्ऽव॒सू॰ रथः॑ द॒स्रौ॒ अ॒मर्त्यः॑ माध्वी॑ मम॑ श्रुतं॒ हवं॑ ॥९॥१६॥

॥७६॥ आ भा॒ति॒ अ॒गि॒ः॒ उ॒ष॒सां॒ अनी॑कं उत॑ विप्रा॑णां देव॒ऽयाः॑ वाचः॑ अ॒स्थुः॒ अ॒वा॒चा॒ नून॑ं र॒थ्या॑ इ॒ह या॒तं॒ पी॒पि॒ऽवांस॑ं अ॒श्वि॒ना॒ घर्म॑ं अच्छ॑ ॥१॥ न सं॑स्कृतं॒ प्र मि॑मीतः॒ गमि॑ष्ठा॒ अंति॑ नूनं अ॒श्वि॒ना॒ उप॑ऽस्तुता इ॒ह दि॒वा॒ अ॒भि॒ऽपि॒त्वे अ॒व॒सा॒ आऽग॑मिष्ठा॒ प्रति॑ अ॒व॒र्ति॑ दा॒शुषे॑ शं॒ऽभ॒विष्ठा॑ ॥२॥ उ॒त आ या॒तं॒ सं॒ऽग॒वे प्रा॒तः॒ अह्नः॑ म॒ध्यं॒दि॒ने उत॑ऽइता॒ सूर्य॑स्य दि॒वा॒ नक्तं॑ अ॒व॒सा॒ शं॒ऽत॒मेन॑ न इ॒दानी॑ पी॒तिः॒ अ॒श्वि॒ना॒ आ त॒ता॒न॒ ॥३॥ इ॒दं हि वां॒ प्र॒ऽदि॒वि॒ स्थानं॑ ओकः॑

इमे गृहाः अश्विना इदं दुरोणं आ नः दिवः बृहतः पर्वतात् आ अतऽभ्यः यातं इषं ऊर्जं वहंता ॥४॥ सं अश्विनोः अवसा नूतनेन मयःऽभुवा सुऽप्रनीती गमेम आ नः रयिं वहतं आ उत वीरान् आ विश्वानि अमृता सौभगानि ॥ ५ ॥ १७ ॥

॥७७॥ प्रातःऽयावाना प्रथमा यजध्वं पुरा गृध्रात् अरुषः पिबातः प्रातः हि यज्ञं अश्विना दधाते प्र शंसंति कवयः पूर्वऽभाजः ॥१॥ प्रातः यजध्वं अश्विना हिनोत नसायं अस्ति देवऽयाः अजुष्टं उत अन्यः अस्मत् यजते वि च आवः पूर्वैःऽपूर्वः यजमानः वनीयान् ॥२॥ हिरण्यऽत्वक् मधुऽवर्णः घृतऽस्नुः पृक्षः वहन् आ रथेः वर्तते वां मनःऽजवाः अश्विना वातऽरंहाः येन अतिऽयाथः दुःऽइतानि विश्वा ॥३॥ यः भूयिष्ठं नासत्याभ्यां विवेष चनिष्ठं पित्वः ररते विऽभागे सः तोकं अस्य पीपरत् शमीभिः अनूर्ध्वऽभासः सदं इत् तुतुर्यात् ॥४॥ सं अश्विनोः अवसा नूतनेन मयःऽभुवा सुऽप्रनीती गमेम आ नः रयिं वहतं आ उत वीरान् आ विश्वानि अमृता सौभगानि ॥ ५ ॥ १८ ॥

॥७८॥ अश्विनौ आ इह गच्छतं नासत्या मा वि वेनतं हंसौऽइव पततं आ सुतान् उप ॥१॥ अश्विना हरिणौऽइव गौरौऽइव अनु यवसं हंसौऽइव पततं आ सुतान् उप ॥२॥ अश्विना वाजिनीऽव-
सू० जुषेथां यज्ञं इष्टये हंसौऽइव पततं आ सुतान उप ॥३॥ अचिः यत् वां अवऽरोहन् ऋबीसं अजोहवीत् नाधमानाऽइव योषा श्येनस्य चित् जवसा नूतनेन आ अगच्छतं अश्विना शंऽतमेन ॥४॥ १९ ॥ वि जिहीष्व वनस्पते योनिः सूष्यंत्याःऽइव श्रुतं मे अ-

श्विना हवं सप्तऽवधिं च मुंचतं ॥५॥ भीताय नाधमानाय ऋषये सप्तऽवध्रये मायाभिः अश्विना युवं वृक्षं सं च वि च अचथः ॥६॥ यथा वातः पुष्करिणीं समिंगयति सर्वतः एव ते गर्भः एजतु निःऽऐतु दशऽमास्यः ॥७॥ यथा वातः यथा वनं यथा समुद्रः एजति एव त्वं दशऽमास्य सह अवं इहि जरायुणा ॥८॥ दश मासान् शशयानः कुमारः अधि मातरि निःऽऐतु जीवः अक्षतः जीवः जीवंत्याः अधि ॥ ९ ॥ २० ॥

॥७९॥ महे नः अद्य बोधय उषः राये दिवित्मती यथा चित् नः अबोधयः सत्यऽश्रवसि वाय्ये सुऽजाते अश्वऽसूनृते ॥१॥ या सुऽनीथे शोचतऽरथे वि औच्छः दुहितः दिवः सा वि उच्छ सहीयसि सत्यऽश्रवसि वाय्ये सुऽजाते अश्वऽसूनृते ॥२॥ सा नः अद्य आभरतऽवसुः वि उच्छ दुहितः दिवः यो वि औच्छः सहीयसि सत्यऽश्रवसि वाय्ये सुऽजाते अश्वऽसूनृते ॥३॥ अभि ये त्वा विभाऽवरि स्तोमैः गृणंति वह्नयः मघैः मघोनि सुऽश्रियः दामन्ऽवंतः सुऽरातयः सुऽजाते अश्वऽसूनृते ॥४॥ यत् चित् हि ते गणाः इमे छदयंति मघत्तये परिचित् वष्टयः दधुः ददतः राधः अह्रयं सुऽजाते अश्वऽसूनृते ॥५॥२१॥ आ एषु धाः वीरऽवत् यशः उषः मघोनि सूरिषु ये नः राधांसि अह्रया मघऽवानः अरांसत सुऽजाते अश्वऽसूनृते ॥६॥ तेभ्यः द्युम्नं बृहत् यशः उषः मघोनि आ वह ये नः राधांसि अश्व्या गव्या भजंत सूरयः सुऽजाते अश्वऽसूनृते ॥७॥ उत नः गोऽमतीः इषः आ वह दुहितः दिवः साकं सूर्यस्य रश्मिऽभिः शुक्रैः शोचंतऽभिः अर्चिऽभिः सुऽजाते अश्वऽसूनृते ॥८॥ वि उच्छ दुहितः दिवः मा चिरं तनुथाः अपः न इत् त्वा स्तेनं यथा रिपुं

तपाति सूरः अर्चिषा सुऽजाते अश्वऽसूनृते ॥९॥ एतावत् वा इत् उषः त्वं भूयः वा दातुं अर्हसि या स्तोतृऽभ्यः विभाऽवरि उच्छंती न प्रऽमीयसे सुऽजाते अश्वऽसूनृते ॥ १० ॥ २२ ॥

॥ ८० ॥ द्युतत्ऽयामानं बृहंती ऋतेन ऋतऽवंरी अरुणऽपुं विऽभाती देवी उषसं स्वः आऽवहंती प्रति विप्रासः मतिऽभिः जरंते ॥१॥ एषा जनं दर्शता बोधयंती सुऽगान् पथः कृण्वती याति अयै बृहत्ऽरथा बृहती विश्वंऽइन्वा उषाः ज्योतिः यच्छति अयै अहा ॥२॥ एषा गोभिः अरुणेभिः युजाना अश्वेधंती रयिं अप्रंऽआयु चक्रे पथः रदंती सुविताय देवी पुरुऽस्तुता विश्वऽवारा वि भाति ॥३॥ एषा विऽएनी भवति द्विऽबर्हाः आविःऽकृण्वाना तन्वं पुरस्तात् ऋतस्य पंथां अनु एति साधु प्रजानंती-ऽइव न दिशः मिनाति ॥४॥ एषा शुभ्रा न तन्वः विदाना ऊर्ध्वाऽइव स्नाती दृशये नः अस्थात् अप द्वेषः बाधमाना तमांसि उषाः दिवः दुहिता ज्योतिषा आ अगात् ॥५॥ एषा प्रतीची दुहिता दिवः नॄन् योषाऽइव भद्रा नि रिणीते अप्सः विऽऊर्वती दाशुषे वार्याणि पुनः ज्योतिः युवतिः पूर्वऽथा अकः० ॥ ६ ॥ २३ ॥

॥८१॥ युंजते मनः उत युंजते धियः विप्राः विप्रस्य बृहतः विपःऽचितः वि होत्राः दधे वयुनऽवित् एकः इत् मही देवस्य सवितुः परिऽस्तुतिः ॥१॥ विश्वा रूपाणि प्रति मुंचते कविः प्र आसावीत् भद्रं द्विऽपदे चतुःऽपदे वि नाकं अख्यत् सविता वरेण्यः अनु प्रऽयानं उषसः वि राजति ॥२॥ यस्य प्रऽयानं अनु अन्ये इत् ययुः देवाः देवस्य महिमानं ओजसा यः पार्थिवानि विऽममे सः ए-

तंशः रजाँसि देवः सविता महिऽत्वना ॥३॥ उत यासि सवितः त्रीणि रोचना उत सूर्यस्य रश्मिऽभिः सं उच्यसि उत रात्रीं उभयतः परि ईयसे उत मित्रः भवसि देव धर्मऽभिः ॥४॥ उत ईशिषे प्रऽसवस्य त्वं एकः इत् उत पूषा भवसि देव यामऽभिः उत इदं विश्वं भुवनं वि राजसि श्यावऽअश्वः ते सवितः स्तोमं आनशे ॥ ५ ॥ २४ ॥

॥८२॥ तत् सवितुः वृणीमहे वयं देवस्य भोजनं श्रेष्ठं सर्वऽधामं तुरं भगस्य धीमहि ॥१॥ अस्य हि स्वयंशःऽतरं सवितुः कत् चन प्रियं न मिनंति स्वऽराज्यं ॥२॥ सः हि रत्नानि दाशुषे सुवाति सविता भगः तं भागं चित्रं ईमहे ॥३॥ अद्य नः देव सवितः प्रजाऽवत् सावीः सौभगं परा दुःऽस्वप्न्यं सुव ॥४॥ विश्वानि देव सवितः दुःऽइतानि परा सुव यत् भद्रं तत् नः आ सुव ॥५॥२५॥ अनागसः अदितये देवस्य सवितुः सवे विश्वा वामानि धीमहि ॥६॥ आ विश्वऽदेवं सतऽपतिं सुऽउक्तैः अद्य वृणीमहे सत्यऽसवं सवितारं ॥७॥ यः इमे उभे अहनी पुरः एति अप्रऽयुच्छन् सुऽआधीः देवः सविता ॥८॥ यः इमा विश्वा जातानि आऽश्रवयति श्लोकेन प्र च सुवाति सविता ॥ ९ ॥ २६ ॥

॥८३॥ अच्छ वद् तवसं गीःऽभिः आभिः स्तुहि पर्जन्यं नमसा आ विवास कनिक्रदत् वृषभः जीरऽदानुः रेतः दधाति ओषधीषु गर्भं ॥१॥ वि वृक्षान् हंति उत हंति रक्षसः विश्वं बिभाय भुवनं महाऽवधात् उत अनागाः ईषते वृष्ण्यऽवतः यत् पर्जन्यः स्तनयन् हंति दुःऽकृतः ॥२॥ रथीऽइव कशया अश्वान् अभिऽक्षिपन् आ-

विः दूतान् कृणुते वर्ष्यान् अह दूरात् सिंहस्य स्तनथाः उत ईरते यत् पर्जन्यः कृणुते वर्षं नभः ॥३॥ प्र वाताः वांति पतयंति विऽद्युतः उत ओषधीः जिहते पिन्वते स्वः० इरा विश्वस्मै भुवनाय जायते यत् पर्जन्यः पृथिवीं रेतसा अवति ॥४॥ यस्य व्रते पृथिवी नंनमीति यस्य व्रते शफऽवत् जर्भुरीति यस्य व्रते ओषधीः विश्वऽरूपाः सः नः पर्जन्य महि शर्म यच्छ ॥५॥२७॥ दिवः नः वृष्टिं मरुतः ररीध्वं प्र पिन्वत वृष्णः अश्वस्य धाराः अर्वाङ् एतेन स्तनयित्नुना आ इहि अपः निऽसिंचन असुरः पिता नः ॥६॥ अभि क्रंद स्तनय गर्भे आ धाः उदन्ऽवता परि दीय रथेन दर्तिं सु कर्ष विऽसितं न्यंचं समाः भवंतु उतऽवतः निऽपादाः ॥७॥ महांतं कोशं उत अचनि सिंच स्यंदंतां कुल्याः विऽसिताः पुरस्तात् घृतेन द्यावापृथिवी वि उंधि सुऽप्रपानं भवतु अघ्याभ्यः ॥८॥ यत् पर्जन्य कनिक्रदत् स्तनयन् हंसि दुःऽकृतः प्रति इदं विश्वं मोदते यत् किं च पृथिव्यां अधि ॥९॥ अवर्षीः वर्ष उत ऊं सु गृभाय अकः धन्वानि अतिऽएतवै ऊं अजीजनः ओषधीः भोजनाय कं उत प्रऽजाभ्यः अविदः मनीषां ॥ १० ॥ २८ ॥

॥८४॥ वट् इत्था पर्वतानां खिदं बिभर्षि पृथिवि प्र या भूमिं प्रवत्वति महा जिनोषि महिनि ॥१॥ स्तोमासः त्वा विऽचारिणि प्रति स्तोभंति अक्तुऽभिः प्र या वाजं न हेषंतं पेरुं अस्यसि अर्जुनि ॥२॥ दृळ्हा चित् या वनस्पतीन् क्षमया दर्धर्षि ओजसा यत् ते अभ्रस्य विऽद्युतः दिवः वर्षंति वृष्टयः ॥ ३ ॥ २९ ॥

॥८५॥ प्र संऽराजे बृहत् अर्चे गभीरं ब्रह्म प्रियं वरुणाय श्रुताय

वि यः जघान शमितेव चर्म उपस्तिरे पृथिवीं सूर्याय ॥१॥
वनेषु वि अन्तरिक्षं ततान वाजमर्वत्सु पयः उस्रियासु हृत्सु
क्रतुं वरुणः अप्सु अग्निं दिवि सूर्यं अदधात् सोमं अद्रौ ॥२॥
नीचीनबारं वरुणः कबन्धं प्र ससर्ज रोदसी अन्तरिक्षं तेन वि-
श्वस्य भुवनस्य राजा यवेन वृष्टिः वि उनत्ति भूमं ॥३॥ उनत्ति भूमिं
पृथिवीं उत द्यां यदा दुग्धं वरुणः वष्टि आत् इत् सं अभ्रेण वसत
पर्वतासः तविषीवन्तः अथयंत वीराः ॥४॥ इमां ऊं सु आसुरस्य
श्रुतस्य महीं मायां वरुणस्य प्र वोचं मानेनइव तस्थिवान्
अन्तरिक्षे वि यः ममे पृथिवीं सूर्येण ॥५॥३०॥ इमां ऊं नु कविऽत-
मस्य मायां महीं देवस्य नकिः आ दधर्ष एकं यत् उक्षा न पृणंति
एनीः आऽसिंचंतीः अवनयः समुद्रं ॥६॥ अर्यम्यं वरुण मित्र्यं वा
सखायं वा सदं इत् भ्रातरं वा वेशं वा नित्यं वरुण अरणं वा यत्
सीं आगः चकृम शिश्रथः तत् ॥७॥ कितवासः यत् रिरिपुः न दीवि
यत् वा घ सत्यं उत यत् न विद्म सर्वा ता वि स्य शिथिराऽइव देव
अध ते स्याम वरुण प्रियासः ॥ ८ ॥ ३१ ॥

॥८६॥ इंद्राग्नी यं अवथः उभा वाजेषु मर्त्यं दृळ्हा चित् सः प्र
भेदति द्युम्ना वाणीःऽइव चितः ॥१॥ या पृतनासु दुस्तरा या वाजेषु
श्रवाय्या या पंच चर्षणीः अभि इंद्राग्नी ता हवामहे ॥२॥ तयोः
इत् अमंऽवत् शवः तिग्मा दिद्युत् मघोनोः प्रति द्रुणा गभस्त्योः
गवां वृचऽग्ने आ ईषते ॥३॥ ता वां एषे रथानां इंद्राग्नी हवामहे
पतीं तुरस्य राधसः विद्वांसा गिर्वणःऽतमा ॥४॥ ता वृधंतौ अनु
द्यून मर्तीय देवौ अदभा अहंता चित पुरः दधे अंशाऽइव देवौ

अर्वते ॥५॥ एव इंद्राग्निऽभ्यां अहाविहव्यं भूर्थं घृतं न पूतं अद्रिऽभिः ता सूरिषु श्रवः बृहत् रयिं गृणत्ऽसु दिधृतं इषं गृणत्ऽसु दिधृतं ॥ ६ ॥ ३२ ॥

॥८७॥ प्र वः महे मतयः यंतु विष्णवे मरुत्वते गिरिऽजाः एवयामरुत प्र शर्धाय प्रऽयज्यवे सुऽखादये तवसे भंदत्ऽइष्टये धुनिऽव्रताय शवसे ॥१॥ प्र ये जाताः महिना ये च नु स्वयं प्र विघ्नाब्रुवते एवयामरुत ऋत्वा तत् वः मरुतः न आऽधृषे शवः दाना महा तत् एषां अधृष्टासः न अद्रयः ॥२॥ प्र ये दिवः बृहतः भूर्णिरे गिरा सुऽभुक्तानः सुऽभवः एवयामरुत न येषां इरी सधऽस्थे ईट्टे श्रा अमयः न स्वऽविद्युतः प्र स्यंद्रासः धुनीनां ॥३॥ सः चक्रमे महतः निः उरुऽक्रमः समानस्मात् सदसः एवयामरुत यदा अयुक्त त्मना स्वात् अधि स्नुऽभिः विऽस्पर्धसः विऽमहसः जिगाति शेऽवृधः नृऽभिः ॥४॥ स्वनः न वः अमवान् एजयत् वृषा त्वेषः ययिः तविषः एवयामरुत येन सहंतः अंजते स्वऽरोचिषः स्थाःऽरश्मानः हिरण्ययाः सुऽआयुधासः इष्मिणः ॥५॥ ३३ ॥ अपारः वः महिमा वृद्धऽश्रवसः त्वेषं शवः अवतु एवयामरुत स्थातारः हि प्रऽसितौ संऽदृशि स्थन ते नः उरुष्यत निदः भुभुक्तासः न अमयः ॥६॥ ते रुद्रासः सुऽमखाः अमयः यथा तुविद्युम्नाः अवंतु एवयामरुत दीर्घं पृथु प्रऽथे सद्म पार्थिवं येषां अज्मेषु आ महः शर्धांसि अद्भुतऽएनसां ॥७॥ अद्वेषः नः मरुतः गातुं आ इतन श्रोत हवं जरितुः एवयामरुत विष्णोः महः सऽमन्यवः युयोतन स्मत रथ्यः न दंसना अप द्वेषांसि सनुतः ॥८॥ गंत नः यज्ञं यज्ञियाः सुऽशमि श्रोत हवं अरक्षः एवयामरुत ज्येष्ठासः न

पर्वतासः विऽओमनि यूयं तस्य प्रऽचेतसः स्यात दुःऽधर्तवः निदः ॥ ९ ॥ ३४ ॥ ६ ॥ ५ ॥

॥ इति पंचमं मंडलं समाप्तं ॥

॥१॥ त्वं हि अग्ने प्रथमः मनोता अस्याः धियः अभवः दस्म होता त्वं सी वृषन् अकृणोः दुस्तरीतु सहः विश्वस्मै सहसे सहध्ये ॥१॥ अध होता नि असीदः यजीयान इळः पदे इषयन ईड्यः सन तं त्वा नरः प्रथमं देवऽयंतः महः राये चितयंतः अनु ग्मन ॥२॥ वृताऽइव यंतं बहुऽभिः वसव्यैः त्वे रयिं जागृऽवांसः अनु ग्मन रुशंतं अग्निं दर्शतं बृहंतं वपाऽवंतं विश्वहा दीदिऽवांसं ॥३॥ पदं देवस्य नमसा व्यंतः श्रवस्यवः श्रवः आपन अमृक्तं नामानि चित दधिरे यज्ञियानि भद्रायां ते रणयंत संऽदृष्टौ ॥४॥ त्वां वर्धंति क्षितयः पृथिव्यां त्वां रायः उभयासः जनानां त्वं चाता तरणे चेत्यः भूः पिता माता सदं इत मानुषाणां ॥५॥३५॥ सपर्येण्यः सः प्रियः विक्षु अग्निः होता मंद्रः नि ससाद यजीयान् तं त्वा वयं दमे आ दीदिऽवांसं उप ज्ञुऽबाधः नमसा सदेम ॥६॥ तं त्वा वयं सुऽध्यः नव्यं अग्ने सुम्नऽयवः ईमहे देवऽयंतः त्वं विशः अनयः दीद्यानः दिवः अग्ने बृहता रोचनेन ॥७॥ विशं कविं विश्पतिं शश्वतीनां नितोशनं वृषभं चर्षणीनां प्रेतिऽइषणिं इषयंतं पावकं राजंतं अग्निं यजतं रयीणां ॥८॥ सः अग्ने ईजे शशमे च मर्तः यः ते आनट संऽइधा हव्यऽदातिं यः आऽहुतिं परि वेद नमःऽभिः विश्वा इत सः वामा दधते त्वाऽऊतः ॥९॥ अस्मै ऊं ते महि महे विधेम नमःऽभिः अग्ने संऽइधा उत हव्यैः वेदीं सूनो सहसः गीःऽभिः उक्थैः आ ते भद्रायां सुऽमतौ

यतेम ॥१०॥ आ यः ततंथ रोदसी वि भासा श्रवःऽभिः च श्रवस्यः तरुचः बृहत्ऽभिः वाजैः स्थविरेभिः अस्मे रेवत्ऽभिः अग्ने वि ऽतरं वि भाहि ॥११॥ नृऽवत् वसो सदं इत् धेहि अस्मे भूरि तोकाय तनयाय पश्वः पूर्वीः इषः बृहतीः आरेऽअघाः अस्मे भद्रा सौश्रवसानि संतु ॥१२॥ पुरूणि अग्ने पुरुधा त्वाऽया वसूनि राजन् वसुता ते अश्यां पुरूणि हि त्वे पुरुऽवार संति अग्ने वसु विधते राजनि त्वे ॥ १३ ॥ ३६ ॥ ४ ॥

॥२॥ त्वं हि क्षेतऽवत् यशः अग्ने मित्रः न पत्यसे त्वं विऽचर्षणे श्रवः वसो पुष्टिं न पुष्यसि ॥१॥ त्वां हि स्म चर्षणयः यज्ञेभिः गीःऽभिः ईळते त्वां वाजी याति अवृकः रजःऽतूः विश्वऽचर्षणिः ॥२॥ सऽजोषः त्वा दिवः नरः यज्ञस्य केतुं इंधते यत् ह स्यः मानुषः जनः सुम्नऽयुः जुह्वे अध्वरे ॥३॥ ऋधत् यः ते सुऽदानवे धिया मर्तः शशमते ऊती सः बृहतः दिवः द्विषः अंहः न तरति ॥४॥ सऽइधा यः ते आऽहुतिं निऽशितिं मर्त्यः नशत् वयाऽवंतं सः पुष्यति क्षयं अग्ने शतऽआयुषं ॥५॥१॥ त्वेषः ते धूमः ऋण्वति दिवि सन् शुक्रः आऽततः सूरः न हि द्युता त्वं कृपा पावक रोचसे ॥६॥ अध हि विक्षु ईड्यः असि प्रियः नः अतिथिः रण्वः पुरिऽइव जूर्यः सूनुः न चयया-र्यः ॥७॥ ऋत्वा हि द्रोणे अञ्यसे अग्ने वाजी न कृत्व्यः परिज्माऽइव स्वधा गयः अत्यः न ह्वार्यः शिशुः ॥८॥ त्वं त्या चित् अच्युता अग्ने पशुः न यवसे धाम ह यत् ते अजर वना वृश्चंति शिक्वसः ॥९॥ वेषिं हि अध्वरिऽयतां अग्ने होता दमे विशां संऽऋधः विश्पते कृणु जुषस्व हव्यं अंगिरः ॥१०॥ अच्छ नः मित्रऽमहः देव देवान् अग्ने वोचः सुऽमतिं रोदस्योः वीहि स्वस्तिं सुऽक्षितिं दिवः नृन् द्विषः अंहांसि दुःऽइता तरेम ता तरेम तव अवसा तरेम ॥११॥२॥

॥३॥ अग्ने सः क्षेषत् ऋतऽपाः ऋतेऽजाः उरु ज्योतिः नशते देवऽयुः ते यं त्वं मित्रेण वरुणः सऽजोषाः देव पासि त्यजसा मर्तं अंहः॥१॥ ईजे यज्ञेभिः शशमे शमीभिः ऋधतऽवाराय अग्नये दद्-दाश एव चन तं यशसौ अजुष्टिः न अंहः मर्तः नशते न प्रऽदृप्तिः ॥२॥ सूरः न यस्य दृशतिः अरेपाः भीमा यत् एति शुचतः ते आ धीः हेषस्वतः शुरुधः न अयं अक्तोः कुचित् रणवः वसतिः वनेऽजाः ॥३॥ तिग्मं चित् एमं महि वर्पः अस्य भसत् अश्वः न यमसानः आसा विऽजेहमानः परशुः न जिह्वां दविः न द्रवयति दारु धक्षत् ॥४॥ सः इत् अस्ताऽइव प्रति धात् असिष्यन् शिशीत तेजः अयसः न धारां चिचऽध्रजतिः अरतिः यः अक्तोः वेः न दुऽसद्मा रघुपत्मऽजंहाः॥५॥३॥ सः ईं रेभः न प्रति वस्ते उस्राः शोचिषा ररपीति मिचऽमहाः नक्तं यः ईं अरुषः यः दिवा नृन् अमर्त्यः अरुषः यः दिवा नृन्॥६॥ दिवः न यस्य विधतः नवीनोत् वृषा रुक्षः ओषधीषु नूनोत् घृणा न यः ध्रजसा पत्मना यन् आ रोदसी वसुना दं सुऽपत्नी॰॥७॥ धायःऽभिः वा यः युज्येभिः अर्कैः विऽद्युत् न दविद्योत् स्वेभिः शुष्मैः शधैः वा यः मरुतां ततक्ष ऋभुः न त्वेषः रभसानः अद्योत् ॥ ८ ॥ ४ ॥

॥४॥ यथा होतः मनुषः देवऽतातौ यज्ञेभिः सूनो सहसः यजासि एव नः अद्य समना समानान् उशन् अग्ने उशतः यक्षि देवान् ॥१॥ सः नः विभाऽवा चक्षणिः न वस्तोः अग्निः वंदारु वेद्यः चनः धात् विश्वऽआयुः यः अमृतः मर्त्येषु उषःऽभुत् भूत् अतिथिः जातऽवेदाः॥२॥ द्यावः न यस्य पनयंति अभ्वं भासांसि वस्ते सूर्यः न शुक्रः वि यः इनोति अजरः पावकः अश्नस्य चित् शिश्नथत् पू-

व्याणि॥३॥ वह्या हि सूनो असि अह्नऽसद्वा चक्रे अग्निः जनुषा अजस्रं अवँसः त्वं नः ऊर्जऽसने ऊर्जं धाः राजाऽइव जेः अवृके क्षे-षि अंतः॥४॥ निऽतिक्तिं यः वारणं अन्नं अत्ति वायुः न राष्ट्री अति एति अक्तून् तुर्याम यः ते आऽदिशं अरातीः अत्यः न हुतः पतंतः परिऽहुत॥५॥५॥ आ सूर्यः न भानुमतऽभिः अर्कैः अग्ने ततंथ रोदसी विभासा चिचः नयत् परि तमांसि अक्तः शोचिषा पत्मन् औशिजः न दीयन्॥६॥ त्वां हि मंद्रऽतमं अर्कऽशोकैः ववृमहे महि नः श्रोषि अग्ने इंद्रं न त्वा शवसा देवता वायुं पृणंति राधसा नृऽतमाः॥७॥ नु नः अग्ने अवृकेभिः स्वस्ति वेषि रायः पथिऽभिः पर्षि अंहः ता सूरिऽभ्यः गृणते रासि सुम्नं मदेम शतऽहिमाः सुऽवीराः॥८॥६॥

॥५॥ हुवे वः सूनुं सहसः युवानं अद्रोघऽवाचं मतिऽभिः यविष्ठं यः इन्वति द्रविणानि प्रऽचेताः विश्वऽवाराणि पुरुऽवारः अध्रुक्॥१॥ त्वे वसूनि पुरुऽअनीक होतः दोषा वस्तोः आ ईरिरे यज्ञियासः क्षामऽइव विश्वा भुवनानि यस्मिन् सं सौभगानि दधिरे पावके॥२॥ त्वं विक्षु प्रऽदिवः सीदः आसु ऋत्वा रथीः अभवः वार्याणां अतः इनोषि विधते चिकित्वः वि आनुषक् जातऽवेदः वसूनि॥३॥ यः नः सनुत्यः अभिऽदासत् अग्ने यः अंतरः मिचऽमहः वनुष्यात् तं अजरेभिः वृषऽभिः तव स्वैः तपः तपिष्ठ तपसा तपस्वान्॥४॥ यः ते यज्ञेन समिऽइधा यः उक्थैः अर्कैभिः सूनो सहसः ददाशत् सः मर्त्येषु अमृत प्रऽचेताः राया द्युम्नेन श्रवसा वि भाति॥५॥ सः तत् कृधि इषितः तूयं अग्ने स्पृधः बाधस्व सहसा सहस्वान् यत् शस्यसे द्युऽभिः अक्तः वचःऽभिः तत् जुषस्व जरितुः घोषिं

तन्नः॑ऽइ॒ळा सु॒रभ॑ना॒ तं का॒मं अ॒ग्ने॒ तव॑ ऊ॒ती अ॒श्या॒म॒ र॒यिं र॒यि॑ऽवः सु॒वी॒रंऽअ॒ग्ने॒ वा॒चं अ॒भि वा॒ज॒य॒न्तः॒ अ॒श्या॒म॒ द्यु॒म्नं अ॒ज॒र॒ अ॒ज॒रं ते ॥ ६ ॥ ७ ॥

॥ ६ ॥ प्र नव्यसा॑ सहसः सू॒नुं अ॒च्छ॒ य॒ज्ञेन॑ गा॒तुं अ॒वः इ॒च्छ॒मा॒नः वृ॒ष्ठ॒ऽइ॒व॒नं वृ॒ष्ठ॒ऽदा॒नं रथ॑न्तं वी॒ती होता॑रं दि॒व्यं जि॒गा॒ति॥७॥सः क्षि॒ता॒नः॒ त॒नु॒ षु॒ चे॒त॒नः॒ऽत्वाः॒ अ॒ज॒रेभिः॑ नान॑दत्ऽभिः यविष्ठः यः पा॒व॒कः पु॒रु॒ऽत॒मः पु॒रु॒षि॒णि॒ पृ॒थू॒नि॒ अ॒ग्निः अ॒नु॒ऽया॒ति॒ भ॒र्व॒न्॥२॥ वि ते॑ विष्वक् वात॑ऽजूतासः अ॒ग्ने॒ भा॒मा॑सः शु॒चे॒ शु॒च॒यः च॒र॒न्ति॒ तु॒वि॒ऽष॒क्षा॒सः दि॒व्याः॒ न॒व॒ऽग्वाः॒ वना॑ वनन्ति धृ॒ष॒ता रु॒ज॒न्तः॥३॥ ये ते॑ शु॒क्रासः॑ शु॒च॒यः॑ शु॒चि॒ष्मः॒ क्षां वप॑न्ति॒ विऽसि॑तासः अ॒श्वाः॒ ऋ॒ध॒ऽग॒सः॒ ते उ॒र्वि॒या॒ वि भा॑ति या॒त॒य॒मा॒नः॒ अधि॑ सा॒नु॒ पृ॒श्नेः॥४॥ ऋ॒ध॒ जि॒ह्वा॒ पा॒प॒ती॒ति॒ प्र वृ॒ष्णः॒ गोषु॑ऽयुधः॒ न अ॒श॒निः॑ सृ॒जा॒ना॒ सू॒रः॒ऽइ॒व॒ प्र॒ऽसि॒तिः॒ क्षा॒तिः॒ अ॒ग्नेः॒ दुः॒ऽव॒र्तुः॒ भी॒मः॒ द॒य॒ते॒ वना॑नि ॥५॥ आ भा॒नु॒ना॒ पार्थि॑वानि॒ अ॒यां॒सि॒ म॒हः॒ तो॒दस्य॑ धृ॒ष॒ता॒ त॒त॒न्थ॒ सः बा॒ध॒स्व॒ अ॒प॒ भ॒या॒ सहः॑ऽभिः स्पृधः॑ व॒नु॒ष्य॒न् व॒नु॒षः॒ नि जू॑र्व ॥६॥ सः चि॒त् चि॒त्रं चि॒त॒य॒न्तं॒ अ॒स्मे॒ चि॒चः॒ऽक्षत्र॑ चि॒च॒ऽत॒मं व॒यः॑ऽधां च॒न्द्रं र॒यिं पु॒रु॒ऽवी॒रं बृ॒ह॒न्तं॒ च॒न्द्रं च॒न्द्रा॒भिः॒ गृ॒ण॒ते॒ यु॒व॒स्व॒ ॥७॥८॥

॥ ७ ॥ मू॒र्धानं॑ दि॒वः॒ अ॒र॒तिं॒ पृ॒थि॒व्याः॒ वै॒श्वा॒न॒रं॒ ऋ॒ते॒ आ जा॒त॒मग्निं॑ क॒विं स॒म्ऽराज॑ं अ॒ति॒थिं॒ जना॑नां आ॒सन्॒ आ पात्रं॑ जनयंत देवाः॥१॥ नाभि॑ यज्ञा॒नां सद॑नं र॒यी॒णां म॒हां आ॒ऽहा॒वं अ॒भि सं न॑वन्त वैश्वान॒रं र॒थ्य॑मध्व॒राणां॑ य॒ज्ञस्य॑ के॒तुं ज॒न॒य॒न्त॒ देवाः ॥२॥ त्वत् विप्रः॑ जायते वा॒जी अ॒ग्ने॒ त्वत् वी॒रासः॑ अ॒भि॒मा॒ति॒ऽसहः॑ वै-

श्वानर त्वं अस्मासु धेहि वसूनि राजन् स्पृहयाय्याणि ॥३॥ त्वां विश्वे अमृत जायमानं शिशुं न देवाः अभि संनवंते तव क्रतुऽभिः अमृतऽत्वं आयन् वैश्वानर यत् पित्रोः अदीदेः ॥४॥ वैश्वानर तव तानि व्रतानि महानि अग्ने नकिः आ दधर्ष यत् जायमानः पित्रोः उपऽस्थे अविंदः केतुं वयुनेषु अह्नां ॥५॥ वैश्वानरस्य विऽमितानि चक्षसा सानूनि दिवः अमृतस्य केतुना तस्य इत् ऊं विश्वा भुवना अधि मूर्धनि वयाःऽइव रुरुहुः सप्त विऽसुहः ॥६॥ वि यः रजांसि अमिमीत सुऽक्रतुः वैश्वानरः वि दिवः रोचना कविः परि यः विश्वा भुवनानि पप्रथे अदब्धः गोपाः अमृतस्य रक्षिता ॥ ७ ॥ ९ ॥

॥८॥ पृक्षस्य वृष्णः अरुषस्य नु सहः प्र नु वोचं विदथा जातऽवेदसः वैश्वानराय मतिः नव्यसी शुचिः सोमःऽइव पवते चारुः अग्नये ॥१॥ सः जायमानः परमे विऽओमनि व्रतानि अग्निः व्रतऽपाः अरक्षत वि अंतरिक्षं अमिमीत सुऽक्रतुः वैश्वानरः महिना नाकं अस्पृशत् ॥२॥ वि अस्तभ्नात् रोदसी मित्रः अद्भुतः अंतःऽवावत् अकृणोत् ज्योतिषा तमः वि चर्मणीऽइव धिषणे अवर्तयत् वैश्वानरः विश्वं अधत्त वृष्ण्यं ॥३॥ अपां उपऽस्थे महिषाः अगृभ्णत विशः राजानं उप तस्थुः ऋग्मियं आ दूतः अग्निं अभरत् विवस्वतः वैश्वानरं मातरिश्वा पराऽवतः ॥४॥ युगेऽयुगे विदथ्यं गृणतऽभ्यः अग्ने रयिं यशसं धेहि नव्यसी पव्याऽइव राजन् अघऽशंसं अजर नीचा नि वृश्च वनिनं न तेजसा ॥५॥ अस्माकं अग्ने मघवतऽसु धारय अनामि क्षत्रं अजरं सुऽवीर्यं वयं जयेम शतिनं सहस्रिणं वैश्वानर वाजं अग्ने तव ऊतिऽभिः ॥६॥ अदब्धे-

भिः तव गोपाभिः इष्टे अस्माकं पाहि विऽसधस्थ सूरीन् रक्ष च नः दुषाँ शर्धः अग्ने वैश्वानर प्र च तारीः स्तवानः ॥ ७ ॥ १० ॥

॥९॥ अहः च कृष्णं अहः अर्जुनं च वि वर्तेते रजसी वेद्याभिः वैश्वानरः जायमानः न राजा अव अतिरत् ज्योतिषा अग्निः तमाँसि ॥ १ ॥ न अहं तंतुं न वि जानामि ओतुं न यं वयंति संऽअरे अतमानाः कस्य स्वित् पुचः इह वक्कानि परः वदाति अवरेण पिचा ॥२॥ सः इत् तंतुं सः वि जानाति ओतुं सः वक्कानि ऋतुऽथा वदाति यः ई चिकेतत् अमृतस्य गोपाः अवः चरन् परः अन्येन पश्यन् ॥३॥ अयं होता प्रथमः पश्यत इमं इदं ज्योतिः अमृतं मर्त्येषु अयं सः जज्ञे ध्रुवः आ निऽसत्तः अमर्त्यः तन्वा वर्धमानः ॥ ४ ॥ ध्रुवं ज्योतिः निऽहितं दृशये कं मनः जविष्ठं पतयत्ऽसु अंतः विश्वे देवाः सऽमनसः सऽकेताः एकं क्रतुं अभि वियंति साधु ॥५॥ वि मे कर्णा पतयतः वि चक्षुः वि इदं ज्योतिः हृदये आऽहितं यत् वि मे मनः चरति दूरेऽआधीः किं स्वित् वक्ष्यामि किं ऊं नु मनिष्ये ॥ ६ ॥ विश्वे देवाः अनमस्यन् भियानाः त्वां अग्ने तमसि तस्थिऽवांसं वैश्वानरः अवतु ऊतये नः अमर्त्यः अवतु ऊतये नः ॥ ७ ॥ ११ ॥

॥१०॥ पुरः वः मंद्रं दिव्यं सुऽवृक्तिं प्रऽयति यज्ञे अग्निं अध्वरे दधिध्वं पुरःऽउक्थेभिः सः हि नः विभाऽवा सुऽअध्वरा करति जातऽवेदाः ॥१॥ तं ऊं हुवेऽमः पुरुऽअनीकहोतः अग्ने अग्निऽभिः मनुषः इधानः स्तोमैं यं अस्मै ममताऽइव पूषं घृतं न शुचि मतयः पवंते ॥२॥ पीपाय सः स्रवसा मर्त्येषु यः अग्नये ददाश विप्रः उक्थैः चि-

चाभिः तं ऊतिऽभिः चिचऽशोचिः वजस्य साता गोऽमतः दधाति ॥३॥ आ यः पप्रौ जायमानः उर्वी दूरेऽदृशा भासा कृष्णऽअध्वा अध बहु चित् तमः ऊर्म्यायाः तिरः शोचिषा दद्दशे पावकः ॥४॥ नु नः चित्रं पुरुऽवाजाभिः ऊती अग्ने रयिं मघवतऽभ्यः च धेहि ये राधसा श्रवसा च अति अन्यान् सुऽवीर्येभिः च अभि संति जनान् ॥५॥ इमं यज्ञं चनः धाः अग्ने उशन् यं ते आसानः जुहुते हविष्मान् भरतऽवाजेषु दधिषे सुऽवृक्तिं अवीः वाजस्य गध्यस्य सातौ ॥६॥ वि द्वेषांसि इनुहि वर्धय इळां मदेम शतऽहिमाः सुऽवीराः ॥ ७ ॥ १२ ॥

॥११॥ यजस्व होतः इषितः यजीयान् अग्ने बाधः मरुतां न प्रऽयुक्ति आ नः मित्रावरुणा नासत्या द्यावा होचाय पृथिवी वृत्याः ॥१॥ त्वं होता मंद्रऽतमः नः अध्रुक् अंतः देवः विदथा मर्त्येषु पावकया जुह्वा वहिः आसा अग्ने यजस्व तन्वं तवस्वां ॥२॥ धन्या चित् हि त्वे धिषणा वष्टि प्र देवान् जन्म गृणते यजध्यै वेपिष्ठः अंगिरसां यत् ह विप्रः मधु छंदः भनति रेभः इष्टौ ॥३॥ अदिद्युतत् सु अपाकः विऽभावा अग्ने यजस्व रोदसी उरूची आयुं न यं नमसा रातऽहव्याः अंजंति सुऽप्रयसं पंच जनाः ॥४॥ वृंजे ह यत् नमसा बर्हिः अग्नौ अयामि स्रुक् घृतऽवती सुऽवृक्तिः अम्यंक्षि सद्म सदने पृथिव्याः अस्थायि यज्ञः सूर्ये न चक्षुः ॥५॥ दशस्य नः पुरुऽअनीक होतः देवेभिः अग्ने अग्निऽभिः इधानः रायः सूनो सहसः ववसानाः अति सस्रेम वृजनं न अंहः ॥ ६ ॥ १३ ॥

॥१२॥ मध्ये होता दुरोणे बर्हिषः राट् अग्निः तोदस्य रोदसी

यजंध्यै अयंसःसूनुःसहसःऋतऽवा दूरात्सूर्यःन शोचिषा ततान ॥१॥ आ यस्मिन् त्वे सु अपाके यजत्र यक्षत् राजन् सर्वताताऽइव नु द्यौः चिऽसधस्थः ततरुषःन जंहः हव्या मघानि मानुषा यजंध्यै ॥२॥ तेजिष्ठा यस्य अरतिः वनेऽराट् तोदः अध्वन् न वृधसानः अद्यौत् अद्रोघः न द्रविता चेतति त्मन् अमर्त्यः अवर्चः ओषधीषु ॥३॥ सः अस्माकेभिः एतरिन स्पूर्धैः अग्निः स्तवे दमे आ जातऽवेदाः दुऽअन्नः वन्वन् ऋवा न अर्वा उस्रः पिताऽइव जारयायि यज्ञैः ॥४॥ अध स्म अस्य पनयंति भासः वृथा यत् तक्षत् अनुऽयाति पृथ्वी सद्यः यः स्यंद्रः विऽसितः धवीयान् ऋणः न तायुः अति धन्व राट् ॥५॥ सः त्वं नः अर्वन् निदायाः विश्वेभिः अग्ने अग्निऽभिः इधानः वेषि रायः वि यासि दुच्छुनाः मदेम शतऽहिमाः सुऽवीराः ॥ ६ ॥ १४ ॥

॥१३॥ त्वत् विश्वा सुऽभग सौभगानि अग्ने वि यंति वनिनः न वयाः श्रुष्टी रयिः वाजः वृचऽतूर्यै दिवः वृष्टिः ईड्यः रीतिः अपां ॥१॥ त्वं भगः नः आ हि रत्नं इषे परिज्माऽइव क्षयसि दस्मऽवर्चाः अग्ने मित्रः न बृहतः ऋतस्य असि क्षत्ता वामस्य देव भूरेः ॥२॥ सः सत्ऽपतिः शवसा हंति वृत्रं अग्ने विप्रः वि पणेः भर्ति वाजं यं त्वं प्रऽचेतः ऋतऽजात राया सऽजोषाः नप्त्रा अपां हिनोषि ॥३॥ यः ते सूनो सहसः गीःऽभिः उक्थैः यज्ञैः मर्तः निऽशितिं वेद्या आनट् विश्वं सः देव प्रति वा अरं अग्ने धत्ते धान्यं पत्यते वसव्यैः ॥४॥ ता नृऽभ्यः आ सौश्रवसा सुऽवीरा अग्ने सूनो सहसः पुष्यसे धाः कृणोषि यत् शवसा भूरि पश्वः वयः वृकाय अरये जसुरये ॥५॥ वह्या सूनो सहसः नः विऽहायाः अग्ने तोकं तनयं वाजिनः दाः विश्वा-

भिः गीःऽभिः अभि पूर्तिं अश्याम मदेम शतऽहिमाः सुऽवीराः ॥ ६ ॥ १५ ॥

॥१४॥ अया यः मर्त्यः दुवः धियं जुजोष धीतिऽभिः भसत् नु सः प्र पूर्व्यः इषं वुरीत अवसे ॥१॥ अग्निः इत् हि प्रऽचेताः अग्निः वेधःऽतमः ऋषिः अग्निं होतारं ईळते यज्ञेषु मनुषः विशः ॥२॥ नानां हि अग्ने अवसे स्पर्धन्ते रायः अर्यः तूर्वतः दस्युं आयवः व्रतैः सीक्षन्तः अव्रतं ॥३॥ अग्निः अप्सां ऋतिऽसहं वीरं ददाति सतऽपतिं यस्य चसन्ति शवसः संऽचक्षि शवचवः भिया ॥४॥ अग्निः हि विश्मना निदः देवः मर्तं उरुष्यति सहऽवा यस्य अवृतः रयिः वाजेषु अवृतः ॥५॥ अच्छ नः मित्रऽमहः देव देवान् अग्ने वोचः सुऽमतिं रोदस्योः वीहि स्वस्तिं सुऽक्षितिं दिवः नॄन् द्विषः अंहांसि दुःऽइता तरेम ता तरेम तव अवसा तरेम ॥ ६ ॥ १६ ॥

॥१५॥ इमं ऊं सु वः अतिथिं उषःऽबुधं विश्वासां विशां पतिं ऋंजसे गिरा वेति इत् दिवः जनुषा कत् चित् आ शुचिः ज्योक् चित् अत्ति गर्भः यत् अच्युतं ॥१॥ मित्रं न यं सुऽधितं भृगवः दधुः वनस्पतौ ईड्यं ऊर्ध्वऽशोचिषं सः त्वं सुऽप्रीतः वीतऽहव्ये अद्भुत प्रशस्तिऽभिः महयसे दिवेऽदिवे ॥२॥ सः त्वं दक्षस्य अवृकः वृधः भूः अर्यः परस्य अंतरस्य तरुषः रायः सूनो सहसः मर्त्येषु आ छर्दिः यच्छ वीतऽहव्याय सऽप्रथः भरतऽवाजाय सऽप्रथः ॥३॥ द्युतानं वः अतिथिं स्वःऽनरं अग्निं होतारं मनुषः सुऽअध्वरं विप्रं न द्युक्षऽवचसं सुवृक्तिऽभिः हव्यऽवाहं अरतिं देवं ऋंजसे ॥४॥ पावकया

यः चितयंत्या कृपा क्षामन् रुरुचे उषसः न भानुना तूर्वन् न याम॑न् एतशस्य नु रणे आ यः घृणे न ततृषाणः अजरः॥५॥१७॥ अग्निं॑ऽअग्निं वः सं॑ऽइधा दुवस्यत प्रियं॑ऽप्रियं वः अतिथिं गृणीषणिं उप वः गीः॑ऽभिः अमृतं विवासत देवः देवेषु वनते हि वार्यं देवः देवेषु वनते हि नः दुवः॥६॥ सं॑ऽइद्धं अग्निं सं॑ऽइधा गिरा गृणे शुचिं पावकं पुरः अध्वरे ध्रुवं विप्रं होतारं पुरु॑ऽवारं अद्रुहं कविं सुम्नैः ईमहे जातऽवेदसं॥७॥ त्वां दूतं अग्ने अमृतं युगे॑ऽयुगे हव्य॑ऽवाहं दधिरे पायुं ईड्यं देवासः च मतासः च जागृविं विऽभुं विश्पतिं नमसा नि सेदिरे॥८॥ विऽभूषन् अग्ने उभयान् अनु व्रता दूतः देवानां रजसी॑ सं ईयसे यत् ते धीतिं सु॑ऽमतिं आ॑ऽवृणीमहे अध स्म नः चि॑ऽवरूथः शिवः भव॥९॥ तं सु॑ऽप्रतीकं सु॑ऽदृशं सु॑ऽअंचं अविद्वांसः विदुः॑ऽतरं सपेम सः यक्षत् विश्वा वयुनानि विद्वान् प्र हव्यं अग्निः अमृतेषु वोचत्॥१०॥१८॥ तं अग्ने पासि उत तं पिपर्षि यः ते आनट् कवये शूर धीतिं यज्ञस्य वा निऽशितिं वा उत॑ऽइतिं वा तं इत् पृणक्षि शवसा उत राया॥११॥ त्वं अग्ने वनु॑ष्यतः नि पाहि त्वं ऊं॑ नः सहसा॑ऽवन् अवद्यात् सं त्वा ध्वस्मन्॑ऽवत् अभि एतु पाथः सं रयिः स्पृहयाय्यः सहस्री॥१२॥ अग्निः होता गृह॑ऽपतिः सः राजा विश्वा वेद जनिमा जात॑ऽवेदाः देवानां उत यः मर्त्यानां यजिष्ठः सः प्र यजतां ऋत॑ऽवा॥१३॥ अग्ने यत् अद्य विशः अध्वरस्य होतः॑ पावक॑ऽशोचे वेः त्वं हि यज्वा ऋता यजासि महिना वि यत् भूः हव्या वह यविष्ठ या ते अद्य॥१४॥ अभि प्रयां॑सि सु॑ऽधितानि हि ख्यः नि त्वा दधीत रोदसी॑ यजध्यै अव नः मघ॑ऽवन् वाज॑ऽसाती अग्ने विश्वानि दुः॑ऽइता तरेम ता तरेम तव अवसा तरेम॥१५॥१९॥ अग्ने विश्वेभिः सु॑ऽअनीक देवैः ऊर्णा॑ऽवंतं

प्रथमः सीद् योनिं कुलायिनं घृतऽवंतं सवित्रे यज्ञं नय यजमानाय साधु॥१६॥ इमं ऊं त्यं अथर्वऽवत् अग्निं मंथंति वेधसः यं अंकुऽयंतं आ अनयन् अमूरं श्याव्याभ्यः॥१७॥ जनिष्व देवऽवीतये सर्वऽतातां स्वस्तये आ देवान् वक्षि अमृतान् ऋतऽवृधः यज्ञं देवेषु पिस्पृशः॥१८॥ वयं ऊं त्वा गृहऽपते जनानां अग्ने अकर्म समिधा बृहंतं अस्थूरि नः गार्हऽपत्यानि संतु तिग्मेन नः तेजसा सं शिशाधि ॥ १९ ॥ २० ॥ १ ॥

॥१६॥ त्वं अग्ने यज्ञानां होता विश्वेषां हितः देवेभिः मानुषे जने ॥१॥ सः नः मंद्राभिः अध्वरे जिह्वाभिः यज मंहः आ देवान् वक्षि यक्षि च॥२॥ वेत्थ हि वेधः अध्वनः पथः च देव अंजसा अग्ने यज्ञेषु सुऽक्रतो॰ ॥३॥ त्वां ईळे अध द्विता भरतः वाजिऽभिः शुनं ईजे यज्ञेषु यज्ञियं॥४॥ त्वं इमा वार्या पुरु दिवःऽदासाय सुन्वते भरत्ऽवाजाय दाशुषे॥५॥२१॥ त्वं दूतः अमर्त्यः आ वहः दैव्यं जनं शृण्वन् विप्रस्य सुऽस्तुतिं॥६॥ त्वां अग्ने सुऽआध्यः मर्तासः देवऽवीतये यज्ञेषु देवं ईळते ॥७॥ तव प्र यक्षि संऽदृशं उत क्रतुं सुऽदानवः विश्वे जुषंत कामिनः॥८॥ त्वं होता मनुःऽहितः वह्निः आसा विदुःऽतरः अग्ने यक्षि दिवः विशः॥९॥ अग्ने आ याहि वीतये गृणानः हव्यऽदातये नि होता सत्सि बर्हिषि॥१०॥२२॥ तं त्वा समित्ऽभिः अंगिरः घृतेन वर्धयामसि बृहत् शोच यविष्ठ्य॥११॥ सः नः पृथु श्रवाय्यं अच्छ देव विवाससि बृहत् अग्ने सुऽवीर्यं॥१२॥ त्वां अग्ने पुष्करात् अधि अथर्वा निः अमंथत मूर्धः विश्वस्य वाघतः॥१३॥ तं ऊं त्वा दध्यङ् ऋषिः पुचः ईधे अथर्वणः वृचऽहनं पुरंऽदरं॥१४॥ तं ऊं त्वा पाथ्यः वृषा सं ईधे दस्युहनऽतमं धनंऽजयं रणेऽरणे

वि यः जघान शमिताऽइव चर्मोपऽस्तिरे पृथिवीं सूर्याय ॥१॥
वनेषु वि अंतरिक्षं ततान वाजंअर्वत्सु पयः उस्रियासु हृत्सु
क्रतुं वरुणः अप्सु अग्निं दिवि सूर्यं अदधात् सोमं अद्रौ ॥२॥
नीचीनंऽबारं वरुणः कवंधं प्र ससर्ज रोदसी अंतरिक्षं तेन वि-
श्वस्य भुवनस्य राजा यवंन वृष्टिः वि उनत्ति भूमं ॥३॥ उनत्ति भूमिं
पृथिवीं उत द्यां यदा दुग्धं वरुणः वष्टि आत् इत् सं अभ्रेण वसत
पर्वतासः तविषीऽयंतः अथयंत वीराः ॥४॥ इमां ऊं सु आसुरस्य
श्रुतस्य महीं मायां वरुणस्य प्र वोचं मानेनऽइव तस्थिऽवान्
अंतरिक्षे वि यः ममे पृथिवीं सूर्येण ॥५॥३०॥ इमां ऊं नु कविऽत-
मस्य मायां महीं देवस्य नकिः आ दधर्ष एकं यत् उक्षा न पृणंति
एनीः आऽसिंचंतीः अवनयः समुद्रं ॥६॥ अर्यम्यं वरुण मित्र्यं वा
सखायं वा सदं इत् भ्रातरं वा वेशं वा नित्यं वरुण अरणं वा यत्
सीं आगः चकृम शिश्रथः तत् ॥७॥ कितवासः यत् रिरिपुः न दीवि
यत् वा घ सत्यं उत यत् न विद्म सर्वा ता वि स्य शिथिराऽइव देव
अध ते स्याम वरुण प्रियासः ॥ ८ ॥ ३१ ॥

॥८६॥ इंद्रामी यं अवथः उभा वाजेषु मर्त्यं दृळ्हा चित् सः प्र
भेदति द्युम्ना वाणीःऽइव चितः ॥१॥ या पृतनासु दुस्तरा या वाजेषु
श्रवाय्या या पंच चर्षणीः अभि इंद्रामी ता हवामहे ॥२॥ तयोः
इत् अमंऽवत् शवः तिग्मा दिद्युत् मघोनोः प्रति दुर्णा गभस्त्योः
गवां वृजेऽभे आ ईषते ॥३॥ ता वां एषे रथानां इंद्रामी हवामहे
पतीं तुरस्य राधसः विद्वांसा गिर्वणःऽतमा ॥४॥ ता वृधंतौ अनु
द्यून मर्तीय देवौ अदभा अहंता चित पुरः दधे अंशाऽइव देवौ

अर्वते ॥५॥ एव इंद्राग्निऽभ्यां अहावि हव्यं भूर्ण्यं घृतं न पूतं अद्रिऽभिः ता सूरिषु श्रवः बृहत् रयिं गृणत्ऽसु दिधृतं इषं गृणत्ऽसु दिधृतं ॥ ६ ॥ ३२ ॥

॥८७॥ प्र वः महे मतयः यंतु विष्णवे मरुत्वते गिरिऽजाः एवयामरुत प्र शर्धाय प्रऽयज्यवे सुऽखादये तवसे भंदत्ऽइष्टये धुनिऽव्रताय शवसे ॥१॥ प्र ये जाताः महिना ये च नु स्वयं प्र विद्मना ब्रुवते एवयामरुत क्रत्वा तत् वः मरुतः न आऽधृषे शवः दाना महा तत एषां अधृष्टासः न अद्रयः ॥२॥ प्र ये दिवः बृहतः मूरिवरे गिरा सुऽभुक्वानः सुऽभ्वः एवयामरुत न येषां इरी सधऽस्थे ईट्टे आ अयमयः न स्वऽविद्युतः प्र स्यंद्रासः धुनीनां ॥३॥ सः चक्रमे महतः निः उरुऽक्रमः समानस्मात सदसः एवयामरुत यदा अयुक्त त्मना स्वात् अधि स्नुऽभिः विऽस्पर्धसः विऽमहसः जिगाति शेऽवृधः नृऽभिः ॥४॥ स्वनः न वः अमवान् एजयत् वृषा त्वेषः ययिः तविषः एवयामरुत येन सहंतः ऋंजते स्वऽरोचिषः स्थाःऽरश्मानः हिरण्ययाः सुऽआयुधासः इष्मिणः ॥५॥ ३३ ॥ अपारः वः महिमा वृद्धऽशवसः त्वेषं शवः अवतु एवयामरुत स्थातारः हि प्रऽसितौ संऽदृशि स्थन ते नः उरुष्यत निदः सुस्रुक्वांसः न अमयः ॥६॥ ते रुद्रासः सुऽमखाः अमयः यथा तुविऽद्युम्नाः अवंतु एवयामरुत दीर्घं पृथु प्रऽप्रथे सह्य पार्थिवं येषां अज्मेषु आ महः शर्धांसि अञ्जतऽएनसां ॥७॥ अद्वेषः नः मरुतः गातुं आ इतन श्रोत हवं जरितुः एवयामरुत विष्णोः महः सऽमन्यवः युयोतन स्मत रथ्यः न दंसना अप द्वेषांसि सनुतः ॥८॥ गंत नः यज्ञं यज्ञियाः सुऽशमि श्रोत हवं अरक्षः एवयामरुत ज्येष्ठासः न

पर्वतासः विऽओमनि यूयं तस्य प्रऽचेतसः स्यात दुःऽधर्तवः निदः ॥ ९ ॥ ३४ ॥ ६ ॥ ५ ॥

॥ इति पंचमं मंडलं समाप्तं ॥

॥१॥ त्वं हि अग्ने प्रथमः मनोता अस्याः धियः अभवः दस्म होता त्वं सी वृषन् अकृणोः दुस्तरीतु सहः विश्वस्मै सहसे सहध्यै ॥१॥ अध होता नि असीदः यजीयान इळः पदे इषयन ईड्यः सन तं त्वा नरः प्रथमं देवऽयंतः महः राये चितयंतः अनु ग्मन ॥२॥ वृताऽइव यंतं बहुऽभिः वसव्यैः त्वे रयिं जागृऽवांसः अनु ग्मन रुशंतं अग्निं दर्शतं बृहंतं वपाऽवंतं विश्वहा दीदिऽवांसं ॥३॥ पदं देवस्य नमसा व्यंतः अवस्यवः श्रवः आपन अमृक्तं नामानि चित दधिरे यज्ञियानि भद्रायां ते रणयंत संऽदृष्टौ ॥४॥ त्वां वर्धंति क्षितयः पृथिव्यां त्वां रायः उभयासः जनानां त्वं वाता तरणे चेत्यः भूः पिता माता सदं इत मानुषाणां ॥५॥३५॥ सपर्येण्यः सः प्रियः विक्षु अग्निः होता मंद्रः नि ससाद यजीयान् तं त्वा वयं दमे आ दीदिऽवांसं उप ज्ञुऽबाधः नमसा सदेम ॥६॥ तं त्वा वयं सुऽध्यः नव्यं अग्ने सुम्नऽयवः ईमहे देवऽयंतः त्वं विशः अनयः दीद्यानः दिवः अग्ने बृहता रोचनेन ॥७॥ विशां कविं विश्पतिं शश्वतीनां नितोशनं वृषभं चर्षणीनां प्रेतिऽइषणिं इषयंतं पावकं राजंतं अग्निं यजतं रयीणां ॥८॥ सः अग्ने ईजे शशमे च मर्तः यः ते आनट संऽइधा हव्यऽदातिं यः आऽहुतिं परि वेद नमःऽभिः विश्वा इत सः वामा दधते त्वाऽऊतः ॥९॥ अस्मै ऊं ते महि महे विधेम नमःऽभिः अग्ने संऽइधा उत हव्यैः वेदीं सूनो सहसः गीःऽभिः उक्थैः आ ते भद्रायां सुऽमतौ

यतेम ॥१०॥ आ यः ततंथ रोदसी वि भासा श्रवःऽभिः च श्रवस्यः तरुचः बृहत्ऽभिः वाजैः स्थविरेभिः अस्मे रेवत्ऽभिः अग्ने वि ऽतरं वि भाहि ॥११॥ नृऽवत् वसो सदं इत् धेहि अस्मे भूरि तोकाय तनयाय पश्वः पूर्वीः इषः बृहतीः आरेऽअघाः अस्मे भद्रा सौश्रवसानि संतु ॥१२॥ पुरूणि अग्ने पुरुधा त्वाऽया वसूनि राजन् वसुता ते अश्याम् पुरूणि हि त्वे पुरुऽवार संति अग्ने वसु विधते राजनि त्वे ॥ १३ ॥ ३६ ॥ ४ ॥

॥२॥ त्वं हि क्षैतऽवत् यशः अग्ने मित्रः न पत्यसे त्वं विऽचर्षणे श्रवः वसो पुष्टिं न पुष्यसि ॥१॥ त्वां हि स्म चर्षणयः यज्ञेभिः गीःऽभिः ईळते त्वां वाजी याति अवृकः रजःऽतूः विश्वऽचर्षणिः ॥२॥ सऽओषः त्वा दिवः नरः यज्ञस्य केतुं इंधते यत् ह स्यः मानुषः जनः सुम्नऽयुः जुह्वे अध्वरे ॥३॥ ऋधत् यः ते सुऽदानवे धिया मर्तः शशमते ऊती सः बृहतः दिवः द्विषः अंहः न तरति ॥४॥ सऽइधा यः ते आऽहुतिं निऽशितिं मर्त्यः नशत् वयाऽवंतं सः पुष्यति क्षयं अग्ने शतऽआयुषं ॥५॥ ७॥ त्वेषः ते धूमः ऋण्वति दिवि सन् शुक्रः आऽततः सूरः न हि द्युता त्वं कृपा पावक रोचसे ॥६॥ अध हि विक्षु ईड्यः असि प्रियः नः अतिथिः रण्वः पुरिऽइव जूर्यः सूनुः न चय्यायः ॥७॥ ऋत्वा हि द्रोणे अज्यसे अग्ने वाजी न कृत्व्यः परिज्माऽइव स्वधा गयः अत्यः न ह्वार्यः शिशुः ॥८॥ त्वं त्या चित् अच्युता अग्ने पशुः न यवसे धाम ह यत् ते अजर वना वृश्चंति शिक्वसः ॥९॥ वेषिं हि अध्वरिऽयंतां अग्ने होतां दमे विशां सऽऋधः विश्पते कृणु जुषस्व हव्यं अंगिरः ॥१०॥ अच्छ नः मित्रऽमहः देव देवान् अग्ने वोचः सुऽमतिं रोदस्योः वीहि स्वस्तिं सुऽक्षितिं दिवः नृन् द्विषः अंहांसि दुःऽइता तरेम ता तरेम तव अवसा तरेम ॥११॥२॥

॥३॥ अग्ने सः क्षेषत् ऋतऽपाः ऋतेऽजाः उरु ज्योतिः नशते देवऽयुः ते यं त्वं मित्रेण वरुणः सऽजोषाः देव पासि त्यजसा मर्तं अंहः॥१॥ ईजे यज्ञेभिः शशमे शमीभिः ऋधत्ऽ वाराय अग्नये दद्-दाश एव चन तं यशसौ अजुष्टिः न अंहः मर्तः नशते न प्रऽदग्निः ॥२॥ सूरः न यस्य दृशतिः अरेपाः भीमा यत् एति शुचतः ते आ धीः हेषस्वतः शुरुधः न अयं अक्तोः कुचं चित् रथः वसतिः वनेऽजाः ॥३॥ तिग्मं चित् एमं महि वर्पः अस्य भसत् अश्वः न यमसानः आसा विऽजेहमानः परिषुः न जिह्वां द्रविः न द्रवयति दारु धक्षत् ॥४॥ सः इत् अस्ताऽइव प्रति धात् असिष्यन् शिशीत तेजः अयसः न धारां चिचऽध्रजतिः अरतिः यः अक्तोः वेः न दुऽसद्मा रघुपत्मऽजंहाः॥५॥३॥ सः ईं रेभः न प्रति वस्ते उस्राः शोचिषा ररीति मिचऽमहाः नक्तं यः ईं अरुषः यः दिवा नृन् अमर्त्यः अरुषः यः दिवा नृन्॥६॥ दिवः न यस्य विधतः नवीनोत् वृषा रुक्षः ओषधीषु नूनोत् घृणा न यः ध्रजसा पत्मना यन् आ रोदसी वसुना दं सुऽपत्नी॰॥७॥ धायःऽभिः वा यः युज्येभिः अर्कैः विऽद्युत् न दविद्योत् स्वेभिः शुष्मैः शधैः वा यः मरुतां ततक्ष ऋभुः न त्वेषः रभसानः अद्यौत् ॥ ८ ॥ ४ ॥

॥४॥ यथा होतः मनुषः देवऽतातौ यज्ञेभिः सूनो सहसः यजासि एव नः अद्य समना समानान् उशन् अग्ने उशतः यक्षि देवान् ॥१॥ सः नः विभाऽवा चक्षणिः न वस्तोः अग्निः वंदारु वेद्यः चनः धात् विश्वऽआयुः यः अमृतः मर्त्येषु उषःऽभुत् भूत् अतिथिः जातऽवेदाः॥२॥ द्यावः न यस्य पनयंति अभ्वं भासांसि वस्ते सूर्यः न शुक्रः वि यः इनोति अजरः पावकः अश्वस्य चित् शिश्नथत् पूः

र्व्याणि॥३॥ वह्मा हि सूनो असि अह्नऽसद्वा चक्रे अग्निः जनुषा अज्मं अन्नं सः त्वं नः ऊर्जऽसने ऊर्जं धाः राजाऽइव जेः अवृके क्षेषि अंतः॥४॥ निऽतिक्तिं यः वारणं अन्नं अत्ति वायुः न राष्ट्री अति एति अक्तून् तुर्याम यः ते आऽदिशं अरातीः अत्यः न हुतः पतंतः परिऽहृत॥५॥५॥ आ सूर्यः न भानुमत्ऽभिः अर्कैः अग्ने ततंथ रोदसी विभासा चिचः नयत् परि तमांसि अक्तः शोचिषा पत्मन् औशिजः न दीयन्॥६॥ त्वां हि मंद्रऽतमं अर्कऽशोकैः ववृमहे महि नः श्रोषि अग्ने इंद्रं न त्वा शवसा देवता वायुं पृणंति राधसा नृऽतमाः॥७॥ नु नः अग्ने अवृकेभिः स्वस्ति वेषि रायः पथिऽभिः पर्षि अंहः ता सूरिऽभ्यः गृणते रासि सुम्नं मदेम शतऽहिमाः सुऽवीराः॥८॥६॥

॥५॥ हुवे वः सूनुं सहसः युवानं अद्रोघऽवाचं मतिऽभिः यविष्ठं यः इन्वति द्रविणानि प्रऽचेताः विश्वऽवाराणि पुरुऽवारः अध्रुक्॥१॥ त्वे वसूनि पुरुऽअनीक होतः दोषा वस्तोः आ ईरिरे यज्ञियासः क्षामंऽइव विश्वा भुवनानि यस्मिन् सं सौभगानि दधिरे पावके॥२॥ त्वं विक्षु प्रऽदिवः सीदः आसु क्रत्वा रथीः अभवः वार्याणां अतः इनोषि विधते चिकित्वः वि आनुषक् जातऽवेदः वसूनि॥३॥ यः नः सनुत्यः अभिऽदासत् अग्ने यः अंतरः मिचऽमहः वनुष्यात् तं अजरेभिः वृषऽभिः तव स्वैः तपं तपिष्ठ तपसा तपस्वान्॥४॥ यः ते यज्ञेन संऽइधा यः उक्थैः अर्केभिः सूनो सहसः ददाशत् सः मर्त्येषु अमृत प्रऽचेताः राया द्युम्नेन श्रवसा वि भाति॥५॥ सः तत् कृधि इषितः तूयं अग्ने स्पृधः बाधस्व सहसा सहस्वान् यत् शस्यसे द्युऽभिः अक्तः वचःऽभिः तत् जुषस्व जरितुः घोषि

मन्म॥६॥ अश्याम तं कामं अग्ने तव ऊती अश्याम रयिं रयिऽवः सुऽवीरं अश्याम वाजं अभि वाजयंतः अश्याम द्युम्नं अजर अजरं ते ॥ ७ ॥ ७ ॥

॥६॥ प्र नव्यसा सहसः सूनुं अच्छ यज्ञेन गातुं अवः इच्छमानः वृश्चत्ऽवनं कृष्णऽयामं रुशंतं वीती होतारं दिव्यं जिगाति॥१॥ सः श्वितानः तन्यतुः रोचनऽस्थाः अजरेभिः नानदत्ऽभिः यविष्ठः यः पावकः पुरुऽतमः पुरूणि पृथूनि अग्निः अनुऽयाति भवन्॥२॥ वि ते विष्वक् वातऽजूतासः अग्ने भामासः शुचे शुचयः चरंति तुविऽम्रक्षासः दिव्याः नवऽग्वाः वना वनंति धृषता रुजंतः॥३॥ ये ते शुक्रासः शुचयः शुचिष्मः क्षां वपंति विऽसितासः अश्वाः अधभ्रमः ते उर्विया वि भाति यातयमानः अधि सानु पृश्नेः॥४॥ अध जिह्वा पापतीति प्र वृष्णः गोषुऽयुधः न अशनिः सृजाना पूरस्यऽइव प्रऽसितिः क्षातिः अग्नेः दुःऽवर्तुः भीमः दयते वनानि॥५॥ आ भानुना पार्थिवानि जयांसि महः तोदस्य धृषता ततंथ सः बाधस्व अप भया सहःऽभिः स्पृधः वनुष्यन् वनुषः नि जूर्व॥६॥ सः चित्र चित्रं चितयंतं अस्मे चित्रऽक्षत्र चित्रऽतमं वयःऽधां चंद्रं रयिं पुरुऽवीरं बृहंतं चंद्र चंद्राभिः गृणते युवस्व॥७॥८॥

॥७॥ मूर्धानं दिवः अरतिं पृथिव्याः वैश्वानरं ऋत आ जातं अग्निं कविं संऽराजं अतिथिं जनानां आसन आ पात्रं जनयंत देवाः॥१॥ नाभिं यज्ञानां सदनं रयीणां महां आऽहावं अभि संनवंत वैश्वानरं रथ्यं अध्वराणां यज्ञस्य केतुं जनयंत देवाः॥२॥ त्वत विप्रः जायते वाजी अग्ने त्वत वीरासः अभिमातिऽसहः वै-

ष्वानर त्वं अस्मासु धेहि वसूनि राजन् स्पृहयाय्याणि ॥३॥ त्वां विश्वे अमृत जायमानं शिप्रुं न देवाः अभिसंनवंते तव क्रतुऽभिः अमृतऽत्वं आयन् वैश्वानर यत् पित्रोः अदीदेः ॥४॥ वैश्वानर तव तानि व्रतानि महानि अग्ने नकिः आ दधर्ष यत् जायमानः पित्रोः उपऽस्थे अविंदः केतुं वयुनेषु अह्नां ॥५॥ वैश्वानरस्य विऽमितानि चक्षसा सानूनि दिवः अमृतस्य केतुना तस्य इत् ऊं विश्वा भुवना अधि मूर्धनि वयाःऽइव रुरुहुः सप्त विऽस्रुहः ॥६॥ वि यः रजांसि अमिमीत सुऽक्रतुः वैश्वानरः वि दिवः रोचना कविः परि यः विश्वा भुवनानि पप्रथे अदब्धः गोपाः अमृतस्य रक्षिता ॥ ७ ॥ ९ ॥

॥८॥ पृक्षस्य वृष्णः अरुषस्य नु सहः प्र नु वोचं विदथा जातऽवेदसः वैश्वानराय मतिः नव्यसी शुचिः सोमःऽइव पवते चारुः अग्नये ॥१॥ सः जायमानः परमे विऽओमनि व्रतानि अग्निः व्रतऽपाः अरक्षत वि अंतरिक्षं अमिमीत सुऽक्रतुः वैश्वानरः महिना नाकं अस्पृशत् ॥२॥ वि अस्तभ्नात् रोदसी मित्रः अद्भुतः अंतःऽवावत् अकृणोत् ज्योतिषा तमः वि चर्मणीऽइव धिषणे अवर्तयत् वैश्वानरः विश्वं अधत्त वृष्ण्यं ॥३॥ अपां उपऽस्थे महिषाः अगृभ्णत विशः राजानं उप तस्थुः ऋग्मियं आ दूतः अग्निं अभरत् विवस्वतः वैश्वानरं मातरिश्वा पराऽवतः ॥४॥ युगेऽयुगे विदथ्यं गृणतऽभ्यः अग्ने रयिं यशसं धेहि नव्यसी पव्याऽइव राजन् अघऽशंसं अजर नीचा नि वृश्च वनिनं न तेजसा ॥५॥ अस्माकं अग्ने मघवत्ऽसु धारय अनामि क्षत्रं अजरं सुऽवीर्यं वयं जयेम शतिनं सहस्रिणं वैश्वानर वाजं अग्ने तव ऊतिऽभिः ॥६॥ अदब्धे-

भिः तव गोपाभिः इष्टे अस्माकं पाहि चिऽसधस्थ सूरीन् रक्ष च नः दुषाँ शर्धः अग्ने वैश्वानर प्र च तारीः स्तवानः ॥ ७ ॥ १० ॥

॥९॥ अहः च कृष्णं अहः अर्जुनं च वि वर्तेते रजसी वेद्याभिः वैश्वानरः जायमानः न राजा अव अतिरत् ज्योतिषा अग्निः तमाँसि ॥ १ ॥ न अहं तंतुं न वि जानामि ओतुं न यं वयंति संऽअरे अतमानाः कस्य स्वित् पुचः इह वक्कानि परः वदाति अवरेण पिचा॥२॥ सः इत् तंतुं सः वि जानाति ओतुं सः वक्कानि ऋतुऽथा वदाति यः ई चिकेतत् अमृतस्य गोपाः अवः चरन् परः अन्येन पश्यन् ॥३॥ अयं होता प्रथमः पश्यत इमं इदंज्योतिः अमृतं मर्त्येषु अयं सः जज्ञे ध्रुवः आ निऽसत्तः अमर्त्यः तन्वा वर्धमानः॥ ४॥ ध्रुवं ज्योतिः निऽहितं दृशये कं मनः जविष्ठं पतयत्ऽसु अंतः विश्वे देवाः सऽमनसः सऽकेताः एकं क्रतुं अभि वियंति साधु॥५॥ वि मे कर्णा पतयतः वि चक्षुः वि इदंज्योतिः हृदये आऽहितं यत् वि मे मनः चरति दूरेऽआधीः किं स्वित् वक्ष्यामि किं ऊं नु मनिष्ये॥६॥ विश्वे देवाः अनमस्यन् भियानाः त्वां अग्ने तमसि तस्थिऽवांसं वैश्वानरः अवतु ऊतये नः अमर्त्यः अवतु ऊतये नः ॥ ७ ॥ ११ ॥

॥१०॥ पुरः वः मंद्रं दिव्यं सुऽवृक्तिं प्रऽयति यज्ञे अग्निं अध्वरे दधिध्वं पुरः उक्थेभिः सः हि नः विभाऽवा सुऽअध्वरा करति जातऽवेदाः॥१॥ तं ऊं ह्युऽमः पुरुऽअनीकहोतः अग्ने अग्निऽभिः मनुषः इधानः स्तोमं यं अस्मै ममताऽइव स्नूषं घृतं न शुचि मतयः पवंते ॥२॥ पीपाय सः श्रवसा मर्त्येषु यः अग्नये ददाश विप्रः उक्थैः चि-

चाभिः तं ऊतिऽभिः चिचऽशोचिः वजस्य साता गोऽमतः दधाति ॥३॥ आ यः पप्रौ जायमानः उर्वी दूरेऽदृशा भासा कृष्णऽअध्वा अध बहु चित् तमः ऊम्यायाः तिरः शोचिषा दद्दशे पावकः ॥४॥ नु नः चित्रं पुरुऽवाजाभिः ऊती अग्ने रयिं मघवतऽभ्यः च धेहि ये राधसा श्रवसा च अति अन्यान् सुऽवीर्येभिः च अभि संति जनान् ॥५॥ इमं यज्ञं चनः धाः अग्ने उशन् यं ते आसानः जुहुते हविष्मान् भरतऽवाजेषु दधिषे सुऽवृक्तिं अवीः वाजस्य गध्यस्य सातौ ॥६॥ वि द्वेषांसि इनुहि वर्धय इळां मदेम शतऽहिमाः सुऽवीराः ॥ ७ ॥ १२ ॥

॥११॥ यजस्व होतः इषितः यजीयान् अग्ने बाधः मरुतां न प्रऽयुक्ति आ नः मित्रावरुणा नासत्या द्यावा होचाय पृथिवी वृत्याः ॥१॥ त्वं होता मंद्रऽतमः नः अध्रुक् अंतः देवः विदथा मर्त्येषु पावकया जुह्वा वहिः आसा अग्ने यजस्व तन्वं तव स्वां ॥२॥ धन्या चित् हि त्वे धिषणा वष्टि प्र देवान् जन्म गृणते यजध्यै वेपिष्ठः अंगिरसां यत् ह विप्रः मधु छंदः भनति रेभः इष्टौ ॥३॥ अदिद्युतत् सु अपाकः विऽभावा अग्ने यजस्व रोदसी उरूची आयुं न यं नमसा रातऽहव्याः अंजंति सुऽप्रयसं पंच जनाः ॥४॥ वृंजे ह यत् नमसा बर्हिः अग्नौ अयामि सुक् घृतऽवती सुऽवृक्तिः अस्य अक्षि सद्म सदने पृथिव्याः अस्थायि यज्ञः सूर्ये न चक्षुः ॥५॥ दृशस्य नः पुरुऽअनीक होतः देवेभिः अग्ने अग्निऽभिः इधानः रायः सूनोः सहसः ववसानाः अति सस्रेम वृजनं न अंहः ॥ ६ ॥ १३ ॥

॥१२॥ मध्ये होता दुरोणे बर्हिषः राट् अग्निः तोदस्य रोदसी

यजंध्यै अयंसः सूनुः सहसः ऋतऽवा दूरात्सूर्यः न शोचिषा ततान ॥१॥ आ यस्मिन् त्वे सु अपाके यजत्र यक्षत् राजन् सवितातऽइव नु द्यौः चिऽसधस्थः ततरुषः न जंहः हव्या मघानि मानुषा यजंध्यै ॥२॥ तेजिष्ठा यस्य अरतिः वनेऽराट् तोदः अध्वन् न वृधसानः अद्यौत् अद्रोघः न द्रविता चेतति त्मन् अमर्त्यः अवर्चः ओषधीषु ॥३॥ सः अस्माकेभिः एतरि न पूषः अग्निः स्तवे दमे आ जातऽवेदाः दुऽअत्रः वन्वन् ऋत्वा न अवी उस्रः पिताऽइव जारयायि यज्ञैः ॥४॥ अध स्म अस्य पनयंति भासः वृथा यत् तक्षत् अनुऽयाति पृथ्वी सद्यः यः स्यंद्रः विऽसितः धवीयान् ऋणः न तायुः अतिं धन्व राट् ॥५॥ सः त्वं नः अर्वन् निदायाः विश्वेभिः अग्ने अग्निऽभिः इधानः वेषिं रायः वि यासि दुच्छुनाः मदेम शतऽहिमाः सुऽवीराः ॥ ६ ॥ १४ ॥

॥१३॥ त्वत् विश्वा सुऽभग सौभगानि अग्ने वि यंति वनिनः न वयाः श्रुष्टी रयिः वाजः वृचऽतूर्यै दिवः वृष्टिः ईड्यः रीतिः अपां ॥१॥ त्वं भगः नः आ हि रत्नं इषे परिज्माऽइव क्षयसि दस्मऽवर्चाः अग्ने मिचः न बृहतः ऋतस्य असि क्षत्ता वामस्य देव भूरेः ॥२॥ सः सत्ऽपतिः शवसा हंति वृचं अग्ने विप्रः वि पणेः भर्ति वाजं यं त्वं प्रऽचेतः ऋतऽजात राया सऽजोषाः नप्त्रा अपां हिनोषि ॥३॥ यः ते सूनो सहसः गीःऽभिः उक्थैः यज्ञैः मर्तः निऽशितिं वेद्या आनट् विश्वं सः देव प्रति वा अरं अग्ने धत्ते धान्यं पत्यते वसव्यैः ॥४॥ ता नृऽभ्यः आ सौश्रवसा सुऽवीरा अग्ने सूनो सहसः पुष्यसे धाः कृणोषि यत् शवसा भूरि पश्वः वयः वृकाय अरये जसुरये ॥५॥ वह्मा सूनो सहसः नः विऽहायाः अग्ने तोकं तनयं वाजिनः दाः विश्वा-

भिः गीःऽभिः अभि पूर्तिं अश्याम मदेम शतऽहिमाः सुऽवीराः ॥ ६ ॥ १५ ॥

॥१४॥ अग्ना यः मर्त्यैः दुवः धियं जुजोष धीतिऽभिः भसत् नु सः प्र पूर्व्यः इषं वुरीत अवसे ॥१॥ अग्निः इत् हि प्रऽचेताः अग्निः वेधःऽतमः ऋषिः अग्निं होतारं ईळते यज्ञेषु मनुषः विशः ॥२॥ नानां हि अग्ने अवसे स्पर्धन्ते रायः अर्यः तूर्वतः दस्युं आयवः व्रतैः सीक्षन्तः अव्रतं ॥३॥ अग्निः अप्सां ऋतिऽसहं वीरं ददाति सतऽपतिं यस्य चसन्ति शवसः संऽचक्षि शचवः भिया ॥४॥ अग्निः हि विश्मना निदः देवः मर्तं उरुष्यति सहऽवा यस्य अवृतः रयिः वाजेषु अवृतः ॥५॥ अच्छ नः मित्रऽमहः देव देवान् अग्ने वोचः सुऽमतिं रोदस्योः वीहि स्वस्तिं सुऽक्षितिं दिवः नृन् द्विषः अंहांसि दुःऽइता तरेम ता तरेम तव अवसा तरेम ॥ ६ ॥ १६ ॥

॥१५॥ इमं ऊं सु वः अतिथिं उषःऽबुधं विश्वासां विशां पतिं ऋंजसे गिरा वेति इत् दिवः जनुषा कत् चित् आ शुचिः ज्योक् चित् अत्ति गर्भः यत् अच्युतं ॥१॥ मित्रं न यं सुऽधितं भृगवः दधुः वनस्पतौ ईड्यं ऊर्ध्वऽशोचिषं सः त्वं सुऽप्रीतः वीतऽहव्ये अद्भुत प्रशस्तिऽभिः महयसे दिवेऽदिवे ॥२॥ सः त्वं दक्षस्य अवृकः वृधः भूः अर्यः परस्य अंतरस्य तरुषः रायः सूनो सहसः मर्त्येषु आ छर्दिः यच्छ वीतऽहव्याय सऽप्रथः भरतऽवाजाय सऽप्रथः ॥३॥ द्युतानं वः अतिथिं स्वःऽनरं अग्निं होतारं मनुषः सुऽअध्वरं विप्रं न द्युक्षऽवचसं सुवृक्तिऽभिः हव्यऽवाहं अरतिं देवं ऋंजसे ॥४॥ पावकया

यः चितयंत्या कृपा क्षामन् रुरुचे उषसः न भानुना तूर्वन् न याम॑न् एतशस्य नु रणे आ यः घृणे न ततृषाणः अजरः॥५॥१७॥ अग्निं॑ऽअग्निं वः सं॑ऽइधा दुवस्यत प्रियं॑ऽप्रियं वः अतिथिं गृणीषणि॑ उप वः गीः॑ऽभिः अमृतं॑ विवासत देवः देवेषु वनते हि वार्यं॑ देवः देवेषु वनते हि नः दुवः॥६॥ सं॑ऽइद्धं अग्निं सं॑ऽइधा गिरा गृणे शुचिं पावकं पुरः अध्वरे ध्रुवं विप्रं होतारं पुरु॑ऽवारं अद्रुहं कविं सुम्नैः ईमहे जातऽवेदसं॥७॥ त्वां दूतं अग्ने अमृतं युगे॑ऽयुगे हव्य॑ऽवाहं दधिरे पायुं ईड्यं देवासः च मतीसः च जागृविं विऽभुं विश्पतिं नमसा नि सेदिरे॥८॥ विऽभूषन् अग्ने उभयान् अनु व्रता दूतः देवानां रजसी॑ सं ईयसे यत् ते धीतिं सुऽमतिं आ॑ऽवृणीमहे अध स्म नः चि॑ऽवरूथः शिवः भव॥९॥ तं सुऽप्रतीकं सुऽदृशं सु॑ऽअंचं अविद्वांसः विदुः॑ऽतरं सुपेम सः यक्षत् विश्वा वयुनानि विद्वान् प्र हव्यं अग्निः अमृतेषु वोचत्॥१०॥१८॥ तं अग्ने पासि उत तं पिपर्षि यः ते आनट् कवये शूर धीतिं यज्ञस्य वा निऽशितिं वा उत॑ऽइतिं वा तं इत् पृणक्षि शवसा उत राया॥११॥ त्वं अग्ने वनुष्यतः नि पाहि त्वं ऊं॑ नः सहसा॑ऽवन् अवद्यात् सं त्वा ध्वस्मन्॑ऽवत् अभि एतु पाथः सं रयिः स्पृहयाय्यः सहस्री॥१२॥ अग्निः होता गृह॑ऽपतिः सः राजा विश्वा वेद जनिमा जात॑ऽवेदाः देवानां उत यः मर्त्यानां यजिष्ठः सः प्र यजतां ऋत॑ऽवा॥१३॥ अग्ने यत् अद्य विशः॑ऽअध्वरस्य होतः॑ पावक॑ऽशोचे वेः त्वं हि यज्वा ऋता यजासि महिना वि यत् भूः हव्या वह यविष्ठ या ते अद्य॥१४॥ अभि प्रयां॑सि सु॑ऽधितानि हि ख्यः नि त्वा दधीत रोदसी॑ यजध्यै अव नः मघ॑ऽवन् वाज॑ऽसातौ अग्ने विश्वानि दुः॑ऽइता तरेम ता तरेम तव अवसा तरेम॥१५॥१९॥ अग्ने विश्वेभिः सु॑ऽअनीक देवैः ऊर्ण॑ऽवंतं

प्रथमः सीद् योनिं कुलायिनं घृतऽवंतं सविचे यज्ञं नय यजमानाय साधु॥१६॥ इमं ऊं त्यं अथर्वऽवत् अग्निं मंथंति वेधसः यं अंकुऽयंतं आ अनयन् अमूरं श्याव्याभ्यः॥१७॥ जनिष्व देवऽवीतये सर्वऽतातां स्वस्तये आ देवान् वक्षि अमृतान् ऋतऽवृधः यज्ञं देवेषु पिस्पृशः॥१८॥ वयं ऊं त्वा गृहऽपते जनानां अग्ने अकर्म समिधा बृहंतं अस्थूरि नः गार्हऽपत्यानि संतु तिग्मेन नः तेजसा सं शिशाधि ॥ १९ ॥ २० ॥ १ ॥

॥१६॥ त्वं अग्ने यज्ञानां होता विश्वेषां हितः देवेभिः मानुषे जने ॥१॥ सः नः मंद्राभिः अध्वरे जिह्वाभिः यज महः आ देवान् वक्षि यक्षि च॥२॥ वेत्थ हि वेधः अध्वनः पथः च देव अंजसा अग्ने यज्ञेषु सुऽक्रतो° ॥३॥ त्वां ईळे अध द्विता भरतः वाजिऽभिः शुनं ईजे यज्ञेषु यज्ञियं॥४॥ त्वं इमा वार्या पुरु दिवःऽदासाय सुन्वते भरत्ऽवाजाय दाशुषे॥५॥२१॥ त्वं दूतः अमर्त्यः आ वह दैव्यं जनं शृण्वन् विप्रस्य सुऽस्तुतिं॥६॥ त्वां अग्ने सुऽआध्यः मर्तासः देवऽवीतये यज्ञेषु देवं ईळते ॥७॥ तव प्र यक्षि संऽदृशं उत क्रतुं सुऽदानवः विश्वे जुषंत कामिनः॥८॥ त्वं होता मनुःऽहितः वह्निः आसा विदुःऽतरः अग्ने यक्षि दिवः विशः॥९॥ अग्ने आ याहि वीतये गृणानः हव्यऽदातये नि होता सत्सि बर्हिषि॥१०॥२२॥ तं त्वा समित्ऽभिः अंगिरः घृतेन वर्धयामसि बृहत् शोच यविष्ठ्य॥११॥ सः नः पृथु श्रवाय्यं अच्छ देव विवाससि बृहत् अग्ने सुऽवीर्यं॥१२॥ त्वां अग्ने पुष्करात् अधि अथर्वा निः अमंथत मूर्धः विश्वस्य वाघतः॥१३॥ तं ऊं त्वा दध्यङ् ऋषिः पुचः ईधे अथर्वणः वृचऽहनं पुरंऽदरं॥१४॥ तं ऊं त्वा पाथ्यः वृषा सं ईधे दस्युहनऽतमं धनंऽजयं रणेऽरणे

॥१५॥२३॥ आ इहि ऊं सु ववाणि ते अग्ने इत्था इतराः गिरः एभिः वर्धासे इंदुऽभिः॥१६॥ यत्त्वं च ते मनः दक्षं दधसे उतऽतरंतत्वसदः कृणवसे॥१७॥ नहि ते पूर्तं अक्षिऽपत् भुवत् नेमानां वसो अथ दुवः वनवसे॥१८॥ आ अग्निः अगामि भारतः वृचऽहा पुरुऽचेतनः दिवःऽदासस्य सत्ऽपतिः॥१९॥ सः हि विश्वा अति पार्थिवा रयिं दाशत् महिऽत्वना वन्वन् अवातः अस्तृतः॥२०॥२४॥ सः प्रत्नऽवत् नवीयसा अग्ने द्युम्नेन संऽयता बृहत् ततंथ भानुना॥२१॥ प्र वः सखायः अग्नये स्तोमं यज्ञं च धृष्णुऽया अर्चं गायं च वेधसे ॥२२॥ सः हि यः मानुषा युगा सीदत् होता कविऽक्रतुः दूतः च हव्यऽवाहनः॥२३॥ ता राजाना शुचिऽव्रता आदित्यान् मारुतं गणं वसो यक्षि इह रोदसी॥२४॥ वस्वीं ते अग्ने संऽदृष्टिः इषऽयते मर्त्याय ऊर्जः नपात् अमृतस्य ॥२५॥२५॥ ऋत्वा दाः अस्तु श्रेष्ठः अद्य त्वा वन्वन् सुऽरेक्णाः मतेः आनाशसुऽवृक्तिं॥२६॥ ते ते अग्ने त्वाऽऊताः इषयंतः विश्वं आयुः तरंतः अर्यः अरातीः वन्वंतः अर्यः अरातीः॥२७॥ अग्निः तिग्मेन शोचिषा यासत् विश्वं नि अचिणी अग्निः नः वनते रयिं॥२८॥ सुऽवीरं रयिं आ भर जातऽवेदः विऽचर्षणे जहि रक्षांसि सुऽक्रतो॰॥२९॥ त्वं नः पाहि अंहसः जातऽवेदः अघऽयतः रक्ष नः ब्रह्मणः कवे॥३०॥२६॥ यः नः अग्ने दुःऽएवः आ मर्तः वधाय दाशति तस्मात् नः पाहि अंहसः ॥३१॥ त्वं तं देव जिह्वया परि बाधस्व दुःऽकृतं मतेः यः नः जिघांसति ॥३२॥ भरतऽवाजाय सऽप्रथः शर्म यच्छ सहंत्य अग्ने वरेण्यं वसु॥३३॥ अग्निः वृचाणि जंघनत् द्रविणस्युः विपन्यया संऽइद्धः शुक्रः आऽहुतः॥३४॥ गर्भे मातुः पितुः पिता विऽदिद्युतानः अक्षरे सीदन् ऋतस्य योनिं आ॥३५॥२७॥ ब्रह्म प्रजाऽवत् आ भर जातऽवेदः

विऽचर्षणे अग्ने यत् दीदयत् दिवि ॥३६॥ उप त्वा रण्वऽसंदृशं प्रयंस्वंतःसहःऽकृत अग्ने समृज्महे गिरः॥३७॥ उप छायांऽइव घृणेः अगन्म शर्म ते वयं अग्ने हिरण्यऽसंदृशः॥३८॥ यः उग्रःऽइव शर्यऽहा तिग्मऽशृंगः न वंसगः अग्ने पुरः रुरोजिथ॥३९॥ आ यं हस्ते न खादिनं शिशुं जातं न बिभ्रति विशं अग्निं सुऽअध्वरं॥४०॥२८॥ प्र देवं देवऽवीतये भरत वसुवित्ऽतमं आ स्वे योनौ नि सीदतु ॥४१॥ आ जातं जातऽवेदसि प्रियं शिशीत अतिथिं स्योने आ गृहऽपतिं॥४२॥ अग्ने युक्ष्व हि ये तव अश्वासः देव साधवः अरं वहंति मन्यवे॥४३॥ अच्छ नः याहि आ वह अभि प्रयांसि वीतये आ देवान् सोमंऽपीतये॥४४॥ उत अग्ने भारत द्युऽमत अजस्रेण दविद्युतत् शोचं वि भाहि अजर॥४५॥२९॥ वीती यः देवं मर्तः दुवस्येत् अग्निं ईळीत अध्वरे हविष्मान् होतारं सत्यऽयजं रोदस्योः उत्तानऽहस्तः नमसा आ विवासेत्॥४६॥ आ ते अग्ने ऋचा हविः हृदा तष्टंभरामसि ते ते भवंतु उक्षणः ऋषभासः वशाः उत॥४७॥ अग्निं देवासः अग्रियं इंधते वृत्रहनऽतमं येन वसूनि आऽभृता तृळ्हा रक्षांसि वाजिना ॥ ४८ ॥ ३० ॥ ५ ॥

॥१७॥ पिब सोमं अभि यं उग्र तर्दः ऊर्वं गव्यं महि गृणानः इंद्र वि यः धृष्णो' वधिषः वज्रऽहस्त विश्वा वृत्रं अभिचया शवःऽभिः॥१॥ सः ईं पाहि यः ऋजीषी तरुत्रः यः शिप्रऽवान् वृषभः यः मतीनां यः गोत्रऽभित् वज्रऽभृत् यः हरिऽस्याः सः इंद्र चिचान् अभि तृंधि वाजान्॥२॥ एव पाहि प्रत्नऽथा मंदतु त्वा श्रुधि ब्रह्म ववृधस्व उत गीःऽभिः आविः सूर्यं कृणुहि पीपिहि इषः जहि शत्रून् अभि गाः इंद्र तृंधि॥३॥ ते त्वा मदाः बृहत इंद्र स्वधाऽवः इमे

पीताः उक्षयंत द्युऽमंतं महां अनूनं तवसं विऽभूतिं मत्सरासः जर्हषंत प्रऽसहं॥४॥ येभिः सूर्यं उषसं मंदसानः अवासयः अप दृळ्हानि दर्द्रत महां अद्रिं परिगाः इंद्र संतं नुत्थाः अच्युतं सदसः परि स्वात्॥५॥७॥ तवं ऋत्वा तवं तत दंसनाभिः आमासु पक्वं शच्या नि दीधः० और्णोः दुरः उस्रियाभ्यः वि दृळ्हा उत ऊर्वात गाः असृजः अंगिरस्वान्॥६॥ पप्राथ क्षां महि दंसः वि उर्वीं उप द्यां ऋष्वः बृहत इंद्र स्तभायः अधारयः रोदसी देवऽपुत्रे० प्रत्ने मातरा यह्वी ऋतस्य॥७॥ अध त्वा विश्वे पुरः इंद्र देवाः एकं तवसं दधिरे भरायअदेवः यत अभि औहिष्ट देवान् स्वःऽसाता वृणते इंद्रं अत्र॥८॥ अध द्यौः चित ते अप सा नु वज्रात् द्विता अनमत् भियसा स्वस्य मन्योः अहिं यत इंद्रः अभि ओहसानं नि चित विष्वऽआयुः शयथे जघान॥९॥ अध त्वष्टा ते महः उग्र वज्रं सहस्रऽभृष्टिं ववृतत शतऽअश्निं निऽकामं अरऽमनसं येन नवंतं अहिं सं पिणक् ऋजीषिन्॥१०॥२॥ वधीन् यं विश्वे मरुतः सऽजोषाः पचत् शतं महिषान् इंद्र तुभ्यं पूषा विष्णुः चीणि सरांसि धावन् वृचऽहनं मदिरं अंशुं अस्मै॥११॥ आ क्षोदः महि वृतं नदीनां परिऽस्थितं असृजः ऊर्मिं अपां तासां अनु प्रऽवतः इंद्र पंथां प्र आदेयः नीचीः अपसः समुद्रं॥१२॥ एवता विश्वा चकृऽवांसं इंद्रं महां उग्रं अजुर्य सहःऽदां सुऽवीरं त्वा सुऽआयुधं सुऽवज्रं आ ब्रह्म नव्यं अवसे ववृत्यात्॥१३॥ सः नः वाजाय श्रवसे इषे च राये धेहि द्युऽमतः इंद्र विप्रान् भरतऽवाजे नृऽवतः इंद्र सूरीन् दिवि च स्मः एधि पायुः नः इंद्र॥१४॥ अया वाजं देवऽहितं सनेम मदेम शतऽहिमाः सुऽवीराः॥१५॥३॥

॥१८॥ तं ऊं स्तुहि यः अभिभूतिऽओजाः वन्वन् अवातः पुरु-

ऽहूतः इंद्रः अषाळ्हं उग्रं सहमानं आभिः गीःऽभिः वर्ध वृषभं चर्षणीनां ॥१॥ सः युध्मः सत्वा खजऽकृत समत्ऽवा तुविऽमक्षः नदनुऽमान् ऋजीषी बृहत्ऽरेणुः च्यवनः मानुषीणां एकः कृष्टीनां अभवत् सहऽवा ॥२॥ त्वं ह नु त्यत् अदमयः दस्यून एकः कृष्टीः अवनोः आर्याय अस्ति स्वित् नु वीर्यं तत् ते इंद्र न स्वित् अस्ति तत् ऋतुऽथा वि वोचः ॥३॥ सत् इत् हि ते तुविऽजातस्य मन्ये सहः सहिष्ठ तुरतः तुरस्य उग्रं उग्रस्य तवसः तवीयः अरंधस्य रध्रऽतुरः बभूव ॥४॥ तत् नः प्रत्नं सख्यं अस्तु युष्मे इत्था वदतऽभिः वलं अंगिरःऽभिः हन् अच्युतऽच्युत दस्म इषयंतं ऋणोः पुरः वि दुरः अस्य विश्वाः ॥५॥४॥ सः हि धीभिः हव्यः अस्ति उग्रः ईशानऽकृत महति वृत्रऽतूर्ये सः तोकऽसाता तनये सः वज्री वितंतऽसाय्यः अभवत् समत्ऽसु ॥६॥ सः मज्मना जनिम मानुषाणां अमर्त्येन नाम्ना अति प्र सर्स्रे सः द्युम्नेन सः शवसा उत राया सः वीर्येण नृऽतमः संऽओकाः ॥७॥ सः यः न मुहे न मिथु जनः भूत सुमंतुऽनामा चुमुरिं धुनिं च वृणक् पिप्रुं शंबरं शुष्णं इंद्रः पुरां च्यौत्नाय शयथाय नु चित् ॥८॥ उत ऽअवंता त्वक्षसा पन्यसा च वृत्रऽहत्याय रथं इंद्र तिष्ठ धिष्व वज्रं हस्ते आ दक्षिणऽत्रा अभि प्र मंद पुरुऽदत्र माया ॥९॥ अग्निः न शुष्कं वनं इंद्र हेतिः रक्षः नि धक्षि अशनिः न भीमा गंभीरया ऋष्वया यः रुरोज अध्वनयत् दुःऽइता दंभयत् च ॥१०॥५॥ आ सहस्रं पथिऽभिः इंद्र राया तुविद्युम्न तुविऽवाजेभिः अर्वाक् याहि सूनो सहसः यस्य नु चित् अदेवः ईशे पुरुऽहूत योतोः ॥११॥ प्र तुविऽद्युम्नस्य स्थविरस्य घृष्वेः दिवः रण्धे महिमा पृथिव्याः न अस्य शचुः न प्रतिऽमानं अस्ति न प्रतिऽस्थिः पुरुऽमायस्य सह्योः ॥१२॥ प्र तत् ते अद्य करणं कृतं

भूत कुत्सँ यत आयुं अतिथिऽग्वं अस्मै पुरु सहस्रा नि शिशाः अभि क्षां उत तूर्वयाणं धृषता निनेथ॥१३॥ अनु त्वा अहिऽग्ने अध देव देवाः मदन् विश्वे कविऽतमं कवीनां करः यच्च वरिवः बाधितायं दिवे जनाय तन्वे गृणानः॥१४॥ अनु द्यावापृथिवी तत ते ओजः अमर्त्याः जिहते इंद्र देवाः कृष्व कृत्नो अकृतं यत ते अस्ति उक्थं नवीयः जनयस्व यज्ञैः॥१५॥ ६॥

॥१९॥ महान् इंद्रः नृऽवत आ चर्षणिऽप्राः उत द्विऽबर्हाः अमिनः सहःऽभिः अस्मद्र्यक् ववृधे वीर्याय उरुः पृथुः सुऽकृतः कर्तृऽभिः भूत॥१॥ इंद्रं एव धिषणा सातये धात बृहंतं क्षत्रं अजरं युवानं अषाळ्हेन शवसा षूष्णुऽवांसं सद्यः चित यः ववृधे असामि॥२॥ पृथू करस्ना बहुला गभस्ती अस्मद्र्यक् सं मिमीहि श्रवांसि यूथाऽइव पश्वः पष्णुऽपाः दमूनाः अस्मान् इंद्र अभि आ ववृत्स्व आजौ॥३॥ तं वः इंद्रं चतिनं अस्य शाकैः इह नूनं वाजयंतः हुवेम यथा चित पूर्वे जरितारः आसुः अनेद्याः अनवद्याः अरिष्टाः॥४॥ धृतऽव्रतः धनऽदाः सोमऽवृद्धः सः हि वामस्य वसुनः पुरुऽक्षुः सं जग्मिरे पथ्याः रायः अस्मिन् समुद्रे न सिंधवः यादमानाः॥५॥७॥ शविष्ठं नः आ भर पूर शवः ओजिष्ठं ओजः अभिऽभूते उयं विश्वा द्युम्ना वृण्या मानुषाणां अस्मभ्यं दाः हरिऽवः मादयध्यै॥६॥ यः ते मदः पृतनाषाट् अमृध्रः इंद्र तं नः आ भर षूष्णुऽवांसं येन तोकस्य तनयस्य सातौ मंसीमहि जिगीवांसः त्वाऽऊताः॥७॥ आ नः भर वृषणं शुष्मं इंद्र धनऽस्पृतं षूष्णुऽवांसं सुऽदक्षं येन वंसाम पृतनासु शत्रून् तव ऊतिऽभिः उत जामीन् अजामीन्॥८॥ आ ते शुष्मः वृषभः एतु पश्चात् आ उत्तरात् अध-

रात आ पुरस्तात् आ विश्वतः अभि सं एतु अर्वाङ् इंद्र द्युम्नं स्वः-ऽवत् धेहि अस्मे ॥९॥ नृऽवत् ते इंद्र नृऽतमाभिः ऊती वंसीमहि वामं श्रोमतेभिः ईक्षे हि वस्वः उभयस्य राजन् धाः रत्नं महि स्थूरं बृहंतं ॥१०॥ मरुत्वंतं वृषभं ववृधानं अकवऽऋरिं दिव्यं शासं इंद्रं विश्वऽसहं अवसे नूतनाय उग्रं सहःऽदां इह तं हुवेम ॥११॥ जनं वज्रिन् महि चित् मन्यमानं एभ्यः नृऽभ्यः रंधय येषु अस्मि अध हि त्वा पृथिव्यां भूरऽसातौ हवामहे तनये गोषु अप्ऽसु ॥१२॥ वयं ते एभिः पुरुऽहूत सख्यैः शचोःऽशचोः उतऽतरे इत् स्याम घ्नंतः वृचाणिं उभयानि शूर राया मदेम बृहता त्वाऽऊताः ॥ १३ ॥ ८ ॥

॥२०॥ द्यौः न यः इंद्र अभिभूमं अर्यः तस्थौ रयिः शवसा पृतऽसु जनान् तं नः सहस्रऽभरं उर्वराऽसां दद्धि सूनो सहसः वृचऽतुरं ॥१॥ दिवः न तुभ्यं अनु इंद्र सचा असुर्यं देवेभिः धायि विश्वं अहिं यत् वृचं अपः वव्रिऽवांसं हन् ऋजीषिन् विष्णुना सचानः ॥२॥ तूर्वन् ओजीयान् तवसः तवीयान् कृतऽब्रह्मा इंद्रः वृद्धऽमहाः राजा अभवत् मधुनः सोम्यस्य विश्वासां यत् पुरां दर्ता आवत् ॥३॥ शतैः अपद्रन् पणयः इंद्र अचेदशऽओणये कवये अर्कऽसातौ वधैः शुष्णस्य अशुषस्य मायाः पित्वः न अरिरेचीत् किं चन प्र ॥४॥ महः दुहः अप विश्वऽआयु धायि वज्रस्य यत् पतने पादि शुष्णः उरु सः सऽरथं सारथये कः इंद्रः कुत्साय सूर्यस्य सातौ ॥५॥९॥ प्र श्येनः न मदिरं अंशुं अस्मै शिरः दासस्य नमुचेः मथा-यन् प्र आवत् नमीं साप्यं ससंतं पृणक् राया सं इषा सं स्वस्ति ॥६॥ वि पिप्रोः अहिऽमायस्य दृळ्हाः पुरः वज्रिन् शवसा न दर्दः॰

सुऽदामन् तत् रेकणः अप्रऽमृष्यं ऋजिश्वने दाचं दाशुषे दाः॥७॥ सः वेतसुं दशऽमायं दशऽओणिं तूतुजिं इंद्रः स्वभिष्टिऽसुम्नः आ तुर्याः शश्वत् इभं द्योतनाय मातुः न सीं उप सृज इयर्ध्यै॥८॥ सः ईं स्पृधः वनते अप्रतिऽइतः बिभ्रत् वज्रं वृत्रऽहनं गभस्तौ तिष्ठत् हरी अधि अस्थात्ऽइव गर्ते वचःऽयुजा वहतः इंद्रं ऋष्वं॥९॥ सनेमं ते अवसा नव्यः इंद्र प्र पूरवः स्तवंते एना यज्ञैः सप्र यत् पुरः शर्मं शारदीः दर्तः हन् दासीः पुरुऽकुत्साय शिक्षन्॥१०॥ त्वं वृधः इंद्र पूर्व्यः भूः वरिवस्यन् उशने काव्याय परा नवऽवास्त्वं अनुऽदेयं महे पित्वे ददाथ स्वं नपातं॥११॥ त्वं धुनिः इंद्र धुनिऽमतीः ऋणोः अपः सीराः न स्रवंतीः प्र यत् समुद्रं अति पूर् पर्षि पारय तुर्वशं यदुं स्वस्ति॥१२॥ तवं हु त्यत् इंद्र विश्वं आजौ सस्तः धुनीचुमुरी या हसिस्वपदीदयंत इत तुभ्यं सोमेभिः सुन्वन् दभीतिः इध्मऽभृतिः पक्थी अर्कैः॥१३॥१०॥

॥२१॥ इमाः ऊं त्वा पुरुऽतमस्य कारोः हव्यं वीर हव्याः हवंते धियः रथेऽस्थां अजरं नवीयः रयिः विऽभूतिः ईयते वचस्या॥१॥ तं ऊं स्तुषे इंद्रं यः विदानः गिर्वाहसं गीःऽभिः यज्ञऽवृद्धं यस्य दिवं अति महा पृथिव्याः पुरुऽमायस्य रिरिचे महिऽत्वं॥२॥ सः इत् तमः अवयुनं ततन्वत् सूर्येण वयुनऽवत् चकार कदा ते मतीः अमृतस्य धामं इयक्षंतः न मिनंति स्वधाऽवः॥३॥ यः ता चकार सः कुह स्वित् इंद्रः कं आ जनं चरंति कासु विक्षु कः ते यज्ञः मनसे शं वरांय कः अर्कः इंद्र कतमः सः होता॥४॥ इदा हि ते वेविषतः पुराऽजाः प्रत्नासः आसुः पुरुऽकृत सखायः ये मध्यमासः उत नूतनासः उत अवमस्य पुरुऽहूत बोधि॥५॥११॥तं पृच्छंतः अवरासः

परांणि प्रत्ना ते इंद्र श्रुत्या अनु येमुः अर्चीमसि वीर ब्रह्मऽवाहः यात एव विघ्न तात त्वा महांतं ॥६॥ अभि त्वा पाजः रक्षसः वितस्थे महिं जज्ञानं अभि तत सु तिष्ठ तवं प्रत्नेन युज्येन सख्या वज्रेण धृष्णो अप तानुदस्व॥७॥सः तु श्रुधि इंद्र नूतनस्य ब्रह्मण्यतः वीर कारुऽधायः त्वं हि आपिः प्रऽदिवि पितृणां शश्वत् बभूथ सुऽहवः आऽइष्टौ ॥८॥ प्र ऊतये वरुणं मित्रं इंद्रं मरुतः कृष्व अर्वसे नः अद्य प्र पूषणं विष्णुं अग्निं पुरंऽधिं सवितारं ओषधीः पर्वतान् च ॥९॥ इमे ऊं त्वा पुरुऽशाक प्रऽयज्यो० जरितारः अभि अर्चंति अर्कैः श्रुधि हवं आ हुवतः हुवानः न त्वाऽवान् अन्यः अमृत त्वत् अस्ति ॥१०॥ नु मे आ वाचं उप याहि विद्वान् विश्वेभिः सूनो सहसः यजत्रैः ये अग्निऽजिह्वाः ऋतऽसापः आसुः ये मनुं चक्रुः उपरं दसाय॥११॥ सः नः बोधि पुरःऽएता सुऽगेषु उत दुःऽगेषु पथिऽकृत् विदानः ये अश्वमासः उरवः वहिष्ठाः तेभिः नः इंद्र अभि वक्षि वाजं ॥ १२ ॥ १२ ॥

॥२२॥ यः एकः इत् हव्यः चर्षणीनां इंद्रं तं गीःऽभिः अभि अर्च आभिः यः पत्यते वृषभः वृष्ण्यऽवान् सत्यः सत्वा पुरुऽमायः सहस्वान् ॥१॥ तं ऊं नः पूर्वे पितरः नवऽग्वाः सप्त विप्रासः अभि वाजयंतः नक्षतऽदाभं ततुरिं पर्वतेऽस्यां अद्रोघऽवाचं मतिऽभिः शविष्ठं ॥२॥ तं ईमहे इंद्रं अस्य रायः पुरुऽवीरस्य नृऽवतः पुरुऽक्षोः यः अस्कृधोयुः अजरः स्वःऽवान् तं आ भरहरिऽवः मादयध्यै॥३॥ तत् नः वि वोचः यदि ते पुरा चित् जरितारः आनशुः सुम्नं इंद्र कः ते भागः किं वयः दुध्र खिद्वः पुरुऽहूत पुरुऽवसो० असुरऽघ्नः॥४॥ तं पृच्छंती वज्रऽहस्तं रथेऽस्यां इंद्रं वेपी वक्वरी यस्य नु

गीः तुविऽग्राभं तुविऽकूर्मिं एभःऽदां गातुं इषे नक्षते तुमं अच्छ ॥५॥१३॥ अया हत्यं मायया ववृधानं मनःऽजुवा स्वऽतवः पवैतेन अच्युता चित् वीळिता सुऽओजः रुजः विद्ध्वा धृषता विऽरप्शिन् ॥६॥ तं वः धिया नव्यस्या शविष्ठं प्रत्नं प्रत्नऽवत् परिऽतंसयध्यै सः नः वक्षत् अनिऽमानः सुऽवसा इंद्रः विश्वानि अति दुःऽगहानि ॥७॥ आ जनाय दुह्वणे पार्थिवानि दिव्यानि दीपयः अंतरिक्षा तपं वृषन् विश्वतः शोचिषा तान् ब्रह्मऽद्विषे शोचय क्षां अपः च ॥८॥ भुवः जनस्य दिव्यस्य राजा पार्थिवस्य जगतः त्वेषऽसंदृक् धिष्व वज्रं दक्षिणे इंद्र हस्ते विश्वाः अजुर्य दयसे वि मायाः ॥९॥ आ संऽयतं इंद्र नः स्वस्तिं शचुऽतूर्याय बृहंतीं अमृध्रां यया दासानि आर्याणि वृचा करः वज्रिन् सुऽतुका नाहुषाणि ॥१०॥ सः नः नियुत्ऽभिः पुरुऽहूत वेधः विश्वऽवाराभिः आ गहि प्रऽयज्यो° न याः अदैवः वरते न देवः आ आभिः याहि तूयं आ मद्युद्रिक् ॥ ११ ॥ १४ ॥

॥२३॥ सुते इत् त्वं निऽमिष्टः इंद्र सोमे स्तोमे ब्रह्मणि शस्यमाने उक्थे यत् वा युक्ताभ्यां मघऽवन् हरिऽभ्यां बिभ्रत् वज्रं बाह्वोः इंद्र यासि ॥१॥ यत् वा दिवि पार्ये सुस्मिं इंद्र वृचऽहत्ये अवसि शूरऽसातौ यत् वा दक्षस्य बिभ्युषः अबिभ्यत् अरंधयः शर्धतः इंद्र दस्यून् ॥२॥ पाता सुतं इंद्रः अस्तु सोमं प्रऽनेनीः उग्रः जरितारं ऊती कर्ता वीराय सुस्वये ऊं लोकं दाता वसु स्तुवते कीरये चित् ॥३॥ गंता इयंति सवना हरिऽभ्यां बभ्रिः वज्रं पपिः सोमं ददिः गाः कर्ता वीरं नर्यं सर्वऽवीरं श्रोता हवं गृणतः स्तोमऽवाहाः ॥४॥ अस्मै वयं यत् ववान तत् विविष्मः इंद्राय यः नः प्रऽदिवः अपः

कः० सुते सोमे स्तुमसि शंसत् उक्था इंद्राय ब्रह्म वर्धनं यथा असत् ॥५॥१५॥ ब्रह्माणि हि चकृषे वर्धनानि तावत् ते इंद्र मतिऽभिः विविष्मः सुते सोमे सुतऽपाः शंऽतमानि रांद्र्या क्रियास्व वक्षणानि यज्ञैः ॥६॥ सः नः बोधि पुरोळाशं रराणः पिब तु सोमं गोऽऋजीकं इंद्र आ इदं बर्हिः यजमानस्य सीद् उरुं कृधि त्वाऽयतः ऊं लोकं ॥७॥ सः मंदस्व हि अनु जोषं उग्र प्र त्वा यज्ञासः इमे अश्नुवंतु प्र इमे हवासः पुरुऽहूतं अस्मे आ त्वा इयं धीः अवसे इंद्र यम्याः ॥८॥ तं वः सखायः सं यथा सुतेषु सोमेभिः ईं पृणत भोजं इंद्रं कुवित् तस्मै असति नः भराय न सुस्विं इंद्रः अवसे मृधाति ॥९॥ एव इत इंद्रः सुते अस्तावि सोमे भरतऽवाजेषु क्षयत इत मघोनः असत् यथा जरित्रे उत सूरिः इंद्रः रायः विश्वऽवारस्य दाता ॥ १० ॥ १६ ॥ २ ॥

॥२४॥ वृषा मदः इंद्रे श्लोकः उक्था सचा सोमेषु सुतऽपाः ऋजीषी अर्चत्यः मघऽवा नृऽभ्यः उक्थैः ह्रुक्षः राजा गिरां अक्षितऽऊतिः ॥१॥ ततुरिः वीरः नयः विऽचेताः श्रोता हवं गृणतः उर्विऽऊतिः वसुः शंसः नरां कारुऽधायाः वाजी स्तुतः विदथे दाति वाजं ॥२॥ अक्षः न चक्र्योः शूर बृहन् प्र ते महा रिरिचे रोदस्योः वृक्षस्य नु ते पुरुऽहूत वयाः वि ऊतयः रुरुहुः इंद्र पूर्वीः ॥३॥ शचीऽवतः ते पुरुऽशाक शाकाः गवांऽइव सूतयः संऽचरणीः वत्सानां न तंतयः ते इंद्र दामनऽवंतः अदामानः मुऽदामन् ॥४॥ अन्यत् अद्य कवेरं अन्यत् ऊं श्वः असत् च सत मुहुः आऽचक्रिः इंद्रः मित्रः नः अच वरुणः च पूषा अर्यः वशस्य परिऽएता अस्ति ॥५॥१७॥ वि त्वत् आपः न पर्वतस्य पृष्ठात् उक्थेभिः इंद्र अनयंत

यज्ञैः तं त्वा आभिः सुस्तुतिऽभिः वाजयंतः आजिं न जग्मुः गिर्वाहः अश्वाः ॥६॥ न यं जरंति शरदः न मासाः न द्यावः इंद्र अवऽकर्शयंति वृद्धस्य चित् वर्धतां अस्य तनूः स्तोमेभिः उक्थैः च शस्यमाना ॥७॥ न वीळवे नमंते न स्थिराय न शर्धते दस्युऽजूताय स्तवान् अजाः इंद्रस्य गिरयः चित् ऋष्वाः गंभीरे चित् भवति गाधं अस्मै ॥८॥ गंभीरेण नः उरुणा अमचिन प्र इषः यंधि सुतऽपावन् वाजान् स्याः ऊं सु ऊर्ध्वः ऊती अरिषण्यन् अक्तोः विऽउष्टौ परिऽतक्म्यायां ॥९॥ सचस्व नायं अवसे अभीके इतः वा तं इंद्र पाहि रिषः अमा च एनं अरणे पाहि रिषः मदेम शतऽहिमाः सुऽवीराः ॥ १० ॥ १८ ॥

॥२५॥ या ते ऊतिः अवमा या परमा या मध्यमा इंद्र शुष्मिन् अस्ति ताभिः ऊं सु वृचऽहत्ये अवीः नः एभिः च वाजैः महान् नः उग्र ॥१॥ आभिः स्पृधः मिथतीः अरिषण्यन् अमिचस्य व्यथय मन्युं इंद्र आभिः विश्वाः अभिऽयुजः विषूचीः आर्याय विशः अव तारीः दासीः ॥२॥ इंद्र जामयः उत ये अजामयः अर्वाचीनासः वनुषः युयुज्रे त्वं एषां विथुरा शवांसि जहि वृष्ण्यानि कृणुहि परांचः ॥३॥ शूरः वा शूरं वनते शरीरैः तनूऽरुचा तरुषि यत् कृण्वते तोके वा गोषु तनये यत् अप्ऽसु वि क्रंदसी उर्वरासु ब्रवैते ॥४॥ नहि त्वा शूरः न तुरः न धृष्णुः न त्वा योधः मन्यमानः युयोध इंद्र नकिः त्वा प्रति अस्ति एषां विश्वा जातानि अभि असि तानि ॥५॥१९॥ सः पत्यते उभयोः नृम्णं अयोः यदि वेधसः सम्ऽइथे हवंते वृचे वा महः नृऽवति क्षये वा व्यचस्वंता यदि वितंतसैते ॥६॥ अध स्म ते चर्षणयः यत् एजान् इंद्र चाता उत भव वरूता

अस्माकासः ये नृऽतमासः अर्यः इंद्र सूरयः दधिरे पुरः नः ॥७॥ अनु ते दायि महे इंद्रियाय सचा ते विश्वे अनु वृचऽहत्ये अनु क्षत्रं अनु सहः यजत्र इंद्र देवेभिः अनु ते नृऽसह्ये ॥८॥ एव नः स्पृधः सं अज समतऽसु इंद्र रंधि मिथतीः अदेवीः विद्याम वस्तोः अवसा गृणंतः भरतऽवाजाः उत ते इंद्र नूनं ॥९॥२०॥

॥२६॥ श्रुधि नः इंद्र हूयामसि त्वा महः वाजस्य सातौ ववृषाणाः सं यत् विशः अयंत शूरऽसातौ उयं नः अवः पार्ये अहन् दाः ॥१॥ त्वां वाजी हवते वाजिनेयः महः वाजस्य गध्यस्य सातौ त्वां वृचेषु इंद्र सतऽपतिं तरुत्रं त्वां चष्टे मुष्टिऽहा गोषु युध्यन् ॥२॥ त्वं कविं चोदयः अर्कऽसातौ त्वं कुत्साय शुष्णं दाशुषे वर्क् त्वं शिरः अमर्णः परा अहन् अतिथिऽग्वाय शंस्यं करिष्यन् ॥३॥ त्वं रथं प्रभरः योधं कृष्वं आवः युध्यंतं वृषभं दशऽद्युं त्वं तुयं वेतसवे सचा अहन् त्वं तुजिं गृणंतं इंद्र तूतोः० ॥४॥ त्वं तत् उक्थं इंद्र बर्हणा कः० प्र यत् शता सहस्रा शूर दर्षि अव गिरेः दासं शंबरं हन प्र आवः दिवःऽदासं चित्राभिः ऊती ॥५॥२१॥ त्वं अद्भाभिः मंदसानः सोमैः दभीतये चुमुरिं इंद्र सिस्वप् त्वं रजिं पिठीनसे दशस्यन् षष्टिं सहस्रा शच्या सचा अहन् ॥६॥ अहं चन तत् सूरिऽभिः आनशयां तव ज्यायः इंद्र सुम्नं ओजः त्वया यत् स्तवंते सधऽवीर वीराः चिऽवरूथेन नहुषा शविष्ठ ॥७॥ वयं ते अस्यां इंद्र द्युम्नऽहूतौ सखायः स्याम महिन प्रेष्ठाः प्रातर्दनिः क्षत्रऽश्रीः अस्तु श्रेष्ठः घने वृचाणां सनये धनानां ॥ ८ ॥ २२ ॥

॥२७॥ किं अस्य मदे किं ऊं अस्य पीतौ इंद्रः किं अस्य सख्ये

चकारारणोः वा ये निऽसदि किं ते अस्य पुरा विविद्रे किं ऊं नूतनासः॥१॥ सत अस्य मदे सत ऊं अस्य पीतौ इंद्रः सत अस्य सख्ये चकारारणोः वा ये निऽसदि सत ते अस्य पुरा विविद्रे सत ऊं नूतनासः॥२॥ नहि नु ते महिमनः समस्य न मघऽवत मघवतऽत्वस्य विद्म न राधसःऽराधसः नूतनस्य इंद्र नकिः दृहशे इंद्रियं ते ॥३॥ एतत त्यत ते इंद्रियं अचेति येन अवधीः वरऽशिखस्य शेषः वज्रस्य यत ते निऽहतस्य शुष्मात स्वनात चित इंद्र परमः ददार ॥४॥ वधीत इंद्रः वरऽशिखस्य शेषः अभिऽआवर्तिने चायमानाय शिक्षन वृचीवतः यत हरिऽयूपीयायां हन पूर्वे अर्धे भियसा अपरः दर्त॥५॥२३॥ चिंशतऽशतं वर्मिणः इंद्र साकं यव्याऽवत्यां पुरुऽहूत अवस्या वृचीवंतः शरवे पत्यमानाः पाचा भिंदानाः निऽअर्थानि आयन्॥६॥ यस्य गावौ अरुषा सुऽयवस्यू॰ अंतः ऊं सु चरंतः रेरिहाणा सः सृंजयाय तुर्वशं परा अदात वृचीवतः दैवऽवाताय शिक्षन॥७॥ द्वयान् अग्ने रथिनः विंशतिं गाः वधूऽमंतः मघऽवा मह्यं संऽराट् अभिऽआवर्ती चायमानः ददाति दुःऽनशं इयं दक्षिणा पार्थवानां ॥८॥२४॥

॥२८॥ आ गावः अग्मन उत भद्रं अक्रन सीदंतु गोऽस्थे रणयंतु अस्मे प्रजाऽवतीः पुरुऽरूपाः इह स्युः इंद्राय पूर्वीः उषसः दुहानाः ॥१॥ इंद्रः यज्वने पृणते च शिक्षति उप इत ददाति न स्वं मुषायति भूयःऽभूयः रयिं इत अस्य वर्धयन अभिन्ने खिल्ये नि दधाति देवऽयुं॥२॥ न ताः नशंति न दभाति तस्करः न आसां आमिचः व्यथिः आ दधर्षति देवान च याभिः यजते ददाति च ज्योक इत ताभिः सचते गोऽपतिः सह॥३॥ न ताः अर्वा रेणुऽकंकाटः

अश्नुते न संस्कृतऽचं उप यंति ताः अभि उरुऽगायं अभयं तस्य ताः अनु गावः मतीस्य वि चरंति यज्वनः ॥४॥ गावः भगः गावः इंद्रः मे अच्छान गावः सोमस्य प्रथमस्य भक्षः इमाः याः गावः सः जनासः इंद्रः इच्छामि इत हृदा मनसा चित इंद्रं ॥५॥ यूयं गावः मेदयथ कृशं चित अश्रीरं चित कृणुथ सुऽप्रतीकं भद्रं गृहं कृणुथ भद्रऽवाचः बृहत वः वयः उच्यते सभासु ॥६॥ प्रजाऽवतीः सुऽयवसं रिशंतीः शुद्धाः अपः सुऽप्रपाने पिबंतीः मा वः स्तेनः ईशत मा अघऽशंसः परि वः हेतिः रुद्रस्य वृज्याः ॥७॥ उप इदं उपऽपर्चनं आसु गोषु उप पृच्यतां उप ऋषभस्य रेतसि उप इंद्र तव वीर्ये ॥ ८ ॥ २५ ॥ ६ ॥

॥२९॥ इंद्रं वः नरः सख्याय सेपुः महः यंतः सुऽमतये चकानाः महः हि दाता वज्रऽहस्तः अस्ति महां ऊं इति अवसे यजध्वं ॥१॥ आ यस्मिन हस्ते नयौः मिमिक्षुः आ रथे हिरण्यये रथेऽस्थाः आ रश्मयः गभस्त्योः स्थूरयोः आ अध्वन अश्वासः वृषणः युजानाः ॥२॥ श्रिये ते पादा दुवः आ मिमिक्षुः धृष्णुः वज्री शवसा दक्षिणऽवान् वसानः अत्कं सुरभिं दृशे कं स्वः न नृतो इति इषिरः बभूथ ॥३॥ सः सोमः आमिष्ठऽतमः सुतः भूत यस्मिन पक्तिः पच्यते संतिधानाः इंद्रं नरः स्तुवंतः ब्रह्मऽकाराः उक्था शंसंतः देववातऽतमाः ॥४॥ न ते अंतः शवसः धायि अस्य वि तु बाबधे रोदसी इति महिऽत्वा आ ता सूरिः पृणति तूतुजानः यूथाऽइव अप्ऽसु संऽईजमानः ऊती ॥५॥ एव इत इंद्रः सुऽहवः ऋष्वः अस्तु ऊती अनूती हरिऽशिप्रः सत्वा एव हि जातः असमातिऽओजाः पुरु च वृचा हनति नि दस्यून ॥ ६ ॥ १ ॥

॥३०॥ भूयः इत् ववृधे वीर्याय एकः अजुर्यः दयते वसूनि प्र रिरिचे दिवः इंद्रः पृथिव्याः अर्ध इत् अस्य प्रति रोदसी उभे ॥१॥ अध मन्ये बृहत् असुर्यं अस्य यानि दाधार नकिः आ मिनाति दिवेऽदिवे सूर्यः दर्शतः भूत् वि सद्मानि उर्विया सुऽक्रतुः धात् ॥२॥ अद्य चित् नु चित् तत् अपः नदीनां यत् आभ्यः अरदः गातुं इंद्र नि पर्वताः अह्नऽसदः न सेदुः त्वया दृळ्हानि सुऽक्रतो॰ रजांसि ॥३॥ सत्यं इत् तत् न त्वाऽवान् अन्यः अस्ति इंद्र देवः न मर्त्यः ज्यायान् अहन् अहिं परिऽशयानं अर्णः अव असृजः अपः अच्छ समुद्रं ॥४॥ त्वं अपः वि दुरः विषूचीः इंद्र दृळ्हं अरुजः पर्वतस्य राजा अभवः जगतः चर्षणीनां साकं सूर्यं जनयन् द्यां उषसं ॥ ५ ॥ २ ॥

॥३१॥ अभूः एकः रयिऽपते रयीणां आ हस्तयोः अधिथाः इंद्र कृष्टीः वि तोके अप्ऽसु तनये च सूरे अवोचंत चर्षणयः विऽवाचः ॥१॥ त्वत् भिया इंद्र पार्थिवानि विश्वा अच्युता चित् च्यवयंते रजांसि द्यावाक्षामा पर्वतासः वनानि विश्वं दृळ्हं भयते अज्मन् आ ते ॥२॥ त्वं कुत्सेन अभि शुष्णं इंद्र अशुषं युध्य कुयवं गोऽइष्टौ दशं प्रऽपित्वे अध सूर्यस्य मुषायः चक्रं अविवेः रपांसि ॥३॥ त्वं शतानि अव शंबरस्य पुरः जघंथ अप्रतीनि दस्योः अशिक्षः यत्र शच्या शचीऽवः दिवःऽदासाय सुन्वते सुतऽक्रे भरतऽवाजाय गृणते वसूनि ॥४॥ सः सत्यऽसत्वन् महते रणाय रथं आ तिष्ठ तुविऽनृम्ण भीमं याहि प्रऽपथिन् अवसा उप मद्रिक् प्र च श्रुत अवय चर्षणिऽभ्यः ॥ ५ ॥ ३ ॥

॥३२॥ अपूर्व्या पुरुऽतमानि अस्मै महे वीराय तवसे तुराय

विऽरप्शिने वज्रिणे शंऽतमानि वचाँसि आसा स्थविराय तक्षुं ॥१॥ सः मातरा सूयैण कवीनां अवासयत् रुजत् अद्रिं गृणानः सुऽआधीभिः ऋक्वऽभिः वावशानः उत् उस्रियाणां असृजत् निऽदानँ॥२॥ सः वह्निऽभिः ऋक्वऽभिः गोषु शश्वत् मितज्ञुऽभिः पुरुऽकृत्वा जिगाय पुरः पुरःऽहा सखिऽभिः सखिऽयन इन्द्रः रुरोज कविऽभिः कविः सन् ॥३॥ सः नीव्याभिः जरितारँ अच्छ महः वाजेभिः महत्ऽभिः च शुष्मैः पुरुऽवीराभिः वृषभ क्षितीनां आ गिर्वणः सुविताय प्र याहि॥४॥ सः सर्गेण शवसा तक्तः अत्यैः अपः इंद्रः दक्षिणतः तुराषाट् इत्था सृजानाः अनपऽवृत् अर्यः दिवेऽदिवे विविषुः अप्रऽमृष्यं ॥ ५ ॥ ४ ॥

॥३३॥ यः ओजिष्ठः इंद्र तं सु नः दाः मदः वृषन् सुऽअभिष्टिः दास्वान् सौवश्व्यं यः वनवत् सुऽअश्वः वृचा समतऽसु ससहत् अमिचान् ॥१॥ त्वां हि इंद्र अवसे विऽवाचः हवंते चर्षणयः शूरऽसातौ त्वं विप्रेभिः वि पणीन् अशायः त्वाऽऊतः इत् सनिता वाजं अर्वा॥२॥ त्वं तान् इंद्र उभयान् अमिचान् दासा वृचाणि आर्या च शूर वधीः वनाऽइव सुऽधितेभिः अत्कैः आ पृतऽसु दर्षि नृणां नृऽतम॥३॥ सः त्वं नः इंद्र अकवाभिः ऊती सखा विश्वऽआयुः अविता वृधे भूः स्वःऽसाता यत् हूयामसि त्वा युध्यंतः नेमऽधिता पृतऽसु शूर॥४॥ नूनं नः इंद्र अपराय च स्याः भव मृळीकः उत नः अभिष्टौ इत्था गृणंतः महिनस्य शर्मन् दिवि स्याम पार्ये गोसऽतमाः ॥ ५ ॥ ५ ॥

॥३४॥ सं च त्वे जग्मुः गिरः इंद्र पूर्वीः वि च त्वत् यंति विऽभवः

मनीषाः पुरा नूनं च स्तुतयः ऋषीणां पस्पृधे इंद्रे अधि उक्थऽअर्का ॥१॥ पुरुऽहूतः यः पुरुऽगूर्तः ऋभ्वा एकः पुरुऽप्रशस्तः अस्ति यज्ञैः रथः न महे शवसे युजानः अस्माभिः इंद्रः अनुमाद्यः भूत ॥२॥ न यं हिंसंति धीतयः न वाणीः इंद्रं नक्षंति इत अभि वर्धयंतीः यदि स्तोतारः शतं यत सहस्रं गृणंति गिर्वणसं शं तत अस्मे ॥३॥ अस्मै एतत दिवि अर्चाऽइव मासा मिमिक्षः इंद्रे नि अयामि सोमः जनैं न धन्वन अभि सं यत आपः सचा ववृधुः हवनानि यज्ञैः ॥४॥ अस्मै एतत महि आंगूषं अस्मे इंद्राय स्तोत्रं मतिऽभिः अवाचि असत यथा महति वृचऽतूर्ये इंद्रः विश्वऽआयुः अविता वृधः च ॥ ५ ॥ ६ ॥

॥३५॥ कदा भुवन रथऽक्षयाणि ब्रह्म कदा स्तोत्रे सहसऽपोष्यं दाः कदा स्तोमं वासयः अस्य राया कदा धियः करसि वाजऽरत्नाः ॥१॥ कर्हि स्वित तत इंद्र यत नृऽभिः नॄन वीरैः वीरान नीळयासे जय आजीन चिऽधातु गाः अधि जयासि गोषु इंद्र द्युम्नं स्वःऽवत धेहि अस्मे ॥२॥ कर्हि स्वित तत इंद्र यत जरित्रे विश्वऽस्मिन ब्रह्म कृणवः शविष्ठ कदा धियः न निऽयुतः युवासे कदा गोऽमघा हवनानि गच्छाः ॥३॥ सः गोऽमघाः जरित्रे अश्वऽचंद्राः वाजऽश्रवसः अधि धेहि पृक्षः पीपिहि इषः सुऽदुघाः इंद्र धेनुं भरतऽवाजेषु सुऽरुचः रुरुच्याः ॥४॥ तं आ नूनं वृजनैं अन्यथा चित शूरः यत शक्र वि दुरः गृणीषे मा निः अरं शुक्रऽदुघस्य धेनोः आंगिरसान ब्रह्मणा विप्र जिन्व ॥ ५ ॥ ७ ॥

॥३६॥ सचा मदासः तव विश्वऽजन्याः सचा रायः अध ये पा-

थिवासः सचा वाजानां अभवः विऽभक्ता यत् देवेषु धारयंथाः असुर्यं ॥१॥ अनु प्र येजे जनः ओजः अस्य सचा दधिरे अनु वीर्याय स्थूमऽगृभे दुधये अर्वते च क्रतुं वृंजंति अपि वृचऽहत्ये ॥२॥ तं सध्रीचीः ऊतयः वृष्ण्यानि पौंस्यानि निऽयुतः सश्चुः इंद्रं समुद्रं न सिंधवः उक्थऽशुष्माः उरुऽव्यचसं गिरः आ विशंति ॥३॥ सः रायः खां उप सृज गृणानः पुरुऽचंद्रस्य त्वं इंद्र वस्वः पतिः बभूथ असमः जनानां एकः विश्वस्य भुवनस्य राजा ॥४॥ सः तु श्रुधि श्रुत्याः यः दुवःऽयुः द्यौः न भूम अभि रायः अर्यः असः यथा नः शवसा चकानः युगेऽयुगे वयसा चेकितानः ॥ ५ ॥ ८ ॥

॥३७॥ अर्वाक् रथं विश्वऽवारं ते उय इंद्र युक्तासः हरयः वहंतु कीरिः चित् हि त्वा हवते स्वःऽवान् ऋधीमहि सधऽमादः ते अद्य ॥१॥ प्रो ॥ द्रोणे हरयः कर्मं अग्मन् पुनानासः ऋज्यंतः अभूवन् इंद्रः नः अस्य पूर्व्यः पपीयात् द्युक्षः मदस्य सोम्यस्य राजा ॥२॥ आऽसस्राणासः शवसानं अच्छ इंद्रं सुऽचक्रे रथ्यासः अश्वाः अभि श्रवः ऋज्यंतः वहेयुः नु चित् नु वायोः अमृतं वि दस्येत् ॥ ३ ॥ वरिष्ठः अस्य दक्षिणां इयर्ति इंद्रः मघोनां तुविकूर्मिऽतमः यया वज्रिऽवः परिऽयासि अंहः मघा च धृष्णो ॥ दयसे वि सूरीन् ॥४॥ इंद्रः वाजस्य स्थविरस्य दाता इंद्रः गीःऽभिः वर्धतां वृद्धऽमहाः इंद्रः वृत्रं हनिष्ठः अस्तु सत्वा आ ता सूरिः पृणति तूतुजानः ॥५॥९॥

॥३८॥ अपात इतः उत ऊं ॥ नः चिचऽतमः महीं भर्षत् द्युऽमतीं इंद्रऽहूतिं पन्यसीं धीतिं दैव्यस्य यामन् जनस्य रातिं वनते सुऽदानुः ॥१॥ दूरात् चित् आ वसतः अस्य कर्णा घोषात् इंद्रस्य

तन्यति ब्रुवाणः आ इयं एनं देवऽहूतिः ववृत्यात् मद्यक् इंद्रं इयं ऋच्यमाना ॥२॥ तं वः धिया परमया पुराऽजां अजरं इंद्रं अभि अनूषि अर्कैः ब्रह्म च गिरः दधिरे सं अस्मिन् महान् च स्तोमः अधि वर्धत इंद्रे ॥३॥ वर्धीत् यं यज्ञः उत सोमः इंद्रं वर्धीत् ब्रह्म गिरः उक्था च मन्म वर्धं अहं एनं उषसः यामन् अक्तोः वर्धान् मासाः शरदः द्यावः इंद्रं ॥४॥ एव जज्ञानं सहसे असामि ववृधानं राधसे च श्रुताय महां उग्रं अवसे विप्र नूनं आ विवासेम वृचऽतूर्येषु ॥ ५ ॥ १० ॥

॥३९॥ मंद्रस्य कवेः दिव्यस्य वहेः विप्रऽमन्मनः वचनस्य मध्वः अपाः नः तस्य सचनस्य देव इषः युवस्व गृणते गोऽअयाः ॥१॥ अयं उशानः परि अद्रिं उस्राः ऋतधीतिऽभिः ऋतऽयुक् युजानः रुजत् अरुग्णं वि वलस्य सानुं पणीन् वचःऽभिः अभि योधत् इंद्रः ॥२॥ अयं द्योतयत् अद्युतः वि अक्तून् दोषा वस्तोः शरदः इंदुः इंद्र इमं केतुं अदधुः नु चित् अहां शुचिऽजन्मनः उषसः चकार ॥३॥ अयं रोचयत् अरुचः रुचानः अयं वासयत् वि ऋतेन पूर्वीः अयं ईयते ऋतयुक्ऽभिः अश्वैः स्वःऽविदा नाभिना चर्षणिऽप्राः ॥४॥ नु गृणानः गृणते प्रऽन्न राजन् इषः पिन्व वसुऽदेयाय पूर्वीः अपः ओषधीः अविषा वनानि गाः अर्वतः नॄन् ऋचसे रिरीहि ॥ ५ ॥ ११ ॥

॥४०॥ इंद्र पिब तुभ्यं सुतः मदाय अवस्यु हरी वि मुच सखाया उत प्र गाय गणे आ निऽसद्य अथ यज्ञाय गृणते वयः धाः ॥१॥ अस्य पिब यस्य जज्ञानः इंद्र मदाय क्रत्वे अपिबः विऽरप्शिन्

तं ऊं ते गावः नरः आपः अद्रिः इंदुं सं अह्यन् पीतये सं अस्मै ॥२॥ संऽइंद्ध अग्नौ सुते इंद्र सोमे आ त्वा वहंतु हरयः वहिष्ठाः त्वाऽयता मनसा जोहवीमि इंद्र आ याहि सुविताय महे नः ॥३॥ आ याहि शश्वत् उशता ययाथ इंद्र महा मनसा सोमऽपेयं उप ब्रह्माणि शृणवः इमा नः अथ ते यज्ञः तन्वे वयः धात् ॥४॥ यत् इंद्र दिवि पार्ये यत् ऋधक् यत् वा स्वे सदने यत्र वा असि अंतः नः यज्ञं अवसे नियुत्वान् सऽजोषाः पाहि गिर्वणः मरुतऽभिः ॥५॥ १२ ॥

॥४१॥ अहेळमानः उप याहि यज्ञं तुभ्यं पवंते इंदवः सुतासः गावः न वज्रिन् स्वं ओकः अच्छ इंद्र आ गहि प्रथमः यज्ञियानां ॥१॥ या ते काकुत् सुऽकृता या वरिष्ठा यया शश्वत् पिबसि मध्वः ऊर्मिं तया पाहि प्र ते अध्वर्युः अस्थात् सं ते वज्रः वर्ततां इंद्र गव्युः ॥२॥ एषः दृप्सः वृषभः विश्वरूपः इंद्राय वृष्णे सं अकारि सोमः एतं पिब हरिऽवः स्थातः उप यस्य ईशिषे प्रऽदिवि यः ते अन्नं ॥३॥ सुतः सोमः असुतात् इंद्र वस्यान् अयं श्रेयान् चिकितुषे रणाय एतं तितिर्वः उप याहि यज्ञं तेन विश्वाः तविषीः आ पृणस्व ॥४॥ ह्वयामसि त्वा आ इंद्र याहि अर्वाङ् अरं ते सोमः तन्वे भवाति शतंऽक्रतो॰ मादयस्व सुतेषु प्र अस्मान् अव पृतनासु प्र विक्षु ॥ ५ ॥ १३ ॥

॥४२॥ प्रति अस्मै पिपीषते विश्वानि विदुषे भर अरंऽगमाय जग्मये अपश्चातऽदघ्वने नरे ॥१॥ आ ईं एनं प्रतिऽएतन सोमेभिः सोमऽपातमं अमत्रेभिः ऋजीषिणं इंद्रं सुतेभिः इंदुऽभिः ॥२॥ यदि सुतेभिः इंदुऽभिः सोमेभिः प्रतिऽभूषथ वेद विश्वस्य मेधिरः

धृषत् तंऽतं इत् आ ईषते ॥३॥ अस्मेऽअस्मे इत् अंधसः अध्वर्यो प्रभरसुतं कुवित् समस्य जेन्यस्य शर्धतः अभिऽशस्तेः अवऽस्परत् ॥ ४ ॥ १४ ॥

॥४३॥ यस्य त्यत् शंबरं मदे दिवःऽदासाय रंधयः अयं सः सोमः इंद्र ते सुतः पिब ॥१॥ यस्य तीव्रऽसुतं मदं मध्यं अंतं च रक्षसे अयं सःसोमः इंद्र ते सुतः पिब ॥२॥ यस्य गाः अंतः अश्मनः मदे दृळ्हाः अवऽअसृजः अयं सः सोमः इंद्र ते सुतः पिब ॥३॥ यस्य मंदानः अंधसः माघोनं दधिषे शवः अयं सः सोमः इंद्र ते सुतः पिब ॥ ४ ॥ १५ ॥ ३ ॥

॥४४॥ यः रयिऽवः रयिंऽतमः यः द्युम्नैः द्युम्नवत्ऽतमः सोमः सुतः सः इंद्र ते अस्ति स्वधाऽपते मदः ॥१॥ यः शग्मः तुविऽशग्म ते रायः दामा मतीनां सोमः सुतः सः इंद्र ते अस्ति स्वधाऽपते मदः ॥२॥ येन वृत्रः न शवसा तुरः न स्वाभिः ऊतिऽभिः सोमः सुतः सः इंद्र ते अस्ति स्वधाऽपते मदः ॥३॥ त्यं ऊं वः अप्रऽहनं गृणीषे शवसः पतिं इंद्रं विश्वऽसहं नरं महिष्ठं विश्वऽचर्षणिं ॥४॥ यं वर्धयंति इत् गिरः पतिं तुरस्य राधसः तं इत् नु अस्य रोदसी देवी पुष्मं सप-र्यतः ॥५॥१६॥ तत् वः उक्थस्य बर्हणा इंद्राय उपऽस्तृणीषणि विपः न यस्य ऊतयः वि यत् रोहंति सऽक्षितः ॥६॥ अविंदत् दक्षं मिचः नवीयान् पपानः देवेभ्यः वस्यः अचैत् ससऽवान् स्तोलाभिः धीतरीभिः उरुष्या पायुः अभवत् सखिऽभ्यः ॥७॥ ऋतस्य पथि वेधाः अपायि श्रिये मनांसि देवासः अक्रन दधानः नाम महः वचःऽभिः वपुः दृशये वेन्यः वि आवः० ॥८॥ द्युमतऽतमं

दक्षं धेहि असे सेध जनानां पूर्वीः अरातीः वर्षीयः वयः कृणुहि शचीभिः धनस्य सातौ असान् अविड्ढि॥९॥ इंद्र तुभ्यं इत् मघऽवन् अभूम वयं दाचे हरिऽवः मा वि वेनः नकिः आपिः दृहशे मर्त्यऽचा किं अंग रध्रऽचोदनं त्वा आहुः॥१०॥१७॥ मा जस्वने वृषभनः रीथाः मा ते रेवतः सख्ये रिषाम पूर्वीः ते इंद्र निःऽसिधः जनेषु जहि असुस्वीन प्र वृह अपृणतः॥११॥ उत अभाणिऽइव स्तनयन् इयर्ति इंद्रः राधांसि अश्व्यानि गव्या त्वं असि प्रऽदिवः कारुऽधायाः मा त्वा अदामानः आ दभन् मघोनः॥१२॥ अध्वर्यो वीर प्र महे सुतानां इंद्राय भर सः हि अस्य राजा यः पूर्व्याभिः उत नूतनाभिः गीःऽभिः ववृधे गृणतां ऋषीणां॥१३॥ अस्य मदे पुरु वर्पांसि विद्वान् इंद्रः वृचाणि अप्रति जघान तं ऊं प्र होषि मधुऽमंतं असे सोमं वीराय शिप्रिणे पिबध्ये॥१४॥ पाता सुतं इंद्रः अस्तु सोमं हंता वृत्रं वज्रेण मंदसानः गंता यज्ञं पराऽवतः चित् अच्छ वसुः धीनां अविता कारुऽधायाः॥१५॥१८॥ इदं त्यत् पात्रं इंद्रऽपानं इंद्रस्य प्रियं अमृतं अपायि मत्सत् यथा सोमन्सायं देवं वि असत् द्वेषः युयवत् वि अंहः॥१६॥ एना मंदानः जहि शूर शचूनन् जामिं अजामिं मघऽवन् अमित्रान् अभिऽसेनान् अभि आऽदेदिशानान् पराचः इंद्र प्र मृण जहि च॥१७॥ आसु स्म नः मघऽवन इंद्र पृतऽसु असभ्यं महि वरिवः सुऽगं कः॰ अपां तोकस्य तनयस्य जेषे इंद्र सूरीन कृणुहि स्म नः अध॥१८॥ आ त्वा हरयः वृषणः युजानाः वृषऽरथासः वृषऽरश्मयः अत्याः असमचांचः वृषणः वज्रऽबाहः वृष्णे मदाय सुऽयुजः वहंतु॥१९॥ आ ते वृषन् वृषणः द्रोणं अस्युः घृतऽमुषः न ऊर्मयः मदंतः इंद्र प्र तुभ्यं वृषऽभिः सुतानां वृष्णे भरंति वृषभाय सोमं॥२०॥१९॥ वृषा असि

दिवःवृषभःपृथिव्याःवृषा सिंधूनां वृषभःस्तियानां वृष्णे ते इंदुः वृषभ पीपाय स्वादुः रसः मधुऽपेयः वराय ॥२१॥ अयं देवः सहसा जायमानः इंद्रेण युजा पणिं अस्तभायत् अयं स्वस्य पितुः आयुधानि इंदुः अमुष्णात् अशिवस्य मायाः ॥ २२ ॥ अयं अकृणोत् उषसः सुऽपत्नीः अयं सूर्ये अदधात् ज्योतिः अंतः अयं चिऽधातु दिवि रोचनेषु चितेषु विंदत् अमृतं निऽगूळ्हं ॥२३॥ अयं द्यावापृथिवी वि स्कभायत् अयं रथं अयुनक् सप्तऽरश्मिं अयं गोषु शच्या पक्वं अंतः सोमः दाधार दशऽयंचं उत्सं ॥ २४ ॥ २० ॥

॥४५॥ यः आ अनयत् पराऽवतः सुऽनीती तुर्वशं यदुं इंद्रः सः नः युवा सखा ॥१॥ अविप्रे चित् वयः दधत् अनाप्युना चित् अवेता इंद्रः जेता हितं धनं ॥२॥ महीः अस्य प्रऽनीतयः पूर्वीः उत प्रऽशस्तयः न अस्य क्षीयंते ऊतयः ॥३॥ सखायः ब्रह्मऽवाहसे अर्चत प्र च गायत सः हि नः प्रऽमतिः मही ॥४॥ त्वं एकस्य वृचऽहन् अविता द्वयोः असि उत ईदृशे यथा वयं ॥५॥२१॥ नयसि इत् ऊं अति द्विषः कृणोषि उक्थऽशंसिनः नृऽभिः सुऽवीरः उच्यसे ॥६॥ ब्रह्माणं ब्रह्मऽवाहसं गीःऽभिः सखायं ऋग्मियं गां न दोहसे हुवे ॥७॥ यस्य विश्वानि हस्तयोः ऊचुः वसूनि नि द्विता वीरस्य पृतनाऽसहः ॥८॥ विद्द्वानिं चित् अद्रिऽवः जनानां शचीऽपते वृह मायाः अनानत ॥९॥ तं ऊं त्वा सत्य सोमऽपाः इंद्र वाजानां पते अहूमहि श्रवस्यवः ॥१०॥२२॥ तं ऊं त्वा यः पुरा आसिथ यः वा नूनं हिते धने हव्यः सः श्रुधि हवं ॥११॥ धीभिः अवीतऽभिः अवीतः वाजान् इंद्र श्रवाय्यान् त्वया जेष्म हितं धनं ॥१२॥ अभूः ऊं वीर् गिर्वणः महान् इंद्र धने हिते भरे वितंतसाय्यः ॥१३॥ या ते ऊतिः

अमिचऽहन् मक्षुजंवःऽतमा असति तया नः हिनुहि रथं॥१४॥ सः रथेन रथिऽतमः असाकेन अभिऽयुग्वना जेषि जिष्णो हितं धनं॥१५॥२३॥ यः एकः इत् तं ऊं स्तुहि कृष्टीनां विऽचर्षणिः पतिः जज्ञे वृषऽऋतुः॥१६॥ यः गृणतां इत् आसिथ आपिः ऊती शिवः सखा सः त्वं नः इंद्र मृळय॥१७॥ धिष्व वज्रं गभस्त्योः रक्षःऽहत्याय वज्रिऽवः ससहीष्ठाः अभि स्पृधः॥१८॥ प्रत्नं रयीणां युजं सखायं कीरिऽचोदनं ब्रह्मवाहःऽतमं हुवे॥१९॥ सः हि विश्वानि पार्थिवा एकः वसूनि पत्यते गिर्वणःऽतमः अध्रिऽगुः॥२०॥२४॥ सः नः नियुत्ऽभिः आ पृण कामं वाजेभिः अश्विऽभिः गोमत्ऽभिः गोऽपते धृषत्॥२१॥ तत् वः गाय सुते सचा पुरुऽहूताय सत्वने शं यत् गवे न शाकिने॥२२॥ न घ वसुः नि यमते दानं वाजस्य गोऽमतः यत् सीं उप श्रवत् गिरः॥२३॥ कुवित्ऽसस्य प्र हि व्रजं गोऽमंतं दस्युऽहा गमत् शचीभिः अपं नः वरत्॥२४॥ इमाः ऊं त्वा शतऽक्रतो॰ अभि प्र नोनुवुः गिरः इंद्र वत्सं न मातरः॥२५॥२५॥ दुःऽनशं सख्यं तव गौः असि वीर गव्यते अश्वः अश्वऽयते भव॥२६॥ सः मंदस्व हि अंधसः राधसे तन्वा महे न स्तोतारं निदे करः॥२७॥ इमाः ऊं त्वा सुतेऽसुते नक्षंते गिर्वणः गिरः वत्सं गावः न धेनवः॥२८॥ पुरुऽतमं पुरूणां स्तोतृणां विऽवाचि वाजेभिः वाजऽयतां॥२९॥ अस्माकं इंद्र भूतु ते स्तोमः वाहिष्ठः अंतमः अस्मान् राये महे हिनु॥३०॥ अधि बृबुः पणीनां वर्षिष्ठे मूर्धन् अस्थात् उरुः कक्षः न गांग्यः॥३१॥ यस्य वायोःऽइव द्रवत् भद्रा रातिः सहस्रिणी सद्यः दानाय मंहते॥३२॥ तत् सु नः विश्वे अर्यः आ सदा गृणंति कारवः बृबुं सहस्रऽदातमं सूरिं सहस्रऽसातमं॥३३॥२६॥

॥४६॥ त्वां इत् हि हवामहे सातौ वाजस्य कारवः त्वां वृत्रेषु इंद्र सत्ऽपतिं नरः त्वां काष्ठासु अर्वतः ॥१॥ सः त्वं नः चित्र वज्रऽहस्त धृष्णुऽया महः स्तवानः अद्रिऽवः गां अश्वं रथ्यं इंद्र सं किर सचा वाजं न जिग्युषे ॥२॥ यः सचाऽहा विऽचर्षणिः इंद्रं तं हूमहे वयं सहस्रऽमुष्क तुविऽनृम्ण सत्ऽपते भव समत्ऽसु नः वृधे ॥३॥ बाधसे जनान् वृषभाऽइव मन्युना घृषौ मीळ्हे ऋचीषम अस्माकं बोधि अविता महाऽधने तनूषु अप्ऽसु सूर्ये ॥४॥ इंद्र ज्येष्ठं नः आ भर ओजिष्ठं पपुरि श्रवः येन इमे चित्र वज्रऽहस्त रोदसी आ उभे सुऽशिप्र प्राः ॥५॥२७॥ त्वां उयं अवसे चर्षणिऽसहं राजन् देवेषु हूमहे विश्वासु नः विथुरा पिप्र्हि वसो अमिचान सुऽसहान कृधि ॥६॥ यत् इंद्र नाहुषीषु आ ओजः नृम्णं च कृष्टिषु यत् वा पंच क्षितीनां द्युम्नं आ भर सचा विश्वानि पौंस्या ॥७॥ यत् वा तृक्षौ मघऽवन् द्रुह्यौ आ जने यत् पूरौ कत् च वृष्ण्यं अस्मभ्यं तत् रिरीहि सं नृऽसह्ये अमिचान पृत्ऽसु तुर्वणे ॥८॥ इंद्र चिऽधातु शरणं चिऽवरूथं स्वस्तिऽमत् छर्दिः यच्छ मघवत्ऽभ्यः च मह्यं च यवयं द्विषं एभ्यः ॥९॥ ये गव्यता मनसा शर्वं आऽदभुः अभिऽप्रयंति धृष्णुऽया अध स्म नः मघऽवन् इंद्र गिर्वणः तनूऽपाः अंतमः भव ॥१०॥२८॥ अध स्म नः वृधे भव इंद्र नायं अवयुधि यत् अंतरिक्षे पतयंति पर्णिनः दिव्यवः तिग्मऽमूधानः ॥११॥ यच्च शूरासः तन्वः विऽतन्वते प्रिया शर्मे पितृणां अध स्म यच्छ तन्वे तनें च छर्दिः अचित्तं यवय द्वेषः ॥१२॥ यत् इंद्र सर्गे अर्वतः चोदयासे महाऽधने असमने अध्वनि वृजिने पथि श्येनानऽइव श्रवस्यतः ॥१३॥ सिंधूनऽइव प्रवणे आशुऽया यतः यदि क्रोशं अनु स्वनं आ ये वयः न ववृत्रंति आमिषि गृभीताः बाह्वोः गवि ॥ १४ ॥ २९ ॥

॥४७॥ स्वादुः किल अयं मधुऽमान् उत अयं तीव्रः किल अयं रसऽवान् उत अयं उतो नु अस्य पपिऽवांसं इंद्रं न कः चन सहते आऽहवेषु ॥१॥ अयं स्वादुः इह मदिष्ठः आस यस्य इंद्रः वृत्रऽहत्ये ममादे पुरूणि यः च्यौत्ना शंबरस्य वि नवतिं नव च देवः हन् ॥२॥ अयं मे पीतः उत इयर्ति वाचं अयं मनीषां उशती अजीगः अयं षट् उर्वीः अमिमीत धीरः न याभ्यः भुवनं कत् चन आरे ॥३॥ अयं सः यः वरिमाणं पृथिव्याः वर्ष्माणं दिवः अकृणोत् अयं सः अयं पीयूषं तिसृषु प्रवतऽसु सोमः दाधार उरु अंतरिक्षं ॥४॥ अयं विदत् चित्रऽदंशीकं अणीः शुक्रऽसंज्ञनां उषसां अनीके अयं महान् महता स्कंभनेन उत द्यां अस्तभ्नात् वृषभः मरुत्वान् ॥५॥३०॥ धृषत् पिब कलशे सोमं इंद्र वृत्रऽहा शूर सुऽआरे वसूनां माध्यंदिने सवने आ वृषस्व रयिऽस्थानः रयिं अस्मासु धेहि ॥६॥ इंद्र प्र नः पुरएताऽइव पश्य प्र नः नय प्रऽतरं वस्यः अच्छ भव सुऽपारः अतिऽपारयः नः भव सुऽनीतिः उत वामऽनीतिः ॥७॥ उरुं नः लोकं अनु नेषि विद्वान् स्वःऽवत् ज्योतिः अभयं स्वस्ति कृष्वा ते इंद्र स्थविरस्य बाहू उप स्थेयाम शरणा वृहंता ॥८॥ वरिष्ठे नः इंद्र वंधुरे धाः वहिष्ठयोः शतऽवन् अश्वयोः आ इषं आ वक्षि इषां वर्षिष्ठां मा नः तारीत् मघऽवन् रायः अर्यः ॥९॥ इंद्र मृळ मह्यं जीवातुं इच्छ चोदय धियं अर्यमः न धारां यत् किं च अहं त्वाऽयुः इदं वदामि तत् जुषस्व कृधि मा देवऽवंतं ॥१०॥३१॥ चातारं इंद्रं अवितारं इंद्रं हवेऽहवे सुऽहवं शूरं इंद्रं हुवेम शक्रं पुरुऽहूतं इंद्रं स्वस्ति नः मघऽवा धातु इंद्रः ॥११॥ इंद्रः सुऽचामा स्वऽवान् अवःऽभिः सुऽमृळी-

कः भवतु विश्वऽवेदाः बाधतां द्वेषः अभयं कृणोतु सुऽवीर्यस्य पतयः स्याम॥१२॥ तस्य वयं सुऽमतौ यज्ञियस्य अपि भद्रे सौमनसे स्याम सः सुऽचामा स्वऽवान् इंद्रः अस्मे आरात् चित् द्वेषः सनुतः युयोतु॥१३॥ अव त्वे इंद्र प्रऽवतः न ऊर्मिः गिरः ब्रह्माणि निऽयुतः धवंते उरुन राधः सवना पुरूणि अपः गाः वज्रिन् युवसे सं इंदून् ॥१४॥ कः ईं स्तवत् कः पृणात कः यजाते यत् उग्यं इत् मघऽवा विश्वहा अवेत् पादीऽइव प्रऽहरन् अन्यंऽअन्यं कृणोति पूर्वं अपरं शचीभिः॥१५॥३२॥ मृगे वीरः उग्यंऽउग्यं दमऽयन् अन्यंऽअन्यं अतिऽनेनीयमानः एधमानऽइत् उभयस्य राजा चोष्कूयते विशः इंद्रः मनुष्यान्॥१६॥ परा पूर्वैषां सख्या वृणक्ति विऽततुराणः अपरेभिः एति अननुऽभूतीः अवऽधून्वानः पूर्वीः इंद्रः शरदः ततरीति॥१७॥ रूपंऽरूपं प्रतिऽरूपः बभूव तत् अस्य रूपं प्रतिऽचक्षणाय इंद्रः मायाभिः पुरुऽरूपः ईयते युक्ताः हि अस्य हरयः शता दश॥१८॥ युजानः हरिता रथे भूरि त्वष्टा इह राजति कः विश्वाहा द्विषतः पक्षः आसते उत आसीनेषु सूरिषु॥१९॥ अगव्यूति क्षेत्रे आ अगन्म देवाः उर्वी सती भूमिः अंहूरणा अभूत् बृहस्पते प्र चिकित्स गोऽइष्टौ इत्था सते जरित्रे इंद्र पंथां॥२०॥३३॥ दिवेऽदिवे सऽदृशीः अन्यं अर्धं कृष्णाः असेधत् अप सद्मनः जाः अहन् दासा वृषभः वस्नऽयंता उदऽव्रजे वर्चिनं शंबरं च॥२१॥ प्रऽस्तोकः इत् नु राधसः ते इंद्र दश कोशयीः दश वाजिनः अदात् दिवःऽदासात् अतिथिऽग्वस्य राधः शांबरं वसु प्रति अग्रभीष्म॥२२॥ दश अश्वान् दश कोशान् दश वस्त्रा अधिऽभोजना दशो हिरण्यऽपिंडान दिवःऽदासात् असानिषं॥२३॥ दश रथान् प्रष्टिऽमतः शतं गाः अथर्वऽभ्यः अश्वथः पायवे अदात्॥२४॥ महि राधः

विश्वऽजन्यं दधानान् भरतऽवाजान् साङ्ग्रेयः अभि अयष्ट ॥२५॥३४॥ वनस्पते वीळुऽअङ्गः हि भूयाः अस्मत्ऽसखा प्रऽतरणः सुऽवीरः गोभिः संऽनद्धः असि वीळयस्व आऽस्थाता ते जयतु जेत्वानि ॥२६॥ दिवः पृथिव्याः परि ओजः उत्ऽभृतं वनस्पतिऽभ्यः परि आऽभृतं सहः अपां ओज्मानं परि गोभिः आऽवृतं इंद्रस्य वज्रं हविषा रथं यज ॥ २७ ॥ इंद्रस्य वज्रः मरुतां अनीकं मित्रस्य गर्भः वरुणस्य नाभिः सः इमां नः हव्यऽदातिं जुषाणः देव रथ प्रति हव्या गृभाय ॥२८॥ उप श्वासय पृथिवीं उत द्यां पुरुऽचा ते मनुतां विऽस्थितं जगत् सः दुंदुभे सऽजूः इंद्रेण देवैः दूरात् दवीयः अप सेध शत्रून ॥ २९ ॥ आ क्रंदय बलं ओजः नः आ धाः निः स्तनिहि दुःऽइता बाधमानः अप प्रोथ दुंदुभे दुच्छुनाः इतः इंद्रस्य मुष्टिः असि वीळयस्व ॥३०॥ आ अमूः अज प्रतिऽआवर्तय इमाः केतुऽमत् दुंदुभिः वावदीति सं अश्वऽपर्णाः चरंति नः नरः अस्माकं इंद्र रथिनः जयंतु ॥ ३१ ॥ ३५ ॥ ७ ॥

॥४८॥ यज्ञाऽयज्ञा वः अग्नये गिराऽगिरा च दक्षसे प्रऽप्र वयं अमृतं जातऽवेदसं प्रियं मित्रं न शंसिषं ॥१॥ ऊर्जः नपातं सः हिन अयं अस्मऽयुः दाशेम हव्यऽदातये भुवत् वाजेषु अविता भुवत् वृधः उत चाता तनूनां ॥२॥ वृषा हि अग्ने अजरः महान् विऽभासि अर्चिषा अजस्रेण शोचिषा शोशुचत् मुचे सुदीतिऽभिः मुदीदिहि ॥३॥ महः देवान् यजसि यक्षि आनुषक् तव क्रत्वा उत दंसना अवोचः सीं कृणुहि अग्ने अवसे रास्व वाजा उत वंस्व ॥४॥

यं आपः अद्रयः वना गर्भं ऋतस्य पिप्रति सहसा यः मथितः जायते नृऽभिः पृथिव्याः अधि सानवि ॥५॥१॥ आ यः पप्रौ भानुना रोदसी उभे धूमेन धावते दिवि तिरः तमः ददृशे ऊर्म्यासु आ श्यावासु अरुषः वृषा आ श्यावाः अरुषः वृषा ॥६॥ बृहत्ऽभिः अग्ने अर्चिऽभिः शुक्रेण देव शोचिषा भरत्ऽवाजे समिद्धानः यविष्ठ्य रेवत नः शुक्र दीदिहि द्युऽमत् पावक दीदिहि ॥७॥ विश्वासां गृहऽपतिः विशां असि त्वं अग्ने मानुषीणां शतं पूःऽभिः यविष्ठ पाहि अंहसः सं ऽएद्धारं शतं हिमाः स्तोतृऽभ्यः ये च ददति ॥८॥ त्वं नः चित्रः ऊत्या वसो राधांसि चोदय अस्य रायः त्वं अग्ने रथीः असि विदाः गाधं तुचे तु नः ॥९॥ पर्षि तोकं तनयं पर्तृऽभिः त्वं अदब्धैः अप्रयुत्वऽभिः अग्ने हेळांसि दैव्या युयोधि नः अदेवानि हरांसि च ॥१०॥२॥ आ सखायः सवःऽदुघां धेनुं अजध्वं उप नव्यसा वचः सृजध्वं अनपऽस्फुरां ॥११॥ या शर्धाय मारुताय स्वऽभानवे श्रवः अमृत्यु धुक्षत या मृळीके मरुतां तुराणां या सुम्नैः एवऽयावरी ॥१२॥ भरत्ऽवाजाय अव धुक्षत द्विता धेनुं च विश्वऽदोहसं इषं च विश्वऽभोजसं ॥१३॥ तं वः इंद्रं न सुऽक्रतुं वरुणंऽइव मायिनं अर्यमणं न मंद्रं सप्रऽभोजसं विष्णुं न स्तुषे आऽदित्यं ॥१४॥ त्वेषं शर्धः न मारुतं तुविऽस्वनिं अनर्वाणं पूषणं सं यथा शता सं सहस्रा कारिषत् चर्षणिऽभ्यः आ आविः गूळ्हा वसु करत् सुऽवेदा नः वसु करत् ॥१५॥ आ मा पूषन् उप द्रव शंसिषं नु ते अपिऽकर्णे आघृणे अघाः अर्यः अरातयः ॥१६॥३॥ मा काकंबीरं उत वृहः वनस्पतिं अशस्तीः वि हि नीनशः मा उत सूरः अहः एव चन यीवाः आऽदधते वेः ॥१७॥ हतेःऽइव ते अवृकं अस्तु सख्यं अच्छिद्रस्य दधन्ऽवतः सुऽपूर्णस्य दधन्ऽवतः ॥१८॥

परः हि मर्त्यैः असि समः देवैः उत श्रिया अभि ख्यः पूषन् पृतनासु नः त्वं अव नूनं यथा पुरा ॥१९॥ वामी वामस्य धूतयः प्रऽनीतिः अस्तु सूनृता देवस्य वा मरुतः मर्त्यस्य वा ईजानस्य प्रऽयज्यवः ॥२०॥ सद्यः चित् यस्य चर्कृतिः परि द्यां देवः नएति सूर्यः त्वेषं शवः दधिरे नाम यज्ञियं मरुतः वृत्रऽहं शवः ज्येष्ठं वृत्रऽहं शवः ॥२१॥ सकृत् ह द्यौः अजायत सकृत् भूमिः अजायत पृश्न्याः दुग्धं सकृत् पयः तत् अन्यः न अनु जायते ॥ २२ ॥ ४ ॥

॥४९॥ स्तुषे जनं सुऽव्रतं नव्यसीभिः गीःऽभिः मित्रावरुणा सुम्नऽयंता ते आ गमंतु ते इह श्रुवंतु सुऽक्षचासः वरुणः मित्रः अग्निः॥१॥ विशःऽविशः ईड्यं अध्वरेषु अद्भ्यःऽक्रतुं अरतिं युवत्योः दिवः शिशुं सहसः सूनुं अग्निं यज्ञस्य केतुं अरुषं यजध्यै॥२॥ अरुषस्य दुहितरा विऽरूपे॰ स्तृऽभिः अन्या पिपिशे सूरः अन्या मिथःऽतुरा विऽचरंती॰ पावके मन्म श्रुतं नक्षतः ऋच्यमाने॥३॥ प्र वायुं अच्छ बृहती मनीषा बृहत्ऽरयिं विश्वऽवारं रथ्ऽआं द्युतत्ऽयामा निऽयुतः पत्यमानः कविः कविं इयक्षसि प्रऽयज्यो॰ ॥४॥ सः मे वपुः छदयत् अश्विनोः यः रथः विरुक्मान् मनसा युजानः येन नरा नासत्या इषयध्यै वर्तिः याथः तनयाय त्मने च ॥५॥५॥ पर्जन्यवाता वृषभा पृथिव्याः पुरीषाणि जिन्वतं अप्यानि सत्यऽश्रुतः कवयः यस्य गीःऽभिः जगतः स्थातः जगत् आ कृणुध्वं ॥६॥ पावीरवी कन्या चित्रऽआयुः सरस्वती वीरऽपत्नी धियं धात् मातिः अच्छिद्रं शरणं सऽजोषाः दुःऽआधर्षं गृणते शर्म यंसत्॥७॥ पथःऽपथः परिऽपतिं वचस्या कामेन कृतः अभि आनट् अर्कैः सः नः रासत् श्रुधिः चंद्रऽअग्याः धियंऽधियं सीसधाति

प्र पूषा ॥८॥ प्रथमऽभाजं यशसं वयःऽधां सुऽपाणिं देवं सुऽगभ-स्तिं ऋभ्वं होता यक्षत् यजतं पस्त्यानां अग्निः त्वष्टारं सुऽहवं विभाऽवा ॥९॥ भुवनस्य पितरं गीःऽभिः आभिः रुद्रं दिवा वर्धय रुद्रं अक्तौ बृहंतं ऋष्वं अजरं सुऽसुम्नं ऋधक् हुवेम कविना इषि-तासः ॥१०॥ ६॥ आ युवानः कवयः यज्ञियासः मरुतः गंत गृणतः वरस्यां अचिचं चित् हि जिन्वथ वृधंतः इत्था नक्षंतः नरः अंगि-रस्वत् ॥११॥ प्र वीराय प्र तवसे तुराय अजं यूथाऽइव पशुऽरक्षिः अस्तं सः पिस्पृशति तन्वि श्रुतस्य स्तृऽभिः न नाकं वचनस्य वि-पः ॥१२॥ यः रजांसि विऽममे पार्थिवानि चिः चित् विष्णुः मनवे बाधितायं तस्य ते शर्मन् उपऽद्द्यमाने राया मदेम तन्वा तना च ॥१३॥ तत् नः अहिः बुध्यः शृतऽभिः अर्कैः तत् पर्वतः तत् सविता चनः धात् तत् ओषधीभिः अभि रातिऽसाचः भगः पुरं-ऽधिः जिन्वतु प्रऽराये ॥१४॥ नु नः रयिं रथ्यं चर्षणिऽप्रां पुरुऽवीरं महः ऋतस्य गोपां क्षयं दात् अजरं येन जनान् स्पृधः अदेवीः अभि च क्रमाम विशः आऽदेवीः अभि अष्ठवाम ॥१५॥ ७॥ ४॥

॥५०॥ हुवे वः देवीं अदितिं नमःऽभिः मृळीकाय वरुणं मित्रं अग्निं अभिऽक्षदां अर्यमणं सुऽशेवं चातृन् देवान् सवितारं भगं च ॥१॥ सुऽज्योतिषः सूर्ये दक्षऽपितॄन् अनागाःऽत्वे सुऽमहः वीहि देवान् द्विऽजन्मानः ये ऋतऽसापः सत्याः स्वःऽवंतः यजताः अग्निऽजिह्वाः ॥२॥ उत द्यावापृथिवी क्षत्रं उरु बृहत् रोदसी शरणं सुऽसुम्ने॰ महः करथः वरिवः यथा नः अस्मे क्षयाय धिषणे अनेहः ॥३॥ आ नः रुद्रस्य सूनवः नमंतां अद्य हूतासः वसवः अधृ-ष्टाः यत् ईं अभि महति वा हितासः बाधे मरुतः अह्वाम देवान्

॥४॥ मित्र्यक्षे येषु रोदसी नु देवी सिसक्ति पूषा अभ्यर्धऽयज्वा श्रुत्वा हवं मरुतः यत् ह याथ भूमं रेजंते अध्वनि प्रऽविक्ते ॥५॥८॥ अभि त्यं वीरं गिर्वणसं अर्च इंद्रं ब्रह्मणा जरितः नवेन अवंत इत् हवं उप च स्तवानः रासत् वाजान् उप महः गृणानः ॥६॥ ओमानं आपः मानुषीः अमृक्तं धात तोकाय तनयाय शं योः यूयं हि स्थ भिषजः मातृऽतमाः विश्वस्य स्थातुः जगतः जनित्रीः ॥७॥ आ नः देवः सविता चायमाणः हिरण्यऽपाणिः यजतः जगम्यात् यः दक्षऽवान् उषसः न प्रतीकं विऽऊर्णुते दाशुषे वार्याणि ॥८॥ उत त्वं सूनो सहसः नः अद्य आ देवान् अस्मिन् अध्वरे ववृत्याः स्याम अहं ते सदं इत् रातौ तव स्याम अग्ने अवसा सुऽवीरः ॥९॥ उत त्या मे हवं आ जग्म्यातं नासत्या धीभिः युवं अंग विप्रा अचिं न महः तमसः अमुमुक्तं तूर्वतं नरा दुःऽइतात् अभीके ॥१०॥९॥ ते नः रायः द्युऽमतः वाजऽवतः दातारः भूत नृऽवतः पुरुऽक्षोः दशस्यंतः दिव्याः पार्थिवासः गोऽजाताः अप्याः मृळत च देवाः ॥११॥ ते नः रुद्रः सरस्वती सऽजोषाः मीळ्हुष्मंतः विष्णुः मृळंतु वायुः ऋभुक्षाः वाजः देव्यः विऽधाता पर्जन्यावाता पिप्यतां इषं नः ॥१२॥ उत स्यः देवः सविता भगः नः अपां नपात् अवतु दानु पप्रिः त्वष्टा देवेभिः जनिऽभिः सऽजोषाः द्यौः देवेभिः पृथिवी समुद्रैः ॥१३॥ उत नः अहिः बुध्यः मृणोतु अजः एकऽपात् पृथिवी समुद्रः विश्वे देवाः ऋतऽवृधः हुवानाः स्तुताः मंत्राः कविऽशस्ताः अवंतु ॥१४॥ एव नपातः मम तस्य धीभिः भरतऽवाजाः अभि अर्चंति अर्कैः माः हुतासः वसवः अधृष्टाः विश्वे स्तुतासः भूत यज्ञाः ॥ १५ ॥ १० ॥

॥५१॥ उत ऊं त्यत् चक्षुः महि मित्रयोः आ एति प्रियं वरुण-

योः अदब्धं ऋतस्य शुचिं दर्शतं अनीकं रुक्मः न दिवः उत्ऽइता वि अद्यौत्॥१॥ वेद यः चीणिं विदथानि एषां देवानां जन्म सनुतः आ च विप्रः ऋजु मर्तेषु वृजिना च पश्यन् अभि चष्टे सूरः अर्यः एवान्॥२॥ स्तुषे ऊं वः महः ऋतस्य गोपान् अदितिं मित्रं वरुणं सुऽजातान् अर्यमणं भगं अदब्धऽधीतीन् अच्छ वोचे सऽधन्यः पावकान्॥३॥ रिशादसः सत्ऽपतीन् अदब्धान् महः राज्ञः सुऽवसनस्य दातॄन् यूनः सुऽक्षत्रान् क्षयतः दिवः नॄन् आदित्यान् यामि अदितिं दुवःऽयु॥४॥ द्यौः पितः पृथिवि मातः अध्रुक् अग्ने भ्रातः वसवः मृळत नः विश्वे आदित्याः अदिते सऽजोषाः अस्मभ्यं शर्म बहुलं वि यंत॥५॥११॥ मा नः वृकाय वृक्ये समस्मै अघऽयते रीरधत यजत्राः यूयं हि स्थ रथ्यः नः तनूनां यूयं दक्षस्य वचसः बभूव॥६॥ मा वः एनः अन्यऽकृतं भुजेम मा तत् कर्म वसवः यत् चयध्वे विश्वस्य हि क्षयथ विश्वऽदेवाः स्वयं रिपुः तन्वं रिरिषीष्ट॥७॥ नमः इत् उग्रं नमः आ विवासे नमः दाधार पृथिवी उत द्यां नमः देवेभ्यः नमः ईशे एषां कृतं चित् एनः नमसा आ विवासे॥८॥ ऋतस्य वः रथ्यः पूतऽदक्षान् ऋतस्य पत्नीऽसदः अदब्धान् तान् आ नमःऽभिः उरुऽचक्षसः नॄन् विश्वान् वः आ नमे महः यजत्राः॥९॥ ते हि श्रेष्ठऽवर्चसः ते ऊं नः तिरः विश्वानि दुःऽइता नयंति सुऽक्षत्रासः वरुणः मित्रः अग्निः ऋतऽधीतयः वक्षराजऽसत्याः॥१०॥१२॥ ते नः इंद्रः पृथिवी क्षामं वर्धन् पूषा भगः अदितिः पंच जनाः सुऽशर्माणः सुऽअवसः सुऽनीथाः भवंतु नः सुऽचाचासः सुऽगोपाः॥११॥ नु सद्मानं दिव्यं नंशि देवाः भारतऽवाजः सुऽमतिं याति होता आसानेभिः यजमानः मियेधैः देवानां जन्म वसुऽयुः ववंद॥१२॥ अप त्यं वृजिनं रिपुं स्तेनं

अग्ने दुःऽआध्यं दविष्ठं अस्य सतऽपते कृधि मुऽगं॥१३॥ यावांणः सोमनः हि कंसखिऽत्वनायं वावृधुः जहि नि अचिराँ पणिं वृकः हि सः॥१४॥ यूयं हि स्थ मुऽदानवः इंद्रऽज्येष्ठाः अभिऽद्यवः कतें नः अध्वन् आ मुऽगं गोपाः अमा ॥१५॥ अपि पंथां अगन्महि स्वस्तिऽगां अनेहसं येन विश्वाः परि द्विषः वृणक्ति विंदतें वसु ॥ १६ ॥ १३ ॥

॥५२॥ न तत् दिवा न पृथिव्या अनु मन्ये न यज्ञेन न उत शमींभिः आभिः उच्चंतु तं मुऽभ्वः पर्वतासः नि हीयतां अतिऽयाजस्य यष्टा॥१॥ अतिं वा यः मरुतः मन्यते नः ब्रह्म वा यः क्रियमांणं निनित्सात् तपूंषि तस्मै वृजिनानि संतु ब्रह्मऽद्विषं अभि तं शोचतु द्यौः॥२॥ किं अंग त्वा ब्रह्मणः सोम गोपां किं अंग त्वा आहुः अभिशस्तिऽपां नः किं अंग नः पश्यसि निद्यमानान् ब्रह्मऽद्विषे तपुंषिं हेतिं अस्य॥३॥ अवंतु मां उषसः जायमानाः अवंतु मा सिंधवः पिन्वमानाः अवंतु मा पर्वतासः ध्रुवासः अवंतु मा पितरः देवऽहूतौ॥४॥ विश्वऽदानीं सुऽमनसः स्याम पश्येम नु सूर्यं उतऽचरंतं तथा करत् वसुऽपतिः वसूनां देवान् ओहानः अवसा आऽगमिष्ठः॥५॥१४॥ इंद्रः नेदिष्ठं अवसा आऽगमिष्ठः सरस्वती सिंधुऽभिः पिन्वमाना पर्जन्यः नः ओषधीभिः मयःऽभुः अग्निः सुऽशंसः सुऽहवः पिताऽइव॥६॥ विश्वे देवासः आ गत शृणुत मे इमं हवं आ इदं बर्हिः नि सीदत ॥७॥ यः वः देवाः घृतऽस्नुना हव्येन प्रतिऽभूषति तं विश्वे उप गच्छथ॥८॥ उप नः सूनवः गिरः शृण्वंतु अमृतस्य ये सुऽमृळीकाः भवंतु नः॥९॥ विश्वे देवाः ऋतऽवृधः ऋतुऽभिः हवनऽश्रुतः जुषंतां युज्यं पयः॥१०॥१५॥ स्तो-

चं इंद्रः मरुत्ऽगणः त्वष्टृऽमान् मित्रः अर्यमा इमा हव्या जुषंत नः ॥११॥ इमं नः अग्ने अध्वरं होतः वयुनऽशः यज चिकित्वान् दैव्यं जनं ॥१२॥ विश्वे देवाः शृणुत इमं हवं मे ये अंतरिक्षे ये उप द्यवि स्थ ये अग्निऽजिह्वाः उत वा यजत्राः आऽसद्य अस्मिन् बर्हिषि मा-दयध्वं ॥१३॥ विश्वे देवाः मम शृण्वंतु यज्ञियाः उभे रोदसी अपां नपात् च मन्म मा वः वचांसि परिऽचक्ष्याणि वोचं सुम्नेषु इत् वः अंतमाः मदेम ॥१४॥ ये के च ज्मा महिनः अहिंऽमायाः दिवः जज्ञिरे अपां सधऽस्थे ते अस्मभ्यं इषये विश्वं आयुः क्षपः उस्राः वरिवस्यंतु देवाः ॥१५॥ अग्नीषोमा अवतं धियं मे अस्मिन् हवे सुऽहवा सुऽस्तुतिं नः इळां अन्यः जनयत् गर्भं अन्यः प्रजाऽवतीः इषः आ धत्तं अस्मे ॥१६॥ स्तीर्णे बर्हिषि संऽइधाने अग्नौ सुऽउक्तेन महा नमसा आ विवासे अस्मिन् नः अद्य विदथे यजत्राः विश्वे देवाः हविषि मादयध्वं ॥ १७ ॥ १६ ॥

॥५३॥ वयं ऊं त्वा पथः पते रथं न वाजंऽसातये धिये पूषन् अयुज्महि ॥१॥ अभि नः नर्यं वसु वीरं प्रयंतऽदक्षिणं वामं गृहऽपतिं नय ॥२॥ अदित्संतं चित् आघृणे पूषन् दानाय चोदय पणेः चित् विमदऽमनः ॥३॥ वि पथः वाजंऽसातये चिनुहि वि मृधः जहि साधंतां उग्र नः धियः ॥४॥ परि तृंधि पणीनां आरया हृदया कवे अथ ईं अस्मभ्यं रंधय ॥५॥१७॥ वि पूषन् आरया तुद पणेः इच्छ हृदि प्रियं अथ ईं अस्मभ्यं रंधय ॥६॥ आ रिख किकिरा कृणु पणीनां हृदया कवे अथ ईं अस्मभ्यं रंधय ॥७॥ यां पूषन् ब्रह्मऽचोदनीं आरां बिभर्षि आघृणे तया समस्य हृदयं आ रिख किकिरा कृणु ॥८॥ या ते अष्ट्रा गोऽओपशा आघृणे पशुऽसाधनी तस्याः ते

सुम्नं ईमहे ॥९॥ उत नः गोऽसनिं धियं अश्वऽसां वाजऽसां उत नृऽवत् कृणुहि वीतये ॥ १० ॥ १८ ॥

॥५४॥ सं पूषन् विदुषा नय यः अंजसा अनुऽशासति यः एव इदं इति ब्रवत् ॥१॥ सं ऊं पूष्णा गमेमहि यः गृहान् अभिऽशासति इमे एव इति च ब्रवत् ॥२॥ पूष्णः चक्रं न रिष्यति न कोशः अव पद्यते नो अस्य व्यथते पविः ॥३॥ यः अस्मै हविषा अविधत् न तं पूषा अपि मृष्यते प्रथमः विंदते वसु ॥४॥ पूषा गाः अनु एतु नः पूषा रक्षतु अर्वतः पूषा वाजं सनोतु नः ॥५॥९॥ पूषन् अनु प्र गाः इहि यजमानस्य सुन्वतः अस्माकं स्तुवतां उत ॥६॥ माकिः नेशत् माकीं रिषत् माकीं सं शारि केवटे अथ अरिष्टाभिः आ गहि ॥७॥ मृणंतं पूषणं वयं इयं अनष्टऽवेदसं ईशानं रायः ईमहे ॥८॥ पूषन् तव व्रते वयं न रिष्येम कदा चन स्तोतारः ते इह स्मसि ॥९॥ परि पूषा परस्तात् हस्तं दधातु दक्षिणं पुनः नः नष्टं आ अजतु ॥ १० ॥ २० ॥

॥५५॥ आ इहि वां विऽमुचः नपात् आघृणे सं सचावहै रथीः ऋतस्य नः भव ॥१॥ रथिऽतमं कपर्दिनं ईशानं राधसः महः रायः सखायं ईमहे ॥२॥ रायः धारा असि आघृणे वसोः राशिः अजऽअश्व धीवतःऽधीवतः सखा ॥३॥ पूषणं नु अजऽअश्वं उप स्तोषाम वाजिनं स्वसुः यः जारः उच्यते ॥४॥ मातुः दिधिषुं अब्रवं स्वसुः जारः शृणोतु नः भ्राता इंद्रस्य सखा मम ॥५॥ आ अजासः पूषणं रथे निऽशृंभाः ते जनऽश्रियं देवं वहंतु बिभ्रतः ॥६॥२१॥

॥५६॥ यः एनं आऽददेशति करंभऽअत्त इति पूषणं न तेन देवः

आऽदिशे॥१॥ उत घ सः रथिऽतमः सख्या सत्ऽपतिः युजा इंद्रः वृचाणि जिघ्नते॥२॥ उत अदः पऋषे गवि सूरः चक्रं हिरण्ययं नि ऐरयत् रथिऽतमः॥३॥ यत् अद्य त्वा पुरुऽस्तुत ब्रवाम दस्म मंतुऽमः तत् सु नः मन्म साधय॥४॥ इमं च नः गोऽएषणं सातये सीसधः गणं आरात् पूषन् असि श्रुतः॥५॥ आ ते स्वस्तिं ईमहे आरेऽअघा उपंऽवसुं अद्य च सर्वऽतातये श्वः च सर्वऽतातये ॥ ६ ॥ २२ ॥

॥५७॥ इंद्रा नु पूषणा वयं सख्याय स्वस्तये हुवेम वाजंऽसातये ॥१॥ सोमं अन्यः उप असदत् पातवे चम्वोः सुतं कंभं अन्यः इच्छति॥२॥ अजाः अन्यस्य वहयः हरी अन्यस्य संऽभृता ताभ्यां वृचाणि जिघ्नते॥३॥ यत् इंद्रः अनयत् रितः महीः अपः वृषन्ऽतमः तत्र पूषा अभवत् सचा॥४॥ तां पूषणः सुऽमतिं वयं वृक्षस्य प्र वयांऽइव इंद्रस्य च आ रभामहे॥५॥ उत पूषणं युवामहे अभीषूनऽइव सारथिः मह्यं इंद्रं स्वस्तये ॥ ६ ॥ २३ ॥

॥५८॥ शुक्रं ते अन्यत् यजतं ते अन्यत् विषुऽरूपे॰ अहनी द्यौःऽइव असि विश्वाः हि मायाः अवसि स्वधाऽवः भद्रा ते पूषन् इह रातिः अस्तु॥१॥ अजऽअश्वः पशुऽपाः वाजंऽपस्त्यः धियंऽजिन्वः भुवने विश्वे अर्पितः अष्टौ पूषा शिथिरां उतऽवरीं वृजत संऽचक्षाणः भुवना देवः ईयते॥२॥ याः ते पूषन् नावः अंतः समुद्रे हिरण्ययीः अंतरिक्षे चरंति ताभिः यासि दूत्यां सूर्यस्य कामेन कृत श्रवः इच्छमानः॥३॥ पूषा सुऽबंधुः दिवः आ पृथिव्याः इळः पतिः मघऽवा दस्मऽवर्चाः यं देवासः अददुः सूर्यायै कामेन कृतं तवसं सुऽअंचं ॥ ४ ॥ २४ ॥

॥५९॥ प्र नु वोचं सुतेषु वां वीर्या यानि चक्रथुः हतासः वां पितरः देवऽशवः इंद्राग्नी जीवथः युवं॥१॥ बट् इत्था महिमा वां इंद्राग्नी पनिष्ठः आ समानः वां जनिता भ्रातरा युवं यमौ इहेहऽमातरा॥२॥ ओकिऽवांसा सुते सचा अश्वा सप्तीऽइव आदने इंद्रा नु अग्नी अवसा इह वज्रिणा वयं देवा हवामहे॥३॥ यः इंद्राग्नी सुतेषु वां स्तवत् तेषु ऋतऽवृधा जोषऽवाकं वदतः पज्रऽहोषिणा न देवा भसथः चन॥४॥ इंद्राग्नी कः अस्य वां देवौ मर्तः चिकेतति विषूचः अश्वान् युयुजानः ईयते एकः समाने आ रथे॥५॥२५॥ इंद्राग्नी अपात् इयं पूर्वी आ अगात् पतऽवतीभ्यः हित्वी शिरः जिह्वया वावदत् चरत् चिंशत् पदा नि अक्रमीत्॥६॥ इंद्राग्नी आ हि तन्वते नरः धन्वानि बाह्वोः मा नः अस्मिन् महाऽधने परा वर्क्त गोऽईष्टिषु॥७॥ इंद्राग्नी तपंति मा अघाः अर्यः अरातयः अप द्वेषांसि आ कृतं युयुतं सूर्यात् अधि॥८॥ इंद्राग्नी युवोः अपि वसु दिव्यानि पार्थिवा आ नः इह प्र यच्छतं रयिं विश्वायुऽपोषसं॥९॥ इंद्राग्नी उक्थऽवाहसा स्तोमेभिः हवनऽश्रुता विश्वाभिः गीःऽभिः आ गतं अस्य सोमस्य पीतये॥१०॥२६॥

॥६०॥ अर्थत् वृचं उत सनोति वाजं इंद्रा यः अग्नी सहुरी सपर्यात् इरज्यंता वसव्यस्य भूरेः सहःऽतमा सहसा वाजऽयंता॥१॥ ता योधिष्टं अभि गाः इंद्र नूनं अपः स्वः उषसः अग्ने ऊळ्हाः दिशः स्वः उषसः इंद्र चिचाः अपः गाः अग्ने युवसे नियुत्वान॥२॥ आ वृचऽहना वृचऽहभिः श्रुष्मैः इंद्र यातं नमःऽभिः अग्ने अर्वाक् युवं राधःऽभिः अर्कवेभिः इंद्र अग्ने अस्मे भवतं उतऽतमेभिः॥३॥ ता

हुवे ययोः इदं पप्ने विश्वं पुरा कृतं इंद्राग्नी न मर्धतः॥४॥ उया वि-ऽघनिना मृधः इंद्राग्नी हवामहे ता नः मृळात ईदृशे॥५॥२७॥ हतः वृचाणि आर्या हतः दासानि सत्ऽपती० हतः विश्वा अप द्विषः॥६॥ इंद्राग्नी युवां इमे अभि स्तोमाः अनूषत पिबतं शं-ऽभुवा सुतं॥७॥ या वां संति पुरुऽस्पृहः निऽयुतः दाशुषे नरा इंद्राग्नी ताभिः आ गतं॥८॥ ताभिः आ गच्छतं नरा उप इदं सवनं सुतं इंद्राग्नी सोमऽपीतये॥९॥ तं ईळिष्व यः अर्चिषा वना विश्वा परिऽस्वजत कृष्णा कृणोति जिह्मया॥१०॥२८॥ यः इद्धे आ-ऽविवासति सुम्नं इंद्रस्य मर्त्यः द्युम्नाय सुऽतरां अपः॥११॥ ता नः वाजऽवतीः इषः आ पून पिपृतं अवीतः इंद्रं अग्निं च वोळ्हवे॥१२॥ उभा वां इंद्राग्नी आऽहुवध्यै उभा राधसः सह मादयध्यै उभा दातारौ इषां रयीणां उभा वाजस्य सातये हुवे वां॥१३॥ आ नः गव्येभिः अश्व्यैः वसव्यैः उप गच्छतं सखायौ देवौ सख्याय शं-ऽभुवा इंद्राग्नी ता हवामहे॥१४॥ इंद्राग्नी शृणुतं हवं यजमानस्य सुन्वतः वीतं हव्यानि आ गतं पिबतं सोम्यं मधु॥१५॥२९॥

॥६१॥ इयं अदात् रभसं ऋणऽच्युतं दिवःऽदासं वध्रिऽअश्वाय दाशुषे या शम्बरं आऽचखाद अवसं पणिं ता ते दात्राणि तविषा सरस्वति॥१॥ इयं शुष्मेभिः बिसखाःऽइव अरुजत् सानु गिरीणां तविषेभिः ऊर्मिऽभिः पारावतऽघ्नी अवसे सुवृक्तिऽभिः सरस्वतीं आ विवासेम धीतिऽभिः॥२॥ सरस्वति देवऽनिदः नि बर्हय प्रऽजां विश्वस्य बृसयस्य मायिनः उत क्षितिऽभ्यः अवनीः अविंदः विषं एभ्यः असृवः वाजिनीऽवति॥३॥ प्र नः देवी सर-

स्वती वाजेभिः वाजिनीऽवती धीनां अविची अवतु॥४॥ यः त्वा देवि सरस्वति उपऽब्रूते धने हिते इंद्रं न वृचऽतूर्ये॥५॥३०॥ त्वं देवि सरस्वति अव वाजेषु वाजिनि रदं पूषाऽइव नः सनिं॥६॥ उत स्या नः सरस्वती घोरा हिरण्यऽवर्तनिः वृचऽग्नी वष्टि सुऽस्तुतिं॥७॥ यस्याः अनंतः अहुतः त्वेषः चरिष्णुः अर्णवः अमः चरति रोरुवत्॥८॥ सा नः विश्वाः अति द्विषः स्वसृः अन्याः ऋतऽवरी अतन् अहाऽइव सूर्यः॥९॥ उत नः प्रिया प्रियासु सप्तऽस्वसा सुऽजुष्टा सरस्वती स्तोम्या भूत॥१०॥३१॥ आऽउपप्रुषीं पार्थिवानि उरु रजः अंतरिक्षं सरस्वती निदः पातु॥११॥ चिऽसधस्थां सप्तऽधातुः पंच जाता वर्धयंती वाजेऽवाजे हव्या भूत॥१२॥ प्र या महिम्ना महिना आसु चेकिते द्युम्नेभिः अन्याः अपसां अपःऽतमा रथःऽइव बृहती विऽभ्वने कृता उपऽस्तुत्या चिकितुषा सरस्वती॥१३॥ सरस्वति अभि नः नेषि वस्यः मा अप स्फरीः पयसा मा नः आ धक् जुषस्व नः सख्या वेश्या च मा त्वत् क्षेत्राणि अरणानि गन्म॥ १४॥ ३२॥ ८॥ ४॥ ५॥

॥६२॥ स्तुषे नरा दिवः अस्य प्रऽसंता अश्विना हुवे जरमाणः अर्कैः या सद्यः उस्रा विऽउषि जमः अंतान् युयूषतः परि उरु वरांसि॥१॥ ता यज्ञं आ शुचिंऽभिः चक्रमाणा रथस्य भानुं रुरुचुः रजःऽभिः पुरु वरांसि अमिता मिमाना अपः धन्वानि अति याथः अज्रान्॥२॥ ता हत्यत् वर्तिः यत् अरध्रं उप्या इत्था धियः ऊहथुः शश्वत् अश्वैः मनःऽजवेभिः इषिरैः शयध्यै परि व्यथिः दाशुषः मर्त्यस्य॥३॥ ता नव्यसः जरमाणस्य मन्म उप भूषतः युयुजानऽसप्ती°शुभं पृक्षं इषं ऊर्जं वहंता होता यक्षत् प्रत्नः अध्रुक् यु-

वाना ॥ ४ ॥ ता वल्गू दस्रा पुरुशाकऽतमा प्रत्ना नव्यसा वचसा आ विवासे या शंसते स्तुवते शंऽभविष्ठा बभूवतुः गृणते चिच-ऽरांती० ॥ ५ ॥ १ ॥ ता भुज्युं विऽभिः अतऽभ्यः समुद्रात् तुग्र्यस्य सूनुं ऊहथुः रजःऽभिः अरेणुऽभिः योजनेभिः भुजंता पतत्रिऽभिः अ-णीसः निः उपऽस्थात् ॥ ६ ॥ वि जुयुषा रथ्या यातं अद्रिं श्रुतं हवं वृषणा वध्रिऽमत्याः दशस्यंता शयवे पिप्यथुः गां इति च्यवाना सुऽमतिं भुरण्यू ॥ ७ ॥ यत् रोदसी प्रऽदिवः अस्ति भूम हेळः देवानां उत मर्त्यऽचा तत् आदित्याः वसवः रुद्रियासः रक्षःऽयुजे तपुः अघं दधात ॥ ८ ॥ यः ई राजानौ ऋतुऽथा विऽदधत् रजसः मित्रः वरुणः चिकेतत् गंभीराय रक्षसे हेतिं अस्य द्रोघाय चित् वचसे आनवाय ॥ ९ ॥ अंतरैः चक्रैः तनयाय वर्तिः द्युऽमता आ यातं नृऽवता रथेन सनुत्येन त्यजसा मर्त्यस्य वनुष्यतां अपि शी-र्षा ववृक्तं ॥ १० ॥ आ परमाभिः उत मध्यमाभिः नियुत्ऽभिः यातं अवमाभिः अर्वाक् दद्धस्य चित् गोऽमतः वि व्रजस्य दुरः वर्तं गृणते चिचऽरांती० ॥ ११ ॥ २ ॥

॥ ६३ ॥ कं त्या वल्गू पुरुऽहूता अद्य दूतः न स्तोमः अविदत् नमस्वान् आ यः अर्वाक् नासत्या ववर्तं प्रेष्ठा हि असथः अस्य मन्मन ॥ १ ॥ अरं मे गंतं हवनाय अस्मै गृणाना यथा पिबाथः अंधः परि ह त्यत् वर्तिः याथः रिषः न यत् परः न अंतरः तुतुर्यात् ॥ २ ॥ अकारि वां अंधसः वरीमन अस्तारि बर्हिः सुप्रऽअयनतमं उत्तानऽहस्तः युवयुः ववंद् आ वां नक्षंतः अद्रयः आंजन् ॥ ३ ॥ ऊर्ध्वः वां अग्निः अध्वरेषु अस्थात् प्र रातिः एति जूर्णिनी घृताची प्र होता गूर्तऽमनाः उराणः अयुक्त यः नासत्या हवीमन ॥ ४ ॥

अधि श्रिये दुहिता सूर्यस्य रथं तस्थौ पुरुभुजा शतऊतिं प्रमा-
याभिः मायिना भूतं अत्र नरा नृतू जनिमन् यज्ञियानां ॥५॥३॥
युवं श्रीभिः दर्शताभिः अभिः सुभे पुष्टिं ऊहथुः सूर्यायाः प्र वां
वयः वपुषे अनु पप्तन् नक्षत् वाणी सुऽस्तुता धिष्ण्या वां ॥६॥
आ वां वयः अश्वासः वहिष्ठाः अभि प्रयः नासत्या वहंतु प्र वां
रथः मनःऽजवाः असर्जि इषः पृक्षः इषिधः अनु पूर्वीः ॥७॥ पुरु हि
वां पुरुऽभुजा देष्णं धेनुं नः इषं पिन्वतं असक्रां स्तुतः च वां मा-
ध्वी सुऽस्तुतिः च रसाः च ये वां अनु रातिं अग्मन् ॥८॥ उत मे
ऋज्रे पुरयस्य रघ्वी सुऽमीळ्हे शतं पेरुके च पक्षा शांडः दात् हि-
रण्यनेः स्मत्ऽदिष्टीन् दश वशासः अभिऽसाचः ऋष्वान् ॥९॥ सं
वां शता नासत्या सहस्रा अश्वानां पुरुऽपंथाः गिरे दात् भरत-
ऽवाजाय वीरे नु गिरे दात् हता रक्षाँसि पुरुऽदंससा स्युः० ॥१०॥
आ वां सुम्ने वरिमन् सूरिऽभिः स्यां ॥ ११ ॥ ४ ॥

॥६४॥ उत ऊं श्रिये उषसः रोचमानाः अस्थुः अपां न ऊर्मयः
रुशंतः कृणोति विश्वा सुऽपथा सुऽगानि अभूत् ऊं वस्वी दक्षि-
णा मघोनी ॥१॥ भद्रा दृक्षे उर्विया वि भासि उत ते शोचिः
भानवः द्यां अपप्तन् आविः वक्षः कृणुषे शुंभमाना उषः देवि रो-
चमाना महःऽभिः ॥२॥ वहंति सीं अरुणासः रुशंतः गावः सुऽभ-
गां उर्विया प्रथानां अप ईजते भूरेः अस्तांऽइव शचून बाधते त-
मः अजिरःन वोळ्हा ॥३॥ सुऽगा उत ते सुऽपथा पर्वतेषु अवाते
अपः तरसि स्वऽभानो० सा नः आ वह पृथुऽयामन् ऋष्वे रयिं
दिवः दुहितः इषयध्यै ॥४॥ सा आ वह या उक्षऽभिः अवाता उषः
वरं वहसि जोषं अनु त्वं दिवः दुहितः या ह देवी पूर्वऽहूतौ महना

दर्शता भूः॥५॥ उत् ते वयः चित् वसतेः अपप्रन् नरः च ये पितुः-ऽभाजः विऽउष्टौ अमा सते वहसि भूरि वामं उषः देवि दाशुषे मर्त्याय ॥ ६ ॥ ५ ॥

॥६५॥ एषा स्या नः दुहिता दिवःऽजाः क्षितीः उच्छंती मानुषीः अजीगः या भानुना रुशता राम्यासु अजायि तिरः तमसः चित् अक्तून्॥१॥ वि तत् ययुः अरुणयुक्ऽभिः अश्वैः चित्रं भांति उषसः चंद्रऽरथाः अयै यज्ञस्य बृहतः नयंतीः वि ताः बाधंते तमः ऊर्म्यायाः॥२॥ अवः वाजं इषं ऊर्जं वहंतीः नि दाशुषे उषसः मर्त्याय मघोनीः वीरऽवत् पत्यमानाः अवः धात विधते रत्नं अद्य ॥३॥ इदा हि वः विधते रत्नं अस्ति इदा वीराय दाशुषे उषसः इदा विप्राय जरते यत् उक्था नि सः माऽवंते वहथ पुरा चित्॥४॥ इदा हि ते उषः अद्रिऽसानो॰ गोचा गवां अंगिरसः गृणंति वि अर्केण बिभिदुः ब्रह्मणा च सत्या नृणां अभवत् देवऽहूतिः॥५॥ उच्छ दिवः दुहितः प्रत्नऽवत् नः भरद्वाजऽवत् विधते मघोनि सुऽवीरं रयिं गृणते रिरीहि उरुऽगायं अधि धेहि अवः नः॥६॥६॥

॥६६॥ वपुः नु तत् चिकितुषे चित् अस्तु समानं नाम धेनु पत्यमानं मर्तेषु अन्यत दोहसे पीपाय सकृत सुक्रं दुदुहे पृश्निः ऊधः ॥१॥ ये अग्नयः न शोशुचन इधानाः द्विः यत् चिः मरुतः ववृधंत अरेणवः हिरण्ययासः एषां साकं नृम्णैः पौंस्येभिः च भूवन॥२॥ रुद्रस्य ये मीळ्हुषः संति पुत्राः यान चो नु दाधृविः भरध्यै विदे हि माता महः मही सा सा इत् पृश्निः सुऽभ्वे गर्भं आ अधात॥३॥ न ये ईषंते जनुषः अया नु अंतः संतः अवद्यानि पुनानाः निः

यत् दुह्रे शुचयः अनु जोषं अनु श्रिया तन्वः उक्षमाणाः॥४॥ मक्षु न येषु दोहसे चित् अयाः आ नाम धृष्णु मारुतं दधानाः न ये स्तोनाः अयासः मह्ना नु चित् सुऽदानुः अव यासत् उग्रान् ॥५॥७॥ ते इत् उग्राः शवसा धृष्णुऽसेनाः उभे युजन्त रोदसी सुऽमेकं० अध स्म एषु रोदसी स्वऽशोचिः आ अमवत्ऽसु तस्थौ न रोकः॥६॥ अ-नेनः वः मरुतः यामः अस्तु अनश्वः चित् यं अजति अरथीः अन-वसः अनभीशुः रजःऽतूः वि रोदसी पथ्याः याति साधन् ॥७॥ न अस्य वर्ता न तरुता नु अस्ति मरुतः यं अवथ वाजऽसातौ तोके वा गोषु तनये यं अप्ऽसु सः व्रजं दर्ता पायै अध द्योः॥८॥ प्र चित्रं अर्कं गृणते तुराय मारुताय स्वऽतवसे भरध्वं ये सहांसि सहसा सहन्ते रेजते अग्ने पृथिवी मखेभ्यः॥९॥ त्विषिऽमंतः अध्वरस्यऽइव दिद्युत् तृषुऽच्यवसः जुह्वः न अग्नेः अर्चयः धुनयः न वीराः भ्रा-जतऽजन्मानः मरुतः अधृष्टाः॥१०॥ तं वृधंतं मारुतं भ्राजतऽऋष्टिं रुद्रस्य सूनुं हुवसा गृणीषे आ विवासे दिवः शर्धाय शुचयः मनीषाः गि-रयः न आपः उग्राः अस्पृधन् ॥ ११ ॥ ८ ॥

॥६७॥ विश्वेषां वः सतां ज्येष्ठऽतमा गीःऽभिः मित्रावरुणा ववृधध्यै सं या रश्माऽइव यमतुः यमिष्ठा ज्ञा जनान् असमा वा-हुऽभिः स्वैः॥१॥ इयं मत् वां प्र स्तृणीते मनीषा उप प्रिया नमसा बर्हिः अच्छ यंतं नः मित्रावरुणौ अधृष्टं छर्दिः यत् वां वरूथ्यं सु-ऽदानू० ॥२॥ आ यातं मित्रावरुणा सुऽशस्ति उप प्रिया नमसा हूयमाना सं यौ अग्नेःऽस्थः अपसाऽइव जनान् श्रुधिऽयतः चित् यतथः महिऽत्वा ॥३॥ अश्वा न या वाजिना पूतऽबंधू० ऋता यत् गर्भं अदितिः भरध्यै प्र या महि महांता जायमाना घोरा मतींय

रिपवे नि दीधः०॥४॥ विश्वे यत् वां महना मंदमानाः क्षत्रं देवासः अदधुः सऽजोषाः परि यत् भूथः रोदसी चित् उर्वी संति स्पशः अदब्धासः अमूराः॥५॥९॥ ता हि क्षत्रं धारयेथे अनु द्यून् दंहेथे सानुं उपमातऽइव द्योः दृळ्हः नक्षंचः उत विश्वऽदेवः भूमिं आ अतान् द्यां धासिना आयोः॥६॥ ता वियंधेथे जठरं पृणध्यै आ यत् सद्म सऽभृतयः पृणंति न मृष्यंते युवतयः अवाताः वि यत् पयः विश्वऽजिन्वा भरंते॥७॥ ता जिह्वया सदं आ इदं सुऽमेधाः आ यत् वां सत्यः अरतिः ऋते भूत् तत् वां महिऽत्वं घृतऽअन्नौ अस्तु युवं दाशुषे वि चयिष्टं अंहः॥८॥ प्र यत् वां मिचावरुणा स्पूर्धन् प्रिया धामं युवऽधिता मिनंति न ये देवासः ओहसा न मर्तीः अयज्ञऽसाचः अप्यः न पुचाः॥९॥ वि यत् वाचं कीस्तासः भरंते शंसंति के चित् निऽविदः मनानाः आत् वां ब्रवाम सत्यानि उक्था नकिः देवेभिः यतथः महिऽत्वा॥१०॥ अवोः इत्था वां छर्दिषः अभिष्टौ युवोः मिचावरुणौ अस्कृधोयु अनु यत् गावः स्फुरान् ऋजिप्यं धृष्णुं यत् रणे वृषणं युनजन्॥११॥१०॥

॥६८॥ श्रुष्टी वां यज्ञः उतऽयतः सऽजोषाः मनुष्वत् वृक्तऽबर्हिषः यजध्यै आ यः इंद्रावरुणौ इषे अद्य महे सुम्नाय महे आऽववर्तत्॥१॥ ता हि श्रेष्ठा देवऽतातिः तुजा शूराणां शविष्ठा ता हि भूतं मघोनां महिष्ठा तुविऽशुष्मा ऋतेन वृचऽतुरा सवेऽसेना॥२॥ ता गृणीहि नमस्येभिः शूषैः सुम्नेभिः इंद्रावरुणा चकाना वज्रेण अन्यः शवसा हंति वृत्रं सिसक्ति अन्यः वृजनेषु विप्रः॥३॥ मा चः यत् नरः चः ववृधंत विश्वे देवासः नरां स्वऽगूर्ताः प्र एभ्यः इंद्रावरुणा महिऽत्वा द्यौः च पृथिवि भूतं उर्वी॥४॥ सः इत् सु-

ऽदानुः स्वऽवान् ऋतऽवा इंद्रा यः वां वरुणा दाशति त्मन् इषा
सः द्विषः तरेत् दास्वान् वंसत् रयिं रयिऽवतः च जनान् ॥५॥११॥
यं युवं दाप्सुऽअंध्वराय देवा रयिं धत्थः वसुऽमंतं पुरुऽक्षुं अस्मे सः
इंद्रावरुणौ अपि स्यात् प्र यः भनक्ति वनुषां अशस्तीः ॥६॥
उत नः सुऽचाचः देवऽगोपाः सूरिऽभ्यः इंद्रावरुणा रयिः स्यात्
येषां शुष्मः पृतनासु सह्वान् प्र सद्यः द्युम्ना तिरते ततुरिः ॥७॥
नु नः इंद्रावरुणा गृणाना पृक्षं रयिं सौश्रवसाय देवा इत्था गृ-
णंतः महिनस्य शर्धः अपः न नावा दुःऽइता तरेम ॥८॥ प्र संऽराजे
बृहते मन्म नु प्रियं अर्चे देवाय वरुणाय सऽप्रथः अयं यः उर्वीं
महिना महिऽव्रतः ऋत्वा विऽभाति अजरः न शोचिषा ॥९॥
इंद्रावरुणा सुतऽपौ इमं सुतं सोमं पिबतं मद्यं धृतऽव्रता युवोः
रथः अध्वरं देवऽवीतये प्रति स्वसरं उप याति पीतये ॥१०॥ इंद्रा-
वरुणा मधुमतऽतमस्य वृष्णः सोमस्य वृषणा आ वृषेथां इदं वां
अंधः परिऽसिक्तं अस्मे आऽसद्य अस्मिन् बर्हिषि मादयेथां
॥ ११ ॥ १२ ॥

॥६९॥ सं वां कर्मणा सं इषा हिनोमि इंद्राविष्णू अपसः पारे
अस्य जुषेथां यज्ञं द्रविणं च धत्तं अरिष्टैः नः पथिऽभिः पारयंता
॥१॥ या विश्वासां जनितारा मतीनां इंद्राविष्णू कलशा सोम-
ऽधानां प्र वां गिरः शस्यमानाः अवंतु प्र स्तोमासः गीयमानासः
अर्कैः ॥२॥ इंद्राविष्णू मदऽपती० मदानां आ सोमं यातं द्रविणो-
दधाना सं वां अंजंतु अक्तुऽभिः मतीनां सं स्तोमासः शस्यमा-
नासः उक्थैः ॥३॥ आ वां अश्वासः अभिमातिऽसहः इंद्राविष्णू
सधऽमादः वहंतु जुषेथां विश्वा हवना मतीनां उप ब्रह्माणि शृ-

णुतं गिरः मे ॥४॥ इंद्रांविष्णू तत पनयायं वां सोमस्य मदे उरु चक्रमाथे अकृणुतं अंतरिक्षं वरीयः अप्रथतं जीवसे नः रजांसि ॥५॥ इंद्रांविष्णू हविषा ववृधाना अयंऽअद्वाना नमसा रातऽहव्या घृतंऽआसुती० द्रविणं धत्तं अस्मे समुद्रः स्थः कलशः सोमऽधानः ॥६॥ इंद्रांविष्णू पिबतं मध्वः अस्य सोमस्य दस्रा जठरं पृणेथां आ वां अंधांसि मदिराणि अग्मन् उप ब्रह्माणि शृणुतं हवं मे ॥७॥ उभा जिग्यथुः न परा जयेथे न परा जिग्ये कतरः चन एनोः इंद्रः च विष्णो यत अपस्पृधेथां चेधा सहस्रं वि तत ऐरये-थां ॥ ८ ॥ १३ ॥

॥७०॥ घृतऽवती० भुवनानां अभिऽश्रियां उर्वी पृथ्वी मधुऽदुघे० सुऽपेशसा द्यावापृथिवी वरुणस्य धर्मणा विऽस्कभिते० अजरे भूरिऽरेतसा ॥१॥ असश्चंती भूरिऽधारे० पयस्वती घृतं दुहाते सुऽकृते शुचिऽव्रते० राजंती अस्य भुवनस्य रोदसी अस्मे रेतः सिंचतं यत मनुःऽहितं ॥२॥ यः वां ऋजवे क्रमणाय रोदसी मर्तः ददाश धिषणे सः साधति प्र प्रऽजाभिः जायते धर्मणः परि युवोः सिक्ता विषुऽरूपाणि सऽव्रता ॥३॥ घृतेन द्यावापृथिवी अभिऽवृते० घृतऽश्रिया घृतऽपृचा घृतऽवृधा उर्वी पृथ्वी होतृऽवूर्ये पुरःऽहिते० ते इत विप्राः ईळते सुम्नं इष्टये ॥४॥ मधु नः द्यावापृथिवी मिमिक्षतां मधुऽश्चुता मधुऽदुघे० मधुऽव्रते० दधाने यज्ञं द्रविणं च देवता महि श्रवः वाजं अस्मे सुऽवीर्यं ॥५॥ ऊर्जं नः द्यौः च पृथिवी च पिन्वतां पिता माता विश्वऽविदा सुऽदंससा संऽरराणे० रोदसी विश्वऽशंभुवा सनिं वाजं रयिं अस्मे संइन्वतां ॥ ६ ॥ १४ ॥

॥७१॥ उत् ऊं स्यः देवः सविता हिरण्यया बाहू अयंस्त सवनाय सुऽक्रतुः घृतेन पाणी अभि प्रुष्णुते मखः युवा सुऽदक्षः रजसः विऽधर्मणि॥१॥ देवस्य वयं सवितुः सवीमनि श्रेष्ठे स्याम वसुनः च दावने यः विश्वस्य द्विऽपदः यः चतुःऽपदः निऽवेशने प्रऽसवे च असि भूमनः॥२॥ अदब्धेभिः सवितः पायुऽभिः त्वं शिवेभिः अद्य परि पाहि नः गयं हिरण्यऽजिह्वः सुविताय नव्यसे रक्षा माकिः नः अघऽशंसः ईशत॥३॥ उत् ऊं स्यः देवः सविता दमूनाः हिरण्यऽपाणिः प्रतिऽदोषं अस्थात् अयःऽहनुः यजतः मंद्रऽजिह्वः आ दाशुषे सुवति भूरि वामं॥४॥ उत् ऊं अयान् उपवक्ताऽइव बाहू हिरण्यया सविता सुऽप्रतीका दिवः रोहाँसि अरुहत् पृथिव्याः अरीरमत् पतयत् कत् चित् अभ्वं॥५॥ वामं अद्य सवितः वामं ऊं श्वः दिवेऽदिवे वामं असभ्यं सावीः वामस्य हि क्षयस्य देव भूरेः अया धिया वामऽभाजः स्याम ॥६॥१५॥

॥७२॥ इंद्रासोमा महि तत् वां महिऽत्वं युवं महानि प्रथमानि चक्रथुः युवं सूर्यं विविदथुः युवं स्वः विश्वा तमांसि अहतं निदः च॥१॥ इंद्रासोमा वासयथः उषसं उत् सूर्यं नयथः ज्योतिषा सह उप द्यां स्कंभथुः स्कंभनेन अप्रथतं पृथिवीं मातरं वि॥२॥ इंद्रासोमौ अहिं अपः परिऽस्थां हथः वृत्रं अनु वां द्यौः अमन्यत प्र अर्णांसि ऐरयतं नदीनां आ समुद्राणि पप्रथुः पुरूणि॥३॥ इंद्रासोमा पक्वं आमासु अंतः नि गवां इत् दधथुः वक्षणासु जगृभथुः अनपिऽनद्धं आसु रुशत् चिचासु जगतीषु अंतः॥४॥ इंद्रासोमा युवं अंग तरुत्रं अपत्यऽसाचं श्रुत्यं राधे युवं शुष्मं नर्यं चर्षणिऽभ्यः सं विव्यथुः पृतनाऽसहं उग्रा ॥५॥१६॥

॥७३॥ यः अद्रिऽभित् प्रथमऽजाः ऋतऽवा बृहस्पतिः आंगिरसः हविष्मान् ह्विबर्हैऽजमा प्राघर्मेऽसत् पिता नः आ रोदसी॰ वृषभः रोरवीति॥१॥ जनाय चित् यः ईवते ऊं लोकं बृहस्पतिः देवऽहूतौ चकार घ्नन् वृचाणिं वि पुरः दर्दरीति जयन् शचून् अमिचान् पृतऽसु सहन्॥२॥ बृहस्पतिः सं अजयत् वसूनि महः व्रजान् गोऽमतः देवः एषः अपः सिसासन् स्वः अप्रतिऽइतः बृहस्पतिः हंति अमिचं अर्कैः ॥३॥१७॥

॥७४॥ सोमारुद्रा धारयेथां असुर्यं प्र वां इष्टयः अरं अश्नुवंतु दमेऽदमे सप्त रत्ना दधाना शं नः भूतं ह्विऽपदे शं चतुःऽपदे॥१॥ सोमारुद्रा वि वृहतं विषूचीं अमीवा या नः गयं आऽविवेश आरे बाधेथां निःऽऋतिं पराचैः अस्मे॰ भद्रा सौश्रवसानि संतु ॥२॥ सोमारुद्रा युवं एतानि अस्मे॰ विश्वा तनूषु भेषजानि धत्तं अव स्यतं मुंचतं यत् नः अस्ति तनूषु बद्धं कृतं एनः अस्मत्॥३॥ तिग्मऽआयुधौ तिग्मऽहेती॰ सुऽशेवौ सोमारुद्रौ इह सु मृळतं नः प्र नः मुंचतं वरुणस्य पाशात् गोपायतं नः सुऽमनस्यमाना ॥ ४ ॥ १८ ॥

॥७५॥ जीमूतस्यऽइव भवति प्रतीकं यत् वर्मी याति सऽमदां उपऽस्थे अनाविद्धया तन्वा जयत्वं सः त्वा वर्मणः महिमा पिपर्तु ॥१॥ धन्वना गाः धन्वना आजिं जयेम धन्वना तीव्राः सऽमदः जयेम धनुः शचोः अपऽकामं कृणोति धन्वना सर्वाः प्रऽदिशः जऽ

येम॥२॥ वक्ष्यंतीऽइव इत् आ गनीगंति कर्णं प्रियं सखायं परि-ऽसस्वजाना योषाऽइव शिंक्ते विऽतंता अधि धन्वन् ज्या इयं समने पारयंती॥३॥ ते आऽचरंती० समनाऽइव योषा माता-ऽइव पुत्रं बिभृतां उपऽस्थे अप शत्रून् विध्यतां संऽविदाने० आर्ल्ली इमे विऽस्फुरंती० अमित्रान्॥४॥ बह्वीनां पिता बहुः अस्य पुत्रः चिश्चा कृणोति समना अवऽगत्य इषुऽधिः संकाः पृतनाः च सर्वाः पृष्ठे निऽनद्धः जयति प्रऽसूतः॥५॥१९॥ रथे तिष्ठन् नयति वाजिनः पुरः यत्रऽयत्र कामयते सुऽसारथिः अभीषूनां महिमानं पनायत मनः पश्चात् अनु यच्छंति रश्मयः॥६॥ तीव्रान् घोषान् कृण्वते वृषऽपाणयः अश्वाः रथेभिः सह वाजयंतः अव-ऽक्रामंतः प्रऽपदैः अमित्रान् क्षिणंति शत्रून् अनपऽव्ययंतः॥७॥ रथऽवाहनं हविः अस्य नाम यत्र आयुधं निऽहितं अस्य वर्म तत्र रथे उप शग्मं सदेम विश्वाहा वयं सुऽमनस्यमानाः॥८॥ स्वा-दुऽसंसदः पितरः वयःऽधाः कृच्छ्रेऽश्रितः शक्तिऽवंतः गभीराः चित्रऽसेनाः इषुऽबलाः अमृधाः सतःऽवीराः उरवः वातऽसहाः ॥९॥ ब्राह्मणासः पितरः सोम्यासः शिवे नः द्यावापृथिवी अने-हसा पूषा नः पातु दुःऽइतात् ऋतऽवृधः रक्षा माकिः नः अघ-ऽशंसः ईशत ॥१०॥२०॥ सुऽपर्णं वस्ते मृगः अस्याः दंतः गोभिः संऽनद्धा पतति प्रऽसूता यत्र नरः सं च वि च द्रवंति तत्र अस्मभ्यं इषवः शर्म यंसन्॥११॥ ऋजीते परि वृङ्धि नः अश्मा भवतु नः तनूः सोमः अधि ब्रवीतु नः अदितिः शर्म यच्छतु॥१२॥ आ जंघंति सानु एषां जघनान् उप जिघ्नते अश्वऽअजनि प्रऽचेतसः अश्वान् समत्ऽसु चोदय॥१३॥ अहिःऽइव भोगैः परि एति बाहुं ज्या-याः हेतिं परिऽबाधमानः हस्तघ्नः विश्वा वयुनानि विद्वान् पु-

मान् पुमाँसं परि पातु विश्वतः॥१४॥ आलंऽअक्ता या रुरुऽशी-र्णी अथो यस्याः अयः मुखं इदं पर्जन्यऽरेतसे इष्वै देव्यै बृहत् नमः॥१५॥२१॥ अवंऽसृष्टा परा पत शरव्ये ब्रह्मऽसंशिते गच्छ अमित्रान् प्र पद्यस्व मा अमीषां कं चन उत शिषः॥१६॥ यत्र बाणाः संऽपतंति कुमाराः विशिखाःऽइव तत्र नः ब्रह्मणः पतिः अदितिः शर्म यच्छतु विश्वाहा शर्म यच्छतु॥१७॥ मर्माणि ते वर्मणा छादयामि सोमः त्वा राजा अमृतेन अनु वस्तां उरोः वरीयः वरुणः ते कृणोतु जयंतं त्वा अनु देवाः मदंतु॥१८॥ यः नः स्वः अरणः यः च निष्ट्यः जिघांसति देवाः तं सर्वे धूर्वंतु ब्रह्म वर्म मम अंतरं॥१९॥२२॥६॥६॥

॥ इति षष्ठं मंडलं समाप्तं ॥

॥ पदपाठः ॥

॥ ओं ॥

॥१॥ अग्निं नरः दीधितिऽभिः अरण्योः हस्तेऽच्युती जनयंत प्रऽशस्तं दूरेऽदृशं गृहऽपतिं अथर्युं॥१॥ तं अग्निं अस्ते वसवः नि ऋण्वन् सुऽप्रतिचक्षं अवसे कुतः चित् दक्षाय्यः यः दमे आस नित्यः॥२॥ प्रऽईडः अग्ने दीदिहि पुरः नः अजस्रया सूर्म्या यविष्ठ त्वां शश्वंतः उप यंति वाजाः॥३॥ प्र ते अग्नयः अग्निऽभ्यः वरं निः सुऽवीरासः शोशुचंत द्युऽमंतः यच्च नरः संऽआसते सुऽजाताः ॥४॥ दाः नः अग्ने धिया रयिं सुऽवीरं सुऽअपत्यं सहस्य प्रऽशस्तं न यं यावा तरति यातुऽमावान्॥५॥२३॥ उप यं एति युवतिः सुऽदक्षं दोषा वस्तोः हविष्मती घृताची उप स्वा एनं अरमतिः वसुऽयुः ॥६॥ विश्वाः अग्ने अप दह अरातीः येभिः तपःऽभिः अदहः जरूथं प्र निऽस्वरं चातयस्व अमीवां॥७॥ आ यः ते अग्ने इधते अनीकं वसिष्ठ शुक्र दीदिऽवः पावक उतो' नः एभिः स्तवथैः इह स्याः॥८॥ वि ये ते अग्ने भेजिरे अनीकं मर्ताः नरः पिप्यासः पुरुऽचा उतो' नः एभिः सुऽमनाः इह स्याः॥९॥ इमे नरः वृचऽहत्येषु शूराः विश्वाः अदेवीः अभि संतु मायाः ये मे धियं पनयंत प्रऽशस्तां॥१०॥२४॥ मा शूने अग्ने नि सदाम नृणां मा अशेषसः अवीरता परि त्वा प्रजाऽवतीषु दुर्यासु दुर्ये॥११॥ यं अश्वी नित्यं उपऽयाति यज्ञं प्रजाऽवंतं सुऽअपत्यं क्षयं नः स्वऽजन्मना शेषसा ववृधानं॥१२॥ पाहि नः अग्ने रक्षसः अजुष्टात्

पाहि धूर्तेः अरंरुषः अघऽयोः त्वा युजा पृतनाऽयून् अभि स्यां ॥१३॥ सः इत् अग्निः अग्नीन् अति अस्तु अन्यान् यत्र वाजी तनयः वीळुऽपाणिः सहस्रऽपाथाः अक्षरा संऽएति ॥१४॥ सः इत् अग्निः यः वनुष्यतः निऽपाति संऽएडाः अंहसः उरुष्यात् सु-ऽजातासः परि चरंति वीराः॥१५॥२५॥ अयं सः अग्निः आऽहुतः पुरुऽचा यं ईशानः सं इत् इंधे हविष्मान् परि यं एति अध्वरेषु होता॥१६॥ त्वे अग्ने आऽहवनानि भूरि ईशानासः आ जुहुयाम नित्या उभा कृण्वंतः वहतू मियेधे॥१७॥ इमो अग्ने वीतऽतमानि हव्या अजस्रः वक्षि देवऽताति अच्छ प्रति नः ईं सुरभीणि व्यंतु॥१८॥ मा नः अग्ने अवीरते परा दाः दुःऽवासंसे अमतये मा नः अस्यै मा नः क्षुधे मा रक्षसे कृतऽवः मा नः दमे मा वने आ जुहूर्थाः॥१९॥ नु मे ब्रह्माणि अग्ने उत् शशाधि त्वं देव मघवंतऽभ्यः सुसूदः रातौ स्याम उभयासः आ ते यूयं पात स्वस्तिऽभिः सदा नः॥२०॥२६॥ त्वं अग्ने सुऽहवः रण्वऽसंदृक् सुऽदीतीसूनो सहसः दिदीहि मा त्वे सचा तनये नित्ये आ धक् मा वीरः अस्मत् नर्यः वि दासीत्॥२१॥ मा नः अग्ने दुःऽभृतये सचा एषु देवऽइंद्धेषु अग्निषु प्र वोचः मा ते अस्मान् दुःऽमतयः भूमात् चित् देवस्य सूनो सहसः नशंत॥२२॥ सः मर्तः अग्ने सुऽअनीक रेवान् अमर्त्ये यः आऽजुहोति हव्यं सः देवता वसुऽवनिं दधाति यं सूरिः अर्थी पृच्छमानः एति॥२३॥ महः नः अग्ने सुवितस्य विद्वान् रयिं सूरिऽभ्यः आ वह बृहंतं येन वयं सहसाऽवन् मदेम अविऽक्षितासः आयुषा सुऽवीराः॥२४॥ नु मे ब्रह्माणि अग्ने उत् शशाधि त्वं देव मघवंतऽभ्यः सुसूदः रातौ स्याम उभयासः आ ते यूयं पात स्वस्तिऽभिः सदा नः॥२५॥२७॥१॥

॥ २ ॥ जुषस्व नः सं ऽइधँ अग्ने अद्य शोचं बृहत् यजतं धूमं ऋ-ण्वन् उप स्पृश दिव्यं सानु स्तूपैः सं रश्मिऽभिः ततनः सूर्यस्य ॥ १ ॥ नराशंसस्य महिमानँ एषां उप स्तोषाम यजतस्य यज्ञैः ये सुऽऋतवः शुचयः धियंऽधाः स्वदँन्ति देवाः उभयानि हव्या ॥ २ ॥ ईळेन्यँ वः असुरं सुऽदक्षँ अंतः दूतं रोदसी सत्यऽवाचँ मनुष्वत् अग्निं मनुना संऽइंडं सं अध्वराय सदँ इत् महेम ॥ ३ ॥ सपर्यवः भरमाणाः अभिऽज्ञु प्र वृंजते नमसा बर्हिः अग्नौ आऽजुह्वानाः घृतऽपृष्ठं पृषत्ऽवत् अध्वर्यवः हविषा मर्जयध्वं ॥ ४ ॥ सुऽआध्यः वि दुरः देवऽयंतः अशिश्रयुः रथऽयुः देवऽताता पूर्वी शिप्रे न मातरा रिहाणे सं अयुवः न समनेषु अंजन् ॥ ५ ॥ १ ॥ उत योष-णे दिव्ये मही नः उषासानक्ता सुदुघाऽइव धेनुः बर्हिऽसदा पुरुऽहूते० मधोनी आ यज्ञियै सुविताय श्रयेतां ॥ ६ ॥ विप्रा यज्ञेषु मानुषेषु कारू मन्ये वां जातऽवेदसा यजध्यै ऊर्ध्वं नः अ-ध्वरं कृतं हवेषु ता देवेषु वनथः वार्याणि ॥ ७ ॥ आ भारती भार-तीभिः सऽजोषाः इळा देवैः मनुष्येभिः अग्निः सरस्वती सार-स्वतेभिः अर्वाक् तिस्रः देवीः बर्हिः आ इदं सदंतु ॥ ८ ॥ तत् नः तुरीपँ अध पोषयित्नु देव त्वष्टः वि रराणः स्यस्व० यतः वीरः कर्मण्यः सुऽदक्षः युक्तऽग्रावा जायते देवऽकामः ॥ ९ ॥ वनस्पते अव सृज उप देवान् अग्निः हविः शमिता सूदयाति सः इत् ऊं होता सत्यऽतरः यजाति यथा देवानां जनिमानि वेद ॥ १० ॥ आ याहि अग्ने संऽइधानः अर्वाङ् इंद्रेण देवैः सऽरथँ तुरेभिः बर्हिः नः आस्तां अदितिः सुऽपुत्रा स्वाहा देवाः अमृताः मादयंतां ॥ ११ ॥ २ ॥

॥ ३ ॥ अग्निं वः देवं अग्निऽभिः सऽजोषाः यजिष्ठं दूतं अध्वरे

कृणुध्वं यः मर्त्येषु निऽध्रुविः ऋतऽवा तपुःऽमूर्धा घृतऽअंचः पावकः॥१॥ प्रोथत् अश्वः न यवसे अविष्यन् यदा महः संऽवरणात् वि अस्थात् आत् अस्य वातः अनु वाति शोचिः अध स्म ते व्रजनं कृष्णं अस्ति॥२॥ उत् यस्य ते नवऽजातस्य वृष्णः अग्ने चरंति अजराः इधानाः अच्छ द्यां अरुषः धूमः एति सं दूतः अग्ने ईयसे हि देवान्॥३॥ वि यस्य ते पृथिव्यां पाजः अश्रेत् नृषु यत् अर्चा संऽअवृक्त जंभैः सेनाऽइव सृष्टा प्रऽसितिः ते एति यवं न दस्म जुह्वा विवेक्षि॥४॥ तं इत् दोषा तं उषसि यविष्ठं अग्निं अत्यं न मर्जयंत नरः निऽशिशानाः अतिथिं अस्य योनौ दीदाय शोचिः आऽहुतस्य वृष्णः॥५॥३॥ सुऽसंदृक् ते सुऽअनीक प्रतीकं वि यत् रुक्मः न रोचसे उपाके दिवः न ते तन्यतुः एति शुष्मः चित्रः न सूरः प्रति चक्षि भानुं॥६॥ यथा वः स्वाहा अग्नये दाशेम परि इळाभिः घृतवत्ऽभिः च हव्यैः तेभिः नः अग्ने अमितैः महःऽभिः शतं पूःऽभिः आयसीभिः नि पाहि॥७॥ याः वा ते संति दाशुषे अधृष्टाः गिरः वा याभिः नृऽवतीः उरुष्याः ताभिः नः सूनो सहसः नि पाहि स्मत् सूरीन् जरितॄन् जातऽवेदः॥८॥ निः यत् पूताऽइव स्वऽधितिः शुचिः गात् स्वया कृपा तन्वा रोचमानः आ यः माचोः उशेन्यः जनिष्ट देवऽयज्याय सुऽक्रतुः पावकः॥९॥ एता नः अग्ने सौभगा दिदीहि अपि क्रतुं सुऽचेतसं वतेम विश्वा स्तोतृऽभ्यः गृणते च संतु यूयं पात स्वस्तिऽभिः सदा नः॥१०॥४॥

॥४॥ प्र वः शुक्राय भानवे भरध्वं हव्यं मतिं च अग्नये सुऽपूतं यः दैव्यानि मानुषा जनूंषि अंतः विश्वानि विद्मना जिगाति॥१॥ सः

गृत्सः अग्निः तरुणः चित् अस्तु यतः यविष्ठः अजनिष्ट मातुः सं यः वना युवते शुचिऽदन् भूरि चित् अन्ना सं इत् अत्ति सद्यः॥२॥ अस्य देवस्य संऽसदि अनीके यं मर्तासः श्येतं जगृभ्रे नि यः गृभं पौरुषेयीं उवोच दुःऽओकं अग्निः आयवे शुशोच॥३॥ अयं कविः अकविषु प्रऽचेताः मर्तेषु अग्निः अमृतः नि धायि सः मा नः अत्र जुहुरः सहस्वः सदा त्वे सुऽमनसः स्याम॥४॥ आ यः योनिं देवऽकृतं ससाद ऋत्वा हि अग्निः अमृतान् अतारीत् तं ओषधीः च वनिनः च गर्भं भूमिः च विश्वऽधायसं बिभर्ति॥५॥५॥ ईशे हि अग्निः अमृतस्य भूरेः ईशे रायः सुऽवीर्यस्य दातोः मा त्वा वयं सहसाऽवन् अवीराः मा अप्सवः परि सदाम मा अदुवः॥६॥ परिऽसद्यं हि अरणस्य रक्णः नित्यस्य रायः पतयः स्याम न शेषः अग्ने अन्यऽजातं अस्ति अचेतानस्य मा पथः वि दुक्षः॥७॥ नहि यभाय अरणः सुऽशेवः अन्यऽउदर्यः मनसा मंतवै ऊं अध चित् ओकः पुनः इत् सः एति आ नः वाजी अभीषाट् एतु नव्यः॥८॥ त्वं अग्ने वनुष्यतः नि पाहि त्वं ऊं नः सहसाऽवन् अवद्यात् सं त्वा ध्वस्मन्ऽवत् अभि एतु पाथः सं रयिः स्पृहयाय्यः सहस्री॥९॥ एता नः अग्ने सौभगा दिदीहि अपि क्रतुं सुऽचेतसं वतेम विश्वा स्तोतृऽभ्यः गृणते च संतु यूयं पात स्वस्तिऽभिः सदा नः॥१०॥६॥

॥५॥ प्र अग्नये नवसे भरध्वं गिरं दिवः अरतये पृथिव्याः यः विश्वेषां अमृतानां उपऽस्थे वैश्वानरः ववृधे जागृवत्ऽभिः॥१॥ पृष्टः दिवि धायि अग्निः पृथिव्यां नेता सिंधूनां वृषभः स्तियानां सः मानुषीः अभि विशः वि भाति वैश्वानरः ववृधानः वरेण्यः॥२॥

त्वत् भिया विशः आयन् असिक्नीः असमनाः जहतीः भोजनानि वैश्वानर पूरवे शोशुचानः पुरः यत् अग्ने दरयन् अदीदेः॥३॥ तव चिऽधातु पृथिवी उत द्यौः वैश्वानर व्रतं अग्ने सचंत त्वं भासा रोदसी आ ततंथ अजस्रेण शोचिषा शोशुचानः॥४॥ त्वां अग्ने हरितः वावशानाः गिरः सचंते धुनयः घृताचीः पतिं कृष्टीनां रथ्यं रयीणां वैश्वानरं उषसां केतुं अह्नां॥५॥७॥ त्वे असुर्यं वसवः नि अरण्वन् क्रतुं हि ते मित्रऽमहः जुषंत त्वं दस्यून् ओकसः अग्ने आजः उरु ज्योतिः जनयन् आर्याय॥६॥ सः जायमानः परमे विऽओमन् वायुः न पाथः परि पासि सद्यः त्वं भुवना जनयन् अभि क्रन् अपत्याय जातऽवेदः दशस्यन्॥७॥ तां अग्ने अस्मे इषं आ ईरयस्व वैश्वानर द्युऽमतीं जातऽवेदः ययां राधः पिन्वसि विश्वऽवार पृथु श्रवः दाशुषे मर्त्याय॥८॥ तं नः अग्ने मघवत्ऽभ्यः पुरुऽक्षुं रयिं नि वाजं श्रुत्यं युवस्व वैश्वानर महि नः शर्म यच्छ रुद्रेभिः अग्ने वसुऽभिः सऽजोषाः॥९॥८॥

॥६॥ प्र संऽराजः असुरस्य प्रऽशस्तिं पुंसः कृष्टीनां अनुऽमाद्यस्य इंद्रस्यऽइव प्र तवसः कृतानि वंदे दारुं वंदमानः विवक्मि॥१॥ कविं केतुं धासिं भानुं अद्रेः हिन्वंति शं राज्यं रोदस्योः पुरुऽदरस्य गीःऽभिः आ विवासे अग्नेः व्रतानि पूर्व्या महानि॥२॥ नि अक्रतून् यथिनः मृध्रऽवाचः पणीन् अश्रद्धान् अवृधान् अयज्ञान् प्रऽअग्ने तान् दस्यून् अग्निः विवाय पूर्वैः चकार अपरान् अयज्यून्॥३॥ यः अपाचीने तमसि मदंतीः प्राचीः चकार नृऽतमः शचीभिः तं ईशानं वस्वः अग्निं गृणीषे अनानतं दमयंतं पृतन्यून्॥४॥ यः देवयः अनमयत् वधऽस्नैः यः अर्यऽपत्नीः उषसः

चकार सः निऽरुध्यं नहुषः यह्वः अग्निः विशः चक्रे बलिऽहृतः सहःऽभिः॥५॥ यस्य शर्मन् उप विश्वे जनासः एवैः तस्थुः सुऽमतिं भिक्षमाणाः वैश्वानरः वरं आ रोदस्योः आ अग्निः ससाद पिचोः उपऽस्थे॥६॥ आ देवः ददे बुध्यां वसूनि वैश्वानरः उतऽईता सूर्यस्य आ समुद्रात् अवरात् आ परस्मात् आ अग्निः ददे दिवः आ पृथिव्याः॥७॥९॥

॥७॥ प्र वः देवं चित् सहसानं अग्निं अश्वं न वाजिनं हिषे नमःऽभिः भव नः दूतः अध्वरस्य विद्वान् त्मना देवेषु विविदे मितऽदुः॥१॥ आ याहि अग्ने पथ्याः अनु स्वाः मंद्रः देवानां सख्यं जुषाणः आ सानु शुष्मैः नदयन् पृथिव्याः जंभेभिः विश्वं उशधक् वनानि॥२॥ प्राचीनः यज्ञः सुऽधितं हि बर्हिः प्रीणीते अग्निः ईळितः न होता आ मातरा विश्वऽवारे० हुवानः यतः यविष्ठ जज्ञिषे सुऽशेवः॥३॥ सद्यः अध्वरे रथिरं जनंत मानुषासः विऽचेतसः यः एषां विशां अधायि विश्पतिः दुरोणे अग्निः मंद्रः मधुऽवचाः ऋतऽवा॥४॥ असादि वृतः बर्हिः आऽजगन्वान् अग्निः ब्रह्मा नृऽसदने विऽधर्ता द्यौः च यं पृथिवी ववृधातें आ यं होता यजति विश्वऽवारं॥५॥ एते द्युम्नेभिः विश्वे आ अतिरंत मंचं ये वा अरं नर्यः अतक्षन् प्र ये विशः तिरंत श्रोषमाणाः आ ये मे अस्य दीधयन् ऋतस्य॥६॥ नु त्वां अग्ने ईमहे वसिष्ठाः ईशानं सूनो सहसः वसूनां इषं स्तोतृऽभ्यः मघवत्ऽभ्यः आनट् यूयं पात स्वस्तिऽभिः सदा नः॥७॥१०॥

॥८॥ इंधे राजा सं अर्यः नमःऽभिः यस्य प्रतीकं आऽहुतं घृतेन

नरः ह्व्येभिः ईळते सऽबाधः आ अग्निः अग्ये उषसाँ अशोचि ॥१॥ अयं ऊं स्यः सुऽमहान् अवेदि होता मंद्रः मनुषः यह्वः अग्निः वि भाः अकः० ससृजानः पृथिव्यां कृष्णऽपविः ओषधीभिः ववक्षे॥२॥ कया नः अग्ने वि वसः सुऽवृक्तिं कां ऊं स्वधां चृणवः शस्यमानः कदा भवेम पतयः सुऽदच रायः वंतारः दुस्तरस्य साधोः॥३॥ प्रऽप्र अयं अग्निः भरतस्य शृण्वे वि यत् सूर्यः न रोचते बृहत् भाः अभि यः पूरुं पृतनासु तस्थौ द्युतानः दैव्यः अतिथिः शुशोच॥४॥ असन् इत् वे आऽहवनानि भूरि भुवः विश्वेभिः सुऽमनाः अनीकैः स्तुतः चित् अग्ने शृणिषे गृणानः स्वयं वर्धस्व तन्वं सुऽजात॥५॥ इदं वचः शतऽसाः संऽसहस्रं उत् अग्नये जनिषीष्ट द्विऽबर्हाः शं यत् स्तोतृऽभ्यः आपये भवाति द्युऽमत् अमीवऽचातनं रक्षःऽहा॥६॥ नु त्वां अग्ने ईमहे वसिष्ठाः ईशानं सूनो सहसः वसूनां इषं स्तोतृऽभ्यः मघवन्ऽभ्यः आनट् यूयं पात स्वस्तिऽभिः सदा नः॥७॥११॥

॥९॥ अबोधि जारः उषसाँ उपऽस्थात् होता मंद्रः कविऽतमः पावकः दधाति केतुं उभयस्य जंतोः हव्या देवेषु द्रविणं सुकृत्ऽसु ॥१॥ सः सुऽक्रतुः यः वि दुरः पणीनां पुनानः अर्कं पुरुऽभोजसं नः होता मंद्रः विशां दमूनाः तिरः तमः दद्दशे राम्याणां॥२॥ अमूरः कविः अदितिः विवस्वान् सुऽसंसत् मित्रः अतिथिः शिवः नः चित्रऽभानुः उषसां भाति अग्ये अपां गर्भः प्रऽस्थः आ विवेश॥३॥ ईळेन्यः वः मनुषः युगेषु समनऽगाः अप्रुचत् जातऽवेदाः सुऽसंदृशं भानुना यः विऽभाति प्रति गावः संऽइधानं बुधंत॥४॥ अग्ने याहि दूत्यं मा रिषण्यः देवान् अच्छ बृहऽकृता

गणेन सरस्वतीं मरुतः अश्विना अपः यक्षि देवान् रत्नऽधेयाय विश्वान्॥५॥ त्वां अग्ने संऽइधानः वसिष्ठः जरूथं हन् यक्षि राये पुरंऽधिं पुरुऽनीथा जातऽवेदः जरस्व यूयं पात स्वस्तिऽभिः सदा नः॥६॥१२॥

॥१०॥ उषः न जारः पृथु पाजः अश्रेत् दविद्युतत् दीद्यत् शोशुचानः वृषा हरिः शुचिः आ भाति भासा धियः हिन्वानः उशतीः अजीगः॥१॥ स्वः न वस्तोः उषसां अरोचि यज्ञं तन्वानाः उशिजः न मन्म अग्निः जन्मानि देवः आ वि विद्वान् दूवत् दूतः देवऽयावा वनिष्ठः॥२॥ अच्छ गिरः मतयः देवऽयंतीः अग्निं यंति द्रविणं भिक्षमाणाः सुऽसंदृशं सुऽप्रतीकं सुऽअंचं हव्यऽवाहं अरतिं मानुषाणां॥३॥ इद्रं नः अग्ने वसुऽभिः सऽजोषाः रुद्रं रुद्रेभिः आ वह बृहंतं आदित्येभिः अदितिं विश्वऽजन्यां बृहस्पतिं ऋक्वऽभिः विश्वऽवारं॥४॥ मंद्रं होतारं उशिजः यविष्ठं अग्निं विशः ईळते अध्वरेषु सः हि क्षपाऽवान् अभवत् रयीणां अतंद्रः दूतः यजथाय देवान्॥५॥१३॥

॥११॥ महान् असि अध्वरस्य प्रऽकेतः न ऋते त्वत् अमृताः मादयंते आ विश्वेभिः सऽरथं याहि देवैः नि अग्ने होता प्रथमः सद इह॥१॥ त्वां ईळते अजिरं दूत्याय हविष्मंतः सदं इत् मानुषासः यस्य देवैः आ असदः बर्हिः अग्ने अहानि अस्मै सुऽदिना भवंति॥२॥ चिः चित् अक्तोः प्र चिकितुः वसूनि त्वे अंतः दाशुषे मर्त्याय मनुष्वत् अग्ने इह यक्षि देवान् भव नः दूतः अभिशस्तिऽपावा॥३॥ अग्निः ईशे बृहतः अध्वरस्य अग्निः विश्वस्य हविषः

कृतस्य क्रतुं हि अस्य वसवः जुषंत अथ देवाः दधिरे हव्यऽवाहं ॥४॥ आ अग्ने वह हविःऽअद्याय देवान् इंद्रऽज्येष्ठासः इह मादयंतां इमं यज्ञं दिवि देवेषु धेहि यूयं पात स्वस्तिऽभिः सदा नः ॥५॥१४॥

॥१२॥ अगन्म महा नमसा यविष्ठं यः दीदाय संऽइद्धः स्वे दुरोणे चिचऽभानुं रोदसी अंतः उर्वी सुऽआहुतं विश्वतः प्रत्यंचं ॥१॥ सः महा विश्वा दुःऽइतानि सद्मान् अग्निः स्तवे दमे आ जातऽवेदाः सः नः रक्षिषत् दुःऽइतात् अवद्यात् अस्मान् गृणतः उत नः मघोनः ॥२॥ त्वं वरुणः उत मित्रः अग्ने त्वां वर्धंति मतिऽभिः वसिष्ठाः त्वे वसु सुऽसनुनानि संतु यूयं पात स्वस्तिऽभिः सदा नः ॥३॥१५॥

॥१३॥ प्र अग्नये विश्वऽशुचे धियंऽधे असुरऽघ्ने मन्म धीतिं भरध्वं भरे हविः न बर्हिषि प्रीणानः वैश्वानराय यतये मतीनां ॥१॥ त्वं अग्ने शोचिषा शोशुचानः आ रोदसी अपृणाः जायमानः त्वं देवान् अभिऽशस्तेः अमुंचः वैश्वानर जातऽवेदः महिऽत्वा ॥२॥ जातः यत् अग्ने भुवना वि अख्यः पपून् न गोपाः इर्यः परिऽज्मा वैश्वानर ब्रह्मणे विंद् गातुं यूयं पात स्वस्तिऽभिः सदा नः ॥३॥१६॥

॥१४॥ संऽइधा जातऽवेदसे देवाय देवहूतिऽभिः हविःऽभिः शुक्रऽशोचिषे नमस्विनः वयं दाशेम अग्नये ॥१॥ वयं ते अग्ने संऽइधा विधेम वयं दाशेम सुऽस्तुती यजत्र वयं घृतेन अध्वरस्य

होतः वयं देव हविषा भद्रऽशोचे॥२॥ आ नः देवेभिः उप देवऽहूतिं अग्ने याहि वषट्ऽकृतिं जुषाणः तुभ्यं देवाय दाशतः स्याम यूयं पात स्वस्तिऽभिः सदा नः ॥३॥१७॥

॥१५॥ उपऽसद्याय मीळ्हुषे आस्ये जुहुत हविः यः नः नेदिष्ठं आप्यं ॥१॥ यः पंच चर्षणीः अभि निऽससाद दमेऽदमे कविः गृहऽपतिः युवा॥२॥ सः नः वेदः अमात्यं अग्निः रक्षतु विश्वतः उत अस्मान् पातु अंहसः॥३॥ नवं नु स्तोमं अग्नये दिवः श्येनाय जीजनं वस्वः कुवित् वनाति नः॥४॥ स्याहाः यस्य श्रियः दृशे रयिः वीरऽवतः यथा अग्ये यज्ञस्य शोचतः ॥५॥१८॥ सः इमां वेतु वषट्ऽकृतिं अग्निः जुषत नः गिरः यजिष्ठः हव्यऽवाहनः ॥६॥ नि त्वा नक्ष्य विश्पते द्युऽमंतं देव धीमहि सुऽवीरं अग्ने आऽहुत ॥७॥ क्षपः उस्रः च दीदिहि सुऽअग्नयः त्वया वयं सुऽवीरः त्वं अस्मऽयुः ॥८॥ उप त्वा सातये नरः विप्रासः यंति धीतिऽभिः उप अक्षरा सहस्रिणी॥९॥ अग्निः रक्षांसि सेधति शुक्रऽशोचिः अमर्त्यः शुचिः पावकः ईड्यः ॥१०॥१९॥ सः नः राधांसि आ भर ईशानः सहसः यहो भगः च दातु वार्यं ॥११॥ त्वं अग्ने वीरऽवत् यशः देवः च सविता भगः दितिः च दाति वार्यं ॥१२॥ अग्ने रक्ष नः अंहसः प्रति स्म देव रिषतः तपिष्ठैः अजरः दह ॥१३॥ अध मही नः आयसी अनाधृष्टः नृऽपीतये पूः भव शतऽभुजिः ॥१४॥ त्वं नः पाहि अंहसः दोषाऽवस्तः अघऽयतः दिवा नक्तं अदाभ्य ॥१५॥२०॥

॥१६॥ एना वः अग्निं नमसा ऊर्जः नपातं आ हुवे प्रियं चे-

तिष्ठं अरतिं सुऽअध्वरं विश्वस्य दूतं अमृतं॥१॥ सः योजते अरुषा विश्वऽभोजसा सः दुद्रवत् सुऽआहुतः सुऽब्रह्मा यज्ञः सुऽशमी वसूनां देवं राधः जनानां॥२॥ उत् अस्य शोचिः अस्थात् आऽजुह्वानस्य मीळ्हुषः उत् धूमासः अरुषासः दिविऽस्पृशः सं अग्निं इंधते नरः॥३॥ तं त्वा दूतं कृणमहे यशःऽतमं देवान् आ वीतये वह विश्वा सूनो सहसः मर्तऽभोजना रास्व तत् यत् त्वा ईमहे॥४॥ त्वं अग्ने गृहऽपतिः त्वं होता नः अध्वरे त्वं पोता विश्वऽवार प्रऽचेताः यक्षि वेषि च वार्यं॥५॥ कृधि रत्नं यजमानाय सुऽक्रतो॰ त्वं हि रत्नऽधाः असि आ नः ऋते शिशीहि विश्वं ऋत्विजं सुऽशंसः यः च दक्षते॥६॥२१॥ त्वे अग्ने सुऽआहुत प्रियासः संतु सूरयः यंतारः ये मघऽवानः जनानां ऊर्वान् दयंत गोनां॥७॥ येषां इळा घृतऽहस्ता दुरोणे आ अपि प्राता निऽसीदति तान् चायस्व सहस्य दुहः निदः यच्छ नः शर्म दीर्घऽश्रुत्॥८॥ सः मंद्रया च जिह्वया वह्निः आसा विदुःऽतरः अग्ने रयिं मघवत्ऽभ्यः नः आ वह हव्यऽदातिं च सूदय॥९॥ ये राधांसि ददति अश्व्या मघा कामेन श्रवसः महः तान् अंहसः पिपृहि पर्तृऽभिः त्वं शतं पूःऽभिः यविष्ठ्य॥१०॥ देवः वः द्रविणःऽदाः पूर्णां विवष्टि आऽसिचं उत् वा सिंचध्वं उप वा पृणध्वं आत् इत् वः देवः ओहते॥११॥ तं होतारं अध्वरस्य प्रऽचेतसं वह्निं देवाः अकृण्वत दधाति रत्नं विधते सुऽवीर्यं अग्निः जनाय दाशुषे॥१२॥२२॥

॥१७॥ अग्ने भव सुऽसमिधा संऽइद्धः उत बर्हिः उर्विया वि स्तृणीतां॥१॥ उत द्वारः उशतीः वि श्रयंतां उत देवान् उशतः आ वह इह॥२॥ अग्ने वीहि हविषा यक्षि देवान् सुऽअध्वरा कृणुहि

जातऽवेदः ॥३॥ सुऽअध्वरा करति जातऽवेदाः यक्षत् देवान् अमृतान् पिप्रयत् च ॥४॥ वंस्व विश्वा वार्याणि प्रऽचेतः० सत्याः भवंतु आऽशिषः नः अद्य॥५॥ त्वां ऊं ते दधिरे हव्यऽवाहं देवासः अग्ने ऊर्जः आ नपातं॥६॥ ते ते देवाय दाशंतः स्याम महः नः रत्ना वि दधः इयानः ॥७॥२३॥१॥

॥१८॥ त्वे ह यत् पितरः चित् नः इंद्र विश्वा वामा जरितारः असन्वन् त्वे गावः सुऽदुघाः त्वे हि अश्वाः त्वं वसु देवऽयते वनिष्ठः॥१॥ राजाऽइव हि जनिऽभिः क्षेषि एव अवद्युऽभिः अभि विदुः कविः सन् पिशा गिरः मघऽवन् गोभिः अश्वैः त्वाऽयतः शिशीहि राये अस्मान् ॥२॥ इमाः ऊं त्वा पस्पृधानासः अत्र मंद्राः गिरः देवऽयंतीः उप स्युः अर्वाचीं ते पथ्या रायः एतु स्यामं ते सुऽमतौ इंद्र शर्मन्॥३॥ धेनुं न त्वा सुऽयवसे दुधुक्षन् उप ब्रह्माणि ससृजे वसिष्ठः त्वां इत् मे गोऽपतिं विश्वः आह आ नः इंद्रः सुऽमतिं गंतु अच्छ॥४॥ अर्णांसि चित् पप्रथाना सुऽदासे इंद्रः गाधानि अकृणोत् सुऽपारा शर्धंतं शिम्युं उचथस्य नव्यः शापं सिंधूनां अकृणोत् अशस्तीः ॥५॥२४॥ पुरोळाः इत् तुर्वशः यक्षुः आसीत् राये मत्स्यासः निऽशिताः अपिऽइव श्रुष्टिं चक्रुः भृगवः द्रुह्यवः च सखा सखायं अतरत् विषूचोः॥६॥ आ पक्थासः भलानसः भनंत आ अलिनासः विषाणिनः शिवासः आ यः अनयत् सधऽमाः आर्यस्य गव्या तृत्सुऽभ्यः अजगन् युधा नॄन्॥७॥ दुःऽआध्यः अदितिं सेवयंतः अचेतसः वि जगृभ्रे परुष्णीं महा अविव्यक् पृथिवीं पत्यमानः पप्रुः कविः अशयत् चायमानः ॥८॥ ईयुः अर्थं न निऽअर्थं परुष्णीं आप्रुः चन इत् अभिऽपित्वं

जगाम सुऽदासे इंद्रः सुऽतुकान् अमिचान् अरंधयत् मानुषे वधिऽवाचः ॥९॥ ईयुः गावः न यवसात् अगोपाः यथाऽकृतं अभि मिचं चितासः पृश्निऽगावः पृश्निऽनिप्रेषितासः श्रुष्टिं चक्रुः निऽयुतः रंतयः च ॥१०॥२५॥ एकं च यः विंशतिं च श्रवस्या वैकर्णयोः जनान् राजा नि अस्तः॰ दस्मः न सद्मन् नि शिशाति बर्हिः शूरः सर्गं अकृणोत् इंद्रः एषां ॥११॥ अध श्रुतं कवषं वृद्धं अप्ऽसु अनुं दुह्युं नि वृणक् वज्रंऽबाहुः वृणानाः अत्र सख्याय सख्यं त्वाऽयंतः ये अमदन् अनु त्वा ॥१२॥ वि सद्यः विश्वा दुंहितानि एषां इंद्रः पुरः सहसा सप्त दर्दः॰ वि आनवस्य तृत्सवे गयं भाक् जेषं पूरुं विदथे मृध्रऽवाचं ॥१३॥ नि गव्यवः अनवः द्रुह्यवः च षष्टिः शता सुसुप्ुः षट् सहस्रा षष्टिः वीरासः अधि षट् दुवःऽयु विश्वा इत् इंद्रस्य वीर्या कृतानि ॥१४॥ इंद्रेण एते तृत्सवः वेविषाणाः आपः न सृष्टाः अधवंत नीचीः दुःऽमिचासः प्रकल्पऽवित् मिमानाः जहुः विश्वानि भोजना सुऽदासे ॥१५॥२६॥ अर्धं वीरस्य शृतऽपां अनिंद्रं परा शर्धंतं नुनुदे अभि क्षां इंद्रः मन्युं मन्युऽम्यः मिमाय भेजे पथः वर्तनिं पत्यमानः ॥१६॥ आध्रेण चित् ततऽक्रं एकं चकार सिंह्यं चित् पेत्वेन जघान अव स्रक्तीः वेश्याः अवृश्चत् इंद्रः प्र अयच्छत् विश्वा भोजना सुऽदासे ॥१७॥ शश्वंतः हि शर्वः ररधुः ते भेदस्य चित् शर्धतः विंद् रंधिं मर्तान् एनः स्तुवतः यः कृणोति तिग्मं तस्मिन् नि जहि वज्रं इंद्र ॥१८॥ आवंत् इंद्रं यमुना तृत्सवः च प्र अत्र भेदं सर्वऽताता मुषायत् अजासः च शिग्यवः यक्षवः च बलिं शीर्षाणि जभ्रुः अश्वानि ॥१९॥ न ते इंद्र सुऽमतयः न रायः संऽचक्षे पूर्वीः उषसः न नूत्नाः देवकं चित् मान्यमानं जघंथ अव त्मना बृहतः शंबरं भेत्

॥२०॥२७॥ प्र ये गृहात् अमंमदुः त्वाऽया पराऽशरः शतऽयातुः वसिष्ठः न ते भोजस्य सख्यं मृषंत अध सूरिऽभ्यः सुऽदिना वि उच्छान् ॥२१॥ द्वे नप्तुः देवऽवंतः शते गोः द्वा रथा वधूऽमंता सुऽदासः अर्हन् अग्ने पैजऽवनस्य दानं होताऽइव सद्म परि एमि रेभन् ॥२२॥ चत्वारः मा पैजऽवनस्य दानाः स्मत्ऽदिष्टयः कृणुनिनः निऽरेके ऋज्रासः मा पृथिविऽस्थाः सुऽदासः तोकं तोकाय श्रवसे वहंति ॥२३॥ यस्य श्रवः रोदसी अंतः उर्वी शीर्ष्णेऽशीर्ष्णे विऽबभाज विऽभक्ता सप्त इत् इंद्रं न स्रवतः गृणंति नि युध्यामधिं अशिशात् अभीकें ॥२४॥ इमं नरः मरुतः सश्चत अनु दिवःऽदासं न पितरं सुऽदासः अविष्टन पैजऽवनस्य केतं दुःऽनशं क्षुचं अजरं दुवःऽयु ॥२५॥२८॥

॥१९॥ यः तिग्मऽशृंगः वृषभः न भीमः एकः कृष्टीः च्यवयति प्र विश्वाः यः शश्वतः अदाशुषः गयस्य प्रऽयंता असि सुस्विऽतराय वेदः ॥१॥ त्वं ह त्यत् इंद्र कुत्सं आवः शुश्रूषमाणः तन्वा सऽमर्ये दासं यत् शुष्णं कुयवं नि अस्मै अरंधयः आर्जुनेयाय शिक्षन् ॥२॥ त्वं धृष्णो धृषता वीतऽहव्यं प्र आवः विश्वाभिः ऊतिऽभिः सुऽदासं प्र पौरुऽकुत्सिं चसदस्युं आवः क्षेचंऽसाता वृचऽहत्येषु पूरुं ॥३॥ त्वं नृऽभिः नृऽमनः देवऽवीतौ भूरीणि वृचा हरिऽअश्व हंसि त्वं नि दस्युं चुमुरिं धुनिं च अस्वापयः दभीतये सुऽहंतु ॥४॥ तव च्यौत्नानि वज्रऽहस्त तानि नव यत् पुरः नवतिं च सद्यः निऽवेशने शतऽतमा अविवेषीः अहन् च वृत्रं नमुचिं उत अहन् ॥५॥२९॥ सना ता ते इंद्र भोजनानि रातऽहव्याय दाशुषे सुऽदासे वृष्णे ते हरी वृषणा युनज्मि व्यंतु ब्रह्माणि पुरुऽ

ऽशाकं वाजँ॥६॥ मा ते अस्यां सहसाऽवन् परिष्टौ अघाय भूम हरिऽवः पराऽदै चार्यस्व नः अवृकेभिः वरूथैः तव प्रियासः सूरिषु स्याम ॥७॥ प्रियासः इत् ते मघऽवन् अभिष्टौ नरः मदेम शरणे सखायः नि तुर्वशँ नि याद्वँ शिशीहि अतिथिऽग्वाय शंस्यँ करिष्यन् ॥८॥ सद्यः चित् नु ते मघऽवन् अभिष्टौ नरः शंसंति उक्थऽशासः उक्था ये ते हवेभिः वि पणीन् अदाशन् अस्मान् वृणीष्व युज्याय तस्मै ॥९॥ एते स्तोमाः नरां नृऽतम तुभ्यँ अस्मद्र्यँचः ददतः मघानि तेषाँ इंद्र वृचऽहत्ये शिवः भूः सखा च शूरः अविता च नृणां ॥१०॥ नु इंद्र शूर स्तवमानः ऊती ब्रह्मऽजूतः तन्वा ववृधस्व उप नः वाजान् मिमीहि उप स्तीन् यूयं पात स्वस्तिऽभिः सदा नः ॥११॥ ३०॥ २॥

॥ २० ॥ उग्रः जज्ञे वीर्याय स्वधाऽवान् चक्रिः अपः नयँः यत् करिष्यन् जग्मिः युवा नृऽसदनं अवःऽभिः चाता नः इंद्रः एनसः महः चित् ॥१॥ हंता वृचं इंद्रः शूशुवानः प्र आवीत् नु वीरः जरितारँ ऊती कर्ता सुऽदासे अह वै ऊं लोकं दाता वसु मुहुः आ दाशुषे भूत् ॥२॥ युध्मः अनर्वा खजऽकृत् समत्ऽवा शूरः सचाषाट् जनुषा ईं अषाळ्हः वि आसे इंद्रः पृतनाः सुऽओजाः अध विश्वँ शचुऽयंतँ जघान ॥३॥ उभे चित् इंद्र रोदसी महिऽत्वा आ पप्राथ तविषीभिः तुविष्मः नि वज्रँ इंद्रः हरिऽवान् मिमिक्षन् सं अंधसा मदेषु वै उवोच ॥४॥ वृषा जजान वृषणं रणाय तं ऊं चित् नारी नयँ ससूव प्र यः सेनाऽनीः अध नृऽभ्यः अस्ति इनः सत्वा गोऽएषणः सः धृष्णुः ॥५॥ ७॥ नु चित् सः भेषते जनः न रेषत् मनः यः अस्य घोरं आऽविवासात् यज्ञैः यः इंद्रे दधते दुवाँसि क्षयत् सः

राये ऋतऽपाः ऋतेऽजाः ॥६॥ यत् इंद्र पूर्वैः अपराय शिक्षन् अ-
र्यत्ज्यायान् कनीयसः देष्णं अमृतः इत् परि आसीत् दूरं आ चित् चि-
च्यैं भर रयिं नः ॥७॥ यः ते इंद्र प्रियः जनः ददाशत् असत् नि-
रेके अद्रिऽवः सखा ते वयं ते अस्यां सुऽमतौ चनिष्ठाः स्याम व-
रूथे अघ्नतः नृऽपीतौ ॥८॥ एषः स्तोमः अचिक्रदत् वृषा ते उत
स्तामुः मघऽवन् अक्रपिष्ट रायः कामः जरितारं ते आ अगन् त्वं
अंग शक्र वस्वः आ शकः नः ॥९॥ सः नः इंद्र त्वऽयताये इषे धाः
त्मना च ये मघऽवानः जुनंति वस्वी सु ते जरिते अस्तु शक्तिः यूयं
पात स्वस्तिऽभिः सदा नः ॥१०॥२॥

॥२१॥ असावि देवं गोऽऋजीकं अंधः नि अस्मिन् इंद्रः ज-
नुषा ईं उवोच बोधामसि त्वा हरिऽअश्व यज्ञैः बोध नः स्तोमं अं-
धसः मदेषु ॥१॥ प्र यंति यज्ञं विपयंति बर्हिः सोमऽमादः विदथे
दुध्रऽवाचः नि ऊं भ्रियंते यशसः गृभात् आ दूरेऽउपब्दः वृषणः
नृऽसाचः ॥२॥ त्वं इंद्र सवितवै अपः कः० परिऽस्थिताः अहिना
शूर पूर्वीः त्वत् वावक्रे रथ्यः न धेनाः रेजंते विश्वा कृचिमाणि भी-
षा ॥३॥ भीमः विवेष आयुधेभिः एषां अपांसि विश्वा नर्याणि
विद्वान् इंद्रः पुरः जर्हषाणः वि दूधोत् वि वज्रऽहस्तः महिना ज-
घान् ॥४॥ न यातवः इंद्र जूजुवुः नः न वंदना शविष्ठ वेद्याभिः सः
शर्धत् अर्यः विषुणस्य जंतोः मा शिष्नऽदेवाः अपि गुः ऋतं नः
॥५॥३॥ अभि ऋतवा इंद्र भूः अधऽजमन् न ते विव्यक् महिमानं र-
जांसि स्वेन हि वृत्रं शवसा जघंथ न शत्रुः अंतं विविदत् युधा ते
॥६॥ देवाः चित् ते असुर्याय पूर्वे अनु क्षत्राय ममिरे सहांसि इंद्रः
मघानि दयते विऽसह्य इंद्रं वाजस्य जोहुवंत सातौ ॥७॥ कीरिः

चित् हि त्वा अवसे जुहावं ईशानं इंद्र सौभगस्य भूरेः अवः वभूथ शतंऽऊते अस्मे अभिऽक्षत्तुः त्वाऽवतः वरूता॥८॥ सखायः ते इंद्र विश्वहा स्याम नमःऽवृधासः महिना तरुच वन्वंतु स्म ते अव-सा संऽईके अभिऽईतिं अर्यः वनुषां शवांसि॥९॥ सः नः इंद्र त्व-ऽयतायै इषे धाः त्मना च ये मघऽवानः जुनंति वस्वी सु ते जरिचे अस्तु शक्तिः यूयं पात स्वस्तिऽभिः सदा नः॥१०॥४॥

॥२२॥ पिब सोमं इंद्र मंदतु त्वा यं ते सुसावं हरिऽअश्व अद्रिः सोतुः बाहुऽभ्यां सुऽयतः न अर्वा॥१॥ यः ते मदः युज्यः चारुः अ-स्ति येन वृत्राणि हरिऽअश्व हंसि सः त्वां इंद्र प्रभुऽवसो॰ ममत्तु ॥२॥ बोध सु मे मघऽवन् वाचं आ इमां यां ते वसिष्ठः अर्चति प्रऽशस्तिं इमा ब्रह्म सधऽमादे जुषस्व॥३॥ श्रुधि हवं विऽपिपा-नस्य अद्रेः बोध विप्रस्य अर्चतः मनीषां कृष्व दुवांसि अंतमा सचा इमा॥४॥ न ते गिरः अपि मृष्ये तुरस्य न सुऽस्तुतिं असुर्यस्य विद्वान् सदा ते नाम स्वऽयशः विवक्मि॥५॥५॥ भूरि हि ते सव-ना मानुषेषु भूरि मनीषी हवते त्वां इत् मा आरे अस्मत् मघऽवन् ज्योक् कः॰ ॥६॥ तुभ्य इत् इमा सवना शूर विश्वा तुभ्यं ब्रह्माणि वर्धना कृणोमि त्वं नृऽभिः हव्यः विश्वधा असि॥७॥ नु चित् नु ते मन्यमानस्य दस्म उत् अश्नुवंति महिमानं उग्र न वीर्यं इंद्र ते न राधः॥८॥ ये च पूर्वे ऋषयः ये च नूत्नाः इंद्र ब्रह्माणि जनयंत विप्राः अस्मे ते संतु सख्या शिवानि यूयं पात स्वस्तिऽभिः सदा नः॥९॥६॥

॥२३॥ उत् ऊं ब्रह्माणि ऐरत श्रवस्या इंद्रं सऽमर्ये महय वसिष्ठ

आ यः विश्वानि शवसा ततानं उपऽश्रोता मे ईवतः वचांसि॥१॥ अयामि घोषः इंद्र देवऽजामिः इरज्यंत यत् शुरुधः विऽवाचि नहि स्वं आयुः चिकिते जनेषु तानि इत् अंहांसि अति पर्षि अस्मान्॥२॥ युजे रथं गोऽएषणं हरिऽभ्यां उप ब्रह्माणि जुजुषाणं अस्थुः वि बाधिष्ट स्यः रोदसी महिऽत्वा इंद्रः वृत्राणि अप्रति जघन्वान्॥३॥ आपः चित् पिप्युः स्तर्यः न गावः नक्षन् ऋतं जरितारः ते इंद्र याहि वायुः न निऽयुतः नः अच्छ त्वं हि धीभिः दयसे वि वाजान्॥४॥ ते त्वा मदाः इंद्र मादयंतु शुष्मिणं तुविऽराधसं जरित्रे एकः देवऽचा दयसे हि मर्तान् अस्मिन् शूर सवने मादयस्व॥५॥ एव इत् इंद्रं वृषणं वजंऽबाहुं वसिष्ठासः अभि अर्चंति अर्कैः सः नः स्तुतः वीरऽवत् पातु गोऽमत् यूयं पात स्वस्तिऽभिः सदा नः॥६॥७॥

॥२४॥ योनिः ते इंद्र सदने अकारि तं आ नृऽभिः पुरुऽहूत प्र याहि अस्मः यथा नः अविता वृधे च ददः वसूनि ममदः च सोमैः॥१॥ गृभीतं ते मनः इंद्र द्विऽबर्हाः सुतः सोमः परिऽसिक्ता मधूनि विसृष्टऽधेना भरते सुऽवृक्तिः इयं इंद्रं जोहुवती मनीषा॥२॥ आ नः दिवः आ पृथिव्याः ऋजीषिन् इदं बर्हिः सोमऽपेयाय याहि वहंतु त्वा हरयः मद्यंचं आंगूषं अच्छ तवसं मदाय॥३॥ आ नः विश्वाभिः ऊतिऽभिः सऽजोषाः ब्रह्म जुषाणः हरिऽअश्व याहि वरीवृजत् स्थविरेभिः सुऽशिप्र अस्मे दधत् वृषणं शुष्मं इंद्र॥४॥ एषः स्तोमः महे उग्राय वाहे धुरिऽइव अश्वयः न वाजयन् अधायि इंद्र त्वा अयं अर्कः ईट्टे वसूनां दिविऽइव द्यां अधि नः श्रोमतं धाः॥५॥ एव नः इंद्र वार्यस्य पूर्धि प्र ते महीं सुऽमतिं वेविदाम इषं

पिन्व मघवत्ऽभ्यः सुऽवीरां यूयं पात स्वस्तिऽभिः सदा नः ॥६॥८॥

॥ २५ ॥ आ ते महः इंद्र ऊती उय्य सऽमंन्यवः यत् संऽअरँत सेनाः पतांति दिद्युत् नर्यस्य बाह्वोः मा ते मनः विऽचक्ष्यक् वि चारीत् ॥१॥ नि दुःऽगे इंद्र स्रथिहि अमिचान् अभि ये नः मर्तासः अमंति आरे तं शंसं कृणुहि निऽनित्सोः आ नः भर संऽभरणं वसूनां ॥२॥ शतं ते शिप्रिन् ऊतयः सुऽदासे सहस्रं शंसाः उत रातिः अस्तु जहि वधः वनुषः मर्त्यस्य अस्मे द्युम्नं अधि रत्नं च धेहि ॥३॥ त्वाऽवंतः हि इंद्र क्रत्वे अस्मि त्वाऽवंतः अवितुः शूर रातौ विश्वा इत् अहानि तविषीऽवः उय्य ओकः कृणुष्व हरिऽवः न मर्धीः ॥४॥ कुत्साः एते हरिऽअश्वाय शूषं इंद्रे सहः देवऽजूतं इयानाः सचा कृधि सुऽहना शूर वृचा वयं तरुचाः सनुयाम वाजं ॥५॥ एव नः इंद्र वार्यस्य पूर्धि प्र ते महीं सुऽमतिं वेविदाम इषं पिन्व मघवत्ऽभ्यः सुऽवीरां यूयं पात स्वस्तिऽभिः सदा नः ॥६॥९॥

॥ २६ ॥ न सोमः इंद्रे असुतः ममाद् न अब्रह्माणः मघऽवानं सुतासः तस्मै उक्थं जनये यत् जुजोषत् नृऽवत् नवीयः शृणवत् यथा नः ॥१॥ उक्थेऽउक्थे सोमः इंद्रे ममाद् नीथेऽनीथे मघऽवानं सुतासः यत् ईं सऽबाधः पितरं न पुचाः समानऽदक्षाः अवसे हवंते ॥२॥ चकार ता कृणवत् नूनं अन्या यानि ब्रुवंति वेधसः सुतेषु जनीःऽइव पतिः एकः समानः नि ममृजे पुरः इंद्रः सु सर्वीः ॥३॥ एव तं आहुः उत शृण्वे इंद्रः एकः विऽभक्ता तरणिः

मघानाँ मिथःऽतुरः ऊतयः यस्य पूर्वीः अस्मे भद्राणि सश्चत प्रियाणि ॥४॥ एव वसिष्ठः इंद्रं ऊतये नॄन् कृष्टीनां वृषभं सुते गृणाति सहस्रिणः उप नः माहि वाजान् यूयं पात स्वस्तिऽभिः सदा नः ॥ ५ ॥ १० ॥

॥ २७ ॥ इंद्रं नरः नेमऽधिता हवंते यत् पार्यां युनजते धियः ताः शूरः नृऽसाता शवसः चकानः आ गोऽमति व्रजे भज त्वं नः ॥ १ ॥ यः इंद्र शुष्मः मघऽवन् ते अस्ति शिक्षा सखिऽभ्यः पुरुऽहूत नृऽभ्यः त्वं हि हव्हा मघऽवन् विऽचेताः अप वृधि परिऽवृतं न राधः ॥ २ ॥ इंद्रः राजा जगतः चर्षणीनां अधि क्षमि विषुऽरूपं यत् अस्ति ततः ददाति दाशुषे वसूनि चोदत् राधः उपऽस्तुतः चित् अर्वाक् ॥ ३ ॥ नु चित् नः इंद्रः मघऽवा सऽहूती दानः वाजं नि यमते नः ऊती अनूना यस्य दक्षिणा पीपाय वामं नृऽभ्यः अभिऽवीता सखिऽभ्यः ॥ ४ ॥ नु इंद्र राये वरिवः कृधि नः आ ते मनः ववृत्याम मघाय गोऽमत् अश्वऽवत् रथऽवत् व्यंतः यूयं पात स्वस्तिऽभिः सदा नः ॥ ५ ॥ ११ ॥

॥ २८ ॥ ब्रह्म नः इंद्र उप याहि विद्वान् अर्वाचः ते हरयः संतु युक्ताः विश्वे चित् हि त्वा विऽहवंत मर्ताः अस्माकं इत् शृणुहि विश्वंऽइन्व ॥ १ ॥ हवं ते इंद्र महिमा वि आनट् ब्रह्म यत् पासि शवसिन् ऋषीणां आ यत् वज्रं दधिषे हस्ते उग्र घोरः सन् क्रत्वा जनिष्ठाः अषाळ्हः ॥ २ ॥ तव प्रऽनीती इंद्र जोहुवानान् सं यत् नृन् न रोदसी निनेथ महे क्षत्राय शवसे हि जज्ञे अतूतुजिं चित् तूतुजिः अशिश्नत् ॥ ३ ॥ एभिः नः इंद्र अहऽभिः दशस्य दुःऽमि-

चासः हि क्षितयः पवंते प्रति यत् चर्षे अनृतं अनेनाः अव द्विता वरूणः मायी नः सात्॥४॥ वोचेम इत् इंद्रं मघऽवानं एनं महः रायः राधसः यत् ददत् नः यः अर्चतः ब्रह्मऽकृतिं अविष्टः यूयं पात स्वस्तिऽभिः सदा नः ॥५॥१२॥

॥२९॥ अयं सोमः इंद्र तुभ्यं सुन्वे आ तु प्र याहि हरिऽवः तत्ऽओकाः पिब तु अस्य सुऽसुतस्य चारोः ददः मघानि मघऽवन् इयानः ॥१॥ ब्रह्मन् वीर ब्रह्मऽकृतिं जुषाणः अर्वाचीनः हरिऽभिः याहि तूयं अस्मिन् ऊं सु सवने मादयस्व उप ब्रह्माणि शृणवः इमा नः॥२॥ का ते अस्ति अरंऽकृतिः सुऽउक्तैः कदा नूनं ते मघऽवन् दाशेम विश्वाः मतीः आ ततने त्वाऽया अध मे इंद्र शृणवः हवा इमा ॥३॥ उतो घ ते पुरुष्याः इत् आसन् येषां पूर्वेषां अशृणोः ऋषीणां अध अहं त्वा मघऽवन् जोहवीमि त्वं नः इंद्र असि प्रऽमतिः पिताऽइव॥४॥ वोचेम इत् इंद्रं मघऽवानं एनं महः रायः राधसः यत् ददत् नः यः अर्चतः ब्रह्मऽकृतिं अविष्टः यूयं पात स्वस्तिऽभिः सदा नः ॥५॥१३॥

॥३०॥ आ नः देव शवसा याहि शुष्मिन् भव वृधः इंद्र रायः अस्य महे नृम्णाय नृऽपते सुऽवज्र महि क्षत्राय पौंस्याय शूर ॥१॥ हवंते ऊं त्वा हव्यं विऽवाचि तनूषु शूराः सूर्यस्य सातौ त्वं विश्वेषु सेन्यः जनेषु त्वं वृत्राणि रंधय सुऽहंतु॥२॥ अहा यत् इंद्र सुऽदिना विऽउच्छान् दधः यत् केतुं उपऽमं समत्ऽसु नि अग्निः सीदत् असुरः न होता हुवानः अच सुऽभगाय देवान्॥३॥ वयं ते ते इंद्र ये च देव स्तवंत शूर ददतः मघानि यच्छ सूरिऽभ्यः उपऽमं

वरूथं सुऽआभुवः जरणां अश्नवंत ॥४॥ वोचेम इत् इंद्रं मघ-ऽवानं एनं महः रायः राधसः यत् ददत् नः यः अर्चंतः ब्रह्मऽकृतिं अविष्टः यूयं पात स्वस्तिऽभिः सदा नः ॥५॥१४॥

॥३१॥ प्र वः इंद्राय मादनं हरिंऽअश्वाय गायत सखायः सोमऽपावे॥१॥ शंस इत् उक्थं सुऽदानवे उत द्युक्षं यथा नरः चकृम सत्यऽराधसे॥२॥ त्वं नः इंद्र वाजऽयुः त्वं गव्युः शतऽक्रतो° त्वं हिरण्यऽयुः वसो' ॥३॥ वयं इंद्र त्वाऽयवः अभि प्र नोनुमः वृषन् विद्धि तु अस्य नः वसो' ॥४॥ मा नः निदे च वक्तवे अर्यः रंधीः अराव्णे वे' अपि क्रतुः मम ॥५॥ त्वं वर्म असि सऽप्रथः पुरःऽयोधः च वृत्रऽहन् त्वया प्रति ब्रुवे युजा ॥६॥१५॥ महान् उत असि यस्य ते अनु स्वधाऽवरी° सहः मन्नाते' इंद्र रोदसी' ॥७॥ तं त्वा मरुत्वती परि भुवत् वाणी सऽयावरी नक्षमाणा सह द्युऽभिः ॥८॥ ऊर्ध्वासः त्वा अनु इंदवः भुवन् दस्मं उप द्यवि सं ते नमंत कृष्टयः ॥९॥ प्र वः महे महिऽवृधे भरध्वं प्रऽचेतसे प्र सुऽमतिं कृणुध्वं विशः पूर्वीः प्र चर चर्षणिऽप्राः ॥१०॥ उरुऽव्यचसे महिनेसुऽवृक्तिं इंद्राय ब्रह्म जनयंत विप्राः तस्य व्रतानि न मिनंति धीराः ॥११॥ इंद्रं वाणीः अनुत्तऽमन्युं एव सचा राजानं दधिरे सहध्यै हरिंऽअश्वाय बर्हय सं आपीन् ॥१२॥१६॥

॥३२॥ मो' सु त्वा वाघतः चन आरे अस्मत् नि रीरमन् आराच्चित् चित् सधऽमादं नः आ गहि इह वा सन् उप श्रुधि॥१॥ इमे हि ते ब्रह्मऽकृतः सुते सचा मधौ न मक्षः आसते इंद्रे कामं जरितारः वसुऽयवः रथे न पादं आ दधुः॥२॥ रायःऽकामः वज्रऽहस्तं सु-

ऽदक्षिणं पुचः न पितरँ हुवे ॥३॥ इमे इंद्राय सुन्विरे सोमासः दधिऽआशिरः तान् आ मदाय वज्रऽहस्त पीतये हरिऽभ्यां याहि ओकः आ ॥४॥ अवत् श्रुतऽकर्णः ईयते वसूनां नु चित् नः मघिषत् गिरः सद्यः चित् यः सहस्राणि शता ददत् नकिः दित्सँतं आ मिनत् ॥५॥१७॥ सः वीरः अप्रतिऽस्कुतः इंद्रेण शूशुवे नृऽभिः यः ते गभीरा सवनानि वृचऽहन् सुनोति आ च धावति ॥६॥ भव वरूथं मघऽवन् मघोनां यत् संऽअजासि शर्धतः वि त्वाऽहतस्य वेदनं भजेमहि आ दुःऽनशः भर गयँ ॥७॥ सुनोत सोमऽपावे सोमँ इंद्राय वज्रिणे पचत पक्तीः अवसे कृणुध्वं इत् पृणन् इत् पृणते मयः ॥८॥ मा स्रेधत सोमिनः दक्षत महे कृणुध्वं राये आऽतुजे तरणिः इत् जयति क्षेति पुष्यति न देवासः कवत्नवे ॥९॥ नकिः सुऽदासः रथँ परि आस न रीरमत् इंद्रः यस्य अविता यस्य मरुतः गमत् सः गोऽमति व्रजे ॥१०॥१८॥ गमत् वाजँ वाजयन् इंद्र मर्त्यः यस्य त्वं अविता भुवः अस्माकँ बोधि अविता रथानां अस्माकँ शूर नृणां ॥११॥ उत् इत् नु अस्य रिच्यते अंशः धनँ न जिग्युषः यः इंद्रः हरिऽवान् न दभंति तं रिपः दक्षँ दधाति सोमिनि ॥१२॥ मंचँ अखंवँ सुऽधितं सुऽपेशसं दधात यज्ञियेषु आ पूर्वीः चन प्रऽसितयः तरंति तं यः इंद्रे कर्मणा भुवत् ॥१३॥ कः तं इंद्र त्वाऽवसु आ मर्त्यः दधर्षति श्रद्धा इत् ते मघऽवन् पायै दिवि वाजी वाजँ सिसासति ॥१४॥ मघोनः स्म वृचऽहत्येषु चोदय ये ददति प्रिया वसु तव प्रऽनीती हरिऽअश्व सूरिऽभिः विश्वा तरेम दुःऽइता ॥१५॥१९॥ तव इत् इंद्र अवमं वसु त्वं पुष्यसि मध्यमं सचा विश्वस्य परमस्य राजसि नकिः त्वा गोषु वृण्वते ॥१६॥ त्वं विश्वस्य धनऽदाः असि श्रुतः ये ईं भवंति आजयः तव अयं विश्वः पुरु-

ऽहूत पार्थिवः अवस्युः नाम भिक्षते ॥१७॥ यत् इंद्र यावतः त्वं एतावत् अहं ईशीय स्तोतारं इत् दिधिषेय रदऽवसो० न पापऽत्वाय रासीय ॥१८॥ शिक्षेयं इत् महऽयते दिवेऽदिवे रायः आ कुहचित्ऽविदे नहि त्वत् अन्यत् मघऽवन् नः आप्यं वस्यः अस्ति पिता चन ॥१९॥ तरणिः इत् सिसासति वाजं पुरंऽध्या युजा आ वः इंद्रं पुरुऽहूतं नमे गिरा नेमिं तष्टाऽइव सुऽद्वं ॥२०॥२०॥ न दुःऽस्तुती मर्त्यः विंदते वसु न सेधंतं रयिः नशत् सुऽशक्तिः इत् मघऽवन् तुभ्यं माऽवते देष्णं यत् पार्यं दिवि ॥२१॥ अभि त्वा शूर नोनुमः अदुग्धाःऽइव धेनवः ईशानं अस्य जगतः स्वःऽदृशं ईशानं इंद्र तस्थुषः ॥२२॥ न त्वाऽवान् अन्यः दिव्यः न पार्थिवः न जातः न जनिष्यते अश्वऽयंतः मघऽवन् इंद्र वाजिनः गव्यंतः त्वा हवामहे ॥२३॥ अभि सतः तत् आ भर इंद्र ज्यायः कनीयसः पुरुऽवसुः हि मघऽवन् सनात् असि भरेऽभरे च हव्यः ॥२४॥ परा नुदस्व मघऽवन् अमित्रान् सुऽवेदा नः वसु कृधि अस्माकं बोधि अविता महाऽधने भव वृधः सखीनां ॥२५॥ इंद्र क्रतुं नः आ भर पिता पुत्रेभ्यः यथा शिक्ष नः अस्मिन् पुरुऽहूत यामनि जीवाः ज्योतिः अशीमहि ॥२६॥ मा नः अज्ञाताः वृजनाः दुःऽआध्यः मा अशिवासः अव क्रमुः त्वया वयं प्रऽवतः शश्वतीः अपः अति शूर तरामसि ॥२७॥२१॥

॥३३॥ श्वित्यंचः मा दक्षिणतःऽकपर्दाः धियंऽजिन्वासः अभि हि प्रऽमंदुः उत्ऽतिष्ठन् वोचे परि बर्हिषः नॄन् न मे दूरात् अवितवे वसिष्ठाः ॥१॥ दूरात् इंद्रं अनयन् आ सुतेन तिरः वैशंतं अति पांतं उग्रं पाशंऽद्युम्नस्य वायतस्य सोमात् सुतात् इंद्रः अवृ-

णीत वसिष्ठान्॥२॥ एव इत् नु कं सिंधुं एभिः ततार एव इत् नु कं भेदं एभिः जघान एव इत् नु कं दाशऽराज्ञे सुऽदासं प्र आवत् इंद्रः ब्रह्मणा वः वसिष्ठाः ॥३॥ जुष्टी नरः ब्रह्मणा वः पितॄणां अक्षं अव्ययं न किल रिषाथ यत् शक्करीषु बृहता रवेण इंद्रे शुष्मं अदधात वसिष्ठाः ॥४॥ उत् द्यांऽइव इत् तृष्णऽजः नाथितासः अदीधयुः दाशऽराज्ञे वृतासः वसिष्ठस्य स्तुवतः इंद्रः अश्रोत् उरुं तृत्सुंऽभ्यः अकृणोत् ऊं लोकं॥५॥२२॥ दंडाःऽइव इत् गोऽअजनासः आसन् परिऽछिन्नाः भरताः अर्भकासः अभवत् च पुरःऽएता वसिष्ठः आत् इत् तृत्सूनां विशः अप्रथंत॥६॥ चयः कृण्वंति भुवनेषु रेतः तिस्रः प्रऽजाः आर्याः ज्योतिःऽअग्रयाः चयः घर्मासः उषसं सचंते सर्वान् इत् तान् अनु विदुः वसिष्ठाः॥७॥ सूर्यस्यऽइव वक्षथः ज्योतिः एषां समुद्रस्यऽइव महिमा गभीरः वातस्यऽइव प्रऽजवः न अन्येन स्तोमः वसिष्ठाः अनुंऽएतवे वः ॥८॥ ते इत् निण्यं हृदयस्य प्रऽकेतैः सहस्रऽवल्शं अभि सं चरंति यमेन ततं परिऽधिं वयंतः अप्सरसः उप सेदुः वसिष्ठाः॥९॥ विऽद्युतः ज्योतिः परि संऽजिहानं मित्रावरुणा यत् अपश्यतां त्वा तत् ते जन्म उत एकं वसिष्ठ अगस्त्यः यत् त्वा विशः आऽजभार ॥१०॥२३॥ उत असि मैत्रावरुणः वसिष्ठ उर्वश्याः ब्रह्मन् मनसः अधि जातः द्रप्सं स्कन्नं ब्रह्मणा दैव्येन विश्वे देवाः पुष्करे त्वा अदधंत ॥११॥ सः प्रऽकेतः उभयस्य प्रऽविद्वान् सहस्रऽदानः उत वा सऽदानः यमेन ततं परिऽधिं वयिष्यन् अप्सरसः परि जज्ञे वसिष्ठः॥१२॥ सत्रे ह जातौ इषिता नमःऽभिः कुंभे रेतः सिसिचतुः समानं ततः ह मानः उत श्रयाय मध्यात् ततः जातं ऋषिं आहुः वसिष्ठं॥१३॥ उक्थ्यऽभृतं साम्नऽभृतं बिभर्ति यावाणं बि-

भंत् प्र वदाति अयै उपं एनं आध्वं सुऽमनस्यमानाः आ वः गच्छाति प्रऽनृदः वसिष्ठः ॥१४॥२४॥२॥

॥३४॥ प्र शुक्रा एतु देवी मनीषा अस्मत् सुऽतष्टः रथः न वाजी ॥१॥ विदुः पृथिव्याः दिवः जनित्रं शृण्वंति आपः अधं क्षरंतीः ॥२॥ आपः चित् अस्मै पिन्वंत पृथ्वीः वृत्रेषु शूराः मंसंते उग्राः ॥३॥ आ धूःऽसु अस्मै दधात अश्वान् इंद्रः न वज्री हिरण्यऽबाहुः ॥४॥ अभि प्र स्यात अहंऽइव यज्ञं यातांऽइव पत्मन् त्मना हिनोत ॥५॥ त्मना समत्ऽसु हिनोत यज्ञं दधात केतुं जनाय वीरं ॥६॥ उत् अस्य शुष्मात् भानुः न आर्त बिभर्ति भारं पृथिवी न भूमं ॥७॥ ह्वयामि देवान् अयातुः अग्ने साधन् ऋतेन धियं दधामि ॥८॥ अभि वः देवीं धियं दधिध्वं प्र वः देवऽत्रा वाचं कृणुध्वं ॥९॥ आ चष्टे आसां पाथः नदीनां वरुणः उग्रः सहस्रंऽचक्षाः ॥१०॥२५॥ राजा राष्ट्रानां येशः नदीनां अनुत्तं अस्मै क्षत्रं विश्वऽआयु ॥११॥ अविष्टो अस्मान् विश्वासु विक्षु अद्धुं कृणोत शंसं निनित्सोः ॥१२॥ वि एतु दिद्युत् द्विषां अशेवा युयोत विश्वक् रपः तनूनां ॥१३॥ अवीत् नः अग्निः हव्यऽअत् नमःऽभिः प्रेष्ठः अस्मै अधायि स्तोमः ॥१४॥ सऽजूः देवेभिः अपां नपातं सखायं कृध्वं शिवः नः अस्तु ॥१५॥ अप्ऽजां उक्थैः अहिं गृणीषे बुध्ने नदीनां रजःऽसु सीदन् ॥१६॥ मा नः अहेः बुध्यः रिषे धात् मा यज्ञः अस्य स्रिधत् ऋतऽयोः ॥१७॥ उत नः एषु नृषु श्रवः धुः प्र राये यंतु शर्धतः अर्यः ॥१८॥ तपंति शत्रुं स्वः न भूम महाऽसेनासः अमेभिः एषां ॥१९॥ आ यत् नः पत्नीः गमंति अच्छ त्वष्टा सुऽपाणिः दधातु वीरान् ॥२०॥२६॥ प्रति नः

स्तोमँ त्वष्टा जुषेत स्यात् अस्मे अरमतिः वसुऽयुः ॥२१॥ ता नः रासन् रातिऽसाचः वसूनि आ रोदसी वरुणानी शृणोतु वरूचीभिः सुऽशरणः नः अस्तु त्वष्टा सुऽदत्रः वि दधातु रायः ॥२२॥ तत् नः रायः पर्वताः तत् नः आपः तत् रातिऽसाचः ओषधीः उत द्यौः वनस्पतिऽभिः पृथिवी सऽजोषाः उभे रोदसी परि पासतः नः ॥२३॥ अनु तत् उर्वी रोदसी जिहाता अनु द्युक्षः वरुणः इंद्रऽसखा अनु विश्वे मरुतः ये सहासः रायः स्याम धरुणं धियध्यै ॥२४॥ तत् नः इंद्रः वरुणः मित्रः अग्निः आपः ओषधीः वनिनः जुषंत शर्मन् स्याम मरुतां उपऽस्थे यूयं पात स्वस्तिऽभिः सदा नः ॥२५॥२७॥

॥३५॥ शं नः इंद्राग्नी भवतां अवःऽभिः शं नः इंद्रावरुणा रातऽहव्या शं इंद्रासोमा सुविताय शं योः शं नः इंद्रापूषणा वाजऽसातौ ॥१॥ शं नः भगः शं उ नः शंसः अस्तु शं नः पुरंऽधिः शं उ सन्तु रायः शं नः सत्यस्य सुऽयमस्य शंसः शं नः अर्यमा पुरुऽजातः अस्तु ॥२॥ शं नः धाता शं उ धर्ता नः अस्तु शं नः उरूची भवतु स्वधाभिः शं रोदसी बृहती शं नः अद्रिः शं नः देवानां सुऽहवानि सन्तु ॥३॥ शं नः अग्निः ज्योतिःऽअनीकः अस्तु शं नः मित्रावरुणौ अश्विना शं शं नः सुऽकृतां सुऽकृतानि सन्तु शं नः इषिरः अभि वातु वातः ॥४॥ शं नः द्यावापृथिवी पूर्वऽहूतौ शं अंतरिक्षं दृशये नः अस्तु शं नः ओषधीः वनिनः भवंतु शं नः रजसः पतिः अस्तु जिष्णुः ॥५॥२८॥ शं नः इंद्रः वसुऽभिः देवः अस्तु शं आदित्येभिः वरुणः सुऽशंसः शं नः रुद्रः रुद्रेभिः जलाषः शं नः त्वष्टा ग्नाभिः इह शृणोतु ॥६॥ शं नः सोमः भवतु

ब्रह्म शं नः शं नः यावाणः शं उ॑ सन्तु यज्ञाः शं नः स्वरूणां मितयः भवन्तु शं नः प्रऽस्वः शं उ॑ अस्तु वेदिः ॥७॥ शं नः सूर्यः उरुऽचक्षाः उत् एतु शं नः चतस्रः प्रऽदिशः भवन्तु शं नः पर्वताः ध्रुवयः भवन्तु शं नः सिंधवः शं उ॑ सन्तु आपः ॥८॥ शं नः अदितिः भवतु व्रतेभिः शं नः भवन्तु मरुतः सुऽअर्काः शं नः विष्णुः शं उ॑ पूषा नः अस्तु शं नः भवित्रं शं उ॑ अस्तु वायुः ॥९॥ शं नः देवः सविता चायमाणः शं नः भवन्तु उषसः विऽभातीः शं नः पर्जन्यः भवतु प्रऽजाभ्यः शं नः क्षेत्रस्य पतिः अस्तु शंऽभुः ॥१०॥२९॥ शं नः देवाः विश्वऽदेवाः भवन्तु शं सरस्वती सह धीभिः अस्तु शं अभिऽसाचः शं उ॑ रातिऽसाचः शं नः दिव्याः पार्थिवाः शं नः अप्याः ॥११॥ शं नः सत्यस्य पतयः भवन्तु शं नः अर्वन्तः शं उ॑ सन्तु गावः शं नः ऋभवः सुऽकृतः सुऽहस्ताः शं नः भवन्तु पितरः हवेषु ॥१२॥ शं नः अजः एकऽपात् देवः अस्तु शं नः अहिः बुध्न्यः शं समुद्रः शं नः अपां नपात् पेरुः अस्तु शं नः पृश्निः भवतु देवऽगोपाः ॥१३॥ आदित्याः रुद्राः वसवः जुषन्त इदं ब्रह्म क्रियमाणं नवीयः शृण्वन्तु नः दिव्याः पार्थिवासः गोऽजाताः उत ये यज्ञियासः ॥१४॥ ये देवानां यज्ञियाः यज्ञियानां मनोः यजत्राः अमृताः ऋतऽज्ञाः ते नः रासन्तां उरुऽगायं अद्य यूयं पात स्वस्तिऽभिः सदा नः ॥१५॥३०॥३॥

॥३६॥ प्र ब्रह्म एतु सदनात् ऋतस्य वि रश्मिऽभिः ससृजे सूर्यः गाः वि सानुना पृथिवी ससे उर्वी पृथु प्रतीकं अधि आ ईधे अग्निः ॥१॥ इमां वां मित्रावरुणा सुऽवृक्तिं इषं न कृण्वे असुरा नवीयः इनः वां अन्यः पदऽवीः अदब्धः जनं च मित्रः यतऽ

ति॒ ब्रुवा॒णः ॥२॥ आ वा॑तस्य ध्र॒जतः॑ रं॒ते इ॒त्याः अपी॑पयंत धे॒नवः॑ न सू॒दाः॑ म॒हः दि॒वः सद॑ने जा॒यमा॑नः अचिक्रदत् वृष॒भः सस्मि॑न् ऊ॒धन् ॥३॥ गि॒रा यः ए॒ता यु॒नज॑त् हरी॑ ते इंद्र प्रि॒या सु॑ऽरथा॑ शूर धा॒यू॑ प्र यः म॒न्युं रि॑रि॒क्षतः॑ मि॒नाति॑ आ सु॑ऽ क्रतुं॑ अ॒र्य॒मणं॑ व॒रु॒-त्या॑ ॥४॥ यज॑ते अस्य स॒ख्यं वयः॑ च॒ न॒म॒स्विनः॑ स्वे क्षि॒तस्य॑ धाम॑न् वि पृक्षः॑ बा॒बधे॒ नृऽभिः॑ स्त॒वा॒नः इ॒दं नमः॑ रु॒द्राय॑ प्रेष्ठं ॥५॥१॥ आ यत् सा॒कं य॒शसः॑ वा॒व॒शा॒नाः सर॑स्वती स॒प्तथी॑ सिंधु॑ऽमाताः याः सु॒स्व॒यं॑त सु॑ऽदुघाः॑ सु॑ऽधा॒राः अ॒भि स्वेन॑ पय॑सा पीया॑नाः ॥६॥ उ॒त त्ये नः॒ म॒रु॑तः मं॒द॒सा॒नाः धियं॑ तो॒कं च॒ वा॒जि॒नः॑ अ॒व॒॑तु मा नः॒ परि॑ ख्यत् अक्षरा चरं॑ती अवी॑वृधन् युज्यं॑ ते र॒यिं नः॑ ॥७॥ प्र वः॑ म॒हीं अ॒रम॑तिं कृणुध्वं प्र पू॒षणं॑ विद॒थ्यं॑ न वी॒रं भगं॑ धि॒यः अ॒वि॒तार॑ं नः अस्याः सा॒तौ वाजं॑ रा॒ति॒ऽसाचं॑ पुरं॑ऽधिं ॥८॥ अच्छ॑ अयं वः॒ म॒रु॒तः॒ श्लोकः॑ एतु अच्छ॑ विष्णुं नि॒सि॒क्तऽपां॑ अवः॑-ऽभिः उ॒त प्र॒ऽजायै॑ गृ॒ण॒ते॒ वयः॑ धुः यूयं पा॒त॒ स्व॒स्ति॒ऽभिः सदा॑ नः ॥९॥२॥

॥ ३१ ॥ आ वः॑ वाहिष्ठः वहतु स्तवध्यै॑ रथः॑ वा॒जाः॒ ऋ॒भु॒क्ष॒णः॒ अमृ॑क्तः अ॒भि चि॒ऽपृ॒ष्ठैः सव॑नेषु सो॒मैः॑ मदे॑ सु॒ऽशि॒प्राः॒ म॒हऽभिः॑ पृ॒ण॒ध्व॒ं ॥१॥ यूयं ह॒ रत्नं॑ म॒घव॑त्ऽसु धत्थ॒ स्वः॑ऽदृशः॑ ऋ॒भु॒क्ष॒णः॒ अमृ॑क्तं सं यज्ञे॑षु स्व॒धा॒ऽव॒॑तः पि॒ब॒ध्व॒ं वि नः॒ राधां॑सि म॒ति॒ऽभिः॑ द॒य॒ध्व॒ं ॥२॥ उ॒वोचि॑थ हि म॒घ॒ऽव॒न् देष्णं॑ म॒हः अ॒र्भस्य॑ वसु॑नः वि॒-ऽभा॒गे उ॒भा ते॒ पूर्णा॑ वसु॑ना॒ गभ॑स्ती॒ न सू॒नृता॑ नि यमते॒ वस॒व्या॑ ॥३॥ त्वं इ॑ंद्र स्वऽर्यशाः ऋ॒भु॒क्षाः वाजः॑ न सा॒धुः अस्ता॑ एषि॒ ऋक्वा॑ वयं नु ते॒ दा॒श्वांसः॑ स्याम॒ ब्रह्म॑ कृ॒ण्वंतः॑ ह॒रि॒ऽवः॒ वसि॑ष्ठाः ॥४॥

सनिता असि प्रऽवतः दाशुषे चित् याभिः विवेषः हरिऽअश्व धीभिः ववन्म नु ते युज्याभिः ऊती कदा नः इंद्र रायः आ दशस्येः ॥५॥३॥ वासयसिऽइव वेधसः त्वं नः कदा नः इंद्र वचसः बुबोधः अस्तं तात्या धिया रयिं सुऽवीरं पृक्षः नः अर्वा नि उहीत वाजी॥६॥ अभि यं देवी निःऽऋतिः चित् ईशे नक्षंते इंद्रं शरदः सुऽपृक्षः उप चिऽबंधुः जरत्ऽअष्टिं एति अस्वऽवेशं यं कृणवंत मर्ताः॥७॥ आ नः राधांसि सवितः स्तवध्यै आ रायः यंतु पर्वतस्य रातौ सदा नः दिव्यः पायुः सिसक्तु यूयं पात स्वस्तिऽभिः सदा नः ॥८॥४॥

॥३८॥ उत् ऊं स्यः देवःसविता ययाम हिरण्ययीं अमतिं यां अशिश्रेत् नूनं भगः हव्यः मानुषेभिः वि यः रत्ना पुरुऽवसुः दधाति ॥१॥ उत् ऊं तिष्ठ सवितः श्रुधि अस्य हिरण्यऽपाणे प्रऽभृतौ ऋतस्य वि उर्वीं पृथ्वीं अमतिं सृजानः आ नृऽभ्यः मर्तऽभोजनं सुवानः॥२॥ अपि स्तुतः सविता देवः अस्तु यं आ चित् विश्वे वसवः गृणंति सः नः स्तोमान् नमस्यः चनः धात् विश्वेभिः पातु पायुऽभिः नि सूरीन्॥३॥ अभि यं देवी अदितिः गृणाति सवं देवस्य सवितुः जुषाणा अभि संऽराजः वरुणः गृणंति अभि मित्रासः अर्यमा सऽजोषाः॥४॥ अभि ये मिथः वनुषः सपंते रातिं दिवः रातिऽसाचः पृथिव्याः अहिः बुध्यः उत नः शृणोतु वरूची एकधेनुऽभिः नि पातु॥५॥ अनु तत् नः जाःपतिः मंसीष्ट रत्नं देवस्य सवितुः इयानः भगं उग्रः अवसे जोहवीति भगं अनुग्रः अध याति रत्नं॥६॥ शं नः भवंतु वाजिनः हवेषु देवऽताता मितऽद्रवः सुऽअर्काः जंभयंतः अहिं वृकं रक्षांसि सनेमि अस्मत्

युयवन् अमीवाः ॥७॥ वाजेऽवाजे अवत वाजिनः नः धनेषु विप्राः अमृताः ऋतज्ञाः अस्य मध्वः पिबत मादयध्वं तृप्ताः यात पथिऽभिः देवऽयानैः ॥८॥५॥

॥३९॥ ऊर्ध्वः अग्निः सुऽमतिं वस्वः अश्रेत् प्रतीची जूर्णिः देवऽतातिं एति भेजाते अद्री रथ्याऽइव पंथां ऋतं होता नः इषितः यजाति ॥१॥ प्र ववृजे सुऽप्रयाः बर्हिः एषां आ विश्पतीऽइव० बीरिटे इयाते विशां अक्तोः उषसः पूर्वऽहूतौ वायुः पूषा स्वस्तये नियुत्वान् ॥२॥ ज्मयाः अत्र वसवः रंत देवाः उरौ अंतरिक्षे मर्जयंत शुभ्राः अर्वाक् पथः उरुऽज्रयः कृणुध्वं श्रोतं दूतस्य जग्मुषः नः अस्य ॥३॥ ते हि यज्ञेषु यज्ञियासः ऊमाः सधऽस्थे विश्वे अभि संति देवाः तान् अध्वरे उशतः यक्षि अग्ने स्रुष्टी भगं नासत्या पुरंधिं ॥४॥ आ अग्ने गिरः दिवः आ पृथिव्याः मित्रं वह वरुणं इंद्रं अग्निं आ अर्यमणं अदितिं विष्णुं एषां सरस्वती मरुतः मादयंतां ॥५॥ ररे हव्यं मतिऽभिः यज्ञियानां नक्षत् कामं मर्त्यानां असिन्वन् धात रयिं अविऽदस्यं सदाऽसां सक्षीमहि युज्येभिः नु देवैः ॥६॥ नु रोदसी अभिऽस्तुते० वसिष्ठः ऋतऽवानः वरुणः मित्रः अग्निः यच्छंतु चंद्राः उपऽमं नः अर्कं यूयं पात स्वस्तिऽभिः सदा नः ॥७॥६॥

॥४०॥ ओ श्रुष्टिः विद्थ्या सं एतु प्रति स्तोमं दधीमहि तुराणां यत् अद्य देवः सविता सुवाति स्यामं अस्य रत्निनः विऽभागे ॥१॥ मित्रः तत् नः वरुणः रोदसी च द्युऽभक्तं इंद्रः अर्यमा ददातु दितिं दिदेष्टु देवी अदितिः रेक्णः वायुः च यत् निऽयुवैते० भगः च

॥२॥ सः इत् उ॒यः अ॒स्तु॒ म॒रु॒तः सः भु॒ष्मी यं मर्त्यं॑ पृषत्ऽअश्वाः अवाथ उत ई॑ अ॒ग्निः सर॑स्वती जु॒नंति॑ न तस्य॑ रा॒यः परि॑ऽएता अस्ति॒ ॥३॥ अ॒यं हि ने॒ता वरु॑णः ऋ॒तस्य॑ मि॒चः राजा॑नः अ॒र्य॒मा अपः॑ धुः॰ सु॒ऽहवा॑ दे॒वी अदि॑तिः अ॒न॒र्वा ते नः॒ अंहः॑ अति॑ पर्षन् अरि॑ष्टान् ॥४॥ अ॒स्य दे॒वस्य॑ मी॒ळ्हुषः॑ व॒याः विष्णोः॑ एष॑स्य प्र॒ऽभृथे॑ ह॒विः॒ऽभिः॒ वि॒दे हि रु॒द्रः रु॒द्रिय॑ं महि॒ऽत्वं या॒सि॒ष्टं व॒र्तिः अ॒श्वि॒नौ इरा॑ऽवत् ॥५॥ मा अ॒च॑ पू॒ष॒न् आ॒ऽघृ॒णे इ॒र॒स्यः॒ वरू॑ची यत् रा॒ति॒ऽसाच॑ः च रास॑न् मयः॒ऽभुवः॑ नः॒ अवं॑तः नि पा॑तु वृ॒ष्टिं परि॑ऽज्मा वा॒तः द॒दा॒तु ॥६॥ नु रोद॑सी॑ अ॒भि॒ऽस्तु॒ते॰ वसि॑ष्ठैः ऋ॒त॒ऽवा॑नः वरु॑णः मि॒चः अ॒ग्निः यच्छ॑ंतु चंद्राः उप॒ऽमं नः॒ अ॒र्कैः यू॒यं पा॒त॒ स्व॒स्ति॒ऽभिः॒ सदा॑ नः॒ ॥७॥७॥

॥४१॥ प्रा॒तः अ॒ग्निं प्रा॒तः इंद्रं॑ हुवा॒म॒हे॒ प्रा॒तः मि॒त्रावरु॑णा प्रा॒तः अ॒श्वि॒ना॑ प्रा॒तः भगं॑ पू॒षण॑ं ब्रह्मणः पति॑ं प्रा॒तः॑ सोम॑ं उ॒त रु॒द्रं हु॒वे॒म॒ ॥१॥ प्रा॒त॒ःऽजित॑ं भगं॑ उ॒ग्रं हु॒वे॒म॒ व॒यं पु॒त्रं अदि॑तेः यः वि॒ऽध॒र्ता आ॒ध्रः चि॒त् यं मन्य॑मानः तु॒रः चि॒त् राजा॑ चि॒त् यं भगं॑ भ॒क्षि॒ इति॑ आह॑ ॥२॥ भग॑ प्रऽने॑तः॰ भग॑ सत्य॑ऽराधः भग॑ इ॒मां धिय॑ं उ॒त॒ अ॒व॒ द॒द॒त् नः॒ भग॑ प्र नः॒ जन॑य॒ गोभिः॑ अ॒श्वैः॑ भग॑ प्र नृ॒ऽभिः॑ नृ॒ऽव॑ंतः स्याम ॥३॥ उ॒त इ॒दानी॑ं भग॑ऽवंतः स्याम उ॒त प्र॒ऽपि॒त्वे उ॒त मध्ये॑ अ॒हा॑ं उ॒त उ॒त्ऽइ॑ता मघ॒ऽव॒न् सू॒र्य॑स्य व॒यं दे॒वाना॑ं सु॒ऽम॒तौ स्या॒म॒ ॥४॥ भग॑ः ए॒व भग॑ऽवान् अ॒स्तु॒ दे॒वाः॒ तेन॑ व॒यं भग॑ऽवंतः स्याम॒ तं त्वा॒ भग॒ सर्वे॑ः इत् जो॒ह॒वी॒ति॒ सः नः॒ भग॒ पुरः॑ऽए॒ता भ॒व॒ इ॒ह ॥५॥ सं अ॒ध्व॒राय॑ उषसः॒ नम॑ंत दधि॒क्रावा॑ऽइव॒ शु॒चये॑ प॒दाय॑ अ॒र्वा॒ची॒नं व॒सु॒ऽविद॑ं भगं॑ नः॒ रथ॑ंऽइव अश्वाः॒ वा॒जिनः॑

आ वहंतु ॥६॥ अश्वऽवतीः गोऽमतीः नः उषसः वीरऽवतीः सदं उच्छंतु भद्राः घृतं दुहानाः विश्वतः प्रऽपीताः यूयं पात स्वस्तिऽभिः सदा नः ॥७॥८॥

॥४२॥ प्र ब्रह्माणः अंगिरसः नक्षंत प्र क्रंदनुः नभन्यस्य वेतु प्र धेनवः उदऽप्रुतः नवंत युज्यातां अद्री अध्वरस्य पेशः ॥१॥ सुऽगः ते अग्ने सनऽवित्तः अध्वा युंक्ष्व सुते हरितः रोहितः च ये वा सध्रन् अरुषाः वीरऽवाहः हुवे देवानां जनिमानि सत्तः ॥२॥ सं ऊं वः यज्ञं महयन् नमःऽभिः प्र होता मंद्रः रिरिचे उपाके यजस्व सु पुरुऽअनीक देवान् आ यज्ञियां अरमतिं ववृत्याः ॥३॥ यदा वीरस्य रेवतः दुरोणे स्योनऽशीः अतिथिः आऽचिकेतत् सुऽप्रीतः अग्निः सुऽधितः दमे आ सः विशे दाति वार्यं इयत्यै ॥४॥ इमं नः अग्ने अध्वरं जुषस्व मरुत्ऽसु इंद्रे यशसं कृधि नः आ नक्तां बर्हिः सदतां उषसा उशंता मिचावरुणा यज इह ॥५॥ एव अग्निं सहस्यं वसिष्ठः रायःऽकामः विश्वऽप्स्यस्य स्तौत् इषं रयिं पप्रथत् वाजं अस्मे यूयं पात स्वस्तिऽभिः सदा नः ॥६॥९॥

॥४३॥ प्र वः यज्ञेषु देवऽयंतः अर्चन् द्यावा नमःऽभिः पृथिवी इषध्यै येषां ब्रह्माणि असमानि विप्राः विष्वक् विऽयंति वनिनः न शाखाः ॥१॥ प्र यज्ञः एतु होत्वः न सप्तिः उत् यच्छध्वं सऽमनसः घृताचीः स्तृणीत बर्हिः अध्वराय साधु ऊर्ध्वा शोचींषि देवऽयूनि अस्थुः ॥२॥ आ पुचासः न मातरं विऽभृचाः सानौ देवासः बर्हिषः सदंतु आ विश्वाची विदथ्यां अनक्तु अग्ने मा नः देवऽत्रांता मृधः कः० ॥३॥ ते सीषपंत जोषं आ यजंचाः ऋतस्य

धारा॑: सु॒ऽदुघा॑: दुहा॑ना: ज्येष्ठँ व॒: अ॒द्य मह॑: आ वसू॑नां आ गं॑तन् स॒ऽमंनस: यति॑ स्थ ॥४॥ ए॒व न॒: अग्ने॒ वि॒क्षु आ द॒शस्य॒ त्वया॑ व॒यं स॒हसा॑ऽवन् आस्क्रा॑: रा॒या यु॒जा स॒धऽमा॑दः अरिष्टा: यू॒यं पा॒त॒ स्व॒स्ति॒ऽभि: सदा॑ न॒: ॥५॥१०॥

॥४४॥ द॒धि॒ऽक्रां व॒: प्र॒थ॒मं अ॒श्वि॒ना॒ उ॒ष॒सं॑ अ॒ग्निं सं॑ऽइ॒द्धं भगं॑ ऊ॒तये॑ हुवे॒ इंद्रं॑ विष्णुं॑ पूष॒णं॑ ब्रह्मणः पतिं॑ आ॒दि॒त्यान् द्यावा॑पृथि॒वी॑ अ॒पः स्व॑:० ॥१॥ द॒धि॒ऽक्रां ऊं॑ नमंसा बो॒धय॑न्तः उत्ऽई॑राणाः य॒ज्ञं उ॒प॒ऽप्र॒यं॑तः इळां॑ दे॒वीं ब॒र्हिषि॑ सा॒द॒यं॑तः अ॒श्वि॒ना॒ वि॒प्रा सु॒ऽहवा॑ हुवेम ॥२॥ द॒धि॒ऽक्रावा॑णं बुबुधा॒नः अ॒ग्निं उप॑ ब्रुवे उ॒ष॒सं॑ सूर्यं॑ गां ब्रह्मं॑ मंश्व॒तोः वरु॑णस्य ब॒भ्रु॒ते वि॒श्वा॑ अ॒स्मत् दु॒:ऽइ॒ता य॒व॒यं॒तु ॥३॥ द॒धि॒ऽक्रावा॑ प्र॒थ॒मः वा॒जी अर्वा॑ अ॒ग्नेः र॒थाना॑ भवति॒ प्र॒ऽजा॒नन् सं॑ऽविदा॒नः उ॒ष॒सा॑ सूर्येण॑ आ॒दि॒त्येभि॑: वसु॒ऽभि॑: अंगिरः॒ऽभि॑: ॥४॥ आ न॒: द॒धि॒ऽक्रा॑: प॒थ्या॑ अ॒नु॒ऽक्तु ऋ॒तस्य॑ पंथां॑ अनु॑ऽए॒त॒वै ऊं॑ शृणोतु न॒: दैव्यं॑ शर्धः॑ अ॒ग्नि: शृ॒ण्वं॒तु॒ विश्वे॑ म॒हि॒षा: अमू॑राः ॥५॥११॥

॥४५॥ आ दे॒व: या॒तु॒ स॒वि॒ता सु॒ऽर॒त्न: अं॒त॒रि॒क्षऽप्रा॑: वह॑मा॒न: अश्वै॑: ह॒स्ते॑ दधा॑न: नर्या॑ पुरू॑णि नि॒ऽवे॒श॒यं॑न् च प्र॒ऽसु॒वन् च॒ भूम॑ ॥१॥ उत् अ॒स्य॒ बा॒हू॑ शि॒थि॒रा बृ॒हंता॑ हिरण्यया॑ दि॒व: अं॒तान् अ॒न॒ष्टां॑ नूनं स: अ॒स्य॒ म॒हि॒मा प॒नि॒ष्ट॒ सूर॑: चित् अ॒स्मै॒ अनु॑ दात् अ॒प॒स्या॑म ॥२॥ स: घ॒ न॒: दे॒व: स॒वि॒ता स॒हऽवा॑ आ सा॒वि॒ष॒त् वसु॑ऽपति: वसू॑नि वि॒ऽश्रय॑माण: अ॒मति॑ं उ॒रू॒चीं म॒र्त॒ऽभो॒ज॒नं अध॑ रासते न॒: ॥३॥ इ॒माः गिर॑: स॒वि॒तार॑ं सु॒ऽजि॒ह्वं पू॒ष॒ण॒ऽग॒भ॒स्ति॒

ईळते सुऽपाणिं चित्रं वयः बृहत् अस्मे दधातु यूयं पात स्वस्तिऽभिः सदा नः ॥४॥१२॥

॥४६॥ इमाः रुद्राय स्थिरऽधन्वने गिरः क्षिप्रऽइषवे देवाय स्वधाऽवे अषाळ्हाय सहमानाय वेधसे तिग्मऽआयुधाय भरत शृणोतु नः ॥१॥ सः हि क्षयेण क्षम्यस्य जन्मनः साऽराज्येन दिव्यस्य चेतति अवन् अवंतीः उप नः दुरः चर अनमीवः रुद्र जासु नः भव ॥२॥ या ते द्युत् अवऽसृष्टा दिवः परि क्षमया चरति परि सा वृणक्तु नः सहस्रं ते सुऽअपिवात भेषजा मा नः तोकेषु तनयेषु रिरिषः ॥३॥ मा नः वधीः रुद्र मा परा दाः मा ते भूम प्रऽसितौ हीळितस्य आ नः भज बर्हिषि जीवऽशंसे यूयं पात स्वस्तिऽभिः सदा नः ॥४॥१३॥

॥४७॥ आपः यं वः प्रथमं देवऽयंतः इंद्रऽपानं ऊर्मिं अकृण्वत इळः तं वः वयं शुचिं अरिप्रं अद्य घृतऽप्रुषं मधुऽमंतं वनेम ॥१॥ तं ऊर्मिं आपः मधुमत्ऽतमं वः अपां नपात् अवतु आशुऽहेमा यस्मिन् इंद्रः वसुऽभिः मादयाते तं अश्याम देवऽयंतः वः अद्य ॥२॥ शतऽपवित्राः स्वधया मदंतीः देवीः देवानां अपि यंति पाथः ताः इंद्रस्य न मिनंति व्रतानि सिंधुऽभ्यः हव्यं घृतऽवत् जुहोत ॥३॥ याः सूर्यः रश्मिऽभिः आऽततान याभ्यः इंद्रः अरदत् गातुं ऊर्मिं ते सिंधवः वरिवः धातन नः यूयं पात स्वस्तिऽभिः सदा नः ॥४॥१४॥

॥४८॥ ऋभुक्षणः वाजाः मादयध्वं अस्मे नरः मघऽवानः

सुतस्य आ वः अर्वाचः ऋतवः न यातां विऽभ्वः रथं नर्यं वर्तयंतु ॥१॥ ऋभुः ऋभुऽभिः अभि वः स्याम विऽभ्वः विभुऽभिः शर्वसा शर्वांसि वाजः अस्मान् अवतु वाजऽसातौ इंद्रेण युजा तरुषेम वृत्रं॥२॥ ते चित् हि पूर्वीः अभि संति शासा विश्वान् अर्यः उपरऽतांति वन्वन् इंद्रः विऽभ्वा ऋभुक्षाः वाजः अर्यः शर्धोः मित्थात्या कृणवन् वि नृम्णं॥३॥ नु देवासः वरिवः कर्तन नः भूत नः विश्वे अवसे सऽजोषाः सं अस्मे इषं वसवः ददीरन् यूयं पात स्वस्तिऽभिः सदा नः॥४॥१५॥

॥४९॥ समुद्रऽज्येष्ठाः सलिलस्य मध्यात् पुनानाः यंति अनिऽविशमानाः इंद्रः याः वज्री वृषभः ररादं ताः आपः देवीः इह मां अवंतु॥१॥ याः आपः दिव्याः उत वा स्रवंति खनित्रिमाः उत वा याः स्वयंऽजाः समुद्रऽअर्थाः याः शुचयः पावकाः ताः आपः देवीः इह मां अवंतु॥२॥ यासां राजा वरुणः याति मध्ये सत्यानृते अवऽपश्यन् जनानां मधुश्चुतः शुचयः याः पावकाः ताः आपः देवीः इह मां अवंतु॥३॥ यासु राजा वरुणः यासु सोमः विश्वे देवाः यासु ऊर्जं मदंति वैश्वानरः यासु अग्निः प्रऽविष्टः ताः आपः देवीः इह मां अवंतु॥४॥१६॥

॥५०॥ आ मां मित्रावरुणा इह रक्षतं कुलाययंत् विऽश्वयंत् मा नः आ गन् अजकाऽवं दुःऽहर्शीकं तिरः दधे मा मां पद्येन रपसा विदत् त्सरुः॥१॥ यत् विऽजामंन् परुषि वंदनं भुवत् अष्ठीवंतौ परि कुल्फौ च देहत् अग्निः तत् शोचन् अप बाधतां इतः मा मां पद्येन रपसा विदत् त्सरुः॥२॥ यत् शल्मलौ भवंति यत्

नदीषु यत् ओषधीभ्यः परि जायते विषं विश्वे देवाः निः इतः तत् सुवंतु मा मां पद्येन रपसा विदत् त्सरुः ॥३॥ याः प्रऽवतः निऽवतः उत्ऽवतः उदन्ऽवतीः अनुदकाः च याः ताः अस्मभ्यं पयसा पिन्वमानाः शिवाः देवीः अशिपदाः भवंतु सर्वाः नद्यः अशिमिदाः भवंतु ॥४॥१७॥

॥५१॥ आदित्यानां अवसा नूतनेन सक्षीमहि शर्मणा शंऽतमेन अनागाःऽत्वे अदितिऽत्वे तुरासः इमं यज्ञं दधतु श्रोषमाणाः ॥१॥ आदित्यासः अदितिः मादयंतां मित्रः अर्यमा वरुणः रजिष्ठाः अस्माकं संतु भुवनस्य गोपाः पिबंतु सोमं अवसे नः अद्य ॥२॥ आदित्याः विश्वे मरुतः च विश्वे देवाः च विश्वे ऋभवः च विश्वे इंद्रः अग्निः अश्विना तुस्तुवानाः यूयं पात स्वस्तिऽभिः सदा नः ॥३॥१८॥

॥५२॥ आदित्यासः अदितयः स्याम पूः देवऽत्रा वसवः मर्त्यऽत्रा सनेम मित्रावरुणा सनंतः भवेम द्यावापृथिवी भवंतः ॥१॥ मित्रः तत् नः वरुणः ममहंत शर्म तोकाय तनयाय गोपाः मा वः भुजेम अन्यऽजातं एनः मा तत् कर्म वसवः यत् चयध्वे ॥२॥ तुरण्यवः अंगिरसः नक्षंत रत्नं देवस्य सवितुः इयानाः पिता च तत् नः महान् यजत्रः विश्वे देवाः सऽमनसः जुषंत ॥३॥१९॥

॥५३॥ प्र द्यावा यज्ञैः पृथिवी नमःऽभिः सऽबाधः ईळे बृहती यजत्रे ते चित् हि पूर्वे कवयः गृणंतः पुरः मही दधिरे

देवऽपुचे० ॥१॥ प्र पूर्वऽजे० पितरा नव्यसीभिः गीःऽभिः कृणुध्वं सदने ऋतस्य आ नः द्यावापृथिवी दैव्येन जनेन यातं महि वां वरूथं ॥२॥ उतो हि वां रत्नऽधेयानि संति पुरूणि द्यावापृथिवी सुऽदासे अस्मे धत्तं यत् असत् अस्कृधोयु यूयं पात स्वस्तिऽभिः सदा नः ॥३॥२०॥

॥५४॥ वास्तोः पते प्रति जानीहि अस्मान् सुऽआवेशः अनमीवः भव नः यत् त्वा ईमहे प्रति तत् नः जुषस्व शं नः भव द्विऽपदे शं चतुःऽपदे ॥१॥ वास्तोः पते प्रऽतरणः नः एधि गयऽस्फानः गोभिः अश्वेभिः इंदो अजरासः ते सख्ये स्याम पिताऽइव पुचान् प्रति नः जुषस्व ॥२॥ वास्तोः पते शग्मया संऽसदा ते सक्षीमहि रण्वया गातुऽमत्या पाहि क्षेम उत योगे वरं नः यूयं पात स्वस्तिऽभिः सदा नः ॥३॥२१॥

॥५५॥ अमीवऽहा वास्तोः पते विश्वा रूपाणि आऽविशन् सखा सुऽशेवः एधि नः ॥१॥ यत् अर्जुन सारमेय दतः पिशंग यच्छसे विऽइव भ्राजंते ऋष्टयः उप सृक्वेषु बप्सतः नि सु स्वप ॥२॥ स्तेनं राय सारमेय तस्करं वा पुनःऽसर स्तोतॄन् इंद्रस्य रायसि किं अस्मान् दुच्छुनऽयसे नि सु स्वप ॥३॥ त्वं सूकरस्य दर्दृहि तवं दर्दर्तु सूकरः स्तोतॄन् इंद्रस्य रायसि किं अस्मान् दुच्छुनऽयसे नि सु स्वप ॥४॥ सस्तु माता सस्तु पिता सस्तु श्वा सस्तु विश्पतिः ससंतु सर्वे ज्ञातयः सस्तु अयं अभितः जनः ॥५॥ यः आस्ते यः च चरति यः च पश्यति नः जनः तेषां सं हन्मः अक्षाणि यथा इदं हर्म्यं तथा ॥६॥ सहस्रऽशृंगः वृषभः यः समुद्रात् उतऽआचरत्

तेन सहस्येन वयं नि जनान् स्वापयामसि ॥७॥ प्रोष्ठेऽशयाः वह्येऽशयाः नारीः याः तल्पेऽशीवरीः स्त्रियः याः पुण्येऽगंधाः ताः सर्वाः स्वापयामसि ॥८॥२२॥३॥

॥५६॥ के ईं विऽअक्ताः नरः सऽनीळाः रुद्रस्य मर्याः अध सुऽअभ्वाः ॥१॥ नकिः हि एषां जनूंषि वेद ते अंग विद्रे मिथः जनिचँ॥२॥ अभि स्वऽपूभिः मिथः वपंत वातऽस्वनसः श्येनाः अस्पृधन्॥३॥ एतानिं धीरः निणया चिकेत पृश्निः यत् ऊधः मही जभार ॥४॥ सा विट् सुऽवीरा मरुत्ऽभिः अस्तु सनात् सहँती पुष्यँती नृम्णं॥५॥ यामँ येष्ठाः शुभा शोभिष्ठाः श्रिया संऽमिष्ठाः ओजःऽभिः उग्याः॥६॥ उग्यं वः ओजः स्थिरा शवाँसि अध मरुत्-ऽभिः गणः तुविष्मान् ॥७॥ शुभ्रः वः शुष्मः क्रुधमी मनाँसि धुनिः मुनिःऽइव शर्धस्य धृष्णोः॥८॥ सनेमि अस्मत् युयोत दिद्युं मा वः दुःऽमतिः इह प्रणक् नः॥९॥ प्रिया वः नाम हुवे तुराणां आ यत् तृपत् मरुतः वावशानाः ॥१०॥२३॥ सुऽआयुधासः इष्मिणः सुऽनिष्काः उत स्वयं तन्वः शुंभमानाः॥११॥ शुचीं वः हव्या मरुतः शुचीनां शुचिं हिनोमि अध्वरं शुचिऽभ्यः ऋ-तेन सत्यं ऋतऽसापः आयन् शुचिऽजन्मानः शुचयः पावकाः ॥१२॥ अंसेषु आ मरुतः खादयः वः वक्षःऽसु रुक्माः उपऽशिश्रि-याणाः वि विऽद्युतः न वृष्टिऽभिः रुचानाः अनु स्वधां आयुधैः यच्छमानाः॥१३॥ प्र बुध्या वः ईरते महाँसि प्र नामानि प्रऽय-ज्यवः तिरध्वं सहस्रियँ दम्यँ भागं एतं गृहऽमेधीयँ मरुतः जुषध्वं ॥१४॥ यदिं स्तुतस्य मरुतः अधिऽइथ इत्था विप्रस्य वाजिनः हवीमन् मक्षु रायः सुऽवीर्यस्य दात नु चित् यं अन्यः आऽदभत्

अरावा॥१५॥२४॥ अत्यासः न ये मरुतः सुऽअंचः यक्षऽइशः न शुभयंत मर्याः ते ह्म्येऽस्थाः शिशवः न शुभ्राः वत्सासः न प्रऽक्रीळिनः पयःऽधाः॥१६॥ दृशस्यंतः नः मरुतः मृळंतु वरिवस्यंतः रोदसी सुऽमेकं॰ आरे गोऽहा नृऽहा वधः वः अस्तु सुम्नेभिः अस्मे वसवः नमध्वं॥१७॥ आ वः होता जोहवीति सत्तः सचाचीं रातिं मरुतः गृणानः यः ईवंतः वृषणः अस्ति गोपाः सः अद्ध यावी हवते वः उक्थैः॥१८॥ इमे तुरं मरुतः रमयंति इमे सहः सहसः आ नमंति इमे शंसं वनुष्यतः नि पांति गुरु द्वेषः अरुरुषे दधंति॥१९॥ इमे रध्रं चित् मरुतः जुनंति भृमिं चित् यथा वसवः जुषंत अप बाधध्वं वृषणः तमांसि धत्त विश्वं तनयं तोकं अस्मे ॥२०॥२५॥ मा वः दाचात् मरुतः निः अरामं मा पश्चात् दघ्म रथ्यः विऽभागे आ नः स्पार्हे भजतन वसव्ये यत् ईं सुऽजातं वृषणः वः अस्ति॥२१॥ सं यत् हनंत मन्युऽभिः जनासः शूराः यह्वीषु ओषधीषु विक्षु अध स्म नः मरुतः रुद्रियासः त्रातारः भूत पृतनासु शूराः॥२२॥ भूरि चक्र मरुतः पित्र्याणि उक्थानि या वः शस्यंते पुरा चित् मरुत्ऽभिः उग्रः पृतनासु साळ्हा मरुत्ऽभिः इत् सनिता वाजं अर्वा॥२३॥ अस्मे वीरः मरुतः शुष्मी अस्तु जनानां यः असुरः विऽधर्ता अपः येन सुऽक्षितये तरेम अध स्वं ओकः अभि वः स्याम॥२४॥ तत् नः इंद्रः वरुणः मित्रः अग्निः आपः ओषधीः वनिनः जुषंत शर्मन् स्याम मरुतां उपऽस्थे यूयं पात स्वस्तिऽभिः सदा नः॥२५॥२६॥

॥५७॥ मध्वः वः नाम मारुतं यजध्वं प्र यज्ञेषु शवसा मदंति ये रेजयंति रोदसी चित् उर्वी पिन्वंति उत्सं यत् अयासुः उग्राः

॥१॥ निऽचेतारः हि मरुतः गृणंतं प्रऽनेतारः यजमानस्य मन्म अस्माकं अद्य विदथेषु बर्हिः आ वीतये सदत पिप्रियाणाः॥२॥ न एतावत् अन्ये मरुतः यथा इमे भ्राजंते रुक्मैः आयुधैः तनूभिः आ रोदसी विश्वऽपिशः पिशानाः समानं अंजि अंजते शुभे कं ॥३॥ ऋधक् सा वः मरुतः दिद्युत् अस्तु यत् वः आगः पुरुषता करांम मा वः तस्यां अपि भूम यजत्राः अस्मे वः अस्तु सुऽमतिः चनिष्ठा ॥४॥ कृते चित् अत्र मरुतः रणंत अनवद्यासः शुचयः पावकाः प्र नः अवत सुमतिऽभिः यजत्राः प्र वाजेभिः तिरत पुष्यसे नः॥५॥ उत स्तुतासः मरुतः व्यंतु विश्वेभिः नामऽभिः नरः हवींषि ददात नः अमृतस्य प्रऽजायै जिगृत रायः सूनृता मघानि॥६॥ आ स्तुतासः मरुतः विश्वे ऊती अच्छ सूरीन् सर्वऽतातां जिगात ये नः त्मना शतिनः वर्धयंति यूयं पात स्वस्तिऽभिः सदा नः ॥७॥२७॥

॥ ५८ ॥ प्र साकंऽउक्षे अर्चत गणाय यः दैव्यस्य धाम्नः तुविष्मान् उत क्षोदंति रोदसी महिऽत्वा नक्षंते नाकं निःऽऋतेः अवंशात्॥१॥ जनूः चित् वः मरुतः त्वेषेण भीमासः तुविऽमन्यवः अयासः प्र ये महःऽभिः ओजसा उत संति विश्वः वः यामन् भयते स्वःऽदृक्॥२॥ बृहत् वयः मघवत्ऽभ्यः दधात जुजोषन् इत् मरुतः सुऽस्तुतिं नः गतः न अध्वा वि तिरति जंतुं प्र नः स्पार्हाभिः ऊतिऽभिः तिरत ॥३॥ युष्माऽऊतः विप्रः मरुतः शतस्वी युष्माऽऊतः अर्वा सहुरिः सहस्री युष्माऽऊतः संऽराट् उत हंति वृचं प्र तत् वः अस्तु धूतयः देष्णं॥४॥ तान् आ रुद्रस्य मीळ्हुषः विवासे कुवित् नंसंते मरुतः पुनः नः यत् सस्वर्तीः जिहीळिरे

यत् आविः अव तत् एनः ईमहे तुराणाम्॥५॥ प्र सा वाचि सुऽस्तुतिः मघोनाम् इदं सुऽउक्तं मरुतः जुषंत आरात् चित् द्वेषः वृषणः युयोत यूयं पात स्वस्तिऽभिः सदा नः॥६॥२८॥

॥५९॥ यं चायध्वे इदंऽइदं देवासः यं च नयथ तस्मै अग्ने वरुण मित्र अर्यमन् मरुतः शर्म यच्छत॥१॥ युष्माकम् देवाः अवसा अहनि प्रिये ईजानः तरति द्विषः प्र सः क्षयम् तिरते वि महीः इषः यः वः वराय दाशति॥२॥ नहि वः चरमं चन वसिष्ठः परिऽमंसते अस्माकम् अद्य मरुतः सुते सचा विश्वे पिबत कामिनः॥३॥ नहि वः ऊतिः पृतनासु मर्धति यस्मै अराध्वं नरः अभि वः आ अवर्त् सुऽमतिः नवीयसी तूयम् यात पिपीषवः॥४॥ ओ सु घृष्विऽराधसः यातन अंधांसि पीतये इमा वः हव्या मरुतः रेरे हि कं मो सु अन्यत्र गंतन॥५॥ आ च नः बर्हिः सदत अवित च नः स्याहाणि दातवे वसु अर्धंतः मरुतः सोम्ये मधौ स्वाहा इह मादयाध्वै॥६॥२९॥ स्वः चित् हि तन्वः शुंभमानाः आ हंसासः नीलऽपृष्ठाः अपप्रन् विश्वं शर्धः अभितः मा नि सेद् नरः न रण्वाः सवने मदंतः॥७॥ यः नः मरुतः अभि दुःऽहृणायुः तिरः चित्तानि वसवः जिघांसति दुहः पाशान् प्रति सः मुचीष्ट तपिष्ठेन हन्मना हंतन तं॥८॥ सांऽतपनाः इदं हविः मरुतः तत् जुजुष्टन युष्माकं ऊती रिशादसः॥९॥ गृहंऽमेधासः आ गत मरुतः मा अप भूतन युष्माकं ऊती सुऽदानवः॥१०॥ इहऽइह वः स्वऽतवसः कवयः सूर्यऽत्वचः यज्ञं मरुतः आ वृणे॥११॥ त्र्यंबकं यजामहे सुगंधिं पुष्टिवर्धनं उर्वारुकमिव बंधनान्मृत्योर्मुक्षीय मामृतात्॥१२॥३०॥४॥

॥६०॥ यत् अद्य सूर्य ब्रवः अनागाः उत्ऽयन् मित्राय वरुणाय सत्यं वयं देवऽत्रा अदितेः स्याम तवं प्रियासः अर्यमन् गृणंतः॥१॥ एषः स्यः मित्रावरुणा नृऽचक्षाः उभे उत् एति सूर्यः अभि जन्मन् विश्वस्य स्थातुः जगतः च गोपाः ऋजु मर्तेषु वृजिना च पश्यन्॥२॥ अयुक्त सप्त हरितः सधऽस्थात् याः ईं वहंति सूर्यं घृताचीः धामानि मित्रावरुणा युवाकुः सं यः यूथाऽइव जनिमानि चष्टे॥३॥ उत् वां पृक्षासः मधुऽमंतः अस्थुः आ सूर्यः अरुहत् शुक्रं अर्णः यस्मै आदित्याः अध्वनः रदंति मित्रः अर्यमा वरुणः सऽजोषाः॥४॥ इमे चेतारः अनृतस्य भूरेः मित्रः अर्यमा वरुणः हि संति इमे ऋतस्य ववृधुः दुरोणे शग्मासः पुत्राः अदितेः अदब्धाः॥५॥ इमे मित्रः वरुणः दुःऽदभासः अचेतसं चित् चित्तयंति दक्षैः अपि क्रतुं सुऽचेतसं वतंतः तिरः चित् अंहः सुऽपथा नयंति॥६॥१॥ इमे दिवः अनिंऽमिषा पृथिव्याः चिकित्वांसः अचेतसं नयंति प्रऽवाजे चित् नद्यः गाधं अस्ति पारं नः अस्य विष्पितस्य पर्षन्॥७॥ यत् गोपावत् अदितिः शर्म भद्रं मित्रः यच्छंति वरुणः सुऽदासे तस्मिन् आ तोकं तनयं दधानाः मा कर्म देवऽहेळनं तुरासः॥८॥ अव वेदिं होत्राभिः यजेत रिपः काः चित् वरुणऽधृतः सः परि द्वेषःऽभिः अर्यमा वृणक्तु उरुं सुऽदासे वृषणौ ऊं लोकं॥९॥ सस्वः चित् हि संऽकृतिः त्वेषी एषां अपीच्येन सहसा सहंते युष्मत् भिया वृषणः रेजमानाः दक्षस्य चित् महिना मृळत नः॥१०॥ यः ब्रह्मणे सुऽमतिं आऽयजाते वाजस्य सातौ परमस्य रायः सीक्षंत मन्युं मघऽवानः अर्यः उरु क्षयाय चक्रिरे सुऽधातु॥११॥ इयं देवा पुरःऽहितिः युवऽभ्यां यज्ञेषु मित्रावरुणौ अकारि

विश्वानि दुःऽगा पिपृतं तिरः नः यूयं पात स्वस्तिऽभिः सदा नः ॥ १२ ॥ २ ॥

॥ ६१ ॥ उत् वां चक्षुः वरुणा सुऽप्रतीकं देवयोः एति सूर्यः तन्वान् अभि यः विश्वा भुवनानि चष्टे सः मन्युं मर्त्येषु आ चिकेत ॥ १ ॥ प्र वां सः मित्रावरुणौ ऋतऽवा विप्रः मन्मानि दीर्घऽश्रुत् इयर्ति यस्य ब्रह्माणि सुऽक्रतू० अवाथः आ यत् क्रत्वा न शरदः पृणैथे ॥ २ ॥ प्र उरोः मित्रावरुणा पृथिव्याः प्र दिवः ऋष्वात् बृहतः सुऽदानू० स्पशः दधाथे ओषधीषु विक्षु ऋधक् यतः अनिऽमिषं रक्षमाणा ॥ ३ ॥ शंसं मित्रस्य वरुणस्य धाम सुषमः रोदसी बृहधे महिऽत्वा अयन् मासाः अयज्वनां अवीराः प्र यज्ञऽमन्मा वृजनं तिराते ॥ ४ ॥ अमूरा विश्वा वृषणौ इमाः वां न यासु चित्रं ददृशे न यक्षं दुहः सचन्ते अनृता जनानां न वां निण्यानि अचितें अभूवन् ॥ ५ ॥ सं ऊं वां यज्ञं महयं नमःऽभिः हुवे वां मित्रावरुणा सुऽबाधः प्र वां मन्मानि ऋचसे नवानि कृतानि ब्रह्म जुजुषन् इमानि ॥ ६ ॥ इयं देवा पुरःऽहितिः युवऽभ्यां यज्ञेषु मित्रावरुणौ अकारि विश्वानि दुःऽगा पिपृतं तिरः नः यूयं पात स्वस्तिऽभिः सदा नः ॥ ७ ॥ ३ ॥

॥ ६२ ॥ उत् सूर्यः बृहत् अर्चीषि अश्रेत् पुरु विश्वा जनिम मानुषाणां समः दिवा ददृशे रोचमानः क्रत्वा कृतः सुऽकृतः कर्तृऽभिः भूत् ॥ १ ॥ सः सूर्य प्रति पुरः नः उत् गाः एभिः स्तोमेभिः एतशेभिः एवैः प्र नः मित्राय वरुणाय वोचः अनागसः अर्यम्णे अग्नये च ॥ २ ॥ वि नः सहस्रं पुरुधः रदंतु ऋतऽवानः वरुणः मित्रः

अग्निः यच्छंतु चंद्राः उप ऽमं नः अर्के आ नः कामं पूपुरंतु स्तवानाः ॥३॥ द्यावाभूमी अदिते चासीथां नः ये वां जज्ञुः सु ऽजनिमानः पृष्वे मा हेळे भूम वरुणस्य वायोः मा मित्रस्य प्रिय ऽतमस्य नृणां ॥४॥ प्र बाहवा सिसृतं जीवसे नः आ नः गव्यूतिं उक्षतं घृतेन आ नः जने श्रवयतं युवाना श्रुतं मे मित्रावरुणा हवा ऽइमा ॥५॥ नु मित्रः वरुणः अर्यमा नः त्मने तोकाय वरिवः दधंतु सु ऽगा नः विश्वा सु ऽपथानि संतु यूयं पात स्वस्ति ऽभिः सदा नः ॥६॥४॥

॥६३॥ उत् ऊं एति सु ऽभगः विश्व ऽचक्षाः साधारणः सूर्यः मानुषाणां चक्षुः मित्रस्य वरुणस्य देवः चर्मे ऽइव यः सं ऽअविव्यक् तमांसि ॥१॥ उत् ऊं एति प्र ऽसविता जनानां महान् केतुः अर्णवः सूर्यस्य समानं चक्रं परि ऽआविवृत्सन् यत् एतशः वहंति धूः ऽसु युक्तः ॥२॥ वि ऽभ्राजमानः उषसाँ उप ऽस्थात् रेभैः उत् एति अनु ऽमद्यमानः एषः मे देवः सविता चच्छंद् यः समानं न प्र ऽमिनाति धाम ॥३॥ दिवः रुक्मः उरु ऽचक्षाः उत् एति दूरे ऽअर्थः तरणिः भ्राजमानः नूनं जनाः सूर्येण प्र ऽसूताः अयन् अर्थानि कृणवन् अपाँसि ॥४॥ यच्च चक्रुः अमृताः गातुं अस्मै श्येनः न दीयन् अनु एति पाथः प्रति वां सूरे उत् ऽइते विधेम नमः ऽभिः मित्रावरुणा उत हव्यैः ॥५॥ नु मित्रः वरुणः अर्यमा नः त्मने तोकाय वरिवः दधंतु सु ऽगा नः विश्वा सु ऽपथानि संतु यूयं पात स्वस्ति ऽभिः सदा नः ॥६॥५॥

॥६४॥ दिवि क्षयंता रजसः पृथिव्यां प्र वां घृतस्य निः ऽनिजः

दद्दीरन् हव्यं नः मित्रः अर्यमा सुऽजातः राजा सुऽक्षत्रः वरुणः जुषंत॥१॥ आ राजाना महः ऋतस्य गोपा सिंधुऽपती० क्षत्रिया यातं अर्वाक् इळां नः मित्रावरुणा उत वृष्टिं अव दिवः इन्वतं जीरऽदानू०॥२॥ मित्रः तत् नः वरुणः देवः अर्यः प्र साधिष्ठेभिः पथिऽभिः नयंतु ब्रवत् यथा नः आत् अरिः सुऽदासे इषा मदेम सह देवऽगोपाः॥३॥ यः वां गतैं मनसा तक्षत् एतं ऊर्ध्वा धीतिं कृणवत् धारयत् च उक्षेथां मित्रावरुणा घृतेन ता राजाना सुऽक्षितीः तर्पयेथां॥४॥ एषः स्तोमः वरुण मित्र तुभ्यं सोमः शुक्रः न वायवे अयामि अविष्टं धियः जिगृतं पुरंऽधीः यूयं पात स्वस्तिऽभिः सदा नः॥५॥६॥

॥६५॥ प्रति वां सूरे उत्ऽइते सुऽउक्तैः मित्रं हुवे वरुणं पूतऽदक्षं ययोः असुर्यं अक्षितं ज्येष्ठं विश्वस्य यामन् आऽचिता जिगत्नु॥१॥ ता हि देवानां असुरा तौ अर्या ता नः क्षितीः करतं ऊर्जयंतीः अश्यामं मित्रावरुणा वयं वां द्यावा च यत्र पीपयन् अहा च॥२॥ ता भूरिऽपाशौ अनृतस्य सेतूं दुःऽअत्येतू० रिपवे मर्त्याय ऋतस्य मित्रावरुणा पथा वां अपः न नावा दुःऽइता तरेम॥३॥ आ नः मित्रावरुणा हव्यऽजुष्टिं घृतैः गव्यूतिं उक्षतं इळाभिः प्रति वां अत्र वरं आ जनाय पृणीतं उग्रः दिव्यस्य चारोः॥४॥ एषः स्तोमः वरुण मित्र तुभ्यं सोमः शुक्रः न वायवे अयामि अविष्टं धियः जिगृतं पुरंऽधीः यूयं पात स्वस्तिऽभिः सदा नः॥५॥७॥

॥६६॥ प्र मित्रयोः वरुणयोः स्तोमः नः एतु शूष्यः नमस्वान्

तुविऽजातयोः ॥१॥ या धारयैंत देवाः सुऽदक्षा दक्षैऽपितरा असुर्याय प्रऽमंहसा॥२॥ ता नः स्तिऽपा तनूऽपा वरुण जरितॄणां मित्र साधयतं धियः॥३॥ यत् अद्य सूरे उत्ऽईते अनागाः मित्रः अर्यमा सुवाति सविता भगः॥४॥ सुप्रऽअवीः अस्तु सः क्षयः प्र नु यामन् सुऽदानवः ये नः अंहः अतिऽपिप्रति॥५॥८॥ उत स्वऽराजः अदितिः अदब्धस्य व्रतस्य ये महः राजानः ईशते ॥६॥ प्रति वां सूरे उत्ऽईते मित्रं गृणीषे वरुणं अर्यमणं रिशादसं ॥७॥ राया हिरण्यऽया मतिः इयं अवृकाय शवसे इयं विप्रा मेधऽसातये ॥८॥ ते स्याम देव वरुण ते मित्र सूरिऽभिः सह इषं स्वः० च धीमहि॥९॥ बहवः सूरऽचक्षसः अग्निऽजिह्वाः ऋतऽवृधः चीरिणं ये येमुः विदथानि धीतिऽभिः विश्वानि परिभूतिऽभिः॥१०॥९॥ वि ये दधुः शरदे मासं आत् अहः यज्ञं अक्तुं च आत् ऋचे अनाप्यं वरुणः मित्रः अर्यमा क्षत्रं राजानः आशत॥११॥ तत् वः अद्य मनामहे सुऽउक्तैः सूरे उत्ऽईते यत् ओहते वरुणः मित्रः अर्यमा यूयं ऋतस्य रथ्यः॥१२॥ ऋतऽवानः ऋतऽजाताः ऋतऽवृधः घोरासः अनृतऽद्विषः तेषां वः सुम्ने सुच्छर्दिःऽतमे नरः स्याम ये च सूरयः॥१३॥ उत ऊं त्यत् दर्शतं वपुः दिवः एति प्रतिऽअर्रे यत् ईं आप्नुः वहंति देवः एतशः विश्वस्मै चक्षसे अरैं ॥१४॥ शीर्ष्णःऽशीर्ष्णः जगतः तस्थुषः पतिं समया विश्वं आ रजः सप्त स्वसारः सुविताय सूर्यं वहंति हरितः रथे॥१५॥१०॥ तत् चक्षुः देवऽहितं पुरुस्तात् उत्ऽचरत् पश्येम शरदः शतं जीवेम शरदः शतं ॥१६॥ काव्येभिः अदाभ्या आ यातं वरुण द्युऽमत् मित्रः च सोमऽपीतये ॥१७॥ दिवः धामऽभिः वरुण मित्रः च आ यातं अदुहा पिबतं सोमं आऽतुजी० ॥१८॥ आ यातं

मित्रावरुणा जुषाणो आऽहुतिं नरा पातं सोमं ऋतऽवृधा ॥ १९ ॥ ११ ॥

॥ ६७ ॥ प्रति वां रथो नृऽपती० जरध्यै हविष्मता मनसा यज्ञियेन यः वां दूतः न धिष्ण्यो अजीगः अच्छ सूनुः न पितरा विवक्ति ॥ १ ॥ अशोचि अग्निः समिद्धानः अस्मे उषो अह्नन् तमसः चित् अंतः अचैति केतुः उषसः पुरस्तात् श्रिये दिवः दुहितुः जायमानः ॥ २ ॥ अभि वां नूनं अश्विना सुऽहोता स्तोमैः सिसक्ति नासत्या विवक्षान् पूर्वीभिः यातं पथ्याभिः अर्वाक् स्वःऽविदा वसुऽमता रथेन ॥ ३ ॥ अवोः वां नूनं अश्विना युवाकुः हुवे यत् वां सुते माध्वी वसुऽयुः आ वां वहंतु स्थविरासः अश्वाः पिबाथः अस्मे सुऽसुता मधूनि ॥ ४ ॥ प्राची ऊं देवा अश्विना धियं मे अमृध्रां सातये कृतं वसुऽयुं विष्वाः अविष्टं वाजे आ पुरंऽधीः ता नः शक्तं शचीऽपती० शचीभिः ॥ ५ ॥ १२ ॥ अविष्टं धीषु अश्विना नः आसु प्रजाऽवत् रतः अहूयं नः अस्तु आ वां तोके तनये तूतुजानाः सुऽरत्नासः देवऽवीतिं गमेम ॥ ६ ॥ एषः स्यः वां पूर्वगत्वाऽइव सख्ये निऽधिः हितः माध्वी रातः अस्मे अहेळता मनसा आ यातं अर्वाक् अश्नंता हव्यं मानुषीषु विक्षु ॥ ७ ॥ एकस्मिन् योगे भुरणा समाने परि वां सप्त स्रवतः रथः गात् न वायंति सुऽभ्वः देवऽयुक्ताः ये वां धूःऽसु तरणयः वहंति ॥ ८ ॥ असश्चता मघवत्ऽभ्यः हि भूतं ये राया मघऽदेयं जुनंति प्र ये बंधुं सूनृताभिः तिरंते गव्या पृंचंतः अश्व्या मघानि ॥ ९ ॥ नु मे हवं आ शृणुतं युवाना यासिष्टं वर्तिः अश्विनौ इराऽवत् धत्तं रत्नानि जरतं च सूरीन् यूयं पात स्वस्तिऽभिः सदा नः ॥ १० ॥ १३ ॥

॥६८॥ आ शुभ्रा यातं अश्विना सुऽअश्वा गिरः दस्रा जुजुषाणा युवाकोः हव्यानि च प्रति ऽभृता वीतं नः॥१॥ प्र वां अंधांसि मद्यानि अस्थुः अरं गंतं हविषः वीतये मे तिरः अर्यः हवनानि श्रुतं नः॥२॥ प्र वां रथः मनः ऽजवाः इयर्ति तिरः रजांसि अश्विना शत ऽऊतिः अस्मभ्यं सूर्यावसू इयानः॥३॥ अयं ह यत् वां देव ऽयाः ऊं अद्रिः ऊर्ध्वः विवक्ति सोम ऽसुत् युव ऽभ्यां आ वल्गू विप्रः ववृतीत हव्यैः॥४॥ चित्रं ह यत् वां भोजनं नु अस्ति नि अर्चये महिष्वंतं युयोतं यः वां ओमानं दधते प्रियः सन्॥५॥१४॥ उत त्यत् वां जुरते अश्विना भूत् व्यवनाय प्रतीत्यै हविः ऽदे अधि यत् वर्पः इतः ऽऊति धत्थः॥६॥ उत त्यं भुज्युं अश्विना सखायः मध्ये जहुः दुः ऽएवासः समुद्रे निः ईं पर्षत् अरावा यः युवाकुः॥७॥ वृकाय चित् जसमानाय शक्तं उत श्रुतं शयवे हूयमाना यौ अघ्यां अपिन्वतं अपः न स्तर्यै चित् शक्ती अश्विना शचीभिः॥८॥ एषः स्यः कारुः जरते सुऽउक्तैः अयै वुधानः उषसां सुऽमन्मा इषा तं वर्धत् अघ्या पयः ऽभिः यूयं पात स्वस्ति ऽभिः सदा नः॥९॥१५॥

॥६९॥ आ वां रथः रोदसी बृहद्धानः हिरण्ययः वृष ऽभिः यातु अश्वैः घृत ऽवर्तनिः पविऽभिः रुचानः इषां वोळ्हा नृऽपतिः वाजिनीऽवान्॥१॥ सः पप्रथानः अभि पंच भूम चिऽवंधुरः मनसा आ यातु युक्तः विशः येन गच्छथः देव ऽयंतीः कुच चित् यामं अश्विना दधाना॥२॥ सुऽअश्वा यशसा आ यातं अर्वाक् दस्रा निऽधिं मधुऽमंतं पिबाथः वि वां रथः वध्वा यादमानः अंतान् दिवः बाधते वर्तनिऽभ्यां॥३॥ युवोः श्रियं परि

योषा अवृणीत सूरः दुहिता परिऽतक्म्यायां यत् देवऽयंतं अवंथः शचीभिः परि घ्रंसं ओमना वां वयः गात् ॥४॥ यः ह स्यः वां रथिरा वस्ते उस्राः रथः युजानः परिऽयाति वर्तिः तेन नः शं योः उषसः विऽउष्टौ नि अश्विना वहतं यज्ञे अस्मिन् ॥५॥ नरा गौराऽइव विऽद्युतं तृषाणा अस्माकं अद्य सवना उप यातं पुरुऽचा हि वां मतिभिः हवंते मा वां अन्ये नि यमन् देवऽयंतः ॥६॥ युवं भुज्युं अवंऽविडं समुद्रे उत् ऊहथुः अर्णसः असिंधानैः पतत्रिऽभिः अश्रमैः अव्यथिऽभिः दंसनाभिः अश्विना पारयंता ॥७॥ नु मे हवं आ शृणुतं युवाना यासिष्टं वर्तिः अश्विनौ इराऽवत् धत्तं रत्नानि जरतं च सूरीन् यूयं पात स्वस्तिऽभिः सदा नः ॥८॥१६॥

॥७०॥ आ विश्वऽवारा अश्विना गतं नः प्र तत् स्थानं अवाचि वां पृथिव्यां अश्वः न वाजी शुनऽपृष्टः अस्थात् आ यत् सेदथुः ध्रुवसे न योनिं ॥१॥ सिसक्ति सा वां सुऽमतिः चनिष्ठा अतापि घर्मः मनुषः दुरोणे यः वां समुद्रान् सरितः पिपर्ति एतंऽग्वा चित् न सुऽयुजा युजानः ॥२॥ यानि स्थानानि अश्विना दधाथे दिवः यह्वीषु ओषधीषु विक्षु नि पर्वतस्य मूर्धनि सदंता इषं जनाय दाशुषे वहंता ॥३॥ चनिष्टं देवौ ओषधीषु अप्ऽसु यत् योग्याः अश्नवैथे ऋषीणां पुरूणि रत्ना दधतौ नि अस्मे अनु पूर्वाणि चख्यथुः युगानि ॥४॥ शुश्रुऽवांसा चित् अश्विना पुरूणि अभि ब्रह्माणि चक्षाथे ऋषीणां प्रति प्र यातं वरं आ जनाय अस्मे वां अस्तु सुऽमतिः चनिष्ठा ॥५॥ यः वां यज्ञः नासत्या हविष्मान् कृतऽब्रह्मा सऽमर्यः भवति उप प्र यातं वरं आ

वसिष्ठं इमा ब्रह्माणि कृत्यंते युवऽभ्यां ॥६॥ इयं मनीषा इयं अश्विना गीः इमां सुऽवृक्तिं वृषणा जुषेथां इमा ब्रह्माणि युवऽयूनिं अग्मन् यूयं पात स्वस्तिऽभिः सदा नः॥७॥१७॥४॥

॥७१॥ अपं स्वसुंः उषसः नक जिहीते रिणक्ति कृष्णीः अरुषाय पंथां अश्वंऽमघा गोऽमंघा वां हुवेम दिवा नक्तं शरुं अस्मत् युयोतं ॥१॥ उपऽआयातं दाशुषे मर्त्याय रथेंन वामं अश्विना वहंता युयुतं अस्मत् अनिरां अमीवां दिवा नक्तं माध्वीः चासीथां नः॥२॥ आ वां रथें अवमस्यां विऽउष्टौ सुम्नऽयवः वृषणः वर्तयंतु स्यूमंऽगभस्तिं ऋतयुक्ऽभिः अश्वैः आ अश्विना वसुंऽमंतं वहेथां॥३॥ यः वां रथः नृऽपतीः अस्ति वोळ्हा चिऽवंधुरः वसुंऽमान् उस्रऽयामा आ नः एना नासत्या उपं यातं अभि यत् वां विश्वऽप्न्यः जिगाति॥४॥ युवं च्यवानं जरसः अमुमुक्तं नि पेदवे ऊहथुः आप्सुं अश्वं निः अंहसः तमसः स्पर्तं अचिं नि जाहुषं शिथिरे धातं अंतः॥५॥ इयं मनीषा इयं अश्विना गीः इमां सुऽवृक्तिं वृषणा जुषेथां इमा ब्रह्माणि युवऽयूनिं अग्मन् यूयं पात स्वस्तिऽभिः सदा नः॥६॥१८॥

॥७२॥ आ गोऽमंता नासत्या रथेंन अश्वंऽवता पुरुऽचंद्रेण यातं अभि वां विश्वाः निऽयुतः सचंते स्वाहेया श्रिया तन्वा सुभाना॥१॥ आ नः देवेभिः उपं यातं अर्वाक् सऽजोषसा नासत्या रथेंन युवोः हि नः सख्या पित्र्याणि समानः बंधुः उत तस्य वित्तं॥२॥ उत ऊं स्तोमासः अश्विनोः अवुध्रन् जामि ब्रह्माणि उषसः च देवीः आऽविवासन् रोदसी धिष्ण्ये इमे अच्छ विप्रः

नासत्या विवक्ति॥३॥ वि च इत् उच्छंति अश्विनौ उषसः प्र वां ब्रह्माणि कारवः भरंते ऊर्ध्वं भानुं सविता देवः अश्रेत् बृहत् अग्नयः सं इधा जरंते॥४॥ आ पश्चातात् नासत्या आ पुरस्तात् आ अश्विना यातं अधरात् उदक्तात् आ विश्वतः पांचजन्येन राया यूयं पात स्वस्तिभिः सदा नः॥५॥१९॥

॥७३॥ अतारिष्म तमसः पारं अस्य प्रति स्तोमं देवयंतः दधानाः पुरुदंसा पुरुतमा पुराजा अमर्त्या हवते अश्विना गीः॥१॥ नि ऊं प्रियः मनुषः सादि होता नासत्या यः यजते वंदते च अश्नीतं मध्वः अश्विनौ उपाके आ वां वोचे विदथेषु प्रयस्वान्॥२॥ अहेम यज्ञं पथां उराणाः इमा सु वृक्तिं वृषणा जुषेथां श्रुष्टीवाइव प्रयीषितः वां अबोधि प्रति स्तोमैः जरमाणः वसिष्ठः॥३॥ उप त्या वहीं गमतः विशं नः रक्षः अहना संभृता वीळुपाणी० सं अंधांसि अग्मत मत्सराणि मा नः मर्धिष्टं आ गतं शिवेन॥४॥ आ पश्चातात् नासत्या आ पुरस्तात् आ अश्विना यातं अधरात् उदक्तात् आ विश्वतः पांचजन्येन राया यूयं पात स्वस्तिभिः सदा नः॥५॥२०॥

॥७४॥ इमाः ऊं वां दिविष्टयः उस्रा हवंते अश्विना अयं वां अह्वे अवसे शचीवसू० विशंविशं हि गच्छथः॥१॥ युवं चित्रं ददथुः भोजनं नरा चोदेथां सूनृतावते अर्वाक् रथं सदमंनसा नि यच्छतं पिबतं सोम्यं मधु॥२॥ आ यातं उप भूषतं मध्वः पिबतं अश्विना दुग्धं पयः वृषणा जेन्यावसू मा नः मर्धिष्टं आ गतं॥३॥ अश्वासः ये वां उप दाशुषः गृहं युवां दीयंति विभ्रतः मक्षु-

युऽभिः नरा हयेभिः अश्विना आ देवा यातं अस्मऽयू० ॥४॥ अधं ह यंतः अश्विना पृक्षः सचंत सूरयः ता यंसतः मघवंत्ऽभ्यः ध्रुवं यशः छर्दिः अस्मभ्यं नासत्या ॥५॥ प्र ये ययुः अवृकासः रथाः-ऽइव नृऽपातारः जनानां उत स्वेन शवसा शूशुवुः नरः उत क्षियंति सुऽक्षितिं ॥६॥२१॥

॥७५॥ वि उषाः आवः दिविऽजाः ऋतेन आविःऽकृण्वाना महिमानं आ अगात् अप दुहः तमः आवः अजुष्टं अंगिरःऽतमा पथ्याः अजीगः ॥१॥ महे नः अद्य सुविताय बोधि उषः महे सौ-भगाय प्र यंधि चित्रं रयिं यशसं धेहि अस्मे देवि मर्तेषु मानुषि श्रवस्युं ॥२॥ एते त्ये भानवः दर्शतायाः चित्राः उषसः अमृतासः आ अगुः जनयंतः दैव्यानि व्रतानि आऽपृणंतः अंतरिक्षा वि अस्थुः ॥३॥ एषा स्या युजाना पराकात् पंच क्षितीः परि सद्यः जिगाति अभिऽपश्यंती वयुना जनानां दिवः दुहिता भुवनस्य पत्नी ॥४॥ वाजिनीऽवती सूर्यस्य योषा चित्रऽमघा रायः ईशे वसूनां ऋषिऽस्तुता जरयंती मघोनी उषाः उच्छति वह्निऽभिः गृणाना ॥५॥ प्रति द्युतानां अरुषासः अश्वाः चित्राः अहस्रन् उषसं वहंतः याति शुभ्रा विश्वऽपिशा रथेन दधाति रत्नं विधते जनाय ॥६॥ सत्या सत्येभिः महती महत्ऽभिः देवी देवेभिः यजता यजत्रैः रुजत् दृळ्हानि ददत् उस्रियाणां प्रति गावः उषसं वाव-शंत ॥७॥ नु नः गोऽमत् वीरऽवत् धेहि रत्नं उषः अश्वऽवत् पुरुऽभोजः अस्मे मा नः बर्हिः पुरुषता निदे कः यूयं पात स्व-स्तिऽभिः सदा नः ॥८॥२२॥

॥७६॥ उत् ऊं॑ ज्योतिः अमृतं॑ विश्वऽजन्यं॑ विश्वानरः सवि॒ता देवः अश्रेत् ऋत्वा॑ देवानां॑ अजनिष्ट चक्षुः आविः अकः भुवनं॑ विश्वं॑ उषाः॥१॥ प्र मे॒ पंथाः देव॒ऽयानाः॑ अदृश्रन् अमर्धंतः वसु॑ऽभिः इष्कृ॑तासः अभूत् ऊं॑ केतुः उषसः॑ पुरस्तात् प्रती॒ची आ अ॒गात् अधि॑ हर्म्येभ्यः॑ ॥२॥ तानि॑ इत् अहा॑नि बहु॒लानि॑ आसन् या प्रा॒चीनं॑ उत्ऽइता सूर्यस्य यतः॑ परि॑ जारः॑ऽइव आऽचर॑ंती उषः॑ ददृक्षे न पुनः॑ यतीऽइव॥३॥ ते इत् देवानां॑ सधऽमादः॑ आ॒सन् ऋतऽवा॑नः कवयः॑ पूर्व्यासः॑ गूळ्हं॑ ज्योतिः॑ पितरः॑ अनु॑ अविंदन् सत्यऽमंचाः॑ अजनयन् उषस॑ं ॥४॥ समा॒ने ऊर्वे॑ अधि॑ संऽगंतासः सं जा॒न॒ते न यत॑ंते मिथः॑ ते ते देवानां॑ न मिनंति व्र॒ता॑नि अमर्धंतः वसु॑ऽभिः यादमानाः॑॥५॥ प्रति॑ त्वा स्तोमैः॑ ईळते वसिष्ठाः॑ उषः॑ऽबुधः सु॑ऽभगे तुस्तु॑ऽवांसः॑ गवां॑ नेत्री वाज॑ऽपत्नी नः॑ उच्छ॒ उषः॑ सु॑ऽजा॒ते प्र॒थ॒मा ज॒र॒स्व॒ ॥६॥ एषा॑ नेत्री राधसः सूनृ॑तानां॑ उषाः॑ उच्छंती॑ रिभ्यते॑ वसिष्ठैः॑ दीर्घऽश्रुतं॑ र॒यिं अ॒स्मे॑ दधाना यूयं पा॒त॒ स्व॒स्तिऽभिः॑ सदा॑ नः॑॥७॥२३॥

॥७७॥ उपो॑ रुरुचे॑ युव॒तिः न योषा॑ विश्वं॑ जीवं॑ प्रऽसुवंती॑ चरा॑यं॑ अभूत् अग्निः॑ संऽइधे॑ मानु॑षाणां॑ अकः॑ ज्योतिः॑ बाधमा॑ना तमां॑सि॥१॥ विश्वं॑ प्रती॒ची स॒ऽप्रथाः॑ उत् अ॒स्था॒त् रुश॑त् वा॑सः॑ बिभ्रती॑ शु॒क्रं अश्वै॑त् हिरण्यऽवर्णा॑ सु॒ह॒शी॑कऽसंदृक् गवां॑ मा॒ता ने॒त्री अहा॑ं अरो॒चि॒ ॥२॥ देवानां॑ चक्षुः॑ सु॒ऽभगा॑ वहं॑ती श्वे॒तं नय॑ंती सु॒ऽह॒शी॑कं अश्वं॑ उषाः॑ अदर्शि॑ र॒श्मिऽभिः॑ विऽअ॑क्ता चि॒चऽमंघा विश्वं॑ अनु॑ प्रऽभू॑ता॥३॥ अंति॑ऽवामा दूरे॑ अमि॑त्रं॑ उच्छ॒ उर्वीं॑ गव्यू॑तिं अभयं॑ कृधि॑ नः॑ यवय॑ द्वेषः॑ आभ॑र॒ वसू॑नि चो॒-

दयं राधः गृणते मघोनि॥४॥ अस्मे श्रेष्ठैभिः भानुऽभिः विभाहि उषः देवि प्रऽतिरंती नः आयुः इषं च नः दधती विश्वऽवारे गोऽमत् अश्वऽवत् रथऽवत् च राधः॥५॥ यां त्वा दिवः दुहितः वर्धयंति उषः सुऽजाते मतिऽभिः वसिष्ठाः सा अस्मासु धाः रयिं कृष्वं बृहंतं यूयं पात स्वस्तिऽभिः सदा नः॥६॥२४॥

॥७८॥ प्रति केतवः प्रथमाः अहऽश्रन् ऊर्ध्वाः अस्याः अंजयः वि श्रयंते उषः अर्वाचा बृहता रथेन ज्योतिष्मता वामं अस्मभ्यं वष्टि॥१॥ प्रति सीं अग्निः जरते संऽइद्धः प्रति विप्रासः मतिऽभिः गृणंतः उषाः याति ज्योतिषा बाधमाना विश्वा तमांसि दुःऽइता अप देवी॥२॥ एताः ऊं त्याः प्रति अहऽश्रन् पुरस्तात् ज्योतिः यच्छंतीः उषसः विऽभातीः अजीजनन् सूर्यं यज्ञं अग्निं अपाचीनं तमः अगात् अजुष्टं॥३॥ अचेति दिवः दुहिता मघोनी विश्वं पश्यंति उषसं विऽभातीं आ अस्थात् रथं स्वधया युज्यमानं आ यं अश्वासः सुऽयुजः वहंति॥४॥ प्रति त्वा अद्य सुऽमनसः बुधंत अस्माकासः मघऽवानः वयं च तिल्विलायध्वं उषसः विऽभातीः यूयं पात स्वस्तिऽभिः सदा नः॥५॥२५॥

॥७९॥ वि उषाः आवः पथ्या जनानां पंच क्षितीः मानुषीः बोधयंती सुसंदृक्ऽभिः उक्षऽभिः भानुं अश्रेत् वि सूर्यः रोदसी चक्षसा आवः॥१॥ वि अंजते दिवः अंतेषु अक्तून् विशः न युक्ताः उषसः यतंते सं ते गावः तमः आ वर्तयंति ज्योतिः यच्छंति सविताऽइव बाहू॥२॥ अभूत् उषाः इंद्रेऽतमा मघोनी अजीजनत् सुविताय नवांसि वि दिवः देवी दुहिता दधाति अंगि-

रःऽतमा सुऽकृते वसूनि ॥३॥ तावत् उषः राधः अस्मभ्यं रास्व यावत् स्तोतृऽभ्यः अरदः गृणाना यां त्वा जज्ञुः वृषभस्य रवेण विऽहव्ह्स्य दुरः अद्रेः और्णोः ॥४॥ देवंऽदेवं राधसे चोदयंती अस्मद्र्यक् सूनृताः ईरयंती विऽउच्छंती नः सनये धियः धाः यूयं पात स्वस्तिऽभिः सदा नः ॥५॥२६॥

॥८०॥ प्रति स्तोमेभिः उषसं वसिष्ठाः गीःऽभिः विप्रासः प्रथमाः अबुध्रन् विऽवर्तयंतीं रजसी संऽअंते० आविःऽकृण्वतींभुवनानि विश्वा ॥१॥ एषा स्या नव्यं आयुः दधाना गूढ्वी तमः ज्योतिषा उषाः अबोधि अग्रे एति युवतिः अह्रयाणा प्र अचिकितत् सूर्यं यज्ञं अग्निं ॥२॥ अश्वंऽवतीः गोऽमतीः नः उषसः वीरऽवतीः सदं उच्छंतु भद्राः घृतं दुहानाः विश्वतः प्रऽपीताः यूयं पात स्वस्तिऽभिः सदा नः ॥३॥२७॥५॥

॥८१॥ प्रति ऊं अदर्शि आऽयती उच्छंती दुहिता दिवः अपोः महि व्ययति चक्षसे तमः ज्योतिः कृणोति सूनरी ॥१॥ उत् उस्रियाः सृजते सूर्यः सचा उत्ऽयन् नक्षत्रं अर्चिऽवत् तवे इत् उषः विऽउषि सूर्यस्य च सं भक्तेन गमेमहि ॥२॥ प्रति त्वा दुहितः दिवः उषः जीराः अभुत्स्महि या वहसि पुरु स्पार्हं वनन्ऽवति रत्नं न दाशुषे मयः ॥३॥ उच्छंती या कृणोषि मंहना महि प्रऽख्यै देवि स्वः दृशे तस्याः ते रत्नऽभाजः ईमहे वयं स्याम मातुः न सूनवः ॥४॥ तत् चित्रं राधः आ भर उषः यत् दीर्घश्रुत्ऽतमं यत् ते दिवः दुहितः मर्तऽभोजनं तत् रास्व भुनजामहै ॥५॥ अवः सूरिऽभ्यः अमृतं वसुऽत्वनं वाजान् अ-

स्मभ्यं गोऽमंतः चोदयिची मघोनः सूनृताऽवती उषाः उच्छत् अप स्रिधः ॥६॥१॥

॥८२॥ इंद्रावरुणा युवं अध्वराय नः विशे जनाय महि शर्म यच्छतं दीर्घऽप्रयज्युं अति यः वनुष्यति वयं जयेम पृतनासु दुःऽध्यः॥१॥ सऽराट् अन्यः स्वऽराट् अन्यः उच्यते वां महांतौ इंद्रावरुणा महाऽवसू० विश्वे देवासः परमे विऽओमनि सं वां ओजः वृषणा सं बलं दधुः॥२॥ अनु अपां खानि अतृंतं ओजसा आ सूर्यं एरयतं दिवि प्रऽभुं इंद्रावरुणा मदे अस्य मायिनः अपिन्वतं अपितः पिन्वतं धियः॥३॥ युवां इत् युतऽसु पृतनासु वह्नयः युवां क्षेमस्य प्रऽसवे मितऽज्ञवः ईशाना वस्वः उभयस्य कारवः इंद्रावरुणा सुऽहवा हवामहे॥४॥ इंद्रावरुणा यत् इमानि चक्रथुः विश्वा जातानि भुवनस्य मज्मना क्षेमेण मित्रः वरुणं दुवस्यति मरुत्ऽभिः उग्रः पुभं अन्यः ईयते॥५॥२॥ महे पुल्काय वरुणस्य नु त्विषे ओजः मिमाते धुवं अस्य यत् स्वं अजामिं अन्यः श्रथयंतं श्रा अतिरत् दभ्रेभिः अन्यः प्र वृणोति भूयसः॥६॥ न तं अंहः न दुःऽइतानि मर्त्यं इंद्रावरुणा न तपः कुतः चन यस्य देवा गच्छथः वीथः अध्वरं न तं मर्तस्य नशते परिऽह्रुतिः॥७॥ अर्वाक् नरा दैव्येन अर्वसा आ गतं शृणुतं हवं यदि मे जुजोषथः युवोः हि सख्यं उत वा यत् आप्यं माडीकं इंद्रावरुणा नि यच्छतं॥८॥ अस्माकं इंद्रावरुणा भरेऽभरे पुरःऽयोधा भवतं कृष्टिऽओजसा यत् वां हवंते उभये अध स्मृधि नरः तोकस्य तनयस्य सातिषु॥९॥ अस्मे इंद्रः वरुणः मित्रः अर्यमा द्युम्नं यच्छंतु महि शर्म सऽप्रथः अवध्रं ज्योतिः अदितेः ऋतऽवृधः देवस्य श्लोकं सवितुः मनामहे॥१०॥३॥

॥८३॥ युवां नरा पश्यमानासः आप्यं प्राचा गव्यंतः पृथुऽपशवः ययुः दासा च वृचा हतं आर्याणि च सुऽदासे इंद्रावरुणा अवसा अवतं ॥१॥ यच नरः सुऽअयंते कृतऽध्वजः यस्मिन् आजा भवंति किं चन प्रियं यच भयंते भुवना स्वःऽहशः तच नः इंद्रावरुणा अधि वोचतं ॥२॥ संभूम्याः अंताः ध्वसिराः अहृक्षत इंद्रावरुणा दिवि घोषः आ अरुहत् अस्थुः जनानां उप मां अरातयः अर्वाक् अवसा हवनऽश्रुता आ गतं ॥३॥ इंद्रावरुणा वधनाभिः अप्रति भेदं वन्वंता प्र सुऽदासे आवतं ब्रह्माणि एषां शृणुतं हवीमनि सत्या तृत्सूनां अभवत् पुरःऽहितिः ॥४॥ इंद्रावरुणौ अभि आ तपंति मा अघानि अर्यः वनुषां अरातयः युवं हि वस्वः उभयस्य राजथः अध स्म नः अवतं पायै दिवि ॥५॥४॥ युवां हवंते उभयासः आजिषु इंद्रं च वस्वः वरुणं च सातये यच राजऽभिः दशऽभिः निऽबाधितं प्र सुऽदासं आवतं तृत्सुऽभिः सह ॥६॥ दश राजानः संऽइताः अर्यऽजयवः सुऽदासे इंद्रावरुणा न युयुधुः सत्या नृणां अम्हऽसदां उपऽस्तुतिः देवाः एषां अभवन् देवऽहूतिषु ॥७॥ दाशऽराज्ञे परिऽयत्ताय विश्वतः सुऽदासे इंद्रावरुणौ अशिक्षतं श्वित्यंचः यच नमसा कपर्दिनः धिया धीऽवंतः असपंत तृत्सवः ॥८॥ वृचाणि अन्यः संऽइथेषु जिघ्नते व्रतानि अन्यः अभि रक्षते सदा हवामहे वां वृषणा सुवृक्तिऽभिः अस्मे इंद्रावरुणा शर्म यच्छतं ॥९॥ अस्मे इंद्रः वरुणः मित्रः अर्यमा द्युम्नं यच्छंतु महि शर्म सऽप्रथः अवध्रं ज्योतिः अदितेः ऋतऽवृधः देवस्य श्लोकं सवितुः मनामहे ॥१०॥५॥

॥८४॥ आ वां राजानौ अध्वरे ववृत्यां हव्येभिः इंद्रावरुणा

नमः॑ऽभिः प्र वां॑ घृ॒ताची॑ बाह्वोः॑ दधा॑ना परि॑ त्मना॑ विषु॑ऽरूपा
जि॒गा॒ति॒ ॥ १॥ यु॒वोः॑ रा॒ष्ट्रं बृ॒हत् इ॒न्व॒ति॒ द्यौः॑ यौ से॒तृऽभिः॑ अ॒-
र॒ज्जु॒ऽभिः॑ सि॒नी॒थः॑ परि॑ नः॑ हे॒ळः॑ वरु॑णस्य वृ॒ज्याः॑ उ॒रुं नः॑ इंद्रः॑
कृ॒णव॒त् ऊं॑ लो॒कं ॥ २॥ कृ॒तं नः॑ य॒ज्ञं वि॒दथे॑षु चारुं॑ कृ॒तं ब्रह्मा॑णि
सू॒रिषु॑ प्र॒ऽश॒स्ता उपो॑ र॒यिः॑ दे॒व॒ऽजू॑तः नः॑ एतु॒ प्र नः॑ स्वा॒हा-
भिः॑ ऊ॒ति॒ऽभिः॑ ति॒रे॒तं ॥ ३॥ अ॒स्मे इं॑द्रावरु॒णा॒ वि॒श्व॒ऽवा॑रं र॒यिं
ध॒त्तं॑ वसु॑ऽमंतं पुरु॑ऽक्षुं प्र यः॑ आ॒दि॒त्यः॑ अनृ॑ता मि॒नाति॑ अमि॑ता
धू॒रः॑ द॒य॒ते॑ वसू॑नि ॥ ४॥ इ॒यं इंद्रं॑ वरु॑णं अ॒ष्ट॒ मे॒ गीः॑ प्र आ॒व॒त् तो॒के
तन॑ये तूतु॒जाना सु॑ऽरत्ना॑सः दे॒व॒ऽवी॑तिं गमेम॒ यूयं पा॒त॒ स्व-
स्ति॒ऽभिः॑ सदा॑ नः॑ ॥ ५॥ ६॥

॥ ८५॥ पु॒नी॒षे वां॑ अरक्षसं॑ मनी॒षां सोमं॑ इंद्रा॑य वरु॑णाय जु-
ह्वत् घृ॒त॒ऽप्र॒तीकां॑ उ॒षस॑ं न दे॒वीं ता नः॑ यामन्॑ उरु॒ष्य॒तां अ॒भीके॑
॥ १॥ स्पर्धं॑ते वै ऊं॑ दे॒व॒ऽहू॒ये॑ अ॒च॒ येषु॑ ध्व॒जेषु॑ दि॒द्यवः॑ पत॑ंति यु॒वं
तान् इं॑द्रावरु॒णौ॒ अ॒मि॒चा॒न् ह॒तं परा॑चः शर्वा॑ वि॒षू॒चः॑ ॥ २॥ आ-
र्यः॑ चि॒त् हि स्व॒ऽय॒शसः॑ सदः॑ऽसु दे॒वीः इंद्रं॑ वरु॑णं दे॒वता॑ धुः॑° कृ-
ष्टीः॑ अ॒न्यः॑ धा॒र॒य॒ति॒ प्र॒ऽवि॒क्ताः॑ वृ॒चा॒णि॑ अ॒न्यः॑ अ॒प्र॒तीनि॑ हं॒ति॒
॥ ३॥ सः॑ सु॒ऽक्रतुः॑ ऋ॒त॒ऽचि॒त् अ॒स्तु॒ होता॑ यः॑ आ॒दि॒त्या॒ श॒वसा
वां॑ नम॑स्वान् आ॒ऽव॒वर्त॑त् अव॑से वां ह॒विष्मा॑न् अस॑त् इत् सः
सु॒वि॒ताय॑ प्रय॑स्वान् ॥ ४॥ इ॒यं इंद्रं॑ वरु॑णं अ॒ष्ट॒ मे॒ गीः॑ प्र आ॒व॒त्
तो॒के तन॑ये तूतु॒जाना सु॑ऽरत्ना॑सः दे॒व॒ऽवी॑तिं गमेम॒ यूयं पा॒त॒
स्व॒स्ति॒ऽभिः॑ सदा॑ नः॑ ॥ ५॥ ७॥

॥ ८६॥ धीरा॑ तु अ॒स्य॒ म॒हि॒ना॒ ज॒नू॒ंषि॑ वि यः॑ त॒स्तंभ॑ रोद॑सी॑

चित् उर्वी प्र नाकं ऋष्वं नुनुदे बृहंतं ह्विता नक्षंचं पप्रथंत् च भूमं ॥१॥ उत स्वया तन्वा सं वदे तत् कदा नु अंतः वरुणे भुवानि किं मे हव्यं अहंणानः जुषेत कदा मृळीकं सुऽमनाः अभि ख्यं ॥२॥ पृच्छे तत् एनः वरुण दिदृक्षु उपो एमि चिकितुषः विऽपृच्छं समानं इत् मे कवयः चित् आहुः अयं ह तुभ्यं वरुणः हृणीते ॥३॥ किं आगः आस वरुण ज्येष्ठं यत् स्तोतारं जिघांससि सखायं प्र तत् मे वोचः दुःऽदभ स्वधाऽवः अव त्वा अनेनाः नमसा तुरः इयां ॥४॥ अव दुग्धानि पित्र्या सृज नः अव या वयं चकृम तनूभिः अव राजन् पशुऽतृपं न तायुं सृज वत्सं न दामनः वसिष्ठं ॥५॥ न सः स्वः दक्षः वरुण धृतिः सा सुरा मन्युः विऽभीदकः अचित्तिः अस्ति ज्यायान् कनीयसः उपऽअरे स्वप्नः चन इत् अनृतस्य प्रऽयोता ॥६॥ अरे दासः न मीळ्हुषे कराणि अहं देवाय भूर्णये अनागाः अचेतयत् अचितः देवः अर्यः गृत्सं राये कविऽतरः जुनाति ॥७॥ अयं सु तुभ्यं वरुण स्वधाऽवः हृदि स्तोमः उपऽश्रितः चित् अस्तु शं नः क्षेमे शं ऊं योगे नः अस्तु यूयं पात स्वस्तिऽभिः सदा नः ॥८॥८॥

॥८७॥ रदत् पथः वरुणः सूर्याय प्र अर्णांसि समुद्रियां नदीनां सर्गः न सृष्टः अर्वतीः ऋतऽयन् चकार महीः अवनीः अहऽभ्यः ॥१॥ आत्मा ते वातः रजः आ नवीनोत् पशुः न भूर्णिः यवसे सुऽसऽवान् अंतः महीं बृहतीं रोदसीं इमे विश्वा ते धाम वरुण प्रियाणि ॥२॥ परि स्पशः वरुणस्य स्मत्ऽइष्टाः उभे पश्यंति रोदसी सुऽमेकैः ऋतऽवानः कवयः यज्ञऽधीराः प्रऽचेतसः ये इषयंत मन्म ॥३॥ उवाच मे वरुणः मेधिराय त्रिः सप्त नाम अघ्न्या

विभर्ति विद्वान् पदस्य गुह्या न वोचत् युगाय विप्रः उपराय शिक्षन् ॥४॥ तिस्रः द्यावः निऽहिताः अंतः अस्मिन् तिस्रः भूमीः उपराः षट्ऽविधानाः गृत्सः राजा वरुणः चक्रे एतं दिवि प्रऽईखं हिरण्ययं शुभे कं॥५॥ अव सिंधुं वरुणः द्यौःऽइव स्यात् तृप्सः न श्वेतः मृगः तुविष्मान् गंभीरऽशंसः रजसः विऽमानः सुपारऽक्षेचः सतः अस्य राजा ॥६॥ यः मृळयाति चक्रुषे चित् आगः वयं स्याम वरुणे अनागाः अनु व्रतानि अदितेः ऋधंतः यूयं पात स्वस्तिऽभिः सदा नः ॥७॥९॥

॥८८॥ प्र शुंध्युवे वरुणाय प्रेष्ठां मतिं वसिष्ठ मीळ्हुषे भरस्व यःई अर्वाचे करते यजत्रं सहस्रऽमघं वृषणं बृहंतं॥१॥ अध नु अस्य सुऽदृशं जगन्वान् अग्नेः अनीकं वरुणस्य मंसि स्वः यत् अश्मन् अधिऽपाः ऊं अंधः अभि मा वपुः दृशये निनीयात् ॥२॥ आ यत् रुहाव वरुणः च नावं प्र यत् समुद्रं ईरयाव मध्यं अधि यत् अपां स्नुऽभिः चराव प्र प्रऽईखे ईखयावहै शुभे कं॥३॥ वसिष्ठं ह वरुणः नावि आ अधात् ऋषिं चकार सुऽअपाः महः-ऽभिः स्तोतारं विप्रः सुदिनऽत्वे अहां यात् नु द्यावः ततनन् यात् उषसः॥४॥ क्व त्यानि नौ सख्या बभूवुः सचावहे यत् अवृकं पुरा चित् बृहंतं मानं वरुण स्वधाऽवः सहस्रऽद्वारं जगम गृहं ते॥५॥ यः आपिः नित्यः वरुण प्रियः सन् त्वां आगांसि कृणवत् सखा ते मा ते एनस्वंतः यक्षिन् भुजेम यंधि स्म विप्रः स्तुवते वरूथं ॥६॥ ध्रुवासु त्वा आसु क्षितिषु क्षियंतः वि अस्मत् पाशं वरुणः मुमोचत् अवः वन्वानाः अदितेः उपऽस्यात् यूयं पात स्वस्तिऽभिः सदा नः ॥७॥१०॥

॥८९॥ मो सु वरुण मृत्ऽमयं गृहं राजन् अहं गमं मृळ सुऽक्षत्र मृळय ॥१॥ यत् एमि प्रस्फुरन्ऽईव दृतिः न ध्मातः अद्रिऽवः मृळ सुऽक्षत्र मृळय ॥२॥ ऋत्वः समह् दीनता प्रतिऽईपं जगम् शुचे मृळ सुऽक्षत्र मृळय ॥३॥ अपां मध्ये तस्थिऽवांसं तृष्णा अविदत् जरितारं मृळ सुऽक्षत्र मृळय ॥४॥ यत् किं च इदं वरुण दैव्ये जने अभिऽद्रोहं मनुष्याः चरामसि अचित्ती यत् तव धर्मा युयोपिम मा नः तस्मात् एनसः देव रिरिषः ॥५॥११॥५॥

॥९०॥ प्र वीरऽया शुचयः दद्रिरे वां अध्वर्युऽभिः मधुऽमंतः सुतासः वह वायो निऽयुतः याहि अच्छ पिब सुतस्य अंधसः मदाय ॥१॥ ईशानाय प्रऽहुतिं यः ते आनट् शुचिं सोमं शुचिऽपाः तुभ्यं वायो कृणोषि तं मर्त्येषु प्रऽशस्तं जातःऽजातः जायते वाजी अस्य ॥२॥ राये नु यं जज्ञतुः रोदसी इमे राये देवी धिषणा धाति देवं अध वायुं निऽयुतः सश्चत स्वाः उत श्वेतं वसुऽधितिं निऽरेके ॥३॥ उच्छन् उषसः सुऽदिनाः अरिप्राः उरु ज्योतिः विविदुः दीध्यानाः गव्यं चित् ऊर्वं उशिजः वि वव्रुः तेषां अनु प्रऽदिवः ससुः आपः ॥४॥ ते सत्येन मनसा दीध्यानाः स्वेन युक्तासः क्रतुना वहंति इंद्रवायू वीरऽवाहं रथं वां ईशानयोः अभि पृक्षः सचंते ॥५॥ ईशानासः ये दधते स्वः नः गोभिः अश्वेभिः वसुऽभिः हिरण्यैः इंद्रवायू सूरयः विश्वं आयुः अश्वंतऽभिः वीरिः पृतनासु सह्युः ॥६॥ अश्वंतः न श्रवसः भिक्षमाणाः इंद्रवायू सुस्तुतिऽभिः वसिष्ठाः वाजऽयंतः सु अवसे हुवेम यूयं पात स्वस्तिऽभिः सदा नः ॥७॥१२॥

॥९१॥ कुवित् अंग नमसा ये वृधासः पुरा देवाः अनवद्यासः आसन् ते वायवे मनवे बाधिताय अवासयन् उषसं सूर्येण ॥१॥ उशंता दूता न दभाय गोपा मासः च पाथः शरदः च पूर्वीः इंद्रवायू सुऽस्तुतिः वां इयाना माडींकं ईट्टे सुवितं च नव्यं ॥२॥ पीवःऽअन्नान् रयिऽवृधः सुऽमेधाः श्वेतः सिसक्ति निऽयुतां अभिऽश्रीः ते वायवे सऽमनसः वि तस्थुः विश्वा इत् नरः सुऽअपत्यानि चक्रुः ॥३॥ यावत् तरः तन्वः यावत् ओजः यावत् नरः चक्षसा दीध्यानाः शुचिं सोमं शुचिऽपा पातं अस्मे इंद्रवायू सदतं बर्हिः आ इदं ॥४॥ निऽयुवाना निऽयुतः स्याहऽवीराः इंद्रवायू सऽरथं यातं अर्वाक् इदं हि वां प्रऽभृतं मध्वः अग्रं अध प्रीणाना वि मुमुक्तं अस्मे ॥५॥ याः वां शतं निऽयुतः याः सहस्रं इंद्रवायू विश्वऽवाराः सचंते आ आभिः यातं सुऽविदत्राभिः अर्वाक् पातं नरा प्रतिऽभृतस्य मध्वः ॥६॥ अर्वंतः न श्रवसः भिक्षमाणाः इंद्रवायू सुस्तुतिऽभिः वसिष्ठाः वाजऽयंतः सु अवसे हुवेम यूयं पात स्वस्तिऽभिः सदा नः ॥७॥१३॥

॥९२॥ आ वायो भूष शुचिऽपाः उप नः सहस्रं ते निऽयुतः विश्वऽवार उपो ते अंधः मद्यं अयामि यस्य देव दधिषे पूर्वऽपेयं ॥१॥ प्र सोता जीरः अध्वरेषु अस्थात् सोमं इंद्राय वायवे पिबध्यै प्र यत् वां मध्वः अग्रियं भरंति अध्वर्यवः देवऽयंतः शचीभिः ॥२॥ प्र याभिः यासि दाश्वांसं अच्छ नियुत्ऽभिः वायो इष्टये दुरोणे नि नः रयिं सुऽभोजसं युवस्व नि वीरं गव्यं अश्व्यं च राधः ॥३॥ ये वायवे इंद्रऽमादनासः आऽदेवासः निऽतोशनासः अर्यः घंतः वृचाणि सूरिऽभिः स्याम ससऽहांसः युधा नृऽभिः अमि-

चान्॥४॥ आ नः नियुत्ऽभिः शतिनीभिः अध्वरं सहस्रिणीभिः उप याहि यज्ञं वायो अस्मिन्सवने मादयस्व यूयं पात स्वस्तिऽभिः सदा नः॥५॥१४॥

॥९३॥ शुचिं नु स्तोमं नवऽजातं अद्य इंद्राग्नी वृत्रऽहना जुषेथां उभा हि वां सुऽहवा जोहवीमि ता वाजं सद्यः उशते धेष्ठा ॥१॥ ता सानसी शवसाना हि भूतं साकंऽवृधा शवसा शूशुऽवांसा क्षयंतौ रायः यवसस्य भूरेः पृक्षं वाजस्य स्थविरस्य घृष्वेः॥२॥ उपो ह यत् विदथे वाजिनेः गुः धीभिः विप्राः प्रऽमतिं इच्छमानाः अवंतः न काष्ठां नक्षमाणाः इंद्राग्नी जोहुवतः नरः ते॥३॥ गीःऽभिः विप्रः प्रऽमतिं इच्छमानः ईट्टे रयिं यशसं पूर्वऽभाजं इंद्राग्नी वृत्रऽहना सुऽवज्रा प्र नः नव्येभिः तिरतं देष्णैः॥४॥ सं यत् महीं मिथतीं स्पर्धमाने तनूऽरुचा शूरऽसाता यतेते अदेवऽयुं विदथे देवयुऽभिः सचा हतं सोमऽसुता जनेन॥५॥१५॥ इमां ऊं सु सोमऽसुतिं उप नः आ इंद्राग्नी सौमनसाय यातं नु चित् हि परिऽमम्नाथे अस्मान् आ वां शश्वत्ऽभिः ववृतीय वाजैः॥६॥ सः अग्ने एना नमसा संऽइद्धः अच्छ मित्रं वरुणं इंद्रं वोचेः यत् सीं आगः चकृम तत् सु मृळ तत् अर्यमा अदितिः शिश्रथंतु॥७॥ एताः अग्ने आशुषाणासः इष्टीः युवोः सचा अभि अश्याम वाजान् मा इंद्रः नः विष्णुः मरुतः परि ख्यन् यूयं पात स्वस्तिऽभिः सदा नः॥८॥१६॥

॥९४॥ इयं वां अस्य मन्मनः इंद्राग्नी पूर्व्यऽस्तुतिः अभात् वृष्टिःऽइव अजनि॥१॥ शृणुतं जरितुः हवं इंद्राग्नी वनतं गिरः

ईशाना पिप्यतं धियः॥२॥ मा पापऽत्वाय नः नरा इंद्राग्नी मा अभिऽशस्तये मा नः रीरधतं निदे॥३॥ इंद्रे अग्ना नमः बृहत् सुऽवृक्तिं आ ईरयामहे धिया धेनाः अवस्यवः॥४॥ ता हि शश्वंतः ईळते इत्था विप्रासः ऊतये सऽबाधः वाजऽसातये॥५॥ ता वां गीःऽभिः विपन्यवः प्रयस्वंतः हवामहे मेधऽसाता सनिष्यवः॥६॥१७॥ इंद्राग्नी अवसा आ गतं अस्मभ्यं चर्षणिऽसहा मा नः दुःऽशंसः ईशत॥७॥ मा कस्य नः अरुरुषः धूर्तिः प्र नक् मर्त्यस्य इंद्राग्नी शर्म यच्छतं॥८॥ गोऽमत् हिरण्यऽवत् वसु यत् वां अश्वऽवत् ईमहे इंद्राग्नी तत् वनेमहि॥९॥ यत् सोमे आ सुते नरः इंद्राग्नी अजोहवुः सप्तिऽवंता सपर्यवः॥१०॥ उक्थेभिः वृचहन्ऽतमा या मंदाना चित् आ गिरा आंगूषैः आऽविवासतः॥११॥ तौ इत् दुःऽशंसं मर्त्यं दुःऽविद्वांसं रक्षस्विनं आऽभोगं हन्मना हतं उदऽधिं हन्मना हतं॥१२॥१८॥

॥९५॥ प्र क्षोदसा धायसा सस्र एषा सरस्वती धरुणं आयसी पूः प्रऽबाबधाना रथ्याऽइव याति विश्वाः अपः महिना सिंधुः अन्याः॥१॥ एका अचेतत् सरस्वती नदीनां शुचिः यती गिरिऽभ्यः आ समुद्रात् रायः चेतंती भुवनस्य भूरेः घृतं पयः दुदुहे नाहुषाय॥२॥ सः ववृधे नर्यः योषणासु वृषा शिप्रुः वृषभः यज्ञियासु सः वाजिनं मघवत्ऽभ्यः दधाति वि सातये तन्वं ममृजीत॥३॥ उत स्या नः सरस्वती जुषाणा उप श्रवत् सुऽभगा यज्ञे अस्मिन् मितज्ञुऽभिः नमस्यैः इयाना राया युजा चित् उत्ऽतरा सखिऽभ्यः॥४॥ इमा जुह्वानाः युष्मत् आ नमःऽभिः प्रति स्तोमं सरस्वति जुषस्व तव शर्मन् प्रियऽतमे दधानाः उप स्येयाम

शरणं न वृक्षं॥५॥ अयं ऊं ते सरस्वति वसिष्ठः द्वारौ ऋतस्य सुऽभगे वि आवः० वर्धं सुभ्रे स्तुवते रासि वाजान् यूयं पात स्वस्तिऽभिः सदा नः॥६॥१९॥

॥९६॥ बृहत् ऊं गायिषे वचः असुर्यां नदीनां सरस्वतीं इत् महय सुवृक्तिऽभिः स्तोमैः वसिष्ठ रोदसी॥१॥ उभे यत् ते महिना सुभ्रे अंधसी अधिऽक्षियंति पूरवः सा नः बोधि अविची मरुत्ऽसखा चोद राधः मघोनां॥२॥ भद्रं इत् भद्रा कृणवत् सरस्वती अकवऽअरी चेतति वाजिनीऽवती गृणाना जमदग्निऽवत् स्तुवाना च वसिष्ठऽवत्॥३॥ जनिऽयंतः नु अग्नयः पुचिऽयंतः सुऽदानवः सरस्वंतं हवामहे॥४॥ ये ते सरस्वः ऊर्मयः मधुऽमंतः घृतऽश्चुतः तेभिः नः अविता भव॥५॥ पीपिऽवांसं सरस्वतः स्तनं यः विश्वऽदर्शतः भक्षीमहि प्रऽजां इषं॥६॥२०॥

॥९७॥ यज्ञे दिवः नृऽसदने पृथिव्याः नरः यत्र देवऽयवः मदंति इंद्राय यत्र सवनानि सुन्वे गमत् मदाय प्रथमं वयः च॥१॥ आ दैव्या वृणीमहे अवांसि बृहस्पतिः नः महे आ सखायः यथा भवेम मीळ्हुषे अनागाः यः नः दाता पराऽवतः पिताऽइव॥२॥ तं ऊं ज्येष्ठं नमसा हविःऽभिः सुऽशेवं ब्रह्मणः पतिं गृणीषे इंद्रं श्लोकः महि दैव्यः सिसक्तु यः ब्रह्मणः देवऽकृतस्य राजा॥३॥ सः आ नः योनिं सदतु प्रेष्ठः बृहस्पतिः विश्वऽवारः यः अस्ति कामः रायः सुऽवीर्यस्य तं दात् पर्षत् नः अति सश्चतः अरिष्टान्॥४॥ तं आ नः अर्के अमृताय जुष्टं इमे धासुः अमृतां-

सः पुराऽजाः शुचिऽक्रंदं यजतं पस्त्यानां बृहस्पतिं अनर्वाणं हुवेम॥५॥२१॥ तं शग्मासः अरुषासः अश्वाः बृहस्पतिं सहऽवाहः वहंति सहः चित् यस्य नीळऽवत् सधऽस्थे नभः न रूपं अरुषं वसानाः ॥६॥ सः हि शुचिः शतऽपंचः सः शुंध्युः हिरण्यऽवाशीः इषिरः स्वःऽसाः बृहस्पतिः सः सुऽआवेशः ऋभ्वः पुरु सखिऽभ्यः आऽसुतिं करिष्ठः॥७॥ देवी देवस्य रोदसी जनित्री बृहस्पतिं ववृधतुः महिऽत्वा दक्षाय्याय दक्षत सखायः करत् ब्रह्मणे सुऽतरा सुऽगाधा ॥८॥ इयं वां ब्रह्मणः पते सुऽवृक्तिः ब्रह्म इंद्राय वज्रिणे अकारि अविष्टं धियः जिगृतं पुरंऽधीः जजस्तं अर्यः वनुषां अरातीः ॥९॥ बृहस्पते युवं इंद्रः च वस्वः दिव्यस्य ईशाथे उत पार्थिवस्य धत्तं रयिं स्तुवते कीरये चित् यूयं पात स्वस्तिऽभिः सदा नः ॥१०॥२२॥

॥९८॥ अध्वर्यवः अरुणं दुग्धं अंशुं जुहोतन वृषभाय क्षितीनां गौरात् वेदीयान् अवऽपानं इंद्रः विश्वाहा इत् याति सुतऽसोमं इच्छन् ॥१॥ यत् दधिषे प्रऽदिवि चारु अन्नं दिवेऽदिवे पीतिं इत् अस्य वक्षि उत हृदा उत मनसा जुषाणः उशन् इंद्र प्रऽस्थितान् पाहि सोमान् ॥२॥ जज्ञानः सोमं सहसे पपाथ प्र ते माता महिमानं उवाच अ इंद्र पप्रथ उरु अंतरिक्षं युधा देवेभ्यः वरिवः चकर्थ ॥३॥ यत् योधयाः महतः मन्यमानान् साक्षाम तान् बाहुऽभिः शाशदानान् यत् वा नृऽभिः वृतः इंद्र अभिऽयुध्याः तं त्वया आजिं सौश्रवसं जयेम ॥४॥ प्र इंद्रस्य वोचं प्रथमा कृतानि प्र नूतना मघऽवा या चकार यदा इत् अदेवीः असहिष्ट मायाः अथ अभवत् केवलः सोमः अस्य ॥५॥ तव इदं विश्वं अ-

भितः पशव्यँ यत् पश्यसि चक्षसा सूर्यस्य गवाँ असि गोऽपतिः एकः इंद्र भक्षीमहि ते प्रऽयंतस्य वस्वः॥६॥ बृहस्पते युवं इंद्रः च वस्वः दिव्यस्य ईशाथे उत पार्थिवस्य धत्तं रयिं स्तुवते कीरये चित् यूयं पात स्वस्तिऽभिः सदा नः॥७॥२३॥

॥९९॥ परः मायया तन्वा वृधानः न ते महिऽत्वं अनु अश्नुवंति उभे ते विद्म रजसी पृथिव्याः विष्णो देव त्वं परमस्य वित्से॥१॥ न ते विष्णो जायमानः न जातः देव महिम्नः परं अंतं आप उत् अस्तभ्नाः नाकं ऋष्वं बृहंतं दाधर्थ प्राचीं ककुभं पृथिव्याः॥२॥ इराऽवती धेनुऽमती हि भूतं सुऽयवसिनी मनुषे दशस्या वि अस्तभ्नाः रोदसी विष्णो एते दाधर्थ पृथिवीं अभितः मयूखैः॥३॥ उरुं यज्ञाय चक्रथुः उ लोकं जनयंता सूर्यं उषसं अग्निं दासस्य चित् वृषऽशिप्रस्य मायाः जघ्नथुः नरा पृतनाज्येषु॥४॥ इंद्राविष्णू दृंहिताः शंबरस्य नव पुरः नवतिं च श्नथिष्टं शतं वर्चिनः सहस्रं च साकं हथः अप्रति असुरस्य वीरान्॥५॥ इयं मनीषा बृहती बृहंता उरुऽक्रमा नवसा वर्धयंती रे वां स्तोमं विदथेषु विष्णो पिन्वंतं इषः वृजनेषु इंद्र॥६॥ वषट् ते विष्णो आसः आ कृणोमि तत् मे जुषस्व शिपिऽविष्ट हव्यं वर्धंतु त्वा सुऽस्तुतयः गिरः मे यूयं पात स्वस्तिऽभिः सदा नः॥७॥२४॥

॥१००॥ नु मर्तः दयते सनिष्यन् यः विष्णवे उरुऽगायाय दाशत् प्र यः सचाचा मनसा यजाते एतावंतं नर्यं आऽविवासात्॥१॥ त्वं विष्णो सुऽमतिं विश्वऽजन्यां अप्रऽयुतां एवऽयावः

मतिं दाः पचैः यथा नः सुवितस्य भूरेः अश्वऽवतः पुरुऽचंद्रस्य रायः ॥२॥ चिः देवः पृथिवीं एषः एतां वि चक्रमे शतऽअर्चसं महिऽत्वा प्र विष्णुः अस्तु तवसः तवीयान् त्वेषं हि अस्य स्थविरस्य नाम ॥३॥ वि चक्रमे पृथिवीं एषः एतां क्षेत्राय विष्णुः मनुषे दशस्यन् ध्रुवासः अस्य कीरयः जनासः उरुऽक्षितिं सुऽजनिमा चकार ॥४॥ प्र तत् ते अद्य शिपिऽविष्ट नाम अर्यः शंसामि वयुनानि विद्वान् तं त्वा गृणामि तवसं अतव्यान् क्षयंतं अस्य रजसः पराके ॥५॥ किं इत् ते विष्णो परिऽचक्ष्यं भूत् प्र यत् ववक्षे शिपिऽविष्टः अस्मि मा वर्पः अस्मत् अप गूहः एतत् यत् अन्यऽरूपः समऽइथे बभूथ ॥६॥ वषट् ते विष्णो आसः आ कृणोमि तत् मे जुषस्व शिपिऽविष्ट हव्यं वर्धंतु त्वा सुऽस्तुतयः गिरः मे यूयं पात स्वस्तिऽभिः सदा नः ॥७॥२५॥६॥

॥ १०१ ॥ तिस्रः वाचः प्र वद ज्योतिःऽअग्राः याः एतत् दुहे मधुऽदोघं ऊधः सः वत्सं कृण्वन् गर्भं ओषधीनां सद्यः जातः वृषभः रोरवीति ॥१॥ यः वर्धनः ओषधीनां यः अपां यः विश्वस्य जगतः देवः ईशे सः चिऽधातु शरणं शर्म यंसत् चिऽवर्तुं ज्योतिः सुऽअभिष्टि अस्मे ॥२॥ स्तरीः ऊं त्वत् भवंति सूते ऊं त्वत् यथाऽवशं तन्वं चक्रे एषः पितुः पयः प्रति गृभ्णाति माता तेन पिता वर्धते तेन पुत्रः ॥३॥ यस्मिन् विश्वानि भुवनानि तस्थुः तिस्रः द्यावः चेधा ससुः आपः चयः कोशासः उपऽसेचनासः मध्वः श्योतंति अभितः विऽरप्शं ॥४॥ इदं वचः पर्जन्याय स्वऽराजे हृदः अस्तु अंतरं तत् जुजोषत् मयःऽभुवः वृष्टयः संतु अस्मे सुऽपिप्पलाः ओषधीः देवऽगोपाः ॥५॥ सः रेतःऽधाः वृषभः अश्व-

तीनां तस्मिन् आत्मा जगतः तस्थुषः च तत् मा ऋतं पातु शत-ऽशारदाय यूयं पात स्वस्तिऽभिः सदा नः॥६॥१॥

॥१०२॥ पर्जन्याय प्र गायत दिवः पुचाय मीळ्हुषे सः नः यवसं इच्छतु॥१॥ यः गर्भं ओषधीनां गवां कृणोति अर्वतां पर्जन्यः पुरुषीणां॥२॥ तस्मै इत् आस्ये हविः जुहोत मधुमत्ऽतमं इळां नः सऽयतं करत्॥३॥२॥

॥१०३॥ संवत्सरं शशयानाः ब्राह्मणाः व्रतऽचारिणः वाचं पर्जन्यऽजिन्वितां प्र मंडूकाः अवादिषुः॥१॥ दिव्याः आपः अभि यत् एनं आयन् हतिं न शुष्कं सरसी शयानं गवां अह न मायुः वत्सिनीनां मंडूकानां वग्गुः अत्र सं एति॥२॥ यत् ई एनान् उशतः अभि अवर्षीत् तृष्णाऽवतः प्रावृषि आऽगतायां अख्खलीकृत्य पितरं न पुचः अन्यः अन्यं उप वदंतं एति॥३॥ अन्यः अन्यं अनु गृभ्णाति एनोः अपां प्रऽसर्गे यत् अमंदिषातां मंडूकः यत् अभिऽवृष्टः कनिस्कन् पृश्निः सऽपुंक्के हरितेन वाचं॥४॥ यत् एषां अन्यः अन्यस्य वाचं शाक्तस्यऽइव वदति शिक्षमाणः सर्वं तत् एषां समृधाऽइव पर्व यत् सुऽवाचः वदथन अधि अप्ऽसु॥५॥३॥ गोऽमायुः एकः अजऽमायुः एकः पृश्निः एकः हरितः एकः एषां समानं नाम बिभ्रतः विऽरूपाः पुरुऽचा वाचं पिपिश्युः वदंतः॥६॥ ब्राह्मणासः अतिऽरात्रे न सोमे सरः न पूर्णं अभितः वदंतः संवत्सरस्य तत् अहः परि स्थ यत् मंडूकाः प्रावृषीणं बभूव॥७॥ ब्राह्मणासः सोमिनः वाचं अक्रत ब्रह्म कृण्वंतः परिवत्सरीणं अध्वर्यवः घर्मिणः सिस्विदानाः आविः भवंति गुह्याः न के

चित्॥८॥ देवऽहितिं जुगुपुः द्वादशस्यं ऋतुं नरः न प्र मिनंति एते संवत्सरे प्रावृषि आऽगतायां तप्ताः घर्माः अप्नुवते विऽसर्गे॥९॥ गोऽमायुः अदात् अजऽमायुः अदात् पृश्निः अदात् हरितः नः वसूनि गवां मंडूकाः ददतः शतानि सहस्रऽसावे प्र तिरंते आयुः॥१०॥४॥

॥१०४॥ इंद्रासोमा तपतं रक्षः उब्जतं नि अर्पयतं वृषणा तमःऽवृधः परा शृणीतं अचितः नि ओषतं हतं नुदेथां नि शिशीतं अचिर्णः॥१॥ इंद्रासोमा सं अघऽशंसं अभि अघं तपुः ययस्तु चरुः अग्निवान्ऽइव ब्रह्मऽद्विषे क्रव्यऽअदे घोरऽचक्षसे द्वेषः धत्तं अनवायं किमीदिने॥२॥ इंद्रासोमा दुःऽकृतः ववे अंतः अनारंभणे तमसि प्र विध्यतं यथा न अतः पुनः एकः चन उत्ऽअयत् तत् वां अस्तु सहसे मन्युऽमत् शवः॥३॥ इंद्रासोमा वर्तयतं दिवः वधं सं पृथिव्याः अघऽशंसाय तर्हणं उत् तक्षतं स्वर्यं पर्वतेभ्यः येन रक्षः ववृधानं निऽजूर्वथः॥४॥ इंद्रासोमा वर्तयतं दिवः परि अग्निऽतप्तेभिः युवं अश्मऽहन्मऽभिः तपुःऽवधेभिः अजरेभिः अचिर्णः नि पर्शाने विध्यतं यंतु निऽस्वरं॥५॥५॥ इंद्रासोमा परि वां भूतु विश्वतः इयं मतिः कक्ष्या अश्वाऽइव वाजिना यां वां होचाँ परिऽहिनोमि मेधया इमा ब्रह्माणि नृपतीऽइव० जिन्वतं॥६॥ प्रति स्मरेथां तुजयंतऽभिः एवैः हतं दुहः रक्षसः भंगुरऽवंतः इंद्रासोमा दुःऽकृते मा सुऽगं भूत् यः नः कदा चित् अभिऽदासति दुहा॥७॥ यः मा पाकेन मनसा चरंतं अभिऽचष्टे अनृतेभिः वचःऽभिः आपःऽइव काशिना संऽगृभीताः असन् अस्तु असतः इंद्र वक्ता॥८॥ ये पाकऽशंसं विऽहरंते एवैः ये वा भद्रं दूषयंति

स्वधाभिः अर्हये वा तान् प्रऽददातु सोमः आ वा दधातु निःऽऋतेः उपऽस्थे ॥९॥ यः नः रसं दिप्सति पित्वः अग्ने यः अश्वानां यः गवां यः तनूनां रिपुः स्तेनः स्तेयऽकृत् द्रुभं एतु नि सः हीयतां तन्वा तनां च ॥१०॥६॥ परः सः अस्तु तन्वा तनां च तिस्रः पृथिवीः अधः अस्तु विश्वाः प्रति मुच्यतु यशः अस्य देवाः यः नः दिवा दिप्सति यः च नक्तं ॥११॥ सुऽविज्ञानं चिकितुषे जनाय सत् च असत् च वचसी पस्पृधाते तयोः यत् सत्यं यतरत् ऋजीयः तत् इत् सोमः अवति हंति असत् ॥१२॥ न वै ऊं सोमः वृजिनं हिनोति न क्षत्रियं मिथुया धारयंतं हंति रक्षः हंति असत् वदंतं उभौ इंद्रस्य प्रऽसितौ शयाते ॥१३॥ यदि वा अहं अनृतऽदेवः आस मोघं वा देवान् अपिऽऊहे अग्ने किं अस्मभ्यं जातऽवेदः हृणीषे द्रोघऽवाचः ते निःऽऋथं सचंतां ॥१४॥ अद्य मुरीय यदि यातुऽधानः अस्मि यदि वा आयुः ततप पुरुषस्य अध सः वीरैः दशभिः वि यूयाः यः मा मोघं यातुऽधान इति आह ॥१५॥७॥ यः मा अयातुं यातुऽधान इति आह यः वा रक्षाः शुचिः अस्मि इति आह इंद्रः तं हंतु महता वधेन विश्वस्य जंतोः अधमः पदीष्ट ॥१६॥ प्र या जिगाति खर्गलाऽइव नक्तं अप दुहा तन्वं गूहमाना वव्रान् अनंतान् अव सा पदीष्ट यावाणः घ्नंतु रक्षसः उपऽब्दैः ॥१७॥ वि तिष्ठध्वं मरुतः विक्षु इच्छत गृभायत रक्षसः सं पिनष्टन वयः ये भूत्वी पतयंति नक्तऽभिः ये वा रिपः दधिरे देवे अध्वरे ॥१८॥ प्र वर्तय दिवः अश्मानं इंद्र सोमऽशितं मघऽवन् सं शिशाधि प्राक्तात् अपाक्तात् अधरात् उदक्तात् अभि जहि रक्षसः पर्वतेन ॥१९॥ एते ऊं त्ये पतयंति श्वऽयातवः इंद्रं दिप्संति दिप्सवः अदाभ्यं शिशीते शक्रः पिप्रुनेभ्यः वधं नूनं

सृजत् अशनिं यातुमत्ऽभ्यः ॥२०॥८॥ इंद्रः यातूनां अभवत् पराऽशरः हविःऽमथीनां अभि आऽविवासतां अभि इत् ऊं शक्रः परशुः यथा वनं पाताऽइव भिंदन् सतः एति रक्षसः॥२१॥ उलूकऽयातुं शुशुलूकऽयातुं जहि श्वऽयातुं उत कोकऽयातुं सुपर्णऽयातुं उत गृध्रऽयातुं दृषदाऽइव प्र मृण रक्षः इंद्र॥२२॥ मा नः रक्षः अभि नद् यातुऽमावतां अप उच्छतु मिथुना या किमीदिना पृथिवी नः पार्थिवात् पातु अंहसः अंतरिक्षं दिव्यात् पातु अस्मान्॥२३॥ इंद्र जहि पुमांसं यातुऽधानं उत स्त्रियं मायया शाशदानां विऽमीवासः मूरऽदेवाः चृदंतु मा ते दृशन् सूर्यं उत्ऽचरंतं॥२४॥ प्रति चक्ष्व वि चक्ष्व इंद्रः च सोम जागृतं रक्षःऽभ्यः वधं अस्यतं अशनिं यातुमत्ऽभ्यः॥२५॥९॥६॥७॥

॥ इति सप्तमं मंडलं समाप्तं ॥

॥१॥ मा चित् अन्यत् वि शंसत सखायः मा रिषण्यत इंद्रं इत् स्तोत वृषणं सचा सुते मुहुः उक्था च शंसत॥१॥ अवऽक्रक्षिणं वृषभं यथा अजुरं गां न चर्षणिऽसहं विऽडेषणं संऽवनेना उभयंऽकरं महिष्ठं उभयाविनं॥२॥ यत् चित् हि त्वा जनाः इमे नाना हवंते ऊतये अस्माकं ब्रह्म इदं इंद्र भूतु ते अहा विश्वा च वर्धनं॥३॥ वि तर्तूर्यंते मघऽवन् विपःऽचितः अर्यः विपः जनानां उप क्रमस्व पुरुऽरूपं आ भर वाजं नेदिष्ठं ऊतये॥४॥ महे चन त्वां अद्रिऽवः परा शुल्काय देयां न सहस्राय न अयुताय वज्रिऽवः न शताय शतऽमघ॥५॥१०॥ वस्यान् इंद्र असि मे पितुः उत भ्रातुः अभुंजतः माता च मे छदयथः समा वसोः वसुऽत्वनाय रा-

धंसे॥६॥ क्व इयथ क्व इत् असि पुरुऽचा चित् हि ते मनः अलर्षि युध्म खजऽकृत् पुरंऽदर प्र गायचाः अगासिषुः॥७॥ प्र अस्मै गायचं अर्चत ववातुः यः पुरंऽदरः याभिः काखस्य उप बर्हिः आऽसदं यासत् वज्री भिनत् पुरः॥८॥ येते संति दृशऽग्विनः शतिनः ये सहस्रिणः अश्वासः येते वृषणः रघुऽद्रुवः तेभिः नः तूयं आ गहि॥९॥ आ तु अद्य सवःऽदुघां हुवे गायचऽवैपसं इंद्रं धेनुं सुऽदुघां अन्यां इषं उरुऽधारां अरंऽकृतं॥१०॥११॥ यत् तुदत् सूरः एतशं वंकू वातस्य पर्णिना वहत् कुत्सं आर्जुनेयं शतऽक्रतुः त्सरत् गंधर्वं अस्तृतं॥११॥ यः ऋते चित् अभिऽश्रिषः पुरा जचुऽभ्यः आऽतृदः संऽधाता संऽधिं मघऽवा पुरुऽवसुः इष्कर्ता विऽहुतं पुनः॥१२॥ माभूम निष्ट्याःऽइव इंद्र त्वत् अरणाःऽइव वनानि न प्रऽजहितानि अद्रिऽवः दुरोषासः अमन्महि॥१३॥ अमंन्महि इत् अनाशवः अनुयासः च वृचऽहन् सकृत् सु ते महना पूर राधसा अनु स्तोमं मुदीमहि॥१४॥ यदि स्तोमं मम श्रवत् अस्माकं इंद्रं इंदवः तिरः पविं चं ससृऽवांसः आशवः मंदंतु तुग्यऽवृधः॥१५॥१२॥ आ तु अद्य सधऽस्तुतिं ववातुः सख्युः आ गहि उपंऽस्तुतिः मघोनां प्र त्वा अवतु अधं ते वश्मि सुऽस्तुतिं॥१६॥ सोतं हि सोमं अद्रिऽभिः आ ईं एनं अप्ऽसु धावत गव्या वस्त्राऽइव वासयंतः इत् नरः निः धुक्षन् वक्षणाभ्यः॥१७॥ अधं जमः अधं वा दिवः बृहतः रोचनात् अधि अया वर्धस्व तन्वा गिरा मम आ जाता सुऽक्रतो॰ पृण॥१८॥ इंद्राय सु मदिन्ऽतमं सोमं सोत वरेण्यं शक्रः एनं पीपयत् विश्वया धिया हिन्वानं न वाजऽयुं॥१९॥ मा त्वा सोमस्य गल्दया सदा याचन् अहं गिरा भूर्णिं मृगं न सवनेषु चुक्रुधं कः ईशानं न याचिषत्॥२०॥१३॥ मदेन

इषितं मदे उयं उग्रेण शवसा विश्वेषां तरुतारं मदऽच्युतं मदे हि स्म ददाति नः॥२१॥ शेवरि वार्यो पुरु देवः मर्ताय दाशुषे सः सुन्वते च स्तुवते च रासते विश्वऽगूर्तः अरिऽस्तुतः॥२२॥ आ इंद्र याहि मत्स्व चिचेण देव राधसा सरः न प्रासि उदरं सपीतिऽभिः आ सोमेभिः उरु स्फिरं॥२३॥ आ त्वा सहस्रं आ शतं युक्ताः रथे हिरण्यये ब्रह्मऽयुजः हरयः इंद्र केशिनः वहंतु सोमऽपीतये॥२४॥ आ त्वा रथे हिरण्यये हरी मयूरऽशेप्या शितिऽपृष्ठा वहतां मध्वः अंधसः विवक्षणस्य पीतये॥२५॥१४॥ पिब तु अस्य गिर्वणः सुतस्य पूर्वपाःऽइव परिऽकृतस्य रसिनः इयं आऽसुतिः चारुः मदाय पत्यते॥२६॥ यः एकः अस्ति दंसना महान् उग्रः अभि व्रतैः गमत् सः शिप्री न सः योषत् आ गमत् हवं न परि वर्जति॥२७॥ त्वं पुरं चरिष्णवे वधैः शुष्णस्य सं पिणक् त्वं भाः अनु चरः अध द्विता यत् इंद्र हव्यः भुवः॥२८॥ मम त्वा सूरे उत ऽइते मम मध्यंदिने दिवः मम प्रऽपित्वे अपिऽशर्वरे वसो आ स्तोमासः अवृत्सत॥२९॥ स्तुहि स्तुहि इत् एते घ ते मंहिष्ठासः मघोनां निंदितऽअश्वः प्रऽपथी परमऽज्याः मघस्य मेध्यऽअतिथे॥३०॥१५॥ आ यत् अश्वान् वनंन्ऽवतः श्रद्धया अहं रथे रुहं उत वामस्य वसुनः चिकेतति यः अस्ति याद्वः पशुः॥३१॥ यः ऋजा मह्यं ममहे सह त्वचा हिरण्यया एषः विश्वानि अभि अस्तु सौभगा आऽसंगस्य स्वनत्ऽरथः॥३२॥ अध श्रायोगिः अति दासत् अन्यान् आऽसंगः अग्रे दशऽभिः सहस्रैः अध उक्षणः दश मह्यं रुशंतः नळाःऽइव सरसः निः अतिष्ठन्॥३३॥ अनु अस्य स्थूरं दृहशे पुरस्तात् अनस्यः ऊरुः अवऽरंबमाणः शश्वती नारी अभिऽचक्ष्य आह सुऽभद्रं अर्य भोजनं बिभर्षि॥३४॥१६॥

॥२॥ इ॒दं व॒सो॑ सु॒तं अंधः पिब सु ऽपू॑र्णं उ॒दरं॑ अना॑भयिन् र॒रि॒म ते॒ ॥१॥ नृ ऽभिः धू॒तः सु॒तः अश्वैः॑ अ॒ज्यः वारैः॑ परि ऽपू॑तः अ॒श्वः न नि॒क्तः न॒दीषु॑ ॥२॥ तं ते॒ यवं॑ यथा॑ गोभिः स्वा॒दुं अ॒कर्म॒ श्री॒णंतः इंद्र॑ त्वा॒ अ॒स्मिन् स॒धऽमादे॑ ॥३॥ इंद्रः इत् सो॒म ऽपाः एकः इंद्रः॑ सु॒त ऽपाः वि॒श्व ऽआ॑युः अं॒तः दे॒वान् मर्त्या॑न् च ॥४॥ न यं शु॒क्रः न दुः ऽआ॑शीः न तृ॒प्राः उ॒रु ऽव्य॑चसं अ॒प ऽस्पृ॑ख॒ते सु ऽहार्दे॑ ॥५॥१७॥ गोभिः यत् ई॒ अ॒न्ये अ॒स्मत् मृगं॑ न व्राः मृ॒गयं॑ते अ॒भि ऽअ॒सरं॑ति धे॒नु ऽभिः ॥६॥ चयः॑ इंद्र॑स्य सोमाः॑ सु॒तासः॑ संतु दे॒वस्य॑ स्वे क्षये॑ सु॒त ऽपा॑वन्वः ॥७॥ चयः॑ कोशा॑सः श्वो॒तं॒ति॒ ति॒स्रः च॒म्वः॑ सु ऽपू॑र्णाः स॒मा॒ने अधि॑ भा॒र्मन्॑ ॥८॥ शु॒चिः॑ अ॒सि॒ पु॒रु॒नि॒ः ऽस्थाः॑ क्षी॒रिः॑ म॒ध्य॒तः॑ आ ऽशी॑र्तः दु॒ग्धा मं॑दि॒ष्ठः॑ मू॒र॒स्य ॥९॥ इ॒मे ते॒ इंद्र॑ सोमाः॑ ती॒व्राः॑ अ॒स्मे॑ सु॒तासः॑ शु॒क्राः॑ आ ऽशि॑रं॑ या॒चं॒ते॒ ॥१०॥१८॥ तान् आ ऽशि॑रं॑ पुरो॒ळाश॑ं इंद्र॑ इ॒मं सोमं॑ श्री॒णी॒हि॒ रे॒वंतं॑ हि त्वा॒ शृ॒णो॒मि॒ ॥११॥ ह॒त ऽसु पी॒तासः॑ युध्यं॑ते दुः ऽम॒दासः॑ न सु॒रायां॑ ऊ॒र्धः न न॒भ्राः॑ ज॒र॒ंते॒ ॥१२॥ रे॒वान् इत् रे॒वतः॑ स्तो॒ता स्यात् त्वा॒ ऽव॑तः म॒घोनः॑ प्र इत् ऊं॑ ह॒रि॒ ऽवः॒ श्रुत॑स्य ॥१३॥ उ॒क्थं च॒न श॒स्यमा॑नं अ॒गोः॑ अ॒रिः॑ आ चि॒के॒त॒ न गा॒यत्रं॑ गी॒यमा॑नं ॥१४॥ मा नः॑ इंद्र पीयत्नवे॑ मा शर्धं॑ते परा॑ दाः शिक्ष॑ श॒चीऽव॒ः शचीं॑भिः ॥१५॥१९॥ व॒यं ऊं॑ त्वा त॒दित् ऽअ॑र्याः इंद्र॑ त्वा ऽउ॒यं॑तः सखा॑यः क॒ण्वाः॑ उ॒क्थेभिः॑ ज॒र॒ंते॒ ॥१६॥ न घ॒ ई॒ अ॒न्यत् आ प॑पन॒ वज्रि॑न् अ॒पसः॑ नवि॑ष्टौ तव॑ इत् ऊं॑ स्तो॒मं॑ चिके॒त॒ ॥१७॥ इ॒च्छंति॑ दे॒वाः सु॒ऽन्वंतं॑ न स्वप्नाय॑ स्पृहयं॑ति॒ यंति॑ प्र ऽमा॒दं॑ अतं॑द्राः ॥१८॥ ओ॑ सु प्र या॒हि॒ वाजे॑भिः मा ह॒णी॒याः॒ अ॒भि अ॒स्मान् म॒हान् ऽइ॑व युवं॑ऽजा॒निः॑ ॥१९॥ मो॑ सु अ॒द्य दुः ऽह॒नाऽवान् सा॒यं क॒रत् आ॒रे अ॒स्मत् अ॒-

श्रीरःऽइव जामाता॥२०॥२०॥ विश्म हि अस्य वीरस्य भूरिऽदावरीं सुऽमतिं चिषु जातस्य मनाँसि॥२१॥ आ तु सिंच कखंऽमंतं न घ विश्म शवसानात् यशःऽतरं शतंऽऊतेः॥२२॥ ज्येष्ठेन सोतः इंद्राय सोमँ वीराय शक्राय भरं पिबन् नर्याय॥२३॥ यः वेदिष्ठः अव्यथिषु अश्वऽवंतं जरितृऽभ्यः वाजँ स्तोतृऽभ्यः गोऽमंतं॥२४॥ पन्यँऽपन्यं इत् सोतारः आ धावत मद्याय सोमँ वीराय शूराय॥२५॥२१॥ पाता वृचऽहा सुतं आ घ गमत् न आरे अस्मत् नि यमते शतंऽऊतिः॥२६॥ आ इह हरी ब्रह्मऽयुजा शग्मा वक्षतः सखायं गीःऽभिः श्रुतं गिर्वणसं॥२७॥ स्वादवः सोमाः आ याहि श्रीताः सोमाः आ याहि शिप्रिन् ऋषिऽवः शचीऽवः न अयं अच्छ सधऽमादँ॥२८॥ स्तुतः च याः त्वा वर्धंति महे राधसे नृम्णाय इंद्र कारिणं वृधंतः॥२९॥ गिरः च याः ते गिर्वाहः उक्था च तुभ्यं तानि सचा दधिरे शवाँसि॥३०॥२२॥ एव इत् एषः तुविऽकूर्मिः वाजान् एकः वज्रऽहस्तः सनात् अमृक्तः दयते॥३१॥ हंता वृचं दक्षिणेन इंद्रः पुरु पुरुऽहूतः महान् महीभिः शचीभिः॥३२॥ यस्मिन् विश्वाः चर्षणयः उत च्यौत्ना जयाँसि च अनु घ इत् मंदी मघोनः॥३३॥ एषः एतानि चकार इंद्रः विश्वा यः अति शृण्वे वाजऽदावा मघोनां॥३४॥ प्रऽभर्ता रथं गव्यंतं अपाकात् चित् यं अवंति इनः वसु सः हि वोळ्हा॥३५॥२३॥ सनिता विप्रः अर्वंतऽभिः हंता वृचं नृऽभिः शूरः सत्यः अविता विधंतं॥३६॥ यजध्व एनं प्रियऽमेधाः इंद्रं सचाचा मनसा यः भूत् सोमैः सत्यऽमद्वा॥३७॥ गाथऽश्रवसं सत्ऽपतिं श्रवःऽकामं पुरुऽत्मानं कखासः गात वाजिनं॥३८॥ यः ऋते चित् गाः पदेभ्यः दात् सखा नृऽभ्यः शचीऽवान् ये अस्मिन् कामं अश्रियन्॥३९॥ इत्था

धीऽवँतं अद्रिऽवः काण्वं मेध्यंऽअतिथिं मेषः भूतः अभि यन् अयः॥४०॥ शिक्षं विऽभिंदो॰ अस्मै चत्वारिं अयुता ददत् अष्ट परः सहस्रा॥४१॥ उत सु त्ये॑ पयःऽवृधा माकी॑ रणस्य नप्त्या जनिऽत्वनाय ममहे॥४२॥२४॥

॥३॥ पिब सुतस्य रसिनः मत्स्व नः इंद्र गोऽमतः आपिः नः बोधि सधऽमाद्यः वृधे अस्मान् अवंतु ते धियः॥१॥ भूयाम ते सुऽमतौ वाजिनः वयं मा नः स्तः अभिऽमातये अस्मान् चित्राभिः अवताद् अभिष्टिऽभिः आ नः सुम्नेषु यमय॥२॥ इमाः ऊं त्वा पुरुऽवसो॰ गिरः वर्धंतु याः मम पावकऽवर्णाः शुचयः विपःऽचितः अभि स्तोमैः अनूषत॥३॥ अयं सहस्रं ऋषिऽभिः सहःऽकृतः समुद्रःऽइव पप्रथे सत्यः सः अस्य महिमा गृणे शवः यज्ञेषु विप्रऽराज्ये॥४॥ इंद्रं इत् देवऽतातये इंद्रं प्रऽयति अध्वरे इंद्रं संऽईके वनिनः हवामहे इंद्रं धनस्य सातये॥५॥२५॥ इंद्रः महा रोदसी पप्रथत् शवः इंद्रः सूर्यं अरोचयत् इंद्रं ह विश्वा भुवनानि येमिरे इंद्रं सुवानासः इंदवः॥६॥ अभि त्वा पूर्वऽपीतये इंद्र स्तोमेभिः आयवः संऽईचीनासः ऋभवः सं अस्वरन् रुद्राः गृणंत पूर्व्यं॥७॥ अस्य इत् इंद्रः ववृधे वृष्ण्यं शवः मदे सुतस्य विष्णवि अद्य तं अस्य महिमानं आयवः अनु स्तुवंति पूर्वऽथा॥८॥ तत् त्वा यामि सुऽवीर्यं तत् ब्रह्म पूर्वऽचित्तये येन यतिऽभ्यः भृगवे धनं हितं येन प्रस्कण्वं आविथ॥९॥ येन समुद्रं असृजः महीः अपः तत् इंद्र वृष्णि ते शवः सद्यः सः अस्य महिमा न संऽनशे यं क्षोणीः अनुऽचक्रदे॥१०॥२६॥ शग्धि नः इंद्र यत् त्वा रयिं यामि सुऽवीर्यं शग्धि वाजाय प्रथमं सिसासते शग्धि स्तोमाय पूर्व्य॥११॥ शग्धि

नः अस्य यत् हु पौरं आविंथ धियः इंद्र सिसासतः शग्धि यथा रुशमं श्यावकं कृपं इंद्र प्र आवः स्वः ऽनरं ॥१२॥ कत् नव्यः अतसीनां तुरः गृणीत मर्त्यः नहि नु अस्य महिमानं इंद्रियं स्वः गृणंतः आनशुः ॥१३॥ कत् ऊं स्तुवंतः ऋतऽयंत देवता ऋषिः कः विप्रः ओहते कदा हवं मघऽवन् इंद्र सुन्वतः कत् ऊं स्तुवतः आ गमः ॥१४॥ उत् ऊं त्ये मधुमत्ऽतमाः गिरः स्तोमासः ईरते सचाऽजितः धनऽसाः अक्षितऽऊतयः वाजऽयंतः रथाःऽइव ॥१५॥२७॥ कण्वाःऽइव भृगवः सूर्याःऽइव विश्वे इत् धीतं आनशुः इंद्रं स्तोमेभिः महयंतः आयवः प्रियऽमेधासः अस्वरन् ॥१६॥ युक्ष्व हि वृचहन्ऽतम हरी इंद्र पराऽवतः अर्वाचीनः मघऽवन् सोमऽपीतये उग्रः ऋष्वेभिः आ गहि ॥१७॥ इमे हि ते कारवः वावशुः धिया विप्रासः मेधऽसातये सः त्वं नः मघऽवन् इंद्र गिर्वणः वेनः न शृणुधि हवं ॥१८॥ निः इंद्र बृहतीभ्यः वृचं धनुऽभ्यः अस्फुरः निः अर्बुदस्य मृगयस्य मायिनः निः पर्वतस्य गाः आजः ॥१९॥ निः अग्नयः रुरुचुः निः ऊं सूर्यः निः सोमः इंद्रियः रसः निः अंतरिक्षात् अधमः महां अहिं कृषे तत् इंद्र पौंस्यं ॥२०॥२८॥ यं मे दुः इंद्रः मरुतः पाकऽस्थामा कौरयाणः विश्वेषां त्मना शोभिष्ठं उपऽइव दिवि धावमानं ॥२१॥ रोहितं मे पाकऽस्थामा सुऽधुरं कक्ष्यऽप्रां अदात् रायः विऽबोधनं ॥२२॥ यस्मै अन्ये दश प्रति धुरं वहंति वह्नयः अस्तं वयः न तुग्र्यं ॥२३॥ आत्मा पितुः तनूः वासः ओजःऽदाः अभिऽअंजनं तुरीयं इत् रोहितस्य पाकऽस्थामानं भोजं दातारं अब्रवं ॥२४॥२९॥

॥४॥ यत् इंद्र प्राक् अपाक् उदक् न्यक् वा हूयसे नृऽभिः सिमं

पुरु नृऽसूतः असि आनवे असि प्रऽशर्ध तुर्वशे ॥१॥ यत् वा रुमे रुशमे श्यावके कृपे इंद्र मादयसे सचा कण्वासः त्वा ब्रह्मऽभिः स्तोमऽवाहसः इंद्र आ यच्छंति आ गहि ॥२॥ यथा गौरः अपा कृतं तृष्यन् एति अव इरिणं आऽपित्वे नः प्रऽपित्वे तूयं आ गहि कण्वेषु सु सचा पिब ॥३॥ मंदंतु त्वा मघऽवन् इंद्र इंदवः राधःऽदेयाय सुन्वते आऽमुष्य सोमं अपिबः चमू सुतं ज्येष्ठं तत् दधिषे सहः ॥४॥ प्र चक्रे सहसा सहः बभंज मन्युं ओजसा विश्वे ते इंद्र पृतनाऽयवः यहो नि वृक्षाःऽईव येमिरे ॥५॥३०॥ सहस्रेणऽइव सचते यविऽयुधा यः ते आनट् उपऽस्तुतिं पुरं प्रावर्ग कृणुते सुऽवीर्यं दाश्नोति नमऽउक्तिऽभिः ॥६॥ मा भेम मा श्रमिष्म उग्रस्य सख्ये तव महत् ते वृष्णः अभिऽचक्ष्यं कृतं पश्येम तुर्वशं यदुं ॥७॥ सव्यां अनु स्फिग्यं ववसे वृषा न दानः अस्य रोषति मध्या संऽपृक्षाः सारघेण धेनवः तूयं आ इहि द्रव पिब ॥८॥ अश्वी रथी सुऽरूपः इत् गोऽमान् इत् इंद्र ते सखा श्वात्रऽभाजा वयसा सचते सदा चंद्रः याति सभां उप ॥९॥ ऋश्यः न तृष्यन् अवऽपानं आ गहि पिब सोमं वशान् अनु निऽमेघमानः मघऽवन् दिवेऽदिवे ओजिष्ठं दधिषे सहः ॥१०॥३१॥ अध्वर्यो द्रवय त्वं सोमं इंद्रः पिपासति उप नूनं युयुजे वृषणा हरी आ च जगाम वृत्रऽहा ॥११॥ स्वयं चित् सः मन्यते दाशुरिः जनः यत् च सोमस्य तृंपसि इदं ते अन्नं युज्यं संऽउक्षितं तस्य आ इहि प्र द्रव पिब ॥१२॥ रथेऽस्थाय अध्वर्यवः सोमं इंद्राय सोतन अधि ब्रध्नस्य अदयः वि चक्षते सुन्वंतः दाशुऽअध्वरं ॥१३॥ उप ब्रध्नं ववाता वृषणा हरी इंद्रं अपऽसु वक्षतः अर्वाचं त्वा सप्तयः अध्वरऽश्रियः वहंतु सवना इत् उप ॥१४॥ प्र पूषणं वृणीमहे युज्याय पुरुऽवसुं सः शक्र शिक्ष

पुरुऽहूत नः धिया तुजे राये विऽमोचन ॥१५॥३२॥ सं नः शिशीहि भुरिजोःऽइव क्षुरं रास्व रायः विऽमोचन त्वे तत् नः सुऽवेदे उस्रियं वसु यं त्वं हिनोषि मर्त्यं ॥१६॥ वेमि त्वा पूषन् ऋंजसे वेमि स्तोतवे आघृणे न तस्य वेमि अरणं हि तत् वसो स्तुषे पज्राय साम्ने ॥१७॥ परा गावः यवसं कत् चित् आघृणे नित्यं रेक्णः अमर्त्य अस्माकं पूषन् अविता शिवः भव मंहिष्ठः वाजऽसातये ॥१८॥ स्थूरं राधः शतऽअश्वं कुरुंगस्य दिविष्टिषु राज्ञः त्वेषस्य सुऽभगस्य रातिषु तुर्वशेषु अमन्महि ॥१९॥ धीभिः सातानि काण्वस्य वाजिनः प्रियऽमेधैः अभिद्युऽभिः षष्टिं सहस्रा अनु निःऽमजां अजे निः यूथानि गवां ऋषिः ॥२०॥ वृक्षाः चित् मे अभिऽपित्वे अररणुः गां भजंत मेहना अश्वं भजंत मेहना ॥२१॥३३॥७॥

॥५॥ दूरात् इहऽइव यत् सती अरुणऽप्सुः अशिश्वितत् वि भानुं विष्वधा अतनत् ॥१॥ नृऽवत् दस्रा मनःऽयुजा रथेन पृथुऽपाजसा सचेथे अश्विना उषसं ॥२॥ युवाभ्यां वाजिनीऽवसू० प्रति स्तोमाः अहृक्षत वाचं दूतः यथा ओहिषे ॥३॥ पुरुऽप्रिया नः ऊतये पुरुऽमंद्रा पुरुऽवसू० स्तुषे कण्वासः अश्विना ॥४॥ मंहिष्ठा वाजऽसातमा इषयंता शुभः पती गंतारा दाशुषः गृहं ॥५॥१॥ ता सुऽदेवाय दाशुषे सुऽमेधां अविंऽतारिणीं घृतैः गव्यूतिं उक्षतं ॥६॥ आ नः स्तोमं उप द्रवत् तूयं श्येनेभिः आशुऽभिः यातं अश्वेभिः अश्विना ॥७॥ येभिः तिस्रः पराऽवतः दिवः विश्वानि रोचना चीन् अक्तून् परिऽदीयथः ॥८॥ उत नः गोऽमतीः इषः उत सातीः अहःऽविदा वि पथः सातये सितं ॥९॥

आ नः गोऽमँतं अश्विना सुऽवीरँसुऽरथँ रयिं वोळ्हं अश्वऽवतीः इषः ॥१०॥२॥ ववृधाना शुभः पती दस्रा हिरण्यऽवर्तनी० पिबंतं सोम्यं मधु ॥११॥ अस्मभ्यँ वाजिनीऽवसू० मघवत्ऽभ्यः च सऽप्रथः छर्दिः यंतं अदाभ्यं ॥१२॥ नि सु ब्रह्म जनानां या अविष्टं तूयँ आ गतं मो सु अन्यान् उप अरतं ॥१३॥ अस्य पिबतं अश्विना युवं मदस्य चारुणः मध्वः रातस्य धिष्ण्या ॥१४॥ अस्मे आ वहतं रयिं शतऽवँतं सहस्रिणँ पुरुऽक्षुं विश्वऽधायसं ॥१५॥३॥ पुरुऽचा चित् हि वां नरा विऽह्वयँते मनीषिणः वाघत्ऽभिः अश्विना आ गतं ॥१६॥ जनासः वृक्तऽबर्हिषः हविष्मँतः अरंऽकृतः युवां हवंते अश्विना ॥१७॥ अस्माकँ अद्य वां अयं स्तोमः वाहिष्ठः अंतमः युवाभ्यां भूतु अश्विना ॥१८॥ यः ह वां मधुनः दतिः आऽहितः रथऽचर्षणे ततः पिबतं अश्विना ॥१९॥ तेन नः वाजिनीऽवसू० पश्वे तोकाय शं गवे वहंतं पीवरीः इषः ॥२०॥४॥ उत नः दिव्याः इषः उत सिंधून् अहःऽविदा अप द्वाराऽइव वर्षथः ॥२१॥ कदा वां तौग्र्यः विधत् समुद्रे जहितः नरा यत् वां रथः विऽभिः पतात् ॥२२॥ युवं कण्वाय नासत्या अपिऽरिप्राय हर्म्ये शश्वत् ऊतीः दशस्यथः ॥२३॥ ताभिः आ यातं ऊतिऽभिः नव्यसीभिः सुशस्तिऽभिः यत् वां वृषण्ऽवसू० हुवे ॥२४॥ यथा चित् कण्वँ आवंतं प्रियऽमेधं उपऽस्तुतं अत्रिं शिंजारँ अश्विना ॥२५॥५॥ यथा उत कृत्व्यें धनें अंशुं गोषु अगस्त्यँ यथा वाजेषु सोभरिं ॥२६॥ एतावंत् वां वृषण्ऽवसू० अतः वा भूयः अश्विना गृणंतः सुम्नं ईमहे ॥२७॥ रथँ हिरण्यऽवंधुरं हिरण्यऽअभीशुं अश्विना आ हि स्थाथः दिविऽस्पृशँ ॥२८॥ हिरण्ययीं वां रभिः ईषा अक्षः हिरण्ययः उभा चक्रा हिरण्यया ॥२९॥ तेन नः वाजिनी-

ऽवसू परा ऽवतः चित् आ गतं उप इमां सु ऽस्तुतिं मम ॥३०॥६॥ आ वहेथे परा कात् पूर्वीः अश्नंतौ अश्विना इषः दासीः अमर्त्या ॥३१॥ आ नः द्युभिः आ श्रवः ऽभिः आ राया यातं अश्विना पुरु- ऽचंद्रा नासत्या ॥३२॥ आ इह वां प्रुषितऽप्सवः वयः वहंतु पर्णिनः अच्छ सु ऽअध्वरं जनं ॥३३॥ रथं वां अनु ऽगायसं यः इषा वर्तते सह न चक्रं अभि बाधते ॥३४॥ हिरण्ययेन रथेन द्रुवत्पा- णिऽभिः अश्वैः धी ऽजवना नासत्या ॥३५॥७॥ युवं मृगं जागृ- ऽवांसं स्वदथः वा वृषण ऽवसू॰ ता नः पृक्षं इषा रयिं ॥३६॥ ता मे अश्विना सनीनां विद्यातं नवानां यथा चित् चैद्यः कप्रुः शतं उष्ट्रानां ददत् सहस्रा दश गोनां ॥३७॥ यः मे हिरण्य ऽसंदृशः दश राज्ञः अमंहत अधः ऽपदाः इत् चैद्यस्य कृष्टयः चर्म ऽम्नाः अभितः जनाः ॥३८॥ माकिः एना पथा गात् येन इमे यंति चेदयः अन्यः न इत् सूरिः ओहते भूरिदावत्ऽतरः जनः ॥३९॥८॥१॥

॥ ६ ॥ महान् इंद्रः यः ओजसा पर्जन्यः वृष्टिमान् ऽइव स्तोमैः वत्सस्य ववृधे ॥१॥ प्र ऽजां ऋतस्य पिप्रतः प्र यत् भरंत वह्नयः विप्राः ऋतस्य वाहसा ॥२॥ कण्वाः इंद्रं यत् अक्रत स्तोमैः यज्ञस्य साधनं जामि ब्रुवते आयुधं ॥३॥ सं अस्य मन्यवे विशः विश्वाः नमंत कृष्टयः समुद्रायऽइव सिंधवः ॥४॥ ओजः तत् अस्य तित्विषे उभे यत् सं ऽअवर्तयत् इंद्रः चर्मऽइव रोदसी ॥५॥९॥ वि चित् वृचस्य दोधतः वज्रेण शतऽपर्वणा शिरः बिभेद वृष्णिना ॥६॥ इमाः अभि प्र नोनुमः विपां अयेषु धीतयः अग्नेः शोचिः न दिद्युतः ॥७॥ गुहा सतीः उप त्मना प्र यत् शोचंत धीतयः कण्वाः ऋतस्य धारया ॥८॥ प्र तं इंद्र नशीमहि रयिं गोऽमंतं अश्विनं प्र ब्रह्म पूर्व-

ऽचित्तये ॥ ९ ॥ अहं इत् हि पितुः परि मेधां ऋतस्य जग्रभ अहं सूर्यः ऽइव अजनि ॥ १० ॥ १० ॥ अहं प्रत्नेन मन्मना गिरः शुंभामि कण्वऽवत् येन इंद्रः शुष्मं इत् दधे ॥ ११ ॥ ये त्वां इंद्र न तुस्तुवुः ऋषयः ये च तुस्तुवुः मम इत् वर्धस्व सुऽस्तुतः ॥ १२ ॥ यत् अस्य मन्युः अध्वनीत् वि वृचं पर्वऽशः रुजन् अपः समुद्रं ऐरयत् ॥ १३ ॥ नि शुष्णे इंद्र धर्णसिं वज्रं जघंथ दस्यवि वृषा हि उग्र शृण्विषे ॥ १४ ॥ न द्यावः इंद्र ओजसा न अंतरिक्षाणि वज्रिणं न विव्यचंत भूमयः ॥ १५ ॥ ११ ॥ यः ते इंद्र महीः अपः स्तभुऽयमानः आ अशयत् नि तं पद्यासु शिश्नथः ॥ १६ ॥ यः इमे रोदसी मही सं ऽईचीं सं ऽअजयभीत् तमः ऽभिः इंद्र तं गुहः ॥ १७ ॥ ये इंद्र यतयः त्वा भृगवः ये च तुस्तुवुः मम इत् उग्र श्रुधि हवं ॥ १८ ॥ इमाः ते इंद्र पृश्नयः घृतं दुहते आऽशिरं एनां ऋतस्य पिप्युषीः ॥ १९ ॥ याः इंद्र प्रऽस्वः त्वा आसा गर्भं अचक्रिरन् परि धर्मऽइव सूर्यं ॥ २० ॥ १२ ॥ त्वां इत् शवसः पते कण्वाः उक्थेन ववृधुः त्वां सुतासः इंदवः ॥ २१ ॥ तवं इत् इंद्र प्रऽनीतिषु उत प्रऽशस्तिः अद्रिऽवः यज्ञः वितंतसाय्यः ॥ २२ ॥ आ नः इंद्र महीं इषं पुरं न दर्षि गोऽमतीं उत प्रऽजां सुऽवीर्यं ॥ २३ ॥ उत त्यत् आशुऽअश्वं यत् इंद्र नाहुषीषु आ अयं विक्षु प्रऽदीदयत् ॥ २४ ॥ अभि व्रजं न तत्निषे सूरः उपाकऽचक्षसं यत् इंद्र मृळयासि नः ॥ २५ ॥ १३ ॥ यत् अंग तविषीऽयसे इंद्र प्रऽराजसि क्षितीः महान् अपारः ओजसा ॥ २६ ॥ तं त्वा हविष्मतीः विशः उप ब्रुवते ऊतये उरुऽज्रयसं इंदुऽभिः ॥ २७ ॥ उपऽह्वरे गिरीणां संऽगथे च नदीनां धिया विप्रः अजायत ॥ २८ ॥ अतः समुद्रं उतऽवतः चिकित्वान् अव पश्यति यतः विपानः एजति ॥ २९ ॥ आत् इत् प्रत्नस्य रेतसः ज्योतिः पश्यंति वासरं परः

यत् इध्यते दिवा ॥३०॥१४॥ कण्वासः इंद्र ते मतिं विप्रे वर्धंति पौंस्यैं उतो शविष्ठ वृष्ण्यैं ॥३१॥ इमां मे इंद्र सुऽस्तुतिं जुषस्व प्र सु मां अव उत प्र वर्धय मतिं ॥३२॥ उत ब्रह्मण्या वयं तुभ्यैं प्रऽवृद्ध वज्रिऽवः विप्राः अतक्ष्म जीवसे ॥३३॥ अभि कण्वाः अनूषत अर्कैः न प्रऽवता यतीः इंद्रैं वनन्ऽवती मतिः ॥३४॥ इंद्रैं उक्थानि वावृधुः समुद्रंऽइव सिंधवः अनुत्तऽमन्युं अजरैं ॥३५॥१५॥ आ नः याहि पराऽवतः हरिंऽभ्यां हर्यताभ्यां इमं इंद्र सुतं पिब ॥३६॥ त्वां इत् वृत्रहन्ऽतम जनासः वृक्तऽबर्हिषः हवंते वाजंऽसातये ॥३७॥ अनु त्वा रोदसी उभे चक्रं न वर्ति एतशं अनु सुवानासः इंदवः ॥३८॥ मंदस्व सु स्वःऽनरे उत इंद्र शर्यणाऽवति मत्स्व विवस्वतः मती ॥३९॥ ववृधानः उप द्यवि वृषा वज्री अरोरवीत् वृत्रऽहा सोमऽपातमः ॥४०॥१६॥ ऋषिः हि पूर्वऽजाः असि एकः ईशानः ओजसा इंद्र चोष्कूयसे वसु ॥४१॥ अस्माकं त्वा सुतान् उप वीतऽपृष्ठाः अभि प्रयः शतं वहंतु हरयः ॥४२॥ इमां सु पूर्व्यां धियं मधोः घृतस्य पिप्युषीं कण्वाः उक्थेन ववृधुः ॥४३॥ इंद्रैं इत् विऽमहीनां मेधैं वृणीत मर्त्यः इंद्रैं सनिष्युः ऊतयैं ॥४४॥ अर्वाचैं त्वा पुरुऽस्तुत प्रियमेधऽस्तुता हरी सोमऽपेयाय वक्षतः ॥४५॥ शतं अहं तिरिंदिरे सहस्रैं पर्शौ आ ददे राधांसि याद्वानां ॥४६॥ चीणिं शतानि अर्वतां सहस्रा दश गोनां ददुः पज्रायं साम्नैं ॥४७॥ उत आनट् ककुहः दिवैं उष्ट्रान् चतुःऽयुजः ददत् अवसा याद्वैं जनैं ॥४८॥१७॥

॥७॥ प्र यत् वः चित्ऽस्तुभैं इषैं मरुतः विप्रः अक्षरत् वि पर्वतेषु राजथ ॥१॥ यत् अंग तविषीऽयवः यामैं शुभ्राः अचिध्वं नि पर्वं-

ताः अहासत॥२॥ उत् ईरयंत वायुऽभिः वाश्रासः पृश्निऽमातरः धुक्षंत पिप्युषीं इषं॥३॥ वपंति मरुतः मिहं प्र वेपयंति पर्वतान् यत् यामं यांति वायुऽभिः॥४॥ नि यत् यामाय वः गिरिः नि सिंधवः विऽधर्मणे महे शुष्माय येमिरे॥५॥१८॥ युष्मान् ऊं नक्तं ऊतये युष्मान् दिवा हवामहे युष्मान् प्रऽयति अध्वरे॥६॥ उत् ऊं त्ये अरुणऽप्सवः चिचाः यामेभिः ईरते वाश्राः अधि स्नुना दिवः॥७॥ सृजंति रश्मिं ओजसा पंथां सूर्याय यातवे ते भानुऽभिः वि तस्थिरे॥८॥ इमां मे मरुतः गिरं इमं स्तोमं ऋभुक्षणः इमं मे वनत हवं॥९॥ चीणि सरांसि पृश्नयः दुदुह्रे वज्रिणे मधु उत्सं कवंधं उद्रिणं॥१०॥१९॥ मरुतः यत् ह वः दिवः सुम्नऽयंतः हवामहे आ तु नः उप गंतन॥११॥ यूयं हि स्थ सुऽदानवः रुद्राः ऋभुक्षणः दमे उत प्रऽचेतसः मदे॥१२॥ आ नः रयिं मदऽच्युतं पुरुऽक्षुं विश्वऽधायसं इयर्त मरुतः दिवः॥१३॥ अधिऽइव यत् गिरीणां यामं शुभ्राः अचिध्वं सुवानैः मंदध्वे इंदुऽभिः॥१४॥ एतावंतः चित् एषां सुम्नं भिक्षेत मर्त्यः अदाभ्यस्य मन्मऽभिः॥१५॥२०॥ ये दृप्साःऽइव रोदसी धमंति अनु वृष्टिऽभिः उत्सं दुहंतः अक्षितं॥१६॥ उत् ऊं स्वानेभिःईरते उत् रथैः उत् ऊं वायुऽभिः उत् स्तोमैः पृश्निऽमातरः॥१७॥ येन आव तुर्वशं यदुं येन कण्वं धनऽस्पृतं राये सु तस्य धीमहि॥१८॥ इमाः ऊं वः सुऽदानवः घृतं न पिप्युषीः इषः वर्धान् काण्वस्य मन्मऽभिः॥१९॥ क्व नूनं सुऽदानवः मदथ वृक्तऽबर्हिषः ब्रह्मा कः वः सपर्यति॥२०॥२१॥ नहि स्म यत् ह वः पुरा स्तोमेभिः वृक्तऽबर्हिषः शर्धान् ऋतस्य जिन्वथ॥२१॥ सं ऊं त्ये महतीः अपः सं क्षोणी सं ऊं सूर्यं सं वज्रं पर्वऽशः दधुः॥२२॥ वि वृचं पर्वऽशः ययुः वि पर्व-

तान् अराजिनः चक्राणाः वृष्णि पौंस्यं ॥२३॥ अनु चितस्य युध्यतः पुष्मे आवन् उत क्रतुं अनु इंद्रं वृचऽतूर्यं॥२४॥ विद्युत्ऽहस्ताः अभिऽद्यवः शिप्राः शीर्षन् हिरण्ययीः सुभ्राः वि अंजत श्रिये॥२५॥२२॥ उशना यत् पराऽवतः उक्षणः रंध्रे अयातन द्यौः न चक्रदत् भिया॥२६॥ आ नः मखस्य दावने अश्वैः हिरण्यपाणिऽभिः देवासः उप गंतन॥२७॥ यत् एषां पृषतीः रथे प्रष्टिः वहंति रोहितः यांति सुभ्राः रिणन् अपः॥२८॥ सुऽसोमे शर्यणाऽवति आजीकेपस्त्यऽवति ययुः निऽचक्रया नरः॥२९॥ कदा गच्छाथ मरुतः इत्था विप्रं हवमानं माडीकेभिः नाधमानं॥३०॥२३॥ कत् ह नूनं कधऽप्रियः यत् इंद्रं अजहातन कः वः सखिऽत्वे ओहते॥३१॥ सहो सु नः वज्रंऽहस्तैः कण्वासः अग्निं मरुत्ऽभिः स्तुषे हिरण्यऽवाशीभिः॥३२॥ ओ सु वृष्णः प्रऽयज्यून् आ नव्यसे सुवितायं ववृत्यां चिचऽवांजान्॥३३॥ गिरयः चित् नि जिहते पर्शानासः मन्यमानाः पर्वताः चित् नि येमिरे॥३४॥ आ अक्षणऽयावानः वहंति अंतरिक्षेण पतंतः धातारः स्तुवते वयः॥३५॥ अग्निः हि जनिं पूर्व्यः छंदः न सूरः अर्चिषा ते भानुऽभिः वि तस्थिरे॥३६॥२४॥

॥८॥ आ नः विश्वाभिः ऊतिऽभिः अश्विना गच्छतं युवं दस्रा हिरण्यऽवर्तनी॰ पिबतं सोम्यं मधु॥१॥ आ नूनं यातं अश्विना रथेन सूर्यऽत्वचा भुजी हिरण्यऽपेशसा कवी गंभीरऽचेतसा॥२॥ आ यातं नहुषः परि आ अंतरिक्षात् सुवृक्तिऽभिः पिबाथः अश्विना मधु कण्वानां सवने सुतं॥३॥ आ नः यातं दिवः परि आ अंतरिक्षात् अधऽप्रिया पुचः कण्वस्य वां इह सुसाव सोम्यं

मधु॥४॥ आ नः यातं उपऽश्रुति अश्विना सोमऽपीतये स्वाहा स्तोमस्य वर्धना प्र कवी धीतिऽभिः नरा॥५॥२५॥ यत् चित् हि वां पुरा ऋषयः जुहूरे अवसे नरा आ यातं अश्विना आ गतं उप इमां सुऽस्तुतिं मम॥६॥ दिवः चित् रोचनात् अधि आ नः गंतं स्वःऽविदा धीभिः वत्सऽप्रचेतसा स्तोमेभिः हवनऽश्रुता॥७॥ किं अन्ये परि आसते अस्मत् स्तोमेभिः अश्विना पुचः कण्वस्य वां ऋषिः गीःऽभिः वत्सः अवीवृधत्॥८॥ आ वां विप्रः इह अवसे अहंत स्तोमेभिः अश्विना अरिप्रा वृचहन्ऽतमा ता नः भूतं मयःऽभुवा॥९॥ आ यत् वां योषणा रथे अतिष्ठत् वाजिनीऽवसू॰ विश्वानि अश्विना युवं प्र धीतानि अगच्छतं॥१०॥२६॥ अतः सहस्रऽनिर्निजा रथेन आ यातं अश्विना वत्सः वां मधुऽमत् वचः अशंसीत् काव्यः कविः॥११॥ पुरुऽमंद्रा पुरुऽवसू॰ मनोतरा रयीणां स्तोमैं मे अश्विनौ इमं अभि वहीं अनूषातां॥१२॥ आ नः विश्वानि अश्विना धत्तं राधांसि अह्रया कृतं नः ऋत्वियऽवतः मा नः रीरधतं निदे॥१३॥ यत् नासत्या पराऽवति यत् वा स्थः अधि अंबरे अतःसहस्रऽनिर्निजा रथेन आ यातं अश्विना॥१४॥ यः वां नासत्यौ ऋषिः गीःऽभिः वत्सः अवीवृधत् तस्मै सहस्रऽनिर्निजं इषं धत्तं घृतऽश्चुतं॥१५॥२७॥ प्र अस्मै ऊर्जं घृतऽश्चुतं अश्विना यच्छतं युवं यः वां सुम्नाय तुस्तवंत् वसुऽयात् दानुनः पती॥१६॥ आ नः गंतं रिशादसा इमं स्तोमं पुरुऽभुजा कृतं नः सुऽश्रियः नरा इमा दातं अभिष्टये॥१७॥ आ वां विश्वाभिः ऊतिऽभिः प्रियऽमेधाः अहूषत राजंतौ अध्वराणां अश्विना यामऽहूतिषु॥१८॥ आ नः गंतं मयःऽभुवा अश्विना शंऽभुवा युवं यः वां विपन्यू धीतिऽभिः गीःऽभिः वत्सः अवीवृधत्॥१९॥ याभिः

कण्वं मेधऽअतिथिं याभिः वशं दशऽव्रजं याभिः गोऽशर्यं आवतं ताभिः नः अवतं नरा ॥२०॥२८॥ याभिः नरा चसदस्युं आवतं कृत्व्यै धने ताभिः सु अस्मान् अश्विना प्र अवतं वाजेऽसातये ॥२१॥ प्र वां स्तोमाः सुऽवृक्तयः गिरः वर्धंतु अश्विना पुरुऽचा वृचंहन्ऽतमा ता नः भूतं पुरुऽस्पृहा ॥२२॥ चीणि पदानि अश्विनोः आविः संति गुहा परः कवी ऋतस्य पत्मंऽभिः अर्वाक् जीवेभ्यः परि ॥२३॥२९॥

॥९॥ आ नूनं अश्विना युवं वत्सस्य गंतं अवसे प्र अस्मै यच्छतं अवृकं पृथु छर्दिः युयुतं याः अरातयः ॥१॥ यत् अंतरिक्षे यत् दिवि यत् पंच मानुषान् अनु नृम्णं तत् धत्तं अश्विना ॥२॥ ये वां दंसांसि अश्विना विप्रासः परिऽममृश्युः एव इत् काण्वस्य बोधतं ॥३॥ अयं वां घर्मः अश्विना स्तोमेन परि सिच्यते अयं सोमः मधुऽमान् वाजिनीऽवसू० येन वृचं चिकेतथः ॥४॥ यत् अप्ऽसु यत् वनस्पतौ यत् ओषधीषु पुरुऽदंससा कृतं तेन मा अविष्टं अश्विना ॥५॥३०॥ यत् नासत्या भुरण्यथः यत् वा देवा भिषज्यथः अयं वां वत्सः मतिऽभिः न विंधते हविष्मंतं हि गच्छथः ॥६॥ आ नूनं अश्विनोः ऋषिः स्तोमं चिकेत वामया आ सोमं मधुमत्ऽतमं घर्मं सिंचात् अथर्वणि ॥७॥ आ नूनं रघुऽवर्तनिं रथं तिष्ठाथः अश्विना आ वां स्तोमाः इमे मम नभः न चुच्यवीरत ॥८॥ यत् अद्य वां नासत्या उक्थैः आऽचुच्युवीमहि यत् वा वाणीभिः अश्विना एव इत् काण्वस्य बोधतं ॥९॥ यत् वां कक्षीवान् उत यत् विऽअश्वः ऋषिः यत् वां दीर्घऽतमाः जुहाव पृथी यत् वां वैन्यः सदनेषु एव इत् अतः अश्विना चेतन-

येथां॥१०॥३१॥ यातं छर्दिःऽपौ उत नः परःऽपा भूतं जगत्ऽपौ उत नः तनूऽपा वर्तिः तोकाय तनयाय यातं॥११॥ यत् इंद्रेण स-ऽरथं याथः अश्विना यत् वा वायुना भवथः संऽओकसा यत् आदित्येभिः ऋभुऽभिः सऽजोषसा यत् वा विष्णोः विऽक्रमणेषु तिष्ठथः॥१२॥ यत् अद्य अश्विनौ अहं हुवेयं वाजेऽसातये यत् पृत्ऽसु तुर्वणे सहः तत् श्रेष्ठं अश्विनोः अवः॥१३॥ आ नूनं यातं अश्विना इमा हव्यानि वां हिता इमे सोमासः अधि तुर्वशे यदौ इमे करंभेषु वां अथ॥१४॥ यत् नासत्या पराके अर्वाके अस्ति भेष-जं तेन नूनं विऽमदाय प्रऽचेतसा छर्दिः वत्साय यच्छतं॥१५॥३२॥ अभुत्सि ऊं प्र देव्या साकं वाचा अहं अश्विनोः वि आवः देवि आ मतिं वि रातिं मर्त्येभ्यः॥१६॥ प्र बोधय उषः अश्विना प्र देवि सूनृते महि प्र यज्ञेऽहोतः आनुषक् प्र मदाय श्रवः बृहत्॥१७॥ यत् उषः यासि भानुना सं सूर्येण रोचसे आ ह अयं अश्विनोः रथः वर्तिः याति नृऽपाय्यं॥१८॥ यत् आऽपीतासः अंशवः गावः न दुह्रे ऊधऽभिः यत् वा वाणीः अनूषत प्र देवऽयंतः अश्विना ॥१९॥ प्र द्युम्नाय प्र शवसे प्र नृऽसह्याय शर्मणे प्र दक्षाय प्रऽचेत-सा॥२०॥ यत् नूनं धीभिः अश्विना पितुः योना निऽसीदथः यत् वा सुम्नेभिः उक्थ्या॥२१॥३३॥

॥१०॥ यत् स्थः दीर्घेऽप्रसद्मनि यत् वा अदः रोचने दिवः यत् वा समुद्रे अधि आऽकृते गृहे अतः आ यातं अश्विना॥१॥ यत् वा यज्ञं मनवे संऽमिमिक्षथुः एव इत् कण्वस्य बोधतं बृहस्पतिं विश्वान् देवान् अहं हुवे इंद्राविष्णू अश्विनौ आप्सुऽहेषसा॥२॥ त्या नु अश्विना हुवे सुऽदंससा गृभे कृता ययोः अस्ति प्र नः सख्यं

देवेषु अधि आप्यँ॥३॥ ययोः अधि प्र यज्ञाः असूरे संति सूरयः ता यज्ञस्य अध्वरस्य प्रऽचेतसा स्वधाभिः या पिबतः सोम्यं मधु ॥४॥ यत् अद्य अश्विनौ अपाक् यत् प्राक् स्थः वाजिनीऽवसू० यत् द्रुह्यवि अनवि तुर्वशे यदौ हुवे वां अध मा आ गतं॥५॥ यत् अंतरिक्षे पतथः पुरुऽभुजा यत् वा इमे रोदसी अनु यत् वा स्वधाभिः अधिऽतिष्ठथः रथं अतः आ यातं अश्विना ॥६॥३४॥

॥११॥ त्वं अग्ने व्रतऽपाः असि देवः आ मर्त्येषु आ त्वं यज्ञेषु ईड्यः॥१॥ त्वं असि प्रऽशस्यः विदथेषु सहंत्य अग्ने रथीः अध्वराणां॥२॥ सः त्वं अस्मत् अप द्विषः युयोधि जातऽवेदः अदेवीः अग्ने अरातीः॥३॥ अंति चित् संतं अह यज्ञं मर्तस्य रिपोः न उप वेषि जातऽवेदः॥४॥ मर्तोः अमर्त्यस्य ते भूरि नाम मनामहे विप्रासः जातऽवेदसः॥५॥३५॥ विप्रं विप्रासः अवसे देवं मर्तासः ऊतये अग्निं गीःऽभिः हवामहे॥६॥ आ ते वत्सः मनः यमत् परमात् चित् सधऽस्थात् अग्ने त्वांऽकामया गिरा॥७॥ पुरुऽचा हि सऽइट् असि विशः विश्वाः अनु प्रऽभुः समत्ऽसु त्वा हवामहे ॥८॥ समत्ऽसु अग्निं अवसे वाजऽयंतः हवामहे वाजेषु चित्रऽराधसं॥९॥ प्रत्नः हि कं ईड्यः अध्वरेषु सनात् च होता नव्यः च सत्सि स्वां च अग्ने तन्वं पिप्रयस्व अस्मभ्यं च सौभगं आ यजस्व ॥१०॥३६॥८॥५॥

॥१२॥ यः इंद्र सोमऽपातमः मदः शविष्ठ चेतति येन हंसि नि अत्रिणं तं ईमहे॥१॥ येन दशऽग्वं अध्रिऽगुं वेपयंतं स्वःऽनरं येन समुद्रं आविथ तं ईमहे॥२॥ येन सिंधुं महीः अपः रथान्ऽइव

प्रऽचोदयः पंथाँ ऋतस्य यानवे तं ईमहे॥३॥ इमं स्तोमँ अभिष्टये घृतं न पूतं अद्रिऽवः येन नु सद्यः ओजसा ववक्षिथ॥४॥ इमं जुषस्व गिर्वणः समुद्रःऽइव पिन्वते इंद्र विश्वाभिः ऊतिऽभिः ववक्षिथ॥५॥१॥ यः नः देवः पराऽवतः सखिऽत्वनाय ममहे दिवः न वृष्टिं प्रथयन् ववक्षिथ॥६॥ ववक्षुः अस्य केतवः उत वज्रः गभस्त्योः यत् सूर्यः न रोदसी अवर्धयत्॥७॥ यदि प्रऽवृद्ध सत्ऽपते सहस्रं महिषान् अघः आत् इत् ते इंद्रियं महि प्र ववृधे॥८॥ इंद्रः सूर्यस्य रश्मिऽभिः नि अर्शसानं ओषति अग्निः वनाऽइव ससहिः प्र ववृधे॥९॥ इयं ते ऋत्वियऽवती धीतिः एति नवीयसी सपर्यन्ती पुरुऽप्रिया मिमीते इत्॥१०॥२॥ गर्भः यज्ञस्य देवऽयुः ऋतुं पुनीते आनुषक् स्तोमैः इंद्रस्य ववृधे मिमीते इत्॥११॥ सनिः मित्रस्य पप्रथे इंद्रः सोमस्य पीतये प्राचीं वाशीऽइव सुन्वते मिमीते इत्॥१२॥ यं विप्राः उक्थऽवाहसः अभिऽप्रमंदुः आयवः घृतं न पिप्ये आसनि ऋतस्य यत्॥१३॥ उत स्वऽराजे अदितिः स्तोमं इंद्राय जीजनत् पुरुऽप्रशस्तं ऊतये ऋतस्य यत्॥१४॥ अभि वह्नयः ऊतये अनूषत प्रऽशस्तये न देव विऽव्रता हरी ऋतस्य यत्॥१५॥३॥ यत् सोमं इंद्र विष्णवि यत् वा घ त्रिते आप्त्ये यत् वा मरुत्ऽसु मंदसे सं इंदुऽभिः॥१६॥ यत् वा शक्र पराऽवति समुद्रे अधि मंदसे अस्माकं इत् सुते रण सं इंदुऽभिः॥१७॥ यत् वा असि सुन्वतः वृधः यजमानस्य सत्ऽपते उक्थे वा यस्य रण्यसि सं इंदुऽभिः॥१८॥ देवंऽदेवं वः अवसे इंद्रंऽइंद्रं गृणीषणि अध यज्ञाय तुर्वणे वि आनशुः॥१९॥ यज्ञेभिः यज्ञऽवाहसं सोमेभिः सोमऽपातमं होत्राभिः इंद्रं ववृधुः वि आनशुः॥२०॥४॥ महीः अस्य प्रऽनीतयः पूर्वीः उत प्रऽशस्तयः विश्वा

वसूनि दाष्षुषे वि आनषुः ॥२१॥ इंद्रं वृचाय हंतवे देवासः दधिरे पुरः इंद्रं वाणीः अनूषत सं ओजसे ॥२२॥ महांतं महिना वयं स्तोमेभिः हवनऽश्रुतं अर्कैः अभि प्र नोनुमः सं ओजसे ॥२३॥ न यं विविक्तः रोदसी न अंतरिक्षाणि वज्रिणं अमात् इत् अस्य तित्विषे सं ओजसः ॥२४॥ यत् इंद्र पृतनाज्ये देवाः त्वा दधिरे पुरः आत् इत् ते हर्यता हरी ववक्षतुः ॥२५॥५॥ यदा वृचं नदीऽवृतं शवसा वज्रिन् अवधीः आत् इत् ते हर्यता हरी ववक्षतुः ॥२६॥ यदा ते विष्णुः ओजसा चोणिं पदा विऽचक्रमे आत् इत् ते हर्यता हरी ववक्षतुः ॥२७॥ यदा ते हर्यता हरी ववृधाते दिवेऽदिवे आत् इत् ते विश्वा भुवनानि येमिरे ॥२८॥ यदा ते मारुतीः विशः तुभ्यं इंद्र निऽयेमिरे आत् इत् ते विश्वा भुवनानि येमिरे ॥२९॥ यदा सूर्यं अमुं दिवि शुक्रं ज्योतिः अधारयः आत् इत् ते विश्वा भुवनानि येमिरे ॥३०॥ इमां ते इंद्र सुऽस्तुतिं विप्रः इयर्ति धीतिऽभिः जामिं पदाऽइव पिप्रतीं प्र अध्वरे ॥३१॥ यत् अस्य धामनि प्रिये संऽईचीनासः अस्वरन् नाभा यज्ञस्य दोहना प्र अध्वरे ॥३२॥ सुऽवीर्यं सुऽअश्व्यं सुऽगव्यं इंद्र दधि नः होताऽइव पूर्वऽचित्तये प्र अध्वरे ॥३३॥६॥२॥

॥१३॥ इंद्रः सुतेषु सोमेषु क्रतुं पुनीते उक्थ्यं विदे वृधस्य दक्षसः महान् हि सः ॥१॥ सः प्रथमे विऽओमनि देवानां सदने वृधः सुऽपारः सुश्रवःऽतमः सं अप्सुऽजित् ॥२॥ तं अह्वे वाजऽसातये इंद्रं भराय शुष्मिणं भवं नः सुम्ने अंतमः सखा वृधे ॥३॥ इयं ते इंद्र गिर्वणः रातिः क्षरति सुन्वतः मंदानः अस्य बर्हिषः वि राजसि ॥४॥ नूनं तत् इंद्र दधि नः यत् त्वा सुन्वंतः ईमहे रयिं नः

चित्रं आ भर स्वः ऽविदे॥५॥७॥ स्तोता यत् ते विऽचर्षणिः अति-ऽप्रशर्धयत् गिरः वयाः ऽइव अनु रोहते जुषंत यत्॥६॥ प्रत्नऽवत् जनय गिरः शृणुधि जरितुः हवं मदेऽमदे ववक्षिथ सुऽकृत्वने ॥७॥ क्रीळंति अस्य सूनृताः आपः न प्रऽवता यतीः अया धिया यः उच्यते पतिः दिवः॥८॥ उतो पतिः यः उच्यते कृष्टीनां एकः इत् वशी नमःऽवृधैः अवस्युऽभिः सुते रण॥९॥ स्तुहि श्रुतं विपः-ऽचितं हरीं यस्य प्रऽसक्षिणा गंतारा दाशुषः गृहं नमस्विनः ॥१०॥८॥ तूतुजानः महेऽमते अश्वेभिः प्रुषितप्सुऽभिः आ याहि यज्ञं आशुऽभिः शं इत् हि ते॥११॥ इंद्र शविष्ठ सत्ऽपते रयिं गृ-णत्ऽसु धारय श्रवः सूरिऽभ्यः अमृतं वसुऽत्वनं॥१२॥ हवे त्वा सूरे उत्ऽइते हवे मध्यंदिने दिवः जुषाणः इंद्र सन्निऽभिः नः आ गहि॥१३॥ आ तु गहि प्र तु द्रव मत्स्व सुतस्य गोऽमतः तंतुं तनुष्व पूर्व्यं यथा विदे॥१४॥ यत् शक्र असि पराऽवति यत् अर्वाऽवति वृचऽहन् यत् वा समुद्रे अंधसः अविता इत् असि॥१५॥९॥ इंद्रं वर्धंतु नः गिरः इंद्रं सुतासः इंदवः इंद्रं हविष्मतीः विशः अरा-णिषुः॥१६॥ तं इत् विप्राः अवस्यवः प्रऽवत्वतीभिः ऊतिऽभिः इंद्रं क्षोणीः अवर्धयन् वयाः ऽइव ॥१७॥ चिऽकेतुकेषु चेतनं देवासः यज्ञं अत्नत तं इत् वर्धंतु नः गिरः सदाऽवृधं॥१८॥ स्तोता यत् ते अनुऽव्रतः उक्थानि ऋतुऽथा दधे शुचिः पावकः उच्यते सः अ-द्भुतः॥१९॥ तत् इत् रुद्रस्य चेतति यद्गं प्रत्नेषु धामऽसु मनः यच्च वि तत् दधुः विऽचेतसः॥२०॥१०॥ यदि मे सख्यं आऽवरः इमस्य पाहि अंधसः येन विश्वाः अति द्विषः अतारिम॥२१॥ कदा ते इंद्र गिर्वणः स्तोता भवाति शंऽतमः कदा नः गव्ये अश्वे वसौ दधः ॥२२॥ उत ते सुऽस्तुता हरीं वृषणा वहतः रथं अजुर्यस्य मदिन्-

ऽत्तमं यं ईमहे ॥२३॥ तं ईमहे पुरुऽस्तुतं यह्वं प्रत्नाभिः ऊतिऽभिः नि बर्हिषि प्रिये सदत् अध द्विता ॥२४॥ वर्धस्व सु पुरुऽस्तुत ऋषिऽस्तुताभिः ऊतिऽभिः धुक्षस्व पिप्युषीं इषं अव च नः ॥२५॥११॥ इंद्र त्वं अविता इत् असि इत्था स्तुवतः अद्रिऽवः ऋतात् इयर्मि ते धियं मनःऽयुजं ॥२६॥ इह त्या सधऽमाद्या युजानः सोमऽपीतये हरी इंद्र प्रतत्ऽवसू० अभि स्वर ॥२७॥ अभि स्वरंतु ये तव रुद्रासः सक्षत श्रियं उतो मरुत्वतीः विशः अभि प्रयः ॥२८॥ इमाः अस्य प्रऽतूर्तयः पदं जुषंत यत् दिवि नाभा यज्ञस्य संदधुः यथा विदे ॥२९॥ अयं दीर्घाय चक्षसे प्राचिं प्रऽयति अध्वरे मिमीते यज्ञं आनुषक् विऽचक्ष्य ॥३०॥१२॥ वृषा अयं इंद्र ते रथः उतो ते वृषणा हरी वृषा त्वं शतऽक्रतो० वृषा हवः ॥३१॥ वृषा ग्रावा वृषा मदः वृषा सोमः अयं सुतः वृषा यज्ञः यं इन्वसि वृषा हवः ॥३२॥ वृषा त्वा वृषणं हुवे वज्रिन् चित्राभिः ऊतिऽभिः ववंथ हि प्रतिऽस्तुतिं वृषा हवः ॥३३॥१३॥

॥१४॥ यत् इंद्र अहं यथा त्वं ईशीय वस्वः एकः इत् स्तोता मे गोऽसखा स्यात् ॥१॥ शिक्षेयं अस्मै दित्सेयं शचीऽपते मनीषिणे यत् अहं गोऽपतिः स्यां ॥२॥ धेनुः ते इंद्र सूनृता यजमानाय सुन्वते गां अश्वं पिप्युषीं दुहे ॥३॥ न ते वर्ता अस्ति राधसः इंद्र देवः न मर्त्यः यत् दित्ससि स्तुतः मघं ॥४॥ यज्ञः इंद्रं अवर्धयत् यत् भूमिं वि अवर्तयत् चक्राणः ओपशं दिवि ॥५॥१४॥ ववृधानस्य ते वयं विश्वा धनानि जिग्युषः ऊतिं इंद्र आ वृणीमहे ॥६॥ वि अंतरिक्षं अतिरत् मदे सोमस्य रोचना इंद्रः यत् अभिनत् वलं ॥७॥ उत् गाः आजत् अंगिरःऽभ्यः आविः कृण्वन् गुहा सतीः अर्वाचं नु-

नुदे वलं॥८॥ इंद्रेण रोचना दिवः दृळ्हानि दंहितानि च स्थिराणि न पराऽनुदे॥९॥ अपां ऊर्मिः मदन्ऽइव स्तोमः इंद्र अजिरऽयते वि ते मदाः अराजिषुः॥१०॥१५॥ त्वं हि स्तोमऽवर्धनः इंद्र असि उक्थऽवर्धनः स्तोतॄणां उत भद्रऽकृत्॥११॥ इंद्रं इत् केशिना हरी सोमऽपेयाय वक्षतः उप यज्ञं सुऽराधसं॥१२॥ अपां फेनेन नमुचेः शिरः इंद्र उत् अवर्तयः विश्वाः यत् अजयः स्पृधः॥१३॥ मायाभिः उत्ऽसिसृप्सतः इंद्र द्यां आऽरुरुक्षतः अव दस्यून् अधूनुथाः॥१४॥ असुन्वां इंद्र संऽसदं विषूचीं वि अनाशयः सोमऽपाः उत्ऽतरः भवन्॥१५॥१६॥

॥१५॥ तं ऊं अभि प्र गायत पुरुऽहूतं पुरुऽस्तुतं इंद्रं गीःऽभिः नविषं आ विवासत॥१॥ यस्य द्विऽबर्हसः बृहत् महः दाधारं रोदसी गिरीन् अज्रान् अपः स्वः वृषऽत्वना॥२॥ सः राजसि पुरुऽस्तुत एकः वृत्राणि जिघ्नसे इंद्र जैत्रा श्रवस्या च यंतवे॥३॥ तं ते मदं गृणीमसि वृषणं पृत्ऽसु सस्हिं ऊं लोकऽकृत्नुं अद्रिऽवः हरिऽश्रियं॥४॥ येन ज्योतींषि आयवे मनवे च विवेदिथ मंदानः अस्य बर्हिषः वि राजसि॥५॥१७॥ तत् अद्य चित् ते उक्थिनः अनु स्तुवंति पूर्वऽथा वृषऽपत्नीः अपः जय दिवेऽदिवे॥६॥ तव त्यत् इंद्रियं बृहत् तव शुष्मं उत क्रतुं वज्रं शिशाति धिषणा वरेण्यं॥७॥ तव द्यौः इंद्र पौंस्यं पृथिवी वर्धति श्रवः त्वां आपः पर्वतासः च हिन्विरे॥८॥ त्वां विष्णुः बृहन् क्षयः मित्रः गृणाति वरुणः त्वां शर्धः मदति अनु मारुतं॥९॥ त्वं वृषा जनानां मंहिष्ठः इंद्र जज्ञिषे सचा विश्वा सुऽअपत्यानि दधिषे॥१०॥१८॥ सचा त्वं पुरुऽस्तुत एकः वृत्राणि तोशसे न अन्यः इंद्रात् करणं

भूर्यः इन्वति॥११॥ यत् इंद्र मन्मऽशः त्वा नानां हवंते ऊतये अस्माकेभिः नृऽभिः अत्र स्वः जय॥१२॥ अरं क्षयाय नः महे विश्वा रूपाणि आऽविशन् इंद्रं जैत्राय हर्षय शची३ऽपतिं॥१३॥१९॥

॥१६॥ प्र संऽराजे चर्षणीनां इंद्रं स्तोत नव्यं गीःऽभिः नरं नृऽसहं मंहिष्ठं॥१॥ यस्मिन् उक्थानि रण्यंति विश्वानि च श्रवस्या अपां अवः न समुद्रे॥२॥ तं सुऽस्तुत्या आ विवासे ज्येष्ठऽराजं भरे कृत्नुं महः वाजिनं सनिऽभ्यः॥३॥ यस्य अनूनाः गभीराः मदाः उरवः तरुत्राः हर्षुऽमंतः शूरऽसातौ॥४॥ तं इत् धनेषु हितेषु अधिऽवाकाय हवंते येषां इंद्रः ते जयंति॥५॥ तं इत् च्यौत्नैः आयंति तं कृतेभिः चर्षणयः एषः इंद्रः वरिवःऽकृत्॥६॥२०॥ इंद्रः ब्रह्मा इंद्रः ऋषिः इंद्रः पुरु पुरुऽहूतः महान् महीभिः शचीभिः॥७॥ सः स्तोम्यः सः हव्यः सत्यः सत्वा तुविऽकूर्मिः एकः चित् सन् अभिऽभूतिः॥८॥ तं अर्केभिः तं सामऽभिः तं गायत्रैः चर्षणयः इंद्रं वर्धंति क्षितयः॥९॥ प्रऽनेतारं वस्यः अच्छ कर्तारं ज्योतिः समत्ऽसु सस्वांसं युधा अमित्रान्॥१०॥ सः नः पप्रिः पारयाति स्वस्ति नावा पुरुऽहूतः इंद्रः विश्वाः अति द्विषः॥११॥ सः त्वं नः इंद्र वाजेभिः दशस्य च गातुऽय च अच्छ च नः सुम्नं नेषि॥१२॥२१॥

॥१७॥ आ याहि सुषुम हि ते इंद्र सोमं पिब इमं आ इदं बर्हिः सदः मम॥१॥ आ त्वा ब्रह्मऽयुजा हरी वहतां इंद्र केशिना उप ब्रह्माणि नः शृणु॥२॥ ब्रह्माणः त्वा वयं युजा सोमऽपां इंद्र सोमिनः सुतऽवंतः हवामहे॥३॥ आ नः याहि सुतऽवंतः अस्माकं

सुऽस्तुतीः उप पिबसु गिर्विन् अंधसः ॥४॥ आ ते सिंचामि कुक्ष्योः अनु गात्रा वि धावतु गृभाय जिह्वया मधु ॥५॥२२॥ स्वादुः ते अस्तु संऽसुदे मधुऽमान् तन्वे तव सोमः शं अस्तु ते हृदे ॥६॥ अयं ऊं त्वा विऽचर्षणे जनीःऽइव अभि संऽवृतः प्र सोमः इंद्र सर्पतु ॥७॥ तुविऽग्रीवः वपाऽउदरः सुऽबाहुः अंधसः मदे इंद्रः वृत्राणि जिघ्नते ॥८॥ इंद्र प्र इहि पुरः त्वं विष्वस्य ईशानः ओजसा वृत्राणि वृचऽहन् जहि ॥९॥ दीर्घः ते अस्तु अंकुशः येन वसु प्रऽयच्छसि यजमानाय सुन्वते ॥१०॥२३॥ अयं ते इंद्र सोमः निऽपूतः अधि बर्हिषि आ इहि ईं अस्य द्रवा पिब ॥११॥ शचिऽगो॰ शचिऽपूजन अयं रणाय ते सुतः आखंडल प्र हूयसे ॥१२॥ यः ते शृंगऽवृषः नपात् प्रऽनपात्॰ कुंडऽपाय्यः नि अस्मिन् दध्रे आ मनः ॥१३॥ वास्तोः पते ध्रुवा स्थूणा अंसत्रं सोम्यानां द्रप्सः भेत्ता पुरां शश्वतीनां इंद्रः मुनीनां सखा ॥१४॥ पृदाकुऽसानुः यजतः गोऽएषणः एकः सन् अभि भूयसः भूरिं अश्वं नयत् तुजा पुरः गृभा इंद्र सोमस्य पीतये ॥१५॥२४॥

॥१८॥ इदं ह नूनं एषां सुम्नं भिक्षेत मर्त्यः आदित्यानां अपूर्व्ये सवीमनि ॥१॥ अनर्वाणः हि एषां पंथाः आदित्यानां अदब्धाः संति पायवः सुगेऽवृधः ॥२॥ तत् सु नः सविता भगः वरुणः मित्रः अर्यमा शर्म यच्छंतु सप्रथः यत् ईमहे ॥३॥ देवेभिः देवि अदिते अरिष्टऽभर्मन् आ गहि स्मत् सूरिऽभिः पुरुऽप्रिये सुशर्मऽभिः ॥४॥ ते हि पुत्रासः अदितेः विदुः द्वेषांसि योतवे अंहोः चित् उरुऽचक्रयः अनेहसः ॥५॥२५॥ अदितिः नः दिवा पशुं अदितिः नक्तं अद्वया अदितिः पातु अंहसः सदाऽवृधा ॥६॥ उत स्या

नः दिवा मतिः अदितिः ऊत्या आ गमत् सा शंऽतांति मयः करत् अप स्निधः ॥७॥ उत त्या दैव्या भिषजा शं नः करतः अश्विना युयुयाताँ इतः रपः अप स्निधः ॥८॥ शं अग्निः अग्निऽभिः करत् शं नः तपतु सूर्यः शं वातः वातु अरपाः अप स्निधः ॥९॥ अप अमीवां अप स्निधं अप सेधत दुःऽमतिं आदित्यासः युयोतन नः अंहसः ॥१०॥२६॥ युयोत शरुं अस्मत् आ आदित्यासः उत अमतिं ऋधक् द्वेषः कृणुत विश्वऽवेदसः ॥११॥ तत् सु नः शर्म यच्छत आदित्याः यत् मुमोचति एनस्वंतं चित् एनसः सुऽदानवः ॥१२॥ यः नः कः चित् रिरिक्षति रक्षः ऽत्वेन मर्त्यः स्वैः सः एवैः रिरिषीष्ट युः जनः ॥१३॥ सं इत् तं अघं अश्नवत् दुःऽशंसं मर्त्यं रिपुं यः अस्मऽचा दुःऽहनावान् उप द्वयुः ॥१४॥ पाकऽचा स्थन देवाः हृत्ऽसु जानीथ मर्त्यं उप द्वयुं च अद्वयुं च वसवः ॥१५॥२७॥ आ शर्म पर्वतानां आ उत अपां वृणीमहे द्यावाक्षामा आरे अस्मत् रपः कृतं ॥१६॥ ते नः भद्रेण शर्मणा युष्माकैं नावा वसवः अति विश्वानि दुःऽइता पिपर्तन ॥१७॥ तुचे तनाय तत् सु नः द्राघीयः आयुः जीवसे आदित्यासः सुऽमहसः कृणोतन ॥१८॥ यज्ञः हीळः वः अंतरः आदित्याः अस्ति मृळत युष्मे इत् वः अपि स्मसि सऽजात्ये ॥१९॥ बृहत् वरूथं मरुतां देवं चातारं अश्विना मिचं ईमहे वरुणं स्वस्तये ॥२०॥ अनेहः मिच अर्यमन् नृऽवत् वरुण शंस्यं चिऽवरूथं मरुतः यंत नः छर्दिः ॥२१॥ ये चित् हि मृत्युऽबंधवः आदित्याः मनवः स्मसि प्र सु नः आयुः जीवसे तिरतन ॥२२॥२८॥

॥१९॥ तं गूर्धय स्वःऽनरं देवासः देवं अरतिं दधन्विरे देवऽचा

ह॒व्यं आ ऊ॑हिरे ॥१॥ विभू॑तऽरातिं वि॒प्र चि॒त्रऽशो॑चिषं अ॒ग्निं ई॒ळि॒ष्व॒ यं॒तुर॑ं अ॒स्य मेध॑स्य सो॒म्यस्य॑ सो॒भरे॒ प्र ई॑ं अ॒ध्व॒राय॑ पू॒र्व्यं ॥२॥ यजि॑ष्ठं त्वा व॒वृ॒म॒हे॒ दे॒वं दे॒वऽचा होता॑रं अमर्त्यं अ॒स्य य॒ज्ञस्य॑ सु॒ऽक्रतु॑ं ॥३॥ ऊ॒र्जः॑ नपा॑तं सु॒ऽभग॑ं सु॒ऽदी॒दि॒तिं अ॒ग्निं अ॒ग्नेऽशो॒-चिषं॑ सः नः॒ मि॒त्रस्य॑ वरुणस्य सः अ॒पां आ सु॒म्नं य॒क्ष॒ते॒ दि॒वि॥४॥ यः सं॑ऽइ॒धा यः आऽहु॑ती यः वेदे॑न द॒दाश॑ मर्तः॑ अ॒ग्नये॑ यः नम॑सा सु॒ऽअ॒ध्व॒रः॥५॥२९॥ तस्य॑ इत् अर्वं॑तः र॒ह॒यं॒ते॒ आ॒शवः॑ तस्य॑ द्यु॒म्नि-ऽत॑मं यशः॑ न तं अंहः॑ देव॒ऽकृ॑तं कुतः॑ च॒न न मर्त्यं॑ऽकृतं नशत् ॥६॥ सु॒ऽअ॒ग्नयः॑ वः॒ अ॒ग्नि॒ऽभिः॑ स्याम॑ सू॒नो॑ सह॒सः॒ ऊर्जां॑ पते सु॒ऽवीरः॑ त्वं अ॒स्म॒ऽयुः ॥७॥ प्र॒ऽशं॒स॒मानः॑ अति॑थिः न मि॒त्रियः॑ अ॒ग्निः॑ रथ॑ः न वेद्यः॑ त्वे॑ क्षेमा॑सः॑ अपि॑ सं॒ति॒ सा॒धवः॑ त्वं राजा॑ र॒यी-णां ॥८॥ सः॑ अ॒ञ्जा दा॒शुऽअ॑ध्वरः॑ अग्ने॑ मर्तः॑ सु॒ऽभ॒ग॒ सः॑ प्र॒ऽशं॒स्यः॑ सः॑ धी॒भिः॑ अ॒स्तु॒ स॒नि॒ता ॥९॥ यस्य॑ त्वं ऊ॒र्ध्वः॑ अ॒ध्व॒राय॑ तिष्ठ॑सि क्षयत्ऽवीरः॑ सः॑ सा॒ध॒ते॒ सः॑ अर्वं॑त्ऽभिः॑ स॒नि॒ता स॒ वि॒प॒न्यु॒ऽभिः॑ सः॑ शूरैः॑ स॒नि॒ता कृ॒तं ॥१०॥३०॥ यस्य॑ अ॒ग्निः॑ वपु॑ः गृ॒हे स्तोम॑ं च॒नः॑ दधी॑त वि॒श्वऽवा॑र्यः॑ ह॒व्या वा॒ वे॒वि॒ष॒त् विषः॑॥११॥ विप्र॑स्य वा॒ स्तु॒व॒तः॑ स॒ह॒सः॒ य॒हो॒ म॒क्षुऽत॑मस्य रा॒ति॒षु॒ अ॒वः॒ऽदैव॑ं उ॒प॒रि-ऽम॑र्त्ये कृधि॒ वसो॑ वि॒वि॒दुषः॑ वचः॑ ॥१२॥ यः अ॒ग्निं ह॒व्यदा॑ति-ऽभिः॑ नमः॑ऽभिः वा॒ सु॒ऽदक्षं॑ आ॒ऽवि॒वा॒स॒ति॒ गि॒रा वा॒ अ॒जि॒र-ऽशो॑चिषं॥१३॥ सं॑ऽइधा॑ यः निऽशि॑तो दा॒श॒त् अदि॑तिं धाम॑ऽभिः अ॒स्य॒ मर्त्यैः॑ विश्वा॑ इत् सः॑ धी॒भिः॑ सु॒ऽभगः॑ जना॑न् अति॑ द्यु॒म्नैः॑ उ॒ग्रः॑ऽइ॑व ता॒रि॒ष॒त्॥१४॥ तत् अ॒ग्ने॒ द्यु॒म्नं आ भ॒र॒ यत् स॒स॒हा॒न॒त् सद॑ने कं॑ चित् अ॒त्रिणं॑ म॒न्युं जन॑स्य दुः॑ऽध्यः॑ ॥१५॥३१॥ येन॑ चष्टे॑ वरु॑णः मि॒त्रः॑ अ॒र्य॒मा येन॑ नास॑त्या भग॑ः व॒यं तत् ते॒ श॒वसा॑ गा॒तु॒वित्-

ऽतमाः इंद्रंत्वाऽऊताः विधेमहि ॥१६॥ ते घ इत् अग्ने सुऽआध्यः ये त्वा विप्र निऽदधिरे नृऽचक्षसं विप्रासः देव सुऽक्रतुं ॥१७॥ ते इत् वेदिसुऽभगते आऽहुतिं ते सोतुं चक्रिरे दिवि ते इत् वाजेभिः जिग्युः महत् धनं ये त्वे कामं निऽएरिरे॥१८॥ भद्रः नः अग्निः आऽहुतः भद्रा रातिः सुऽभग भद्रः अध्वरः भद्राः उत प्रऽशस्तयः॥१९॥ भद्रं मनः कृणुष्व वृत्रऽतूर्ये येन समत्ऽसु सासहः अव स्थिरा तनुहि भूरि शर्धतां वनेमते अभिष्टिऽभिः॥२०॥३२॥ ईळे गिरा मनुःऽहितं यं देवाः दूतं अरतिं निऽएरिरे यजिष्ठं हव्यऽवाहनं॥२१॥ तिग्मऽजंभाय तरुणाय राजते प्रयः गायसि अग्नये यः पिंशते सूनृताभिः सुऽवीर्यं अग्निः घृतेभिः आऽहुतः ॥२२॥ यदि घृतेभिः आऽहुतः वाशीं अग्निः भरते उत् च अव च असुरःऽइव निःऽनिजे॥२३॥ यः हव्यानि ऐरयत मनुःऽहितः देवः आसा सुऽगंधिना विवासते वार्याणि सुऽअध्वरः होता देवः अमर्त्यः॥२४॥ यत् अग्ने मर्त्यः त्वं स्यां अहं मिचऽमहः अमर्त्यः सहसः सूनो आऽहुत ॥२५॥३३॥ न त्वा रासीय अभिऽशस्तये वसो न पापऽत्वाय संत्य न मे स्तोता अमतिऽवा न दुःऽहितः स्यात् अग्ने न पापया॥२६॥ पितुः न पुत्रः सुऽभृतः दुरोणे आ देवान् एतु प्र नः हविः॥२७॥ तव अहं अग्ने ऊतिऽभिः नेदिष्ठाभिः सचेय जोषं आ वसो सदा देवस्य मर्त्यः॥२८॥ तव क्रत्वा सनेयं तव रातिऽभिः अग्ने तव प्रशस्तिऽभिः त्वां इत् आहुः प्रऽमतिं वसो मम अग्ने हर्षस्व दातवे॥२९॥ प्र सः अग्ने तव ऊतिऽभिः सुऽवीराभिः तिरते वाजभर्मऽभिः यस्य त्वं सख्यं आऽवरः ॥३०॥३४॥ तव द्रप्सः नीलऽवान् वाशः ऋत्वियः इंधानः सिष्णो आ ददे त्वं महीनां उषसां असि प्रियः क्षपः वस्तुषु राजसि

॥ ३१॥ तं आ अगन्म सोभरयः सहस्रऽमुष्कं सुऽअभिष्टिं अवसे संऽराजं चासदस्यवं॥३२॥ यस्य ते अग्ने अन्ये अग्नयः उपऽक्षितः वयाःऽइव विषः न द्युम्ना नि युवे जनानां तव क्षुचाणि वर्धयन् ॥३३॥ यं आदित्यासः अदुहः पारं नयथ मर्त्यं मघोनां विश्वेषां सुऽदानवः॥३४॥ यूयं राजानः कं चित् चर्षणिऽसहः क्षयंतं मानुषान् अनु वयं ते वः वरुण मित्र अर्यमन् स्याम इत् ऋतस्य रथ्यः॥३५॥ अदात् मे पौरुऽकुत्स्यः पंचाशतं चसदस्युः वधूनां मंहिष्ठः अर्यः सत्ऽपतिः ॥३६॥ उत मे प्रयियोः वयियोः सुऽवास्वाः अधि तुर्वनि तिसॄणां सप्तीनां श्यावः प्रऽनेता भुवत् वसुः दियानां पतिः ॥३७॥३५॥

॥२०॥ आ गंत मा रिषण्यत प्रऽस्थावानः मा अपं स्थात सऽमन्यवः स्थिरा चित् नमयिष्णवः॥१॥ वीळुपविऽभिः मरुतः ऋभुक्षणः आ रुद्रासः सुदीतिऽभिः इषा नः अद्य आ गत पुरुऽस्पृहः यज्ञं आ सोभरीऽयवः॥२॥ विद्म हि रुद्रियाणां शुष्मं उग्रं मरुतां शिमींऽवतां विष्णोः एषस्य मीळ्हुषां॥३॥ वि द्वीपानि पार्पतन् तिष्ठत दुच्छुना उभे युजंत रोदसी प्र धन्वानि ऐरत शुभ्रऽखाद्यः यत् एजथ स्वऽभानवः॥४॥ अच्युता चित् वः अज्मन् आ नानदति पर्वतासः वनस्पतिः भूमिः यामेषु रेजते॥५॥३६॥ अमाय वः मरुतः यातवे द्यौः जिहीते उत्ऽतरा बृहत् यच्च नरः देदिशते तनूषु आ त्विषींसि बाहुऽओजसः॥६॥ स्वधां अनु श्रियं नरः महि त्वेषाः अमऽवंतः वृषऽप्सवः वहंते अहुतऽप्सवः॥७॥ गोभिः वाणः अज्यते सोभरीणां रथे कोशे हिरण्यये गोऽबंधवः सुऽजातासः इषे भुजे महांतः नः स्परसे नु॥८॥ प्रति वः वृषत्-

ऽअंजयः वृषो शर्धाय मारुताय भरध्वं हव्या वृषऽप्रयावे ॥९॥ वृषणश्वेन मरुतः वृषऽप्सुना रथेन वृषऽनाभिना आ श्येनासः न पक्षिणः वृथा नरः हव्या नः वीतये गत ॥१०॥३७॥ समानं अंजि एषां वि भाजन्ते रुक्मासः अधि बाहुषु दविद्युतति ऋष्टयः ॥११॥ ते उग्रासः वृषणः उग्रऽबाहवः नकिः तनूषु येतिरे स्थिरा धन्वानि आयुधा रथेषु वः अनीकिषु अधि श्रियः॥१२॥ येषाँ अर्णः न सऽप्रथः नाम त्वेषं शर्धतां एकं इत् भुजे वयः न पिप्यं सहः ॥१३॥ तान् वंदस्व मरुतः तान् उप स्तुहि तेषां हि धुनीनां अराणाँ न चरमः तत् एषां दाना महा तत् एषां॥१४॥ सुऽभगः सः वः ऊतिषु आसु पूर्वासु मरुतः विऽउष्टिषु यः वा नूनं उत असति ॥१५॥३८॥ यस्य वा यूयं प्रति वाजिनः नरः आ हव्या वीतये गथ अभि सः द्युम्नैः उत वाजसातिऽभिः सुम्ना वः धूतयः नशत्॥१६॥ यथा रुद्रस्य सूनवः दिवः वशंति असुरस्य वेधसः युवानः तथा इत् असत्॥१७॥ ये च अर्हंति मरुतः सुऽदानवः स्मत् मीळ्हुषः चरंति ये अतः चित् आ नः उप वस्यसा हृदा युवानः आ ववृध्वं ॥१८॥ यूनः ऊं सु नविष्ठया वृष्णः पावकान् अभि सोभरे गिरा गाय गाःऽइव चर्कृषत् ॥१९॥ सहाः ये संति मुष्टिहाऽइव हव्यः विश्वासु पृतऽसु होतृषु वृष्णः चंद्रान् न सुश्रवःऽतमान् गिरा वंदस्व मरुतः अह ॥२०॥३९॥ गावः चित् घ सऽमन्यवः सऽजात्येन मरुतः सऽबंधवः रिहते ककुभः सिथः॥२१॥ मतेः चित् वः नृतवः रुक्मऽवक्षासः उप भ्रातृऽत्वं आ अयति अधि नः गात मरुतः सदा हि वः आपिऽत्वं अस्ति निऽध्रुवि॥२२॥ मरुतः मारुतस्य नः आ भेषजस्य वहत सुऽदानवः यूयं सखायः सप्तयः ॥२३॥ याभिः सिंधुं अवथ याभिः तूर्वथ याभिः दृश्यथ त्रिवृं

मयः नः भूत ऊतिऽभिः मयःऽभुवः शिवाभिः अस्रक्षऽद्विषः ॥२४॥ यत् सिंधौ यत् असिक्न्यां यत् समुद्रेषु मरुतः सुऽबर्हिषः यत् पर्वतेषु भेषजं ॥२५॥ विश्वे पश्यंतः विभृथ तनूषु आ तेन नः अधि वोचत क्षमा रपः मरुतः आतुरस्य नः इष्कर्त विऽहुतं पुनः' ॥२६॥४०॥१॥३॥

॥२१॥ वयं ऊं' त्वां अपूर्व्य स्थूरं न कत् चित् भरंतः अवस्यवः वाजे चित्रं हवामहे ॥१॥ उप त्वा कर्मन् ऊतये सः नः युवा उग्रः चक्राम यः धृषत् त्वां इत् हि अवितारं ववृमहे सखायः इंद्र सानसिं ॥२॥ आ याहि इमे इंदवः अश्वऽपते गोऽपते उर्वराऽपते सोमे सोमऽपते पिब ॥३॥ वयं हि त्वा बंधुऽमंतं अबंधवः विप्रासः इंद्र येमिम या ते धामानि वृषभ तेभिः आ गहि विश्वेभिः सोमऽपीतये ॥४॥ सीदंतः ते वयः यथा गोऽश्रीते मधौ मदिरे विवक्षणे अभि त्वां इंद्र नोनुमः ॥५॥१॥ अच्छ च त्वा एना नमसा वदामसि किं मुहुः चित् वि दीधयः संति कामासः हरिऽवः ददिः त्वं रसः वयं संति नः धियः ॥६॥ नूनाः इत् इंद्र ते वयं ऊती अभूम नहि नु ते अद्रिऽवः विघ्न पुरा परीणसः ॥७॥ विघ्न सखिऽत्वं उत शूर भोज्यं आ ते ता वज्रिन् ईमहे उतो' समस्मिन् आ शिशीहि नः वसो' वाजे सुऽशिप्र गोऽमति ॥८॥ यः नः इदंऽइदं पुरा प्र वस्यः आऽनिनाय तं ऊं' वः स्तुषे सखायः इंद्रं ऊतये ॥९॥ हरिऽअश्वं सत्ऽपतिं चर्षणिऽसहं सः हि स्म यः अमंदत आ तु नः सः वयति गव्यं अश्व्यं स्तोतृऽभ्यः मघऽवा शतं ॥१०॥२॥ त्वया ह स्वित् युजा वयं प्रति श्वसंतं वृषभ ब्रुवीमहि संऽस्थे जनस्य गोऽमतः ॥११॥ जयेम कारे पुरुऽहूत कारिणः अभि तिष्ठेम दुःऽध्यः

नृऽभिः वृत्रं हन्याम॑ शूशुयाम॑ च॒ अवैः॑ इंद्र॒ प्र नः॒ धियः॑॥१२॥ अ॒-भा॒तृ॒व्यः अ॒ना त्वं अना॑पिः इंद्र॒ ज॒नु॒षा स॒नात् अ॒सि॒ युधा इत् आ॒-पि॒ऽत्वं इ॒च्छ॒से॥१३॥ नकिः॑ रे॒वंत॑ं सख्याय॑ विंद्से॒ पीय॑ंति ते॒ सुरा॒-श्वः॑ यदा कृ॒णोषि॑ नद॒नुं सं ऊ॒ह॒सि॒ आत् इत् पि॒ताऽइ॑व हूयसे॥१४॥ मा ते॒ अ॒माऽजु॑रेः यथा॒ मूरा॑सः इंद्र॒ सख्ये॒ त्वाऽव॑तः नि स॒दा॒म॒ सचा॑ सु॒ते॥१५॥३॥ मा ते॒ गोऽद॑च॒ निः अ॒रा॒म॒ राध॑सः इंद्र॑ मा ते॒ गृ॒हा॒म॒हि॒ ह॒व्हा चित् आ॒र्यः प्र मृ॑श॒ अभि॒ आ भ॒र॒ न ते॒ दा॒मानः॑ आ॒ऽद॒भे॥१६॥ इंद्रः॑ वा॒ घ॒ इत् इ॒र्यत् म॒घं सर॑स्वती वा॒ सु॒ऽभगा॑ ददिः॑ वसु॑ त्वं वा॒ चि॒च॒ दा॒शुषे॑॥१७॥ चि॒त्रः इत् राजा॑ राज॒काः इत् अ॒न्य॒के य॒के सर॑स्वतीं अनु॑ पर्जन्यः॑ऽइव ततनत् हि वृ॒ष्ट्या स॒हस्रं॑ अयुता॑ ददत्॥१८॥४॥

॥२२॥ ओ॑ त्यं अ॒ह्वे॒ आ रथं॑ अद्य दं॑सिष्ठं ऊ॒तये॑ यं अ॒श्वि॒ना सु॒-ऽह॒वा॒ रु॒द्रऽव॑र्तनी॒॰ आ सूर्या॑यै तस्थथुः॥१॥ पूर्व॑ऽआयुषं सु॒ऽहवं॑ पुरु॒ऽस्पृहं॑ भुज्युं वाजे॑षु पूर्व्यं स॒च॒नाऽव॑न्तं सुम॒तिऽभिः॑ सो॒भरे॒ वि-ऽइ॑षसं अ॒ने॒हस॑ं॥२॥ इ॒ह त्या पु॒रु॒ऽभूत॑मा दे॒वा नमः॑ऽभिः अ॒श्वि॒ना अ॒र्वा॒ची॒ना सु अ॒व॒से॒ क॒रा॒म॒हे॒ गंता॑रा दा॒शुषः॑ गृ॒हं॥३॥ युवोः॑ र-थस्य॑ परि॑ च॒क्रं ई॒य॒ते॒ ई॒र्मा अ॒न्यत् वां॑ इ॒ष॒ण्य॒ति॒ अ॒स्मान् अच्छ॑ सु॒ऽम॒तिः वां॑ शु॒भः॒ प॒ती॑ आ धे॒नुःऽइ॑व धावतु॥४॥ रथः॑ यः वां॑ चि॒ऽव॒धुरः॑ हिर॑ण्यऽअभीशुः अ॒श्वि॒ना परि॑ द्यावापृथि॒वी॑ भूष॑-न्ति श्रुतः॑ तेन॑ नासत्या॒ आ ग॑तं॥५॥५॥ दृ॒श॒स्यंता॑ मन॑वे पूर्व्यं दि॒वि य॒वं॑ वृ॒केण॑ कर्षथः॑ ता वां॑ अ॒द्य सु॒म॒ति॒ऽभिः॑ शु॒भः॒ प॒ती॑ अ॒श्वि॒ना प्र स्तु॑वीमहि॥६॥ उप॑ नः॑ वा॒जि॒नी॒ऽव॒सू॒॰ या॒तं ऋ॒तस्य॑ प॒थि-ऽभिः॑ येभिः॑ नृ॒क्षिं वृ॒ष॒णा॒ वा॒स॒द॒स्य॒वं म॒हे क्ष॒त्राय॑ जिन्वथः॑॥७॥

अयं वां अद्रिऽभिः सुतः सोमः नरा वृषण्ऽवसू० आ यातं सोम-ऽपीतये पिबतं दाश्षुषः गृहे॥८॥ आ हि रुहतं अश्विना रथे कोशे हिरण्यये वृषण्ऽवसू० युंजाथां पीवरीः इषः॥९॥ याभिः पक्थं अवथः याभिः अध्रिऽगुं याभिः बभ्रुं विऽजोषसं ताभिः नः मक्षु नूयै अश्विना आ गतं भिषज्यतं यत् आतुरं॥१०॥६॥ यत् अध्रि-ऽगावः अध्रिऽगू० इदा चित् अहः अश्विना हवामहे वयं गीः-ऽभिः विपन्यवः॥११॥ ताभिः आ यातं वृषणा उप मे हवं विश्व-ऽपसुं विश्वऽवायं इषा मंहिष्ठा पुरुऽभूतमा नरा याभिः क्रिविं ववृधुः ताभिः आ गतं॥१२॥ तौ इदा चित् अहानां तौ अश्विना वंदमानः उप ब्रुवे तौ ऊं नमःऽभिः ईमहे॥१३॥ तौ इत् दोषा तौ उषसि शुभः पती ता यामन् रुद्रऽवर्तनी० मा नः मर्ताय रिपवे वाजिनीऽवसू० परः रुद्रौ अत्तं खतं॥१४॥ आ सुग्म्याय सुग्म्यं प्रातः रथेन अश्विना वा सक्षणी हुवे पिताऽइव सोभरी ॥१५॥७॥ मनःऽजवसा वृषणा मदऽच्युता मक्षुंऽगमाभिः ऊ-तिऽभिः आरात्तात् चित् भूतं अस्मे अवसे पूर्वीभिः पुरुऽभोजसा ॥१६॥ आ नः अश्वऽवत् अश्विना वर्तिः यासिष्टं मधुऽपातमा नरा गोऽमत् दस्रा हिरण्यऽवत्॥१७॥ सुऽप्रावर्गं सुऽवीर्यं सुष्ठु वायं अनाधृष्टं रक्षस्विना अस्मिन् आ वां आऽयाने वाजिनी-ऽवसू० विश्वा वामानि धीमहि॥१८॥८॥

॥२३॥ ईळिष्व हि प्रतीव्यं यजस्व जातऽवेदसं चरिष्णुऽधूमं अगृभीतऽशोचिषं॥१॥ दामानं विश्वऽचर्षणे अग्निं विश्वऽमनः गिरा उत स्तुषे विऽस्पर्धसः रथानां॥२॥ येषां आऽबाधः ऋ-ग्मियः इषः पृक्षः च निऽग्यभे उपऽविदा वह्निः विंदते वसु॥३॥

उत् अस्य शोचिः अस्थात् दीदियुषः वि अजरं तपुः ऽजंभस्य सु-
ऽद्युतः गणऽश्रियः॥४॥ उत् ऊं तिष्ठ सुऽअध्वर स्तवानः देव्या कृ-
पा अभिऽख्या भासा बृहता शुशुक्वनिः॥५॥९॥ अग्ने याहि सुश-
स्तिऽभिः हव्या जुह्वानः आनुषक् यथा दूतः बभूथ हव्यऽवाहनः
॥६॥ अग्निं वः पूर्व्यं हुवे होतारं चर्षणीनां तं अया वाचा गृणे तं
ऊं वः स्तुषे॥७॥ यज्ञेभिः अङ्गतऽक्रतुं यं कृपा सूदयंते इत् मिचं न
जनेसुऽधितं ऋतऽवानं ऋतऽयवः यज्ञस्य साधनं गिरा उपो एनं जुजुषुः नमसः पदे॥९॥ अच्छ नः अंगिरः-
ऽतमं यज्ञासः यंतु संऽयतः होता यः अस्ति विक्षु आ यशःऽतमः
॥१०॥१०॥ अग्ने तव त्ये अजर इंधानासः बृहत् भाः अश्वाःऽइव
वृषणः तविषीऽयवः॥११॥ स त्वं नः ऊर्जो पते रयिं रास्व सु-
ऽवीर्यं प्र अव नः तोके तनये समत्ऽसु आ॥१२॥ यत् वै ऊं वि-
श्पतिः शितः सुऽप्रीतः मनुषः विशि विश्वा इत् अग्निः प्रति
रक्षांसि सेधति॥१३॥ श्रुष्टी अग्ने नवस्य मे स्तोमस्य वीर विश्पते
नि मायिनः तपुषा रक्षसः दह॥१४॥ न तस्य मायया चन रिपुः
ईशीत मर्त्यः यः अग्नये ददाश हव्यदातिऽभिः॥१५॥११॥ वि-
ऽअश्वः त्वा वसुऽविदं उक्षण्युः अप्रीणात् ऋषिः महः राये त
ऊं त्वा सं इधीमहि॥१६॥ उशना काव्यः त्वा नि होतारं असादयत्
आऽयजिं त्वा मनवे जातऽवेदसं॥१७॥ विश्वे हि त्वा सऽजोषसः
देवासः दूतं अक्रत श्रुष्टी देव प्रथमः यज्ञियः भुवः॥१८॥ इमं घ
वीरः अमृतं दूतं कृणीत मर्त्यः पावकं कृष्णऽवर्तनिं विऽहायसं
॥१९॥ तं हुवेम यतऽस्रुचः सुऽभासं शुक्रऽशोचिषं विशां अग्निं
अजरं प्रत्नं ईड्यं॥२०॥१२॥ यः अस्मै हव्यदातिऽभिः आऽहुतिं
मर्तः अविधत् भूरि पोषं सः धत्ते वीरऽवत् यशः॥२१॥ प्रथमं

जातऽवेदसं अग्निं यज्ञेषु पूर्व्यं प्रति स्रुक् एति नमसा हविष्मती ॥२२॥ आभिः विधेम अग्नये ज्येष्ठाभिः अश्वऽवत् महिष्ठाभिः मतिऽभिः शुक्रऽशोचिषे॥२३॥ नूनं अर्चे विऽहायसे स्तोमेभिः स्थूरयूपऽवत् ऋषे वैयश्व दम्याय अग्नये॥२४॥ अतिथिं मानुषाणां सूनुं वनस्पतीनां विप्राः अग्निं अवसे प्रत्नं ईळते॥२५॥१३॥ महः विश्वान् अभि सतः अभि हव्यानि मानुषा अग्ने नि सत्सि नमसा अधि बर्हिषि॥२६॥ वंस्व नः वार्या पुरु वंस्व रायः पुरुऽस्पृहः सुऽवीर्यस्य प्रजाऽवतः यशस्वतः॥२७॥ त्वं वरो सुऽसाह्ये अग्ने जनाय चोदय सदा वसो रातिं यविष्ठ शश्वते ॥२८॥ त्वं हि सुऽप्रतूः असि त्वं नः गोऽमतीः इषः महः रायः सातिं अग्ने अप वृधि॥२९॥ अग्ने त्वं यशाः असि आ मित्रावरुणा वह ऋतऽवानना सुऽराजा पूतऽदक्षसा॥३०॥१४॥

॥२४॥ सखायः आ शिषामहि ब्रह्म इंद्राय वज्रिणे स्तुषे ऊं सु वः नृऽतमाय धृष्णवे॥१॥ शवसा हि असि श्रुतः वृचऽहत्येन वृचऽहा मघैः मघोनः अति पूर दाशसि॥२॥ सः नः स्तवानः आ भर रयिं चित्रश्रवःऽतमं निरेके चित् यः हरिऽवः वसुः ददिः ॥३॥ आ निरेकं उत प्रियं इंद्र दर्षि जनानां धृषता धृष्णो स्तवमानः आ भर ॥४॥ न ते सव्यं न दक्षिणं हस्तं वरंते आऽमुरः न परिऽबाधः हरिऽवः गोऽईषिषु ॥५॥१५॥ आ त्वा गोभिःऽइव व्रजं गीःऽभिः ऋणोमि अद्रिऽवः आ स्म कामं जरितुः आ मनः पृण ॥६॥ विश्वानि विश्वऽमनसः धिया नः वृचहन्ऽतम उग्र प्रऽनेतः० अधि सु वसो गहि॥७॥ वयं ते अस्य वृचऽहन् विद्याम पूर नव्यसः वसोः स्याहस्य पुरुऽहूत राधसः॥८॥ इंद्र यथा हि अ-

स्ति ते अपरिऽइतं नृतो॑ शवः अमृक्ता रा॒तिः पुरु॒ऽहूत॒ दा॒शुषे॑ ॥९॥ आ वृ॒ष॒स्व॒ म॒हा॒ऽम॒ह॒ म॒हे नृ॒ऽत॒म॒ राध॑से हव्यः चित् हव्य॑ मघऽवन् मघत्तये॥१०॥१६॥ नु अ॒न्यत्र॑ चित् अ॒द्रि॒ऽवः॒ त्वत् नः॒ जग्मुः आ॒ऽशसः॑ मघऽवन् श॒ग्धि तव॑ तत् नः॒ ऊ॒ति॒ऽभिः॑॥११॥ न॒हि अ॑ंग नृतो॑ त्वत् अ॒न्यं वि॒दामि॑ राध॑से रा॒ये द्यु॒म्नाय॑ शव॑से च॒ गि॒र्वणः॥१२॥ आ इं॑दुं इंद्रा॑य सिंचत॒ पिबा॑ति सो॒म्यं मधु॑ प्र राध॑सा चोदयाते महि॒ऽत्वना॥१३॥ उपो॑ हरी॑णां पति॑ दक्षं॑ पृंचंत॑ अब्रवं नूनं श्रुधि॒ स्तुव॑तः अ॒ध्व॒स्य॑॥१४॥ न॒हि अ॑ंग पुरा च॒न ज॒ज्ञे वी॒रऽत॑रः त्वत् नकिः रा॒या न एव॑ऽथा॑ न भंदना॥१५॥१७॥ आ इत् ऊं॑ मध्वः मदिन्ऽतरं सिंच वा॒ अ॒ध्व॒र्यो॑ अंधसः एव हि वी॒रः स्तव॑ते सदाऽवृधः॥१६॥ इंद्र॑ स्याता॒ हरी॑णां नकिः ते॒ पूर्व्य॑ऽस्तुतिं उत् आ॒नं॒श॒ शव॑सा न भंदना॥१७॥ तं वः॒ वाजा॑नां पति॑ अहूमहि श्रव॒स्य॑वः॒ अप्रा॑युऽभिः यज्ञे॑भिः व॒वृ॒धेन्यं॑॥१८॥ एतो॑ नु इंद्रं॑ स्तवाम सखायः स्तो॒म्यं॑ नरं॑ कृ॒ष्टीः यः विश्वाः॒ अ॒भि अस्ति॑ एकः इत्॥१९॥ अगो॑ऽरुधाय गो॒ऽइषे॑ द्यु॒क्षाय॑ दस्यं॑ वचः॑ घृ॒तात् स्वादी॑यः मधु॑नः च॒ वो॒च॒त॒॥२०॥१८॥ यस्य॑ अमि॑तानि वी॒र्या॑ न राधः॑ परि॑ऽएतवे ज्योतिः॑ न विश्वं॑ अ॒भि अस्ति॑ दक्षि॑णा॥२१॥ स्तु॒हि इंद्रं॑ ब्र॒ह्म॒ऽवत् अ॒नू॒र्मिं वा॒जिनं॑ यमं॑ ऋ॒यः॑ गयं॑ मंहमानं वि दा॒शुषे॑॥२२॥ एव नूनं उप॑ स्तुहि॒ वैय॑श्व दश॒मं नवं॑ सु॒ऽविद्वांसं॑ चर्कृत्यं॑ चरणी॑नां॥२३॥ वेत्थ॑ हि निः॒ऽऋ॒तीनां॑ वज्र॑ऽहस्त परि॒ऽवृज॑ं अहः॑ऽअहः॑ शुंध्युः॑ प॒रि॒पदा॑ऽइव॥२४॥ तत् इंद्र॒ अर्वः॑ आ भर॒ येन॑ दं॒सि॒ष्ठ॒ कृत्व॑ने ह्वि॒ता कुत्सा॑य शिम्नथः॒ नि चो॒द॒य॒॥२५॥१९॥ तं ऊं॑ त्वा नूनं ई॒म॒हे॒ नव्यं॑ दंसिष्ठ सन्य॑से सः त्वं नः॒ विश्वाः॒ अ॒भि॒ऽमा॒तीः स॒क्ष॒णिः॑॥२६॥ यः ऋ॒क्षात् अंह॑सः मु॒च॒त् यः वा॒ आर्या॑त्

सन्न सिंधुषु वधः दासस्य तुविऽनृम्ण नीनमः॥२७॥ यथा वरो सुऽसाव्ये सनिऽभ्यः आ अवहः रयिं विऽअश्वेभ्यः सुऽभगे वाजिनीऽवति॥२८॥ आ नार्यस्य दक्षिणा विऽअश्वान् एतु सोमिनः स्यूरं च राधः शतऽवत् सहस्रऽवत्॥२९॥ यत् त्वा पृच्छात् ईजानः कुहया कुहयाऽकृते एषः अपऽश्रितः वलः गोऽमती अव तिष्ठति॥३०॥२०॥

॥२५॥ ता वां विश्वस्य गोपा देवा देवेषु यज्ञिया ऋतऽवाना यजसे पूतऽदक्षसा॥१॥ मिचा तना न रथ्या वरुणः यः च सुऽऋतुः सनात् सुऽजाता तनया धृतऽव्रता॥२॥ ता माता विश्वऽवेदसा असुर्याय प्रऽमहसा मही जजान अदितिः ऋतऽवरी॥३॥ महांता मिचावरुणा सम्ऽराजा देवौ असुरा ऋतऽवानौ ऋतं आ घोषतः बृहत्॥४॥ नपाता शवसः महः सूनू दक्षस्य सुऽक्रतू॰ सुप्रऽदानू॰ इषः वास्तु अधि क्षितः॥५॥२१॥ सं या दानूनि येमथुः दिव्याः पार्थिवीः इषः नभस्वतीः आ वां चरंतु वृष्टयः॥६॥ अधि या बृहतः दिवः अभि यूथाऽइव पश्यतः ऋतऽवाना सम्ऽराजा नमसे हिता॥७॥ ऋतऽवाना नि सेदतुः साम्ऽराज्याय सुऽक्रतू॰ धृतऽव्रता क्षत्रिया क्षत्रं आशतुः॥८॥ अक्ष्णः चित् गातुवित्ऽतरा अनुल्बणेन चक्षसा नि चित् मिषंता नि-ऽचिरा नि चिक्यतुः॥९॥ उत नः देवी अदितिः उरुष्यतां नासत्या उरुष्यतु मरुतः वृद्धऽशवसः॥१०॥२२॥ ते नः नावं उरुष्यत दिवा नक्तं सुऽदानवः अरिष्यंतः नि पायुऽभिः सचेमहि॥११॥ अग्नते विष्णवे वयं अरिष्यंतः सुऽदानवे श्रुधि स्वऽयावन् सिंधो पूर्वऽचित्तये॥१२॥ तत् वार्यं वृणीमहे वरिष्ठं गोपयत्यं मित्रः

यत् पांति वरुणः यत् अर्यमा ॥१३॥ उत नः सिंधुः अपां तत् मरुतः तत् अश्विना इंद्रः विष्णुः मीढ्वांसः सऽजोषसः ॥१४॥ ते हि स्म वनुषः नरः अभिऽमांतिं कयस्य चित् तिग्मं न क्षोदः प्रतिऽघंति भूर्णयः ॥१५॥२३॥ अयं एकः इत्था पुरु उरु चष्टे वि विशपतिः तस्य व्रतानि अनु वः चरामसि ॥१६॥ अनु पूर्वाणि ओक्या सांऽराज्यस्य सश्चिम मिचस्य व्रता वरुणस्य दीर्घऽश्रुत् ॥१७॥ परि यः रश्मिना दिवः अंतान् ममे पृथिव्याः उभे आ पप्रौ रोदसी महिऽत्वा ॥१८॥ उत् ऊं स्यः शरणे दिवः ज्योतिः अयंस्त सूर्यः अग्निः न भुक्रः संऽइधानः आऽहुतः ॥१९॥ वचः दीर्घऽप्रसद्मनि ईशे वाजस्य गोऽमतः ईशे हि पित्वः अविषस्य दावने ॥२०॥२४॥ तत् सूर्यं रोदसी उभे दोषा वस्तोः उप ब्रुवे भोजेषु अस्मान् अभि उत् चर सदा ॥२१॥ ऋजं उक्षण्यायने रजतं हरयाणे रथं युक्तं असनाम सुऽसामनि ॥२२॥ ता मे अश्व्यानां हरीणां निऽतोशना उतो नु कृत्व्यानां नृऽवाहसा ॥२३॥ स्मत्ऽअंभीभूः० कर्णऽवंता विप्रा नविष्ठया मती मह वाजिनौ अवैता सचा असनं ॥२४॥२५॥

॥२६॥ युवोः ऊं सु रथं हुवे सधऽस्तुत्याय सूरिषु अतूर्तऽदक्षा वृषणा वृषणऽवसू० ॥१॥ युवं वरो सुऽसामे महे तने नासत्या अवःऽभिः याथः वृषणा वृषणऽवसू० ॥२॥ ता वां अद्य हुवामहे हव्येभिः वाजिनीऽवसू० पूर्वीः इषः इषयंतौ अति क्षपः ॥३॥ आ वां वाहिष्ठः अश्विना रथः यातु श्रुतः नरा उप स्तोमान् तुरस्य दर्शथः श्रिये ॥४॥ जुहुराणा चित् अश्विना आ मन्येथां वृषणऽवसू० युवं हि रुद्रा पर्षथः अति द्विषः ॥५॥२६॥ दस्रा हि विश्वे

आनुषक् मक्षुऽभिः परिऽदीयथः धियंऽजिन्वा मधुऽवर्णा शुभः पती ॥६॥ उप नः यातं अश्विना राया विश्वऽपुषा सह मघऽवाना सुऽवीरा अनपऽच्युता ॥७॥ आ मे अस्य प्रतीब्यं इंद्रनासत्या गतं देवा देवेभिः अद्य सचनःऽतमा ॥८॥ वयं हि वां हवामहे उक्षण्यंतः व्यश्वऽवत् सुमतिऽभिः उप विप्रौ इह आ गतं ॥९॥ अश्विना सु ऋषे स्तुहि कुवित् ते श्रवतः हवं नेदीयसः कूळ्हयातः पणीन् उत ॥१०॥२७॥ वैयश्वस्य श्रुतं नरा उतो मे अस्य वेदथः सऽजोषसा वरुणः मित्रः अर्यमा ॥११॥ युवाऽदत्तस्य धिष्ण्या युवाऽनीतस्य सूरिऽभिः अहःऽअहः वृषणा मह्यं शिक्षतं ॥१२॥ यः वां यज्ञेभिः आऽवृतः अधिऽवस्त्रा वधूःऽइव सपर्येन्या शुभे चक्राते अश्विना ॥१३॥ यः वां उरुव्यचःऽतमं चिकेतति नृऽपाय्यं वर्तिः अश्विना परि यातं अस्मऽयू० ॥१४॥ अस्मभ्यं सु वृषण्ऽवसू० यातं वर्तिः नृऽपाय्यं विषुद्रुहाऽइव यज्ञं ऊहथुः गिरा ॥१५॥२८॥ वाहिष्ठः वां हवानां स्तोमः दूतः हुवत् नरा युवाभ्यां भूतु अश्विना ॥१६॥ यत् अदः दिवः अर्णवे इषः वा मदथः गृहे श्रुतं इत् मे अमर्त्या ॥१७॥ उत स्या श्वेतऽयावरी वाहिष्ठा वां नदीनां सिंधुः हिरण्यऽवर्तनिः ॥१८॥ स्मत् एतया सुऽकीर्त्या अश्विना श्वेतया धिया वहेथे शुभ्रऽयावाना ॥१९॥ युक्ष्व हि त्वं रथऽसहा युवस्व पोष्या वसो आत् नः वायो मधु पिब अस्माकं सवना आ गहि ॥२०॥२९॥ तव वायो ऋतःऽपते त्वष्टुः जामातः अद्भुत अवांसि आ वृणीमहे ॥२१॥ त्वष्टुः जामातरं वयं ईशानं रायः ईमहे सुतऽवंतः वायुं द्युम्ना जनासः ॥२२॥ वायो याहि शिव आ दिवः वहस्व सु सुऽअश्वं वहस्व महः पृथुऽपक्षसा रथे ॥२३॥ त्वां हि सुसरःऽतमं नृ-

ऽसदनेषु हूमहे यावाणं न अश्वऽपृष्ठं मंहना ॥२४॥ सः त्वं नः देव मनसा वायो मंदानः अयियः कृधि वाजान् अपः धियः ॥२५॥३०॥

॥२७॥ अग्निः उक्थे पुरःऽहितः यावाणः बर्हिः अध्वरे ऋचा यामि मरुतः ब्रह्मणः पतिं देवान् अवः वरेण्यं॥१॥ आ पप्रुं गासि पृथिवीं वनस्पतीन् उषसा नक्तं ओषधीः विश्वे च नः वसवः विश्वऽवेदसः धीनां भूत प्रऽअवितारः॥२॥ प्र सु नः एतु अध्वरः अग्ना देवेषु पूर्व्यः आदित्येषु प्र वरुणे धृतऽव्रते मरुत्ऽसु विश्वऽभानुषु॥३॥ विश्वे हि स्म मनवे विश्वऽवेदसः भुवन् वृधे रिशादसः अरिष्टेभिः पायुऽभिः विश्वऽवेदसः यंत नः अवृकं छर्दिः ॥४॥ आ नः अद्य सऽमनसः गंत विश्वे सऽजोषसः ऋचा गिरा मरुतः देवि अदिते सदने पस्त्ये महि॥५॥३१॥ अभि प्रिया मरुतः या वः अश्वा हव्या मिच प्रऽयाथन आ बर्हिः इंद्रः वरुणः तुराः नरः आदित्यासः सदंतु नः॥६॥ वयं वः वृक्तऽबर्हिषः हितऽप्रयसः आनुषक् सुतऽसोमासः वरुण हवामहे मनुष्वत् इद्धऽअग्नयः॥७॥ आ प्र यात मरुतः विष्णो अश्विना पूषन् माकीनया धिया इंद्रः आ यातु प्रथमः सनिष्युऽभिः वृषा यः वृचऽहा गृणे ॥८॥ वि नः देवासः अदुहः अच्छिद्रं शर्म यच्छत न यत् दूरात् वसवः नु चित् अंतितः वरूथं आऽदधर्षति॥९॥ अस्ति हि वः सऽजात्यं रिशादसः देवासः अस्ति आप्यं प्र नः पूर्वस्मै सुविताय वोचत मक्षु सुम्नाय नव्यसे॥१०॥३२॥ इदा हि वः उपऽस्तुतिं इदा वामस्य भक्तये उप वः विश्वऽवेदसः नमस्युः आ असृक्षि अन्याँऽइव॥११॥ उत् ऊं स्यः वः सविता सुऽप्रनीतयः अस्थात् ऊर्ध्वः

वरेण्यः नि ह्वि३पादः चतु३ःपादः अर्थिनः अविष्यन् पतयि-ष्णवः॥१२॥ देवं३देवं वः अवसे देवं३देवं अभिष्टये देवं३देवं हु-वेम वाज३सातये गृणंतः देव्या धिया॥१३॥ देवासः हि स्म मनवे स३मन्यवः विश्वे साकं स३रातयः ते नः अद्य ते अपरं तुचे तु नः भवंतु वरिवः३विदः॥१४॥ प्र वः शंसामि अद्रुहः सं३स्थे उप३स्तुतीनां न तं धूर्तिः वरुण मित्र मर्त्यं यः वः धाम३भ्यः अविधत् ॥१५॥ प्र सः क्षयं तिरते वि महीः इषः यः वः वराय दाशति प्र प्र३जाभिः जायते धर्मणः परि अरिष्टः सर्वैः एधते ॥१६॥३३॥ ऋते सः विंदते युधः सु३गेभिः याति अध्वनः अर्यमा मित्रः वरुणः स३रातयः यं चायते स३जोषसः॥१७॥ अज्रे चित् अस्मै कृणुथ नि३ञ्चनं दुः३गे चित् आ सु३सरणं एषा चित् अस्मात् अशनिः परः नु सा असेधंती वि नश्यतु ॥१८॥ यत् अद्य सूर्ये उत्३यंति प्रियं३क्षचाः ऋतं दध यत् नि३मुचि प्र३बुधि विश्व३वेदसः यत् वा मध्यंदिने दिवः॥१९॥ यत् वा अभि३पित्वे असुराः ऋतं यते छर्दिः येम वि दाशुषे वयं तत् वः वसवः विश्व३वेदसः उप स्येयाम मध्ये आ॥२०॥ यत् अद्य सूरे उत्३इते यत् मध्यंदिने आ३तुचि वामं धत्थ मनवे विश्व३वेदसः जुह्वानाय प्र३चेतसे॥२१॥ वयं तत् वः सं३राजः आ वृणीमहे पुचः न वहु३पाय्यं अश्याम तत् आदित्याः जुह्वतः हविः येन वस्यः अनशामहै॥२२॥३४॥

॥२८॥ ये चिंशति चयः परः देवासः बर्हिः आ असदन् विदन् अह ह्विता असनन्॥१॥ वरुणः मित्रः अर्यमा स्मद्रातिः३साचः अग्नयः पत्नी३वंतः वषट्३कृताः॥२॥ ते नः गोपाः अपाच्याः ते उदक् ते इत्था न्यक् पुरस्तात् सर्वया विशा॥३॥ यथा वशंति देवाः

तथा इत् असत् तत् एषां नकिः आ मिनत् अरावा चन मर्त्यः ॥४॥ सप्तानां सप्त ऋष्टयः सप्त द्युम्नानि एषां सप्तो अधि श्रियः धिरे ॥५॥३५॥

॥२९॥ बभ्रुः एकः विषुणः सूनरः युवा अंजि अंक्ते हिरण्ययं ॥१॥ योनिं एकः आ ससाद द्योतनः अंतः देवेषु मेधिरः ॥२॥ वाशीं एकः बिभर्ति हस्ते आयसीं अंतः देवेषु निऽधुविः ॥३॥ वज्रं एकः बिभर्ति हस्ते आऽहितं तेन वृचाणि जिघ्नते ॥४॥ तिग्मं एकः बिभर्ति हस्ते आयुधं शुचिः उग्रः जलाषऽभेषजः ॥५॥ पथः एकः पीपाय तस्करः यथा एषः वेद निऽधीनां ॥६॥ चीणि एकः उरुऽगायः वि चक्रमे यत्र देवासः मदंति ॥७॥ विऽभिः द्वा चरतः एकया सह प्र प्रवासाऽइव वसतः ॥८॥ सदः द्वा चक्राते उपऽमा दिवि संऽराजा सर्पिःऽआसुती० ॥९॥ अंचंतः एकं महि साम मन्वत तेन सूर्यं अरोचयन् ॥१०॥३६॥

॥३०॥ नहि वः अस्ति अर्भकः देवासः न कुमारकः विश्वे सतःऽमहांतः इत् ॥१॥ इति स्तुतासः असथ रिशादसः ये स्थ चर्यः च चिंशत् च मनोः देवाः यज्ञियासः ॥२॥ ते नः चाध्वं ते अवत ते ऊं नः अधि वोचत मा नः पथः पित्र्यात् मानवात् अधि दूरं नैष्ट पराऽवतः ॥३॥ ये देवासः इह स्थन विश्वे वैश्वानराः उत अस्मभ्यं शर्म सऽप्रथः गवे अश्वाय यच्छत ॥४॥३७॥४॥

॥३१॥ यः यजाति यजाते इत् सुनवत् च पचाति च ब्रह्मा इत्

इंद्रस्य चाकनत् ॥१॥ पुरोळाशं यः अस्मै सोमं ररते आऽशिरं पात इत् तं शक्रः अंहसः॥२॥ तस्य द्युऽमान् असत् रथः देवऽजूतः सः शूशुवत् विश्वा वन्वन् अभिचिया॥३॥ अस्य प्रजाऽवंती गृहे असश्चंती दिवेऽदिवे इळा धेनुऽमती दुहे ॥४॥ या दंऽपंती० सऽमनसा सुनुतः आ च धावतः देवासः नित्यया आऽशिरा ॥५॥३८॥ प्रति प्राणयान् इतः सम्यंचा बर्हिः आशाते न ता वाजेषु वायतः॥६॥ न देवानां अपि हुतः सुऽमतिं न जुघुक्षतः अवः बृहत् विवासतः॥७॥ पुचिणा ता कुमारिणा विश्वं आयुः वि अश्नुतः उभा हिरण्यऽपेशसा॥८॥ वीतिऽहोचा कृतत्ऽवसू० दृशस्यंता अमृताय कं सं ऊर्धः रोमशं हतः देवेषु कृणुतः दुवः ॥९॥ आ शर्म पर्वतानां वृणीमहे नदीनां आ विष्णोः सचाऽभुवः ॥१०॥३९॥ आ एतु पूषा रयिः भगः स्वस्ति सर्वऽधातमः उरुः अध्वा स्वस्तये॥११॥ अरमतिः अनर्वणः विश्वः देवस्य मनसा आदित्यानां अनेहः इत्॥१२॥ यथा नः मित्रः अर्यमा वरुणः संति गोपाः सुऽगाः ऋतस्य पंथाः॥१३॥ अग्निं वः पूर्व्यं गिरा देवं ईळे वसूनां सपर्यंतः पुरुऽप्रियं मित्रं न क्षेचऽसाधसं॥१४॥ मक्षु देवऽवतः रथः शूरः वा पृतऽसु कासु चित् देवानां यः इत् मनः यजमानः इयक्षति अभि इत् अयंज्वनः भुवत्॥१५॥ न यजमानं रिष्यसि न सुन्वानं न देवऽयो० देवानां यः इत् मनः यजमानः इयक्षति अभि इत् अयंज्वनः भुवत्॥१६॥ नकिः तं कर्मणा नशत् न प्र योषत् न योषति देवानां यः इत् मनः यजमानः इयक्षति अभि इत् अयंज्वनः भुवत्॥१७॥ असत् अत्र सुऽवीर्यं उत त्यत् आशुऽअश्वं देवानां यः इत् मनः यजमानः इयक्षति अभि इत् अयंज्वनः भुवत्॥१८॥४०॥२॥

॥३२॥ प्र कृतानि ऋजीषिणः कण्वाः इंद्रस्य गाथया मदे सोमस्य वोचत॥१॥ यः सृबिंदं अनर्शनिं पिप्रुं दासं अहीशुवं वधीत् उग्रः रिणन् अपः॥२॥ नि अर्बुदस्य विष्टपं वर्ष्माणं बृहतः तिर कृषे तत् इंद्र पौंस्यं॥३॥ प्रति श्रुतायं वः धृषत् तूर्णीशं न गिरेः अधि हुवे सुऽशिप्रं ऊतये॥४॥ सः गोः अश्वस्य वि व्रजं मंदानः सोम्येभ्यः पुरं न शूर दर्षसि॥५॥१॥ यदि मे ररणः सुते उक्थे वा दधसे चनः आरात् उप स्वधा आ गहि॥६॥ वयं घ ते अपि स्मसि स्तोतारः इंद्र गिर्वणः त्वं नः जिन्व सोमऽपाः॥७॥ उत नः पितुं आ भर संऽरराणः अविंऽक्षितं मघंऽवन् भूरि ते वसु॥८॥ उत नः गोऽमतः कृधि हिरण्यऽवतः अश्विनः इळाभिः सं रभेमहि॥९॥ बृवत्ऽउक्थं हवामहे सप्रऽकरस्नं ऊतये साधु कृण्वंतं अवसे ॥१०॥२॥ यः संऽस्थे चित् शतऽक्रतुः आत् ईं कृणोति वृचऽहा जरितृऽभ्यः पुरुऽवसुः॥११॥ सः नः शक्रः चित् आ शकत् दानऽवान् अंतरऽआभरः इंद्रः विश्वाभिः ऊतिऽभिः॥१२॥ यः रायः अवनिः महान् सुऽपारः सुन्वतः सखा तं इंद्रं अभि गायत॥१३॥ आऽयंतारं महि स्थिरं पृतनासु श्रवःऽजितं भूरेः ईशानं ओजसा ॥१४॥ नकिः अस्य शचीनां निऽयंता सूनृतानां नकिः वक्ता न दात् इति॥१५॥३॥ न नूनं ब्रह्मणां ऋणं प्राप्नूनां अस्ति सुन्वतां न सोमः अप्रता पपे॥१६॥ पन्यें इत् उप गायत पन्यें उक्थानि शंसत ब्रह्म कृणोत पन्यें इत्॥१७॥ पन्यः आ दर्दिरत् शता सहस्रा वाजी अवृतः इंद्रः यः यज्वनः वृधः॥१८॥ वि सु चर स्वधाः अनु कृष्टीनां अनु आऽहुवः इंद्र पिब सुतानां॥१९॥ पिब स्वऽधैनवानां उत यः तुग्र्यें सचा उत अयं इंद्र यः तव॥२०॥४॥ अति इहि मन्युऽसाविनं सुसुऽवांसं उपऽअरण्ये इमं रातं सुतं पिब॥२१॥ इहि

तिस्रः पराऽवतः इहि पंच जनान् अति धेनाः इंद्र अवऽचाकशत् ॥ २२ ॥ सूर्यः रश्मिं यथा सृज आ त्वा यच्छंतु मे गिरः निम्नं आपः न सध्र्यक् ॥ २३ ॥ अध्वर्यो आ तु हि सिंच सोमं वीराय शिप्रिणे भरं सुतस्य पीतये ॥ २४ ॥ यः उन्नः फलिऽगं भिनत् न्यक् सिंधून् अवऽअसृजत् यः गोषु पक्वं धारयत् ॥ २५ ॥ ५ ॥ अहन् वृचं ऋचीषमः और्णऽवाभं अहीशुवं हिमेन अविध्यत् अर्बुदं ॥ २६ ॥ प्र वः उग्राय निःऽतुरे अर्चाऽहाय प्रऽसक्षिणे देवत्तं ब्रह्म गायत ॥ २७ ॥ यः विश्वानि अभि व्रता सोमस्य मदे अंधसः इंद्रः देवेषु चेतति ॥ २८ ॥ इह त्या सधऽमाद्या हरी हिरण्यऽकेश्या वोळ्हां अभि प्रयः हितं ॥ २९ ॥ अर्वाचं त्वा पुरुऽस्तुत प्रियमेधऽस्तुता हरी सोमऽपेयाय वक्षतः ॥ ३० ॥ ६ ॥

॥ ३३ ॥ वयं घ त्वा सुतऽवंतः आपः न वृक्तऽबर्हिषः पवित्रस्य प्रऽस्रवणेषु वृत्रऽहन् परि स्तोतारः आसते ॥ १ ॥ स्वरंति त्वा सुते नरः वसो निरेके उक्थिनः कदा सुतं तृषाणः ओकः आ गमः इंद्र स्वब्दीऽईव वंसगः ॥ २ ॥ कण्वेभिः धृष्णो आ धृषत् वाजं दर्षि सहस्रिणं पिशंगऽरूपं मघऽवन् विऽचर्षणे मक्षु गोऽमंतं ईमहे ॥ ३ ॥ पाहि गाय अंधसः मदे इंद्राय मेध्यऽअतिथे यः संऽमिश्लः हर्योः यः सुते सचा वज्री रथः हिरण्ययः ॥ ४ ॥ यः सुऽसव्यः सुऽदक्षिणः इनः यः सुऽऋतुः गृणे यः आऽकरः सहस्रा यः शतऽमघः इंद्रः यः पूःऽभित् आरितः ॥ ५ ॥ ७ ॥ यः धृषितः यः अवृतः यः अस्ति श्मश्नुषु श्रितः विभूतऽद्युम्नः च्यवनः पुरुऽस्तुतः क्रत्वा गौःऽईव शाकिनः ॥ ६ ॥ कः ईं वेद सुते सचा पिबंतं कत् वयः दधे अयं यः पुरः विऽभिनत्ति ओजसा मंदानः शिप्री अंधसः ॥ ७ ॥

दाना मृगः न वारणः पुरुऽचा चरथं दधे नकिः त्वा नि यमत् आ सुते गमः महान् चरसि ओजसा॥८॥ यः उग्रः सन् अनिऽस्तृतः स्थिरः रणाय संस्कृतः यदि स्तोतुः मघऽवा शृणवत् हवं न इंद्रः योषति आ गमत्॥९॥ सत्यं इत्था वृषा इत् असि वृषऽजूतिः नः अवृतः वृषा हि उग्र शृण्विषे पराऽवति वृषो अर्वाऽवति श्रुतः ॥१०॥८॥ वृषणः ते अभीशवः वृषा कशा हिरण्ययी वृषा रथः मघऽवन् वृषणा हरी वृषा त्वं शतऽक्रतो०॥११॥ वृषा सोता सुनोतु ते वृषन् ऋजीषिन् आ भर वृषा दधन्वे वृषणं नदीषु आ तुभ्यं स्यातः हरीणां॥१२॥ आ इंद्र याहि पीतये मधु शविष्ठ सोम्यं न अयं अच्छ मघऽवा शृणवत् गिरः ब्रह्म उक्था च सुऽक्रतुः ॥१३॥ वहंतु त्वा रथेऽस्यां आ हरयः रथऽयुजः तिरः चित् अर्ये सवनानि वृचऽहन् अन्येषां या शतऽक्रतो०॥१४॥ अस्माकं अद्य अंतमं स्तोमं धिष्व महाऽमह अस्माकं ते सवना संतु शंऽतमा मदाय द्युक्ष सोमऽपाः॥१५॥९॥ नहि सः तव नो मम शास्त्रे अन्यस्य रण्यति यः अस्मान् वीरः आ अनयत्॥१६॥ इंद्रः चित् घ तत् अब्रवीत् स्त्रियाः अशास्यं मनः उतो अह क्रतुं रघुं॥१७॥ सप्तीं चित् घ मदऽच्युता मिथुना वहतः रथं एव इत् धूः वृष्णः उतऽतरा॥१८॥ अधः पश्यस्व मा उपरि संऽतरां पादकौ हर मा ते कशऽप्लकौ दृशन् स्त्री हि ब्रह्मा बभूविथ॥१९॥१०॥

॥३४॥ आ इंद्र याहि हरिऽभिः उप कण्वस्य सुऽस्तुतिं दिवः अमुष्य शासतः दिवं यय दिवाऽवसो०॥१॥ आ त्वा यावा वदन् इह सोमी घोषेण यच्छतु दिवः अमुष्य शासतः दिवं यय दिवाऽवसो०॥२॥ अच वि नेमिः एषां उरां न धूनुते वृकः दिवः अ-

मुष्य शासंतः दिवं यय दिवाऽवसो० ॥३॥ आ त्वा कण्वाः इह अवसे हवंते वाजेऽसातये दिवः अमुष्य शासंतः दिवं यय दिवाऽवसो० ॥४॥ दधामि ते सुतानां वृष्णे न पूर्वऽपाय्यं दिवः अमुष्य शासंतः दिवं यय दिवाऽवसो० ॥५॥११॥ स्मत्ऽपुरंधिः नः आ गहि विश्वतःऽधीः नः ऊतये दिवः अमुष्य शासंतः दिवं यय दिवाऽवसो० ॥६॥ आ नः याहि महेऽमते सहस्रऽऊते शतेऽमघ दिवः अमुष्य शासंतः दिवं यय दिवाऽवसो० ॥७॥ आ त्वा होता मनुःऽहितः देवऽचा वक्षत् ईड्यः दिवः अमुष्य शासंतः दिवं यय दिवाऽवसो० ॥८॥ आ त्वा मदऽच्युता हरी श्येनं पक्षाऽइव वक्षतः दिवः अमुष्य शासंतः दिवं यय दिवाऽवसो० ॥९॥ आ याहि अर्यः आ परि स्वाहा सोमस्य पीतये दिवः अमुष्य शासंतः दिवं यय दिवाऽवसो० ॥१०॥१२॥ आ नः याहि उपऽश्रुति उक्थेषु रण्य इह दिवः अमुष्य शासंतः दिवं यय दिवाऽवसो० ॥११॥ सऽऋषैः आ सु नः गहि संऽभृतैः संभृतऽअश्वः दिवः अमुष्य शासंतः दिवं यय दिवाऽवसो० ॥१२॥ आ याहि पर्वतेभ्यः समुद्रस्य अधि विष्टपः दिवः अमुष्य शासंतः दिवं यय दिवाऽवसो० ॥१३॥ आ नः गव्यानि अश्व्या सहस्रा शूर दर्दहि दिवः अमुष्य शासंतः दिवं यय दिवाऽवसो० ॥१४॥ आ नः सहस्रऽशः भर अयुतानि शतानि च दिवः अमुष्य शासंतः दिवं यय दिवाऽवसो० ॥१५॥ आ यत् इंद्रः च दर्दहे सहस्रं वसुऽरोचिषः ओजिष्ठं अश्व्यं पशुं ॥१६॥ ये ऋज्राः वातऽरंहसः अरुषासः रघुऽस्यदः भ्राजंते सूर्यःऽइव ॥१७॥ पारावतस्य रातिषु द्रवत्ऽचक्रेषु आशुषु तिष्ठं वनस्य मध्ये आ ॥१८॥१३॥

॥३५॥ अग्निना इंद्रेण वरुणेन विष्णुना आदित्यैः रुद्रैः वसुऽभिः सचाऽभुवा सऽजोषसौ उषसा सूर्येण च सोमं पिबतं अश्विना ॥१॥ विश्वाभिः धीभिः भुवनेन वाजिना दिवा पृथिव्या अद्रिऽभिः सचाऽभुवा सऽजोषसौ उषसा सूर्येण च सोमं पिबतं अश्विना ॥२॥ विश्वैः देवैः चिऽभिः एकादशैः इह अत्ऽभिः मरुत्ऽभिः भृगुऽभिः सचाऽभुवा सऽजोषसौ उषसा सूर्येण च सोमं पिबतं अश्विना ॥३॥ जुषेथां यज्ञं बोधतं हवस्य मे विश्वा इह देवौ सवना अव गच्छतं सऽजोषसौ उषसा सूर्येण च आ इषं नः वोळ्हं अश्विना ॥४॥ स्तोमं जुषेथां युवशाऽइव कन्यनां विश्वा इह देवौ सवना अव गच्छतं सऽजोषसौ उषसा सूर्येण च आ इषं नः वोळ्हं अश्विना ॥५॥ गिरः जुषेथां अध्वरं जुषेथां विश्वा इह देवौ सवना अव गच्छतं सऽजोषसौ उषसा सूर्येण च आ इषं नः वोळ्हं अश्विना ॥६॥१४॥ हारिद्रवाऽइव पतथः वना इत् उप सोमं सुतं महिषाऽइव अव गच्छथः सऽजोषसौ उषसा सूर्येण च चिः वर्तिः यातं अश्विना ॥७॥ हंसौऽइव पतथः अध्वगौऽइव सोमं सुतं महिषाऽइव अव गच्छथः सऽजोषसौ उषसा सूर्येण च चिः वर्तिः यातं अश्विना ॥८॥ श्येनौऽइव पतथः हव्यऽदातये सोमं सुतं महिषाऽइव अव गच्छथः सऽजोषसौ उषसा सूर्येण च चिः वर्तिः यातं अश्विना ॥९॥ पिबतं च तृप्णुतं च आ च गच्छतं प्रऽजां च धत्तं द्रविणं च धत्तं सऽजोषसौ उषसा सूर्येण च ऊर्जं नः धत्तं अश्विना ॥१०॥ जयतं च प्र स्तुतं च प्र च अवतं प्रऽजां च धत्तं द्रविणं च धत्तं सऽजोषसौ उषसा सूर्येण च ऊर्जं नः धत्तं अश्विना ॥११॥ हतं च शचून् यतंतं च मिचिणः प्रऽजां च धत्तं द्रविणं च धत्तं सऽजोषसौ उषसा सूर्येण च ऊर्जं नः धत्तं अश्विना ॥१२॥१५॥

मित्रावरुणऽवंतौ उत धर्मंऽवंता मरुत्वंता जरितुः गच्छथः हवं सऽजोषसौ उषसा सूर्येण च आदित्यैः यातं अश्विना॥१३॥ अंगिरस्वंतौ उत विष्णुऽवंता मरुत्वंता जरितुःगच्छथः हवंसऽजोषसौ उषसा सूर्येण च आदित्यैः यातं अश्विना॥१४॥ ऋभुऽमंता वृषणा वाजऽवंता मरुत्वंता जरितुः गच्छथः हवं सऽजोषसौ उषसा सूर्येण च आदित्यैः यातं अश्विना॥१५॥ ब्रह्म जिन्वतं उत जिन्वतं धियः हतं रक्षांसि सेधतं अमीवाः सऽजोषसौ उषसा सूर्येण च सोमं सुन्वतः अश्विना॥१६॥ क्षत्रं जिन्वतं उत जिन्वतं नृन् हतं रक्षांसि सेधतं अमीवाः सऽजोषसौ उषसा सूर्येण च सोमं सुन्वतः अश्विना॥१७॥ धेनूः जिन्वतं उत जिन्वतं विशः हतं रक्षांसि सेधतं अमीवाः सऽजोषसौ उषसा सूर्येण च सोमं सुन्वतः अश्विना॥१८॥१६॥ अचेःऽइव शृणुतं पूर्व्यऽस्तुतिं श्यावऽअश्वस्य सुन्वतः मदऽच्युता सऽजोषसौ उषसा सूर्येण च अश्विना तिरःऽअह्नं॥१९॥ सर्गान्ऽइव सृजतं सुऽस्तुतीः उप श्यावऽअश्वस्य सुन्वतः मदऽच्युता सऽजोषसौ उषसा सूर्येण च अश्विना तिरःऽअह्नं॥२०॥ रश्मीन्ऽइव यच्छतं अध्वरान् उप श्यावऽअश्वस्य सुन्वतः मदऽच्युता सऽजोषसौ उषसा सूर्येण च अश्विना तिरःऽअह्नं॥२१॥ अर्वाक् रथं नि यच्छतं पिबतं सोम्यं मधु आ यातं अश्विना आ गतं अवस्युः वां अहं हुवे धत्तं रत्नानि दाशुषे॥२२॥ नमःऽवाकेप्रऽस्थिते अध्वरे नरा विवक्षणस्य पीतये आ यातं अश्विना आ गतं अवस्युः वां अहं हुवे धत्तं रत्नानि दाशुषे॥२३॥ स्वाहाऽकृतस्य तृंपतं सुतस्य देवौ अंधसः आ यातं अश्विना आ गतं अवस्युः वां अहं हुवे धत्तं रत्नानि दाशुषे॥२४॥१७॥

॥३६॥ अविता असि सुन्वतः वृक्ऽबर्हिषः पिब सोमं मदाय कं शतऽक्रतो॰ यं ते भागं अधारयन् विश्वाः सेहानः पृतनाः उरु जयः सं अप्सुऽजित् मरुत्वान् इंद्र सत्ऽपते ॥१॥ प्र अव स्तोतारं मघऽवन् अव त्वां पिब सोमं मदाय कं शतऽक्रतो॰ यं ते भागं अधारयन् विश्वाः सेहानः पृतनाः उरु जयः सं अप्सुऽजित् मरुत्वान् इंद्र सत्ऽपते ॥२॥ ऊर्जा देवान् अवसि ओजसा त्वां पिब सोमं मदाय कं शतऽक्रतो॰ यं ते भागं अधारयन् विश्वाः सेहानः पृतनाः उरु जयः सं अप्सुऽजित् मरुत्वान् इंद्र सत्ऽपते ॥३॥ जनिता दिवः जनिता पृथिव्याः पिब सोमं मदाय कं शतऽक्रतो॰ यं ते भागं अधारयन् विश्वाः सेहानः पृतनाः उरु जयः सं अप्सुऽजित् मरुत्वान् इंद्र सत्ऽपते ॥४॥ जनिता अश्वानां जनिता गवां असि पिब सोमं मदाय कं शतऽक्रतो॰ यं ते भागं अधारयन् विश्वाः सेहानः पृतनाः उरु जयः सं अप्सुऽजित् मरुत्वान् इंद्र सत्ऽपते ॥५॥ अचीनां स्तोमं अद्रिऽवः महः कृधि पिब सोमं मदाय कं शतऽक्रतो॰ यं ते भागं अधारयन् विश्वाः सेहानः पृतनाः उरु जयः सं अप्सुऽजित् मरुत्वान् इंद्र सत्ऽपते ॥६॥ श्यावऽअश्वस्य सुन्वतः तथा शृणु यथा अशृणोः अचेः कर्माणि कृण्वतः प्र चसदस्युं आविथ त्वं एकः इत् नृऽसह्ये इंद्र ब्रह्माणि वर्धयन् ॥७॥१८॥

॥३७॥ प्र इदं ब्रह्म वृचऽतूर्येषु आविथ प्र सुन्वतः शचीऽपते इंद्र विश्वाभिः ऊतिऽभिः माध्यंदिनस्य सवनस्य वृचऽहन् अनेद्य पिब सोमस्य वज्रिऽवः ॥१॥ सेहानः उग्र पृतनाः अभि दुहः शचीऽपते इंद्र विश्वाभिः ऊतिऽभिः माध्यंदिनस्य सवनस्य वृचऽहन्

अनेद्य पिब सोमस्य वज्रिऽवः॥२॥ एकऽराट् अस्य भुवनस्य राजसि शचीऽपते इंद्र विश्वाभिः ऊतिऽभिः माध्यंदिनस्य सवनस्य वृचऽहन् अनेद्य पिब सोमस्य वज्रिऽवः॥३॥ सऽस्यावाना यवयसि त्वं एकः इत् शचीऽपते इंद्र विश्वाभिः ऊतिऽभिः माध्यंदिनस्य सवनस्य वृचऽहन् अनेद्य पिब सोमस्य वज्रिऽवः॥४॥ क्षेमस्य च प्रऽयुजः च त्वं ईशिषे शचीऽपते इंद्र विश्वाभिः ऊतिऽभिः माध्यंदिनस्य सवनस्य वृचऽहन् अनेद्य पिब सोमस्य वज्रिऽवः॥५॥ क्षत्रायं त्वं अवसि न त्वं आविथ शचीऽपते इंद्र विश्वाभिः ऊतिऽभिः माध्यंदिनस्य सवनस्य वृचऽहन् अनेद्य पिब सोमस्य वज्रिऽवः॥६॥ श्यावऽअश्वस्य रेभतः तथा शृणु यथा अशृणोः अत्रेः कर्माणि कृण्वतः प्र चसदस्युं आविथ त्वं एकः इत् नृऽसह्ये इंद्र क्षत्राणि वर्धयन्॥७॥१९॥

॥३८॥ यज्ञस्य हि स्थः ऋत्विजा सस्नी वाजेषु कर्मऽसु इंद्राग्नी तस्य बोधतं॥१॥ तोशासा रथऽयावाना वृचऽहना अपराऽजिता इंद्राग्नी तस्य बोधतं॥२॥ इदं वां मदिरं मधु अधुक्षन् अद्रिऽभिः नरः इंद्राग्नी तस्य बोधतं॥३॥ जुषेथां यज्ञं इष्टये सुतं सोमं सधऽस्तुती॰ इंद्राग्नी आ गतं नरा॥४॥ इमा जुषेथां सवना येभिः हव्यानि ऊहथुः इंद्राग्नी आ गतं नरा॥५॥ इमां गायत्रऽवर्तनिं जुषेथां सुऽस्तुतिं मम इंद्राग्नी आ गतं नरा॥६॥२०॥ प्रातर्यावऽभिः आ गतं देवेभिः जेन्यावसू इंद्राग्नी सोमऽपीतये॥७॥ श्यावऽअश्वस्य सुन्वतः अत्रीणां शृणुतं हवं इंद्राग्नी सोमऽपीतये॥८॥ एव वां अह्वे ऊतये यथा अहुवंत मेधिराः इंद्राग्नी सोम-

ऽपीतये ॥ ९ ॥ आ अहं सरस्वतीऽवतोः इंद्राग्न्योः अवः वृणे याभ्यां गायत्रं ऋच्यते ॥ १० ॥ २१ ॥

॥ ३९ ॥ अग्निं अस्तोषि ऋग्मियं अग्निं ईळा यजध्यै अग्निः देवान् अनक्तु नः उभे हि विदथे कविः अंतः चरति दूत्यं नभंतां अन्यके समे ॥ १ ॥ नि अग्ने नव्यसा वचः तनूषु शंसं एषां नि अरातीः रराव्णां विश्वाः अर्यः अरातीः इतः युच्छंतु आऽमुरः नभंतां अन्यके समे ॥ २ ॥ अग्ने मन्मानि तुभ्यं कं घृतं न जुह्वे आसनि सः देवेषु प्र चिकिद्धि त्वं हि असि पूर्व्यः शिवः दूतः विवस्वतः नभंतां अन्यके समे ॥ ३ ॥ तत् ऽतत् अग्निः वयः दधे यथाऽयथा कृपण्यति ऊर्जाऽआहुतिः वसूनां शं च योः च मयः दधे विश्वस्यै देवऽहूत्यै नभंतां अन्यके समे ॥ ४ ॥ सः चिकेत सहीयसा अग्निः चित्रेण कर्मणा सः होता शश्वतीनां दक्षिणाभिः अभिऽवृतः इनोति च प्रतीव्यं नभंतां अन्यके समे ॥ ५ ॥ २२ ॥ अग्निः जाता देवानां अग्निः वेद मर्तानां अपीच्यं अग्निः सः द्रविणःऽदाः अग्निः द्वारा वि ऊर्णुते सुऽआहुतः नवीयसा नभंतां अन्यके समे ॥ ६ ॥ अग्निः देवेषु संऽवसुः सः विक्षु यज्ञियासु आ सः मुदा काव्या पुरु विश्वं भूमऽइव पुष्यति देवः देवेषु यज्ञियः नभंतां अन्यके समे ॥ ७ ॥ यः अग्निः सप्तऽमानुषः श्रितः विश्वेषु सिंधुषु तं आ अगन्म चिऽप्रस्त्यं मंधातुः दस्युहन्ऽतमं अग्निं यज्ञेषु पूर्व्यं नभंतां अन्यके समे ॥ ८ ॥ अग्निः चीणि चिऽधातूनि आ क्षेति विदथा कविः सः चीन् एकादशान् इह यक्षत् च पिप्रयत् च नः विप्रः दूतः परिऽकृतः नभंतां अन्यके समे ॥ ९ ॥ त्वं नः अग्ने आयुषु त्वं देवेषु पूर्व्य वस्वः

एकः इरज्यसि त्वां आपः परिऽसुतः परि यंति स्वऽसेतवः नभँतां अन्यके समे ॥१०॥२३॥

॥४०॥ इंद्राग्नी युवं सु नः सहँता दासथः रयिं येन हव्हा समत्ऽसु आ वीळु चित् सहिषीमहि अभिः वनाऽइव वातें इत् नभँतां अन्यके समे॥१॥ नहि वां वव्रयामहे अथ इंद्रँ इत् यजामहे शविंष्ठं नृणां नरँ सः नः कदा चित् अर्वता गमंत् आ वाजेऽसातये गमंत् आ मेधऽसातये नभँतां अन्यके समे॥२॥ ता हि मध्यँ भरांणां इंद्राग्नी अधिऽक्षितः तौ ऊं कविऽत्वना कवी पृच्छ्यमाना सखिऽयते सं धीतं अश्नुतं नरा नभँतां अन्यके समे॥३॥ अभि अर्च नभाकऽवत् इंद्राग्नी यजसा गिरा ययोः विश्वँ इदं जगंत् इयं द्यौः पृथिवी मही उपऽस्थे बिभृतः वसु नभँतां अन्यके समे॥४॥ प्र ब्रह्माणि नभाकऽवत् इंद्राग्निऽभ्यां इरज्यत या सप्तऽबुध्नं अर्णवं जिह्मऽबारं अपऽऊर्णुतः इंद्रः ईशानः ओजसा नभँतां अन्यके समे॥५॥ अपि वृश्च पुराणऽवत् वततेःऽइव गुष्पितं ओजः दासस्य दंभय वयं तत् अस्य संऽभृतं वसु इंद्रेण वि भजेमहि नभँतां अन्यके समे॥६॥२४॥ यत् इंद्राग्नी जनाः इमे विऽह्वयँते तना गिरा अस्माकेभिः नृऽभिः वयं ससह्याम पृतन्यतः वनुयाम वनुष्यतः नभँतां अन्यके समे॥७॥ या नु श्वेतौ अवः दिवः उत्ऽचरांतः उप द्युऽभिः इंद्राग्न्योः अनु व्रतं उहानाः यंति सिंधवः यान् सीं बंधात् अमुंचतां नभँतां अन्यके समे॥८॥ पूर्वीः ते इंद्र उपऽमातयः पूर्वीः उत प्रऽशस्तयः सूनोँ हिन्वस्य हरिऽवः वस्वः वीरस्य आऽपृचः याः नु साधँत नः धियः नभँतां अन्यके समे॥९॥ तं शिशीत सुवृक्तिऽभिः त्वेषं सत्वानं ऋग्मियँ

उतो नु चित् यः ओजसा शुष्णस्य आंडानि भेदति जेषत् स्वः-ऽवतीः अपः नभँतां अन्यके समे॥१०॥ तं शिशीत सुऽअध्वरं सत्यं सवानं ऋत्वियं उतो नु चित् यः ओहते आंडा शुष्णस्य भेदति अजैः स्वःऽवतीः अपः नभँतां अन्यके समे॥११॥ एव इंद्राग्निऽभ्यां पितृऽवत् नवीयः मंधातृऽवत् अंगिरस्वत् अवाचि चिऽधातुना शर्मणा पातं अस्मान् वयं स्याम पतयः रयीणां ॥१२॥२५॥

॥४१॥ अस्मै ऊं सु प्रऽभूतये वरुणाय मरुत्ऽभ्यः अर्चं विदुःऽतरेभ्यः यः धीता मानुषाणां पश्वः गाःऽइव रक्षति नभँतां अन्यके समे॥१॥ तं ऊं सु समना गिरा पितॄणां च मन्मऽभिः नाभाकस्य प्रशस्तिऽभिः यः सिंधूनां उप उत्ऽअये सप्रऽस्वसा सः मध्यमः नभँतां अन्यके समे॥२॥ सः क्षपः परि सस्वजे नि उस्रः मायया दधे सः विश्वं परि दर्शतः तस्य वेनीः अनु व्रतं उषः तिस्रः अवर्धयन् नभँतां अन्यके समे॥३॥ यः ककुभः निऽधारयः पृथिव्यां अधि दर्शतः सः माता पूर्व्ये पदे तत् वरुणस्य सप्सदे सः हि गोपाःऽइव इर्यः नभँतां अन्यके समे॥४॥ यः धर्ता भुवनानां यः उस्राणां अपीच्या वेद नामानि गुह्या सः कविः काव्या पुरु रूपं द्यौःऽइव पुष्यति नभँतां अन्यके समे॥५॥२६॥ यस्मिन् विश्वानि काव्या चक्रे नाभिःऽइव श्रिता चितं जूती सपर्यत व्रजे गावः न संऽयुजे युजे अश्वान् अयुक्षत नभँतां अन्यके समे॥६॥ यः आसु अक्तः आऽशये विश्वा जातानि एषां परि धामानि मर्मृशत् वरुणस्य पुरः गये विश्वे देवाः अनु व्रतं नभँतां अन्यके समे॥७॥ सः समुद्रः अपीच्यः तुरः द्यांऽइव रोहति नि यत् आसु यजुः दधे

सः मायाः अर्चिना पदा अस्तृणात् नाकं आ अरुहत् नभंतां अन्यके समे॥८॥ यस्य श्वेता विऽचक्षणा तिस्रः भूमीः अधिऽक्षितः चिः उत्ऽतराणि पप्रतुः वरुणस्य ध्रुवं सदः सः सप्तानां इरज्यति नभंतां अन्यके समे॥९॥ यः श्वेतान् अधिऽनिर्निजः चक्रे कृष्णान् अनु व्रता सः धामं पूर्व्यं ममे यः स्कंभेन वि रोदसी अजः न द्यां अधारयत् नभंतां अन्यके समे॥१०॥२७॥

॥ ४२ ॥ अस्तभ्नात् द्यां असुरः विश्वऽवेदाः अमिमीत वरिमाणं पृथिव्याः आ असीदत् विश्वा भुवनानि संऽराट् विश्वा इत् तानि वरुणस्य व्रतानि॥१॥ एव वंदस्व वरुणं बृहंतं नमस्य धीरं अमृतस्य गोपां सः नः शर्म त्रिऽवरूथं वि यंसत् पातं नः द्यावापृथिवी उपऽस्थे॥२॥ इमां धियं शिक्षमाणस्य देव क्रतुं दक्षं वरुण संशिशाधि यया अति विश्वा दुःऽइता तरेम सुऽतर्माणं अधि नावं रुहेम॥३॥ आ वां यावाणः अश्विना धीभिः विप्राः अचुच्यवुः नासत्या सोमऽपीतये नभंतां अन्यके समे॥४॥ यथा वां अत्रिः अश्विना गीःऽभिः विप्रः अजोहवीत् नासत्या सोमऽपीतये नभंतां अन्यके समे॥५॥ एव वां अद्ये ऊतये यथा अहुवंत मेधिराः नासत्या सोमऽपीतये नभंतां अन्यके समे॥६॥२८॥५॥

॥ ४३ ॥ इमे विप्रस्य वेधसः अग्नेः अस्तृतऽयज्वनः गिरः स्तोमासः ईरते॥१॥ अस्मै ते प्रतिऽहर्यते जातऽवेदः विऽचर्षणे अग्ने जनामि सुऽस्तुतिं॥२॥ आरोकाःऽइव घ इत् अह तिग्माः अग्ने तव त्विषः दतऽभिः वनानि वप्सति॥३॥ हरयः धूमऽकेतवः वा-

तंऽजूताः उप द्यविं यतँते वृथक् अग्नयः॥४॥ एते त्ये वृथक् अग्नयः इद्धासः सं अहृक्षत उषसाँऽइव केतवः॥५॥२९॥ कृष्णा रजाँसि पत्सुतः प्रऽयानं जातऽवेदसः अग्निः यत् रोधति क्षमि॥६॥ धासिं कृण्वानः ओषधीः बप्सत् अग्निः न वायति पुनः यन् तरुणीः अपि॥७॥ जिह्वाभिः अह नंनमत् अर्चिषा जंजृणाऽभवन् अग्निः वनेषु रोचते॥८॥ अप्ऽसु अग्ने सधिः तव सः ओषधीः अनु रुध्यसे गर्भे सन् जायसे पुनः॥९॥ उत अग्ने तव तत् घृतात् अर्चिः रोचते आऽहुतं निंसानं जुह्वः मुखे॥१०॥३०॥ उक्षऽअंचाय वशाऽअंचाय सोमऽपृष्ठाय वेधसे स्तोमैः विधेम अग्नये॥११॥ उत त्वा नमसा वयं होतः वरेण्यऽक्रतो॰ अग्ने समित्ऽभिः ईमहे॥१२॥ उत त्वा भृगुऽवत् शुचे मनुष्वत् अग्ने आऽहुत अंगिरस्वत् हवामहे॥१३॥ त्वं हि अग्ने अग्निना विप्रः विप्रेण सन् सुता सखा सख्या सऽइध्यसे॥१४॥ सः त्वं विप्राय दाशुषे रयिं देहि सहस्रिणं अग्ने वीरऽवंतीं इषं॥१५॥३१॥ अग्ने भातः सहःऽकृत रोहित्ऽअश्व शुचिऽव्रत इमं स्तोमं जुषस्व मे॥१६॥ उत त्वा अग्ने मम स्तुतः वाश्राय प्रतिऽहर्यते गोऽस्यं गावःऽइव आशत॥१७॥ तुभ्यं ताः अंगिरःऽतम विश्वाः सुऽक्षितयः पृथक् अग्ने कामाय येमिरे॥१८॥ अग्निं धीभिः मनीषिणः मेधिरासः विपःऽचितः अग्नऽसद्याय हिन्विरे॥१९॥ तं त्वां अज्मेषु वाजिनं तन्वानाः अग्ने अध्वरं वहिं होतारं ईळते॥२०॥३२॥ पुरुऽचा हि सऽइदङ् असि विशः विश्वाः अनु प्रऽभुः समत्ऽसु त्वा हवामहे॥२१॥ तं ईळिष्व यः आऽहुतः अग्निः विऽभाजते घृतैः इमं नः मृणवत् हवं॥२२॥ तं त्वा वयं हवामहे शृण्वंतं जातऽवेदसं अग्ने घंतं अप द्विषः॥२३॥ विशां राजानं अद्भुतं अधिऽअक्षं धर्मणां इमं अग्निं ईळे सः ऊं

श्रवत्॥२४॥ अग्निं विश्वायुऽवेपसं मर्यं न वाजिनं हितं सप्तिं न वाजयामसि॥२५॥३३॥ घ्नन् मृधाणि अप द्विषः दहन् रक्षाँसि विश्वहा अग्ने तिग्मेन दीदिहि॥२६॥ यं त्वा जनासः इंधते मनुष्वत् अंगिरःऽतम अग्ने सः बोधि मे वचः॥२७॥ यत् अग्ने दिविऽजाः असि अप्सुऽजाः वा सहःऽकृत तं त्वा गीःऽभिः हवामहे॥२८॥ तुभ्यं घ इत् ते जनाः इमे विश्वाः सुऽक्षितयः पृथक् धासिं हिन्वंति अत्तवे॥२९॥ ते घ इत् अग्ने सुऽआर्यः अहा विश्वा नृऽचक्षसः तरंतः स्याम दुःऽगहा॥३०॥३४॥ अग्निं मंद्रं पुरुऽप्रियं शीरं पावकऽशोचिषं हृत्ऽभिः मंद्रेभिः ईमहे॥३१॥ सः त्वं अग्ने विभाऽवसुः सृजन् सूर्यः न रश्मिऽभिः शर्धन् तमांसि जिघ्नसे॥३२॥ तत् ते सहस्वः ईमहे दावं यत् न उपऽदस्यति तत् अग्ने वायं वसु ॥३३॥३५॥

॥४४॥ संऽइधा अग्निं दुवस्यत घृतैः बोधयत अतिथिं आ अस्मिन् हव्या जुहोतन॥१॥ अग्ने स्तोमं जुषस्व मे वर्धस्व अनेन मन्मना प्रति सुऽउक्तानि हर्य नः॥२॥ अग्निं दूतं पुरः दधे हव्यऽवाहं उप ब्रुवे देवान् आ सादयात् इह॥३॥ उत् ते बृहंतः अर्चयः संऽइधानस्य दीदिऽवः अग्ने शुक्रासः ईरते॥४॥ उप त्वा जुह्वः मम घृताचीः यंतु हर्यत अग्ने हव्या जुषस्व नः॥५॥३६॥ मंद्रं होतारं ऋत्विजं चित्रऽभानुं विभाऽवसुं अग्निं ईळे सः ऊं श्रवत्॥६॥ प्रत्नं होतारं ईड्यं जुष्टं अग्निं कविऽक्रतुं अध्वराणां अभिऽश्रियं॥७॥ जुषाणः अंगिरःऽतम इमा हव्यानि आनुषक् अग्ने यज्ञं नय ऋतुऽथा॥८॥ संऽइधानः ऊं सत्य शुक्रऽशोचे इह आ वह चिकित्वान् दैव्यं जनं॥९॥ विप्रं होतारं अदुहं धूमऽकेतुं

विभाऽवसुं यज्ञानां केतुं ईमहे ॥१०॥३७॥ अग्ने नि पाहि नः त्वं प्रति स्म देव रिषतः भिंधि द्वेषः सहःऽकृत ॥११॥ अग्निः प्रत्नेन मन्मना शुंभानः तन्वं स्वां कविः विप्रेण ववृधे ॥१२॥ ऊर्जः नपातं आ हुवे अग्निं पावकऽशोचिषं अस्मिन् यज्ञे सुऽअध्वरे ॥१३॥ सः नः मित्रऽमहः त्वं अग्ने शुक्रेण शोचिषा देवैः आ सत्सि बर्हिषि ॥१४॥ यः अग्निं तन्वः दमे देवं मर्तः सपर्यति तस्मै इत् दीदयत् वसु ॥१५॥३८॥ अग्निः मूर्धा दिवः ककुत् पतिः पृथिव्याः अयं अपां रेताँसि जिन्वति ॥१६॥ उत् अग्ने शुचयः तव शुक्राः भ्राजंतः ईरते तव ज्योतींषि अर्चयः ॥१७॥ ईशिषे वार्यस्य हि दात्रस्य अग्ने स्वःऽपतिः स्तोता स्यां तव शर्मणि ॥१८॥ त्वां अग्ने मनीषिणः त्वां हिन्वंति चित्तिऽभिः त्वां वर्धंतु नः गिरः ॥१९॥ अदब्धस्य स्वधाऽवंतः दूतस्य रभंतः सदा अग्नेः सख्यं वृणीमहे ॥२०॥३९॥ अग्निः शुचिव्रतऽतमः शुचिः विप्रः शुचिः कविः शुचिः रोचते आऽहुतः ॥२१॥ उत त्वा धीतयः मम गिरः वर्धंतु विश्वहा अग्ने सख्यस्य बोधि नः ॥२२॥ यत् अग्ने स्यां अहं त्वं त्वं वा घ स्याः अहं स्युः ते सत्याः इह आऽशिषः ॥२३॥ वसुः वसुऽपतिः हि कं असि अग्ने विभाऽवसुः स्याम ते सुऽमतौ अपि ॥२४॥ अग्ने घृतऽवंताय ते समुद्रायऽइव सिंधवः गिरः वाश्रासः ईरते ॥२५॥४०॥ युवानं विश्पतिं कविं विश्वऽअदं पुरुऽवेपसं अग्निं शुंभामि मन्मऽभिः ॥२६॥ यज्ञानां रथ्यं वयं तिग्मऽजंभाय वीळवे स्तोमैः इषेम अग्नये ॥२७॥ अयं अग्ने त्वे' अपि जरिता भूतु सत्य तस्मै पावक मृळय ॥२८॥ धीरः हि असि अग्नऽसत् विप्रः न जागृविः सदा अग्ने दीदयसि द्यवि ॥२९॥ पुरा अग्ने दुःऽइतेभ्यः पुरा मृध्रेभ्यः कवे प्र नः आयुः वसो' तिर ॥३०॥४१॥

॥४५॥ आ घ ये अग्निं इंधते स्तृणंति बर्हिः आनुषक् येषाँ इंद्रः युवा सखा॥१॥ बृहन् इत् इध्मः एषां भूरि शस्तं पृथुः स्वरुः येषाँ इंद्रः युवा सखा॥२॥ अयुंजः इत् युधा वृतं पूरुः आ अजाति सत्वभिः येषाँ इंद्रः युवा सखा॥३॥ आ बुंदं वृत्रऽहा ददे जातः पृच्छत् वि मातरं के उ्याः के ह मृण्विरे॥४॥ प्रति त्वा शवसी वदत् गिरौ अप्सः न योधिषत् यः ते शत्रुऽत्वं आऽचके॥५॥४२॥ उत त्वं मघऽवन् शृणु यः ते वष्टि ववक्षि तत् यत् वीळयासि वीळु तत्॥६॥ यत् आजिं याति आजिऽकृत् इंद्रः स्वश्वऽयुः उप रथिऽतमः रथिनाँ॥७॥ वि सु विश्वाः अभिऽयुजः वज्रिन् विष्वक् यथा वृह भवं नः सुश्रवःऽतमः॥८॥ अस्माकँसु रथं पुरः इंद्रः कृणोतु सातये न यं धूर्वंति धूर्तयः॥९॥ वृज्यामं ते परि द्विषः अरँ ते शक्र दावने गमेम इत् इंद्र गोऽमंतः॥१०॥४३॥ शनैः चित् यंतः अद्रिऽवः अश्वऽवंतः शतऽग्विनः वि वक्षणाः अनेहसः॥११॥ ऊर्ध्वा हि ते दिवेऽदिवे सहस्रा सूनृता शता जरितृऽभ्यः विऽमंहते॥१२॥ विद्म हि त्वा धनंऽजयं इंद्र हव्हा चित् आऽरुजं आऽदारिणँ यथा गयँ॥१३॥ ककुहं चित् त्वा कवे मंदंतु धृष्णो इंदवः आ त्वा पणिं यत् ईमहे॥१४॥ यः ते रेवान् अदाशुरिः प्रऽममर्ष मघत्तये तस्य नः वेदः आ भर॥१५॥४४॥ इमे ऊं त्वा वि चक्षते सखायः इंद्र सोमिनः पुष्टऽवंतः यथा पशुं॥१६॥ उत त्वा अबधिरं वयं शृत्ऽकर्णं संतं ऊतये दूरात् इह हवामहे॥१७॥ यत् शुश्रुयाः इमं हवं दुःऽमर्षं चक्रियाः उत भवैः आपिः नः अंतमः॥१८॥ यत् चित् हि ते अपि व्यथिः जगन्वांसः अमंन्महि गोऽदाः इत् इंद्र बोधि नः॥१९॥ आ त्वा रंभं न जिव्रयः ररभ्म शवसः पते उश्मसि त्वा सधऽस्थे आ॥२०॥४५॥ स्तोत्रं इंद्राय गायत पुरुऽनृम्णाय सत्वने नकिः यं वृ-

रवते युधि ॥२१॥ अभि त्वा वृषभ सुते सुतं सृजामि पीतये तृंप वि अस्रुहि मदं ॥२२॥ मा त्वा मूराः अविष्यवः मा उपऽहस्वानः आ दभन् माकीं ब्रह्मऽद्विषः वनः ॥२३॥ इह त्वा गोऽपरीणसा महे मंदंतु राधसे सरः गौरः यथा पिब ॥२४॥ या वृचऽहा पराऽवति सना नवा च चुच्युवे ता संसत्ऽसु प्र वोचत ॥२५॥४६॥ अपिबत् कद्रुवः सुतं इंद्रः सहस्रऽबाह्वे अंधसो अदेदिष्ट पौंस्यं ॥२६॥ सत्यं तत् तुर्वशे यदौ विदानः अहूवाय्यं वि आनट् तुर्वणे शमि ॥२७॥ तरणिं वः जनानां चदं वाजस्य गोऽमतः समानं ऊं प्र शंसिषं ॥२८॥ ऋभुक्षणं न वर्तवे उक्थेषु तुग्र्यऽवृधं इंद्रं सोमे सचा सुते ॥२९॥ यः कृंतत् इत् वि योन्यं चिऽशोकाय गिरिं पृथुं गोभ्यः गातुं निःऽएतवे ॥३०॥४७॥ यत् दधिषे मनस्यसि मंदानः प्र इत् इयक्षसि मा तत् कः इंद्र मृळय ॥३१॥ दभ्रं चित् हि त्वाऽवतः कृतं शृण्वे अधि क्षमि जिगातु इंद्र ते मनः ॥३२॥ तवं इत् ऊं तां सुऽकीर्तयः असन् उत प्रऽशस्तयः यत् इंद्र मृळयासि नः ॥३३॥ मा नः एकस्मिन् आगंसि मा द्वयोः उत त्रिषु वधीः मा शूर भूरिषु ॥३४॥ बिभयं हि त्वाऽवतः उयात् अभिऽप्रभंगिनः दस्मात् अहं शृतिऽसहः ॥३५॥४८॥ मा सख्युः शूनं आ विदे मा पुचस्य प्रभुऽवसो° आऽवृत्वत् भूतु ते मनः ॥३६॥ कः नु मर्यः अमिथितः सखा सखायं अब्रवीत् जहा कः अस्मत् ईषते ॥३७॥ एवारे वृषभ सुते असिन्वन् भूरि आवयः श्वघ्नीऽइव निऽवता चरन् ॥३८॥ आ ते एता वचःऽयुजा हरी गृभ्णे सुमत्ऽरथा यत् ईं ब्रह्मऽभ्यः इत् ददः ॥३९॥ भिंधि विश्वाः अप द्विषः परि बाधः जहि मृधः वसु स्पार्हं तत् आ भर ॥४०॥ यत् वीळौ इंद्र यत् स्थिरे यत् पर्शाने पराऽभृतं वसु स्पार्हं तत् आ भर ॥४१॥ यस्य ते

विश्वऽमानुषः भूरेः दत्तस्य वेदति वसु स्पार्हं तत् आ भर ॥४२॥
॥४९॥ ३॥

॥४६॥ त्वाऽवंतः पुरुऽवसो॰ वयं इंद्र प्रऽनेतः॰ स्मसि स्थातः हरीणां ॥१॥ त्वां हि सत्यं अद्रिऽवः विप्र दातारं इषां विप्र दातारं रयीणां ॥२॥ आ यस्य ते महिमानं शतंऽऊते शतंऽऋतो॰ गीःऽभिः गृणंति कारवः ॥३॥ सुऽनीथः घ सः मर्त्यः यं मरुतः यं अर्यमा मित्रः पांति अदुहः ॥४॥ दधानः गोऽमत् अश्वऽवत् सुऽवीर्यं आदित्यऽजूतः एधते सदा राया पुरुऽस्पृहा ॥५॥१॥ तं इंद्रं दानं ईमहे शवसानं अभीर्वे ईशानं रायः ईमहे ॥६॥ तस्मिन् हि संति ऊतयः विश्वाः अभीरवः सचा तं आ वहंतु सप्तयः पुरुऽवसुं मदाय हरयः सुतं ॥७॥ यः ते मदः वरेण्यः यः इंद्र वृत्रहन्ऽतमः यः आऽदृदिः स्वः नृऽभिः यः पृतनासु दुस्तरः ॥८॥ यः दुस्तरः विश्वऽवार अवाय्यः वाजेषु अस्ति तरुता सः नः शविष्ठ सवना आ वसो गहि गमेम गोऽमति व्रजे ॥९॥ गव्यो सु नः यथा पुरा अश्वऽया उत रथऽया वरिवस्य महाऽमह ॥१०॥२॥ नहि ते शूर राधसः अंतं विंदामि सचा दशस्य नः मघऽवन् नु चित् अद्रिऽवः धियः वाजेभिः आविथ ॥११॥ यः चर्षणिऽप्राः अवयत्ऽसखा विश्वा इत् सः वेद जनिम पुरुऽस्तुतः तं विप्रं मानुषा युगा इंद्रं हवंते तविषं यतऽस्रुचः ॥१२॥ सः नः वाजेषु अविता पुरुऽवसुः पुरःऽस्थाता मघऽवा वृत्रऽहा भुवत् ॥१३॥ अभि वः वीरं अंधसः मदेषु गाय गिरा महा विऽचेतसं इंद्रं नाम श्रुत्यं शाकिनं वचः यथा ॥१४॥ ददिः रेक्णः तन्वे ददिः वसु ददिः वाजेषु पुरुऽहूत वाजिनं

नूनं अर्थ॥१५॥३॥ विश्वेषां इज्जयंतं वसूनां ससद्वांसं चित् अस्य वर्पसः कुप ऽयतः नूनं अति अर्थ॥१६॥ महः सु वः अरं इषे स्तवामहे मीळ्हुषे अरं ऽगमाय जग्मये यज्ञेभिः गीः ऽभिः विश्व ऽमनुषां मरुतां इयक्षसि गाये त्वा नमसा गिरा॥१७॥ ये पातयंते अज्मं ऽभिः गिरीणां स्नु ऽभिः एषां यज्ञं महि ऽस्वनीनां सुम्नं तुविऽस्वनीनां प्र अध्वरे॥१८॥ प्र ऽभंगं दुः ऽमतीनां इंद्र शविष्ठ आ भर रयिं अस्मभ्यं युज्यं चोदयत् ऽमते ज्येष्ठं चोदयत् ऽमते ॥१९॥ सनितः सु ऽसनितः उग्र चित्र चेतिष्ठ सूनृत प्र ऽसहा सं ऽराट् सहुरिं सहंतं भुज्युं वाजेषु पूर्व्यं॥२०॥४॥ आ सः एतु यः ईवत् आ अदेवः पूर्ते आ ऽददे यथा चित् वशः अश्व्यः पृथु ऽश्रवसि कानीते अस्याः वि ऽउषिं आ ऽददे॥२१॥ षष्टिं सहस्रा अश्व्यस्य अयुता असनं उष्ट्रानां विंशतिं शता दश श्यावीनां शता दश चि ऽअरुषीणां दश गवां सहस्रा॥२२॥ दश श्यावाः कृधत् ऽरयः वीत ऽवारासः आशवः मथ्राः नेमिं नि ववृतुः॥२३॥ दानासः पृथु ऽश्रवसः कानीतस्य सु ऽराधसः रथं हिरण्ययं ददत् महिष्ठः सूरिः अभूत् वर्षिष्ठं अकृत श्रवः॥२४॥ आ नः वायो महे तने याहि मखाय पाजसे वयं हि ते चकृम भूरि दावने सद्यः चित् महि दावने॥२५॥५॥ यः अश्वेभिः वहते वस्ते उस्राः चिः सप्त सप्तीनां एभिः सोमेभिः सोमसुत् ऽभिः सोम ऽपाः दानाय शुक्रपूत ऽपाः॥२६॥ यः मे इमं चित् ऊं त्मना अमंदत् चित्रं दावने अर्ङे अक्षे नहुषे सु ऽकृत्वनि सुकृत ऽतराय सु ऽक्रतुः॥२७॥ उच्थ्ये वपुषि यः स्व ऽराट् उत वायो घृत ऽस्नाः अश्व ऽइषितं रजः ऽइषितं शुना ऽइषितं प्र अज्म तत् इदं नु तत्॥२८॥ अध प्रियं इषिराय षष्टिं सहस्रा असनं अश्वानां इत् न वृष्णां॥२९॥

गावः न यूथं उप यंन्ति वध्रयः उप मा आ यंन्ति वध्रयः॥३०॥ अध यत् चारथे गणे शतं उष्ट्रान् अचिक्रदत् अध श्वित्नेषु विंशतिं शता॥३१॥ शतं दासे वल्बूथे विप्रः तरुक्षे आ ददे ते ते वायो इमे जनाः मदंन्ति इंद्र ऽगोपाः मदंन्ति देव ऽगोपाः॥३२॥ अध स्या योषणा मही प्रतीची वशं अप्यं अधि ऽरुक्मा वि नीयते॥३३॥ ६॥

॥४७॥ महि वः महतां अवः वरुण मित्र दाशुषे यं आदित्याः अभि द्रुहः रक्षथ न ईं अघं नशत् अनेहसः वः ऊतयः सु ऽऊतयः वः ऊतयः॥१॥ विद देवाः अघानां आदित्यासः अप ऽआकृतिं पक्षा वयः यथा उपरि वि अस्मे शर्म यच्छत अनेहसः वः ऊतयः सु ऽऊतयः वः ऊतयः॥२॥ वि अस्मे अधि शर्म तत् पक्षा वयः न यंतन विश्वानि विश्व ऽवेदसः वरूथ्या मनामहे अनेहसः वः ऊतयः सु ऽऊतयः वः ऊतयः॥३॥ यस्मै अरासत क्षयं जीवातुं च प्र ऽचेतसः मनोः विश्वस्य घ इत् इमे आदित्याः रायः ईशते अनेहसः वः ऊतयः सु ऽऊतयः वः ऊतयः॥४॥ परि नः वृणजन् अघा दुः ऽगानि रथ्यः यथा स्याम इत् इंद्रस्य शर्मणि आदित्यानां उत अवसि अनेहसः वः ऊतयः सु ऽऊतयः वः ऊतयः॥५॥७॥ परि ऽहृता इत् अना जनः युष्माऽदत्तस्य वायति देवाः अदब्धं आशु वः यं आदित्याः अहेतन अनेहसः वः ऊतयः सु ऽऊतयः वः ऊतयः॥६॥ न तं तिग्मं चन त्यजः न द्रासत् अभि तं गुरु यस्मै ऊं शर्म स ऽप्रथः आदित्यासः अरांध्वं अनेहसः वः ऊतयः सु ऽऊतयः वः ऊतयः॥७॥ युष्मे देवाः अपि ष्मसि युधयंतः ऽइव वर्म ऽसु यूयं महः नः एनसः यूयं अर्भात् उरुष्यत अनेहसः वः ऊतयः सु ऽऊतयः वः ऊतयः॥८॥ अदितिः नः उरुष्यतु अदितिः शर्म यं-

च्छतु माता मित्रस्य रेवतः अर्यम्णः वरुणस्य च अनेहसः वः ऊतयः सुऽऊतयः वः ऊतयः ॥९॥ यत् देवाः शर्म शरणं यत् भद्रं यत् अनातुरं चिऽधातु यत् वरूथ्यं तत् अस्मासु वि यंतन अने-हसः वः ऊतयः सुऽऊतयः वः ऊतयः ॥१०॥८॥ आदित्याः अवं हि ख्यत अधि कूलात्ऽइव स्पशः सुऽनीर्थे अर्वतः यथा अनु नः नेषथ सुऽगं अनेहसः वः ऊतयः सुऽऊतयः वः ऊतयः ॥११॥ न इह भद्रं रक्षस्विने न अवऽये न उपऽये उत गवे च भद्रं धेनवे वीराय च श्रवस्यते अनेहसः वः ऊतयः सुऽऊतयः वः ऊतयः ॥१२॥ यत् आविः यत् अपीच्यं देवासः अस्ति दुःऽकृतं चिते तत् विश्वं आग्ने आरे अस्मत् दधातन अनेहसः वः ऊतयः सुऽऊतयः वः ऊतयः ॥१३॥ यत् च गोषु दुःस्वप्न्यं यत् च अस्मे दुहितः दिवः चिताय तत् विभाऽवरि आप्राय परा वह अनेहसः वः ऊतयः सुऽऊतयः वः ऊतयः ॥१४॥ निःऽकं वा घ कृणवते सजं वा दुहितः दिवः चिते दुःऽस्वप्न्यं सर्वं आग्ने परि द्मसि अनेहसः वः ऊतयः सुऽऊतयः वः ऊतयः ॥१५॥९॥ तत्ऽअंचाय तत्ऽअंपसे तं भागं उपऽसेदुषे चिताय च द्विताय च उषः दुःऽस्वप्न्यं वह अनेहसः वः ऊतयः सुऽऊतयः वः ऊतयः ॥१६॥ यथा कलां यथा शफं यथा ऋणं संऽनयामसि एव दुःऽस्वप्न्यं सर्वं आग्ने सं नयामसि अनेहसः वः ऊतयः सुऽऊतयः वः ऊतयः ॥१७॥ अजैष्म अद्य असनाम च अभूम अनागसः वयं उषः यस्मात् दुःऽस्वप्नात् अभैष्म अप तत् उच्छतु अनेहसः वः ऊतयः सुऽऊतयः वः ऊतयः ॥१८॥१०॥

॥४८॥ स्वादोः अभक्षि वयसः सुऽमेधाः सुऽआध्यः वरिवोवित्ऽतरस्य विश्वे यं देवाः उत मर्त्यासः मधु ब्रुवंतः अभि सं-

ऽचरँति॥१॥ अंतः॑ च प्र अगाः॑ अदितिः॑ भवासि॑ अवऽयाता हरः॑ सः॑ दैव्यस्य इंदो॑ इंद्रस्य सख्यं॑ जुषा॒णः॑ औष्टीऽइव धुरँ॑ अनु॑ राये ऋध्याः॑॥२॥ अपाम सोमँ॑ अमृता॑ः अभूम॑ अगन्म ज्योतिः॑ अविदाम देवान् किं॑ नूनं॑ अस्मान् कृणवत् अरातिः॑ किं॑ ऊं॑ धूर्तिः॑ अमृत॑ मर्त्यस्य॑॥३॥ शं नः॑ भव हृदे॑ आ पीतः॑ इंदो॑ पिताऽइव सोम॑ सूनवे॑ सुऽशेवः॑ सखाऽइव सख्ये॑ उरुऽशंस॑ धीरः॑ प्र नः॑ आयुः॑ जीवसे॑ सोम॑ तारीः॑॥४॥ इमे मा॑ पीता॑ः यशसः॑ उरुष्यवः॑ रथँ॑ न गावः॑ सं॑ अनाह॑ पर्वऽसु ते मा॑ रक्षंतु विऽअस्तः॑ चरित्वात् उत मा॑ सामात् यवयंतु इंदवः॑॥५॥११॥ अग्निं॑ न मा॑ मथितं॑ सं॑ दिदीपः॑ प्र चक्षय॑ कृणुहि वस्यसः॑ नः॑ अथ॑ हि ते॑ मदे॑ आ सोम॑ मन्ये॑ रेवान्ऽइव प्र चर॑ पुष्टिं॑ अच्छ॑॥६॥ इषिरेण॑ ते॑ मनसा॑ सुतस्य॑ भक्षीमहि पित्र्यस्यऽइव रायः॑ सोम॑ राजन् प्र नः॑ आयूँषि॑ तारीः॑ अहानिऽइव सूर्यः॑ वासराणि॑॥७॥ सोम॑ राजन् मृळय॑ नः॑ स्वस्ति॑ तव॑ स्मसि॑ व्रत्याः॑ तस्य॑ विद्धि॑ अलर्ति॑ दक्षः॑ उत मन्युः॑ इंदो॑ मा नः॑ अर्यः॑ अनुऽकामं॑ परा॑ दाः॑॥८॥ त्वं हि नः॑ तन्वः॑ सोम॑ गोपाः॑ गाचेँऽगाचे॑ निऽससत्थ॑ नृऽचक्षाः॑ यत् ते॑ वयं॑ प्रऽमिनाम॑ व्रतानि॑ सः॑ नः॑ मृळ॑ सुऽसखा॑ देव॑ वस्यः॑॥९॥ ऋदूदरेण॑ सख्या॑ सचेय॑ यः मा॑ न रिषेत् हरिऽअश्व॑ पीतः॑ अयं॑ यः सोमः॑ नि अधायि॑ अस्मे॑ तस्मै॑ इंद्रं॑ प्रऽतिरँ॑ एमि॑ आयुः॑॥१०॥१२॥ अप॑ त्याः॑ अस्थुः॑ अनिराः॑ अमीवाः॑ निः॑ अचस्तन् तमिषीचीः॑ अभैषुः॑ आ सोमः॑ अस्मान् अरुहत् विऽहायाः॑ अगन्म यत्र॑ प्रऽतिरंते॑ आयुः॑॥११॥ यः नः॑ इंदुः॑ पितरः॑ हृत्ऽसु॑ पीतः॑ अमर्त्यः॑ मर्त्यान् आऽविवेश॑ तस्मै॑ सोमाय॑ हविषा॑ विधेम॑ मृळीके॑ अस्य॑ सुऽमतौ॑ स्याम॑॥१२॥ त्वं सोम॑ पितृऽभिः॑ संऽविदानः॑ अनु॑ द्यावापृथिवी॑ आ ततंथ॑ तस्मै॑

ने इंदो हविषा विधेम वयं स्याम पतयः रयीणां ॥१३॥ चातारः देवाः अधि वोचत नः मा नः निऽद्रा ईशत मा उत जल्पिः वयं सोमस्य विश्वह प्रियासः सुऽवीरासः विदथं आ वदेम ॥१४॥ त्वं नः सोम विश्वतः वयःऽधाः त्वं स्वःऽवित् आ विश नृऽचक्षाः त्वं नः इंदो ऊतिऽभिः सुऽजोषाः पाहि पश्चातात् उत वा पुरस्तात् ॥१५॥१३॥६॥

॥ अथ वालखिल्यं ॥

॥४९॥ अभि प्र वः सुऽराधसं इंद्रं अर्च यथा विदे यः जरितृऽभ्यः मघऽवा पुरूऽवसुः सहस्रेणऽइव शिक्षति ॥१॥ शतानीकाऽइव प्रजिगाति धृष्णुऽया हंति वृत्राणि दाशुषे गिरेःऽइव प्र रसाः अस्य पिन्विरे दत्राणि पुरूऽभोजसः ॥२॥ आ त्वा सुतासः इंदवः मदाः ये इंद्र गिर्वणः आपः नु वज्रिन् अनु ओकसं सरः पृणंति शूर राधसे ॥३॥ अनेहसं प्रऽतरणं विवक्षणं मध्वः स्वादिष्ठं इंद्र पिब आ यथा मंदसानः किरासि नः प्र क्षुद्राऽइव त्मना धृषत् ॥४॥ आ नः स्तोमं उप द्रवत् हियानः अश्वः न सोतृऽभिः यं ते स्वधाऽवन् स्वदयंति धेनवः इंद्र कण्वेषु रातयः ॥५॥१४॥ उयं न वीरं नमसा उप सेदिम विऽभूतिं अक्षितऽवसुं उद्रीऽइव वज्रिन् अवतः न सिंचते क्षरंति इंद्र धीतयः ॥६॥ यत् ह नूनं यत् वा यज्ञे यत् वा पृथिव्यां अधि अतः नः यज्ञं आशुऽभिः महेऽमते उग्रः उग्रेभिः आ गहि ॥७॥ अजिरासः हरयः ये ते आशवः वाताःऽइव प्रऽसक्षिणः येभिः अपत्यं मनुषः परिऽईयसे येभिः विश्वं स्वः दृशे ॥८॥ एतावंतः ते ईमहे इंद्र सुम्नस्य गोऽमंतः यथा प्र आवः मघऽवन् मेध्यऽअतिथिं यथा नीपऽअतिथिं

धनें ॥९॥ यथा कण्वें मघऽवन् चसदस्यवि यथा पक्थे दश-ऽवजे यथा गोऽशर्ये असनोः ऋजिश्वनि इंद्र गोऽमत् हिरण्य-ऽवत् ॥१०॥१५॥

॥५०॥ प्र सु श्रुतं सुऽराधसं अर्चं शक्रं अभिष्टये यः सुन्वते स्तु-वते काम्यं वसु सहस्रेणऽइव मंहते ॥१॥ शतऽऊतीकाः हेतयः अस्य दुस्तराः इंद्रस्य संऽइषः महीः गिरिः न भुज्मा मघवत्ऽसु पिन्वते यत् ईं सुताः अमंदिषुः॥२॥ यत् ईं सुतासः इंदवः अभि प्रियं अमंदिषुः आपः न धायि सवनं मे आ वसो दुघाःऽइव उप दाप्णुवें॥३॥ अनेहसं वः हवमानं ऊतये मध्वः क्षरंति धीतयः आ त्वा वसो हवमानासः इंदवः उप स्तोत्रेषु दधिरे॥४॥ आ नः सोमे सुऽअध्वरे इयानः अत्यः न तोशते यंते स्वदाऽवन् स्वदंति गूर्तयः पारे छंद्यसे हवं॥५॥१६॥ प्र वीरं उग्रं विविचिं धनऽस्पृतं वि-ऽभूतिं राधसः महः उद्रीऽइव वज्रिन् अवतः वसुऽत्वना सदा पीपेथ दाप्णुवें॥६॥ यत् ह नूनं पराऽवति यत् वा पृथिव्यां दिवि युजानः इंद्र हरिऽभिः महेऽमते कृष्वः कृष्वेभिः आ गहि ॥७॥ रथिरासः हरयः ये ते अस्रिधः ओजः वातस्य पिप्रति येभिः नि दस्युं मनुषः निऽघोषयः येभिः स्वः० परिऽईयसे॥८॥ एतावंतः ते वसो विद्याम शूर नव्यसः यथा प्रऽआवः एतशं कृत्व्यें धनें य-था वशं दशऽवजे ॥९॥ यथा कण्वें मघऽवन् मेधें अध्वरे दीर्घ-ऽनीथे दमूनसि यथा गोऽशर्ये असिसासः अद्रिऽवः मयि गोत्रं हरिऽश्रियं॥१०॥१७॥

॥५१॥ यथा मनौ सांऽवरणौ सोमें इंद्र अपिबः सुतं नीप-

उतो नु चित् यः ओजसा शुष्णस्य आंडानि भेदति जेषत् स्वः-ऽवतीः अपः नभँतां अन्यके समे॥१०॥ तं शिशीत सुऽअध्वरं सत्यं सवानं ऋत्वियं उतो नु चित् यः ओहते आंडा शुष्णस्य भेदति अजैः स्वःऽवतीः अपः नभँतां अन्यके समे॥११॥ एव इंद्राग्निऽभ्यां पितृऽवत् नवीयः मंधातृऽवत् अंगिरस्वत् अवाचि चिऽधातुना शर्मणा पातं अस्मान् वयं स्याम पतयः रयीणां ॥१२॥२५॥

॥४१॥ अस्मै ऊं सु प्रऽभूतये वरुणाय मरुत्ऽभ्यः अर्चं विदुःऽतरेभ्यः यः धीता मानुषाणां पशुः गाःऽइव रक्षति नभँतां अन्यके समे॥१॥ तं ऊं सु समना गिरा पितॄणां च मन्मऽभिः नाभाकस्य प्रशस्तिऽभिः यः सिंधूनां उप उत्ऽअये सुप्नऽस्वसा सः मध्यमः नभँतां अन्यके समे॥२॥ सः क्षपः परि सस्वजे नि उस्रः मायया दधे सः विश्वं परि दर्शतः तस्य वेनीः अनु व्रतं उषः तिस्रः अवर्धयन् नभँतां अन्यके समे॥३॥ यः ककुभः निऽधारयः पृथिव्यां अधि दर्शतः सः माता पूर्व्ये पदे तत् वरुणस्य सप्सदं सः हि गोपाःऽइव इर्यः नभँतां अन्यके समे॥४॥ यः धर्ता भुवनानां यः उस्राणां अपीच्या वेद नामानि गुह्या सः कविः काव्या पुरु रूपं द्यौःऽइव पुष्यति नभँतां अन्यके समे॥५॥२६॥ यस्मिन् विश्वानि काव्या चक्रे नाभिःऽइव श्रिता चितं जूती सपर्यत व्रजे गावः न संऽयुजे युजे अश्वान् अयुक्षत नभँतां अन्यके समे॥६॥ यः आसु अक्तः आऽशये विश्वा जातानि एषां परि धामानि मर्मृशत् वरुणस्य पुरः गये विश्वे देवाः अनु व्रतं नभँतां अन्यके समे॥७॥ सः समुद्रः अपीच्यः तुरः द्यांऽइव रोहति नि यत् आसु यजुः दधे

सः मायाः अर्चिना पदा अस्तृणात् नाकं आ अरुहत् नभंतां अन्यके समे॥८॥ यस्य श्वेता विऽचक्षणा तिस्रः भूमीः अधिऽक्षितः चिः उत्ऽतराणि पप्रतुः वरुणस्य ध्रुवं सदः सः सप्तानां इरज्यति नभंतां अन्यके समे॥९॥ यः श्वेतान् अधिऽनिर्निजः चक्रे कृष्णान् अनु व्रता सः धामं पूर्व्यं ममे यः स्कंभेन वि रोदसी अजः न द्यां अधारयत् नभंतां अन्यके समे॥१०॥२७॥

॥४२॥ अस्तभ्नात् द्यां असुरः विश्वऽवेदाः अमिमीत वरिमाणं पृथिव्याः आ असीदत् विश्वा भुवनानि संऽराट् विश्वा इत् तानि वरुणस्य व्रतानि॥१॥ एव वंदस्व वरुणं बृहंतं नमस्य धीरं अमृतस्य गोपां सः नः शर्म चिऽवरूथं वि यंसत् पातं नः द्यावापृथिवी उपऽस्थे॥२॥ इमां धियं शिक्षमाणस्य देव क्रतुं दक्षं वरुण सं शिशाधि यया अति विश्वा दुःऽइता तरेम सुऽतर्माणं अधि नावं रुहेम॥३॥ आ वां यावाणः अश्विना धीभिः विप्राः अचुच्यवुः नासत्या सोमऽपीतये नभंतां अन्यके समे॥४॥ यथा वां अत्रिः अश्विना गीःऽभिः विप्रः अजोहवीत् नासत्या सोमऽपीतये नभंतां अन्यके समे॥५॥ एव वां अद्ये ऊतये यथा अहुवंत मेधिराः नासत्या सोमऽपीतये नभंतां अन्यके समे॥६॥२८॥५॥

॥४३॥ इमे विप्रस्य वेधसः अग्नेः अस्तृतऽयज्वनः गिरः स्तोमासः ईरते॥१॥ अस्मै ते प्रतिऽहर्यते जातऽवेदः विऽचर्षणे अग्ने जनामि सुऽस्तुतिं॥२॥ आरोकाःऽइव घ इत् अह तिग्माः अग्ने तव त्विषः दतऽभिः वनानि वप्सति॥३॥ हरयः धूमऽकेतवः वा-

तंऽजूताः उपं द्यविं यतंते वृथंक्अग्नयंः॥४॥ एते त्ये वृथंक् अग्नयंः इद्धासंः सं अहक्षत उषसांऽइव केतवंः॥५॥२९॥ कृष्णा रजाँसि पत्सुतः प्रऽयानें जातऽवेदसः अग्निः यत् रोधति क्षमि॥६॥ धासिं कृण्वानः ओषधीः बप्सत् अग्निः न वायति पुनः यन् तरुणीः अपि॥७॥ जिह्वाभिः अह नंनमत् अर्चिषा जंजृणाऽभवन् अग्निः वनेंषु रोचते॥८॥ अप्ऽसु अग्ने सधिः तवं सः ओषधीः अनु रुध्यसे गर्भेसन् जायसे पुनः'॥९॥ उत् अग्ने तवं तत् घृतात् अर्चिः रोचते आऽहुतं निंसानं जुह्वः मुखे॥१०॥३०॥ उक्षऽअन्नाय वशाऽअन्नाय सोमऽपृष्ठाय वेधसें स्तोमैः विधेम अग्नयें॥११॥ उत त्वा नमंसा वयं होतः वरेण्यऽक्रतो° अग्नें समित्ऽभिः ईमहे॥१२॥ उत त्वा भृगुऽवत् शुचे मनुष्वत् अग्ने आऽहुत अंगिरस्वत् हवामहे॥१३॥ त्वं हि अग्ने अग्निना विप्रः विप्रेण सन्सता सखा सख्या सऽइध्यसें॥१४॥ सः त्वं विप्राय दाशुषें रयिं देहि सहस्रिणं अग्नें वीरऽवतीं इषं॥१५॥३१॥ अग्नें भातः' सहःऽकृत रोहित्ऽअश्व शुचिऽव्रत इमं स्तोमं जुषस्व मे॥१६॥ उत त्वा अग्ने मम स्तुतः वाश्र्याय प्रतिऽहर्यते गोऽस्थं गावःऽइव आशत॥१७॥ तुभ्यं ताः अंगिरःऽतम विश्वाः सुऽक्षितयः पृथक् अग्नें कामाय येमिरे॥१८॥ अग्निं धीभिः मनीषिणः मेधिरासः विपःऽचितः अग्नऽसद्याय हिन्विरे॥१९॥ तं त्वां अज्मेषु वाजिनं तन्वानाः अग्ने अध्वरं वहिं होतारं ईळते॥२०॥३२॥ पुरुऽचा हि सऽइदङ् असि विशः विश्वाः अनु प्रऽभुः समत्ऽसु त्वा हवामहे॥२१॥ तं ईळिष्व यः आऽहुतः अग्निः विऽभाजते घृतैः इमं नः मृणवत् हवं॥२२॥ तं त्वा वयं हवामहे मृणंतं जातऽवेदसं अग्नें घंतं अप द्विषः॥२३॥ विशां राजानं अद्भुतं अधिऽअक्षं धर्मणां इमं अग्निं ईळे सः ऊं'

अवत्॥२४॥ अग्निं विश्वायुंऽवेपसं मर्यं न वाजिनं हितं सन्निं न वाजयामसि॥२५॥३३॥ घ्नन् मृधाणि अप द्विषः दहन् रक्षाँसि विश्वहा अग्ने तिग्मेन दीदिहि॥२६॥ यं त्वा जनासः इंधते मनुष्वत् अंगिरःऽतम अग्ने सः बोधि मे वचः॥२७॥ यत् अग्ने दिविऽजाः असि अप्सुऽजाः वा सहःऽकृत तं त्वा गीःऽभिः हवामहे॥२८॥ तुभ्यं घ इत् ते जनाः इमे विश्वाः सुऽक्षितयः पृथक् धासिं हिन्वंति अत्तवे॥२९॥ ते घ इत् अग्ने सुऽआर्यः अहा विश्वा नृऽचक्षसः तरंतः स्याम दुःऽगहा॥३०॥३४॥ अग्निं मंद्रं पुरुऽप्रियं शीरं पावकऽशोचिषं हृत्ऽभिः मंद्रेभिः ईमहे॥३१॥ सः त्वं अग्ने विभाऽवसुः सृजन् सूर्यः न रश्मिऽभिः शर्धन् तमांसि जिघ्नसे॥३२॥ तत् ते सहस्वः ईमहे दावं यत् न उपऽदस्यति त्वत् अग्ने वार्यं वसु॥३३॥३५॥

॥४४॥ संऽइधा अग्निं दुवस्यत घृतैः बोधयत अतिथिं आ अस्मिन् हव्या जुहोतन॥१॥ अग्ने स्तोमं जुषस्व मे वर्धस्व अनेन मन्मना प्रतिसुऽउक्तानि हर्य नः॥२॥ अग्निं दूतं पुरः दधे हव्यऽवाहं उप ब्रुवे देवान् आ सादयात् इह॥३॥ उत् ते बृहंतः अर्चयः संऽइधानस्य दीदिऽवः अग्ने शुक्रासः ईरते॥४॥ उप त्वा जुह्वः मम घृताचीः यंतु हर्यत अग्ने हव्या जुषस्व नः॥५॥३६॥ मंद्रं होतारं ऋत्विजं चित्रऽभानुं विभाऽवसुं अग्निं ईळे सः ऊं अवत्॥६॥ प्रत्नं होतारं ईड्यं जुष्टं अग्निं कविऽक्रतुं अध्वराणां अभिऽश्रियं॥७॥ जुषाणः अंगिरःऽतम इमा हव्यानि आनुषक् अग्ने यज्ञं नय ऋतुऽथा॥८॥ संऽइधानः ऊं सत्य शुक्रऽशोचे इह आ वह चिकित्वान् दैव्यं जनं॥९॥ विप्रं होतारं अदुहं धूमऽकेतुं

विभाऽवसुं यज्ञानां केतुं ईमहे ॥१०॥३७॥ अग्ने नि पाहि नः त्वं प्रति स्म देव रिषतः भिंधि द्वेषः सहःऽकृत ॥११॥ अग्निः प्रत्नेन मन्मना शुंभानः तन्वं स्वां कविः विप्रेण ववृधे ॥१२॥ ऊर्जः नपातं आ हुवे अग्निं पावकऽशोचिषं अस्मिन् यज्ञे सुऽअध्वरे॥१३॥ सः नः मिचऽमहः त्वं अग्ने शुक्रेण शोचिषा देवैः आ सत्सि बर्हिषि॥१४॥ यः अग्निं तन्वः दमे देवं मर्तः सपर्यति तस्मै इत् दीदयत् वसु ॥१५॥३८॥ अग्निः मूर्धा दिवः ककुत् पतिः पृथिव्याः अयं अपां रेताँसि जिन्वति ॥१६॥ उत् अग्ने शुचयः तव शुक्राः भ्राजंतः ईरते तव ज्योतींषि अर्चयः॥१७॥ ईशिषे वार्यस्य हि दात्रस्य अग्ने स्वःऽपतिः स्तोता स्यां तव शर्मणि ॥१८॥ त्वां अग्ने मनीषिणः त्वां हिन्वंति चित्तिऽभिः त्वां वर्धंतु नः गिरः॥१९॥ अदब्धस्य स्वधाऽवंतः दूतस्य रभंतः सदा अग्नेः सख्यं वृणीमहे ॥२०॥३९॥ अग्निः शुचिव्रतऽतमः शुचिः विप्रः शुचिः कविः शुचिः रोचते आऽहुतः ॥२१॥ उत त्वा धीतयः मम गिरः वर्धंतु विश्वहा अग्ने सख्यस्य बोधि नः॥२२॥ यत् अग्ने स्यां अहं त्वं त्वं वा घ स्याः अहं स्युः ते सत्याः इह आऽशिषः॥२३॥ वसुः वसुऽपतिः हि कं असि अग्ने विभाऽवसुः स्याम ते सुऽमतौ अपि ॥२४॥ अग्ने धृतऽव्रताय ते समुद्रायऽइव सिंधवः गिरः वाश्रासः ईरते॥२५॥४०॥ युवानं विश्पतिं कविं विश्वऽआदं पुरुऽवेपसं अग्निं शुंभामि मन्मऽभिः॥२६॥ यज्ञानां रथ्यं वयं तिग्मऽजंभाय वीळवे स्तोमैः इषेम अग्नये॥२७॥ अयं अग्ने त्वे अपि जरिता भूतु सत्य तस्मै पावक मृळय ॥२८॥ धीरः हि असि अग्नऽसत् विप्रः न जागृविः सदा अग्ने दीदयसि द्यवि॥२९॥ पुरा अग्ने दुःऽइतेभ्यः पुरा मृध्रेभ्यः कवे प्र नः आयुः वसो तिर ॥३०॥४१॥

॥४५॥ आ घ ये अग्निं इंधते स्तृणंति बर्हिः आनुषक् येषां इंद्रः युवा सखा॥१॥ बृहन् इत् इध्मः एषां भूरि शस्तं पृथुः स्वरुः येषां इंद्रः युवा सखा॥२॥ अयुजः इत् युधा वृतं शूरः आ अजति सत्वभिः येषां इंद्रः युवा सखा॥३॥ आ बुंदं वृत्रऽहा ददे जातः पृच्छत् वि मातरं के उग्राः के ह शृण्विरे॥४॥ प्रति त्वा शवसी वदत् गिरौ अप्सः न योधिषत् यः ते शत्रुऽत्वं आऽचके॥५॥४२॥ उत त्वं मघऽवन् शृणु यः ते वष्टि ववक्षि तत् यत् वीळयासि वीळु तत्॥६॥ यत् आजिं याति आजिऽकृत् इंद्रः स्वश्वऽयुः उप रथिऽतमः रथिनां॥७॥ वि सु विश्वाः अभिऽयुजः वज्रिन् विष्वक् यथा वहः भवं नः सुश्रवःऽतमः॥८॥ अस्माकं सु रथं पुरः इंद्रः कृणोतु सातये न यं धूर्वंति धूर्तयः॥९॥ वृज्याम ते परि द्विषः अरं ते शक्र दावने गमेम इत् इंद्र गोऽमतः॥१०॥४३॥ शनैः चित् यंतः अद्रिऽवः अश्वऽवंतः शतऽग्विनः विवक्षणाः अनेहसः॥११॥ ऊर्ध्वा हि ते दिवेऽदिवे सहस्रा सूनृता शता जरितृऽभ्यः विऽमंहते॥१२॥ विश्म हि त्वा धनंऽजयं इंद्र हव्हा चित् आऽरुजं आऽदारिणं यथा गयं॥१३॥ ककुहं चित् त्वा कवे मंदंतु धृष्णो इंदवः आ त्वा पणिं यत् ईमहे॥१४॥ यः ते रेवान् अदाशुरिः प्रऽममर्ष मघत्तये तस्य नः वेदः आ भर॥१५॥४४॥ इमे ऊं त्वा वि चक्षते सखायः इंद्र सोमिनः पुष्टऽवंतः यथा पशुं॥१६॥ उत त्वा अबधिरं वयं श्रुत्ऽकर्णं संतं ऊतये दूरात् इह हवामहे॥१७॥ यत् शुश्रुयाः इमं हवं दुःऽमर्षं चक्रियाः उत भवेः आपिः नः अंतमः॥१८॥ यत् चित् हि ते अपि व्यथिः जगन्वांसः अमन्महि गोऽदाः इत् इंद्र बोधि नः॥१९॥ आ त्वा रंभं न जिव्रयः ररभ्म शवसः पते उश्मसि त्वा सधऽस्थे आ॥२०॥४५॥ स्तोत्रं इंद्राय गायत पुरुऽनृम्णाय सत्वने नकिः यं वृ-

एवते युधि॥२१॥ अभि त्वा वृषभ सुते सुतं सृजामि पीतये तृंप वि अष्णुहि मदे॥२२॥ मा त्वा मूराः अविष्यवः मा उप ऽहस्वानः आ दभन् माकीं ब्रह्म ऽद्विषः वनः॥२३॥ इह त्वा गो ऽपरीणसा महे मंदंतु राधसे सरः गौरः यथा पिब॥२४॥ या वृच ऽहा परा-ऽवति सना नवा च चुच्युवे ता संसत्ऽसु प्र वोचत॥२५॥४६॥ अपिबत् कद्रुवः सुतं इंद्रः सहस्रऽबाह्वे अंधसो अदेदिष्ट पौंस्यं॥२६॥ सत्यं तत् तुर्वशे यदौ विदानः अहूवाय्यं वि आनट् तुर्वणे शमिं॥२७॥ तरणिं वः जनानां चदं वाजस्य गो ऽमतः समानं ऊं प्र शंसिषं॥२८॥ कृभुक्षणं न वर्तवे उक्थेषु तुग्य ऽवृधं इंद्रं सोमे सचा सुते॥२९॥ यः कृंतत् इत् वि योन्यं चिऽशोकाय गिरिं पृथुं गोभ्यः गातुं निः ऽएतवे॥३०॥४७॥ यत् दधिषे मनस्यसि मंदानः प्र इत् इयक्षसि मा तत् कः इंद्र मृळयं॥३१॥ दभं चित् हि त्वाऽवतः कृतं शृण्वे अधि क्षमि जिगातु इंद्र ते मनः॥३२॥ तवं इत् ऊं ताः सुऽकीर्तयः असन् उत प्रऽशस्तयः यत् इंद्र मृळयासि नः॥३३॥ मा नः एकस्मिन् आगंसि मा द्वयोः उत त्रिषु वधीः मा शूर भूरिषु॥३४॥ बिभयं हि त्वाऽवतः उग्रात् अभि ऽप्रभंगिनः दस्मात् अहं चृति ऽसहः॥३५॥४८॥ मा सख्युः शूनं आ विदे मा पुचस्य प्रभुऽवसो° आऽवृत्वत् भूतु ते मनः॥३६॥ कः नु मर्यः अमिथितः सखा सखायं अब्रवीत् जहा कः अस्मत् ईषते॥३७॥ एवारे वृषभ सुते असिन्वन् भूरि आवयः श्वघ्नीऽइव निऽवता चरन्॥३८॥ आ ते एता वचःऽयुजा हरी गृभ्णे सुमत्ऽरथा यत् ईं ब्रह्मऽभ्यः इत् ददः॥३९॥ भिंधि विश्वाः अप द्विषः परि बाधः जहि मृधः वसु स्पार्हं तत् आ भर॥४०॥ यत् वीळौ इंद्र यत् स्थिरे यत् पर्शाने परा ऽभृतं वसु स्पार्हं तत् आ भर॥४१॥ यस्य ते

विश्वऽमानुषः भूरेः दत्तस्य वेदति वसु स्पार्हे तत् आ भर ॥४२॥
॥४९॥ ३॥

॥४६॥ त्वाऽवंतः पुरुऽवसो॰ वयं इंद्र प्रऽनेतः॰ स्मसि स्यातः हरीणां॥१॥ त्वां हि सत्यं अद्रिऽवः विप्र दातारं इषां विप्र दातारं रयीणां॥२॥ आ यस्य ते महिमानं शतंऽऊते शतंऽऋतो॰ गीः-ऽभिः गृणंति कारवः॥३॥ सुऽनीथः घ सः मर्त्यः यं मरुतः यं अर्यमा मित्रः पांति अदुहः॥४॥ दधानः गोऽमत् अश्वंऽवत् सुऽवीर्यं आदित्यऽजूतः एधते सदा राया पुरुऽस्पृहा॥५॥१॥ तं इंद्रं दानं ईमहे शवसानं अभीर्वे ईशानं रायः ईमहे॥६॥ तस्मिन् हि संति ऊतयः विश्वाः अभीरवः सचा तं आ वहंतु सप्तयः पुरुऽवसुं मदाय हरयः सुतं॥७॥ यः ते मदः वरेण्यः यः इंद्र वृत्रहन्ऽतमः यः आऽददिः स्वः नृऽभिः यः पृतनासु दुस्तरः॥८॥ यः दुस्तरः विश्वऽवार अवाय्यः वाजेषु अस्ति तरुता सः नः शविष्ठ सवना आ वसो' गहि गमेम गोऽमति व्रजे॥९॥ गव्यो' सु नः यथा पुरा अश्वऽया उत रथऽया वरिवस्य महाऽमह॥१०॥२॥ नहि ते शूर राधसः अंतं विंदामि सचा दशस्य नः मघऽवन् नु चित् अद्रिऽवः धियः वाजेभिः आविथ॥११॥ यः कृत्वः अवयत्ऽसखा विश्वा इत् सः वेद जनिम पुरुऽस्तुतः तं विप्रं मानुषा युगा इंद्रं हवंते तविषं यतऽस्तुचः॥१२॥ सः नः वाजेषु अविता पुरुऽवसुः पुरःऽस्थाता मघऽवा वृत्रऽहा भुवत्॥१३॥ अभि वः वीरं अंधसः मदेषु गाय गिरा महा विऽचेतसं इंद्रं नाम श्रुत्यं शाकिनं वचः यथा॥१४॥ ददिः रेक्णः तन्वे ददिः वसु ददिः वाजेषु पुरुऽहूत वाजिनं

नूनं अर्य॥१५॥३॥ विश्वेषां इज्जयंतें वसूनां ससद्वांसँ चित् अस्य वर्पसः कुप ऽयतः नूनं अतिं अर्य॥१६॥ महः सु वः अरँ इषे स्तवामहे मीळ्हुषे अरं ऽगमाय जग्मये यज्ञेभिः गीः ऽभिः विश्व ऽमनुषां मरुतां इयक्षसि गायें त्वा नमसा गिरा॥१७॥ ये पातयँन्ते अज्मं ऽभिः गिरीणां सानु ऽभिः एषां यज्ञं महि ऽस्वनीनां सुम्नं तुविऽस्वनीनां प्र अध्वरे॥१८॥ प्र ऽभंगं दुः ऽमतीनां इंद्र शविष्ठ आ भर रयिं अस्मभ्यँ युज्यँ चोदयत ऽमते ज्येष्ठँ चोदयत ऽमते ॥१९॥ सनितः सानु ऽसनितः उर्य चिच चेतिष्ठ सूनृत प्र ऽसहो सं ऽराट् सहुरिं सहँतं भुज्युं वाजेषु पूर्व्यं॥२०॥४॥ आ सः एतु यः ईवत् आ अदेवः पूर्ते आ ऽददे यथा चित् वशः अश्वः पृथु ऽश्रवसि कानीते अस्याः वि ऽउषि आ ऽददे॥२१॥ षष्टिं सहस्रा अश्वस्य अयुता असनं उष्ट्रानां विंशतिं शता दश श्यावीनां शता दश चि ऽअरुषीणां दश गवां सहस्रा॥२२॥ दश श्यावाः शुधत ऽरयः वीत ऽवारासः आशवः मघाः नेमिं नि ववृतुः॥२३॥ दानासः पृथु ऽश्रवसः कानीतस्य सु ऽराधसः रथँ हिरण्ययँ ददत् मंहिष्ठः सूरिः अभूत् वर्षिष्ठं अकृत श्रवः॥२४॥ आ नः वायो मह तनें याहि मखाय पाजसे वयं हि ते चकृम भूरि दावनें सद्यः चित् महि दावनें॥२५॥५॥ यः अश्वेभिः वहते वस्ते उस्राः चिः सप्त सप्नतीनां एभिः सोमेभिः सोमसुत ऽभिः सोम ऽपाः दानाय शुक्रपूत ऽपाः॥२६॥ यः मे इमं चित् ऊं त्मना अमँदत् चिचं दावनें अरद्धे अक्षें नहुषे सु ऽकृत्वनि सुकृत ऽतराय सु ऽक्रतुः॥२७॥ उचथ्यें वपुषि यः स्व ऽराट् उत वायो घृत ऽस्नाः अश्व ऽइषितं रजः ऽइषितं शुना ऽइषितं प्र अज्मं तत् इदं नु तत्॥२८॥ अध प्रियं इषिराय षष्टिं सहस्रा असनं अश्वानां इत् न वृष्णां॥२९॥

गावः न यूथं उप यंति वध्रयः उप मा आ यंति वध्रयः॥३०॥ अध यत् चारिषे गणे शतं उष्ट्रान् अचिक्रदत् अध श्वित्नेषु विंशतिं शता॥३१॥ शतं दासे वल्बूथे विप्रः तरुक्षे आ ददे ते ते वायो इमे जनाः मदंति इंद्रऽगोपाः मदंति देवऽगोपाः॥३२॥ अध स्या योषणा मही प्रतीची वशं अश्वं अधिऽरुक्मा वि नीयते॥३३॥६॥

॥४७॥ महि वः महतां अवः वरुण मित्र दाशुषे यं आदित्याः अभि द्रुहः रक्षथ न ईं अघं नशत् अनेहसः वः ऊतयः सुऽऊतयः वः ऊतयः॥१॥ विद देवाः अघानां आदित्यासः अपऽआकृतिं पक्षा वयः यथा उपरि वि अस्मे शर्म यच्छत अनेहसः वः ऊतयः सुऽऊतयः वः ऊतयः॥२॥ वि अस्मे अधि शर्म तत् पक्षा वयः न यंतन विश्वानि विश्वऽवेदसः वरूथ्या मनामहे अनेहसः वः ऊतयः सुऽऊतयः वः ऊतयः॥३॥ यस्मै अरासत क्षयं जीवातुं च प्रऽचेतसः मनोः विश्वस्य घ इत् इमे आदित्याः रायः ईशते अनेहसः वः ऊतयः सुऽऊतयः वः ऊतयः॥४॥ परि नः वृणजन् अघा दुःऽगानि रथ्यः यथा स्याम इत् इंद्रस्य शर्मणि आदित्यानां उत अवसि अनेहसः वः ऊतयः सुऽऊतयः वः ऊतयः॥५॥७॥ परिऽहृता इत् अना जनः युष्माऽदत्तस्य वायति देवाः अदब्धं आशु वः यं आदित्याः अहेतन अनेहसः वः ऊतयः सुऽऊतयः वः ऊतयः॥६॥ न तं तिग्मं चन त्यजः न द्रासत् अभि तं गुरु यस्मै ऊं शर्म सऽप्रथः आदित्यासः अरांध्वं अनेहसः वः ऊतयः सुऽऊतयः वः ऊतयः॥७॥ युष्मे देवाः अपि ष्मसि युध्यंतःऽइव वर्मऽसु यूयं महः नः एनसः यूयं अर्भात् उरुष्यत अनेहसः वः ऊतयः सुऽऊतयः वः ऊतयः॥८॥ अदितिः नः उरुष्यतु अदितिः शर्म यऽ

च्छतु माता मित्रस्य रेवतः अर्यम्णः वरुणस्य च अनेहसः वः ऊतयः सुऽऊतयः वः ऊतयः ॥९॥ यत् देवाः शर्म शरणं यत् भद्रं यत् अनातुरं चिऽधातु यत् वरूथ्यं तत् अस्मासु वि यंतन अनेहसः वः ऊतयः सुऽऊतयः वः ऊतयः ॥१०॥८॥ आदित्याः अव हि ख्यत अधि कूलात्ऽइव स्पशः सुऽतीर्थे अर्वतः यथा अनु नः नेषथ सुऽगं अनेहसः वः ऊतयः सुऽऊतयः वः ऊतयः ॥११॥ न इह भद्रं रक्षस्विने न अवऽये न उपऽये उत गवे च भद्रं धेनवे वीराय च श्रवस्यते अनेहसः वः ऊतयः सुऽऊतयः वः ऊतयः ॥१२॥ यत् आविः यत् अपीच्यं देवासः अस्ति दुःऽकृतं चिते तत् विश्वं आप्ये आरे अस्मत् दधातन अनेहसः वः ऊतयः सुऽऊतयः वः ऊतयः ॥१३॥ यत् च गोषु दुःस्वप्न्यं यत् च अस्मे दुहितः दिवः चितायं तत् विभाऽवरि आप्राय परा वह अनेहसः वः ऊतयः सुऽऊतयः वः ऊतयः ॥१४॥ निष्कं वा घ कृणवते स्रजं वा दुहितः दिवः चिते दुःऽस्वप्न्यं सर्वं आप्ये परि दमसि अनेहसः वः ऊतयः सुऽऊतयः वः ऊतयः ॥१५॥९॥ तत्ऽअंचाय तत्ऽअंपसे तं भागं उपऽसेदुषे चितायं च चितायं च उषः दुःऽस्वप्न्यं वह अनेहसः वः ऊतयः सुऽऊतयः वः ऊतयः ॥१६॥ यथा कलां यथा शफं यथा ऋणं संऽनयामसि एव दुःऽस्वप्न्यं सर्वं आप्ये सं नयामसि अनेहसः वः ऊतयः सुऽऊतयः वः ऊतयः ॥१७॥ अजैष्म अद्य असनाम च अभूम अनागसः वयं उषः यस्मात् दुःऽस्वप्नात् अभैष्म अप तत् उच्छतु अनेहसः वः ऊतयः सुऽऊतयः वः ऊतयः ॥१८॥१०॥

॥४८॥ स्वादोः अभक्षि वयसः सुऽमेधाः सुऽआध्यः वरिवोवित्ऽतरस्य विश्वे यं देवाः उत मर्त्यासः मधु बुवंतः अभि सं-

ऽचरँन्ति॥१॥ अंतः॑ च॒ प्र अगा॑ः अदि॑तिः भ॒वा॒सि॒ अव॒ऽया॒ता हर॑सः दैव्यस्य इंदो॑ इंद्र॑स्य सख्यं जुषा॒णः औष्टी॑ऽइव धुरँ॑ अनु॑ रा॒ये कृ॒ध्याः॥२॥ अपा॑म सोमँ अ॒मृता॑ः अभूम॒ अग॑न्म ज्योति॑ः अवि॑दाम दे॒वान् किं नू॑नं अ॒स्मान् कृ॒ण॒व॒त् अरा॑तिः किं ऊं॑ धू॒र्तिः अ॒मृ॒त॒ मर्त्य॑स्य॥३॥ शं नः॑ भव॒ हृ॒दे आ पी॒तः इंदो॑ पि॒ताऽइ॑व सोम॒ सू॒न॒वे सु॒ऽशे॒वः सखा॑ऽइव सख्ये॑ उरु॒ऽशंस॒ धीरः॑ प्र नः॒ आयुः॑ जी॒व॒से सो॒म॒ ता॒रीः॥४॥ इ॒मे मा॒ पी॒ताः य॒श॒सः॒ उ॒रु॒ऽय॒वः॒ रथे॑ न गा॒वः॑ सं अ॒ना॒ह॒ पर्व॑ऽसु ते मा॒ र॒क्षं॒तु वि॒ऽस्रसः॑ चरि॑त्रात् उ॒त मा॒ सा॒मा॑त् य॒व॒यं॒तु इंद॑वः॥५॥११॥ अ॒मिं न मा॒ मथि॑तं सं दि॒दी॒पः॒ प्र च॒क्षय॑ कृणुहि वस्य॑सः नः॒ अ॒र्ष॒ हि ते॒ मदे॑ आ सो॒म॒ मन्ये॑ रे॒वान्॒ऽइ॑व प्र च॑र॒ पु॒ष्टिं अ॒च्छ॥६॥ इ॒षि॒रेण॑ ते॒ मन॑सा सु॒त॒स्य॒ भ॒क्षी॒म॒हि पि॒त्र्य॑स्य॒ऽइ॒व रा॒यः॒ सो॒म॒ रा॒ज॒न् प्र नः॒ आयूं॑षि ता॒रीः॒ अहा॑नि॒॒ऽइ॒व सूर्यः॑ वा॒स॒रा॒णि॥७॥ सोम॑ राजन् मृळय॑ नः॒ स्व॒स्ति तव॑ स्मसि व्र॒त्याः॑ तस्य॑ वि॒द्धि॒ अल॑र्ति दक्षः॒ उ॒त म॒न्युः॒ इंदो॑ मा नः॒ अ॒र्यः॒ अ॒नु॒ऽका॒मं परा॑ दाः॥८॥ त्वं हि नः॒ त॒न्वः॑ सो॒म॒ गो॒पाः गा॒वे॒ऽगा॒चे नि॒ऽस॒स॒त्थ॒ नृ॒ऽच॒क्षाः॒ यत् ते॒ व॒यं प्र॒ऽमि॒ना॒म॒ व्र॒तानि॑ सः नः॒ मृ॒ळ॒ सु॒ऽस॒खा दे॒व॒ वस्यः॑॥९॥ ऋ॒दू॒दरे॑ण सख्या॑ स॒चे॒य॒ यः मा॒ न रि॒ष्ये॑त् हरि॑ऽअश्व पी॒तः अ॒यं यः सोमः॑ नि अधा॑यि अ॒स्मे॑ तस्मै॑ इंद्र॑ प्र॒ऽतिरँ॑ एमि॒ आयुः॑॥१०॥१२॥ अप॑ त्याः अ॒स्थुः अनि॑राः अमी॑वाः निः अ॒च॒स॒न् तमि॑षीचीः अभै॑षुः आ सोम॑ः अ॒स्मान् अ॒रु॒ह॒त् वि॒ऽहा॒याः अग॑न्म यत्र॑ प्र॒ऽतिर॑न्ते॑ आयुः॥११॥ यः नः॒ इंदुः॑ पि॒तरः॑ हृत्ऽसु पी॒तः अम॑र्त्यः मर्त्या॑न् आ॒ऽवि॒वेश॑ तस्मै॑ सोमा॑य ह॒विषा॑ विधेम मृ॒ळी॒के अ॒स्य॒ सु॒ऽम॒तौ स्या॑म॥१२॥ त्वं सो॒म॒ पि॒तृऽभिः॑ सं॒ऽविदा॑नः अनु॑ द्यावापृथि॒वी॑ आ त॑तंथ॒ तस्मै॑

ने इंदो हविषा विधेम वयं स्याम पतयः रयीणां ॥१३॥ चातारः देवाः अधि वोचत नः मा नः निऽद्रा ईशत मा उत जल्पिः वयं सोमस्य विश्वह प्रियासः सुऽवीरासः विदथं आ वदेम ॥१४॥ त्वं नः सोम विश्वतः वयःऽधाः त्वं स्वःऽवित् आ विश नृऽचक्षाः त्वं नः इंदो ऊतिऽभिः सुऽजोषाः पाहि पश्चातात् उत वा पुरस्तात् ॥१५॥१३॥६॥

॥ अथ वालखिल्यं ॥

॥४९॥ अभि प्र वः सुऽराधसं इंद्रं अर्च यथा विदे यः जरितृऽभ्यः मघऽवा पुरुऽवसुः सहस्रेणऽइव शिक्षति ॥१॥ शतानीकाऽइव प्रजिगाति धृष्णुऽया हंति वृत्राणि दाशुषे गिरेःऽइव प्र रसाः अस्य पिन्विरे दत्राणि पुरुऽभोजसः ॥२॥ आ त्वा सुतासः इंदवः मदाः ये इंद्र गिर्वणः आपः नु वज्रिन् अनु ओकयं सरः पृणंति शूर राधसे ॥३॥ अनेहसं प्रऽतरणं विवक्षणं मध्वः स्वादिष्ठं ईं पिव आ यथा मंदसानः किरासि नः प्र क्षुद्राऽइव त्मना धृषत् ॥४॥ आ नः स्तोमं उप द्रवत् हियानः अश्वः न सोतृऽभिः यं ते स्वधाऽवन् स्वदयंति धेनवः इंद्र कण्वेषु रातयः ॥५॥१४॥ उग्रं न वीरं नमसा उप सेदिम विऽभूतिं अक्षितऽवसुं उद्रीऽइव वज्रिन् अवतः न सिंचते क्षरंति इंद्र धीतयः ॥६॥ यत् ह नूनं यत् वा यज्ञे यत् वा पृथिव्यां अधि अतः नः यज्ञं आशुऽभिः महेऽमते उग्रः उग्रेभिः आ गहि ॥७॥ अजिरासः हरयः ये ते आशवः वाताःऽइव प्रऽसक्षिणः येभिः अपत्यं मनुषः परिऽईयसे येभिः विश्वं स्वः दृशे ॥८॥ एतावतः ते ईमहे इंद्र सुम्नस्य गोऽमतः यथा प्र आवः मघऽवन् मेध्यऽअतिथिं यथा नीपऽअतिथिं

धनें ॥९॥ यथा कण्वे मघऽवन् चसदस्यवि यथा पक्थे दश-ऽव्रजे यथा गोऽशर्ये असनोः ऋजिश्वनि इंद्र गोऽमत् हिरण्य-ऽवत् ॥१०॥१५॥

॥५०॥ प्र सु श्रुतं सुऽराधसं अर्चं शक्रं अभिष्टये यः सुन्वते स्तु-वते काम्यं वसु सहस्रेणऽइव मंहते ॥१॥ शतऽअनीकाः हेतयः अस्य दुस्तराः इंद्रस्य संऽइषः महीः गिरिः न भुज्मा मघवत्ऽसु पिन्वते यत् ईं सुताः अमंदिषुः॥२॥ यत् ईं सुतासः इंदवः अभि प्रियं अमंदिषुः आपः न धायि सवनं मे आ वसो दुघाःऽइव उप दाश्वुषे॥३॥ अनेहसं वः हवमानं ऊतये मध्वः क्षरंति धीतयः आ त्वा वसो हवमानासः इंदवः उप स्तोत्रेषु दधिरे॥४॥ आ नः सोमे सुऽअध्वरे इयानः अत्यः न तोशते यं ते स्वदाऽवन् स्वदंति गूर्तयः पारे छंदयसे हवं ॥५॥१६॥ प्र वीरं उग्रं विविचिं धनऽस्पृतं वि-ऽभूतिं राधसः महः उद्रीऽइव वज्रिन् अवतः वसुऽत्वना सदा पीपेथ दाश्वुषे॥६॥ यत् ह नूनं पराऽवति यत् वा पृथिव्यां दिवि युजानः इंद्र हरिऽभिः महेऽमते ऋष्वः ऋष्वेभिः आ गहि ॥७॥ रथिरासः हरयः ये ते अस्रिधः ओजः वातस्य पिप्रति येभिः नि दस्युं मनुषः निऽघोषयः येभिः स्वः० परिऽईयसे॥८॥ एतावतः ते वसो विद्याम शूर नव्यसः यथा प्रऽआवः एतशं कृत्व्ये धने य-था वशं दशऽव्रजे ॥९॥ यथा कण्वे मघऽवन् मेधे अध्वरे दीर्घ-ऽनीथे दमूनसि यथा गोऽशर्ये असिसासः अद्रिऽवः मयि गोत्रं हरिऽश्रियं॥१०॥१७॥

॥५१॥ यथा मनौ सांऽवरणी सोमे इंद्र अपिबः सुतं नीप-

ऽऋतियौ मघऽवन् मेध्यऽऋतियौ पुष्टिऽगौ श्रुष्टिऽगौ सचा॥१॥ पार्षद्वाणः प्रस्कण्वं सं ऋसादयत् शयानं जिविं उद्धितं सहस्राणि असिसासत् गवां ऋषिः त्वाऽऊतः दस्यवे वृकः॥२॥ यः उक्थेभिः न विंधते चिकित् यः ऋषिऽचोदनः इंद्रं तं अच्छ वद नव्यस्या मती अविष्यंतं न भोजसे॥३॥ यस्मै अर्के सप्तऽशीर्षाणं आनृचुः चिऽधातुं उत्ऽतमे पदे सः तु इमा विश्वा भुवनानि चिक्रदत् आत् इत् जनिष्ट पौंस्यैं॥४॥ यः नः दाता वसूनां इंद्रं तं हूमहे वयं विप्रा हि अस्य सुऽमतिं नवीयसीं गमेम गोऽमति व्रजे॥५॥१८॥ यस्मै त्वं वसो दानाय शिक्षसि सः रायः पोषं अश्नुते तं त्वा वयं मघऽवन् इंद्र गिर्वणः सुतऽवंतः हवामहे॥६॥ कदा चन स्तरीः असि न इंद्र सश्चसि दाशुषे उपऽउप इत् नु मघऽवन् भूयः इत् नु ते दानं देवस्य पृच्यते॥७॥ प्र यः ननक्षे अभि ओजसा क्रिविं वधैः मुषाँ निऽघोषयन् यदा इत् अस्तंभीत् प्रथयन् अमूं दिवं आत् इत् जनिष्ट पार्थिवः॥८॥ यस्य अयं विश्वः आर्यः दासः शेवधिऽपाः अरिः तिरः चित् अर्ये रशमे पवीरवि तुभ्यं इत् सः अज्यते रयिः॥९॥ तुरण्यवः मधुऽमंतं घृतऽश्चुतं विप्रासः अर्के आनृचुः अस्मे रयिः पप्रथे वृष्ण्यं शवः अस्मे सुवानासः इंदवः॥१०॥१९॥

॥५२॥ यथा मनौ विवस्वति सोमं शक्र अपिबः सुतं यथा चिते छंदः इंद्र जुजोषसि आयौ मादयसे सचा॥१॥ पृषध्रे मेध्ये मातरिश्वनि इंद्र सुवाने अमंदयाः यथा सोमं दशऽशिप्रे दशऽओणये स्यूमऽरश्मौ ऋजूनसि॥२॥ यः उक्था केवला दधे यः सोमं धृषिता अपिबत् यस्मै विष्णुः चीणि पदा विऽचक्रमे उप मिचस्य धर्मंऽभिः॥३॥ यस्य त्वं इंद्र स्तोमेषु चाकनः वाजे वाजिन् शतऽक्रतो॰

तं त्वा वयं सुदुघाँऽइव गोऽदुहः जुहूमसि श्रवस्यवः ॥४॥ यः नः दाता सः नः पिता महान् उग्रः ईशानऽकृत् अर्यामन् उग्रः मघऽवा पुरुऽवसुः गोः अश्वस्य प्र दातु नः ॥५॥२०॥ यस्मै त्वं वसो दानाय मंहसे सः रायः पोषं इन्वति वसुऽपतिं शतऽऊतुं स्तोमैः इंद्रं हवामहे ॥६॥ कदा चन प्र युच्छसि उभे नि पासि जन्मनी तुरीय अदित्य हवनं ते इंद्रियं आ तस्थौ अमृतं दिवि ॥७॥ यस्मै त्वं मघऽवन् इंद्र गिर्वणः शिक्षो शिक्षसि दाशुषे अस्माकं गिरः उत सुऽस्तुतिं वसो कण्वऽवत् शृणुधि हवं ॥८॥ अस्तावि मन्म पूर्व्यं ब्रह्म इंद्राय वोचत पूर्वीः ऋतस्य बृहतीः अनूषत स्तोतुः मेधाः असृक्षत ॥९॥ सं इंद्रः रायः बृहतीः अधूनुत सं क्षोणी सं ऊं सूर्यं सं शुक्रासः शुचयः सं गोऽआशिरः सोमाः इंद्रं अमंदिषुः ॥१०॥२१॥

॥५३॥ उपऽमं त्वा मघोनां ज्येष्ठं च वृषभाणां पूर्भित्ऽतमं मघऽवन् इंद्र गोऽविदं ईशानं रायः ईमहे ॥१॥ यः आयुं कुत्सं अतिथिऽग्वं ऋदीयः ववृधानः दिवेऽदिवे तं त्वा वयं हरिऽअश्वं शतऽऊतुं वाजऽयंतः हवामहे ॥२॥ आ नः विश्वेषां रसं मध्वः सिंचंतु अद्रयः ये पराऽवति सुन्विरे जनेषु आ ये अर्वाऽवति इंदवः ॥३॥ विश्वा द्वेषांसि जहि च अव च आ कृधि विश्वे सन्वंतु आ वसु शीर्ष्टेषु चित् ते मदिरासः अंशवः यत्र सोमस्य तृंपसि ॥४॥२२॥ इंद्र नेदीयः आ इत् इहि मितऽमेधाभिः ऊतिऽभिः आ शंतम शंतमाभिः अभिष्टिऽभिः आ सुऽआपे स्वापिऽभिः ॥५॥ आजिऽतुरं सत्ऽपतिं विश्वऽचर्षणिं कृधि प्रऽजासु आऽभगं प्र सु तिर शचीभिः ये ते उक्थिनः ऋतुं पुनंते आनुषक् ॥६॥ यः ते सा-

धिष्ठः अवसे ते स्याम भरेषु ते वयं होचाभिः उत देवहूतिऽभिः ससऽवांसः मनामहे॥७॥ अहं हि ते हरिऽवः ब्रह्म वाजऽयुः आजिं यामि सदा ऊतिऽभिः त्वां इत् एव तं अमे सं अश्वऽयुः गव्युः अग्ने मथीनां ॥८॥२३॥

॥५४॥ एतत् ते इंद्र वीर्यं गीःऽभिः गृणंति कारवः ते स्तोभंतः ऊर्जे आवन् घृतऽश्चुतं पौरासः नक्षन् धीतिऽभिः ॥१॥ नक्षंते इंद्रं अवसे सुऽकृत्यया येषां सुतेषु मंदसे यथा संऽवर्ते अमदः यथा कृशे एव अस्मे इंद्र मत्स्व ॥२॥ आ नः विश्वे सऽजोषसः देवासः गंतन उप नः वसवः रुद्राः अवसे नः आ गमन् मृळंतु मरुतः हवं॥३॥ पूषा विष्णुः हवनं मे सरस्वती अवंतु सप्त सिंधवः आपः वातः पर्वतासः वनस्पतिः शृणोतु पृथिवी हवं॥४॥२४॥ यत् इंद्र राधः अस्ति ते माघोनं मघवत्ऽतम तेन नः बोधि सधऽमाद्यः वृधे भगः दानाय वृचऽहन्॥५॥ आजिऽपते नृऽपते त्वं इत् हि नः वाजे आ वक्षि सुऽक्रतो° वीती होचाभिः उत देववीतिऽभिः ससऽवांसः वि शृण्विरे॥६॥ संति हि अर्ये आऽशिषः इंद्रे आयुः जनानां अस्मान् नक्षस्व मघऽवन् उप अवसे धुक्षस्व पिप्युषीं इषं॥७॥ वयं ते इंद्र स्तोमेभिः विधेम त्वं अस्माकं शंतऽक्रतो° महि स्थूरं शशयं राधः अह्रयं प्रस्कण्वाय नि तोशय ॥८॥२५॥

॥५५॥ भूरि इत् इंद्रस्य वीर्यं वि अख्यं अभि आ अयति राधः ते दस्यवे वृक॥१॥ शतं श्वेतासः उक्षणः दिवि तारः न रोचंते महा दिवं न तस्तभुः॥२॥ शतं वेणून् शतं पुनः शतं चर्माणि मूा-

तानि शतं मे बल्बजऽस्तुकाः अरुषीणां चतुःऽशतं ॥३॥ सुऽदेवाः स्थ काण्वायनाः वयःऽवयः विऽचरंतः अश्वासः न चंक्रमत ॥४॥ आत् इत् साप्तस्य चर्किरन् न अनूनस्य महि श्रवः श्यावीः अतिऽध्वसन् पथः चक्षुषा चन संऽनशे॥५॥२६॥

॥५६॥ प्रति ते दस्यवे वृक राधः अदर्शि अह्नयं द्यौः न प्रथिना शवः॥१॥ दश मह्यं पौतऽक्रतः सहस्रा दस्यवे वृकः नित्यात् रायः अमंहत ॥२॥ शतं मे गर्दभानां शतं ऊर्णाऽवतीनां शतं दासान् अति सर्जः॥३॥ तचौ अपि प्र अनीयत पूतऽक्रताय विऽअक्ता अश्वानां इत् न यूथ्या ॥४॥ अचेति अग्निः चिकितुः हव्यऽवाट् सः सुमत्ऽरथः अग्निः शुक्रेण शोचिषा बृहत् सूरः अरोचत दिवि सूर्यः अरोचत ॥५॥२७॥

॥५७॥ युवं देवा ऋतुना पूर्व्येण युक्ता रथेन तविषं यजत्रा आ अगच्छतं नासत्या शचीभिः इदं नृतीयं सवनं पिबाथः॥१॥ युवां देवाः चयः एकादशासः सत्याः सत्यस्य दहशे पुरस्तात् अस्माकं यज्ञं सवनं जुषाणा पातं सोमं अश्विना दीदिऽअग्नी॰ ॥२॥ पनाय्यं तत् अश्विना कृतं वां वृषभः दिवः रजसः पृथिव्याः सहस्रं शंसाः उत ये गोऽइष्टौ सर्वान् इत् तान् उप यात पिबध्यै ॥३॥ अयं वां भागः निऽहितः यजत्रा इमाः गिरः नासत्या उप यातं पिबतं सोमं मधुऽमंतं अस्मे प्र दाश्वांसं अवतं शचीभिः ॥४॥२८॥

॥५८॥ यं ऋत्विजः बहुधा कल्पयंतः सऽचेतसः यज्ञं इमं वहं-

ति यः अनूचानः ब्राह्मणः युक्तः आसीत् का स्वित् तत्र यजमानस्य सऽवित्॥१॥ एकः एव अग्निः बहुधा सऽइद्धः एकः सूर्यः विश्वं अनु प्रऽभूतः एका एव उषाः सर्वं इदं वि भाति एकं वै इदं वि बभूव सर्वं॥२॥ ज्योतिष्मंतं केतुऽमंतं चिऽचक्रं सुऽखं रथं सुऽसदं भूरिऽवारं चिचऽमंघा यस्य योगे अधिऽजज्ञे तं वां हुवे अश्तिं रिक्थं पिबध्यै॥३॥२९॥

॥५९॥ इमानि वां भागऽधेयानि सिस्रते इंद्रावरुणा प्र महे सुतेषु वां यज्ञेऽयज्ञे ह सवना भुरण्यथः यत् सुन्वते यजमानाय शिक्षथः॥१॥ निःऽसिध्वरीः ओषधीः आपः आस्तां इंद्रावरुणा महिमानं आशत या सिस्रतुः रजसः पारे अध्वनः ययोः शत्रुः नकिः अदेवः ओहते॥२॥ सत्यं तत् इंद्रावरुणा कृशस्य वां मध्वः ऊर्मिं दुहते सप्त वाणीः ताभिः दाश्वांसं अवतं शुभः पती यः वां अदब्धः अभि पाति चित्तिऽभिः॥३॥ घृतऽप्रुषः सौम्याः जीरऽदानवः सप्त स्वसारः सदने ऋतस्य याः ह वां इंद्रावरुणा घृतऽश्चुतः ताभिः धत्तं यजमानाय शिक्षतं॥४॥३०॥ अवोचाम महते सौभगाय सत्यं त्वेषाभ्यां महिमानं इंद्रियं अस्मान् सु इंद्रावरुणा घृतऽश्चुतः चिऽभिः साप्तेभिः अवतं शुभः पती॥५॥ इंद्रावरुणा यत् ऋषिऽभ्यः मनीषां वाचः मतिं श्रुतं अदत्तं अर्ये यानि स्थानानि असृजंत धीराः यज्ञं तन्वानाः तपसा अभि अपश्यं॥६॥ इंद्रावरुणा सौमनसं अद्भुतं रायः पोषं यजमानेषु धत्तं प्रऽजां पुष्टिं भूतिं अस्मासु धत्तं दीर्घायुऽत्वाय प्र तिरतं नः आयुः॥७॥३१॥

॥ इति वालखिल्यं समाप्तं ॥

॥६०॥ अग्ने आ याहि अग्निऽभिः होतारं त्वा वृणीमहे आ वां

अनक्तु प्रऽयता हविष्मती यजिष्ठं बर्हिः आऽसदे ॥१॥ अच्छ हि त्वा सहसः सूनो अंगिरः सुचः चरंति अध्वरे ऊर्जः नपातं घृत-ऽकेशं ईमहे अग्निं यज्ञेषु पूर्व्यं ॥२॥ अग्ने कविः वेधाः असि होता पावक यक्ष्यः मंद्रः यजिष्ठः अध्वरेषु ईड्यः विप्रेभिः शुक्र मन्म-ऽभिः ॥३॥ अद्रोघं आ वह उशतः यविष्ठ्य देवान् अजस्र वीतये अभि प्रयांसि सुऽधिता आ वसो गहि मंदस्व धीतिऽभिः हितः ॥४॥ त्वं इत् सऽप्रथाः असि अग्ने चातः ऋतः कविः त्वां विप्रासः समिऽधान दीदिऽवः आ विवासंति वेधसः ॥५॥३२॥ शोच शोचिष्ठ दीदिहि विशे मयः रास्व स्तोचे महान् असि देवानां शर्मन् मम संतु सूरयः शचुऽसहः सुऽअग्नयः ॥६॥ यथा चित् वृद्धं अतसं अग्ने संऽजूर्वसि क्षमि एव दह मिचऽमहः यः अस्मऽध्रुक् दुःऽमन्मा कः च वेनति ॥७॥ मा नः मर्ताय रिपवे रक्षस्विने मा अघ-ऽशंसाय रीरधः अस्मेधत्ऽभिः तरणिऽभिः यविष्ठ्य शिवेभिः पाहि पायुऽभिः ॥८॥ पाहि नः अग्ने एकया पाहि उत द्वितीयया पाहि गीःऽभिः तिसृऽभिः ऊर्जां पते पाहि चतसृऽभिः वसो ॥९॥ पाहि विश्वस्मात् रक्षसः अराव्णः प्र स्म वाजेषु नः अव त्वां इत् हि नेदिष्ठं देवऽतातये आपिं नक्षामहे वृधे ॥१०॥३३॥ आ नः अग्ने वयःऽवृधं रयिं पावक शंस्यं रास्व च नः उपऽमाते पुरुऽस्पृहं सुऽनीती स्वयशःऽतरं ॥११॥ येन वंसाम पृतनासु शर्धतः तरंतः अर्यः आऽदिशः सः त्वं नः वर्ध प्रयसा शचीऽवसो० जिन्व धियः वसुऽविदः ॥१२॥ शिशानः वृषभः यथा अग्निः शृंगे दविध्वत् तिग्माः अस्य हनवः न प्रतिऽधृषे सुऽजंभः सहसः यहुः ॥१३॥ नहि ते अग्ने वृषभ प्रतिऽधृषे जंभासः यत् विऽतिष्ठसे सः त्वं नः होतः सुऽहुतं हविः कृधि वंस्व नः वार्यं पुरु ॥१४॥ शेषे

वनेषु माचोः संत्वा मर्तासः इंधते अतंद्रः हव्या वहसि हविःऽकृतः आत् इत् देवेषु राजसि॥१५॥३४॥ सन्न होतारः तं इत् ईळते त्वा अग्ने सुऽअत्यजं अह्रयं भिनत्सि अद्रिं तपसा वि शोचिषा प्र अग्ने तिष्ठ जनान् अति॥१६॥ अग्निंऽअग्निं वः अधिंऽगुं हुवेम वृक्तऽबर्हिषः अग्निं हितऽप्रयसः शश्वतीषु आ होतारं चर्षणीनां॥१७॥ केतेन शर्मन् सचते सुऽसामनि अग्ने तुभ्यं चिकित्वना इषण्यया नः पुरुऽरूपं आभर वाजं नेदिष्ठं ऊतये॥१८॥ अग्ने जरितः विश्पतिः तेपानः देव रक्षसः अप्रोषिऽवान् गृहऽपतिः महान् असि दिवः पायुः दुरोणऽयुः॥१९॥ मा नः रक्षः आ वेशीत् आघृणिऽवसो॰ मा यातुः यातुऽमावतां परःऽगव्यूति अनिरां अप क्षुधं अग्ने सेध रक्षस्विनः॥२०॥३५॥

॥ ६१॥ उभयं शृणवत् च नः इंद्रः अर्वाक् इदं वचः सत्राच्या मघऽवा सोमऽपीतये धिया शविष्ठः आ गमत्॥१॥ तं हि स्वऽराजं वृषभं तं ओजसे धिषणे निःऽततक्षतुः उत उपऽमानां प्रथमः नि सीदसि सोमऽकामं हि ते मनः॥२॥ आ वृषस्व पुरुऽवसो॰ सुतस्य इंद्र अंधसः विद्म हि त्वा हरिऽवः पृत्ऽसु सस्हिं अधृष्टं चित् दधृष्वणिं॥३॥ अप्रामिऽसत्य मघऽवन् तथा इत् असत् इंद्र ऋत्वा यथा वशः सनेमं वाजं तवं शिप्रिन् अवसा मक्षु चित् यंतः अद्रिऽवः॥४॥ शग्धि ऊं सु शचीऽपते इंद्र विश्वाभिः ऊतिऽभिः भगं न हि त्वा यशसं वसुऽविदं अनु शूर चरामसि॥५॥३६॥ पौरः अश्वस्य पुरुऽकृत् गवां असि उत्सः देव हिरण्ययः नकिः हि दानं परिऽमर्धिषत् त्वे यत्ऽयत् यामि तत् आ भर॥६॥ त्वं हि आ इहि चेरवे विदाः भगं वसुत्तये उत् ववृषस्व मघऽवन्

गोऽइष्टये उत इंद्र अश्वेऽइष्टये॥७॥ त्वं पुरू सहस्राणि शतानि च यूथा दानाय मंहसे आ पुरंऽदरं चकृम विप्रेऽवचसः इंद्रं गायँतः अवसे॥८॥ अविप्रः वा यत् अविधत् विप्रः वा इंद्र ते वचः सः प्र ममंदत् त्वाऽया शतऽक्रतो° प्राचाऽमन्यो° अहँऽसन॥९॥ उग्रऽबाहुः मक्षुऽकृत्वा पुरंऽदरः यदि मे शृणवंत् हवं वसुऽयवः वसुऽपतिं शतऽक्रतुं स्तोमैः इंद्रं हवामहे॥१०॥३७॥ न पापासः मनामहे न अरायासः न जळ्हवः यत् इत् नु इंद्रं वृषणं सचा सुते सखायं कृणवामहै॥११॥ उग्रं युयुज्म पृतनासु ससहिं क्रतुंऽकां तिं अदाभ्यं वेदं भूमं चित् सनिता रथिऽतमः वाजिनं यं इत् ऊं नशंत्॥१२॥ यतः इंद्र भयामहे ततः नः अभयं कृधि मघऽवन् शग्धि तवं तत् नः ऊतिऽभिः वि द्विषः वि मृधः जहि॥१३॥ त्वं हि राधःऽपते राधसः महः क्षयस्य असि विधतः तं त्वा वयं मघऽवन् इंद्र गिर्वणः सुतऽवंतः हवामहे॥१४॥ इंद्रः स्पृत् उत वृचऽहा पुरःऽपाः नः वरेण्यः सः नः रक्षिषत् चरमं सः मध्यमं सः पश्चात् पातु नः पुरः॥१५॥३८॥ त्वं नः पश्चात् अधरात् उत्तरात् पुरः इंद्र नि पाहि विश्वतः आरे अस्मत् कृणुहि दैव्यं भयं आरे हेतीः अदेवीः॥१६॥ अद्यऽअद्य श्वःऽश्वः इंद्र चास्वं परे च नः विश्वा च नः जरितॄन् सत्ऽपते अहा दिवा नक्तं च रक्षिषः॥१७॥ प्रऽभंगी शूरः मघऽवा तुविऽमघः संऽमिश्लः वीर्याय कं उभा ते बाहू वृषणा शतऽक्रतो° नि या वज्रं मिमिक्षतुः॥१८॥३९॥

॥६२॥ प्रो अस्मै उपऽस्तुतिं भरत यत् जुजोषति उक्थैः इंद्रस्य माहिनं वयः वर्धंति सोमिनः भद्राः इंद्रस्य रातयः॥१॥ अयुजः असमः नृऽभिः एकः कृष्टीः अयास्यः पूर्वीः अति प्र ववृधे

विश्वा जातानि ओजसा भद्राः इंद्रस्य रातयः॥२॥ अहितेन चित् अर्वता जीरऽदानुः सिसासति प्रऽवाच्यँ इंद्र तत् तव वीर्याणि करिष्यतः भद्राः इंद्रस्य रातयः॥३॥ आ याहि कृणवाम ते इंद्र ब्रह्माणि वर्धना येभिः शविष्ठ चाकनः भद्रं इह श्रवस्यते भद्राः इंद्रस्य रातयः॥४॥ धृषतः चित् धृषत् मनः कृणोषि इंद्र यत् त्वं तीव्रैः सोमैः सपर्यतः नमःऽभिः प्रतिऽभूषतः भद्राः इंद्रस्य रातयः॥५॥ अव चष्टे ऋचीषमः अवतान्ऽइव मानुषः जुष्टी दक्षस्य सोमिनः सखायं कृणुते युजं भद्राः इंद्रस्य रातयः॥६॥४०॥ विश्वे ते इंद्र वीर्यं देवाः अनु क्रतुं ददुः भुवः विश्वस्य गोऽपतिः पुरुऽस्तुत भद्राः इंद्रस्य रातयः॥७॥ गृणे तत् इंद्र ते शवः उपऽमं देवऽतातये यत् हंसि वृत्रं ओजसा शचीऽपते भद्राः इंद्रस्य रातयः॥८॥ समनाऽइव वपुष्यतः कृणवत् मानुषा युगा विदे तत् इंद्रः चेतनं अध श्रुतः भद्राः इंद्रस्य रातयः॥९॥ उत् जातं इंद्र ते शवः उत् त्वां उत् तव क्रतुं भूरिऽगो० भूरि ववृधुः मघऽवन् तव शर्मणि भद्राः इंद्रस्य रातयः॥१०॥ अहं च त्वं च वृत्रऽहन् सं युज्याव सनिऽभ्यः आ अरातिऽवा चित् अद्रिऽवः अनु नौ पूर् मंसते भद्राः इंद्रस्य रातयः॥११॥ सत्यं इत् वै ऊं तं वयं इंद्रं स्तवाम न अनृतं महान् असुन्वतः वधः भूरि ज्योतींषि सुन्वतः भद्राः इंद्रस्य रातयः॥१२॥४१॥

॥ ६३ ॥ सः पूर्व्यः महानाँ वेनः क्रतुऽभिः आनजे यस्य द्वारा मनुः पिता देवेषु धियः आनजे॥१॥ दिवः मानं न उत् सदन् सोमंऽपृष्ठासः अद्रयः उक्था ब्रह्म च शंस्या॥२॥ सः विद्वान् अंगिरःऽभ्यः इंद्रः गाः अवृणोत् अप स्तुषे तत् अस्य पौंस्यं॥३॥ सः प्र-

त्नऽथा कविऽवृधः इंद्रः वाकस्य वक्षणिः शिवः अर्कस्य होमनि अस्मऽचा गंतु अवसे॥४॥ आत् ऊं नु ते अनु क्रतुं स्वाहा वरस्य यज्यवः स्वाचं अर्काः अनूषत इंद्र गोत्रस्य दावने॥५॥ इंद्रं विश्वानि वीर्या कृतानि कर्वानि च यं अर्काः अध्वरं विदुः॥६॥४२॥ यत् पांचऽजन्यया विशा इंद्रे घोषाः असृक्षत अस्तृणात् बर्हणा विपः अर्यः मानस्य सः क्षयः॥७॥ इयं ऊं ते अनुऽस्तुतिः चकृषे तानि पौंस्या प्र आवः चक्रस्य वर्तनिं॥८॥ अस्य वृष्णः विऽओदने उरु क्रमिष्ट जीवसे यवं न पष्वः आ ददे॥९॥ तत् दधानाः अवस्यवः युष्माभिः दक्षऽपितरः स्याम मरुत्वतः वृधे॥१०॥ बट् ऋत्वियाय धाम्ने ऋक्वऽभिः पूर् नोनुमः जेषाम इंद्र त्वया युजा॥११॥ अस्मे रुद्राः मेहना पर्वतासः वृचऽहत्ये भरेऽहूतौ सऽजोषाः यः शंसते स्तुवते धायि पज्रः इंद्रऽज्येष्ठाः अस्मान् अवंतु देवाः॥१२॥४३॥

॥६४॥ उत् त्वा मंदंतु स्तोमाः कृणुष्व राधः अद्रिऽवः अव ब्रह्मऽद्विषः जहि॥१॥ पदा पणीन् अराधसः नि बाधस्व महान् असि नहि त्वा कः चन प्रति॥२॥ त्वं ईशिषे सुतानां इंद्र त्वं असुतानां त्वं राजा जनानां॥३॥ आ इहि प्र इहि क्षयः दिवि आऽघोषन् चर्षणीनां आ उभे पृणासि रोदसी॥४॥ त्यं चित् पर्वतं गिरिं शतऽवंतं सहस्रिणं वि स्तोतृऽभ्यः रुरोजिथ॥५॥ वयं ऊं त्वा दिवा सुते वयं नक्तं हवामहे अस्माकं कामं आ पृण॥६॥४४॥ क्रत्वः वृषभः युवा तुविऽग्रीवः अनानतः ब्रह्मा कः तं सपर्यति॥७॥ कस्य स्वित् सवनं वृषा जुजुष्वान् अव गच्छति इंद्रं कः ऊं स्वित् आ चके॥८॥ कं ते दानाः असक्षत वृचऽहन् कं सुऽवीर्या उक्थे कः ऊँ स्वित् अंतमः॥९॥ अयं ते मानुषे जने सोमः पूरुषु सूयते तस्य

आ इहि प्र द्रव पिब ॥१०॥ अयं ते शर्यणाऽवति सुऽसोमायां अधि प्रियः आर्जीकीये मदिन्ऽतमः ॥११॥ तं अद्य राधसे महे चारुं मदाय घृष्वये आ इहि ईं इंद्र द्रव पिब ॥१२॥४५॥

॥ ६५ ॥ यत् इंद्र प्राक् अपाक् उदक् न्यक् वा हूयसे नृऽभिः आ याहि तूयं आ अभिः ॥१॥ यत् वा प्रऽस्रवणे दिवः मादयासे स्वःऽनरे यत् वा समुद्रे अंधसः ॥२॥ आ त्वा गीःऽभिः महां उरुं हुवे गांऽइव भोजसे इंद्र सोमस्य पीतये ॥३॥ आ ते इंद्र महिमानं हरयः देव ते महः रथे वहंतु बिभ्रतः ॥४॥ इंद्र गृणीषे ऊं स्तुषे महान् उग्रः ईशानऽकृत् आ इहि नः सुतं पिब ॥५॥ सुतऽवंतः त्वा वयं प्रयस्वंतः हवामहे इदं नः बर्हिः आऽसदे ॥६॥४६॥ यत् चित् हि शश्वतां असि इंद्र साधारणः त्वं तं त्वा वयं हवामहे ॥७॥ इदं ते सोम्यं मधु अधुक्षन् अद्रिऽभिः नरः जुषाणः इंद्र तत् पिब ॥८॥ विश्वान् अर्यः विपःऽचितः अति ख्यः तूयं आ गहि अस्मे धेहि श्रवः बृहत् ॥९॥ दाता मे पृषतीनां राजा हिरण्यऽवीनां मा देवाः मघऽवा रिषत् ॥१०॥ सहस्रं पृषतीनां अधि चंद्रं बृहत् पृथु शुक्रं हिरण्यं आ ददे ॥११॥ नपातः दुःऽगहस्य मे सहस्रेण सुऽराधसः श्रवः देवेषु अक्रत ॥१२॥४७॥

॥ ६६ ॥ तरःऽभिः वः विदत्ऽवसुं इंद्रं सऽबाधः ऊतये बृहत् गायंतः सुतऽसोमे अध्वरे हुवे भरं न कारिणं ॥१॥ न यं दुधाः वरंते न स्थिराः मुरः मदे सुऽशिप्रं अंधसः यः आऽहत्य शशमानाय सुन्वते दाता जरित्रे उक्थ्यं ॥२॥ यः शक्रः मृक्षः अभ्वः यः वा कीजः हिरण्ययः सः ऊर्वस्य रेजयति अपऽवृतिं इंद्रः गव्यस्य वृत्रऽहा

॥३॥ निऽखातं चित् यः पुरुऽसंभृतं वसु उत् इत् वपति दाशुषे वज्री सुऽशिप्रः हरिऽअश्वः इत् करत् इंद्रः क्रत्वा यथा वशत् ॥४॥ यत् ववंथ पुरुऽस्तुत पुरा चित् शूर नृणां वयं तत् ते इंद्र संभराम-सि यज्ञं उक्थं तुरं वचः ॥५॥४८॥ सचा सोमेषु पुरुऽहूत वज्रिऽवः मदाय द्युक्ष सोमऽपाः त्वं इत् हि ब्रह्मऽकृते काम्यं वसु देष्ठः सुन्वते भुवः ॥६॥ वयं एनं इदा ह्यः अपीपेम इह वज्रिणं तस्मै ऊं अद्य समना सुतं भर आ नूनं भूषत श्रुते ॥७॥ वृकः चित् अस्य वारणः उराऽमथिः आ वयुनेषु भूषति सः इमं नः स्तोमं जुजुषाणः आ गहि इंद्र प्र चिचया धिया ॥८॥ कत् ऊं नु अस्य अकृतं इंद्रस्य अस्ति पौंस्यं केनो नु कं श्रोमतेन न शुश्रुवे जनुषः परि वृचऽहा ॥९॥ कत् ऊं महीः अधृष्टाः अस्य तविषीः कत् ऊं वृचऽघः अस्तृतं इंद्रः विश्वान् बेकऽनाटान् अहःऽहशः उत क्रत्वा पणीन् अभि ॥१०॥४९॥ वयं घ ते अपूर्व्या इंद्र ब्रह्माणि वृचऽहन् पुरुऽतमासः पुरुऽहूत वज्रिऽवः भृतिं न प्र भरामसि ॥११॥ पूर्वीः चित् हि त्वे तुविऽकूर्मिन् आऽशसः हवंते इंद्र ऊतयः तिरः चित् अर्यः सवना आ वसो गहि शविष्ठ श्रुधि मे हवं ॥१२॥ वयं घ ते त्वे इत् ऊं इंद्र विप्राः अपि स्मसि नहि त्वत् अन्यः पुरुऽहूत कः चन मघऽवन् अस्ति मर्डिता ॥१३॥ त्वं नः अस्याः अमतेः उत क्षुधः अभिऽशस्तेः अव स्पृधि त्वं नः ऊती तव चिचया धिया शिक्ष शचिष्ठ गातु-ऽवित् ॥१४॥ सोमः इत् वः सुतः अस्तु कलयः मा विभीतन अप इत् एषः ध्वस्मा अयति स्वयं घ एषः अप अयति ॥१५॥५०॥

॥६७॥ त्यान् नु क्षत्रियान् अवः आदित्यान् याचिषामहे सुऽमृळीकान् अभिष्टये ॥१॥ मित्रः नः अति अंहतिं वरुणः पर्षत् अर्यमा

अर्यमा आदित्यासः यथा विदुः॥२॥ तेषां हि चित्रं उक्थ्यं वरूथं अस्ति दाशुषे आदित्यानां अरंऽकृते॥३॥ महि वः महतां अवः वरुण मित्र अर्यऽमन् अवांसि आ वृणीमहे॥४॥ जीवान् नः अभि धेतन आदित्यासः पुरा हथात् कत् ह स्थ हवनऽश्रुतः॥५॥ ॥५१॥ यत् वः श्रांताय सुन्वते वरूथं अस्ति यत् छर्दिः तेन नः अधि वोचत॥६॥ अस्ति देवाः अंहोः उरु अस्ति रत्नं अनागसः आदित्याः अङ्गतऽएनसः॥७॥ मा नः सेतुः सिसेत् अयं महे वृणक्तु नः परि इंद्रः इत् हि श्रुतः वशी॥८॥ मा नः मृचा रिपूणां वृजिनानां अविष्यवः देवाः अभि प्र मृक्षत॥९॥ उत त्वां अदिते महि अहं देवि उप ब्रुवे सुऽमृळीकां अभिष्टये॥१०॥५२॥ पर्षि दीने गभीरे आ उर्यऽपुचे जिघांसतः माकिः तोकस्य नः रिषत् ॥११॥ अनेहः नः उरुऽव्रजे उरूचि वि प्रऽसर्तवे कृधि तोकाय जीवसे॥१२॥ ये मूर्धानः क्षितीनां अदब्धासः स्वऽयशसः व्रता रक्षंते अदुहः॥१३॥ ते नः आसन्नः वृकाणां आदित्यासः मुमोचत स्तेनं बद्धंऽइव अदिते॥१४॥ अपो सु नः इयं शरुः आदित्याः अप दुःऽमतिः अस्मत् एतु अजघ्नुषी॥१५॥५३॥ शश्वत् हि वः सुऽदानवः आदित्याः ऊतिऽभिः वयं पुरा नूनं बुभुज्महे॥१६॥ शश्वंतं हि प्रऽचेतसः प्रतिऽयंतं चित् एनसः देवाः कृणुथ जीवसे॥१७॥ तत् सु नः नव्यं सन्यसे आदित्याः यत् मुमोचति बंधात् बद्धंऽइव अदिते॥१८॥ न अस्माकं अस्ति तत् तरः आदित्यासः अतिऽस्कदे यूयं अस्मभ्यं मृळत॥१९॥ मा नः हेतिः विवस्वतः आदित्याः कृचिमा शरुः पुरा नु जरसः वधीत्॥२०॥ वि सु द्वेषः वि अंहतिं आदित्यासः वि संऽहितं विश्वक् वि वृहत रपः॥२१॥ ॥५४॥४॥

॥६८॥ आ त्वा रथं यथोतये सुम्नाय वर्तयामसि तुविऽकूर्मिं ऋतिऽसहं इंद्रं शविष्ठ सत्ऽपते ॥१॥ तुविऽष्णुष्म तुविऽक्रतो॰ शचीऽवः विष्णवा मते आ पप्राथ महिऽत्वना ॥२॥ यस्य ते महिना महः परि ज्मायंतं ईयतुः हस्ता वज्रं हिरण्ययं॥३॥ विश्वानरस्य वः पतिं अनानतस्य शवसः एवैः च चर्षणीनां ऊती हुवे रथानां ॥४॥ अभिष्टये सदाऽवृधं स्वःऽमीळ्हेषु यं नरः नाना हवंते ऊतये॥५॥१॥ परःऽमाचं ऋचीषमं इंद्रं उग्रं सुऽराधसं ईशानं चित् वसूनां ॥६॥ तंऽतं इत् राधसे महे इंद्रं चोदामि पीतये यः पूर्व्यो अनुऽस्तुतिं ईशे कृष्टीनां नृतुः ॥७॥ न यस्य ते शवसान सख्यं आनंश मर्त्यः नकिः शवांसि ते नशत् ॥८॥ त्वाऽऊतासः त्वा युजा अप्ऽसु सूर्ये महत् धनं जयेम पृत्ऽसु वज्रिऽवः ॥९॥ तं त्वा यज्ञेभिः ईमहे तं गीःऽभिः गिर्वणःऽतम इंद्र यथा चित् आविथ वाजेषु पुरुऽमाय्यं॥१०॥२॥ यस्य ते स्वादुसख्यं स्वाद्वी प्रऽनीतिः अद्रिऽवः यज्ञः वितंतसाय्यः ॥११॥ उरु नः तन्वे तने उरु क्षयाय नः कृधि उरु नः यंधि जीवसे॥१२॥ उरुं नृऽभ्यः उरुं गवे उरुं रथाय पंथां देवऽवीतिं मनामहे ॥१३॥ उप मा षट् ङाऽङा नरः सोमस्य हर्षी तिष्ठंति स्वादुऽरातयः ॥१४॥ ऋज्री इंद्रोते आ ददे हरी ऋक्षस्य सूनवि आप्वऽमेधस्य रोहिता ॥१५॥३॥ सुऽरथान् आतिथिऽग्वे सुऽअभीषून् आर्क्षे आप्वऽमेधे सुऽपेशसः ॥१६॥ षट् अप्वान् आतिथिऽग्वे इंद्रोते वधूऽमतः सचा पूतऽक्रतौ सनं॥१७॥ आ एषु चेतत् वृषणऽवती अंतः ऋज्रेषु अरुषी सुऽअभीषुः कशाऽवती॥१८॥ न युष्मे वाजऽबंधवः निऽनित्सुः चन मर्त्यः अवद्यं अधि दीधरत् ॥१९॥४॥

॥ ६९ ॥ प्र ऽप्र व॒: चि॒ऽस्तु॒भे इ॒षे म॒न्दत्ऽ वी॒राय॑ इन्द॑वे धि॒या व॒: मे॒धऽसा॑तये पुरं॒ऽध्या आ वि॑वासति ॥ १ ॥ न॒दं व॒: ओद॑तीनां न॒दं योयु॑वतीनां पतिं॑ व॒: अ॒घ्यानां धे॒नूना॑ इषु॒ध्यसि॑ ॥ २ ॥ ता: अ॒स्य सू॒दऽदो॑हस: सो॒मं श्री॒ण॒न्ति॒ पृश्न॑य: जन्म॑न् दे॒वाना॑ विश॑: चि॒षु आ रो॑च॒ने दि॒व: ॥ ३ ॥ अ॒भि प्र गो॒ऽप॑तिं गि॒रा इन्द्रं॑ अर्च॒ यथा॑ वि॒दे सू॒नुं स॒त्यस्य॑ सत्ऽप॑तिं ॥ ४ ॥ आ हर॑य: ससृ॒ज्रि॒रे॒ अरु॑षी: अधि॑ ब॒र्हिषि॑ यजे॑ अ॒भि सं॒ऽन॒वा॒महे ॥ ५ ॥ ५ ॥ इन्द्रा॑य गाव॑: आ॒ऽअ॒शि॒रं दु॒दु॒ह्रे व॒ज्रिणे॑ मधु॒ यत् सी॑ उप॒ऽह्व॒रे वि॒दत् ॥ ६ ॥ उत् यत् ब्रध्न॑स्य॑ वि॒ष्टपं॑ गृ॒हं इन्द्र॑: च॒ गन्व॑हि मध्व॑: पी॒त्वा स॒चे॒व॒हि॒ चि: स॒प्र स॒ख्यु॑: प॒दे ॥ ७ ॥ अर्च॑त प्र॒ अ॒र्च॒त॒ प्रि॒य॒ऽमे॒धास: अर्च॑त॒ अर्च॑तु पु॒त्र॒का: उ॒त पुरं॑ न धृ॒ष्णु अ॒र्च॒त ॥ ८ ॥ अव॑ स्व॒रा॒नि॒ गर्गं॑र: गो॒धा परि॑ स॒नि॒-स्व॒न॒त् पिंगा॑ परि॑ चनि॒स्क॒दत् इन्द्रा॑य ब्रह्म॑ उत्ऽय॑तं ॥ ९ ॥ आ यत् पत॑न्ति॒ एन्य॑: सु॒ऽदुघा॑: अ॒न॑प॒ऽस्फुर॑: अ॒प॒ऽस्फुरं॑ गृभा॒य॒त॒ सोमं॑ इन्द्रा॑य पात॑वे ॥ १० ॥ ६ ॥ अपा॑त् इन्द्र॑: अपा॑त् अ॒ग्नि: वि॒श्वे दे॒वा: अ॒म॒त्स॒त॒ वरु॑ण: इत् इ॒ह क्ष॒य॒त् तं आप॑: अ॒भि अ॒नू॒ष॒त॒ वत्सं॑ सं॒-शि॒श्वरी॑:ऽइव ॥ ११ ॥ सु॒ऽदे॒व: अ॒सि॒ व॒रु॒ण॒ यस्य॑ ते स॒प्र सिंध॑व: अ॒नु॒ऽक्षर॑न्ति काकु॒दं सू॒र्म्यं॑ सु॒षि॒रांऽइ॑व ॥ १२ ॥ य: व्यतीं॑न् अफा॑-णयत् सु॒ऽयु॒क्तान् उप॑ दा॒शुषे॑ न॒क्त: नेता॑ तत इत् वपु॑: उप॒ऽमा॒य: अ॒मु॒च्य॒त ॥ १३ ॥ अति॑ इत् ऊं॑ श॒क्र: ओ॒ह॒ते॒ इन्द्र॑: विश्वा॑: अति॑ द्विष॑: भि॒नत् क॒नीन॑: ओद॑नं प॒च्यमा॑नं प॒र॒: गि॒रा ॥ १४ ॥ अ॒र्भ॒क: न कु॒मा॒र॒क: अधि॑ तिष्ठत् नवं॑ रथं॑ स: प॒क्ष॒त् म॒हि॒षं मृ॒गं पि॒चे मा॒चे वि॒भु॒ऽअ॒क्तुं ॥ १५ ॥ आ तु सु॒ऽशि॒प्र॒ दं॒ऽप॒ते॒ रथं॑ तिष्ठ हिर॑ण्ययं॑ अ॒ध॒ द्यु॒क्षं स॒चे॒व॒हि॒ स॒हस्र॑ऽपादं अरु॒षं स्व॒स्ति॒ऽगां अ॒ने॒हस॑ं ॥ १६ ॥ तं घ॒ ई॒ इ॒त्था न॒मस्विन॑: उप॑ स्व॒ऽराज॑ं आसते॒ अर्थं॑ चित् अ॒स्य॒

सुऽधितं यत् एतवे आऽवर्तयंति दावने॥१७॥ अनु प्रत्नस्य ओकसः प्रियऽमेधासः एषां पूर्वी अनु प्रऽयतिं वृक्तऽबर्हिषः हितऽप्रयसः आशत॥१८॥७॥७॥

॥७०॥ यः राजा चर्षणीनां याता रथेभिः अध्रिऽगुः विश्वासां तरुता पृतनानां ज्येष्ठः यः वृत्रऽहा गृणे॥१॥ इंद्रं तं शुंभ पुरुऽहन्मन् अवसे यस्य द्विता विऽधर्तरि हस्ताय वज्रः प्रति धायि दर्शतः महः दिवे न सूर्यः॥२॥ नकिः तं कर्मणा नशत् यः चकार सदाऽवृधं इंद्रं न यज्ञैः विश्वऽगूर्तं ऋभ्वसं अधृष्टं धृष्णुऽओजसं॥३॥ अषाळ्हं उग्रं पृतनासु सत्पतिं यस्मिन् महीः उरुऽज्रयः संधेनवः जायमाने अनोनवुः द्यावः क्षामः अनोनवुः॥४॥ यत् द्यावः इंद्र ते शतं शतं भूमीः उत स्युः० न त्वा वज्रिन् सहस्रं सूर्याः अनु न जातं अष्ट रोदसी॥५॥८॥ आ पप्राथ महिना वृष्ण्या वृषन् विश्वा शविष्ठ शवसा अस्मान् अव मघऽवन् गोऽमति व्रजे वज्रिन् चित्राभिः ऊतिऽभिः॥६॥ न सीं अदेवः आपत् इषं दीर्घऽआयो० मर्त्यः एतऽग्वा चित् यः एतशा युयोजते हरी इंद्रः युयोजते॥७॥ तं वः महः महाय्यं इंद्रं दानाय सक्षणिं यः गाधेषु यः आऽअरणेषु हव्यः वाजेषु अस्ति हव्यः॥८॥ उत् ऊं सु नः वसो महे मृशस्व पूर राधसे उत् ऊं सु मह्यै मघऽवन् मघत्तये उत् इंद्र अवसे महे॥९॥ त्वं नः इंद्र ऋतऽयुः त्वाऽनिदः नि तृपसि मध्ये वसिष्व तुविऽनृम्ण ऊर्वीः नि दासं शिश्नथः हथैः॥१०॥९॥ अन्यऽव्रतं अमानुषं अयज्वानं अदेवऽयुं अव स्वः सखा दुधुवीत पर्वतः सुऽघाय दस्युं पर्वतः॥११॥ त्वं नः इंद्र आसां हस्ते शविष्ठ दावने धानानां न सं गृभाय अस्मऽयुः द्विः सं गृभाय अस्मऽयुः॥१२॥ सखायः क्रतुं इ-

च्छत कथा राधाम शरस्य उपऽस्तुतिं भोजः सूरिः यः अह्रयः ॥१३॥ भूरिऽभिः समह ऋषिऽभिः वर्हिष्मत्ऽभिः स्तविष्यसे यत् इत्थं एकैऽएकं इत् शरं वत्सान् पराऽददः॥१४॥ कर्णेऽगृह्य मघऽवा शौरऽदेव्यः वत्सं नः चिऽभ्यः आ अनयत् अजां सूरिः न धातवे॥१५॥१०॥

॥७१॥ त्वं नः अग्ने महःऽभिः पाहि विश्वस्याः अरातेः उत द्विषः मर्त्यस्य॥१॥ नहि मन्युः पौरुषेयः ईशे हि वः प्रियऽजात त्वं इत् असि क्षपाऽवान्॥२॥ सः नः विश्वेभिः देवेभिः ऊर्जः नपात् भद्रऽशोचे रयिं देहि विश्वऽवारं॥३॥ न तं अग्ने अरातयः मर्तं युवंत रायः यं चायसे दाश्वांसं॥४॥ यं त्वं विप्र मेधऽसातौ अग्ने हिनोषि धनाय सः तव ऊती गोषु गंता॥५॥११॥ त्वं रयिं पुरुऽवीरं अग्ने दाशुषे मर्ताय प्र नः नय वस्यः अच्छ॥६॥ उरुष्य नः मा परा दाः अघऽयते जातऽवेदः दुःऽआध्ये मर्ताय॥७॥ अग्ने माकिः ते देवस्य रातिं अदेवः युयोत त्वं ईशिषे वसूनां॥८॥ सः नः वस्वः उप मासि ऊर्जः नपात् माहिनस्य सखे वसो जरितृऽभ्यः॥९॥ अच्छ नः शीरऽशोचिषं गिरः यंतु दर्शतं अच्छ यज्ञासः नमसा पुरुऽवसुं पुरुऽप्रशस्तं ऊतये॥१०॥१२॥ अग्निं सूनुं सहसः जातऽवेदसं दानाय वार्याणां हिता यः भूत् अमृतः मर्त्येषु आ होता मंद्रऽतमः विशि॥११॥ अग्निं वः देवऽयज्यया अग्निं प्रऽयति अध्वरे अग्निं धीषु प्रथमं अग्निं अर्वंति अग्निं क्षैत्राय साधसे॥१२॥ अग्निः इषां सख्ये ददातु नः ईशे यः वार्याणां अग्निं तोकतनये शश्वत् ईमहे वसुं संतं तनूऽपां॥१३॥ अग्निं ईळिष्व अवसे गाथाभिः शीरऽशोचिषं अग्निं राये पुरुऽमीळ्ह श्रुतं नरः अग्निं सुऽदीतये

छर्दिः॥१४॥ अग्निं द्वेषः योतवै नः गृणीमसि अग्निं शं योः च दातवे विश्वासु विक्षु अविताऽइव हव्यः भुवत् वस्तुः ऋषूणां॥१५॥१३॥

॥७२॥ हविः कृणुध्वं आ गमत् अध्वर्युः वनते पुनः' विद्वान् अस्य प्रऽशासनं॥१॥ नि तिग्मं अभि अंप्सु सीदत् होता मनौ अधि जुषाणः अस्य सख्यं॥२॥ अंतः इच्छंति तं जनें रुद्रं परः मनीषया गृभ्णंति जिह्वया ससं॥३॥ जामि अतीतपे धनुः वयःऽधाः अरुहत् वनं हृषदं जिह्वया आ अवधीत्॥४॥ चरन् वत्सः रुशन् इह निऽदातारं न विंदते वेति स्तोतवे अंव्यं॥५॥१४॥ उतो' नु अस्य यत् महत् अश्वऽवत् योजनं बृहत् दामा रथस्य दंहशे॥६॥ दुहंति सप्त एकां उप द्वा पंच सृजतः तीर्थे सिंधोः अधि स्वरे॥७॥ आ दशऽभिः विवस्वंतः इंद्रः कोशं अचुच्यवीत् खेदया चिऽवृता दिवः॥८॥ परि चिऽधातुः अध्वरं जूर्णिः एति नवीयसी मध्वा होतारः अंजते॥९॥ सिंचंति नमसा अवतं उच्चाऽचक्रं परिऽज्मानं नीचीनंऽबारं अक्षितं॥१०॥१५॥ अभिऽआरं इत् अद्रयः निऽसिक्तं पुष्करे मधु अवतस्य विऽसर्जने॥११॥ गावः उप अवत अवतं मही' यज्ञस्य रप्सुदा उभा कर्णा हिरण्यया॥१२॥ आ सुते सिंचत श्रियं रोदस्योः अभिऽश्रियं रसा दधीत वृषभं॥१३॥ ते जानत स्वं ओक्यं सं वत्सासः न मातृऽभिः मिथः नसंत जामिऽभिः॥१४॥ उप सद्मेषु बप्सतः कृण्वते धरुणं दिवि इंदुं अस्मा नमः स्वः०॥१५॥१६॥ अधुक्षन् पिप्युषीं इषं ऊर्जं सप्तऽपदीं अरिः सूयवसस्य सप्त रश्मिऽभिः॥१६॥ सोमस्य मित्रावरुणा उत्ऽइता सूरे आ ददे तत् आतुरस्य भेषजं॥१७॥ उतो' नु अस्य यत् पदं हर्यतस्य निऽधान्यं परि द्यां जिह्वया अतनत्॥१८॥१७॥

॥ ७३ ॥ उत् ईराथां ऋतऽयते युंजाथां अश्विना रथं अंति सत् भूतु वां अवः ॥ १ ॥ निऽमिषः चित् जवीयसा रथेन आ यातं अश्विना अंति सत् भूतु वां अवः ॥ २ ॥ उप स्तृणीतं अचये हिमेन घर्मं अश्विना अंति सत् भूतु वां अवः ॥ ३ ॥ कुह स्थः कुह जग्मथुः कुह श्येनाऽइव पेतथुः अंति सत् भूतु वां अवः ॥ ४ ॥ यत् अद्य कर्हि कर्हि चित् शुश्रुयातं इमं हवं अंति सत् भूतु वां अवः ॥ ५ ॥ १८ ॥ अश्विना यामऽहूतमा नेदिष्ठं यामि आप्यं अंति सत् भूतु वां अवः ॥ ६ ॥ अवँतं अचये गृहं कृणुतं युवं अश्विना अंति सत् भूतु वां अवः ॥ ७ ॥ वरेऽपे अग्निं आऽतपः वदते वल्गु अचये अंति सत् भूतु वां अवः ॥ ८ ॥ प्र सप्तऽवधिः आऽशसा धारां अग्रेः अशायत अंति सत् भूतु वां अवः ॥ ९ ॥ इह आ गतं वृषणऽवसू॰ शृणुतं मे इमं हवं अंति सत् भूतु वां अवः ॥ १० ॥ १९ ॥ किं इदं वां पुराणऽवत् जरतोःऽइव शस्यते अंति सत् भूतु वां अवः ॥ ११ ॥ समानं वां सऽजात्यं समानः बंधुः अश्विना अंति सत् भूतु वां अवः ॥ १२ ॥ यः वां रजांसि अश्विना रथः विऽयाति रोदसी अंति सत् भूतु वां अवः ॥ १३ ॥ आ नः गव्येभिः अश्वैः सहस्रैः उप गच्छतं अंति सत् भूतु वां अवः ॥ १४ ॥ मा नः गव्येभिः अश्वैः सहस्रेभिः अति ख्यतं अंति सत् भूतु वां अवः ॥ १५ ॥ अरुणऽप्सुः उषाः अभूत् अकः ज्योतिः ऋतऽवरी अंति सत् भूतु वां अवः ॥ १६ ॥ अश्विना सु विऽचाकशत् वृक्षं परशुमान्ऽइव अंति सत् भूतु वां अवः ॥ १७ ॥ पुरं न धृष्णो आ रुज कृष्णया बाधितः विशा अंति सत् भूतु वां अवः ॥ १८ ॥ २० ॥

॥ ७४ ॥ विशःऽविशः वः अतिथिं वाजऽयंतः पुरुऽप्रियं अ-

ग्निं वः दुर्यं वचः स्तुषे शूषस्य मन्मऽभिः ॥१॥ यं जनासः हविष्मंतः मित्रं न सर्पिःऽआसुतिं प्रऽशंसंति प्रशस्तिऽभिः ॥२॥ पन्यांसं जातऽवेदसं यः देवऽतांति उत्ऽयता हव्यानि ऐरयत् दिवि ॥३॥ आ अगन्म बृहन्ऽतमं ज्येष्ठं अग्निं आनवं यस्य श्रुतर्वी बृहन् आर्क्षः अनीकं एधते ॥४॥ अमृतं जातऽवेदसं तिरः तमांसि दर्शतं घृतऽआहवनं ईड्यं ॥५॥२१॥ सऽबाधः यं जनाः इमे अग्निं हव्येभिः ईळते जुह्वानासः यतऽस्रुचः ॥६॥ इयं ते नव्यसी मतिः अग्ने अधायि अस्मत् आ मंद्र सुऽजात सुऽक्रतो० अमूर दस्म अतिथे ॥७॥ सा ते अग्ने शंऽतमा चनिष्ठा भवतु प्रिया तया वर्धस्व सुऽस्तुतः ॥८॥ सा द्युम्नैः द्युम्निनी बृहत् उपऽउप श्रवसि श्रवः दधीत वृचऽतूर्यं ॥९॥ अश्वं इत् गां रथऽप्रां वेषं इंद्रं न सत्ऽपतिं यस्य श्रवांसि तूर्वथ पन्यैऽपन्यं च कृष्टयः ॥१०॥२२॥ यं त्वा गोपवनः गिरा चनिष्ठत् अग्ने अंगिरः सः पावक श्रुधि हवं ॥११॥ यं त्वा जनासः ईळते सऽबाधः वाजेऽसाताये सः बोधि वृचऽतूर्यं ॥१२॥ अहं हुवानः आर्क्षे श्रुतर्वणि मदऽच्युतं शर्धांसिऽइव स्तुकाऽविनां मृक्षा शीर्षा चतुर्णां ॥१३॥ मां चत्वारः आशवः शविष्ठस्य दविद्युतन्वः सुऽरथासः अभि प्रयः वक्षन् वयः न तुग्र्यं ॥१४॥ सत्यं इत् त्वा महेऽनदि परुष्णि अव देदिशं न ईं आपः अश्वऽदातरः शविष्ठात् अस्ति मर्त्यः ॥१५॥२३॥

॥७५॥ युक्ष्व हि देवऽहूतमान् अश्वान् अग्ने रथीःऽइव नि होता पूर्व्यः सदः ॥१॥ उत नः देव देवान् अच्छ वोचः विदुःऽतरः श्रत् विश्वा वार्या कृधि ॥२॥ त्वं ह यत् यविष्ठ्य सहसः सूनो आऽहुत ऋतऽवा यज्ञियः भुवः ॥३॥ अयं अग्निः सहस्रिणः वाजस्य

शतिनः पतिः मूर्धा कविः रयीणां॥४॥ तं नेमिं ऋभवः यथा आ नमस्व सहूतिऽभिः नेदीयः यज्ञं अंगिरः॥५॥२४॥ तस्मै नूनं अभिऽद्यवे वाचा विऽरूप नित्यया वृष्णे चोदस्व सुऽस्तुतिं॥६॥ कं ऊं स्वित् अस्य सेनया अग्नेः अपाकऽचक्षसः पणिं गोषु स्तरामहे॥७॥ मा नः देवानां विशः प्रस्नातीःऽइव उस्राः कृशं न हासुः अघ्याः॥८॥ मा नः समस्य दुःऽध्यः परिऽद्वेषसः अंहतिः ऊर्मिः न नावं आ वधीत्॥९॥ नमः ते अग्ने ओजसे गृणंति देव कृष्टयः अमैः अमिचं अर्दय॥१०॥२५॥ कुवित् सु नः गोऽइष्टये अग्ने संऽवेषिषः रयिं उरुऽकृत् उरु नः कृधि॥११॥ मा नः अस्मिन् महाऽधने परा वर्क् भारऽभृत् यथा संऽवर्गं सं रयिं जय॥१२॥ अन्यं अस्मत् भियेऽयं अग्ने सिसक्तु दुच्छुना वधं नः अमऽवत् शवः॥१३॥ यस्य अजुषत् नमस्विनः शमीं अदुःऽमखस्य वा तं घ इत् अग्निः वृधा अवति॥१४॥ परस्याः अधि संऽवतः अवरान् अभि आ तर यच्च अहं अस्मि तान् अव॥१५॥ विद्म हि ते पुरा वयं अग्ने पितुः यथा अवसः अध ते सुम्नं ईमहे॥१६॥२६॥

॥७६॥ इमं नु मायिनं हुवे इंद्रं ईशानं ओजसा मरुत्वंतं न वृजसे॥१॥ अयं इंद्रः मरुत्ऽसखा वि वृचस्य अभिनत् शिरः वज्रेण शतऽपर्वणा॥२॥ ववृधानः मरुत्ऽसखा इंद्रः वि वृचं ऐरयत् सृजन् समुद्रियाः अपः॥३॥ अयं ह येन वै इदं स्वः मरुत्वता जितं इंद्रेण सोमऽपीतये॥४॥ मरुत्वंतं ऋजीषिणं ओजस्वंतं विऽरप्शिनं इंद्रं गीःऽभिः हवामहे॥५॥ इंद्रं प्रत्नेन मन्मना मरुत्वंतं हवामहे अस्य सोमस्य पीतये॥६॥२७॥ मरुत्वान् इंद्र मीढ्वः पिब सोमं शतऽक्रतो॰ अस्मिन् यज्ञे पुरुऽस्तुत॥७॥ तुभ्यं इत् इंद्र मः

रुत्वते सुताः सोमासः अद्रिऽवः हृदा हूयंते उक्थिनः ॥८॥ पिब इत् इंद्र मरुत्ऽसखा सुतं सोमं दिविष्टिषु वज्रं शिशानः ओजसा ॥९॥ उत्ऽतिष्ठन् ओजसा सह पीत्वी शिप्रे अवेपयः सोमं इंद्र चमू सुतं ॥१०॥ अनु त्वा रोदसी उभे क्षमाणं अकृपेतां इंद्र यत् दस्युऽहा अभवः ॥११॥ वाचं अष्टाऽपदीं अहं नवऽस्रक्तिं कृतऽस्रजं इंद्रात् परि तन्वं ममे ॥१२॥२८॥

॥७७॥ जज्ञानः नु शतऽक्रतुः वि पृच्छत् इति मातरं के उग्राः के ह शृण्विरे ॥१॥ आत् ईं शवसी अब्रवीत् ऊर्णऽवाभं अहीशुवं ते पुत्र संतु निःऽतुरः ॥२॥ सं इत् तान् वृत्रऽहा अखिदत् खे अरान्ऽइव खेदया प्रऽवृद्धः दस्युऽहा अभवत् ॥३॥ एकया प्रतिऽधा अपिबत् साकं सरांसि त्रिंशतं इंद्रः सोमस्य काणुका ॥४॥ अभि गंधर्वं अतृणत् अबुध्नेषु रजःऽसु आ इंद्रः ब्रह्मऽभ्यः इत् वृधे ॥५॥२९॥ निः अविध्यत् गिरिऽभ्यः आ धारयत् पक्वं ओदनं इंद्रः बुंदं सुऽआततं ॥६॥ शतऽब्रध्नः इषुः तव सहस्रऽपर्णः एकः इत् यं इंद्र चकृषे युजं ॥७॥ तेन स्तोतृऽभ्यः आ भर नृऽभ्यः नारिऽभ्यः अत्तवे सद्यः जातः ऋभुऽस्थिर ॥८॥ एता चौत्लानि ते कृता वर्षिष्ठानि परीणसा हृदा वीळु अधारयः ॥९॥ विश्वा इत् ता विष्णुः आ अभरत् उरुऽक्रमः त्वाऽईषितः शतं महिषान् क्षीरऽपाकं ओदनं वराहं इंद्रः एमुषं ॥१०॥ तुविऽग्रीवं ते सुऽकृतं सुऽमयं धनुः साधुः बुंदः हिरण्ययः उभा ते बाहू रण्या सुऽसंस्कृता ऋदुऽपे चित् ऋदुऽवृधा ॥११॥३०॥

॥७८॥ पुरोळाशं नः अंधसः इंद्र सहस्रं आ भर शता च शूर

गोनाँ॥१॥ आ नः भर विऽअंजनं गां अश्वं अभिऽअंजनं सचा मना हिरण्यया॥२॥ उत नः कर्णऽशोभना पुरूणि धृष्णो आ भर त्वं हि मृणिषे वसो॥३॥ नकीं वृधीकः इंद्र ते न सुऽसाः न सुऽदाः उत न अन्यः त्वत् पूर् वाघतः॥४॥ नकीं इंद्रः निऽकर्तवे न शक्रः परिऽशक्तवे विश्वं मृणोति पश्यति॥५॥३१॥ सः मन्युं मर्त्यानां अदेव्यः नि चिकीषते पुरा निदः चिकीषते॥६॥ ऋत्वः इत् पूर्णे उदरे तुरस्य अस्ति विधतः वृचऽग्नः सोमऽपावा॥७॥ त्वे वसूनि संऽगता विश्वा च सोम सौभगा सुऽदातु अपरिऽह्रुता॥८॥ त्वां इत् यवऽयुः मम कामः गव्युः हिरण्यऽयुः त्वां अश्वऽयुः आ ईषते॥९॥ तव इत् इंद्र अहं आऽशसा हस्ते दाचं चन आ ददे दिनस्य वा मघऽवन् संऽभृतस्य वा पूर्धि यवस्य काशिना॥१०॥३२॥

॥७९॥ अयं कृत्नुः अगृभीतः विश्वऽजित् उतऽअभित् इत् सोमः ऋषिः विप्रः काव्येन॥१॥ अभि ऊर्णोति यत् नग्नं भिषक्ति विश्वं यत् तुरं प्र ईं अंधः ख्यत् निः स्रोणः भूत्॥२॥ त्वं सोम तनूकृत्ऽभ्यः द्वेषःऽभ्यः अन्यऽकृतेभ्यः उरु यंता असि वरूथं॥३॥ त्वं चित्ती तव दक्षैः दिवः आ पृथिव्याः ऋजीषिन् यावीः अघस्य चित् द्वेषः॥४॥ अर्थिनः यंति च इत् अर्थं गच्छान् इत् ददुषः रातिं ववृज्युः तृष्यतः कामं॥५॥३३॥ विदत् यत् पूर्व्यं नष्टं उत् ईं ऋतऽयुं ईरयत् प्र ईं आयुः तारीत् अतीर्णं॥६॥ सुऽशेवः नः मृळयाकुः अहेळन्ऽक्रतुः अवातः भव नः सोम शं हृदे॥७॥ मा नः सोम सं वीविजः मा वि वीभिषथाः राजन् मा नः हार्दि त्विषा वधीः॥८॥ अव यत् स्वे सधऽस्थे देवानां दुःऽमतीः ईक्षे राजन् अप द्विषः सेध मीढ्वः अप स्रिधः सेध॥९॥३४॥

॥८०॥ नहि अन्यं बळा अकरं मर्डितारँ शतऽक्रतो० त्वं नः इंद्र मृळय॥१॥ यः नः शश्वत् पुरा आविंथ अमृधः वाजंऽसातये सः त्वं नः इंद्र मृळय॥२॥ किं अंग रध्रऽचोदनः सुन्वानस्य अविता इत् असि कुवित् सु इंद्र नः शकः॥३॥ इंद्र प्र नः रथँ अव पश्चात् चित् संतँ अद्रिऽवः पुरस्तात् एनं मे कृधि॥४॥ हंतो नु किं आ-ससे प्रथमं नः रथँ कृधि उपऽमं वाजऽयु श्रवः॥५॥३५॥ अव नः वाजऽयुं रथँ सुऽकरँ ते किं इत् परि अस्मान् सु जिग्युषः कृधि॥६॥ इंद्र हस्वस्व पूः असि भद्रा ते एति निःऽकृतं इयं धीः ऋत्वियऽवती ॥७॥ मा सीं अवद्ये आ भाक् उर्वी काष्ठा हितं धनँ अपऽआवृक्ताः अरत्नयः॥८॥ तुरीयँ नाम यज्ञियँ यदा करः तत् उश्मसि आत् इत् पतिः नः ओहसे॥९॥ अवीवृधत् वः अमृताः अमंदीत् एक-ऽद्यूः देवाः उत याः च देवीः तस्मैं ऊं राधः कृणुत प्रऽशस्तं प्रातः मक्षु धियाऽवसुः जगम्यात्॥१०॥३६॥८॥

॥८१॥ आ तु नः इंद्र क्षुऽमंतँ चित्रं ग्राभं संगृभाय महाऽहस्ती दक्षिणेन॥१॥ विद्म हि त्वा तुविऽकूर्मिं तुविऽदेष्णं तुविऽमघं तुविऽमात्रं अवःऽभिः॥२॥ नहि त्वा शूर देवाः न मर्तासः दित्सँतं भीमं न गां वारयँते॥३॥ आ इत ऊं नु इंद्रँ स्तवाम ईशानं वस्वः स्वऽराजँ न राधसा मर्धिषत् नः॥४॥ प्र स्तोषत् उप गासिषत् श्रवत् सामं गीयमानं अभि राधसा जुगुरत्॥५॥३७॥ आ नः भर दक्षिणेन अभि सव्येन प्र मृश इंद्र मा नः वसोः निः भाक् ॥६॥ उप क्रमस्व आ भर धृषता धृष्णो जनानां अदाभ्यः ऽतरस्य वेदः॥७॥ इंद्र यः ऊं नु ते अस्ति वाजः विप्रेभिः सनित्वः अस्मा-

भिः सु तं सनुहि ॥८॥ सद्यः ऽजुवः ते वाजाः अस्मभ्यँ विश्वऽचंद्राः वशैः च मक्षु जरंते ॥९॥३८॥५॥

॥८२॥ आ प्र द्रव परा ऽवतः अर्वा ऽवतः च वृच ऽहन् मघवः प्रति प्रऽभर्मणि ॥१॥ तीव्राः सोमासः आ गहि सुतासः मादयिष्णवः पिब दधृक् यथा ओचिषे ॥२॥ इषा मंदस्व आत् ऊं ते अरँ वराय मन्यवे भुवत् ते इंद्र शं हृदे ॥३॥ आ तु अश्वो आ गहि नि उक्थानि च हूयसे उप ऽमे रोचने दिवः ॥४॥ तुभ्यं अयं अद्रिऽभिः सुतः गोभिः श्रीतः मदाय कं प्र सोमः इंद्र हूयते ॥५॥१॥ इंद्र श्रुधि सु मे हवं अस्मे सुतस्य गोऽमंतः वि पीतिं तृप्निं अश्नुहि ॥६॥ यः इंद्र चमसेषु आ सोमः चमूषु ते सुतः पिब इत् अस्य त्वं ईशिषे ॥७॥ यः अप्ऽसु चंद्रमाः ऽइव सोमः चमूषु दधृशे पिब इत् अस्य त्वं ईशिषे ॥८॥ यं ते श्येनः पदा आ अभरत् तिरः रजाँसि अस्पृतं पिब इत् अस्य त्वं ईशिषे ॥९॥२॥

॥८३॥ देवानाँ इत् अवः महत् तत् आ वृणीमहे वयं वृष्णां अस्मभ्यँ ऊतये ॥१॥ ते नः संतु युजः सदा वरुणः मित्रः अर्यऽमा वृधासः च प्रऽचेतसः ॥२॥ अति नः विष्पिता पुरु नौभिः अपः न पर्षथ यूयं अतस्य रथ्यः ॥३॥ वामं नः अस्तु अर्यमन् वामं वरुण शंस्यँ वामं हि आ ऽवृणीमहे ॥४॥ वामस्य हि प्रऽचेतसः ईशानासः रिशादसः न ईं आदित्याः अघस्य यत् ॥५॥३॥ वयं इत् वः सुऽदानवः क्षियंतः यांतः अध्वन् आ देवाः वृधाय हूमहे ॥६॥ अधि नः इंद्र एषां विष्णो सऽजात्यानां इत मरुतः अश्विना ॥७॥ प्र भातृऽत्वं सुऽदानवः अध द्विता समान्या मातुः गर्भं भरा-

महे॥८॥ यूयं हि स्थ सुऽदानवः इंद्रंऽज्येष्ठाः अभिऽद्यवः अध चित् वः उत ब्रुवे॥९॥४॥

॥८४॥ प्रेष्ठं वः अतिथिं स्तुषे मित्रंऽइव प्रियं अग्निं रथं न वेद्यं॥१॥ कविंऽइव प्रऽचेतसं यं देवासः अध द्विता नि मर्त्येषु आऽदधुः॥२॥ त्वं यविष्ठ दाशुषः नॄन् पाहि शृणुधि गिरः रक्ष तोकं उत त्मना॥३॥ कया ते अग्ने अंगिरः ऊर्जः नपात् उपऽस्तुतिं वरायदेव मन्यवे॥४॥ दाशेम कस्य मनसा यज्ञस्य सहसः यहो कत् ऊं वोचे इदं नमः॥५॥५॥ अध त्वं हि नः करः विश्वाः अस्मभ्यं सुऽक्षितीः वाजंऽद्रविणसः गिरः॥६॥ कस्य नूनं परीणसः धियः जिन्वसि दंऽपते गोऽसाता यस्य ते गिरः॥७॥ तं मर्जयंत सुऽक्रतुं पुरःऽयावानं आजिषु स्वेषु क्षयेषु वाजिनं॥८॥ क्षेति क्षेमेभिः साधुऽभिः नकिः यं घ्नंति हंति यः अग्ने सुऽवीरः एधते॥९॥६॥

॥८५॥ आ मे हवं नासत्या अश्विना गच्छतं युवं मध्वः सोमस्य पीतये॥१॥ इमं मे स्तोमं अश्विना इमं मे शृणुतं हवं मध्वः सोमस्य पीतये॥२॥ अयं वां कृष्णः अश्विना हवते वाजिनीऽवसू० मध्वः सोमस्य पीतये॥३॥ शृणुतं जरितुः हवं कृष्णस्य स्तुवतः नरा मध्वः सोमस्य पीतये॥४॥ छर्दिः यंतं अदाभ्यं विप्राय स्तुवते नरा मध्वः सोमस्य पीतये॥५॥७॥ गच्छतं दाशुषः गृहं इत्था स्तुवतः अश्विना मध्वः सोमस्य पीतये॥६॥ युंजाथां रासभं रथे वीळुऽअंगे वृषण्ऽवसू० मध्वः सोमस्य पीतये॥७॥ चिऽवंधुरेण चिऽवृता रथेन आ यातं अश्विना मध्वः सोमस्य पीतये॥८॥ नु

मे गिरः नासत्या अश्विना प्र अवतं युवं मध्वः सोमस्य पीतये ॥९॥८॥

॥८६॥ उभा हि दस्रा भिषजा मयःऽभुवा उभा दक्षस्य वचसः बभूवथुः ता वां विश्वकः हवते तनूऽकृथे मा नः वि यौष्टं सख्या मुमोचतं॥१॥ कथा नूनं वां विऽमनाः उप स्तवत् युवं धियं ददथुः वस्यःऽइष्टये ता वां विश्वकः हवते तनूऽकृथे मा नः वि यौष्टं सख्या मुमोचतं॥२॥ युवं हि स्म पुरुऽभुजा इमं एधतुं विष्णाप्वे ददथुः वस्यःऽइष्टये ता वां विश्वकः हवते तनूऽकृथे मा नः वि यौष्टं सख्या मुमोचतं॥३॥ उत त्यं वीरं धनऽसां ऋजीषिणं दूरे चित् संतं अवसे हवामहे यस्य स्वादिष्ठा सुऽमतिः पितुः यथा मा नः वि यौष्टं सख्या मुमोचतं॥४॥ ऋतेन देवः सविता शंऽआयते ऋतस्य शृंगं उर्विया वि पप्रथे ऋतं ससाह महि चित् पृतन्यतः मा नः वि यौष्टं सख्या मुमोचतं॥५॥९॥

॥८७॥ द्युम्नी वां स्तोमः अश्विना क्रिविः न सेकै आ गतं मध्वः सुतस्य सः दिवि प्रियः नरा पातं गौरौऽइव इरिणे॥१॥ पिबतं घर्मं मधुऽमंतं अश्विना आ बर्हिः सीदतं नरा ता मंदसाना मनुषः दुरोणे आ नि पातं वेदसा वयः॥२॥ आ वां विश्वाभिः ऊतिऽभिः प्रियऽमेधाः अहूषत ता वर्तिः यातं उप वृक्तऽबर्हिषः जुष्टं यज्ञं दिविष्टिषु॥३॥ पिबतं सोमं मधुऽमंतं अश्विना आ बर्हिः सीदतं सुऽमत् ता ववृधानौ उप सुऽस्तुतिं दिवः गंतं गौरौऽइव इरिणं॥४॥ आ नूनं यातं अश्विना अश्वेभिः प्रुषितप्सुऽभिः दस्रा हिरण्यऽवर्तनी॰ शुभः पती॰ पातं सोमं

ऋतऽवृधा ॥५॥ वयं हि वां हवामहे विपन्यवः विप्रासः वाजऽसातये ता वल्गू दस्रा पुरुऽदंससा धिया ऋष्विना श्रुष्टी आ गतं ॥ ६॥ १० ॥

॥८८॥ तं वः दस्मं ऋतिऽसहं वसोः मंदानं अंधसः अभि वत्सं न स्वसरेषु धेनवः इंद्रं गीःऽभिः नवामहे ॥१॥ द्युक्षं सुऽदानुं तविषीभिः आऽवृतं गिरिं न पुरुऽभोजसं क्षुमंतं वाजं शतिनं सहस्रिणं मक्षु गोऽमंतं ईमहे ॥२॥ न त्वा बृहंतः अद्रयः वरंते इंद्र वीळवः यत् दित्ससि स्तुवते माऽवंते वसु नकिः तत् आ मिनाति ते ॥३॥ योद्धा असि क्रत्वा शवसा उत दंसना विश्वा जाता अभि मज्मना आ त्वा अयं अर्कः ऊतये ववर्तति यं गोतमाः अजीजनन् ॥४॥ प्र हि रिरिक्षे ओजसा दिवः अंतेभ्यः परि न त्वा विव्याच रजः इंद्र पार्थिवं अनु स्वधां ववक्षिथ ॥५॥ नकिः परिष्टिः मघऽवन् मघस्य ते यत् दाशुषे दशस्यसि अस्माकं बोधि उचथस्य चोदिता मंहिष्ठः वाजऽसातये ॥ ६॥ ११ ॥

॥८९॥ बृहत् इंद्राय गायत मरुतः वृचहंऽतमं येन ज्योतिः अजनयन् ऋतऽवृधः देवं देवाय जागृवि ॥१॥ अयं अधमत् अभिऽशस्तीः अशस्तिऽहा अयं इंद्रः द्युक्षी आ अभवत् देवाः ते इंद्र सख्याय येमिरे बृहत्ऽभानो० मरुत्ऽगण ॥२॥ प्र वः इंद्राय बृहते मरुतः ब्रह्म अर्चत वृत्रं हनति वृचऽहा शतऽक्रतुः वज्रेण शतऽपर्वणा ॥३॥ अभि प्र भर धृषता धृषत्ऽमनः श्रवः चित् ते असत् बृहत् अर्षंतु आपः जवसा वि मातरः हनः वृत्रं जय स्वः० ॥४॥ यत् जायथाः अपूर्व्य मघऽवन् वृचऽहत्याय तत् पृथिवीं

अप्रथयः तत् अस्तभ्नाः उत द्यां ॥५॥ तत् ते यज्ञः अजायत तत् अर्कः उत हस्कृतिः तत् विश्वं अभिऽभूः असि यत् जातं यत् च जंत्वं ॥६॥ आमासु पक्वं ऐरयः आ सूर्यं रोहयः दिवि घर्मं न सामन् तपत सुवृक्तिऽभिः जुष्टं गिर्वणसे बृहत् ॥७॥१२॥

॥९०॥ आ नः विश्वासु हव्यः इंद्रः समत्ऽसु भूषतु उप ब्रह्माणि सवनानि वृचऽहा परमऽज्याः ऋचीषमः ॥१॥ त्वं दाता प्रथमः राधसां असि असि सत्यः ईशानऽकृत् तुविऽद्युम्नस्य युज्याः आ वृणीमहे पुचस्य शवसः महः ॥२॥ ब्रह्म ते इंद्र गिर्वणः क्रियंते अनतिद्रुता इमा जुषस्व हरिऽअश्व योजना इंद्र या ते अमन्महि ॥३॥ त्वं हि सत्यः मघऽवन् अनानतः वृचा भूरि निऽऋंजसे सः त्वं शविष्ठ वज्रऽहस्त दाशुषे अर्वाचं रयिं आ कृधि ॥४॥ त्वं इंद्र यशाः असि ऋजीषी शवसः पते त्वं वृचाणि हंसि अप्रतीनि एकः इत् अनुत्ता चर्षणिऽधृता ॥५॥ तं ऊं त्वा नूनं असुर प्रऽचेतसं राधः भागंऽइव ईमहे महीऽइव कृत्तिः शरणा ते इंद्र प्र ते सुम्ना नः अश्नवन् ॥६॥१३॥

॥९१॥ कन्या वाः अवऽयती सोमं अपि सुता अविदत् अस्तं भरंती अब्रवीत् इंद्राय सुनवै त्वा शक्राय सुनवै त्वा ॥१॥ असौ यः एषि वीरकः गृहंऽगृहं विऽचाकशत् इमं जंभऽसुतं पिब धानाऽवंतं करंभिणं अपूपऽवंतं उक्थिनं ॥२॥ आ चन त्वा चिकित्साम: अधि चन त्वा न इमसि शनैःऽइव शनकैःऽइव इंद्राय इंदो परि स्रव ॥३॥ कुवित् शकत् कुवित् करत् कुवित् नः वस्यसः करत् कुवित् पतिऽहिषः यतीः इंद्रेण संऽगमामहै ॥४॥ इमानि चीणि

विष्टपा तानि इंद्र वि रोहय शिरः ततस्य उर्वरा आत् इदं मे उप उदरे॥५॥ असौ च या नः उर्वरा आत् इमां तन्वं मम अथो ततस्य यत् शिरः सर्वा ता रोमशा कृधि॥६॥ खे रथस्य खे अनसः खे युगस्य शतऽक्रतो० अपालां इंद्र चिः पूत्वी अकृणोः सूर्यऽत्वचं॥७॥१४॥

॥९२॥ पांतं आ वः अंधसः इंद्रं अभि प्र गायत विश्वऽसहं शतऽक्रतुं महिष्ठं चर्षणीनां॥१॥ पुरुऽहूतं पुरुऽस्तुतं गाथान्यं सनऽश्रुतं इंद्रः इति ब्रवीतन॥२॥ इंद्रः इत् नः महानां दाता वाजानां नृतुः महान् अभिऽज्ञु आ यमत्॥३॥ अपात् ऊं शिप्री अंधसः सुऽदक्षस्य प्रऽहोषिणः इंदोः इंद्रः यवऽआशिरः॥४॥ तं ऊं अभि प्र अर्चत इंद्रं सोमस्य पीतये तत् इत् हि अस्य वर्धनं॥५॥१५॥ अस्य पीत्वा मदानां देवः देवस्य ओजसा विश्वा अभि भुवना भुवत्॥६॥ त्यं ऊं वः सचाऽसहं विश्वासु गीर्षु आऽयंतं आ च्यवयसि ऊतये॥७॥ युध्मं संतं अनर्वाणं सोमऽपां अनपऽच्युतं नरं अवार्यऽक्रतुं॥८॥ शिक्ष नः इंद्र रायः आ पुरु विद्वान् ऋचीषम अव नः पार्ये धने॥९॥ अतः चित् इंद्र नः उप आ याहि शतऽवाजया इषा सहस्रऽवाजया॥१०॥१६॥ अयाम धीऽवंतः धियः अर्वंतऽभिः शक्र गोऽदरे जयेम पृत्ऽसु वज्रिऽवः॥११॥ वयं ऊं त्वा शतऽक्रतो० गावः न यवसेषु आ उक्थेषु रणयामसि॥१२॥ विश्वा हि मर्त्यऽत्वना अनुऽकामा शतऽक्रतो० अगन्म वज्रिन् आऽशसः॥१३॥ त्वे सु पुत्र शवसः अवृत्रन् कामऽकातयः न त्वां इंद्र अति रिच्यते॥१४॥ सः नः वृषन् सनिष्ठया सं घोरया दृवित्वा धिया अविड्ढि पुरंऽध्या॥१५॥१७॥ यः ते नूनं शतऽक्रतो० इंद्र द्युम्निऽतमः मदः तेन नूनं मदे मदेः०॥१६॥ यः ते चिचश्र-

वः ऽतमः यः इंद्र वृचहन्ऽतमः यः ओजः ऽदातमः मदः॥१७॥ विश्म हि यः ते अद्रिऽवः त्वाऽदत्तः सत्य सोमऽपाः विश्वासु दस्म कृष्टिषु ॥१८॥ इंद्राय मद्वने सुतं परि ष्टोभंतु नः गिरः अर्कं अर्चंतु कारवः ॥१९॥ यस्मिन् विश्वाः अधि श्रियः रणंति सप्त संऽसदः इंद्रं सुते हवामहे॥२०॥१८॥ चिऽकंदुकेषु चेतनं देवासः यज्ञं अन्नत तं इत् वर्धंतु नः गिरः॥२१॥ आ त्वा विशंतु इंदवः समुद्रंऽइव सिंधवः न त्वां इंद्र अति रिच्यते॥२२॥ विश्यक्थ महिना वृषन् भक्षं सोमस्य जागृवे यः इंद्र जठरेषु ते॥२३॥ अरं ते इंद्र कुक्षये सोमः भवतु वृचऽहन् अरं धामऽभ्यः इंदवः॥२४॥ अरं अश्वाय गायति श्रुतऽकक्षः अरं गवे अरं इंद्रस्य धाम्ने॥२५॥ अरं हि स्म सुतेषु नः सोमेषु इंद्र भूषसि अरं ते शक्र दावने॥२६॥१९॥ पराकात्नात् चित् अद्रिऽवः त्वां नक्षंत नः गिरः अरं गमाम ते वयं॥२७॥ एव हि असि वीरऽयुः एव शूरः उत स्थिरः एव ते राध्यं मनः॥२८॥ एव रातिः तुविऽमघ विश्वेभिः धायि धातृऽभिः अध चित् इंद्र मे सचा ॥२९॥ मो' सु ब्रह्माऽइव तंद्रयुः भुवः वाजानां पते मत्स्व सुतस्य गोऽमतः॥३०॥ मा नः इंद्र अभि आऽदिशः सूरः अक्तुषु आ यमन् त्वा युजा वनेम तत्॥३१॥ त्वया इत् इंद्र युजा वयं प्रति ब्रुवीमहि स्पृधः त्वं अस्माकं तव स्मसि॥३२॥ त्वां इत् हि त्वाऽयवः अनुऽनोनुवतः चरान् सखायः इंद्र कारवः॥३३॥२०॥

॥९३॥ उत् घ इत् अभि श्रुतऽमघं वृषभं नर्यंऽअपसं अस्तारं एषि सूर्य॥१॥ नवं यः नवतिं पुरः बिभेद बाहुऽओजसा अहिं च वृचऽहा अवधीत्॥२॥ सः नः इंद्रः शिवः सखा अश्वऽवत् गोऽमत् यवंऽमत् उरुधाराऽइव दोहते॥३॥ यत् अद्य कत् च वृचऽहन्

उत्ऽअगाः अभि सूर्ये सर्वं तत् इंद्र ते वशे ॥४॥ यत् वा प्रऽवृङ् सत्ऽपते न मरे इति मन्यसे उतो तत् सत्यं इत् तव ॥५॥२१॥ ये सोमासः पराऽवति ये अर्वाऽवति सुन्विरे सर्वान् तान् इंद्र गच्छसि ॥६॥ तं इंद्रं वाजयामसि महे वृत्राय हंतवे सः वृषा वृषभः भुवत् ॥७॥ इंद्रः सः दामने कृतः ओजिष्ठः सः मदे हितः द्युम्नी श्लोकी सः सोम्यः ॥८॥ गिरा वज्रः न संऽभृतः सऽवलः अनपऽच्युतः ववक्षे ऋष्वः अस्तृतः ॥९॥ दुःऽगे चित् नः सुऽगं कृधि गृणानः इंद्र गिर्वणः त्वं च मघऽवन् वशः ॥१०॥२२॥ यस्य ते नु चित् आऽदिशं न मिनंति स्वऽराज्यं न देवः न अधिऽगुः जनः ॥११॥ अध ते अप्रतिऽस्कुतं देवी पुष्टिं सपर्यतः उभे सुऽशिप्र रोदसी ॥१२॥ त्वं एतत् अधारयः कृष्णासु रोहिणीषु च परुष्णीषु रुशत् पयः ॥१३॥ वि यत् अहेः अध त्विषः विश्वे देवासः अक्रमुः विदत् मृगस्य तान् अमः ॥१४॥ आत् ऊं मे निऽवरः भुवत् वृचऽहा अदिष्ट पौंस्यं अजातऽशत्रुः अस्तृतः ॥१५॥२३॥ श्रुतं वः वृत्रहन्ऽतमं प्र शर्धं चर्षणीनां आ पृषे राधसे महे ॥१६॥ अया धिया च गव्यऽया पुरुऽनामन् पुरुऽस्तुत यत् सोमेऽसोमे आ अभवः ॥१७॥ बोधित्ऽमनाः इत् अस्तु नः वृचऽहा भूरिऽआसुतिः पृणोतु शक्रः आऽशिषं ॥१८॥ कया त्वं नः ऊत्या अभि प्र मंदसे वृषन् कया स्तोतृऽभ्यः आ भर ॥१९॥ कस्य वृषा सुते सचा नियुत्वान् वृषभः रणत् वृचऽहा सोमेऽपीतये ॥२०॥२४॥ अभि सु नः त्वं रयिं मंदसानः सहस्रिणं प्रऽयंता बोधि दाशुषे ॥२१॥ पत्नीऽवंतः सुताः इमे उशंतः यंति वीतये अपां जग्मिः निऽचुंपुणः ॥२२॥ इष्टाः होत्राः असृक्षत इंद्रं वृधासः अध्वरे अच्छ अवऽभृथं ओजसा ॥२३॥ इह त्या सधऽमाद्या हरी हिरण्यऽकेश्या वोळ्हां अभि प्रयः

हितं॥२४॥ तुभ्यँ सोमाः सुताः इमे स्तीर्णं बर्हिः विभाऽवसो॰ स्तोतृऽभ्यः इंद्रँ आ वह॥२५॥२५॥ आ ते दक्षँ वि रोचना दधत् रत्नां वि दाशुषे स्तोतृऽभ्यः इंद्रँ अर्चत॥२६॥ आ ते दधामि इंद्रियं उक्था विश्वा शतऽक्रतो॰ स्तोतृऽभ्यः इंद्र मृळय॥२७॥ भद्रंऽभद्रं नः आ भर इषँ ऊर्जं शतऽक्रतो॰ यत् इंद्र मृळयासि नः॥२८॥ सः नः विश्वानि आ भर सुवितानि शतऽक्रतो॰ यत् इंद्र मृळयासि नः॥२९॥ त्वां इत् वृत्रहन्ऽतम सुतऽवंतः हवामहे यत् इंद्र मृळयासि नः॥३०॥२६॥ उप नः हरिऽभिः सुतं याहि मदानां पते उप नः हरिऽभिः सुतं॥३१॥ हिता यः वृत्रहन्ऽतमः विदे इंद्रः शतक्रतुः उप नः हरिऽभिः सुतं॥३२॥ त्वं हि वृत्रऽहन् एषां पाता सोमानां असि उप नः हरिऽभिः सुतं॥३३॥ इंद्रः इषे ददातु नः ऋभुक्षणँ ऋभुं रयिं वाजी ददातु वाजिनँ॥३४॥२७॥९॥

॥९४॥ गौः धयति मरुतां अवस्युः माता मघोनां युक्ता वहिः रथानां॥१॥ यस्याः देवाः उपऽस्थे व्रता विश्वे धारयँते सूर्यामासा दृशे कं॥२॥ तत् सु नः विश्वे अर्यः आ सदा गृणंति कारवः मरुतः सोमऽपीतये॥३॥ अस्ति सोमः अयं सुतः पिबंति अस्य मरुतः उत स्वऽराजः अश्विना॥४॥ पिबंति मित्रः अर्यमा तना पूतस्य वरुणः छिऽसधस्थस्य जाऽवंतः॥५॥ उतो नु अस्य जोषँ आ इंद्रः सुतस्य गोऽमतः प्रातः होताऽइव मत्सति॥६॥२८॥ कत् अत्रिषंत सूरयः तिरः आपःऽइव स्रिधः अर्षंति पूतऽदक्षसः॥७॥ कत् वः अद्य महानां देवानां अवः वृणे त्मना च दस्मऽवर्चसां॥८॥ आ ये विश्वा पार्थिवानि पप्रथन् रोचना दिवः मरुतः सोमऽपीतये॥९॥ त्यान् नु पूतऽदक्षसः दिवः वः मरुतः हुवे अस्य सोमस्य पी-

तये ॥१०॥ त्यान् नु ये वि रोदसी तस्तभुः मरुतः हुवे अस्य सोमस्य पीतये ॥११॥ त्यं नु मारुतं गणं गिरिष्ठां वृषणं हुवे अस्य सोमस्य पीतये ॥१२॥२९॥

॥९५॥ आ त्वा गिरः रथीःऽइव अस्थुः सुतेषु गिर्वणः अभि त्वा सं अनूषत इंद्र वत्सं न मातरः ॥१॥ आ त्वा शुक्राः अचुच्यवुः सुतासः इंद्र गिर्वणः पिब तु अस्य अंधसः इंद्र विश्वासु ते हितं ॥२॥ पिब सोमं मदाय कं इंद्र श्येनऽआभृतं सुतं त्वं हि शश्वतीनां पतिः राजा विशां असि ॥३॥ शृधि हवं तिरश्चाः इंद्र यः त्वा सपर्यति सुऽवीर्यस्य गोऽमतः रायः पूर्धि महान् असि ॥४॥ इंद्र यः ते नवीयसीं गिरं मंद्रां अजीजनत् चिकित्विन्ऽमनसं धियं प्रत्नां ऋतस्य पिप्युषीं ॥५॥३०॥ तं ऊं स्तवाम यं गिरः इंद्रं उक्थानि ववृधुः पुरूणि अस्य पौंस्या सिसासंतः वनामहे ॥६॥ एतो नु इंद्रं स्तवाम शुद्धं शुद्धेन साम्ना शुद्धैः उक्थैः ववृध्वांसं शुद्धः आशीःऽवान् ममत्तु ॥७॥ इंद्र शुद्धः नः आ गहि शुद्धः शुद्धाभिः ऊतिऽभिः शुद्धः रयिं नि धारय शुद्धः ममद्धि सोम्यः ॥८॥ इंद्र शुद्धः हि नः रयिं शुद्धः रत्नानि दाशुषे शुद्धः वृत्राणि जिघ्नसे शुद्धः वाजं सिसाससि ॥९॥३१॥

॥९६॥ अस्मै उषसः आ अतिरंत यामं इंद्राय नक्तं ऊर्म्यः सुऽवाचः अस्मै आपः मातरः सप्त तस्थुः नृऽभ्यः तराय सिंधवः सुऽपाराः ॥१॥ अतिऽविद्धा विथुरेण चित् अस्ता चिः सप्त सानु संऽहिता गिरीणां न तत् देवः न मर्त्यः तुतुर्यात् यानि प्रऽवृद्धः वृषभः चकार ॥२॥ इंद्रस्य वज्रः आयसः निऽमिश्लः इंद्रस्य बाह्वोः

भूयिष्ठं ओजः शीर्षन् इंद्रस्य क्रतवः निरेके आसन् आ ईषंत श्रुत्यै उपाके॥३॥ मन्यै त्वा यज्ञियं यज्ञियानां मन्यै त्वा च्यवनं अच्युतानां मन्यै त्वा सत्वनां इंद्र केतुं मन्यै त्वा वृषभं चर्षणीनां॥४॥ आ यत् वज्रं बाह्वोः इंद्र धत्से मदऽच्युतं अहये हंतवै ऊं प्र पर्वताः अनवंत प्र गावः प्र ब्रह्माणः अभिऽनक्षंतः इंद्रं॥५॥३२॥ तं ऊं स्तवाम यः इमा जजान विश्वा जातानि अवराणि अस्मात् इंद्रेण मित्वं दिधिषेम गीःऽभिः उपो नमःऽभिः वृषभं विशेम॥६॥ वृत्रस्य त्वा श्वसथात् ईषमाणाः विश्वे देवाः अजहुः ये सखायः मरुत्ऽभिः इंद्र सख्यं ते अस्तु अथ इमाः विश्वाः पृतनाः जयासि॥७॥ चिः षिः त्वा मरुतः ववृधानाः उस्राःऽइव राशयः यज्ञियासः उप त्वा आ इमः कृधि नः भागऽधेयं शुष्मं ते एना हविषा विधेम॥८॥ तिग्मं आयुधं मरुतां अनीकं कः ते इंद्र प्रति वज्रं दधर्ष अनायुधासः असुराः अदेवाः चक्रेण तान् अप वप ऋजीषिन्॥९॥ महे उग्राय तवसे सुऽवृक्तिं प्र ईरय शिवऽतमाय पस्वः गिर्वाहसे गिरः इंद्राय पूर्वीः धेहि तन्वे कुवित् अंग वेदत्॥१०॥३३॥ उक्थऽवाहसे विऽभ्वे मनीषां दुणा न पारं ईरय नदीनां नि स्पृश धिया तन्वि श्रुतस्य जुष्टऽतरस्य कुवित् अंग वेदत्॥११॥ तत् विविड्डि यत् ते इंद्रः जुजोषत् स्तुहि सुऽस्तुतिं नमसा आ विवास उप भूष जरितः मा रुवण्यः अवयं वाचं कुवित् अंग वेदत्॥१२॥ अवं दृप्सः अंशुऽमतीं अतिष्ठत् इयानः कृष्णः दशऽभिः सहस्रैः आवंत तं इंद्रः शच्या धमंतं अप स्नेहितीः नृऽमनाः अधत्त॥१३॥ दृप्सं अपश्यं विषुणे चरंतं उपऽह्वरे नद्यः अंशुऽमत्याः नभः न कृष्णं अवतस्थिऽवांसं इष्यामि वः वृषणः युध्यत आजौ॥१४॥ अध दृप्सः अंशुऽमत्याः उपऽस्थे अधारयत् तन्वं तित्विषाणः विशः

अदेवीः अभि आऽचरंतीः बृहस्पतिना युजा इंद्रः ससहे ॥१५॥३४॥
त्वं ह त्यत् सप्तऽभ्यः जायमानः अशत्रुऽभ्यः अभवः शचुः इंद्र गूळ्हे द्यावापृथिवी अनु अविंदः विभुमत्ऽभ्यः भुवनेभ्यः रणं धाः ॥१६॥ त्वं ह त्यत् अप्रतिऽमानं ओजः वज्रेण वज्रिन् धृषितः जघंथ त्वं शुष्णस्य अव अतिरः वधत्रैः त्वं गाः इंद्र शच्या इत् अविंदः ॥१७॥ त्वं ह त्यत् वृषभ चर्षणीनां घनः वृत्राणां तविषः बभूथ त्वं सिंधून् असृजः तस्तभानान् त्वं अपः अजयः दासऽपत्नीः ॥१८॥ सः सुऽक्रतुः रणिता यः सुतेषु अनुत्तऽमन्युः यः अहाऽइव रेवान् यः एकः इत् नरि अपांसि कर्ता सः वृत्रऽहा प्रति इत् अन्यं आहुः ॥१९॥ सः वृत्रऽहा इंद्रः चर्षणिऽधृत् तं सुऽस्तुत्या हव्यं हुवेम सः प्रऽअविता मघऽवा नः अधिऽवक्ता सः वाजस्य अवस्यस्य दाता ॥२०॥ सः वृत्रऽहा इंद्रः ऋभुक्षाः सद्यः जज्ञानः हर्म्यः बभूव कृण्वन् अपांसि नर्या पुरूणि सोमः न पीतः हव्यः सखिऽभ्यः ॥२१॥३५॥

॥९७॥ याः इंद्र भुजः आ अभरः स्वःऽवान् असुरेभ्यः स्तोतारं इत् मघऽवन् अस्य वर्धय ये च त्वे वृक्तऽबर्हिषः ॥१॥ यं इंद्र दधिषे त्वं अश्वं गां भागं अव्ययं यजमाने सुन्वति दक्षिणाऽवति तस्मिन् तं धेहि मा पणौ ॥२॥ यः इंद्र सस्ति अव्रतः अनुऽस्वापं अदेवऽयुः स्वैः सः एवैः मुमुरत् पोष्यं रयिं सनुतः धेहि तं ततः ॥३॥ यत् शक्र असि पराऽवति यत् अर्वाऽवति वृत्रऽहन् अतः त्वा गीःऽभिः द्युऽगत् इंद्र केशिऽभिः सुतऽवान् आ विवासति ॥४॥ यत् वा असि रोचने दिवः समुद्रस्य अधि विष्टपि यत् पार्थिवे सदने वृत्रऽहन्ऽतम यत् अंतरिक्षे आ गहि ॥५॥३६॥ सः नः सोमेषु सोमऽपाः

ऽपाः सुतेषु शवसः पते मादयस्व राधसा सूनृताऽवता इंद्र राया परीणसा ॥६॥ मा नः इंद्र परा वृणक् भव नः सधऽमाद्यः त्वं नः ऊती त्वं इत् नः आप्यं मा नः इंद्र परा वृणक्॥७॥ अस्मे इंद्र सचा सुते नि सद् पीतये मधु कृधि जरित्रे मघऽवन् अवः महत् अस्मे इंद्र सचा सुते॥८॥ न त्वा देवासः आशत न मर्त्यासः अद्रिऽवः विश्वा जातानि शवसा अभिऽभूः असि न त्वा देवासः आशत ॥९॥ विश्वाः पृतनाः अभिऽभूतरं नरं सऽजूः ततक्षुः इंद्रं जजनुः च राजसे क्रत्वा वरिष्ठं वरे आऽमुरिं उत उग्रं ओजिष्ठं तवसं तरस्विनं ॥१०॥३७॥ सं ईरेभासः अस्वरन् इंद्रं सोमस्य पीतये स्वःऽपतिं यत् ईं वृधे धृतऽव्रतः हि ओजसा सं ऊतिऽभिः॥११॥ नेमिं नमंति चक्षसा मेषं विप्राः अभिऽस्वरा सुऽदीतयः वः अद्रुहः अपि कर्णे तरस्विनः सं ऋक्वऽभिः॥१२॥ तं इंद्रं जोहवीमि मघऽवानं उग्रं सचा दधानं अप्रतिऽस्कुतं शवांसि मंहिष्ठः गीःऽभिः आ च यज्जियः ववर्तत् राये नः विश्वा सुऽपथा कृणोतु वज्री ॥१३॥ त्वं पुरः इंद्र चिकित् एनाः वि ओजसा शविष्ठ शक्र नाशयध्यै त्वत् विश्वानि भुवनानि वज्रिन् द्यावा रेजेते पृथिवी च भीषा॥१४॥ तत् मा ऋतं इंद्र पूर चित् च पातु अपः न वज्रिन् दुःऽइता अति पर्षि भूरि कदा नः इंद्र रायः आ दशस्येः विश्वऽप्न्यस्य स्पृहयाय्यस्य राजन्॥१५॥३८॥६॥

॥९८॥ इंद्राय साम गायत विप्राय बृहते बृहत् धर्मऽकृते विपःऽचिते पनस्यवे॥१॥ त्वं इंद्र अभिऽभूः असि त्वं सूर्यं अरोचयः विश्वऽकर्मा विश्वऽदेवः महान् असि ॥२॥ विऽभ्राजन् ज्योतिषा स्वः अगच्छः रोचनं दिवः देवाः ते इंद्र सख्याय येमिरे ॥३॥

आ इंद्र नः गधि प्रियः सचाऽजित् अगोह्यः गिरिः न विश्वतः पृथुः पतिः दिवः॥४॥ अभि हि सत्य सोमऽपाः उभे बभूथ रोदसी इंद्र असि सुन्वतः वृधः पतिः दिवः॥५॥ त्वं हि शंबतीनां इंद्र दर्ता पुरां असि हंता दस्योः मनोः वृधः पतिः दिवः॥६॥१॥ अध हि इंद्र गिर्वणः उप त्वा कामान् महः ससृज्महे उदाऽइव यंतः उद-ऽभिः॥७॥ वाः न त्वा यव्याभिः वर्धंति प्र्र ब्रह्माणि ववृध्वांसं चित् अद्रिऽवः दिवेऽदिवे॥८॥ युंजंति हरी इषिरस्य गाथया उ-रौ रथे उरुऽयुगे इंद्रऽवाहा वचःऽयुजा॥९॥ त्वं नः इंद्र आ भर ओजः नृम्णं शतऽक्रतो विऽचर्षणे आ वीरं पृतनाऽसहं॥१०॥ त्वं हि नः पिता वसो त्वं माता शतऽक्रतो बभूविथ अध ते सुम्नं ईमहे॥११॥ त्वां प्रुष्मिन् पुरुऽहूत वाजऽयंतं उप ब्रुवे शतऽक्र-तो सः नः रास्व सुऽवीर्यं॥१२॥२॥

॥९९॥ त्वां इदा ह्यः नरः अपीप्यन् वज्रिन् भूर्णयः सः इंद्र स्तोमऽवाहसां इह श्रुधि उप स्वसरं आ गहि॥१॥ मत्स्व सुऽशिप्र हरिऽवः तत् ईमहे त्वे आ भूषंति वेधसः तव श्रवांसि उपऽमानि उक्थ्या सुतेषु इंद्र गिर्वणः॥२॥ आयंतःऽइव सूर्यं विश्वा इत् इंद्रस्य भक्षत वसूनि जाते जनमाने ओजसा प्रति भागं न दीधिम॥३॥ अनर्शऽरातिं वसुऽदां उप स्तुहि भद्राः इंद्रस्य रातयः सः अ-स्य कामं विधतः न रोषति मनः दानाय चोदयन्॥४॥ त्वं इंद्र प्र-ऽतूर्तिषु अभि विश्वाः असि स्पृधः अशस्तिऽहा जनिता विश्वऽतूः असि त्वं तूर्य तरुष्यतः॥५॥ अनु ते शुष्मं तुरयंतं ईयतुः क्षोणी शिष्णुं न मातरा विश्वाः ते स्पृधः श्नथयंत मन्यवे वृचं यत् इंद्र तूर्वसि॥६॥ इतः ऊती वः अजरं प्रऽहेतारं अप्रऽहितं आशुं जेतारं

हेतारं रथिऽतमं अतूर्तं तुग्र्यऽवृधं ॥७॥ इष्कर्तारं अनिःऽकृतं सहःऽकृतं शतंऽऊतिं शतऽक्रतुं समानं इंद्रं अवसे हवामहे वसंवानं वसुऽजुवं ॥८॥३॥

॥१००॥ अयं ते एमि तन्वा पुरस्तात् विश्वे देवाः अभि मा यंति पश्चात् यदा मह्यं दीधरः भागं इंद्र आत् इत् मया कृणवः वीर्याणि ॥१॥ दधामि ते मधुनः भक्षं अग्रे हितः ते भागः सुतः अस्तु सोमः असः च त्वं दक्षिणतः सखा मे अध वृचाणि जंघनाव भूरि ॥२॥ प्रसु स्तोमं भरत वाजऽयंतः इंद्राय सत्यं यदि सत्यं अस्ति न इंद्रः अस्ति इति नेमः ऊं त्वः आह कः ईं ददर्श कं अभि स्तवाम ॥३॥ अयं अस्मि जरितः पश्य मा इह विश्वा जातानि अभि अस्मि महा ऋतस्य मा प्रऽदिशः वर्धयंति आऽददिरः भुवना ददरीमि ॥४॥ आ यत् मा वेनाः अरुहन् ऋतस्य एकं आसीनं हर्यतस्य पृष्ठे मनः चित् मे हृदे आ प्रति अवोचत् अचिक्रदन् शिप्रुऽमंतः सखायः ॥५॥ विश्वा इत् ता ते सवनेषु प्रऽवाच्या या चकर्थ मघऽवन् इंद्र सुन्वते पारावतं यत् पुरुऽसंभृतं वसु अपऽअवृणोः शरभाय ऋषिऽबंधवे ॥६॥४॥ प्र नूनं धावत पृथक् न इह यः वः अवावरीत् नि सीं वृचस्य मर्मणि वज्रं इंद्रः अपीपतत् ॥७॥ मनःऽजवाः अयमानः आयसीं अतरत् पुरं दिवं सुऽपर्णः गत्वाय सोमं वज्रिणे आ अभरत् ॥८॥ समुद्रे अंतः शयते उद्ना वज्रः अभिऽवृतः भरंति अस्मै संऽयतः पुरःऽप्रस्रवणाः वलिं ॥९॥ यत् वाक् वदंती अविऽचेतनानि राष्ट्री देवानां निऽससाद मंद्रा चतस्रः ऊर्जं दुदुहे पयांसि क्व स्वित् अस्याः परमं जगाम ॥१०॥ देवीं वाचं अजनयंत देवाः तां विश्वऽरूपाः पशवः वदंति सा नः

मंद्रा इषं ऊर्जं दुहाना धेनुः वाक् अस्मान् उप सुऽस्तुता आ एतु ॥११॥ सखे विष्णो वितरं वि क्रमस्व द्यौः देहि लोकं वज्राय विऽस्कभे हनाव वृत्रं रिणचाव सिंधून् इंद्रस्य यंतु प्रऽसवे विऽसृष्टाः॥१२॥५॥

॥१०१॥ ऋधक् इत्था सः मर्त्यः शशमे देवऽतातये यः नूनं मित्रावरुणौ अभिष्टये आऽचक्रे हव्यऽदातये॥१॥ वर्धिष्ठऽक्षत्रौ उरुऽचक्षसा नरा राजाना दीर्घश्रुत्ऽतमा ता बाहुता न दंसना रथ्यंत्तः साकं सूर्यस्य रश्मिऽभिः॥२॥ प्र यः वां मित्रावरुणा अजिरः दूतः अद्रवत् अयःऽशीर्षा मदेऽरघुः॥३॥ न यः संऽपृच्छे न पुनः हवीतवे न संऽवादाय रमते तस्मात् नः अद्य संऽऋतेः उरुष्यतं बाहुऽभ्यां नः उरुष्यतं॥४॥ प्र मित्राय प्र अर्यम्णे सचथ्यै ऋतऽवसो॰ वरूथ्यं वरुणे छंद्यं वचः स्तोत्रं राजऽसु गायत॥५॥ ॥६॥ ते हिन्विरे अरुणं जेन्यं वसुं एकं पुत्रं तिसृणां ते धामानि अमृताः मर्त्यानां अदब्धाः अभि चक्षते॥६॥ आ मे वचांसि उत्ऽयता द्युमत्ऽतमानि कर्वी उभा यातं नासत्या सऽजोषसा प्रति हव्यानि वीतये॥७॥ रातिं यत् वां अरक्षसं हवामहे युवाभ्यां वाजिनीऽवसू॰ प्राचीं होचां प्रऽतिरंतौ इतं नरा गृणाना जमत्ऽअग्निना॥८॥ आ नः यज्ञं दिविऽस्पृशं वायो याहि सुमन्मऽभिः अंतः पविचे उपरि श्रीणानः अयं सुक्रः अयामि ते॥९॥ वेति अध्वर्युः पथिऽभिः रजिष्ठैः प्रति हव्यानि वीतये अध नियुत्वः उभयस्य नः पिब सुचिं सोमं गोऽआशिरं॥१०॥७॥ बट् महान् असि सूर्य बट् आदित्य महान् असि महः ते सतः महिमा पनस्यते अद्धा देव महान् असि॥११॥ बट् सूर्य श्रवसा महान् असि

सचा देव महान् असि महा देवानाँ असुर्यः पुरःऽहितः विऽभु ज्योतिः अदाभ्यं ॥ १२ ॥ इयं या नीचीं अर्किणी रूपा रोहिण्या कृता चिचाऽइव प्रति अदर्शि आऽयती अंतः दृशऽसुं वाहुषु ॥ १३ ॥ प्रऽजाः ह तिस्रः अतिऽआयं ईयुः नि अन्याः अर्के अभितः विविश्रे बृहत् ह तस्थौ भुवनेषु अंतः पवमानः हरितः आ विवेश ॥ १४ ॥ माता रुद्राणां दुहिता वसूनां स्वसा आदित्यानां अमृतस्य नाभिः प्र नु वोचं चिकितुषे जनाय मा गां अनागां अदितिं वधिष्ट ॥ १५ ॥ वचःऽविदं वाचं उत्ऽईरयंतीं विश्वाभिः धीभिः उपऽतिष्ठमानां देवीं देवेभ्यः परि आऽईयुषीं गां आ मा अवृक्त मर्त्यः दभ्रऽचेताः ॥ १६ ॥ ८ ॥

॥ १०२ ॥ त्वं अग्ने बृहत् वयः दधासि देव दाशुषे कविः गृहऽपतिः युवा ॥ १ ॥ सः नः ईळानया सह देवान् अग्ने दुवस्युवा चिकित् विऽभानो° आ वह ॥ २ ॥ त्वया ह स्वित् युजा वयं चोदिष्ठेन यविष्ठ्य अभि स्मः वाजऽसातये ॥ ३ ॥ और्वभृगुऽवत् शुचिं अप्नवानऽवत् आ हुवे अग्निं समुद्रऽवाससं ॥ ४ ॥ हुवे वातऽस्वनं कविं पर्जन्यऽक्रंद्यं सहः अग्निं समुद्रऽवाससं ॥ ५ ॥ ९ ॥ आ सवं सवितुः यथा भगस्यऽइव भुजिं हुवे अग्निं समुद्रऽवाससं ॥ ६ ॥ अग्निं वः वृधंतं अध्वराणां पुरुऽतमं अच्छ नप्त्रे सहस्वते ॥ ७ ॥ अयं यथा नः आऽभुवत् त्वष्टा रूपाऽइव तक्ष्या अस्य ऋत्वा यशस्वतः ॥ ८ ॥ अयं विश्वाः अभि श्रियः अग्निः देवेषु पत्यते आ वाजैः उप नः गमत् ॥ ९ ॥ विश्वेषां इह स्तुहि होतॄणां यशःऽतमं अग्निं यज्ञेषु पूर्व्यं ॥ १० ॥ ॥ १० ॥ शीरं पावकऽशोचिषं ज्येष्ठः यः दमेषु आ दीदाय दीर्घश्रुत्ऽतमः ॥ ११ ॥ तं अर्वंतं न सानसिं गृणीहि विप्र पुष्मिणं

मिवं न यातयत्ऽजनं ॥१२॥ उप त्वा जामयः गिरः देदिशतीः हविःऽकृतः वायोः अनीके अस्थिरन्॥१३॥ यस्य चिऽधातु अवृतं बर्हिः तस्थौ असंऽदिनं आपः चित् नि दध पदं॥१४॥ पदं देवस्य मीळ्हुषः अनाधृष्टाभिः ऊतिऽभिः भद्रा सूर्यःऽइव उपऽदृक्॥१५॥११॥ अग्ने घृतस्य धीतिऽभिः तेपानः देव शोचिषा आ देवान् वक्षि यक्षि च॥१६॥ तं त्वा अजनंत मातरः कविं देवासः अंगिरः हव्यऽवाहं अमर्त्यं॥१७॥ प्रऽचेतसं त्वा कवे अग्ने दूतं वरेण्यं हव्यऽवाहं नि सेदिरे॥१८॥ नहि मे अस्ति अघ्या न स्वऽधितिः वनंन्ऽवति अथ एतादृक् भरामि ते॥१९॥ यत् अग्ने कानि कानि चित् आ ते दारूणि दध्मसि ता जुषस्व यविष्ठ्य ॥२०॥ यत् अक्ति उपऽजिह्विका यत् वम्रः अतिऽसर्पति सर्वं तत् अस्तु ते घृतं॥२१॥ अग्निं इंधानः मनसा धियं सचेत मर्त्यः अग्निं ईधे विवस्वंऽभिः॥२२॥१२॥

॥१०३॥ अदर्शि गातुवित्ऽतमः यस्मिन् व्रतानि आऽदधुः उपो सु जातं आर्यस्य वर्धनं अग्निं नक्षंत नः गिरः॥१॥ प्र देवःऽदासः अग्निः देवान् अच्छ न मज्मना अनु मातरं पृथिवीं विववृते तस्थौ नाकस्य सानवि॥२॥ यस्मात् रेजंत कृष्टयः चर्कृत्यानि कृण्वतः सहस्रऽसां मेधसातौऽइव त्मना अग्निं धीभिः सपर्यत ॥३॥ प्र यं राये निनीषसि मर्तः यः ते वसो दाशत् सः वीरं धत्ते अग्ने उक्थऽशंसिनं त्मना सहस्रऽपोषिणं॥४॥ सः हव्हे चित् अभि तृणत्ति वाजं अर्वता सः धत्ते अक्षिति श्रवः त्वे देवऽचा सदा पुरुऽवसो विश्वा वामानि धीमहि॥५॥१३॥ यः विश्वा दयते वसु होता मंद्रः जनानां मधोः न पात्रा प्रथमानि अस्मै प्र

स्तोमाः यंति अग्नये॥६॥ अश्वं न गीःऽभिः रथ्यं सुऽदानवः मर्मृज्यंते देवऽयवः उभे तोके तनये दस्म विश्पते पर्षि राधः मघोनां॥७॥ प्र मंहिष्ठाय गायत ऋतऽद्वे बृहते शुक्रऽशोचिषे उपऽस्तुतासः अग्नये॥८॥ आ वंसते मघऽवा वीरऽवत् यशः संऽइंद्धः द्युम्नी आऽहुतः कुवित् नः अस्य सुऽमतिः नवीयसी अच्छ वाजेभिः आऽगमत्॥९॥ प्रेष्ठं ऊं प्रियाणां स्तुहि आऽसाव अतिथिं अग्निं रथानां यमं॥१०॥१४॥ उत्ऽइता यः निऽदिता वेदिता वसु आ यज्ञियः ववर्तति दुस्तराः यस्य प्रवणे न ऊर्मयः धिया वाजं सिसासतः॥११॥ मा नः हृणीतां अतिथिः वसुः अग्निः पुरुऽप्रशस्तः एषः यः सुऽहोता सुऽअध्वरः॥१२॥ मो ते रिषन् ये अच्छोक्तिऽभिः वसो अग्ने केभिः चित् एवैः कीरिः चित् हि त्वां ईट्टे दूत्याय रातऽहव्यः सुऽअध्वरः॥१३॥ आ अग्ने याहि मरुत्ऽसखा रुद्रेभिः सोमऽपीतये सोभर्यां उप सुऽस्तुतिं मादय स्वःऽनरे॥१४॥१५॥१०॥८॥

॥ इत्यष्टमं मंडलं समाप्तं ॥

॥१॥ स्वादिष्टया मदिष्टया पवस्व सोम धारया इंद्राय पातवे सुतः॥१॥ रक्षःऽहा विश्वऽचर्षणिः अभि योनिं अयःऽहतं दुणा सधऽस्थं आ असदत्॥२॥ वरिवःऽधातमः भव मंहिष्ठः वृचहन्ऽतमः पर्षि राधः मघोनां॥३॥ अभि अर्ष महानां देवानां वीतिं अंधसा अभि वाजं उत श्रवः॥४॥ त्वां अच्छ चरामसि तत् इत् अर्थं दिवेऽदिवे इंदो त्वे नः आऽशसः॥५॥१६॥ पुनाति ते परिऽस्रुतं सोमं सूर्यस्य दुहिता वारेण शश्वता तना॥६॥ तं ईं अ-

एवीः सऽमर्ये आ गृभ्णंति योषणः दश स्वसारः पार्ये दिवि॥७॥ तं ईं हिन्वंति अपुवः धमंति वाकुरं हतिं चिऽधातु वारणं मधु ॥८॥ अभि इमं अघ्याः उत श्रीणंति धेनवः शिप्पुं सोमं इंद्राय पातवे॥९॥ अस्य इत् इंदुः मदेषु आ विश्वा वृचाणि जिघ्नते पूरः मघा च मंहते॥१०॥१७॥

॥२॥ पवस्व देवऽवीः अति पविचं सोम रंह्या इंद्रं इंदो वृषा आ विश॥१॥ आ वच्यस्व महि पसरः वृषा इंदो द्युम्नवंतऽतमः आ योनिं धर्णसिः सदः॥२॥ अधुक्षत प्रियं मधु धारा सुतस्य वेधसः अपः वसिष्ट सुऽक्रतुः॥३॥ महांतं त्वा महीः अनु आपः अर्षंति सिंधवः यत् गोभिः वासयिष्यसे॥४॥ समुद्रः अप्ऽसु ममृजे विष्टंभः धरुणः दिवः सोमः पविचे अस्मऽयुः॥५॥१८॥ अचिक्रदत् वृषा हरिः महान् मिचः न दर्शतः सं सूर्येण रोचते॥६॥ गिरः ते इंदो ओजसा मर्मृज्यंते अपस्युवः याभिः मदाय शुंभसे ॥७॥ तं त्वा मदाय घृष्वये ऊं लोकऽकृत्नुं ईमहे तवं प्रऽशस्तयः महीः॥८॥ अस्मभ्यं इंदो इंद्रऽयुः मध्वः पवस्व धारया पर्जन्यः वृष्टिमान्ऽइव॥९॥ गोऽसाः इंदो नृऽसाः असि अश्वऽसाः वाजऽसाः उत आत्मा यज्ञस्य पूर्व्यः॥१०॥१९॥

॥३॥ एषः देवः अमर्त्यः पर्णवीःऽइव दीयति अभि द्रोणानि आऽसदं॥१॥ एषः देवः विपा कृतः अति ह्वरांसि धावति पवमानः अदाभ्यः॥२॥ एषः देवः विपन्युऽभिः पवमानः ऋतयुऽभिः हरिः वाजाय मृज्यते॥३॥ एषः विश्वानि वार्या शूरः यन्ऽइव सत्वऽभिः पवमानः सिसासति॥४॥ एषः देवः रथ्यति पऽ

वमानः दशस्यति आविः कृणोति वग्वनुं॥५॥२०॥ एषः विप्रैः अभिऽस्तुतः अपः देवः वि गाहते दधत् रत्नानि दाशुषे॥६॥ एषः दिवं वि धावति तिरः रजाँसि धारया पवमानः कनिक्रदत्॥७॥ एषः दिवं वि आ असरत् तिरः रजाँसि अस्मृतः पवमानः सु-ऽअध्वरः॥८॥ एषः प्रत्नेन जन्मना देवः देवेभ्यः सुतः हरिः पवित्रे अर्षति॥९॥ एषः ऊं इति स्यः पुरुऽव्रतः जज्ञानः जनयन् इषः धारया पवते सुतः॥१०॥२१॥

॥४॥ सनं च सोम जेषं च पवमान महि श्रवः अथ नः वस्यसः कृधि॥१॥ सनं ज्योतिः सनं स्वः विश्वा च सोम सौभगा अथ नः वस्यसः कृधि॥२॥ सनं दक्षं उत क्रतुं अथ सोम मृधः जहि अथ नः वस्यसः कृधि॥३॥ पवितारः पुनीतन सोमं इंद्राय पातवे अथ नः वस्यसः कृधि॥४॥ त्वं सूर्ये नः आ भज तवं क्रत्वा तवं ऊतिऽभिः अथ नः वस्यसः कृधि॥५॥२२॥ तवं क्रत्वा तवं ऊतिऽभिः ज्योक् पश्येम सूर्यं अथ नः वस्यसः कृधि॥६॥ अभि अर्ष सुऽआयुध सोम द्विऽबर्हसं रयिं अथ नः वस्यसः कृधि॥७॥ अभि अर्ष अ-नपऽच्युतः रयिं समत्ऽसु ससहिः अथ नः वस्यसः कृधि॥८॥ त्वां यज्ञैः अवीवृधन् पवमान विऽधर्मणि अथ नः वस्यसः कृधि॥९॥ रयिं नः चित्रं अश्विनं इंदो विश्वऽआयुं आ भर अथ नः वस्यसः कृधि॥१०॥२३॥

॥५॥ संऽइंद्वः विश्वतः पतिः पवमानः वि राजति प्रीणन् वृषा कनिक्रदत्॥१॥ तनूऽनपात् पवमानः मृगः शिशानः अर्षं-

ति॒ अंतरिक्षेण रारजत् ॥२॥ ईळेन्यः पवमानः रयिः वि राज॒ति द्युऽमान् मधोः धाराभिः ओजसा ॥३॥ बर्हिः प्राचीनं ओजसा पवमानः स्तृणन् हरिः देवेषु देवः ईयते ॥४॥ उत् आतैः जिहते बृहत् द्वारः देवीः हिरण्ययीः पवमानेन सुऽस्तुताः ॥५॥ ॥२४॥ सुऽशिल्पे० बृहती मही पवमानः वृषण्यति नक्तोषसा न दर्शते ॥६॥ उभा देवा नृऽचक्षसा होतारा दैव्या हुवे पवमानः इंद्रः वृषा ॥७॥ भारती पवमानस्य सरस्वती इळा मही इमं नः यज्ञं आ गमन् तिस्रः देवीः सुऽपेशसः ॥८॥ त्वष्टारं अग्रऽजां गोपां पुरःऽयावानं आ हुवे इंदुः इंद्रः वृषा हरिः पवमानः प्रजाऽपतिः ॥९॥ वनस्पतिं पवमान मध्वा सं अंग्धि धारया सहस्रऽवल्शं हरितं भ्राजमानं हिरण्ययं ॥१०॥ विश्वे देवाः स्वाहाऽकृतिं पवमानस्य आ गत वायुः बृहस्पतिः सूर्यः अग्निः इंद्रः सुऽजोषसः ॥११॥२५॥

॥६॥ मंद्रया सोम धारया वृषा पवस्व देवऽयुः अव्यः वारेषु अस्मऽयुः ॥१॥ अभि त्यं मद्यं मदं इंदो इंद्रः इति क्षर अभि वाजिनः अर्वतः ॥२॥ अभि त्यं पूर्व्यं मदं सुवानः अर्ष पविचे आ अभि वाजं उत श्रवः ॥३॥ अनु द्रप्सासः इंदवः आपः न प्रऽवता असरन् पुनानाः इंद्रं आशत ॥४॥ यं अत्यंऽइव वाजिनं मृजंति योषणः दश वने क्रीळंतं अतिऽअविं ॥५॥२६॥ तं गोभिः वृषणं रसं मदाय देवऽवीतये सुतं भराय सं सृज ॥६॥ देवः देवाय धारया इंद्राय पवते सुतः पयः यत् अस्य पीपयत् ॥७॥ आत्मा यज्ञस्य रंह्या सुस्वानः पवते सुतः प्रत्नं नि पाति काव्यं ॥८॥ एव पुनानः इंद्रऽयुः मदं मदिष्ठ वीतये गुहा चित् दधिषे गिरः ॥९॥२७॥

॥७॥ असृग्रं इंदवः पथा धर्मन् ऋतस्य सुऽश्रियः विदानाः अस्य योजनं ॥१॥ प्र धारा मध्वः अग्रियः महीः अपः वि गाहते हविः हविष्षु वंद्याः ॥२॥ प्र युजः वाचः अग्रियः वृषा अव चक्रदत् वने सद्म अभि सत्यः अध्वरः ॥३॥ परि यत् काव्या कविः नृम्णा वसानः अर्षति स्वः वाजी सिसासति ॥४॥ पवमानः अभि स्पृधः विशः राजाऽइव सीदति यत् ईं गृणंति वेधसः ॥५॥ २८॥ अव्यः वारे परि प्रियः हरिः वनेषु सीदति रेभः वनुष्यते मती ॥६॥ सः वायुं इंद्रं अश्विना साकं मदेन गच्छति रणा यः अस्य धर्मऽभिः ॥७॥ आ मित्रावरुणा भगं मध्वः पवंते ऊर्मयः विदानाः अस्य शक्मऽभिः ॥८॥ अस्मभ्यं रोदसी रयिं मध्वः वाजस्य सातये श्रवः वसूनि सं जितं ॥९॥ २९॥

॥८॥ एते सोमाः अभि प्रियं इंद्रस्य कामं अक्षरन् वर्धंतः अस्य वीर्यं ॥१॥ पुनानासः चमूऽसदः गच्छंतः वायुं अश्विना ते नः धांतु सुऽवीर्यं ॥२॥ इंद्रस्य सोम राधसे पुनानः हार्दि चोदय ऋतस्य योनिं आऽसदं ॥३॥ मृजंति त्वा दश क्षिपः हिन्वंति सप्त धीतयः अनु विप्राः अमादिषुः ॥४॥ देवेभ्यः त्वा मदाय कं सृजानं अति मेष्यः सं गोभिः वासयामसि ॥५॥ ३०॥ पुनानः कलशेषु आ वस्त्राणि अरुषः हरिः परि गव्यानि अव्यत ॥६॥ मघोनः आ पवस्व नः जहि विश्वाः अप द्विषः इंदो सखायं आ विश ॥७॥ वृष्टिं दिवः परि स्रव द्युम्नं पृथिव्याः अधि सहः नः सोम पृत्ऽसु धाः ॥८॥ नृऽचक्षसं त्वा वयं इंद्रऽपीतं स्वःऽविदं भक्षीमहि प्रऽजां इषं ॥९॥ ३१॥

॥९॥ परि प्रिया दिवः कविः वयाँसि नप्त्योः हितः सुवानः याति कविऽक्रतुः॥१॥ प्रऽप्र क्षयाय पन्यसे जनाय जुष्टः अदुहे वीती अर्ष चनिष्ठया॥२॥ सः सूनुः मातरा शुचिः जातः जाते अरोचयत् महान् मही ऋतऽवृधा॥३॥ सः सप्त धीतिऽभिः हितः नद्यः अजिन्वत् अदुहः याः एकं अक्षि वावृधुः॥४॥ ताः अभि संतं अस्तृतं महे युवानं आ दधुः इंदुं इंद्र तव व्रते॥५॥३२॥ अभि वह्निः अमर्त्यः सप्त पश्यति वावहिः क्रिविः देवीः अतर्पयत्॥६॥ अव कल्येषु नः पुमः तमाँसि सोम योध्या तानि पुनान जंघनः॥७॥ नु नव्यसे नवीयसे सुऽउक्थाय साधय पथः प्रत्नऽवत् रोचय रुचः॥८॥ पवमान महि श्रवः गां अश्वं रासि वीरऽवत् सनं मेधां सनं स्वः०॥९॥३३॥

॥१०॥ प्र स्वानासः रथाःऽइव अर्वंतः न श्रवस्यवः सोमासः राये अक्रमुः॥१॥ हिन्वानासः रथाःऽइव दधन्विरे गभस्त्योःभरासः कारिणाँऽइव॥२॥ राजानः न प्रशस्तिऽभिः सोमासः गोभिः अंजते यज्ञः न सप्त धातृऽभिः॥३॥ परि सुवानासः इंदवः मदाय बर्हणा गिरा सुताः अर्षंति धारया॥४॥ आपानासः विवस्वतः जनँतः उषसः भगं सूराः अख्यं वि तन्वते॥५॥३४॥ अप द्वारा मतीनां प्रत्नाः कृण्वंति कारवः वृष्णः हरसे आयवः॥६॥ संऽईचीनासः आसते होतारः सप्तऽजामयः पदं एकस्य पिप्रतः॥७॥ नाभा नाभिं नः आ ददे चक्षुः चित् सूर्यं सचा कवेः अपत्यं आ दुहे॥८॥ अभि प्रिया दिवः पदं अध्वर्युऽभिः गुहा हितं सूरः पश्यति चक्षसा॥९॥३५॥

॥११॥ उप॑ अस्मै॒ गाय॑त॒ नर॒: पव॑मानाय इंद॑वे अ॒भि दे॒वान् इय॑क्षते॥१॥ अ॒भि ते॒ मधु॑ना॒ पय॑: अथ॑र्वाण॒: अ॒शि॒श्र॒यु॒: दे॒वं दे॒-वाय॑देव॒ऽयु॥२॥ स: न॒: प॒व॒स्व॒ शं गवे॑ शं जना॑य शं अर्व॑ते शं रा॒-ज॒न् ओष॑धीभ्य:॥३॥ ब॒भ्रवे॑ नु स्वऽत॑वसे अरु॒णाय॑ दि॒वि॒ऽस्पृशे॑ सोमा॑य गा॒थं अ॒र्च॒त॒॥४॥ हस्त॑ऽच्युतेभि: अद्रि॑ऽभि: सु॒तं सोमं॑ पुनी॒त॒न॒ मधौ॑ आ धा॒व॒त॒ मधु॑॥५॥३६॥ नम॑सा इत् उप॑ सीद॒त॒ दध्ना॑ इत् अ॒भि श्री॒णी॒त॒न॒ इंदुं॑ इंद्रे॑ दधातन॒॥६॥ अ॒मि॒च॒ऽहा वि-ऽच॑र्षणि: पव॑स्व सो॒म॒ शं गवे॑ देवेभ्य॑: अ॒नु॒का॒म॒ऽकृत्॥७॥ इंद्रा॑य सो॒म॒ पात॑वे मदा॑य॒ परि॑ सि॒च्य॒से॒ म॒न॒:ऽचित् मन॑स: पति॑:॥८॥ पव॑मान सु॒ऽवी॒र्यं र॒यिं सो॒म॒ रि॒री॒हि॒ न॒: इंदो॑ इंद्रे॑ण न॒: यु॒जा॥९॥३७॥

॥१२॥ सोमा॑: अ॒सृ॒ग्रं इंद॑व: सु॒ता: ऋ॒त॒स्य॒ सद॑ने इंद्रा॑य मधु-मत्ऽत॑मा:॥१॥ अ॒भि विप्रा॑: अ॒नू॒ष॒त॒ गाव॑: व॒त्सं न मा॒त॑र॒: इंद्रं॑ सोम॑स्य पी॒त॒ये॑॥२॥ मद॑ऽच्युत् क्षे॒ति॒ स॒द॒ने सिंधो॑: ऊ॒र्मा वि॒प॒:-ऽचित् सोम॑: गौरी॑ अधि॑ श्रि॒त:॥३॥ दि॒व: नाभा॑ वि॒ऽच॒क्ष॒ण॒: अ॒व्य॒: वारे॑ म॒ही॒य॒ते॒ सोम॑: य: सु॒ऽऋ॒तु॒: क॒वि:॥४॥ य: सोम॑: क॒-ल॒शेषु॑ आ अं॒त॒:॑ प॒वि॒त्रे॑ आऽहि॑त: तं इंदु॒: परि॑ ष्वजे॥५॥३८॥ प्र वा॒चं इंदु॒: इ॒ष्य॒ति॒ स॒मु॒द्रस्य॑ अधि॑ वि॒ष्टपि॑ जिन्वन् कोशे॑ मधु-ऽश्चुत॑॥६॥ नित्य॑ऽस्तोत्र: वन॒स्पति॑: धी॒नां अं॒त॒:॑ स॒ब॒:ऽदु॒घ॒: हि॒न्वा॒न॒: मानु॑षा युगा॥७॥ अ॒भि प्रि॒या दि॒व: प॒दा सोम॑: हि-न्वा॒न॒: अ॒र्ष॒ति॒ विप्र॑स्य धार॑या क॒वि:॥८॥ आ प॒व॒मा॒न॒ धा॒र॒य॒ र॒यिं स॒ह॒स्र॒ऽव॒र्च॒सं अ॒स्मे॑ इंदो॑ सु॒ऽआ॒भु॒व॑॥९॥३९॥७॥

॥१३॥ सोमः पुनानः अर्षति सहस्रऽधारः अतिऽअविः वायोः इंद्रस्य निःऽकृतं ॥१॥ पवमानं अवस्यवः विप्रं अभि प्र गायत सुस्वानं देवऽवीतये॥२॥ पवंते वाजंऽसातये सोमाः सहस्रऽपाजसः गृणानाः देवऽवीतये॥३॥ उत नः वाजंऽसातये पवस्व बृहतीः इषः द्युऽमत् इंदो सुऽवीर्यं॥४॥ ते नः सहस्रिणं रयिं पवंतां आ सुऽवीर्यं सुवानाः देवासः इंदवः॥५॥१॥ अत्याः हियानाः न हेतृऽभिः असृग्रं वाजंऽसातये वि वारं अव्यं आशवः॥६॥ वाश्राः अर्षंति इंदवः अभि वत्सं न धेनवः दधन्विरे गभस्त्योः ॥७॥ जुष्टः इंद्राय मत्सरः पवमान कनिक्रदत् विश्वाः अप द्विषः जहि॥८॥ अपऽघ्नंतः अराव्णः पवमानाः स्वःऽदृशः योनौ ऋतस्य सीदत॥९॥२॥

॥१४॥ परि प्र असिस्यदत् कविः सिंधोः ऊर्मौ अधि श्रितः कारं बिभ्रत् पुरुऽस्पृहं ॥१॥ गिरा यदि सऽबंधवः पंच व्राताः अपस्यवः परिऽकृण्वंति धर्णसिं ॥२॥ आत् अस्य पुष्मिणः रसे विश्वे देवाः अमत्सत यदि गोभिः वसायते॥३॥ निऽरिणानः वि धावति जहत् शर्याणि तान्वा अचं सं जिघ्नते युजा॥४॥ नप्तीभिः यः विवस्वतः सुभ्रः न ममृजे युवा गाः कृण्वानः न निःऽनिजं ॥५॥३॥ अति श्रिती तिरश्चता गव्या जिगाति अरण्या वयुं इयर्ति यं विदे॥६॥ अभि क्षिपः सं अग्मत मर्जयंतीः इषः पतिं पृष्ठा गृभ्णत वाजिनः॥७॥ परि दिव्यानि मर्मृशत् विश्वानि सोम पार्थिवा वसूनि याहि अस्मऽयुः॥८॥४॥

॥१५॥ एषः धिया याति अरण्या शूरः रथेभिः आशुऽभिः

गच्छन् इंद्रस्य निःऽकृतं॥१॥ एषः पुरु धियाऽयते बृहते देवऽतातये यत्र अमृतासः आसते॥२॥ एषः हितः वि नीयते अंतः सुऽभऽवता पथा यदि तुंजंति भूर्णयः॥३॥ एषः शृंगाणि दोधुवत् शिशीते यूथ्यः वृषा नृम्णा दधानः ओजसा॥४॥ एषः रुक्मिऽभिः ईयते वाजी शुभ्रेभिः अंशुऽभिः पतिः सिंधूनां भवन्॥५॥ एषः वसूनि पिब्दना परुषा ययिऽवान् अति अव शादेषु गच्छति॥६॥ एतं मृजंति मर्ज्यं उप द्रोणेषु आयवः प्रऽचक्राणं महीः इषः॥७॥ एतं ऊं त्यं दश क्षिपः मृजंति सप्त धीतयः सुऽआयुधं मदिन्ऽतमं॥८॥५॥

॥१६॥ प्र ते सोतारः ओण्योः रसं मदाय घृष्वये सर्गः न तक्ति एतशः॥१॥ क्रत्वा दक्षस्य रथ्यं अपः वसानं अंधसा गोऽसां अवेषु सुष्विम॥२॥ अनभ्रं अप्ऽसु दुस्तरं सोमं पवित्रे आ सृज पुनीहि इंद्राय पातवे॥३॥ प्र पुनानस्य चेतसा सोमः पवित्रे अर्षति क्रत्वा सधऽस्थं आ असदत्॥४॥ प्र त्वा नमःऽभिः इंदवः इंद्र सोमाः असृक्षत महे भराय कारिणः॥५॥ पुनानः रूपे अव्ययं विश्वाः अर्षन् अभि श्रियः शूरः न गोषु तिष्ठति॥६॥ दिवः न सानुं पिप्युषीं धारा सुतस्य वेधसः वृथा पवित्रे अर्षति॥७॥ त्वं सोम विपःऽचितं तनां पुनानः आयुषु अव्यः वारं वि धावसि॥८॥६॥

॥१७॥ प्र निम्नेनऽइव सिंधवः घ्नंतः वृत्राणि भूर्णयः सोमाः असृग्रं आशवः॥१॥ अभि सुवानासः इंदवः वृष्टयः पृथिवींऽइव इंद्रं सोमासः अक्षरन्॥२॥ अतिऽऊर्मिः मत्सरः मदः सोमः प-

विचे अर्षति विऽघ्नन् रक्षाँसि देवऽयुः॥३॥ आ कलशेषु धावति पविचे परि सिच्यते उक्थैः यज्ञेषु वर्धते॥४॥ अति ची सोम रोचना रोहन् न भ्राजसे दिवं इष्णन् सूर्यं न चोदयः॥५॥ अभि विप्राः अनूषत मूर्धन् यज्ञस्य कारवः दधानाः चक्षसि प्रियं॥६॥ तं ऊं त्वा वाजिनं नरः धीभिः विप्राः अवस्यवः मृजंति देवऽतातये ॥७॥ मधोः धारां अनु क्षर तीव्रः सधऽस्थे आ असदः चारुः ऋतायं पीतये॥८॥७॥

॥१८॥ परि सुवानः गिरिऽस्थाः पविचे सोमः अक्षाः मदेषु सर्वऽधाः असि॥१॥ त्वं विप्रः त्वं कविः मधु प्र जातं अंधसः मदेषु सर्वऽधाः असि॥२॥ तवं विश्वे सऽजोषसः देवासः पीतिं आशत मदेषुसर्वऽधाः असि॥३॥ आ यः विश्वानि वार्या वसूनि हस्तयोः दधे मदेषु सर्वऽधाः असि॥४॥ यः इमे रोदसी महीं सं मातराऽइव दोहते मदेषुसर्वऽधाः असि॥५॥ परि यः रोदसी उभे सद्यः वाजेभिः अर्षति मदेषु सर्वऽधाः असि॥६॥ सः पुष्मी कलशेषु आ पुनानः अचिक्रदत् मदेषु सर्वऽधाः असि॥७॥८॥

॥१९॥ यत् सोम चिचं उक्थ्यं दिव्यं पार्थिवं वसु तत् नः पुनानः आ भर॥१॥ युवं हि स्थः स्वःऽपती॰ इंद्रः च सोम गोऽपती॰ ईशाना पिप्यतं धियः॥२॥ वृषा पुनानः आयुषु स्तनयन् अधि बर्हिषि हरिः सन् योनिं आ असदत्॥३॥ अवावशंत धीतयः वृषभस्य अधि रेतसि सूनोः वत्सस्य मातरः॥४॥ कुवित् वृषण्यंतीभ्यः पुनानः गर्भं आऽदधत् याः शुक्रं दुहते पयः॥५॥ उप शिक्ष अप ऽतस्थुषः भियसं आ धेहि शचीषु पवमान विदाः रयिं॥६॥

नि शचीः सोम वृष्ण्यं नि शुष्मं नि वयः तिर दूरे वा सतः अंतिं वा ॥ ७ ॥ ९ ॥

॥ २० ॥ प्र कविः देवऽवीतये अव्यः वारेभिः अर्षति सहान् विश्वाः अभि स्पृधः ॥ १ ॥ सः हि स्म जरितृऽभ्यः आ वाजं गोऽमंतं इन्वति पवमानः सहस्रिणं ॥ २ ॥ परि विश्वानि चेतसा मृशसे पवसे मती सः नः सोम श्रवः विदः ॥ ३ ॥ अभि अर्ष बृहत् यशः मघवत्ऽभ्यः ध्रुवं रयिं इषं स्तोतृऽभ्यः आ भर ॥ ४ ॥ त्वं राजाऽइव सुऽव्रतः गिरः सोम आ विवेशिथ पुनानः वहे अद्भुत ॥ ५ ॥ सः वहिः अपऽसु दुस्तरः मृज्यमानः गभस्त्योः सोमः चमूषु सीदति ॥ ६ ॥ क्रीळुः मखः न मंहयुः पवित्रं सोम गच्छसि दधत् स्तोत्रे सुऽवीर्यं ॥ ७ ॥ १० ॥

॥ २१ ॥ एते धावंति इंदवः सोमाः इंद्राय घृष्वयः मत्सरासः स्वःऽविदः ॥ १ ॥ प्रऽवृण्वंतः अभिऽयुजः सुस्वये वरिवःऽविदः स्वयं स्तोत्रे वयःऽकृतः ॥ २ ॥ वृथा क्रीळंतः इंदवः मधऽस्थं अभि एकं इत् सिंधोः ऊर्मा वि अक्षरन् ॥ ३ ॥ एते विश्वानि वार्या पवमानासः आशत हिताः न सप्तयः रथे ॥ ४ ॥ आ अस्मिन् पिशंगं इंदवः दधात वेनं आऽदिशे यः अस्मभ्यं अरावा ॥ ५ ॥ ऋभुः न रथ्यं नवं दधात केतं आऽदिशे शुक्राः पवध्वं अर्णसा ॥ ६ ॥ एते ऊं त्ये अवीवशन् काष्ठां वाजिनः अक्रत सतः प्र असाविषुः मतिं ॥ ७ ॥ ११ ॥

॥ २२ ॥ एते सोमासः आशवः रथाःऽइव प्र वाजिनः सर्गाः

सृष्टाः अहेषत॥१॥ एते वातांःऽइव उरवः पर्जन्यस्यऽइव वृष्टयः अग्नेःऽइव भ्रमाः वृथा॥२॥ एते पूताः विपःऽचितः सोमासः दधिंऽआशिरः विपा वि आनुषुः धियः॥३॥ एते मृष्टाः अमर्त्याः ससृऽवांसः न शुभ्रमुः इयक्षंतः पथः रजः॥४॥ एते पृष्ठानि रोदसोः विऽप्रयंतः वि आनुषुः उत इदं उत्ऽतमं रजः॥५॥ तंतुं तन्वानं उत्ऽतमं अनु प्रऽवतः आशत उत इदं उत्तमाय्यं॥६॥ त्वं सोम पणिऽभ्यः आ वसु गव्यानि धारयः ततं तंतुं अचिक्रदः॥७॥१२॥

॥२३॥ सोमाः असृग्रं आशवः मधोः मदस्य धारया अभि विश्वानि काव्या॥१॥ अनु प्रत्नासः आयवः पदं नवीयः अक्रमुः रुचे जनंत सूर्यं॥२॥ आ पवमान नः भर अर्यः अदाभ्युषः गयं कृधि प्रजाऽवतीः इषः॥३॥ अभि सोमासः आयवः पवंते मद्यं मदं अभि कोशं मधुऽश्चुतं॥४॥ सोमः अर्षति धर्णसिः दधानः इंद्रियं रसं सुऽवीरः अभिशस्तिऽपाः॥५॥ इंद्राय सोम पवसे देवेभ्यः सधऽमाद्यः इंदो वाजं सिसाससि॥६॥ अस्य पीत्वा मदानां इंद्रः वृत्राणि अप्रति जघान जघनत् च नु॥७॥१३॥

॥२४॥ प्र सोमासः अधन्विषुः पवमानासः इंदवः श्रीणानाः अप्ऽसु मृंजत॥१॥ अभि गावः अधन्विषुः आपः न प्रऽवता यतीः पुनानाः इंदुं आशत॥२॥ प्र पवमान धन्वसि सोम इंद्राय पातवे नृऽभिः यतः वि नीयसे॥३॥ त्वं सोम नृऽमादनः पवस्व चर्षणिऽसहे सन्निः यः अनुऽमाद्यः॥४॥ इंदो यत् अद्रिऽभिः सुतः पवित्रं परिऽधावसि अरं इंद्रस्य धाम्ने॥५॥ पवस्व वृत्रहन्-

ऽतम उक्थेभिः अनुऽमाद्यः शुचिः पावकः अद्भुतः ॥ ६ ॥ शुचिः पावकः उच्यते सोमः सुतस्य मध्वः देवऽअवीः अघशंसऽहा ॥ ७ ॥ १४ ॥ १ ॥

॥ २५ ॥ पवस्व दक्षऽसाधनः देवेभ्यः पीतये हरे मरुत्ऽभ्यः वायवे मदः ॥ १ ॥ पवमान धिया हितः अभि योनिं कनिक्रदत् धर्मणा वायुं आ विश ॥ २ ॥ सं देवैः शोभते वृषा कविः योनौ अधि प्रियः वृचऽहा देवऽवीतमः ॥ ३ ॥ विश्वा रूपाणि आऽविशन् पुनानः याति हर्यतः यत्र अमृतासः आसते ॥ ४ ॥ अरुषः जनयन् गिरः सोमः पवते आयुषक् इंद्रं गच्छन् कविऽक्रतुः ॥ ५ ॥ आ पवस्व मदिन्ऽतम पवित्रं धारया कवे अर्कस्य योनिं आऽसदं ॥ ६ ॥ १५ ॥

॥ २६ ॥ तं अमृक्षंत वाजिनं उपऽस्थे अदितेः अधि विप्रासः अण्व्या धिया ॥ १ ॥ तं गावः अभि अनूषत सहस्रऽधारं अक्षितं इंदुं धर्तारं आ दिवः ॥ २ ॥ तं वेधां मेधया अह्यन् पवमानं अधि द्यवि धर्णसिं भूरिऽधायसं ॥ ३ ॥ तं अह्यन् भुरिजोः धिया संऽवसानं विवस्वतः पतिं वाचः अदाभ्यं ॥ ४ ॥ तं सानौ अधि जामयः हरिं हिन्वंति अद्रिऽभिः हर्यतं भूरिऽचक्षसं ॥ ५ ॥ तं त्वा हिन्वंति वेधसः पवमान गिराऽवृधं इंदो इंद्राय मत्सरं ॥ ६ ॥ १६ ॥

॥ २७ ॥ एषः कविः अभिऽस्तुतः पवित्रे अधि तोशते पुनानः घ्नन् अप स्रिधः ॥ १ ॥ एषः इंद्राय वायवे स्वःऽजित् परि सिच्यते पवित्रे दक्षऽसाधनः ॥ २ ॥ एषः नृऽभिः वि नीयते दिवः मूर्धा

वृषा सुतः सोमः वनेषु विष्वऽवित् ॥३॥ एषः गव्युः अचिक्रदत् पवमानः हिरण्यऽयुः इंदुः सत्राऽजित् अस्तृतः ॥४॥ एषः सूर्येण हासते पवमानः अधि द्यवि पविचे मत्सरः मदः ॥५॥ एषः शुष्मी असिस्यदत् अंतरिक्षे वृषा हरिः पुनानः इंदुः इंद्रे आ ॥६॥१७॥

॥२८॥ एषः वाजी हितः नृऽभिः विष्वऽवित् मनसः पतिः अव्यः वारे वि धावति ॥१॥ एषः पविचे अक्षरत् सोमः देवेभ्यः सुतः विश्वा धामानि आऽविशन् ॥२॥ एषः देवः शुभायते अधि योनौ असर्त्यः वृत्रऽहा देवऽवीतमः ॥३॥ एषः वृषा कनिक्रदत् दशऽभिः जामिऽभिः यतः अभि द्रोणानि धावति ॥४॥ एषः सूर्ये अरोचयत् पवमानः विऽचर्षणिः विश्वा धामानि विश्वऽवित् ॥५॥ एषः शुष्मी अदाभ्यः सोमः पुनानः अर्षति देवऽअवीः अघशंसऽहा ॥६॥१८॥

॥२९॥ प्र अस्य धाराः अक्षरन् वृष्णः सुतस्य ओजसा देवान् अनु प्रऽभूषतः ॥१॥ सप्तिं मृजंति वेधसः गृणंतः कारवः गिरा ज्योतिः जज्ञानं उक्थ्यं ॥२॥ सुऽसहा सोम तानि ते पुनानाय प्रभुऽवसो॰ वर्धं समुद्रं उक्थ्यं ॥३॥ विश्वा वसूनि संऽजयन् पवस्व सोम धारया इनु द्वेषांसि सध्र्यक् ॥४॥ रक्षसु नः अरंरुषः स्वनात् समस्य कस्य चित् निदः यत्र मुमुच्महे ॥५॥ आ इंदो॰ पार्थिवं रयिं दिव्यं पवस्व धारया द्युऽमंतं शुष्मं आ भर ॥६॥१९॥

॥३०॥ प्र धाराः अस्य शुष्मिणः वृषा पविचे अक्षरन् पुनानः

वाचँ इ॒ष्यति॥१॥ इंदुः हि॒या॒नः सो॒तृऽभिः मृ॒ज्यमा॑नः कनि॑क्रदत् इ॒यर्ति॑ वा॒ग्गुं इं॒द्रि॒यं॥२॥ आ नः॒ प्स॒पँ नृऽसखँ वी॒रऽवँ॑तं पु॒रुऽस्पृहँ पवस्व सो॒म॒ धार॑या ॥३॥ प्र सोम॑ः अ॒ति॑ धार॑या पव॑मानः अ॒सि॒स्य॒दत् अ॒भि द्रो॒णा॒नि आ॒ऽस॒दँ॥४॥ अ॒प्ऽसु त्वा॒ मधु॑मत्ऽतमं हरिँ हि॒न्व॒न्ति॒ अद्रि॑ऽभिः इंदो॑ इंद्रा॑य पी॒त॒यें॥५॥ सु॒नो॒त॒ मधु॑मत्ऽतमं सोमँ इंद्रा॑य व॒ज्रिणें चारुँ शर्धा॑य मत्स॒रं॥६॥२०॥

॥३१॥ प्र सोमा॑सः सु॒ऽआ॒ध्यः पव॑मानासः अक्रमुः र॒यिं कृ॒ण्व॒न्ति॒ चेत॑नं॥१॥ दि॒वः पृ॒थि॒व्याः अधि॑ भव॑ इंदो॑ द्यु॒म्न॒ऽवर्धनः भव॑ वाजा॑नां पति॑ः॥२॥ तुभ्यँ वा॒ताः अ॒भि॒ऽप्रि॒यः तुभ्यँ अ॒र्ष॒न्ति॒ सिंध॑वः सोम॑ वर्धंन्ति ते॒ महः॥३॥ आ प्या॑यस्व॒ सं ए॑तु ते॒ वि॒श्वतः॑ सो॒म॒ वृ॒ष्ण्यँ भव॑ वाजस्य सं॒ऽग॒थे॥४॥ तुभ्यँ गाव॑ः घृ॒तं पयः व॒भ्रो॑ दुदुह्रे अक्षि॑तं वर्षिष्ठे अधि सान॑वि॥५॥ सु॒ऽआ॒यु॒धस्य॑ ते स॒तः भुव॑नस्य पते॒ वय॑ं इंदो॑ सखि॒ऽत्वं उ॒श्म॒सि॒॥६॥२१॥

॥३२॥ प्र सोमा॑सः मद॒ऽच्यु॑तः श्रव॑से नः॒ म॒घो॒नः॒ सु॒ताः वि॒दथे॑ अक्रमुः॥१॥ आत् ई॒ चि॒तस्य॑ योष॑णः हरिँ हि॒न्व॒न्ति॒ अद्रि॑ऽभिः इंदुँ इंद्रा॑य पी॒त॒यें॥२॥ आत् ई॒ हंसः॒ यथा॑ ग॒णं विश्व॑स्य अ॒वी॒व॒श॒त् म॒तिं अत्यः॑ न गो॒भिः॒ अ॒ज्य॒ते॥३॥ उ॒भे॑ सो॒म॒ अ॒व॒ऽचा॒क॒श॒त् मृ॒गः न॒ तक्तः॑ अ॒र्ष॒सि॒ सीद॑न् ऋ॒तस्य॑ योनिँ आ ॥४॥ अ॒भि गाव॑ः अ॒नू॒ष॒त॒ योषा॑ जा॒रंऽइ॑व प्रि॒यं अग॑न् आ॒जिं यथा॑ हि॒तं॥५॥ अ॒स्मे॑ धे॒हि॒ द्यु॒ऽमत् यशः॑ म॒घ॒व॒त्ऽभ्यः च॒ मह्यँ च॒ स॒निं मे॒धां उ॒त श्रव॑ः ॥६॥२२॥

॥३३॥ प्र सोमासः विपःऽचितः अपां न यंति ऊर्मयः वनानि महिषाःऽइव ॥१॥ अभि द्रोणानि बभ्रवः शुक्राः ऋतस्य धारया वाजं गोऽमंतं अक्षरन् ॥२॥ सुताः इंद्राय वायवे वरुणाय मरुत्ऽभ्यः सोमाः अर्षंति विष्णवे ॥३॥ तिस्रः वाचः उत् ईरते गावः मिमंति धेनवः हरिः एति कनिक्रदत् ॥४॥ अभि ब्रह्मीः अनूषत यह्वीः ऋतस्य मातरः मर्मृज्यंते दिवः शिशुं ॥५॥ रायः समुद्रान् चतुरः अस्मभ्यं सोम विश्वतः आ पवस्व सहस्रिणः ॥६॥ ॥२३॥

॥३४॥ प्र सुवानः धारया तना इंदुः हिन्वानः अर्षति रुजत् दृळ्हा वि ओजसा ॥१॥ सुतः इंद्राय वायवे वरुणाय मरुत्ऽभ्यः सोमः अर्षति विष्णवे ॥२॥ वृषाणं वृषऽभिः युतं सुन्वंति सोमं अद्रिऽभिः दुहंति शक्मना पयः ॥३॥ भुवत् चितस्य मर्ज्यः भुवत् इंद्राय मत्सरः सं रूपैः अज्यते हरिः ॥४॥ अभि ईं ऋतस्य विष्टपं दुहते पृश्निऽमातरः चारुं प्रियऽतमं हविः ॥५॥ सं एनं अहृताः इमाः गिरः अर्षंति सऽसुतः धेनूः वाश्रः अवीवशत् ॥६॥२४॥

॥३५॥ आ नः पवस्व धारया पवमान रयिं पृथुं यया ज्योतिः विदासि नः ॥१॥ इंदो समुद्रंऽईखय पवस्व विश्वंऽएजय रायः धर्ता नः ओजसा ॥२॥ त्वया वीरेण वीरऽवः अभि स्याम पृतन्यतः क्षरं नः अभि वायं ॥३॥ प्र वाजं इंदुः इष्यति सिसासन् वाजऽसाः ऋषिः व्रता विदानः आयुधा ॥४॥ तं गोःऽभिः वाचंऽईखयं पुनानं वासयामसि सोमं जनस्य गोऽपतिं ॥५॥ विश्वः यस्य व्रते जनः दाधार धर्मणः पतेः पुनानस्य प्रभुऽवसोः ॥६॥२५॥

॥३६॥ असर्जि रथ्यः यथा पविचे चम्वोः सुतः कार्ष्मन् वाजी नि अक्रमीत् ॥१॥ सः वह्निः सोम जगृविः पवस्व देवऽवीः अति अभि कोशं मधुऽश्चुतं ॥२॥ सः नः ज्योतींषि पूर्व्य पवमान वि रोचय क्रत्वे दक्षाय नः हिनु ॥३॥ शुंभमानः ऋतयुऽभिः मृज्यमानः गभस्त्योः पवते वारे अव्यये ॥४॥ सः विश्वा दाशुषे वसु सोमः दिव्यानि पार्थिवा पवतां आ अंतरिक्ष्या ॥५॥ आ दिवः पृष्ठं अश्वऽयुः गव्यऽयुः सोम रोहसि वीरऽयुः शवसः पते ॥६॥२६॥

॥३७॥ सः सुतः पीतये वृषा सोमः पविचे अर्षति विऽघ्नन् रक्षांसि देवऽयुः ॥१॥ सः पविचे विऽचक्षणः हरिः अर्षति धर्णसिः अभि योनिं कनिक्रदत् ॥२॥ सः वाजी रोचना दिवः पवमानः वि धावति रक्षःऽहा वारे अव्यये ॥३॥ सः चितस्य अधि सानवि पवमानः अरोचयत् जामिऽभिः सूर्येण सह ॥४॥ सः वृत्रऽहा वृषा सुतः वरिवःऽवित् अदाभ्यः सोमः वाजंऽइव असरत् ॥५॥ सः देवः कविना इषितः अभि द्रोणानि धावति इंदुः इंद्राय मंहना ॥६॥२७॥

॥३८॥ एषः ऊं स्यः वृषा रथः अव्यः वारेभिः अर्षति गच्छन् वाजं सहस्रिणं ॥१॥ एतं चितस्य योषणः हरिं हिन्वंति अद्रिऽभिः इंदुं इंद्राय पीतये ॥२॥ एतं त्यं हरितः दश मर्मृज्यंते अपस्युवः याभिः मदाय शुंभते ॥३॥ एषः स्यः मानुषीषु आ श्येनः न विक्षु सीदति गच्छन् जारः न योषितं ॥४॥ एषः स्यः मद्यः रसः अवचष्टे दिवः शिप्युः यः इंदुः वारे आ अविंशत् ॥५॥ एषः स्यः पीतये सुतः हरिः अर्षति धर्णसिः क्रंदन् योनिं अभि प्रियं ॥६॥२८॥

॥३९॥ आप्सुः अर्ष बृहत् ऽमते परि प्रियेण धाम्ना यत्र देवाः इति ब्रवन्॥१॥ परि ऽकृण्वन् अनिः ऽकृतं जनाय यातयन् इषः वृष्टिं दिवः परि स्रव॥२॥ सुतः एति पवित्रे आ त्विषिं दधानः ओजसा वि ऽचक्षाणः वि ऽरोचयन्॥३॥ अयं सः यः दिवः परि रघु ऽयामा पवित्रे आ सिंधोः ऊर्मा वि अक्षरत्॥४॥ आ ऽविवासन् परा ऽवतः अथो अर्वा ऽवतः सुतः इंद्राय सिच्यते मधु॥५॥ सं ऽईचीनाः अनूषत हरिं हिन्वंति अद्रि ऽभिः योनौ कृतस्य सीदत॥६॥२९॥

॥४०॥ पुनानः अक्रमीत् अभि विश्वाः मृधः वि ऽचर्षणिः शुंभंति विप्रं धीति ऽभिः॥१॥ आ योनिं अरुणः रुहत् गमत् इंद्रं वृषा सुतः ध्रुवे सदसि सीदति॥२॥ नु नः रयिं महां इंदो अस्मभ्यं सोम विश्वतः आ पवस्व सहस्रिणं॥३॥ विश्वा सोम पवमान द्युम्नानि इंदो आ भर विदाः सहस्रिणीः इषः॥४॥ सः नः पुनानः आ भर रयिं स्तोचे सु ऽवीर्यं जरितुः वर्धय गिरः॥५॥ पुनानः इंदो आ भर सोम द्वि ऽबर्हसं रयिं वृषन् इंदो नः उक्थ्यं॥६॥३०॥

॥४१॥ प्र ये गावः न भूर्णयः त्वेषाः अयासः अक्रमुः घृतः कृष्णां अपत्वचं॥१॥ सुवितस्य मनामहे अतिं सेतुं दुः ऽआव्यं सद्धांसः दस्युं अव्रतं॥२॥ मृणे वृष्टेः ऽइव स्वनः पवमानस्य शुष्मिणः चरंति वि ऽद्युतः दिवि॥३॥ आ पवस्व महीं इषं गो ऽमत् इंदो हिरण्य ऽवत् अश्व ऽवत् वाज ऽवत् सुतः॥४॥ सः पवस्व वि ऽचर्षणे आ महीं रोदसी पृण उषाः सूर्यः न रश्मि ऽभिः॥५॥

परि नः शर्मऽयंत्या धारया सोम विश्वतः सर रसाऽइव विष्टपं ॥ ६॥३१॥

॥४२॥ जनयन् रोचना दिवः जनयन् अप्ऽसु सूर्यं वसानः गाः अपः हरिः॥१॥ एषः प्रत्नेन मन्मना देवः देवेभ्यः परि धारया पवते सुतः॥२॥ ववृधानाय तूर्वये पवंते वाजऽसातये सोमाः सहस्रऽपाजसः॥३॥ दुहानः प्रत्नं इत् पयः पविचे परि सिच्यते क्रंदन् देवान् अजीजनत्॥४॥ अभि विश्वानि वार्या अभि देवान् ऋतऽवृधः सोमः पुनानः अर्षति॥५॥ गोऽमत् नः सोम वीरऽवत् अश्वऽवत् वाजऽवत् सुतः पवस्व बृहतीः इषः॥६॥३२॥

॥४३॥ यः अत्यःऽइव मृज्यते गोभिः मदाय हर्यतः तं गीःऽभिः वासयामसि॥१॥ तं नः विश्वाः अवस्युवः गिरः शुंभंति पूर्वऽथा इंदुं इंद्राय पीतये॥२॥ पुनानः याति हर्यतः सोमः गीःऽभिः परिऽकृतः विप्रस्य मेध्यऽअतिथेः॥३॥ पवमान विदाः रयिं अस्मभ्यं सोम सुऽश्रियं इंदो सहस्रऽवर्चसं॥४॥ इंदुः अत्यः न वाजऽसृत् कनिक्रंति पविचे आ यत् अक्षाः अति देवऽयुः॥५॥ पवस्व वाजऽसातये विप्रस्य गृणतः वृधे सोम रास्व सुऽवीर्यं॥६॥३३॥८॥६॥

॥४४॥ प्र नः इंदो महे तने ऊर्मिं न बिभ्रत् अर्षसि अभि देवान् अयास्यः॥१॥ मती जुष्टः धिया हितः सोमः हिन्वे परिऽअति विप्रस्य धारया कविः॥२॥ अयं देवेषु जागृविः सुतः एति पविचे आ सोमः याति विऽअर्षणिः॥३॥ सः नः पवस्व वा-

जऽयुः चक्राणः चारुँ अध्वरं बर्हिष्मान् आ विवासति ॥४॥ सः नः भगाय वायवे विप्रऽवीरः सदाऽवृधः सोमः देवेषु आ यमत् ॥५॥ सः नः अद्य वसुत्तये क्रतुऽवित् गातुवित्ऽतमः वाजँ जेषि श्रवः बृहत् ॥६॥१॥

॥४५॥ सः पवस्व मदाय कं नृऽचक्षाः देवऽवीतये इंदो इंद्राय पीतये ॥१॥ सः नः अर्ष अभि दूत्यँ त्वं इंद्राय तोशसे देवान् सखिऽभ्यः आ वरँ ॥२॥ उत त्वां अरुणं वयं गोभिः अंज्मः मदाय कं वि नः राये दुरः वृधि ॥३॥ अति ऊं पविचँ अक्रमीत् वाजी धुरँ न यामनि इंदुः देवेषु पत्यते ॥४॥ सं ईं सखायः अस्वरन् वनेक्रीळँतं अतिऽअविं इंदुं नावाः अनूषत ॥५॥ तया पवस्व धारया यया पीतः विऽचक्षसे इंदो स्तोचे सुऽवीर्यँ ॥६॥२॥

॥४६॥ असृग्रन् देवऽवीतये अत्यासः कृत्व्याःऽइव क्षरंतः पर्वतऽवृधः ॥१॥ परिऽकृतासः इंदवः योषाऽइव पिप्यंऽवती वायुं सोमाः असृक्षत ॥२॥ एते सोमासः इंदवः प्रयस्वंतः चमू सुताः इंद्रं वर्धंति कर्मऽभिः ॥३॥ आ धावत सुऽहस्त्यः शुक्रा गृभ्णीत मंथिना गोभिः श्रीणीत मत्सरं ॥४॥ सः पवस्व धनंऽजय प्रऽयंता राधसः महः अस्मभ्यँ सोम गातुऽवित् ॥५॥ एतं मृजंति मर्ज्यं पवमानं दश क्षिपः इंद्राय मत्सरं मदं ॥६॥३॥

॥४७॥ अया सोमः सुऽकृत्यया महः चित् अभि अवर्धत मंदानः उत वृषऽयते ॥१॥ कृतानिं इत् अस्य कर्वी चेतँते दस्युऽतर्हे-

णा कृणा च धृष्णुः चयते ॥२॥ आत् सोमः इंद्रियः रसः वज्रः सहस्रऽसाः भुवत् उक्थं यत् अस्य जायते ॥३॥ स्वयं कविः विऽधर्तरि विप्राय रत्नं इच्छति यदि मर्मृज्यते धियः ॥४॥ सिसासतुः रयीणां वाजेषु अर्वतांऽइव भरेषु जिग्युषाँ असि ॥५॥४॥

॥४८॥ तं त्वा नृम्णानि बिभ्रतं सधऽस्थेषु महः दिवः चारुं सुऽकृत्यया ईमहे ॥१॥ संवृक्तऽधृष्णुं उक्थ्यं महाऽमहिव्रतं मदं शतं पुरः रुरुक्षणिं ॥२॥ अतः त्वा रयिं अभि राजानं सुऽक्रतो° दिवः सुऽपर्णः अव्यथिः भरत् ॥३॥ विश्वस्मै इत् स्वः दृशे साधारणं रजःऽतुरं गोपां ऋतस्य विः भरत् ॥४॥ अध हिन्वानः इंद्रियं ज्यायः महिऽत्वं आनशे अभिष्टिऽकृत् विऽचर्षणिः ॥५॥५॥

॥४९॥ पवस्व वृष्टिं आ सु नः अपां ऊर्मिं दिवः परि अयक्ष्माः बृहतीः इषः ॥१॥ तया पवस्व धारया यया गावः इह आऽगमन् जन्यासः उप नः गृहं ॥२॥ घृतं पवस्व धारया यज्ञेषु देवऽवीतमः अस्मभ्यं वृष्टिं आ पव ॥३॥ सः नः ऊर्जे वि अव्ययं पवित्रं धाव धारया देवासः शृणवन् हि कं ॥४॥ पवमानः असिस्यदत् रक्षांसि अपऽजंघनत् प्रत्नऽवत् रोचयन् रुचः ॥५॥६॥

॥५०॥ उत् ते शुष्मासः ईरते सिंधोः ऊर्मेःऽइव स्वनः वाणस्य चोदय पविं ॥१॥ प्रऽस्रवे ते उत् ईरते तिस्रः वाचः मखस्युवः यत् अव्ये एषि सानवि ॥२॥ अव्यः वारे परि प्रियं हरिं हिन्वंति अद्रिऽभिः पवमानं मधुऽश्चुतं ॥३॥ आ पवस्व मदिन्-

ऽतम् पविचँ धारया कवे अर्कस्य योनिँ आ ऽसदँ ॥ ४ ॥ सः पव-स्व मदिन्ऽतम् गोभिः अंजानः अक्तुऽभिः इंदो॑ इंद्राय पीतये ॥ ५ ॥ ७ ॥

॥ ५१ ॥ अध्वर्यो॑ अद्रिऽभिः सुतं सोमँ पविचे आ सृज पुनीहि इंद्राय पातवे ॥ १ ॥ दिवः पीयूषँ उत्ऽतमं सोमँ इंद्राय वज्रिणे सुनोत मधुमत्ऽतमं ॥ २ ॥ तवं त्ये इंदो॑ अंधसः देवाः मधोः वि अश्नते पवमानस्य मरुतः ॥ ३ ॥ त्वं हि सोम वर्धयन् सुतः मदाय भूर्णये वृषन् स्तोतारँ ऊतये ॥ ४ ॥ अभि अर्ष वि ऽचक्षण पविचँ धारया सुतः अभि वाजँ उत श्रवः ॥ ५ ॥ ८ ॥

॥ ५२ ॥ परि द्युक्षः सनत्ऽरयिः भरत् वाजँ नः अंधसा सुवानः अर्ष पविचे आ ॥ १ ॥ तवं प्रत्नेभिः अध्वऽभिः अव्यः वारे परि प्रियः सहस्रंऽधारः यात् तना ॥ २ ॥ चरुः न यः तं ईखय इंदो॑ न दानँ ईखय वधैः वधऽस्नो॑° ईखय ॥ ३ ॥ नि शुष्मँ इंदो॑ एषां पुरु-ऽहूत जनानां यः अस्मान् आ ऽदिदेशति ॥ ४ ॥ शतं नः इंदो॑ ऊ-तिऽभिः सहस्रँ वा शुचीनां पवस्व मंहयत्ऽरयिः ॥ ५ ॥ ९ ॥

॥ ५३ ॥ उत् ते शुष्मासः अस्थुः रक्षः भिंदंतः अद्रिऽवः नुदस्व याः परिऽस्पृधः ॥ १ ॥ अया निऽजघ्निः ओजसा रथऽसंगे धने हिते स्तवै अविभ्युषा हृदा ॥ २ ॥ अस्य व्रतानि न आ ऽधृषे पव-मानस्य दुःऽध्या रुज यः त्वा पृतन्यति ॥ ३ ॥ तं हिन्वंति मदऽच्युतँ हरिँ नदीषु वाजिनँ इंदुँ इंद्राय मत्सरं ॥ ४ ॥ १० ॥

॥५४॥ अस्य प्रत्नां अनु द्युतं शुक्रं दुदुह्रे अह्रयः पयः सहस्र-ऽसां ऋषिं ॥१॥ अयं सूर्यैःऽइव उपऽदृक् अयं सरांसि धावति सप्त प्रऽवतः आ दिवं ॥२॥ अयं विश्वानि तिष्ठति पुनानः भुवना उपरि सोमः देवः न सूर्यैः ॥३॥ परि नः देवऽवीतये वाजान् अर्षसि गोऽमतः पुनानः इंदो इंदुऽयुः ॥४॥११॥

॥५५॥ यवंऽयवं नः अंधसा पुष्टंऽपुष्टं परि स्रव सोम विश्वा च सौभगा ॥१॥ इंदो यथा तव स्तवः यथा ते जातं अंधसः नि बर्हिषि प्रिये सदः ॥२॥ उत नः गोऽवित् अश्वऽवित् पवस्व सोम अंधसा मक्षुऽतमेभिः अहंऽभिः ॥३॥ यः जिनाति न जीयते हंति शचुं अभिऽइत्यं सः पवस्व सहस्रऽजित् ॥४॥१२॥

॥५६॥ परि सोमः ऋतं बृहत् आप्नुः पविचे अर्षति विऽघ्नन् रक्षांसि देवऽयुः ॥१॥ यत् सोमः वाजं अर्षति शतं धाराः अप-स्युवः इंद्रस्य सख्यं आऽविशन् ॥२॥ अभि त्वा योषणः दश जारं न कन्या अनूषत मृज्यसे सोम सातये ॥३॥ तं इंद्राय विष्णवे स्वा-दुः इंदो परि स्रव नृन् स्तोतॄन् पाहि अंहसः ॥४॥१३॥

॥५७॥ प्र ते धाराः असश्चतः दिवः न यंति वृष्टयः अच्छ वाजं सहस्रिणं ॥१॥ अभि प्रियाणि काव्या विश्वा चक्षाणः अर्षति हरिः तुंजानः आयुधा ॥२॥ सः मर्मृजानः आयुऽभिः इभः राजाऽइव सुऽव्रतः श्येनः न वंसु सीदति ॥३॥ सः नः विश्वा दिवः वसु उतो पृथिव्याः अधि पुनानः इंदो आ भर ॥४॥१४॥

॥५८॥ तरत् सः मंदी धावति धारा सुतस्य अंधसः तरत् सः मंदी धावति॥१॥ उस्रा वेद् वसूनां मर्तस्य देवी अवसः तरत् सः मंदी धावति॥२॥ ध्वसयोः पुरुऽसंत्योः आ सहस्राणि दद्महे तरत् सः मंदी धावति॥३॥ आ ययोः चिंशतं तना सहस्राणि च दद्महे तरत् सः मंदी धावति॥४॥१५॥

॥५९॥ पवस्व गोऽजित् अश्वऽजित् विश्वऽजित् सोम रण्य-ऽजित् प्रजाऽवत् रत्नं आ भर॥१॥ पवस्व अत्ऽभ्यः अद्भ्यः पवस्व ओषधीभ्यः पवस्व धिषणाभ्यः॥२॥ त्वं सोम पवमानः विश्वानि दुःऽइता तर कविः सीद् नि बर्हिषि॥३॥ पवमान स्वः विद्ः जायमानः अभवः महान् इंदो' विश्वान् अभि इत् असि ॥४॥१६॥

॥६०॥ प्र गायत्रेण गायत पवमानं विऽचर्षणिं इंदुं सहस्र-ऽचक्षसं॥१॥ तं त्वा सहस्रऽचक्षसं अथो' सहस्रऽभर्णसं अति वारं अपाविषुः॥२॥ अति वारान् पवमानः असिस्यदत् कलशान् अभि धावति इंद्रस्य हार्दि आऽविशन्॥३॥ इंद्रस्य सोम राधसे शं पवस्व विऽचर्षणे प्रजाऽवत् रतः आ भर॥४॥१७॥२॥

॥६१॥ अया वीती परि स्रव यः ते इंदो' मदेषु आ अवऽअहन् नवतीः नव॥१॥ पुरः सद्यः इत्थाऽधिये दिवःऽदासाय शंबरं अध त्यं तुर्वशं यदुं॥२॥ परि नः अश्वं अश्वऽवित् गोऽमंत् इंदो' हिरण्यऽवत् क्षरं सहस्रिणीः इषः॥३॥ पवमानस्य ते वयं पवित्रं

अभि ऽउंदतः सखि ऽत्वं आ वृणीमहे ॥४॥ ये ते पविचें ऊर्मयः अभि ऽक्षरंन्ति धारया तेभिः नः सोम मृळय ॥५॥१८॥ सः नः पुनानः आ भर रयिं वीर ऽवंतीं इषं ईशानः सोम विश्वतः ॥६॥ एतं ऊं त्यं दश क्षिपः मृजंन्ति सिंधु ऽमातरं सं आदित्येभिः अख्यत ॥७॥ सं इंद्रेण उत वायुना सुतः एति पविचें आ सं सूर्यस्य रश्मि ऽभिः ॥८॥ सः नः भगाय वायवे पूष्णे पवस्व मधु ऽमान् चारुः मित्रे वरुणे च ॥९॥ उच्चा ते जातं अंधसः दिवि सत् भूमिः आ ददे उग्रं शर्म महि श्रवः ॥१०॥१९॥ एना विश्वानि अर्यः आ द्युम्नानि मानुषाणां सिसासंतः वनामहे ॥११॥ सः नः इंद्राय यज्यवे वरुणाय मरुत् ऽभ्यः वरिवः ऽवित् परि स्रव ॥१२॥ उपो ं सु जातं अप् ऽतुरं गोभिः भंगं परि ऽकृतं इंदुं देवाः अयासिषुः ॥१३॥ तं इत् वर्धंतु नः गिरः वत्सं संशिश्वरीः ऽइव यः इंद्रस्य हृदं ऽसनिः ॥१४॥ अषं नः सोम शं गवे धुक्षस्व पिप्युषीं इषं वर्धं समुद्रं उक्थ्यं ॥१५॥२०॥ पवमानः अजीजनत् दिवः चित्रं न तन्यतुं ज्योतिः वैश्वानरं बृहत् ॥१६॥ पवमानस्य ते रसः मदः राजन् अदुच्छुनः वि वारं अव्यं अर्षति ॥१७॥ पवमान रसः तव दक्षः वि राजति द्युऽमान् ज्योतिः विश्वं स्वः दृशे ॥१८॥ यः ते मदः वरेण्यः तेन पवस्व अंधसा देव ऽअवीः अघशंस ऽहा ॥१९॥ जघ्निः वृत्रं अमित्रियं सस्निः वाजं दिवेऽदिवे गोऽसाः ऊं अश्व ऽसाः असि ॥२०॥ ॥२१॥ संऽमिश्लः अरुषः भव सुऽउपस्थाभिः न धेनुऽभिः सीदन् श्येनः न योनिं आ ॥२१॥ सः पवस्व यः आविंथ इंद्रं वृत्राय हंतवे वव्रिऽवांसं महीः अपः ॥२२॥ सुऽवीरासः वयं धना जयेम सोम मीढ्वः पुनानः वर्ध नः गिरः ॥२३॥ त्वाऽऊतासः तव अवसा स्याम वन्वंतः आऽमुरः सोम व्रतेषु जागृहि ॥२४॥ अपऽघ्नन् प-

वते मृधः अप सोमः अराव्णः गच्छन् इंद्रस्य निःऽकृतं ॥२५॥
॥२२॥ महः नः रायः आ भर पवमान जहि मृधः रास्व इंदो वीरऽवत् यशः॥२६॥ न त्वा शतं चन हुतः राधः दित्संतं आ मिनन् यत् पुनानः मखस्यसे ॥२७॥ पवस्व इंदो वृषा सुतः कृधि नः यशसः जने विश्वाः अप द्विषः जहि॥२८॥ अस्य ते सख्ये वयं तव इंदो द्युम्ने उत्ऽतमे ससह्याम पृतन्यतः॥२९॥ या ते भीमानि आयुधा तिग्मानि संति धूर्वणे रक्षस्मस्य नः निदः॥३०॥२३॥

॥६२॥ एते असृग्रं इंदवः तिरः पविचं आशवः विश्वानि अभि सौभगा॥१॥ विऽघ्नंतः दुःऽइता पुरु सुऽगा तोकाय वाजिनः तना कृण्वंतः अर्वते ॥२॥ कृण्वंतः वरिवः गवे अभि अर्षंति सुऽस्तुतिं इळां अस्मभ्यं संऽयतं ॥३॥ असावि अंशुः मदाय अप्ऽसु दक्षः गिरिऽस्थाः श्येनः न योनिं आ असदत्॥४॥ शुभ्रं अंधः देवऽवातं अप्ऽसु धूतः नृऽभिः सुतः स्वदंति गावः पयःऽभिः ॥५॥२४॥ आत् ईं अश्वं न हेतारः अमृभ्रन् अमृताय मध्वः रसं सधऽमादे॥६॥ याः ते धाराः मधुऽश्चुतः असृग्रं इंदो ऊतये ताभिः पविचं आ असदः॥७॥ सः अर्ष इंद्राय पीतये तिरः रोमाणि अव्यया सीदन् योना वनेषु आ ॥८॥ त्वं इंदो परि स्रव स्वादिष्ठः अंगिरःऽभ्यः वरिवःऽवित् घृतं पयः ॥९॥ अयं विऽचर्षणिः हितः पवमानः सः चेतति हिन्वानः आप्यं बृहत्॥१०॥२५॥ एषः वृषा वृषऽव्रतः पवमानः अशस्तिऽहा करत् वसूनि दाशुषे॥११॥ आ पवस्व सहस्रिणं रयिं गोऽमंतं अश्विनं पुरुऽचंद्रं पुरुऽस्पृहं ॥१२॥ एषः स्यः परि सिच्यते मर्मृज्यमानः आयुऽभिः उरुऽगायः कविऽक्रतुः ॥१३॥ सहस्रंऽऊतिः शतऽधारः विऽमानः रजसः

कविः इंद्राय पवते मदः ॥१४॥ गिरा जातः इह स्तुतः इंदुः इंद्राय धीयते विः योना वसतौऽइव ॥१५॥२६॥ पवमानः सुतः नृऽभिः सोमः वाजंऽइव असरत् चमूषु शक्मना आऽसदं ॥१६॥ तं चिऽपृष्ठे चिऽवंधुरे रथे युंजंति यातवे ऋषीणां सप्त धीतिऽभिः ॥१७॥ तं सोतारः धनऽस्पृतं आशुं वाजाय यातवे हरिं हिनोत वाजिनं ॥१८॥ आऽविशन् कलशं सुतः विश्वाः अर्षन् अभि श्रियः शूरः न गोषु तिष्ठति ॥१९॥ आ ते इंदो मदाय कं पयः दुहंति आयवः देवाः देवेभ्यः मधु ॥२०॥२७॥ आ नः सोमं पविचे आ सृजत मधुमत्ऽतमं देवेभ्यः देवश्रुत्ऽतमं ॥२१॥ एते सोमाः असृक्षत गृणानाः श्रवसे महे मदिन्ऽतमस्य धारया ॥२२॥ अभि गव्यानि वीतये नृम्णा पुनानः अर्षसि सनत्ऽवाजः परि स्रव ॥२३॥ उत नः गोऽमतीः इषः विश्वाः अर्ष परिऽस्तुभः गृणानः जमत्ऽअग्निना ॥२४॥ पवस्व वाचः अग्रियः सोम चित्राभिः ऊतिऽभिः अभि विश्वानि काव्या ॥२५॥२८॥ त्वं समुद्रियाः अपः अग्रियः वाचः ईरयन् पवस्व विश्वंऽएजय ॥२६॥ तुभ्य इमा भुवना कवे महिम्ने सोम तस्थिरे तुभ्यं अर्षंति सिंधवः ॥२७॥ प्र ते दिवः न वृष्टयः धाराः यंति असश्चतः अभि शुक्रां उपऽस्तिरं ॥२८॥ इंद्राय इंदुं पुनीतन उग्रं दक्षाय साधनं ईशानं वीतिऽराधसं ॥२९॥ पवमानः ऋतः कविः सोमः पविचे आ असदत् दधत् स्तोचे सुऽवीर्यं ॥३०॥२९॥

॥६३॥ आ पवस्व सहस्रिणं रयिं सोम सुऽवीर्यं अस्मे श्रवांसि धारय ॥१॥ इषं ऊर्जं च पिन्वसे इंद्राय मत्सरिन्ऽतमः चमूषु आ नि सीदसि ॥२॥ सुतः इंद्राय विष्णवे सोमः कलशे अक्षरत्

मधुऽमान् अस्तु वायवे ॥ ३ ॥ एते असृग्रं आशवः अति ह्वरांसि बभ्रवः सोमाः ऋतस्य धारया ॥ ४ ॥ इंद्रं वर्धंतः अप्ऽतुरः कृण्वंतः विश्वं आर्यं अपऽघ्नंतः अराव्णः ॥ ५ ॥ ३० ॥ सुताः अनु स्वं आ रजः अभि अर्षंति बभ्रवः इंद्रं गच्छंतः इंदवः ॥ ६ ॥ अया पवस्व धार-या यया सूर्यं अरोचयः हिन्वानः मानुषीः अपः ॥ ७ ॥ अयुक्त सूरः एतशं पवमानः मनौ अधि अंतरिक्षेण यातवे ॥ ८ ॥ उत त्याः हरितः दश सूरः अयुक्त यातवे इंदुः इंद्रः इति ब्रुवन् ॥ ९ ॥ परि इतः वायवे सुतं गिरः इंद्राय मत्सरं अर्व्यः वारेषु सिंचत ॥ १० ॥ ॥ ३१ ॥ पवमान विदाः रयिं अस्मभ्यं सोम दुस्तरं यः दुःऽनशः वनुष्यता ॥ ११ ॥ अभि अर्ष सहस्रिणं रयिं गोऽमंतं अश्विनं अभि वाजं उत श्रवः ॥ १२ ॥ सोमः देवः न सूर्यः अद्रिऽभिः पवते सुतः दधानः कलशे रसं ॥ १३ ॥ एते धामानि आर्या शुक्राः ऋतस्य धारया वाजं गोऽमंतं अक्षरन् ॥ १४ ॥ सुताः इंद्राय वज्रिणे सो-मासः दधिऽआशिरः पवित्रं अति अक्षरन् ॥ १५ ॥ ३२ ॥ प्र सोम मधुमत्ऽतमः राये अर्ष पवित्रे आ मदः यः देवऽवीतमः ॥ १६ ॥ तं ईं मृजंति आयवः हरिं नदीषु वाजिनं इंदुं इंद्राय मत्सरं ॥ १७ ॥ आ पवस्व हिरण्यऽवत् अश्वऽवत् सोम वीरऽवत् वाजं गोऽमंतं आ भर ॥ १८ ॥ परि वाजे न वाजऽयुं अर्व्यः वारेषु सिंचत इंद्राय मधुमत्ऽतमं ॥ १९ ॥ कविं मृजंति मर्ज्यं धीभिः विप्राः अवस्यवः वृषा कनिक्रत् अर्षति ॥ २० ॥ ३३ ॥ वृषणं धीभिः अप्ऽतुरं सोमं ऋतस्य धारया मती विप्राः सं अस्वरन् ॥ २१ ॥ पवस्व देव आ-युषक् इंद्रं गच्छतु ते मदः वायुं आ रोह धर्मणा ॥ २२ ॥ पवमान नि तोशसे रयिं सोम श्रवाय्यं प्रियः समुद्रं आ विश ॥ २३ ॥ अपऽघ्न् पवसे मृधः ऋतुऽवित् सोम मत्सरः नुदस्व अदेवऽयुं जनं ॥ २४ ॥

पवमानाः असृक्षत सोमाः शुक्रासः इंदवः अभि विश्वानि काव्या॥२५॥३४॥ पवमानासः आशवः शुभ्राः असृग्रं इंदवः घ्नंतः विश्वाः अप द्विषः॥२६॥ पवमानाः दिवः परि अंतरिक्षात् असृक्षत पृथिव्याः अधि सानवि॥२७॥ पुनानः सोम धारया इंदो विश्वाः अप स्रिधः जहि रक्षाँसि सुऽक्रतो॰॥२८॥ अपऽघ्नन् सोम रक्षसः अभि अर्ष कनिक्रदत् द्युऽमंतं शुष्मं उत्ऽतमं॥२९॥ अस्मे वसूनि धारय सोम दिव्यानि पार्थिवा इंदो विश्वानि वार्या॥३०॥३५॥

॥६४॥ वृषा सोम द्युऽमान् असि वृषा देव वृषऽव्रतः वृषा धर्माणि दधिषे॥१॥ वृष्णः ते वृष्ण्यं शवः वृषा वनं वृषा मदः सत्यं वृषन् वृषा इत् असि॥२॥ अश्वः न चक्रदः वृषा सं गाः इंदो सं अर्वतः वि नः राये दुरः वृधि॥३॥ असृक्षत प्र वाजिनः गव्या सोमासः अश्वऽया शुक्रासः वीरऽया आशवः॥४॥ शुंभमानाः ऋतयुऽभिः मृज्यमानाः गभस्त्योः पवंते वारे अव्यये॥५॥३६॥ ते विश्वा दाशुषे वसु सोमाः दिव्यानि पार्थिवा पवंतां आ अंतरिक्ष्या॥६॥ पवमानस्य विश्वऽवित् प्र ते सर्गाः असृक्षत सूर्यस्यऽइव न रश्मयः॥७॥ केतुं कृण्वन् दिवः परि विश्वा रूपा अभि अर्षसि समुद्रः सोम पिन्वसे॥८॥ हिन्वानः वाचं इष्यसि पवमान विऽधर्मणि अक्रान् देवः न सूर्यः॥९॥ इंदुः पविष्ट चेतनः प्रियः कवीनां मती सृजत् अश्वं रथीःऽइव॥१०॥३७॥ ऊर्मिः यः ते पविऽचे आ देवऽअवीः परिऽअक्षरत् सीदन् ऋतस्य योनिं आ॥११॥ सः नः अर्ष पविऽचे आ मदः यः देवऽवीतमः इंदो इंद्राय पीतये॥१२॥ इषे पवस्व धारया मृज्यमानः मनीषिऽभिः इंदो

रुचा अभि गाः इहि ॥१३॥ पुनानः वरिवः कृधि ऊर्जं जनाय गिर्वणः हरे सृजानः आऽशिरे॥१४॥ पुनानः देवऽवीतये इंद्रस्य याहि निःऽकृतं द्युतानः वाजिऽभिः यतः॥१५॥३८॥ प्र हिन्वानासः इंदवः अच्छ समुद्रं आशवः धिया जूताः असृक्षत ॥१६॥ मर्मृजानासः आयवः वृथा समुद्रं इंदवः अग्मन् ऋतस्य योनिं आ॥१७॥ परि नः याहि अस्मऽयुः विश्वा वसूनि ओजसा पाहि नः शर्म वीरऽवत् ॥१८॥ मिमाति वह्निः एतशः पदं युजानः ऋक्वऽभिः प्र यत् समुद्रे आऽहितः॥१९॥ आ यत् योनिं हिरण्ययं आशुः ऋतस्य सीदति जहाति अप्रऽचेतसः ॥२०॥३९॥ अभि वेनाः अनूषत इयक्षंति प्रऽचेतसः मज्जंति अविऽचेतसः॥२१॥ इंद्राय इंदो मरुत्वते पवस्व मधुमत्ऽतमः ऋतस्य योनिं आऽसदं॥२२॥ तं त्वा विप्राः वचःऽविदः परि कृण्वंति वेधसः सं त्वा मृजंति आयवः॥२३॥ रसं ते मित्रः अर्यमा पिबंति वरुणः कवे पवमानस्य मरुतः॥२४॥ त्वं सोम विपःऽचितं पुनानः वाचं इष्यसि इंदो सहस्रऽभर्णसं ॥२५॥४०॥ उतो सहस्रऽभर्णसं वाचं सोम मखस्युवं पुनानः इंदो आ भर ॥२६॥ पुनानः इंदो एषां पुरुऽहूत जनानां प्रियः समुद्रं आ विश ॥२७॥ दविद्युतत्या रुचा परिऽस्तोभंत्या कृपा सोमाः शुक्राः गोऽआशिरः॥२८॥ हिन्वानः हेतृऽभिः यतः आ वाजं वाजी अक्रमीत् सीदंतः वनुषः यथा ॥२९॥ ऋधक् सोम स्वस्तये संऽजग्मानः दिवः कविः पवस्व सूर्यः दृशे॥३०॥४१॥१॥

॥६५॥ हिन्वंति सूरे उस्रयः स्वसारः जामयः पतिं महां इंदुं महीयुवः ॥१॥ पवमान रुचाऽरुचा देवः देवेभ्यः परि विश्वा

वसूनि आ विश ॥२॥ आ पवमान सुऽस्तुतिं वृष्टिं देवेभ्यः दुवः इषे पवस्व संऽयतं॥३॥ वृषा हि असि भानुना द्युऽमंतं त्वा हवामहे पवमान सुऽआध्यः॥४॥ आ पवस्व सुऽवीर्यं मंदमानः सुऽआयुध इहो सु इंदो आ गहि॥५॥१॥ यत् अत्ऽभिः परिऽसिच्यसे मृज्यमानः गभस्त्योः दुणा सधऽस्थं अश्नुषे॥६॥ प्र सोमाय व्यश्वऽवत् पवमानाय गायत महे सहस्रऽचक्षसे॥७॥ यस्य वर्णं मधुऽश्चुतं हरिं हिन्वंति अद्रिऽभिः इंदुं इंद्राय पीतये॥८॥ तस्य ते वाजिनः वयं विश्वा धनानि जिग्युषः सखिऽत्वं आ वृणीमहे॥९॥ वृषा पवस्व धारया मरुत्वते च मत्सरः विश्वा दधानः ओजसा ॥१०॥२॥ तं त्वा धर्तारं ओण्योः पवमान स्वःऽदृशं हिन्वे वाजेषु वाजिनं॥११॥ अया चित्तः विपा अनया हरिः पवस्व धारया युजं वाजेषु चोदय॥१२॥ आ नः इंदो महीं इषं पवस्व विश्वऽदर्शतः अस्मभ्यं सोम गातुऽवित्॥१३॥ आ कलशाः अनूषत इंदो धाराभिः ओजसा आ इंद्रस्य पीतये विश॥१४॥ यस्य ते मद्यं रसं तीव्रं दुहंति अद्रिऽभिः सः पवस्व अभिमातिऽहा॥१५॥३॥ राजा मेधाभिः ईयते पवमानः मनौ अधि अंतरिक्षेण यातवे॥१६॥ आ नः इंदो शतऽग्विनं गवां पोषं सुऽअश्व्यं वह भगत्तिं ऊतये ॥१७॥ आ नः सोम सहः जुवः रूपं न वर्चसे भर सुस्वानः देवऽवीतये॥१८॥ अर्ष सोम द्युमत्ऽतमः अभि द्रोणानि रोरुवत् सीदन् श्येनः न योनिं आ॥१९॥ अप्साः इंद्राय वायवे वरुणाय मरुत्ऽभ्यः सोमः अर्षति विष्णवे॥२०॥४॥ इषे तोकाय नः दधत् अस्मभ्यं सोम विश्वतः आ पवस्व सहस्रिणं॥२१॥ ये सोमासः परःऽवति ये अर्वाऽवति सुन्विरे ये वा अदः शर्यणाऽवति॥२२॥ ये आर्जीकेषु कृत्वऽसु ये मध्ये पस्त्यानां ये वा जनेषु पंचऽसु॥२३॥

ते नः वृष्टिं दिवः परि पवंतां आ सुऽवीर्यं सुवानाः देवासः इंदवः ॥२४॥ पवंते हर्यतः हरिः गृणानः जमत्ऽअग्निना हिन्वानः गोः अधि त्वचि॥२५॥५॥ प्र शुक्रासः वयःऽजुवः हिन्वानासः न सप्तयः श्रीणानाः अप्ऽसु मृंजत॥२६॥ तं त्वा सुतेषु आऽभुवः हिन्विरे देवऽतातये सः पवस्व अनया रुचा॥२७॥ आ ते दक्षं मयःऽभुवं वहिं अद्य वृणीमहे पांतं आ पुरुऽस्पृहं॥२८॥ आ मंद्रं आ वरेण्यं आ विप्रं आ मनीषिणं पांतं आ पुरुऽस्पृहं॥२९॥ आ रयिं आ सुऽचेतुनं आ सुऽक्रतो॰ तनूषु आ पांतं आ पुरुऽस्पृहं॥३०॥६॥

॥६६॥ पवस्व विश्वऽचर्षणे अभि विश्वानि काव्या सखा सखिऽभ्यः ईड्यः॥१॥ ताभ्यां विश्वस्य राजसि ये पवमान धामनी प्रतीची सोम तस्थतुः॥२॥ परि धामानि यानि ते त्वं सोम असि विश्वतः पवमान ऋतुऽभिः कवे॥३॥ पवस्व जनयन् इषः अभि विश्वानि वार्या सखा सखिऽभ्यः ऊतये॥४॥ तव शुक्रासः अर्चयः दिवः पृष्ठे वि तन्वते पवित्रं सोम धामऽभिः॥५॥७॥ तव इमे सप्त सिंधवः प्रऽशिषं सोम सिस्रते तुभ्यं धावंति धेनवः॥६॥ प्र सोम याहि धारया सुतः इंद्राय मत्सरः दधानः अक्षिति श्रवः॥७॥ सं ऊं त्वा धीभिः अस्वरन् हिन्वतीः सप्त जामयः विप्रं आजा विवस्वतः॥८॥ मृजंति त्वा सं अग्रुवः अव्ये जीरौ अधि स्वनि रेभः यत् अज्यसे वने॥९॥ पवमानस्य ते कवे वाजिन् सर्गाः असृक्षत अर्वंतः न श्रवस्यवः॥१०॥८॥ अच्छ कोशं मधुऽश्चुतं असृग्रं वारे अव्यये अवावशंत धीतयः॥११॥ अच्छ समुद्रं इंदवः अस्तं गावः न धेनवः अग्मन् ऋतस्य योनिं आ॥१२॥ प्र नः इंदो महे रणे

आपः अर्षंति सिंधवः यत् गोभिः वासयिष्यसे ॥ १३ ॥ अस्य ते सख्ये वयं इयक्षंतः त्वाऽऊतयः इंदो सखिऽत्वं उश्मसि ॥ १४ ॥ आ पवस्व गोऽइष्टये महे सोम नृऽचक्षसे आ इंद्रस्य जठरे विश ॥ १५ ॥ ९ ॥ महान् असि सोम ज्येष्ठः उग्राणां इंदो ओजिष्ठः युध्वा सन् शश्वत् जिगेथ ॥ १६ ॥ यः उग्रेभ्यः चित् ओजीयान् शूरेभ्यः चित् शूरऽतरः भूरिऽदाभ्यः चित् महीयान् ॥ १७ ॥ त्वं सोम सूरः आ इषः तोकस्य साता तनूनां वृणीमहे सख्याय वृणीमहे युज्याय ॥ १८ ॥ अग्ने आयूंषि पवसे आ सुव ऊर्जं इषं च नः आरे बाधस्व दुच्छुनां ॥ १९ ॥ अग्निः ऋषिः पवमानः पांचऽजन्यः पुरःऽहितः तं ईमहे महाऽगयं ॥ २० ॥ १० ॥ अग्ने पवस्व सुऽअपाः अस्मे वर्चः सुऽवीर्यं दधत् रयिं मयि पोषं ॥ २१ ॥ पवमानः अति स्रिधः अभि अर्षति सुऽस्तुतिं सूरः न विश्वऽदर्शतः ॥ २२ ॥ सः मर्मृजानः आयुऽभिः प्रयस्वान् प्रयसे हितः इंदुः अत्यः विऽचक्षणः ॥ २३ ॥ पवमानः ऋतं बृहत् शुक्रं ज्योतिः अजीजनत् कृष्णा तमांसि जंघनत् ॥ २४ ॥ पवमानस्य जंघ्नतः हरेः चंद्राः असृक्षत जीराः अजिरऽशोचिषः ॥ २५ ॥ ११ ॥ पवमानः रथिऽतमः शुभ्रेभिः शुभ्रशंऽतमः हरिऽचंद्रः मरुत्ऽगणः ॥ २६ ॥ पवमानः वि अश्ववत् रश्मिऽभिः वाजऽसातमः दधत् स्तोचे सुऽवीर्यं ॥ २७ ॥ प्र सुवानः इंदुः अक्षाः पविचं अति अव्ययं पुनानः इंदुः इंद्रं आ ॥ २८ ॥ एषः सोमः अधि त्वचि गवां क्रीळति अद्रिऽभिः इंद्रं मदाय जोहुवत् ॥ २९ ॥ यस्य ते द्युम्नऽवंत् पयः पवमान आऽभृतं दिवः तेन नः मृळ जीवसे ॥ ३० ॥ १२ ॥

॥ ६७ ॥ त्वं सोम असि धारयुः मंद्रः ओजिष्ठः अध्वरे पवस्व मंहयत्ऽरयिः ॥१॥ त्वं सुतः नृऽमादनः दधन्वान् मत्सरिन्ऽतमः इंद्राय सूरिः अंधसा ॥२॥ त्वं सुस्वानः अद्रिऽभिः अभि अर्ष कनिक्रदत् द्युऽमंतं शुष्मं उत्ऽतमं ॥३॥ इंदुः हिन्वानः अर्षति तिरः वाराणि अव्यया हरिः वाजं अचिक्रदत् ॥४॥ इंदो वि अव्यं अर्षसि वि श्रवांसि वि सौभगा वि वाजान् सोम गोऽमतः ॥५॥१३॥ आ नः इंदो शतऽग्विनं रयिं गोऽमंतं अश्विनं भर सोम सहस्रिणं ॥६॥ पवमानासः इंदवः तिरः पविचं आशवः इंद्रं यामेभिः आशत ॥७॥ ककुहः सोम्यः रसः इंदुः इंद्राय पूर्व्यः आयुः पवते आयवे ॥८॥ हिन्वंति सूरं उऽसयः पवमानं मधुऽश्चुतं अभि गिरा सं अस्वरन् ॥९॥ अविता नः अजऽअश्वः पूषा यामंनिऽयामनि आ भक्षत् कन्यासु नः ॥१०॥१४॥ अयं सोमः कपर्दिनं घृतं न पवते मधु आ भक्षत् कन्यासु नः ॥११॥ अयं ते आघृणे सुतः घृतं न पवते शुचिं आ भक्षत् कन्यासु नः ॥१२॥ वाचः जंतुः कवीनां पवस्व सोम धारया देवेषु रत्नऽधाः असि ॥१३॥ आ कलशेषु धावति शयेनः वर्मं वि गाहते अभि द्रोणा कनिक्रदत् ॥१४॥ परि प्र सोम ते रसः असर्जि कलशे सुतः श्येनः न तक्तः अर्षति ॥१५॥ ॥१५॥ पवस्व सोम मंदयन् इंद्राय मधुमत्ऽतमः ॥१६॥ असृग्रन् देवऽवीतये वाजऽयंतः रथाःऽइव ॥१७॥ ते सुतासः मदिन्ऽतमाः शुक्राः वायुं असृक्षत ॥१८॥ याव्णा तुन्नः अभिऽस्तुतः पविचं सोम गच्छसि दधत् स्तोचे सुऽवीर्यं ॥१९॥

एषः तुन्नः अभिऽस्तुतः पविचँ अति गाहते रक्षःऽहा वारँ अ-
व्ययँ॥२०॥१६॥ यत् अंति यत् च दूरकेभयं विंदति मां इह पव-
मान वि तत् जहि ॥२१॥ पवमानः सः अद्य नः पविचेण विचर्षणिः यः पोता सः पुनातु नः ॥२२॥ यत् ते पविचँ अर्चिषि अग्ने विऽततं अंतः आ ब्रह्म तेन पुनीहि नः ॥२३॥ यत् ते पविचँ अर्चिऽवत् अग्ने तेन पुनीहि नः ब्रह्मऽसवैः पुनीहि नः॥२४॥ उ-
भाभ्यां देव सवितः पविचेण सवेन च मां पुनीहि विश्वतः॥२५॥
॥१७॥ चिऽभिः त्वं देव सवितः वर्षिष्ठैः सोम धामऽभिः अग्ने दक्षैः पुनीहि नः॥२६॥ पुनंतु मां देवऽजनाः पुनंतु वसवः धिया विश्वे देवाः पुनीत मा जातऽवेदः पुनीहि मा॥२७॥ प्र प्यायस्व प्र स्यं-
दस्व सोम विश्वेभिः अंशुऽभिः देवेभ्यः उत्ऽतमं हविः॥२८॥ उप प्रियं पनिप्नतं युवानं आहुतिऽवृधं अगन्म बिभ्रतः नमः॥२९॥ अलार्यस्य परशुः ननाश तं आ पवस्व देव सोम आखुं चित् एव देव सोम॥३०॥ यः पावमानीः अधिऽएति ऋषिऽभिः संऽभृतं रसँ सर्वं सः पूतं अश्नाति स्वदितं मातरिश्वना॥३१॥ पा-
वमानीः यः अधिऽएति ऋषिऽभिः संऽभृतं रसं तस्मै सरस्वती दुहे क्षीरं सर्पिः मधु उदकं॥३२॥१८॥३॥

॥६८॥ प्र देवं अच्छ मधुऽमंतः इंदवः असिस्यदंत गावः आ न धेनवः बर्हिऽसदः वचनाऽवंतः ऊधऽभिः परिऽसुतँ उस्रियाः निःऽनिजं धिरे॥१॥ सः रोरुवत् अभि पूर्वीः अचिक्रदत् उप-
ऽआरुहः अथर्यन् स्वादते हरिः तिरः पविचँ परिऽयन् उरु ज्रयः नि शर्याणि दधते देवः आ वरँ॥२॥ वि यः ममे यम्या संऽयती॰ मदः साकंऽवृधा पयसा पिन्वत् अक्षिता मही अपारे रजसी

विऽवेविदत् अभिऽवर्जन् अक्षितं पाजः आ दद्रे॥३॥ सः मातरा विऽचरन् वाजयन् अपः प्र मेधिरः स्वधया पिन्वते पदं अप्सुः यवेन पिपिशे यतः नृऽभिः सं जामिऽभिः नसते रक्षते शिरः ॥४॥ सं दक्षेण मनसा जायते कविः ऋतस्य गर्भः निऽहितः यमा परः यूना ह संता प्रथमं वि जज्ञतुः गुहा हितं जनिम नेमं उत्ऽयंतं॥५॥१९॥ मंद्रस्य रूपं विविदुः मनीषिणः श्येनः यत् अंधः अभरत् पराऽवतः तं मर्जयंत सुऽवृधं नदीषु आ उशंतं अप्सुं परिऽयंतं ऊर्ग्मियं॥६॥ त्वां मृजंति दश योषणः सुतं सोमं ऋषिऽभिः मतिऽभिः धीतिऽभिः हितं अव्यः वारेभिः उत देवहूतिऽभिः नृऽभिः यतः वाजं आ दर्षि सातये॥७॥ परिऽप्रयंतं वय्यं सुऽसंसदं सोमं मनीषाः अभि अनूषत स्तुभः यः धारया मधुऽमान् ऊर्मिणा दिवः इयर्ति वाचं रयिषाट् अमर्त्यः॥८॥ अयं दिवः इयर्ति विश्वं आ रजः सोमः पुनानः कलशेषु सीदति अत्ऽभिः गोभिः मृज्यते अद्रिऽभिः सुतः पुनानः इंदुः वरिवः विदत् प्रियं॥९॥ एव नः सोम परिऽसिच्यमानः वयः दधत् चिचऽतं पवस्व अद्वेषे द्यावापृथिवी हुवेम देवाः धत्त रयिं अस्मे सुऽवीरं॥१०॥२०॥

॥६९॥ इषुः न धन्वन् प्रति धीयते मतिः वत्सः न मातुः उप सर्जि ऊधनि उरुधाराऽइव दुहे अग्रे आऽयती अस्य व्रतेषु अपि सोमः इष्यते॥१॥ उपो मतिः पृच्यते सिच्यते मधु मंद्रऽअजनी चोदते अंतः आसनि पवमानः संऽतनिः प्रत्नतांऽइव मधुऽमान् तृप्सः परि वारं अर्षति॥२॥ अव्ये वधूऽयुः पवते परि त्वचि अथ्रीते नप्ती अदितेः ऋतं यते हरिः अक्रान् यजतः संऽयतः मदः नृम्णा शिशानः महिषः न शोभते॥३॥ उक्षा मिमाति प्रति यंति धेनवः

देवस्य देवीः उप यंति नि.ऽकृतं अति अक्रमीत् अर्जुनं वारे अव्ययें अत्कें न निक्तं परि सोमः अव्यत ॥४॥ अमृक्तेन रुशंता वासंसा हरिः अमर्त्यः निःऽनिजानः परि व्यत दिवः पृष्ठं बर्हणा निःऽनिजे कृत उपऽस्तरणं चम्वोः नभस्मयें ॥५॥२१॥ सूर्यस्यऽइव रश्मयः द्रवयित्नवः मत्सरासः प्रऽसुपः साकं ईरते तंतुं ततं परि सर्गासः आशवः न इंद्रात् ऋते पवते धाम किं चन ॥६॥ सिंधोःऽइव प्रवणे निम्ने आशवः वृषऽच्युताः मदासः गातुं आशत शं नः निऽवेशे द्विऽपदे चतुःऽपदे अस्मे वाजाः सोम तिष्ठंतु कृष्टयः ॥७॥ आ नः पवस्व वसुऽमत् हिरण्यऽवत् अश्वऽवत् गोऽमत् यवऽमत् सुऽवीर्यें यूयं हि सोम पितरः मम स्थन दिवः मूर्धानः प्रऽस्थिताः वयःऽकृतः ॥८॥ एते सोमाः पवमानासः इंद्रे रथाःऽइव प्रययुः सातिं अच्छ सुताः पविचें अति यंति अव्यें हित्वी वविं हरितः वृष्टिं अच्छ ॥९॥ इंदो इंद्राय बृहते पवस्व सुऽमृळीकः अनवद्यः रिशादाः भर चंद्राणि गृणते वसूनि देवैः द्यावापृथिवी प्र अवतं नः ॥१०॥२२॥

॥७०॥ चिः अस्मै सप्त धेनवः दुदुह्रे सत्यां आऽशिरें पूर्व्ये विऽओमनि चत्वारि अन्या भुवनानि निःऽनिजे चारूणि चक्रे यत् ऋतैः अवर्धत ॥१॥ सः भिक्षमाणः अमृतस्य चारुणः उभे द्यावा काव्येन वि शश्रथे तेजिष्ठाः अपः मंहना परि व्यत यदि देवस्य श्रवसा सदः विदुः ॥२॥ ते अस्य संतु केतवः अमृत्यवः अदाभ्यासः जनुषी उभे अनु येभिः नृम्णा च देव्या च पुनते आत् इत् राजानं मननाः अगृभ्णत ॥३॥ सः मृज्यमानः दशऽभिः सुकर्मेऽभिः प्र मध्यमासु मातृषु प्रऽसे सचा व्रतानि पानः अमृतस्य

चारुणः उभे नृऽचक्षाः अनु पश्यते विशौ ॥४॥ सः मर्मृजानः इंद्रियाय धायसे आ उभे अंतः रोदसी हर्षते हितः वृषा शुष्मेण बाधते वि दुःऽमतीः आ ऽदेदिशानः शर्यहाऽइव शुरुधः ॥५॥ ॥२३॥ सः मातरा न ददृशानः उस्रियः नानदत् एति मरुताँऽइव स्वनः जानन् ऋतं प्रथमं यत् स्वःऽनरं प्रऽशस्तये कं अवृणीत सुऽऋतुः ॥६॥ रुवतिं भीमः वृषभः तविष्यया शृंगे शिशानः हरिणी विऽचक्षणः आ योनिं सोमः सुऽकृतं नि सीदति गव्ययी त्वक् भवति निःऽनिक् अव्ययी ॥७॥ शुचिः पुनानः तन्वं अरेपसं अव्ये हरिः नि अधाविष्ट मानवि जुष्टः मित्राय वरुणाय वायवे चिऽधातु मधु क्रियते सुकर्मऽभिः ॥८॥ पवस्व सोम देवऽवीतये वृषा इंद्रस्य हार्दि सोमऽधानं आ विश पुरा नः बाधात् दुःऽइता अति पारय क्षेचऽवित् हि दिशः आह विऽपृच्छते ॥९॥ हितः न सप्तिः अभि वाजं अर्ष इंद्रस्य इंदो जठरं आ पवस्व नावा न सिंधुं अति पर्षि विद्वान् पूरः न युध्यन् अव नः निदः स्पः० ॥१०॥२४॥

॥७१॥ आ दक्षिणा सृज्यते शुष्मी आऽसदं वेति दुहः रक्षसः पाति जागृविः हरिः ओपशं कृणुते नभः पयः उपऽस्तिरे चम्वोः ब्रह्म निःऽनिजे ॥१॥ प्र कृष्टिहाऽइव शूषः एति रोरुवत् असुर्यं वर्णं नि रिणीते अस्य तं जहाति वव्रिं पितुः एति निःऽकृतं उपऽप्रुतं कृणुते निःऽनिजे तना ॥२॥ अद्रिऽभिः सुतः पवते गभस्त्योः वृषऽयते नभसा वेपते मती सः मोदते नसते साधते गिरा नेनिक्ते अपऽसु यजते परीमणि ॥३॥ परि द्युक्षं सहसः पर्वतऽवृधं मध्वः सिंचंति हर्म्यस्य सक्षणिं आ यस्मिन् गावः सुहुतऽअदः

ऊधनि मूर्धन् श्रीणंति अयियं वरीमऽभिः ॥४॥ सं ईं रथं न भुरिजोः अहेषत दश स्वसारः अदितेः उपऽस्थे आ जिगात् उप जयति गोः अपीच्यं पदं यत् अस्य मतुथाः अजीजनन् ॥५॥२५॥ श्येनः न योनिं सदनं धिया कृतं हिरण्ययं आऽसदं देवः आ ईषति आ ईं रिणंति बर्हिषि प्रियं गिरा अश्वः न देवान् अपि एति यज्ञियः ॥६॥ परा विऽअक्तः अरुषः दिवः कविः वृषा चिऽपृष्ठः अनविष्ट गाः अभि सहस्रऽनीतिः यतिः परा ऽयतिः रेभः न पूर्वीः उषसः वि राजति ॥७॥ त्वेषं रूपं कृणुते वर्णः अस्य सः यत्र अशयत् संऽऋता सेधति स्रिधः अप्साः याति स्वधया दैव्यं जनं सं सुऽस्तुती नसते सं गोऽअयया ॥८॥ उक्षाऽईव यूथा परिऽयन् अरावीत् अधि त्विषीः अधित सूर्यस्य दिव्यः सुऽपर्णः अव चक्षत क्षां सोमः परि क्रतुना पश्यते जाः ॥९॥२६॥

॥ ७२ ॥ हरिं मृजंति अरुषः न युज्यते सं धेनुऽभिः कलशे सोमः अज्यते उत् वाचं ईरयति हिन्वते मती पुरुऽस्तुतस्य कति चित् परिऽप्रियः ॥१॥ साकं वदंति बहवः मनीषिणः इंद्रस्य सोमं जठरे यत् आऽदुहुः यदि मृजंति सुऽगभस्तयः नरः सऽनीळाभिः दशऽभिः काम्यं मधु ॥२॥ अरममाणः अति एति गाः अभि सूर्यस्य प्रियं दुहितुः तिरः रवं अनु अस्मै जोषं अभरत् विनंऽगृसः सं ह्रयीभिः स्वसृऽभिः क्षेति जामिऽभिः ॥३॥ नृऽधूतः अद्रिऽसुतः बर्हिषि प्रियः पतिः गवां प्रऽदिवः इंदुः ऋत्वियः पुरंधिऽवान् मनुषः यज्ञऽसाधनः शुचिः धिया पवते सोमः इंद्र ते ॥४॥ नृबाहुऽभ्यां चोदितः धारया सुतः अनुऽस्वधं पवते सोमः इंद्र ते आ अप्राः क्रतून् सं अजैः अध्वरे मतीः वेः न दुऽसत् चम्वोः आ अ-

सदत् हरिः॥५॥२७॥ अंप्सुं दुहंन्ति स्तनयंन्तं अक्षितं कविं कवयः अपसः मनीषिणः सं इंगावः मतयः यंन्ति संऽयतः ऋतस्य योनां सदने पुनःऽभुवः॥६॥ नाभा पृथिव्याः धरुणः महः दिवः अपां ऊर्मौ सिंधुषु अंतः उक्षितः इंद्रस्य वज्रः वृषभः विभुऽवसुः सोमः हृदे पवते चारु मत्सरः॥७॥ सः तु पवस्व परि पार्थिवं रजः स्तोचे शिक्षन् आऽधून्वते च सुऽक्रतो° मा नः निः भाक् वसुनः सदनऽस्पृशः रयिं पिशंगं बहुलं वसीमहि॥८॥ आ तु नः इंदो शतऽदातु अप्स्यं सहस्रंऽदातु पशुऽमत् हिरण्यऽवत् उप मास्व बृहतीः रेवतीः इषः अधि स्तोचस्य पवमान नः गहि॥९॥२८॥

॥७३॥ सप्तं दुप्सस्य धमंतः सं अस्वरन् ऋतस्य योनां सं अरंत नाभयः चीन् सः मूर्धः असुरः चक्रे आऽरभे सत्यस्य नावः सुऽकृतं अपीपरन्॥१॥ सम्यक् सम्यंचः महिषाः अहेषत सिंधोः ऊर्मौ अधि वेनाः अवीविपन् मधोः धाराभिः जनयंतः अर्कं इत् प्रियां इंद्रस्य तन्वं अवीवृधन्॥२॥ पविचंऽवंतः परि वाचं आसते पिता एषां प्रत्नः अभि रक्षति व्रतं महः समुद्रं वरुणः तिरः दधे धीराः इत् शेकुः धरुणेषु आऽरभे॥३॥ सहस्रंऽधारे अवते सं अस्वरन् दिवः नाकें मधुऽजिह्वाः असश्चतः अस्य स्पशः न नि मिषंति भूर्णयः पदेऽपदे पाशिनः संति सेतवः॥४॥ पितुः मातुः अधि आ ये संऽअस्वरन् ऋचा शोचंतः संऽदहंतः अव्रतान् इंद्रंऽद्विष्टां अप धमंति मायया त्वचं असिक्नीं भूमनः दिवः परि॥५॥ ॥२९॥ प्रत्नान् मानान् अधि आ ये संऽअस्वरन् श्लोकंऽयंचासः रभसस्य मंतवः अप अनक्षासः बधिराः अहासत ऋतस्य पंथां न तरंति दुःऽकृतः॥६॥ सहस्रंऽधारे विऽततंते पविचे आ वाचं पु-

नंति कवयः मनीषिणः रुद्रासः एषां इषिरासः अदुहः स्पशः सु-ऽअंचः सुऽदृशः नृऽचक्षसः ॥७॥ ऋतस्य गोपाः न दभाय सु-ऽक्रतुः चीसः पविचा हृदि अंतः आ दधे विद्वान् सः विश्वा भुवं-ना अभि पश्यति अवं अजुष्टान् विध्यति कर्ते अव्रतान् ॥८॥ ऋतस्य तंतुः विऽततः पविचे आ जिह्वायाः अग्रे वरुणस्य मा-यया धीराः चित् तत् संऽइनक्षंतः आशत अवं कर्तं अवं पदाति अप्रंऽभुः ॥९॥३०॥

॥७४॥ शिप्रुः न जातः अवं चक्रदत् वनें स्वः यत् वाजी अरुषः सिषासति दिवः रेतसा सचते पयःऽवृधा तं ईमहे सुऽमती शर्मं स-ऽप्रथः ॥१॥ दिवः यः स्कंभः धरुणः सुऽआततः आऽपूर्णः अंप्सुः परिऽएति विश्वतः सः इमे मही रोदसी यक्षत् आऽवृता सं-ऽईचीने॰ दाधार् सं इषः कविः ॥२॥ महि प्सरः सुऽकृतं सोम्यं मधु उर्वी गव्यूतिः अदितेः ऋतं यते ईशे यः वृष्टेः इतः उस्रियः वृषा अपां नेता यः इतःऽऊतिः ऋग्मियः ॥३॥ आत्मन्ऽवत् नभः दुह्यते घृतं पयः ऋतस्य नाभिः अमृतं वि जायते संऽईचीनाः सु-ऽदानवः प्रीणंति तं नरः हितं अवं मेहंति पेरवः ॥४॥ अरावीत् अप्सुः सचमानः ऊर्मिणा देवऽअव्यं मनुषे पिन्वति त्वचं दधाति गर्भं अदितेः उपऽस्थे आ येन तोकं च तनयं च धामहे ॥५॥३१॥ स-हस्रंऽधारे अवं ताः असश्चतः तृतीये संतु रजसि प्रजाऽवतीः च-तस्रः नाभः निऽहिताः अवः दिवः हविःभरंति अमृतं घृतऽश्चुतः ॥६॥ श्वेतं रूपं कृणुते यत् सिषासति सोमः मीढ्वान् असुरः वेद् भू-मनः धिया शमीं सचते सः ईं अभि प्रऽवत् दिवः कबंधं अवं दर्षत् उद्रिणं ॥७॥ अध श्वेतं कलशं गोभिः अक्तं कार्ष्मन् आ वाजी अक्र-

मीत ससऽवान आ हिन्विरे मनसा देवऽयंतः कक्षीवते शतऽहिमाय गोनाँ ॥ ८ ॥ अतऽभिः सोम पपृचानस्य ते रसः अव्यः वारं वि पवमान धावति सः मृज्यमानः कविऽभिः मदिन्ऽतम स्वदस्व इंद्राय पवमान पीतये ॥ ९ ॥ ३२ ॥

॥ ७५ ॥ अभि प्रियाणि पवते चनःऽहितः नामानि यह्वः अधि येषु वर्धते आ सूर्यस्य बृहतः बृहन् अधि रथं विष्वंचं अरुहत् विऽचक्षणः ॥ १ ॥ ऋतस्य जिह्वा पवते मधु प्रियं वक्ता पतिः धियः अस्याः अदाभ्यः दधाति पुचः पिचोः अपीच्यं नाम तृतीयं अधि रोचने दिवः ॥ २ ॥ अव द्युतानः कलशान् अचिक्रदत् नृऽभिः येमानः कोशे आ हिरण्यये अभि द्रोणा ऋतस्य दोहनाः अनूषत अधि चिऽपृष्ठः उषसः वि राजति ॥ ३ ॥ अद्रिऽभिः सुतः मतिऽभिः चनःऽहितः प्रऽरोचयन् रोदसी मातरा शुचिः रोमाणि अव्या समया वि धावति मधोः धारा पिन्वमाना दिवेऽदिवे ॥ ४ ॥ परि सोम प्र धन्व स्वस्तये नृऽभिः पुनानः अभि वासय आऽशिरं ये ते मदाः आऽहनसः विऽहायसः तेभिः इंद्रं चोदय दातवे मघं ॥ ५ ॥ ३३ ॥ २ ॥

॥ ७६ ॥ धर्ता दिवः पवते कृत्व्यः रसः दक्षः देवानां अनुऽमाद्यः नृऽभिः हरिः सृजानः अत्यः न सत्वऽभिः वृथा पाजांसि कृणुते नदीषु आ ॥ १ ॥ शूरः न धत्ते आयुधा गभस्त्योः स्वः॰ सिसासन् रथिरः गोऽइष्टिषु इंद्रस्य शुष्मं ईरयन् अपस्युऽभिः इंदुः हिन्वानः अज्यते मनीषिऽभिः ॥ २ ॥ इंद्रस्य सोम पवमानः ऊर्मिणा तविष्यमाणः जठरेषु आ विश प्र नः पिन्व विऽद्युत अभाऽइव रोदसी

धिया न वाजान् उप मासि शश्वतः ॥३॥ विश्वस्य राजा पवते स्वःऽदृशः ऋतस्य धीतिं ऋषिषाट् अवीवशत् यः सूर्यस्य असिरेण मृज्यते पिता मतीनां असमष्टऽकाव्यः ॥४॥ वृषाऽइव यूथा परि कोशं अर्षसि अपां उपऽस्थे वृषभः कनिक्रदत् सः इंद्राय पवसे मत्सरिन्ऽतमः यथा जेषाम संऽइथे त्वाऽऊतयः ॥५॥१॥

॥७७॥ एषः प्रकोशे मधुऽमान् अचिक्रदत् इंद्रस्य वज्रः वपुषः वपुःऽतरः अभि ईं ऋतस्य सुऽदुघाः घृतऽश्चुतः वाश्राः अर्षंति पयसाऽइव धेनवः ॥१॥ सः पूर्व्यः पवते यं दिवः परि श्येनः मथायत इषितः तिरः रजः सः मध्वः आ युवते वेविजानः इत् कृशानोः अस्तुः मनसा अह बिभ्युषा ॥२॥ ते नः पूर्वीसः उपरासः इंदवः महे वाजाय धन्वंतु गोऽमते ईक्षेण्यासः अह्यः न चारवः ब्रह्मऽब्रह्म ये जुजुषुः हविःऽहविः ॥३॥ अयं नः विद्वान् वनवत् वनुष्यतः इंदुः सचाचा मनसा पुरुऽस्तुतः इनस्य यः सदने गर्भं आऽदधे गवां उरुऽव्रजं अभि अर्षति व्रजं ॥४॥ चक्रिः दिवः पवते कृत्व्यः रसः महान् अदब्धः वरुणः हुरुक् यते असावि मित्रः वृजनेषु यज्ञियः अत्यः न यूथे वृषऽयुः कनिक्रदत् ॥५॥२॥

॥७८॥ प्र राजा वाचं जनयन् असिस्यदत् अपः वसानः अभि गाः इयक्षति गृभ्णाति रिप्रं अविः अस्य तान्वा शुद्धः देवानां उप याति निःऽकृतं ॥१॥ इंद्राय सोम परि सिच्यसे नृऽभिः नृऽचक्षाः ऊर्मिः कविः अज्यसे वने पूर्वीः हि ते सुतयः संति यातवे सहस्रं अश्वाः हरयः चमूऽसदः ॥२॥ समुद्रियाः अप्सरसः मनीषिणं आसीनाः अंतः अभि सोमं अक्षरन् ताः ईं हिन्वंति हर्म्यस्य सक्ष-

णिं याचते सुम्नं पवमानं अक्षितं ॥३॥ गोऽजित् नः सोमः रथ-ऽजित् हिरण्यऽजित् स्वःऽजित् अप्ऽजित् पवते सहस्रऽजित् यं देवासः चक्रिरे पीतये मदं स्वादिष्ठं द्रप्सं अरुणं मयःऽभुवं ॥४॥ एतानि सोम पवमानः अस्मऽयुः सत्यानि कृण्वन् द्रविणानि अर्षसि जहि शत्रुं अंतिके दूरके च यः उर्वीं गव्यूतिं अभयं च नः कृधि ॥५॥३॥

॥७९॥ अचोदसः नः धन्वंतु इंदवः प्र सुवानासः बृहतऽदिवेषु हरयः वि च नशन् नः इषः अरातयः अर्यः नशंत सनिषंत नः धियः ॥१॥ प्र नः धन्वंतु इंदवः मदऽच्युतः धना वा येभिः अर्वतः जुनीमसि तिरः मर्तस्य कस्य चित् परिऽह्रुतिं वयं धनानि विश्वधा भरेमहि ॥२॥ उत स्वस्याः अरात्याः अरिः हि सः उत अन्यस्याः अरात्याः वृकः हि सः धन्वन् न तृष्णा सं अरीत तान् अभि सोम जहि पवमान दुःऽआध्यः ॥३॥ दिवि ते नाभा परमः यः आऽददे पृथिव्याः ते रुरुहुः सानवि क्षिपः अद्रयः त्वा बप्सति गोः अधि त्वचि अप्ऽसु त्वा हस्तैः दुदुहुः मनीषिणः ॥४॥ एव ते इंदो सुऽभ्वं सुऽपेशसं रसं तुंजंति प्रथमाः अभिऽश्रियः निदंऽनिदं पवमान नि तारिषः आविः ते शुष्मः भवतु प्रियः मदः ॥५॥४॥

॥८०॥ सोमस्य धारा पवते नृऽचक्षसः ऋतेन देवान् हवते दिवः परि बृहस्पतेः रवथेन वि दिद्युते समुद्रासः न सवनानि विव्यचुः ॥१॥ यं त्वा वाजिन अध्याः अभि अनूषत अयःऽहतं योनिं आ रोहसि द्युऽमान मघोनां आयुः प्रऽतिरन् महि श्रवः इंद्राय सोम पवसे वृषा मदः ॥२॥ आ इंद्रस्य कुक्षा पवते मदिनऽतमः

ऊर्जं वसानः अवसे सुऽमंगलः प्रत्यङ् सः विश्वा भुवना अभि पप्रथे क्रीळन् हरिः अत्यः स्यंदते वृषा ॥३॥ तं त्वा देवेभ्यः मधुमत्-ऽतमं नरः सहस्रऽधारं दुहते दश क्षिपः नृऽभिः सोम प्रऽच्युतः यावऽभिः सुतः विश्वान् देवान् आ पवस्व सहस्रऽजित् ॥४॥ तं त्वा हस्तिनः मधुऽमंतं अद्रिऽभिः दुहंति अप्ऽसु वृषभं दश क्षिपः इंद्रं सोम मादयन् दैव्यं जनं सिंधोः ऽइव ऊर्मिः पवमानः अर्षसि ॥ ५ ॥ ५ ॥

॥८१॥ प्र सोमस्य पवमानस्य ऊर्मयः इंद्रस्य यंति जठरं सुऽपेशसः दक्षा यत् ईं उत ऽनीताः यशसा गवां दानाय शूरं उत ऽअमंदिषुः सुताः ॥१॥ अच्छ हि सोमः कलशान् असिस्यदत् अत्यः न वोळ्हा रघुऽवर्तनिः वृषा अथ देवानां उभयस्य जन्मनः विद्वान् अश्नोति अमुतः इतः च यत् ॥२॥ आ नः सोम पवमानः किरा वसु इंदो भव मघऽवा राधसः महः शिक्षा वयःऽधः वसवे सु चेतुना मा नः गयं आरे अस्मत् परा सिचः ॥३॥ आ नः पूषा पवमानः सुऽअतयः मिचः गच्छंतु वरुणः सऽजोषसः बृहस्पतिः मरुतः वायुः अश्विना त्वष्टा सविता सुऽयमा सरस्वती ॥४॥ उभे द्यावापृथिवी विश्वंऽइन्वे॰ अर्यमा देवः अदितिः विऽधाता भगः नृऽशंसः उरु अंतरिक्षं विश्वे देवाः पवमानं जुषंत ॥ ५ ॥ ६ ॥

॥८२॥ असावि सोमः अरुषः वृषा हरिः राजाऽइव दस्मः अभि गाः अचिक्रदत् पुनानः वारं परि एति अव्ययं श्येनः न योनिं घृतऽवंतं आऽसदं ॥१॥ कविः वेधस्या परि एषि माहिनं अत्यः न मृष्टः अभि वाजं अर्षसि अपऽसेधन् दुःऽइता सोम मृळय घृतं

वसानः परि यासि निःऽनिजं॥२॥ पर्जन्यः पिता महिषस्य पर्णिनः नाभा पृथिव्याः गिरिषु क्षयं दधे स्वसारः आपः अभिगाः उत अ-सरन् सं यावऽभिः नसते वीते अध्वरे॥३॥ जायाऽइव पत्यौ अधि शेव मंहसे पज्रायाः गर्भे शृणुहि ब्रवीमि ते अंतः वाणीषु प्र चर सु जीवसे अनिंद्यः वृजने सोम जागृहि॥४॥ यथा पूर्वेभ्यः शतऽसाः अमृध्रः सहस्रऽसाः परिऽअयाः वाजं इंदो एव पवस्व सुविताय नव्यसे तव व्रतं अनु आपः सचंते ॥ ५ ॥ ७ ॥

॥८३॥ पविचं ते विऽततं ब्रह्मणः पते प्रऽभुः गात्राणि परि एषि विश्वतः अतप्तऽतनूः न तत् आमः अश्नुते शृतासः इत् वहंतः तत् सं आशत॥१॥ तपोः पविचं विऽततं दिवः पदे शोचंतः अस्य तंतवः वि अस्थिरन् अवंति अस्य पवितारं आशवः दिवः पृष्ठं अधि तिष्ठंति चेतसा॥२॥ अरूरुचत् उषसः पृश्निः अग्रियः उक्षा बिभर्ति भुवनानि वाजऽयुः मायाऽविनः ममिरे अस्य मायया नृऽचक्षसः पितरः गर्भे आ दधुः॥३॥ गंधर्वः इत्था पदं अस्य रक्षति पाति देवानां जनिमानि अद्भुतः गृभ्णाति रिपुं निऽधया निधाऽपतिः सुकृतऽतमाः मधुनः भक्षं आशत॥४॥ हविः हविष्मः महि सद्म दैव्यं नभः वसानः परि यासि अध्वरं राजा पविचऽरथः वाजं आ अरुहः सहस्रऽभृष्टिः जयसि श्रवः बृहत् ॥ ५ ॥ ८ ॥

॥८४॥ पवस्व देवऽमादनः विऽचर्षणिः अप्साः इंद्राय वरुणाय वायवे कृधि नः अद्य वरिवः स्वस्तिऽमत् उरुऽक्षितौ गृणीहि दैव्यं जनं॥१॥ आ यः तस्थौ भुवनानि अमर्त्यः विश्वानि सोमः परि तानि अर्षति कृण्वन् संऽचृतं विऽचृतं अभिष्टये इंदुः

सिसक्ति उषसं न सूर्यः ॥२॥ आ यः गोभिः सृज्यते ओषधीषु आ देवानां सुम्ने इषयन् उपऽवसुः आ विऽद्युता पवते धारया सुतः इंद्रं सोमः मादयन् दैव्यं जनं ॥३॥ एषः स्यः सोमः पवते सहस्रऽजित् हिन्वानः वाचं इषिरां उषःऽबुधं इंदुः समुद्रं उत् इयर्ति वायुऽभिः आ इंद्रस्य हार्दि कलशेषु सीदति ॥४॥ अभि त्यं गावः पयसा पयःऽवृधं सोमं श्रीणंति मतिऽभिः स्वःऽविदं धनंऽजयः पवते कृत्व्यः रसः विप्रः कविः काव्येन स्वःऽचनाः ॥५॥९॥

॥८५॥ इंद्राय सोम सुऽसुतः परि स्रव अपं अमीवा भवतु रक्षसा सह मा ते रसस्य मत्सत द्वयाविनः द्रविणस्वंतः इह संतु इंदवः ॥१॥ अस्मान सऽमर्ये पवमान चोदय दक्षः देवानां असि हि प्रियः मदः जहि शत्रून अभि आ भंदनाऽयतः पिब इंद्र सोमं अव नः मृधः जहि ॥२॥ अदब्धः इंदो पवसे मदिन्ऽतमः आत्मा इंद्रस्य भवसि धासिः उत्ऽतमः अभि स्वरंति बहवः मनीषिणः राजानं अस्य भुवनस्य निंसते ॥३॥ सहस्रऽनीथः शतऽधारः अद्भुतः इंद्राय इंदुः पवते काम्यं मधु जयन् क्षेत्रं अभि अर्ष जयन् अपः उरुं नः गातुं कृणु सोम मीढ्वः ॥४॥ कनिक्रदत् कलशे गोभिः अज्यसे वि अव्ययं समया वारं अर्षसि मर्मृज्यमानः अत्यः न सानसिः इंद्रस्य सोम जठरे सं अक्षरः ॥५॥ स्वादुः पवस्व दिव्याय जन्मने स्वादुः इंद्राय सुहवीतुऽनाम्ने स्वादुः मित्राय वरुणाय वायवे बृहस्पतये मधुऽमान अदाभ्यः ॥६॥१०॥ अत्यं मृजंति कलशे दश क्षिपः प्र विप्राणां मतयः वाचः ईरते पवमानाः अभि अर्षंति सुऽस्तुतिं आ इंद्रं विशंति मदिरासः इंदवः ॥७॥ पवमानः अभि अर्ष सुऽवीर्यं उर्वीं गव्यूतिं महि शर्म सऽप्रथः माकिः नः अस्य परि-

ऽसूतिः ईशत इंदो जयेम त्वया धनेऽधनं॥८॥ अधि द्यां अस्थात् वृषभः विऽचक्षणः अरूरुचत् वि दिवः रोचना कविः राजा पविचे अति एति रोरुवत दिवः पीयूषं दुहते नृऽचक्षसः॥९॥ दिवः नाके मधुऽजिह्वाः असश्चतः वेनाः दुहंति उक्षणं गिरिऽस्थां अपऽसु दृप्सं ववृधानं समुद्रे आ सिंधोः ऊर्मा मधुऽमंतं पविचे आ॥१०॥ नाके सुऽपर्णं उपपप्तिऽवांसं गिरः वेनानां अकृपंत पूर्वीः शिशुं रिहंति मतयः पनिप्नतं हिरण्ययं शकुनं क्षामणि स्थां॥११॥ ऊर्ध्वः गंधर्वः अधि नाके अस्थात् विश्वा रूपा प्रतिऽचक्षाणः अस्य भानुः शुक्रेण शोचिषा वि अद्यौत् प्र अरूरुचत् रोदसी मातरा शुचिः॥ १२ ॥ ११ ॥ ४ ॥

॥८६॥ प्र ते आशवः पवमान धीऽजवः मदाः अर्षंति रघुजाःऽइव त्मना दिव्याः सुऽपर्णाः मधुऽमंतः इंदवः मदिनऽतमासः परि कोशं आसते॥१॥ प्र ते मदासः मदिरासः आशवः असृक्षत रथ्यासः यथा पृथक् धेनुः न वत्सं पयसा अभि वज्रिणं इंद्रं इंदवः मधुऽमंतः ऊर्मयः॥२॥ अत्यः न हियानः अभि वाजं अर्ष स्वःऽवित् कोशं दिवः अद्रिऽमातरं वृषा पविचे अधि सानौ अव्यये सोमः पुनानः इंद्रियाय धायसे॥३॥ प्र ते आश्विनीः पवमान धीऽजुवः दिव्याः असृग्रन् पयसा धरीमणि प्र अंतः ऋषयः स्थाविरीः असृक्षत येत्वा मृजंति ऋषिऽसान वेधसः॥४॥ विश्वा धामानि विश्वऽचक्षः ऋभ्वसः प्रऽभोः ते सतः परि यंति केतवः विऽआनशिः पवसे सोम धर्मेऽभिः पतिः विश्वस्य भुवनस्य राजसि॥५॥१२॥ उभयतः पवमानस्य रश्मयः ध्रुवस्य सतः परि यंति केतवः यदि पविचे अधि मृज्यते हरिः सत्ता नि योना कलशेषु सीदति॥६॥

यज्ञस्य केतुः पवते सुऽअध्वरः सोमः देवानाँ उप याति निःऽकृतं सहस्रऽधारः परि कोशँ अर्षति वृषा पवित्रँ अति एति रोरुवत् ॥७॥ राजा समुद्रं नद्यः वि गाहते अपां ऊर्मिं सचते सिंधुषु श्रितः अधि अस्थात् सानु पवमानः अव्ययं नाभा पृथिव्याः धरुणः महः दिवः ॥८॥ दिवः न सानु स्तनयन् अचिक्रदत् द्यौः च यस्य पृथिवी च धर्मऽभिः इंद्रस्य सख्यं पवते विऽवेविदत् सोमः पुनानः कलशेषु सीदति ॥९॥ ज्योतिः यज्ञस्य पवते मधु प्रियं पिता देवानाँ जनिता विभुऽवसुः दधाति रत्नँ स्वधयोः अपीच्यँ मदिन्ऽतमः मत्सरः इंद्रियः रसः ॥१०॥१३॥ अभिऽक्रंदन् कलशँ वाजी अर्षति पतिः दिवः शतऽधारः विऽचक्षणः हरिः मित्रस्य सदनेषु सीदति मर्मृजानः अविऽभिः सिंधुऽभिः वृषा ॥११॥ अयं सिंधूनां पवमानः अर्षति अयं वाचः अग्रियः गोषु गच्छति अयं वाजस्य भजते महाऽधनं सुऽआयुधः सोतृऽभिः पूयते वृषा ॥१२॥ अयं मतऽवान् शकुनः यथा हितः अव्यं ससार पवमानः ऊर्मिणा तवं ऋत्वा रोदसी अंतरा कवे शुचिः धिया पवते सोमः इंद्र ते ॥१३॥ द्रापिं वसानः यजतः दिविऽस्पृशं अंतरिक्षऽप्राः भुवनेषु अर्पितः स्वः जज्ञानः नभसा अभि अक्रमीत् प्रत्नं अस्य पितरँ आ विवासति ॥१४॥ सः अस्य विशे महिं शर्म यच्छति यः अस्य धामं प्रथमं विऽआनशे पदं यत् अस्य परमे विऽओमनि अतः विश्वाः अभि सं याति संऽयतः ॥१५॥१४॥ प्रो अयासीत् इंदुः इंद्रस्य निःऽकृतं सखा सख्युः न प्र मिनाति संऽगिरँ मयैः ऽइव युवतिऽभिः सं अर्षति सोमः कलशे शतऽयाजा पथा ॥१६॥ प्र वः धियः मंदुऽयुवः विपन्युवः पनस्युवः संऽवसनेषु अक्रमुः सोमँ मनीषाः अभि अनूषत स्तुभः अभि धेनवः पयसा ईं अशिश्रयुः ॥१७॥ आ नः सोम

सꣳयतं पिप्युषीं इषं इंदो पवस्व पवमानः अस्मिधे या नः दोहते चिःअहन् असश्चुषी क्षुऽमत् वाजऽवत् मधुऽमत् सुऽवीर्यं॥१८॥ वृषा मतीनां पवते विऽचक्षणः सोमः अहः प्रऽतरीता उषसः दिवःक्राणा सिंधूनां कलशान् अवीवशत् इंद्रस्य हार्दि आऽविशन् मनीषिऽभिः॥१९॥ मनीषिऽभिः पवते पूर्व्यः कविः नृऽभिः यतः परि कोशान् अचिक्रदत् चितस्य नाम जनयन् मधु क्षरत् इंद्रस्य वायोः सख्याय कर्तवे॥२०॥१५॥ अयं पुनानः उषसः वि रोचयत् अयं सिंधुऽभ्यः अभवत् ऊं लोकऽकृत् अयं चिः सन्न दुदुहानः आऽशिरं सोमः हृदे पवते चारु मत्सरः॥२१॥ पवस्व सोम दिव्येषु धामऽसु सृजानः इंदो कलशे पवित्रे आ सीदन् इंद्रस्य जठरे कनिक्रदत् नृऽभिः यतः सूर्यं आ अरोहयः दिवि॥२२॥ अद्रिऽभिः सुतः पवसे पवित्रे आ इंदो इंद्रस्य जठरेषु आऽविशन् त्वं नृऽचक्षाः अभवः विऽचक्षण सोम गोत्रं अंगिरःऽभ्यः अवृणोः अपं॥२३॥ त्वां सोम पवमानं सुऽआध्यः अनु विप्रासः अमदन् अवस्यवः त्वां सुऽपर्णः आ अभरत् दिवः परि इंदो विश्वाभिः मतिऽभिः परिऽकृतं॥२४॥ अव्ये पुनानं परि वारे ऊर्मिणा हरिं नवंते अभि सप्त धेनवः अपां उपऽस्थे अधि आयवः कविं ऋतस्य योनां महिषाः अहेषत॥२५॥१६॥ इंदुः पुनानः अति गाहते मृधः विश्वानि कृण्वन् सुऽपथानि यज्यवे गाः कृण्वानः निःऽनिजं हर्यतः कविः अत्यः न क्रीळन् परि वारं अर्षति॥२६॥ असश्चतः शतऽधाराः अभिऽस्रियः हरिं नवंते अव ताः उदन्युवः क्षिपः मृजंति परि गोभिः आऽवृतं तृतीये पृष्ठे अधि रोचने दिवः॥२७॥ तवं इमाः प्रऽजाः दिव्यस्य रेतसः त्वं विश्वस्य भुवनस्य राजसि अथ इदं विश्वं पवमान ते वशे त्वं इंदो प्रथमः धामऽधाः असि॥२८॥

त्वं समुद्रः असि विश्वऽवित् कवे तवे इमाः पंच प्रऽदिशः विऽधर्मणि त्वं द्यां च पृथिवीं च अति जभिषे तव ज्योतींषि पवमान सूर्यः ॥२९॥ त्वं पवित्रे रजसः विऽधर्मणि देवेभ्यः सोम पवमान पूयसे त्वां उशिजः प्रथमाः अगृभ्णत तुभ्य इमा विश्वा भुवनानि येमिरे ॥३०॥१७॥ प्र एभिः एति अति वारं अव्ययं वृषा वनेषु अव चक्रदत् हरिः संधीतयः वावशानाः अनूषत शिप्रुं रिहंति मतयः पनिप्रतं ॥३१॥ सः सूर्यस्य रश्मिऽभिः परि व्यत तंतुं तन्वानः चिऽवृतं यथा विदे नयन् ऋतस्य प्रऽशिषः नवीयसीः पतिः जनीनां उप याति निःऽकृतं ॥३२॥ राजा सिंधूनां पवते पतिः दिवः ऋतस्य याति पथिऽभिः कनिक्रदत् सहस्रऽधारः परि सिच्यते हरिः पुनानः वाचं जनयन् उपऽवसुः ॥३३॥ पवमान महि अर्णः वि धावसि सूरः न चित्रः अव्ययानि पव्यया गभस्तिऽपूतः नृऽभिः अद्रिऽभिः सुतः महे वाजाय धन्याय धन्वसि ॥३४॥ इषे ऊर्जे पवमान अभि अर्षसि श्येनः न वंसु कलशेषु सीदसि इंद्राय मद्वा मद्यः मदः सुतः दिवः विष्टंभः उपऽमः विऽचक्षणः ॥३५॥ १८ ॥ सप्त स्वसारः अभि मातरः शिप्रुं नवं जज्ञानं जेन्यं विपःऽचितं अपां गंधर्वं दिव्यं नृऽचक्षसं सोमं विश्वस्य भुवनस्य राजसे ॥३६॥ ईशानः इमा भुवनानि वि ईयसे युजानः इंदो हरितः सुऽपर्णयः ताः ते क्षरंतु मधुऽमत् घृतं पयः तवं व्रते सोम तिष्ठंतु कृष्टयः ॥३७॥ त्वं नृऽचक्षाः असि सोम विश्वतः पवमान वृषभ ता वि धावसि सः नः पवस्व वसुऽमत् हिरण्यऽवत् वयं स्याम भुवनेषु जीवसे ॥३८॥ गोऽवित् पवस्व वसुऽवित् हिरण्यऽवित् रेतःऽधाः इंदो भुवनेषु अर्पितः त्वं सुऽवीरः असि सोम विश्वऽवित् तं त्वा विप्राः उप गिरा इमे आसते ॥३९॥ उत मध्वः ऊर्मिः वननाः अति स्थिपत् अपः वसा-

नः महिषः वि गाहते राजा पविचऽरथः वाजं आ अरुहत् सह-
स्रऽभृष्टिः जयति श्रवः बृहत् ॥४०॥१९॥ सः भंदनाः उत् इयर्ति
प्रजाऽवतीः विश्वऽआयुः विश्वाः सुऽभराः अहःऽदिवि ब्रह्म प्र-
जाऽवत् रयिं अश्वऽपस्त्यं पीतः इंदो इंद्रं अस्मभ्यं याचतात्॥४१॥
सः अग्ने अहां हरिः हर्यतः मदः प्र चेतसा चेतयते अनु द्युऽभिः द्वा
जना यातयन् अंतः ईयते नराशंसं च दैव्यं च धर्तरि॥४२॥ अंजते
वि अंजते सं अंजते क्रतुं रिहंति मधुना अभि अंजते सिंधोः उत्-
ऽस्वासे पतयंतं उक्षणं हिरण्यऽपावाः पशुं आसु गृभ्णते ॥४३॥
विपःऽचितें पवमानाय गायत महीं न धारां अति अंधः अर्षति
अहिः न जूर्णां अति सर्पति त्वचं अत्यः न क्रीळन् असरत् वृषा
हरिः॥४४॥ अग्नेऽगः राजा अपयः तविष्यते विऽमानः अहां भुव-
नेषु अर्पितः हरिः घृतऽस्नुः सुऽदृशीकः अर्णवः ज्योतिःऽरथः पवते
राये अोक्यः॥४५॥२०॥ असर्जि स्कंभः दिवः उत्ऽयतः मदः परि
चिऽधातुः भुवनानि अर्षति अंशुं रिहंति मतयः पनिप्नतं गिरा
यदि निःऽनिजं ऋग्मिणः ययुः॥४६॥ प्र ते धाराः अति अखानि
मेष्यः पुनानस्य संऽयतः यंति रंहयः यत् गोभिः इंदो चम्वोः सं-
ऽअज्यसे आ सुवानः सोम कलशेषु सीदसि॥४७॥ पवस्व सोम
क्रतुऽवित् नः उक्थ्यः अप्यः वारे परिधाव मधु प्रियं जहि विश्वान्
रक्षसः इंदो अचिण्णः बृहत् वदेम विदथे सुऽवीराः॥४८॥२१॥

॥८७॥ प्र तु द्रव परि कोशं नि सीद नृऽभिः पुनानः अभि वाजं
अर्ष अश्वं न त्वा वाजिनं मर्जयंतः अच्छ बर्हिः रशनाभिः नयंति
॥१॥ सुऽआयुधः पवते देवः इंदुः अशस्तिऽहा वृजनं रक्षमाणः पि-
ता देवानां जनिता सुऽदक्षः विष्टंभः दिवः धरुणः पृथिव्याः॥२॥

ऋषिः विप्रः पुरःऽएता जनानां ऋभुः धीरः उशना काव्येन सः चित् विवेद् निऽहितं यत् आसां अपीच्यं गुह्यं नाम गोनां॥३॥ एषः स्यः ते मधुऽमान् इंद्र सोमः वृषा वृष्णे परि पवित्रे अक्षाः सहस्रऽसाः शतऽसाः भूरिऽदावा शश्वतऽतमं बर्हिः आ वाजी अस्थात्॥४॥ एते सोमाः अभि गव्या सहस्रा महे वाजाय अमृतत्वाय श्रवांसि पवित्रेभिः पवमानाः असृक्षत श्रवस्यवः न पृतनाजः अत्याः॥५॥२२॥ परि हि स्म पुरुऽहूतः जनानां विश्वा असरत् भोजना पूयमानः अर्ष आ भर शयेनऽभृत प्रयांसि रयिं तुंजानः अभि वाजं अर्ष॥६॥ एषः सुवानः परि सोमः पवित्रे सर्गः न सृष्टः अदधावत् अवी तिग्मे शिशानः महिषः न शृंगे गाः गव्यन् अभि पूरः न सत्वा॥७॥ एषा आ ययौ परमात् अंतः अद्रेः कूऽचित् सतीः ऊर्वगाः विवेद् दिवः न विऽद्युत् स्तनयंती अभ्रेः सोमस्य ते पवते इंद्र धारा॥८॥ उत स्म राशिं परि यासि गोनां इंद्रेण सोम सऽरथं पुनानः पूर्वीः इषः बृहतीः जीरऽदानो॰ शिक्ष शचीऽवः तव ताः उपऽस्तुत ॥ ९ ॥ २३ ॥

॥८८॥ अयं सोमः इंद्र तुभ्यं सुन्वे तुभ्यं पवते त्वं अस्य पाहि त्वं हयं चकृषे त्वं ववृषे इंदुं मदाय युज्याय सोमं॥१॥ सः ईं रथः न भुरिषाट् अयोजि महः पुरूणि सातये वसूनि आत ईं विश्वा नहुष्याणि जाता स्वःऽसाता वने ऊर्ध्वा नवंत ॥२॥ वायुः न यः नियुत्वान् इष्टऽयामा नासत्याऽइव हवे आ शंऽभविष्ठः विश्वऽवारः द्रविणोदाःऽइंव त्मन पूषाऽइंव धीऽजवनः असि सोम॥३॥ इंद्रः न यः महा कर्माणि चक्रिः हंता वृत्राणां असि सोम पूःऽभित् पेडः न हि त्वं अहिंऽनामानां हंता विश्वस्य असि सोम दस्योः॥४॥ अग्निः न

यः वने आ सृज्यमानः वृथा पाजांसि कृणुते नदीषु जनः न युध्वा महतः उपब्दिः इयर्ति सोमः पवमानः ऊर्मिं ॥५॥ एते सोमाः अति वाराणि अव्या दिव्याः न कोशासः अभ्रऽवर्षाः वृथा समुद्रं सिंधवः न नीचीः सुतासः अभि कलशान् असृग्रन् ॥६॥ शुष्मी शर्धीः न मारुतं पवस्व अनभिऽशस्ता दिव्या यथा विट् आपः न मक्षुसुऽमतिः भवनः सहस्रऽअप्साः पृतनाषाट् न यज्ञः ॥७॥ राज्ञः नु ते वरुणस्य व्रतानि बृहत् गभीरं तव सोम धाम शुचिः त्वं असि प्रियः न मित्रः दक्षाय्यः अर्यमाऽइव असि सोम ॥ ८ ॥ २४ ॥

॥८९॥ प्रो 'स्यः वहिः पथ्याभिः अस्यान् दिवः न वृष्टिः पवमानः अक्षाः 'सहस्रऽधारः असदत् नि असे 'मातुः उपऽस्थे वने आ च सोमः ॥१॥ राजा सिंधूनां अवसिष्ट वासः छृतस्य नावं आ अरुहत् रजिष्ठां अपऽसु द्रप्सः ववृधे श्येनऽजूतः दुहे ईं पिता दुहे ईं पितुः जां ॥२॥ सिंहं नसंत मध्वः अयासं हरिं अरुषं दिवः अस्य पतिं पूरः युतऽसु प्रथमः पृच्छते गाः अस्य चक्षसा परि पाति उक्षा ॥३॥ मधुऽपृष्ठं घोरं अयासं अश्वं रथे युंजंति उरुऽचक्रे छृष्वं स्वसारः ईं जामयः मर्जयंति सऽनाभयः वाजिनं ऊर्जयंति ॥४॥ चतस्रः ईं घृतऽदुहः सचंते समाने अंतः धरुणे निऽसत्ताः ताः ईं अर्षंति नमसा पुनानाः ताः ईं विश्वतः परि संति पूर्वीः ॥५॥ विष्टंभः दिवः धरुणः पृथिव्याः विश्वाः उत क्षितयः हस्ते अस्य असत् ते उत्सः गृणते नियुत्वान् मध्वः अंशुः पवते इंद्रियाय ॥६॥ वन्वन् अवातः अभि देवऽवीतिं इंद्राय सोम वृत्रऽहा पवस्व शग्धि महः पुरुऽचंद्रस्य रायः सुऽवीर्यस्य पतयः स्याम ॥ ७ ॥ २५ ॥

॥ ९० ॥ प्र हि॒न्वा॒नः ज॒नि॒ता रोद॑स्योः रथः॑ न वाज॑ं स॒नि॒ष्य॒न् अ॒या॒सी॒त॒ इंद्रं॑ गच्छ॑न् आयु॑धा सं॑ऽशिशानः॒ विश्वा॑ वसु॑ हस्त॑योः आ॒ऽद॒धा॒नः॥१॥ अ॒भि चि॒ऽपृ॒ष्ठं वृ॒ष॒णं व॒यः॒ऽधां आं॒गू॒षाणा॑ं अ॒वा॒व॒शं॒त॒ वा॒णीः॒ वना॑ वसा॑नः वरु॑णः॒ न सिंधू॑न् वि र॒त्न॒ऽधाः॒ द॒यते॒ वार्या॑णि॥२॥ पू॒रु॒ऽया॒मः सर्व॑ऽ वीरः॒ सहा॑वान् जेता॑ प॒व॒स्व॒ स॒नि॒ता॒ धना॑नि॒ ति॒ग्म॒ऽआ॒यु॒धः॒ क्षि॒प्र॒ऽध॒न्वा॒ स॒मत्ऽसु॑ अषा॑ळ्हः स॒ह्मान् पृत॑नासु॒ शत्रू॑न्॥३॥ उ॒रु॒ऽगा॒व्यू॒तिः॒ अ॒भ॒या॒नि॒ कृ॒ण्व॒न् सं॒ऽई॒ची॒ने॑ आ प॒व॒स्व॒ पु॒रं॒ऽधी॑ अ॒पः॒ सिसा॑सन् उ॒षसः॒ स्वः॑ गाः॒ सं चि॒त्र॒ऽदः॒ म॒हः॒ अ॒स्मभ्यं॑ वाजा॑न्॥४॥ मत्सि॑ सो॒म॒ वरु॑णं॒ मत्सि॑ मि॒त्रं मत्सि॑ इंद्रं॑ इंदो॑ पव॒मा॒न॒ विष्णुं॑ मत्सि॑ शर्धः॑ मारु॑तं॒ मत्सि॑ दे॒वान् मत्सि॑ म॒हां इंद्रं॑ इंदो॑ मदा॑य॥५॥ एव॑ राजा॑ऽइव क्रतु॑ऽमान् अमे॑न विश्वा॑ घनिघ्नत् दुः॑ऽइ॒ता प॒व॒स्व॒ इंदो॑ मु॑ऽउ॒क्थाय॑ वच॑से वयः॑धाः॒ यू॒यं पा॒त॒ स्व॒स्ति॒ऽभिः॒ सदा॑ नः॥ ६॥ २६॥ ३॥

॥९१॥ अ॒स॒र्जि॒ वक्वा॑ रथ्ये॑ यथा॑ आ॒जौ धि॒या म॒नो॒ता॒ प्र॒थ॒मः म॒नी॒षी दश॑ स्वसा॑रः अधि॑ सा॒नौ अव्ये॑ अजं॑ति॒ वह्नि॑ं सद॑नानि॒ अच्छ॑॥१॥ वी॒ती॒ जन॑स्य दि॒व्यस्य॑ क॒व्यैः॒ अधि॑ सु॒वा॒नः॒ न॒हु॒षे॒भिः॒ इंदुः॑ प्र यः॒ नृ॒ऽभिः॒ अ॒मृ॒तः॒ मर्त्ये॑भिः॒ म॒र्मृ॒जा॒नः॒ अवि॑ऽभिः॒ गो॒ऽभिः॒ अ॒त॒ऽभिः॒॥२॥ वृषा॑ वृ॒ष्णे रो॑रुवत् अं॒शुः॒ अ॒स्मै॒ पव॑मानः॒ रु॒श॒त् ई॒र्ते॒ पयः॑ गोः॒ स॒हस्र॑ं ऋ॒क्वा॑ प॒थि॒ऽभिः॒ व॒चः॒ऽवित् अ॒ध्व॒स्म॒ऽभिः॒ सूरः॒ अर्ण॑वं॒ वि या॑ति॥३॥ रु॒ज द्रु॒ह्वा॑ चि॒त् र॒क्ष॒सः॒ सदां॑सि पुना॑नः॒ इंदो॑ऽ ऊ॒र्णु॒हि॒ वि वाजा॑न् वृ॒ष्ण॒ उ॒परि॑ष्टात् तु॒ज॒ता व॒धेन॑ ये अंति॑ दू॒रात् उ॒प॒ऽना॒यं ए॒षां॥४॥ सः प्र॒त्न॒ऽवत् न॒व्य॒से॒ वि॒श्व॒ऽवा॒र॒ सु॒ऽउ॒क्थाय॑ प॒थः॒ कृ॒णु॒हि॒ प्राच॑ः ये दुः॑ऽसहा॑सः व॒नु॒षा॒ बृ॒हंतः॑ तान् ते॒ अ॒श्या॒म॒

पुरुऽकृत पुरुऽक्षो॰॥५॥एव पुनानःअपःस्वःगाःअसभ्यंतोका तनयानि भूरि शं नःक्षेचं उरुज्योतींषि सोम ज्योक्नःसूर्यं दृशये रिरीहि ॥ ६ ॥ १ ॥

॥९२॥ परिसुवानःहरिःअंप्सुःपविचे रथःनसर्जिसनये हियानःआपत्छ्लोकंइंद्रियं पूयमानःप्रतिदेवान्अजुषत प्रयःऽभिः ॥१॥ अच्छंनृऽचक्षाःअसरत् पविचे नामदधानःकविःअस्य योनौ सीदन् होताऽइव सदने चमूषु उपईअग्मन् ऋषयःसप्त विप्राः॥२॥ प्र सुऽमेधाः गातुऽवित् विश्वऽदेवः सोमःपुनानः सदःएति नित्यं भुवत् विश्वेषु काव्येषु रंता अनु जनान् यतते पंच धीरः॥३॥ तवत्ये सोम पवमान निण्ये विश्वे देवाः चयःएकादशासःदश स्वधाभिःअधिसानौ अव्ये मृजंति त्वानद्यःसप्त यह्वीः ॥४॥ तत् नु सत्यं पवमानस्य अस्तु यब विश्वे कारवःसंऽनसंत ज्योतिः यत् अहे अकृणोत् ऊं लोकं प्र आवत् मनुं दस्यवे कः अभीकं॥५॥ परिसद्मऽइव पशुऽमंति होता राजा न सत्यःसंऽइतीः इयानः सोमःपुनानः कलशान् अयासीत् सीदत् मृगः न महिषः वनेषु ॥ ६ ॥ २ ॥

॥९३॥ साकंऽउक्षःमर्जयंत स्वसारःदशधीरस्य धीतयःधनुचीः हरिःपरिअद्रवत् जाःसूर्यस्य द्रोणं ननक्षे अत्यःन वाजी॥१॥ सं मातृऽभिःन शिशुःवावशानःवृषा दधन्वे पुरुऽवारःअतऽभिः मर्यःन योषां अभि निःऽकृतं यन् सं गच्छते कलशे उस्रियाभिः ॥२॥ उत प्र पिप्ये ऊधःअघ्यायाः इंदुः धाराभिः सचते सुऽमेधाः मूर्धानं गावः पयसा चमूषु अभि श्रीणंति वसुऽभिः न निक्कैः

॥३॥ सः नः देवेभिः पवमानः इंदो रयिं अश्विनं वावशानः रयि-रायताँ उशती पुरंधिः अस्मध्यक् आ दावने वसूनां ॥४॥ नु नः रयिं उप मास्व नृवंतं पुनानः वाताप्यं विश्वऽचंद्रं प्र वंदितुः इंदो तारि आयुः प्रातः मक्षु धियाऽवसुः जगम्यात् ॥५॥३॥

॥९४॥ अधि यत् अस्मिन् वाजिनिऽइव शुभः स्पर्धंते धियः सूर्ये न विशः अपः वृणानः पवते कविऽयन् व्रजं न पशुऽवर्धनाय मन्म ॥१॥ द्विता विऽऊर्वन् अमृतस्य धाम स्वःऽविदे भुवनानि प्रथंत धियः पिन्वानाः स्वसरे न गावः ऋतऽयंतीः अभि वावश्रे इंदुं ॥२॥ परि यत् कविः काव्या भरते शूरः न रथः भुवनानि विश्वा देवेषु यशः मर्ताय भूषन् दक्षाय रायः पुरुऽभूषु नव्यः ॥३॥ श्रिये जातः श्रिये आ निः इयाय श्रियं वयः जरितृऽभ्यः दधाति श्रियं वसानाः अमृतऽत्वं आयन् भवंति सत्या समऽइथा मितऽद्रौ ॥४॥ इषं ऊर्जं अभि अर्ष अश्वं गां उरु ज्योतिः कृणुहि मत्सि देवान् विश्वानि हि सुऽसहा तानि तुभ्यं पवमान बाधसे सोम शत्रून् ॥५॥४॥

॥९५॥ कनिक्रंति हरिः आ सृज्यमानः सीदन् वनस्य जठरे पुनानः नृऽभिः यतः कृणुते निःऽनिजं गाः अतः मतीः जनयत स्वधाभिः ॥१॥ हरिः सृजानः पथ्यां ऋतस्य इयर्ति वाचं अरिताऽइव नावं देवः देवानां गुह्यानि नामाविः कृणोति बर्हिषि प्रऽवाचे ॥२॥ अपांऽइव इत् ऊर्मयः ततुराणाः प्र मनीषाः ईरते सोमं अच्छ नमस्यंतीः उप च यंति सं च आ च विशंति उशतीः उशंतं ॥३॥ तं मर्मृजानं महिषं न सानौ अंशुं दुहंति उक्षणं गि-

रिऽस्थां तं वावशानं मतयः सचंते चितः बिभर्ति वरुणं समुद्रे ॥४॥ इष्यन् वाचं उपवक्ताऽइव होतुः पुनानः इंदो' वि स्य मनीषां इंद्रः च यत् क्षयथः सौभगाय सुऽवीर्यस्य पतयः स्याम ॥५॥५॥

॥९६॥ प्र सेनाऽनीः शूरः अग्रे रथानां गव्यन् एति हर्षते अस्य सेना भद्रान् कृण्वन् इंद्रऽहवान् सखिऽभ्यः आ सोमः वस्त्रा रभसानि दत्ते॥१॥ सं अस्य हरिं हरयः मृजंति अप्सुऽहयैः अनिऽशितं नमःऽभिः आ तिष्ठति रथं इंद्रस्य सखा विद्वान् एन सुऽमतिं याति अच्छ॥२॥ सः नः देव देवऽतांते पवस्व महे सोम परसे इंद्रऽपानः कृण्वन् अपः वर्षयन् द्यां उत इमां उरोः आ नः वरिवस्य पुनानः॥३॥ अजीतये अहतये पवस्व स्वस्तये सर्वऽतातये बृहते तत् उशंति विश्वे इमे सखायः तत् अहं वश्मि पवमान सोम॥४॥ सोमः पवते जनिता मतीनां जनिता दिवः जनिता पृथिव्याः जनिता अग्नेः जनिता सूर्यस्य जनिता इंद्रस्य जनिता उत विष्णोः ॥५॥६॥ ब्रह्मा देवानां पदऽवीः कवीनां ऋषिः विप्राणां महिषः मृगाणां श्येनः गृध्राणां स्वऽधितिः वनानां सोमः पवित्रं अति एति रेभन्॥६॥ प्र अवीविपत् वाचः ऊर्मिं न सिंधुः गिरः सोमः पवमानः मनीषाः अंतः पश्यन् वृजना इमा अवराणि आ तिष्ठति वृषभः गोषु जानन्॥७॥ सः मत्सरः पृतऽसु वन्वन् अवातः सहस्रऽरेताः अभि वाजं अर्ष इंद्राय इंदो' पवमानः मनीषी अंशोः ऊर्मिं ईरय गाः इषण्यन्॥८॥ परि प्रियः कलशे देवऽवातः इंद्राय सोमः रण्यः मदाय सहस्रऽधारः शतऽवाजः इंदुः वाजी न सप्तिः समना जिगाति॥९॥ सः पूर्व्यः वसुऽवित् जायमानः मृजानः अप्ऽसु दुदुहानः अद्रौ अभिश्रस्तिऽपाः भुवनस्य राजा विदत् गातुं

ब्रह्मणे पूयमानः॥१०॥७॥ त्वया हि नः पितरः सोम पूर्वे कर्माणि चक्रुः पवमान धीराः वन्वन् अवातः परिऽधीन् अप ऊर्णु वीरेभिः अश्वैः मघऽवा भव नः॥११॥ यथा अपवथाः मनवे वयःऽधाः अमिचऽहा वरिवःऽवित् हविष्मान् एव पवस्व द्रविणं दधानः इंद्रे सं तिष्ठ जनयं आयुधानि॥१२॥ पवस्व सोम मधुऽमान् ऋतऽवा अपः वसानः अधि सानौ अव्ये अव द्रोणानि घृतऽवंति सीद् मदिन्ऽतमः मत्सरः इंद्रऽपानः॥१३॥ वृष्टिं दिवः शतऽधारः पवस्व सहस्रऽसाः वाजऽयुः देवऽवीतौ सं सिंधुऽभिः कलशे वाजी वशानः सं उस्रियाभिः प्रऽतिरन् नः आयुः॥१४॥ एषः स्यः सोमः मतिऽभिः पुनानः अत्यः न वाजी तरति इत् अरातीः पयः न दुग्धं अदितेः इषिरं उरुऽइव गातुः सुऽयमः न वोळ्हा॥१५॥८॥ सुऽआयुधः सोतृऽभिः पूयमानः अभि अर्ष गुह्यं चारु नाम अभि वाजे सप्तिःऽइव श्रवस्या अभि वायुं अभि गाः देव सोम॥१६॥ शिप्रुं जज्ञानं हर्यतं मृजंति पुंभंतिं वह्निं मरुतः गणेन कविः गीःऽभिः काव्येन कविः सन् सोमः पविऽत्रं अति एति रेभन्॥१७॥ ऋषिऽमनाः यः ऋषिऽकृत् स्वःऽसाः सहस्रऽनीथः पदऽवीः कवीनां तृतीयं धाम महिषः सिसासन् सोमः विऽराजं अनु राजति स्तुप्॥१८॥ चमूऽसत् श्येनः शकुनः विऽभृत्वा गोऽविंदुः द्रप्सः आयुधानि बिभ्रत् अपां ऊर्मिं सचमानः समुद्रं तुरीयं धाम महिषः विवक्ति॥१९॥ मयैः न पुभ्रः तन्वं मृजानः अत्यः न सृत्वा सनये धनानां वृषाऽइव यूथा परि कोशं अर्षन् कनिक्रदत् चम्वोः आ विवेश॥२०॥९॥ पवस्व इंदो पवमानः महःऽभिः कनिक्रदत् परि वाराणि अर्ष क्रीळन् चम्वोः आ विश पूयमानः इंद्रं ते रसः मदिरः ममत्तु॥२१॥ प्र अस्य धाराः बृहतीः असृग्रन् अक्तः गोभिः

कलशान् आ विवेश सामं कृण्वन् सामन्यः विपःऽचित् क्रंदन् एति अभि सख्युः न जामिं ॥२२॥ अपऽघ्नन् एषि पवमान शत्रून् प्रियां न जारः अभिऽगीतः इंदुः सीदन् वनेषु शकुनः न पत्वा सोमः पुनानः कलशेषु सत्ता ॥२३॥ आ ते रुचः पवमानस्य सोम योषाऽइव यंति सुऽदुघाः सुऽधाराः हरिः आऽनीतः पुरुऽवारः अप्ऽसु अचिक्रदत् कलशे देवऽयूनां ॥२४॥१०॥५॥

॥९७॥ अस्य प्रेषा हेमना पूयमानः देवः देवेभिः सं अपृक्त रसैं सुतः पवित्रं परि एति रेभन् मिताऽइव सद्म पशुऽमंति होता ॥१॥ भद्रा वस्त्रा समन्या वसानः महान् कविः निऽवचनानि शंसन् आ वच्यस्व चम्वोः पूयमानः विऽचक्षणः जागृविः देवऽवीतौ ॥२॥ सं ऊं प्रियः मृज्यते सानौ अव्ये यशःऽतरः यशसां क्षैतः असे अभि स्वर धन्व पूयमानः यूयं पात स्वस्तिभिः सदा नः ॥३॥ प्र गायत अभि अर्चाम देवान् सोमं हिनोत महते धनाय स्वादुः पवाते अति वारं अव्यं आ सीदाति कलशं देवऽयुः नः ॥४॥ इंदुः देवानां उप सख्यं आऽयन् सहस्रऽधारः पवते मदाय नृऽभिः स्तवानः अनु धामं पूर्वं अगन् इंद्रं महते सौभगाय ॥५॥११॥ स्तोत्रे राये हरिः अर्ष पुनानः इंद्रं मदः गच्छतु ते भरांय देवैः याहि सऽरथं राधः अच्छ यूयं पात स्वस्तिभिः सदा नः ॥६॥ प्र काव्यं उशनाऽइव ब्रुवाणः देवः देवानां जनिम विवक्ति महिऽव्रतः शुचिऽबंधुः पावकः पदा वराहः अभि एति रेभन् ॥७॥ प्र हंसासः नृपलं मन्युं अच्छ अमात अस्तं वृषऽगणाः अयासुः आंगूष्यं पवं-

मानं सखायः दुःऽमर्षं साकं प्र वदंति वाणं ॥८॥ सः रंहते उरुऽगायस्य जूतिं वृथा क्रीळंतं मिमते न गावः परीणसं कृणुते तिग्मऽशृंगः दिवा हरिः ददृशे नक्तं ऋज्रः ॥९॥ इंदुः वाजी पवते गोऽन्योघाः इंद्रे सोमः सहः इन्वन् मदाय हंति रक्षः बाधते परि अरातीः वरिवः कृण्वन् वृजनस्य राजा ॥१०॥१२॥ अध धारया मध्वा पृचानः तिरः रोम पवते अद्रिऽदुग्धः इंदुः इंद्रस्य सख्यं जुषाणः देवः देवस्य मत्सरः मदाय ॥११॥ अभि प्रियाणि पवते पुनानः देवः देवान् स्वेन रसेन पृंचन् इंदुः धर्माणि ऋतुऽथा वसानः दश क्षिपः अव्यत सानौ अव्ये ॥१२॥ वृषा शोणः अभिऽक्रनिक्रदत् गाः नदयन् एति पृथिवीं उत द्यां इंद्रस्यऽइव वमुः आ पृण्वे आजौ प्रऽचेतयन् अर्षति वाचं आ इमां ॥१३॥ रसाय्यः पयसा पिन्वमानः ईरयन् एषि मधुऽमंतं अंशुं पवमानः संऽतनिं एषि कृण्वन् इंद्राय सोम परिऽसिच्यमानः ॥१४॥ एव पवस्व मदिरः मदाय उद्ऽयाभस्य नमयन् वधऽस्नैः परि वर्णी भरमाणः रुशंतं गव्युः नः अर्ष परि सोम सिक्तः ॥१५॥१३॥ जुष्टी नः इंदो सुऽपथा सुऽगानि उरौ पवस्व वरिवांसि कृण्वन् घनाऽइव विष्वक् दुःऽइतानि विऽघ्नन् अधि स्नुना धन्व सानौ अव्ये ॥१६॥ वृष्टिं नः अर्ष दिव्यां जिगात्नुं इळाऽवतीं शंऽगयीं जीरऽदानुं स्तुकाऽइव वीता धन्व विऽचिन्वन् बंधून् इमान् अवरान् इंदो वायून् ॥१७॥ यंथिं न वि स्य यथितं पुनानः ऋजुं च गातुं वृजिनं च सोम अत्यः न ऋदः हरिः आ मृजानः मर्यः देव धन्व पस्त्यऽवान् ॥१८॥ जुष्टः मदाय देवऽतातेइंदो परि स्नुना धन्व सानौ अव्ये सहस्रऽधारः सुरभिः अदब्धः परि स्रव वाजऽसातौ नृऽसह्ये ॥१९॥ अरुषमानः ये अरुषाः अयुक्ताः अत्यासः न ससृजानासः आजौ

एते पुक्तासः धन्वंति सोमाः देवासः तान् उप यात पिबध्यै ॥२०॥१४॥ एव नः इंदो अभि देवऽवीतिं परि स्रव नभः अर्णः चमूषु सोमः अस्मभ्यं काम्यं बृहंतं रयिं ददातु वीरऽवंतं उग्रं ॥२१॥ तक्षंत यदि मनसः वेनंतः वाक् ज्येष्ठस्य वा धर्मणि क्षोः अनीके आत ईं आयन् वरं आ वावशानाः जुष्टं पतिं कलशे गावः इंदुं ॥२२॥ प्र दानुऽदः दिव्यः दानुऽपिन्वः ऋतं ऋतायं पवते सुऽमेधाः धर्मा भुवत् वृजन्यस्य राजा प्र रश्मिऽभिः दशऽभिः भारि भूम ॥२३॥ पविंऽभिः पवमानः नृऽचक्षाः राजा देवानां उत मर्त्यानां द्विता भुवत् रयिऽपतिः रयीणां ऋतं भरत् सुऽभृतं चारु इंदुः ॥२४॥ अवीनऽइव श्रवसे सातिं अच्छ इंद्रस्य वायोः अभि वीतिं अर्ष सः नः सहस्रा बृहतीः इषः दाः भव सोम द्रविणःऽवित् पुनानः ॥२५॥१५॥ देवऽअग्र्यः नः परिऽसिच्यमानाः क्षयं सुऽवीरं धन्वंतु सोमाः आऽयज्यवः सुऽमतिं विश्वऽवाराः होतारः न दिविऽयजः मंद्रऽतमाः ॥२६॥ एव देव देवऽतांते पवस्व महे सोम पर्सते देवऽपानः महः चित् हि ससि हिताः सऽमर्ये कृधि सुऽस्थाने॰ रोदसी॰ पुनानः ॥२७॥ अश्वः न क्रदः वृषऽभिः युजानः सिंहः न भीमः मनसः जवीयान् अर्वाचीनैः पथिऽभिः ये रजिष्ठाः आ पवस्व सौमनसं नः इंदो॰ ॥२८॥ शतं धाराः देवऽजाताः असृग्रन् सहस्रं एनाः कवयः मृजंति इंदो॰ सनिचं दिवः आ पवस्व पुरःऽएता असि महतः धनस्य ॥२९॥ दिवः न सर्गाः असृग्रं अह्नां राजा न मित्रं प्र मिनाति धीरः पितुः न पुत्रः क्रतुऽभिः यतानः आ पवस्व विशे अस्यै अजीतिं ॥३०॥१६॥ प्र ते धाराः मधुऽमतीः असृग्रन् वारान् यत् पूतः अत्यऽएषि अव्यान् पवमान पवसे धाम गोनां जज्ञानः सूर्यं अपिन्वः अर्कैः ॥३१॥ कनिक्रदत् अनु पंथां

ऋतस्य पुत्रः विभासि अमृतस्य धामं सः इंद्राय पवसे मत्सरऽवान् हिन्वानः वाचं मतिऽभिः कवीनां॥३२॥ दिव्यः सुऽपर्णः अव चक्षि सोम पिन्वन् धाराः कर्मणा देवऽवीतौ आ इंदो विश कलशं सोमऽधानं क्रंदन इहि सूर्यस्य उप रश्मिं॥३३॥ तिस्रः वाचः ईरयति प्र वह्निः ऋतस्य धीतिं ब्रह्मणः मनीषां गावः यंति गोऽपतिं पृच्छमानाः सोमं यंति मतयः वावशानाः॥३४॥ सोमं गावः धेनवः वावशानाः सोमं विप्राः मतिऽभिः पृच्छमानाः सोमः सुतः पूयते अज्यमानः सोमे अर्काः चिऽस्तुभः सं नवंते ॥३५॥१७॥ एव नः सोम परिऽसिच्यमानः आ पवस्व पूयमानः स्वस्ति इंद्रं आ विश बृहता रवेण वर्धय वाचं जनय पुरंऽधिं॥३६॥ आ जागृविः विप्रः ऋता मतीनां सोमः पुनानः असदत् चमूषु सपंति यं मिथुनासः निऽकामाः अध्वर्यवः रथिरासः सुऽहस्ताः ॥३७॥ सः पुनानः उप सूरे न धातां आ उभे आप्राः रोदसी विसः आवः० प्रिया चित् यस्य प्रियसासः ऊती सः तु धनं कारिणे न प्र यंसत्॥३८॥ सः वर्धिता वर्धनः पूयमानः सोमः मीढ्वान् अभि नः ज्योतिषा आवीत् येन नः पूर्वे पितरः पदज्ञाः स्वःऽविदः अभि गाः अद्रिं उष्णन्॥३९॥ अक्रान् समुद्रः प्रथमे विऽधर्मन् जनयन् प्रऽजाः भुवनस्य राजा वृषा पविचे अधि सानौ अव्ये बृहत् सोमः ववृधे सुवानः इंदुः॥४०॥१८॥ महत् तत् सोमः महिषः चकार अपां यत् गर्भः अवृणीत देवान् अदधात् इंद्रे पवमानः ओजः अजनयत् सूर्ये ज्योतिः इंदुः॥४१॥ मत्सि वायुं इष्टये राधसे च मत्सि मित्रावरुणा पूयमानः मत्सि शर्धः मारुतं मत्सि देवान् मत्सि द्यावापृथिवी देव सोम॥४२॥ ऋजुः पवस्व वृजिनस्य हंता अप अमीवां बाधमानः मृधः च अभिऽश्रीणन् पयः पयसा अभि

गोनाँ इंद्रस्य त्वं तव वयं सखायः॥४३॥ मध्वः सूदं पवस्व वस्वः उत्सं वीरं च नः आ पवस्व भगं च स्वदस्व इंद्राय पवमानः इंदो' रयिं च नः आ पवस्व समुद्रात्॥४४॥ सोमः सुतः धारया अत्यः न हित्वा सिंधुः न निम्नं अभि वाजी अक्षाः' आ योनिं वन्यं असदत् पुनानः सं इंदुः गोभिः असरत् सं अत्ऽभिः॥४५॥१९॥ एषः स्यः ते पवते इंद्र सोमः चमूषु धीरः उशते तवस्वान् स्वःऽ चक्षाः रथिरः सत्यऽ शुष्मः कामः न यः देवऽ यतां असर्जि॥४६॥ एषः प्रत्नेन व-यसा पुनानः तिरः वर्पांसि दुहितुः दधानः वसानः शर्म चिऽ वरूथं अपऽसु होताऽइव याति समनेषु रेभन्॥४७॥ नु नः त्वं रथिरः देव सोम परि स्रव चम्वोः पूयमानः अपऽसु स्वादिष्ठः मधुऽमान ऋतऽवा देवः न यः सविता सत्यऽमन्मा॥४८॥ अभि वायुं वीती अर्ष गृणानः अभि मित्रावरुणा पूयमानः अभि नरं धीऽजवनं रथेऽस्थां अभि इंद्रं वृषणं वज्रऽबाहुं॥४९॥ अभि वस्वां सुऽवस्-नानि अर्ष अभि धेनूः सुऽदुघाः पूयमानः अभि चंद्रा भर्तवे नः हिरण्या अभि अश्वान् रथिनः देव सोम॥५०॥२०॥ अभि नः अर्ष दिव्या वसूनि अभि विश्वा पार्थिवा पूयमानः अभि येन द्रविणं अश्नवाम अभि आर्षेयं जमदग्निऽवत् नः॥५१॥ अया पवा पवस्व एना वसूनि मांश्चत्वे इंदो' सरसि प्र धन्व ब्रध्नः चित् अत्र वातः न जूतः पुरुऽमेधः चित् तक्वे नरं दात्॥५२॥ उत नः एना पवया प-वस्व अधि श्रुते श्रवाय्यस्य तीर्थे षष्टिं सहस्रा नैगुतः वसूनि वृक्षं न पक्वं धूनवत् रणाय॥५३॥ महि इमे' अस्य वृषनाम शूषे' मांश्चत्वे वा पृशने वा वधत्रे' अस्वापयत् निऽगुतः स्नेहयत् च अपऽअमि-त्रान् अप अचितः अत्र इतः॥५४॥ सं ची पवित्रा विऽततानि एषि अनु एकं धावसि पूयमानः असि भगः असि दात्रस्य दा-

ता असि मघऽवा मघवत्ऽभ्यः इंदो ॥५५॥२१॥ एषः विश्वऽवित् पवते मनीषी सोमः विश्वस्य भुवनस्य राजा दृप्सान् ईरयन् वि-दथेषु इंदुः वि वारं अव्यं समया अति याति ॥५६॥ इंदुं रिहंति महिषाः अदब्धाः पदे रेभंति कवयः न गृध्राः हिन्वंति धीराः दश-ऽभिः क्षिपाभिः सं अंजते रूपं अपां रसेन ॥५७॥ त्वया वयं पवमानेन सोम भरे कृतं वि चिनुयाम शश्वत् तत् नः मित्रः वरुणः ममहंतां अदितिः सिंधुः पृथिवी उत द्यौः ॥ ५८ ॥ २२ ॥

॥९८॥ अभि नः वाजऽसातमं रयिं अर्ष पुरुऽस्पृहं इंदो सहस्र-ऽभर्णसं तुविऽद्युम्नं विभ्वऽसहं ॥१॥ परि स्यः सुवानः अव्ययं रथे न वर्मे अव्यत इंदुः अभि द्रुणा हितः हियानः धाराभिः अक्षाः ॥२॥ परि स्यः सुवानः अक्षाः इंदुः अव्ये मदऽच्युतः धारा यः ऊर्ध्वः अ-ध्वरे भाजा न एति गव्यऽयुः ॥३॥ सः हि त्वं देव शश्वते वसु मर्ताय दाशुषे इंदो सहस्रिणं रयिं शतऽआत्मानं विवाससि ॥४॥ वयं ते अस्य वृचऽहन् वसो वस्वः पुरुऽस्पृहः नि नेदिष्ठऽतमाः इषः स्याम सुम्नस्य अध्रिऽगो ॥५॥ द्विः यं पंच स्वऽयशसं स्वसारः अ-द्रिऽसंहतं प्रियं इंद्रस्य काम्यं प्रऽस्नापयंति ऊर्मिणं ॥६॥२३॥ परि त्यं हर्यतं हरिं बभ्रुं पुनंति वारेण यः देवान् विश्वान् इत् परि मदेन सह गच्छति ॥७॥ अस्य वः हि अवसा पांतः दक्षऽसाधनं यः सूरिषु श्रवः बृहत् दधे स्वः न हर्यतः ॥८॥ सः वां यज्ञेषु मानवी इंदुः जनिष्ट रोदसी देवः देवी गिरिऽस्थाः असेधन तं तुविऽस्वनिं ॥९॥ इंद्राय सोम पातवे वृचऽघ्ने परि सिच्यसे नरे च दक्षिणाऽवते देवाय सद-नऽसदे ॥१०॥ ते प्रत्नासः विऽउष्टिषु सोमाः पवित्रे अक्षरन् अपऽप्रोथंतः सनुतः हुरःऽचितः प्रातः तान् अप्रऽचेतसः ॥११॥

तं सखायः पुरःऽरुचं यूयं वयं च सूरयः अश्याम वाजऽगंध्यं सनेम वाजऽपस्त्यं ॥ १२ ॥ २४ ॥

॥ ९९ ॥ आ हर्यताय धृष्णवे धनुः तन्वंति पौंस्यं स्रुक्वां वयंति असुराय निःऽनिजं विपां अये महीयुवः ॥ १ ॥ अध क्षपा परिऽकृतः वाजान् अभि प्र गाहते यदि विवस्वतः धियः हरिं हिन्वंति यातवे ॥ २ ॥ तं अस्य मर्जयामसि मदः यः इंद्रऽपातमः यं गावः आसऽभिः दधुः पुरा नूनं च सूरयः ॥ ३ ॥ तं गार्थया पुराण्या पुनानं अभि अनूषत उतो कृपंत धीतयः देवानां नाम बिभ्रतीः ॥ ४ ॥ तं उक्षमाणं अव्ययं वारे पुनंति धर्णसिं दूतं न पूर्वऽचित्तये आ शासते मनीषिणः ॥ ५ ॥ २५ ॥ सः पुनानः मदिनऽतमः सोमः चमूषु सीदति पशौ न रेतः आऽदधत् पतिः वचस्यते धियः ॥ ६ ॥ सः मृज्यते सुकर्मऽभिः देवः देवेभ्यः सुतः विदे यत् आसु संऽददिः महीः अपः विगाहते ॥ ७ ॥ सुतः इंदो पविचे आ नृऽभिः यतः विनीयसे इंद्राय मत्सरिनऽतमः चमूषु आ नि सीदसि ॥ ८ ॥ २६ ॥

॥ १०० ॥ अभि नवंते अदुहः प्रियं इंद्रस्य काम्यं वत्सं न पूर्वे आयुनिजातं रिहंति मातरः ॥ १ ॥ पुनानः इंदो आ भर सोमं द्विऽबर्हसं रयिं त्वं वसूनि पुष्यसि विश्वानि दाशुषः गृहे ॥ २ ॥ त्वं धियं मनोऽयुजं सृज वृष्टिं न तन्यतुः त्वं वसूनि पार्थिवा दिव्या च सोम पुष्यसि ॥ ३ ॥ परि ते जिग्युषः यथा धारा सुतस्य धावति रंहमाणा वि अव्ययं वारं वाजीऽइव सानसिः ॥ ४ ॥ ऋत्वे दक्षाय नः कवे पवस्व सोम धारया इंद्राय पातवे सुतः मित्राय वरुणाय च ॥ ५ ॥ २७ ॥ पवस्व वाजऽसातमः पविचे धारया सुतः इंद्राय सोम विष्णवे

देवेभ्यः मधुमत्ऽतमः॥६॥ त्वां रिहंति मातरः हरिं पविचे अदुहः वत्सं जातं न धेनवः पवमान विऽधर्मणि॥७॥ पवमान महि श्रवः चिचेभिः यासि रश्मिऽभिः शर्धन् तमांसि जिघ्नसे विश्वानि दाशुषः गृहे॥८॥ त्वं द्यां च महिऽव्रत पृथिवीं च अति जभ्रिषे प्रति द्रापिं अमुंचथाः पवमान महिऽत्वना ॥ ९ ॥ २८ ॥ ४ ॥

॥१०१॥ पुरःऽजिती वः अंधसः सुताय मादयित्नवे अपं श्वानं श्नथिष्टन सखायः दीर्घऽजिह्वं॥१॥ यः धारया पावकया परिऽप्रस्यंदते सुतः इंदुः अश्वः न कृत्व्यः॥२॥ तं दुरोषं अभि नरः सोमं विश्वाच्या धिया यज्ञं हिन्वंति अद्रिऽभिः॥३॥ सुतासः मधुमत्ऽतमाः सोमाः इंद्राय मंदिनः पविचऽवंतः अक्षरन् देवान् गच्छंतु वः मदाः॥४॥ इंदुः इंद्राय पवते इति देवासः अब्रुवन् वाचः पतिः मखस्यते विश्वस्य ईशानः ओजसा॥५॥१॥ सहस्रऽधारः पवते समुद्रः वाचंऽईखयः सोमः पतिः रयीणां सखा इंद्रस्य दिवेऽदिवे॥६॥ अयं पूषा रयिः भगः सोमः पुनानः अर्षति पतिः विश्वस्य भूमनः वि अख्यत् रोदसी उभे॥७॥ सं ऊं प्रियाः अनूषत गावः मदाय घृष्वयः सोमासः कृण्वते पथः पवमानासः इंदवः॥८॥ यः ओजिष्ठः तं आ भर पवमान श्रवाय्यं यः पंच चर्षणीः अभि रयिं येन वनामहै॥९॥ सोमाः पवंते इंदवः अस्मभ्यं गातुवित्ऽतमाः मिचाः सुवानाः अरेपसः सुऽआध्यः स्वःऽविदः॥१०॥२॥ सुऽस्वानासः वि अद्रिऽभिः चितानाः गोः अधि त्वचि इषं अस्मभ्यं अभितः सं अस्वरन् वसुऽविदः॥११॥ एते पूताः विपःऽचितः सोमासः दधिऽआशिरः सूर्यासः न दृशतासः जिगत्नवः ध्रुवाः घृते॥१२॥ प्र सुन्वानस्य अंधसः मतिः न वृत तत् वचः अपं

ष्वानँ अराधसँ हत मखं न भृगवः॥१३॥ आ जामिः अत्कैं अव्यत भुजे न पुचः ओण्योः सरत् जारः न योषणां वरः न योनिं आऽसदँ ॥१४॥ सः वीरः दक्षऽसाधनः वि यः ततस्तंभ रोदसी हरिः पविचैं अव्यत वेधाः न योनिं आऽसदँ॥१५॥ अव्यः वारेभिः पवते सोमः गव्यैं अधित्वचि कनिक्रदत् वृषा हरिः इंद्रस्य अभि एति निःऽकृतं ॥ १६ ॥ ३ ॥

॥ १०२ ॥ क्राणा शिप्युः महीनां हिन्वन् ऋतस्य दीधितिं विश्वा परि प्रिया भुवत् अध द्विता ॥१॥ उप चितस्य पाथोः अभक्त यत् गुहा पदं यज्ञस्य सप्त धामऽभिः अध प्रियं ॥२॥ चीणि चितस्य धारया पृष्ठेषु आ ईरय रयिं मिमीते अस्य योजना वि सुऽक्रतुः ॥ ३ ॥ जज्ञानं सप्त मातरः वेधां अशासत श्रिये अयं ध्रुवः रयीणां चिकैत यत् ॥४॥ अस्य व्रते सऽजोषसः विश्वे देवासः अदुहः स्माहाः भवंति रंतयः जुषंत यत् ॥५॥४॥ यं ईं गर्भं ऋतऽवृधः दृशे चारुं अजीजनन् कविं मंहिष्ठं अध्वरे पुरुऽस्पृहं ॥ ६ ॥ सं ऽईचीने० अभि त्मना यह्वी ऋतस्य मातरा तन्वानाः यज्ञं आनुषक् यत् अंजते ॥७॥ ऋत्वा शुक्रेभिः अक्षऽभिः ऋणोः अप व्रजं दिवः हिन्वन् ऋतस्य दीधितिं प्र अध्वरे ॥ ८ ॥ ५ ॥

॥१०३॥ प्र पुनानाय वेधसे सोमाय वचः उतऽयतं भृतिं न भर मतिऽभिः जुजोषते ॥१॥ परि वाराणि अव्यया गोभिः अंजानः अर्षति वी सधऽस्था पुनानः कृणुते हरिः॥२॥ परि कोशं मधुऽश्चुतं अव्यये वारे अर्षति अभि वाणीः ऋषीणां सप्त

नूषत ॥३॥ परि नेता मतीनां विश्वऽदेवः अदाभ्यः सोमः पुनानः चम्वोः विशत् हरिः ॥४॥ परि देवीः अनु स्वधाः इंद्रेण याहि सऽरथं पुनानः वाघत् वाघतऽभिः अमर्त्यः ॥५॥ परि सप्तिः न वाजऽयुः देवः देवेभ्यः सुतः विऽआनशिः पवमानः वि धावति ॥६॥६॥६॥

॥१०४॥ सखायः आ नि सीदत पुनानाय प्र गायत शिप्रुं न यज्ञैः परि भूषत श्रिये ॥१॥ सं ईं वत्सं न मातृऽभिः सृजत गयऽसाधनं देवऽअव्यं मदं अभि द्विऽशवसं ॥२॥ पुनानं दक्षऽसाधनं यथा शर्धाय वीतये यथा मित्राय वरुणाय शंऽतमः ॥३॥ अस्मभ्यं त्वा वसुऽविदं अभि वाणीः अनूषत गोभिः ते वर्णं अभि वासयामसि ॥४॥ सः नः मदानां पते इंदो देवऽइंदुरः असि सखाऽइव सख्ये गातुवित्ऽतमः भव ॥५॥ सनेमि कृधि अस्मत् आ रक्षसं कं चित् अचिर्णं अप अदेवं द्वयुं अंहः युयोधि नः ॥६॥७॥

॥१०५॥ तं वः सखायः मदाय पुनानं अभि गायत शिप्रुं न यज्ञैः स्वदयंत गूर्तिऽभिः ॥१॥ सं वत्सःऽइव मातृऽभिः इंदुः हिन्वानः अज्यते देवऽअवीः मदः मतिऽभिः परिऽकृतः ॥२॥ अयं दक्षाय साधनः अयं शर्धाय वीतये अयं देवेभ्यः मधुमत्ऽतमः सुतः ॥३॥ गोऽमत नः इंदो अश्वऽवत सुतः सुऽदक्ष धन्व स्रुचिं ते वर्णं अधि गोषु दीधरं ॥४॥ सः नः हरीणां पते इंदो देवश्सरःऽतमः सखाऽइव सख्ये नर्यः रुचे भव ॥५॥ सनेमि त्वं अस्मत् आ अदेवं कं चित् अचिर्णं सह्मान इंदो परि बाधः अप द्वयुं ॥६॥८॥

॥१०६॥ इंद्रं अच्छ सुताः इमे वृषणं यंतु हरयः शुष्टी जातासः इंदवः स्वःऽविदः ॥१॥ अयं भराय सानसिः इंद्राय पवते सुतः सोमः जैत्रस्य चेतति यथा विदे ॥२॥ अस्य इत् इंद्रः मदेषु आ ग्राभं गृभ्णीत सानसिं वज्रं च वृषणं भरत् सं अप्सुऽजित् ॥३॥ प्र धन्व सोम जागृविः इंद्राय इंदो परि स्रव शुचिऽमंतं शुष्मं आ भर स्वःऽविदं ॥४॥ इंद्राय वृषणं मदं पवस्व विश्वऽदर्शतः सहस्रऽयामा पथिऽकृत् विऽचक्षणः ॥५॥९॥ अस्मभ्यं गातु-वित्तऽतमः देवेभ्यः मधुमत्तऽतमः सहस्रं याहि पथिऽभिः कनिक्रदत् ॥६॥ पवस्व देवऽवीतये इंदो धाराभिः ओजसा आ कलशं मधुऽमान् सोम नः सदः ॥७॥ तवं द्रप्साः उदऽप्रुतः इंद्रं मदाय ववृधुः त्वां देवासः अमृताय कं पपुः ॥८॥ आ नः सुतासः इंदवः पुनानाः धावत रयिं वृष्टिऽद्यावः रीतिऽआपः स्वःऽविदः ॥९॥ सोमः पुनानः ऊर्मिणा अव्यः वारं वि धावति अग्रे वाचः पवमानः कनिक्रदत् ॥१०॥१०॥ धीभिः हिन्वंति वाजिनं वने क्रीळंतं अतिऽअविं अभि चिऽपृष्ठं मतयः सं अस्वरन् ॥११॥ असर्जि कलशान् अभि मीळ्हे सप्तिः न वाजऽयुः पुनानः वाचं जनयन् असिस्यदत् ॥१२॥ पवते हर्यतः हरिः अति ह्वरांसि रंह्या अभिऽअर्षन् स्तोतृऽभ्यः वीरऽवत् यशः ॥१३॥ अया पवस्व देवऽयुः मधोः धाराः असृक्षत रेभन् पवित्रं परि एषि विश्वतः ॥१४॥११॥

॥ १०७ ॥ परि इतः सिंचत सुतं सोमः यः उतऽतमं हविः दधन्वान् यः नर्यः अप्सु अंतः आ सुसाव सोमं अद्रिऽभिः ॥१॥ नूनं पुनानः अविऽभिः परि स्रव अदब्धः सुरभिंऽतरः सुते

चित् त्वा अप्ऽसु मदामः अंधसा शूरंतः गोभिः उतऽतरं॥२॥ परि सुवानः चक्षसे देवऽमादनः ऋतुः इंदुः विऽचक्षणः॥३॥ पुनानः सोम धारया अपः वसानः अर्षसि आ रत्नऽधाः योनिं ऋतस्य सीदसि उत्सः देव हिरण्ययः॥४॥ दुहानः ऊधः दिव्यं मधु प्रियं प्रत्नं सधऽस्थं आ असदत् आऽपृच्छयं धरुणं वाजी अर्षति नृऽभिः धूतः विऽचक्षणः॥५॥१२॥ पुनानः सोम जागृविः अव्यः वारे परि प्रियः त्वं विप्रः अभवः अंगिरःऽतमः मध्वा यज्ञं मिमिक्षनः॥६॥ सोमः मीढ्वान् पवते गातुवित्ऽतमः ऋषिः विप्रः विऽचक्षणः त्वं कविः अभवः देवऽवीतमः आ सूर्यं रोहयः दिवि॥७॥ सोमः ऊं सुवानः सोतृऽभिः अधि स्नुऽभिः अवीनां अश्वयाऽइव हरिता याति धारया मंद्रया याति धारया॥८॥ अनूपे गोऽमान् गोभिः अक्षाः सोमः दुग्धाभिः अक्षाः समुद्रं न संऽवरणानि अग्मन् मंदी मदाय तोशते॥९॥ आ सोम सुवानः अद्रिऽभिः तिरः वाराणि अव्यया जनः न पुरि चम्वोः विशत् हरिः सदः वनेषु दधिषे॥१०॥१३॥ सः ममृजे तिरः अण्वानि मेष्यः मीळ्हे सप्तिः न वाजऽयुः अनुऽमाद्यः पवमानः मनीषिऽभिः सोमः विप्रेभिः ऋक्वऽभिः॥११॥ प्र सोम देवऽवीतये सिंधुः न पिप्ये अर्णसा अंशोः पयसा मदिरः न जागृविः अच्छ कोशं मधुऽश्चुतं॥१२॥ आ हर्यतः अर्जुने अत्के अव्यत प्रियः सूनुः न मर्ज्यः तं ईं हिन्वंति अपसः यथा रथं नदीषु आ गभस्त्योः॥१३॥ अभि सोमासः आयवः पवंते मद्यं मदं समुद्रस्य अधि विष्टपि मनीषिणः मत्सरासः स्वःऽविदः॥१४॥ तरत् समुद्रं पवमानः ऊर्मिणा राजा देवः ऋतं बृहत् अर्षत् मित्रस्य वरुणस्य धर्मणा प्र हिन्वानः ऋतं बृहत्॥१५॥१४॥ नृऽभिः येमानः हर्यतः विऽचक्षणः राजा देवः समुद्रियः॥१६॥

इंद्राय पवते मदः सोमः मरुत्वते सुतः सहस्रऽधारः अति अव्यं अर्षति तं ई मृजंति आयवः ॥१७॥ पुनानः चमू जनयन् मतिं कविः सोमः देवेषु रण्यति अपः वसानः परि गोभिः उतऽतरः सीदन् वनेषु अव्यत ॥१८॥ तव अहं सोम रण सख्ये इंदो दिवेऽदिवे पुरूणि बभ्रो नि चरंति मा अव परिऽधीन अति तान् इहि ॥१९॥ उत अहं नक्तं उत सोम ते दिवा सख्याय बभ्रो ऊधनि घृणा तपंतं अति सूर्यं परः शकुनाःऽइव पप्तिम ॥२०॥१५॥ मृज्यमानः सुऽहस्त्य समुद्रे वाचं इन्वसि रयिं पिशंगं बहुलं पुरुऽस्पृहं पवमान अभि अर्षसि ॥२१॥ मृजानः वारे पवमानः अव्यये वृषा अव चक्रदः वने देवानां सोम पवमान निःऽकृतं गोभिः अंजानः अर्षसि ॥२२॥ पवस्व वाजऽसातये अभि विश्वानि काव्या त्वं समुद्रं प्रथमः वि धारयः देवेभ्यः सोम मत्सरः ॥२३॥ सः तु पवस्व परि पार्थिवं रजः दिव्या च सोम धर्मऽभिः त्वां विप्रासः मतिऽभिः विऽचक्षण शुभ्रं हिन्वंति धीतिऽभिः ॥२४॥ पवमानाः असृक्षत पविं अति धारया मरुत्वंतः मत्सराः इंद्रियाः हयाः मेधां अभि प्रयांसि च ॥२५॥ अपः वसानः परि कोशं अर्षति इंदुः हियानः सोतृऽभिः जनयन् ज्योतिः मंदनाः अवीवशत् गाः कृण्वानः न निःऽनिजं ॥२६॥१६॥

॥१०८॥ पवस्व मधुमत्ऽतमः इंद्राय सोम ऋतुवित्ऽतमः मदः महि द्युक्षऽतमः मदः ॥१॥ यस्य ते पीत्वा वृषभः वृषऽयते अस्य पीता स्वःऽविदः सः सुऽप्रकेतः अभि अक्रमीत् इषः अच्छ वाजं न एतशः ॥२॥ त्वं हि अंग दैव्या पवमान जनिमानि द्यु-

मत्ऽतमः अमृतऽत्वाय घोषयः॥३॥ येन नवऽग्वः दध्यङ् अपऽऊर्णुते येन विप्रासः आपिरे देवानां सुम्ने अमृतस्य चारुणः येन स्रवांसि आनृषुः॥४॥ एषः स्यः धारया सुतः अव्यः वारेभिः पवते मदिनऽतमः क्रीळन् ऊर्मिः अपांऽइव॥५॥१७॥ यः उस्रियाः अप्याः अंतः अश्मनः निः गाः अकृंतत् ओजसा अभि व्रजं तन्निषे गव्यं अश्व्यं वर्मीऽइव धृष्णो आ रुज॥६॥ आ सोत परि सिंचत अश्वं न स्तोमं अपऽतुरं रजःऽतुरं वनऽचृक्षं उदऽप्रुतं॥७॥ सहस्रऽधारं वृषभं पयःऽवृधं प्रियं देवाय जन्मने ऋतेन यः ऋतऽजातः विऽववृधे राजा देवः ऋतं बृहत्॥८॥ अभि द्युम्नं बृहत् यशः इषः पते दिदीहि देव देवऽयुः वि कोशं मध्यमं युव॥९॥ आ वच्यस्व सुऽदक्ष चम्वोः सुतः विशां वह्निः न विश्पतिः वृष्टिं दिवः पवस्व रीतिं अपां जिन्व गोऽइष्टये धियः॥१०॥१८॥ एतं ऊं त्यं मदऽच्युतं सहस्रऽधारं वृषभं दिवः दुहुः विश्वा वसूनि बिभ्रतं ॥११॥ वृषा वि जज्ञे जनयन् अमर्त्यः प्रऽतपन् ज्योतिषा तमः सः सुऽस्तुतः कविऽभिः निःऽनिजं दधे चिऽधातु अस्य दंससा॥१२॥ सः सुन्वे यः वसूनां यः रायां आऽनेता यः इळानां सोमः यः सुऽक्षितीनां ॥१३॥ यस्य नः इंद्रः पिबात् यस्य मरुतः यस्य वा अर्यमणा भगः आ येन मित्रावरुणा करामहे आ इंद्रं अवसे महे ॥१४॥ इंद्राय सोम पातवे नृऽभिः यतः सुऽआयुधः मदिनऽतमः पवस्व मधुमत्ऽतमः॥१५॥ इंद्रस्य हार्दि सोमऽधानं आ विश समुद्रंऽइव सिंधवः जुष्टः मित्राय वरुणाय वायवे दिवः विष्टंभः उत्ऽतमः॥१६॥१९॥

॥१०९॥ परि प्र धन्व इंद्राय सोम स्वादुः मित्राय पूष्णे भगाय

॥१॥ इंद्रः ते सोम सुतस्य पेयाः ऋतवे दक्षाय विश्वे च देवाः॥२॥ एव अमृताय महे क्षयाय सः पुक्रः अर्ष दिव्यः पीयूषः ॥३॥ पवस्व सोम महान् समुद्रः पिता देवानां विश्वा अभि धाम॥४॥ पुक्रः पवस्व देवेभ्यः सोम दिवे पृथिव्यै शं च प्रऽजायै॥५॥ दिवः धर्ता असि पुक्रः पीयूषः सत्ये विऽधर्मन् वाजी पवस्व ॥६॥ पवस्व सोम द्युम्नी सुऽधारः महां अवीनां अनु पूर्व्यः॥७॥ नृऽभिः येमानः जज्ञानः पूतः क्षरत् विश्वानि मंद्रः स्वःऽवित्॥८॥ इंदुः पुनानः प्रऽजां उराणः करत् विश्वानि द्रविणानि नः॥९॥ पवस्व सोम ऋतवे दक्षाय अश्वः न निक्तः वाजी धनाय॥१०॥२०॥ तं ते सोतारः रसं मदाय पुनंति सोमं महे द्युम्नाय॥११॥ शिप्रुं जज्ञानं हरिं मृजंति पविचे सोमं देवेभ्यः इंदुं॥१२॥ इंदुः पविष्ट चारुः मदाय अपां उपऽस्थे कविः भगाय॥१३॥ बिभर्ति चारु इंद्रस्य नाम येन विश्वानि वृचा जघान॥१४॥ पिबंति अस्य विश्वे देवासः गोभिः श्रीतस्य नृऽभिः सुतस्य॥१५॥ प्र सुवानः अक्षाः सहस्रऽधारः तिरः पविचं वि वारं अव्यं॥१६॥ सः वाजी अक्षाः सहस्रऽरेताः अतऽभिः मृजानः गोभिः श्रीणानः॥१७॥ प्र सोम याहि इंद्रस्य कुक्षा नृऽभिः येमानः अद्रिऽभिः सुतः॥१८॥ असर्जि वाजी तिरः पविचं इंद्राय सोमः सहस्रऽधारः॥१९॥ अंजंति एनं मध्वः रसेन इंद्राय वृष्णे इंदुं मदाय॥२०॥ देवेभ्यः त्वा वृथा पाजसे अपः वसानं हरिं मृजंति ॥२१॥ इंदुः इंद्राय तोशते नि तोशते श्रीणन् उग्रः रिणन् अपः ॥ २२ ॥ २१ ॥

॥११०॥ परि ऊं सु प्र धन्व वाजऽसातये परि वृचाणि सक्षणिः द्विषः तरध्यै कृणऽयाः नः ईयसे॥१॥ अनु हि त्वा सुतं सोम मदाम-

सिमहे समर्येऽराज्ये वाजान् अभि पवमान प्र गाहसे॥२॥ अजीजनः हि पवमान सूर्यं विऽधारे शक्मना पयः गोऽजीरया रंहमाणः पुरंऽध्या॥३॥ अजीजनः अमृत मर्त्येषु आ ऋतस्य धर्मन् अमृतस्य चारुणः सदा असरः वाजं अच्छ सनिस्यदत्॥४॥ अभिऽअभि हि अवसा ततर्दिथ उत्सं न कं चित् जनऽपानं अक्षितं शयीभिः नभरमाणः गभस्त्योः॥५॥ आत ईं के चित् पश्यमानासः आप्यं वसुऽरुचः दिव्याः अभि अनूषत वारं न देवः सविता वि ऊर्णुते॥६॥२२॥ त्वे सोम प्रथमाः वृक्तऽबर्हिषः महे वाजाय अवसे धियं दधुः सः त्वं नः वीर वीर्याय चोदय॥७॥ दिवः पीयूषं पूर्व्य यत् उक्थ्यं महः गाहात् दिवः आ निः अधुक्षत् इंद्रं अभि जायमानं सं अस्वरन्॥८॥ अध यत् इमे पवमान रोदसी इमा च विश्वा भुवना अभि मज्मना यूथे न निःऽस्याः वृषभः वि तिष्ठसे॥९॥ सोमः पुनानः अव्ययं वारे शिश्नुः न क्रीळन् पवमानः अक्षाः सहस्रऽधारः शतऽवाजः इंदुः॥१०॥ एषः पुनानः मधुऽमान् ऋतऽवा इंद्राय इंदुः पवते स्वादुः ऊर्मिः वाजऽसनिः वरिवःऽवित् वयःऽधाः॥११॥ सः पवस्व सहमानः पृतन्यून् सेधन् रक्षांसि अप दुःऽगहानि सुऽआयुधः ससह्वान् सोम शत्रून्॥१२॥२३॥

॥१११॥ अया रुचा हरिण्या पुनानः विश्वा द्वेषांसि तरति स्वयुग्वऽभिः सूरः न स्वयुग्वऽभिः धारा सुतस्य रोचते पुनानः अरुषः हरिः विश्वा यत् रूपा परिऽयाति ऋक्वऽभिः सप्तऽआस्येभिः ऋक्वऽभिः॥१॥ त्वं त्यत् पणीनां विदः वसु सं मातृऽभिः मर्जयसि स्वे आ दमे ऋतस्य धीतिऽभिः दमे पराऽवतः न साम तत् यवं रणंति धीतयः विधातुऽभिः अरुषीभिः वयः दधे रोचमानः वयः दधे॥२॥

पूर्वी अनु प्रऽदिशं याति चेकितत् सं रश्मिऽभिः यतते दर्शतः रथः दैव्यः दर्शतः रथः अग्मन् उक्थानि पौंस्या इंद्रं जैत्राय हर्षयन् वज्रः च यत् भवथः अनपऽच्युता सुमतऽसु अनपऽच्युता ॥ ३ ॥ २४ ॥

॥११२॥ नानानं वै ऊं नः धियः वि व्रतानि जनानां तक्षा रिष्टं रुतं भिषक् ब्रह्मा सुन्वंतं इच्छति इंद्राय इंदो परि स्रव ॥१॥ जरंतीभिः ओषधीभिः पर्णेभिः शकुनानां कार्मारः अश्मऽभिः द्युऽभिः हिरण्यऽवंतं इच्छति इंद्राय इंदो परि स्रव ॥२॥ कारुः अहं ततः भिषक् उपलऽप्रक्षिणी नना नानाऽधियः वसुऽयवः अनु गाःऽइव तस्थिम इंद्राय इंदो परि स्रव ॥३॥ अश्वः वोढा सुऽखं रथं हसनां उपऽमंचिणः शेपः रोमण्ऽवंतो भेदी वाः इत मंडूकः इच्छति इंद्राय इंदो परि स्रव ॥ ४ ॥ २५ ॥

॥११३॥ शर्यणाऽवति सोमं इंद्रः पिबतु वृचऽहा बलं दधानः आत्मनि करिष्यन् वीर्यं महत इंद्राय इंदो परि स्रव ॥१॥ आ पवस्व दिशां पते आजीकात् सोम मीढुः ऋतऽवाकेन सत्येन श्रद्धया तपसा सुतः इंद्राय इंदो परि स्रव ॥२॥ पर्जन्यऽवृद्धं महिषं तं मूर्यस्य दुहिता आ अभरत् तं गंधर्वाः प्रति अगृभ्णन् तं सोमे रसं आ अदधुः इंद्राय इंदो परि स्रव ॥३॥ ऋतं वदन् ऋतऽद्युम्न सत्यं वदन् सत्यऽकर्मन् श्रद्धां वदन् सोम राजन् धाचा सोम परिऽकृतः इंद्राय इंदो परि स्रव ॥४॥ सत्यंऽउग्रस्य बृहतः सं स्रवंति संऽस्रवाः सं यंति रसिनः रसाः पुनानः ब्रह्मणा हरे इंद्राय इंदो परि स्रव ॥५॥२६॥ यत्र ब्रह्मा पवमान छंदस्यां वाचं वदन् यावृधां सोमे

महीयते सोमेन आऽनंदं जनयन् इंद्राय इंदो॑ परि स्रव ॥६॥ यत्र ज्योतिः अजस्रं यस्मिन् लोके स्वः हितं तस्मिन् मां धेहि पवमान अमृते लोके अक्षिते इंद्राय इंदो॑ परि स्रव ॥७॥ यत्र राजा वैवस्वतः यत्र अवऽरोधनं दिवः यत्र अमूः यह्वतीः आपः तत्र मां अमृतं कृधि इंद्राय इंदो॑ परि स्रव ॥८॥ यत्र अनुऽकामं चरणं त्रिऽनाके त्रिऽदिवे दिवः लोकाः यत्र ज्योतिष्मंतः तत्र मां अमृतं कृधि इंद्राय इंदो॑ परि स्रव ॥९॥ यत्र कामाः निऽकामाः च यत्र ब्रध्नस्य विष्टपं स्वधा च यत्र तृप्तिः च तत्र मां अमृतं कृधि इंद्राय इंदो॑ परि स्रव ॥१०॥ यत्र आऽनंदाः च मोदाः च मुदः प्रऽमुदः आसते कामस्य यत्र आप्ताः कामाः तत्र मां अमृतं कृधि इंद्राय इंदो॑ परि स्रव ॥ ११ ॥ २७ ॥

॥११४॥ यः इंदोः पवमानस्य अनु धामानि अक्रमीत् तं आहुः सुऽप्रजाः इति यः ते सोम अविधत् मनः इंद्राय इंदो॑ परि स्रव ॥१॥ ऋषे मंत्रऽकृतां स्तोमैः कश्यप उत्ऽवर्धयन् गिरः सोमं नमस्य राजानं यः जज्ञे वीरुधां पतिः इंद्राय इंदो॑ परि स्रव ॥२॥ सप्त दिशः नानाऽसूर्याः सप्त होतारः ऋत्विजः देवाः आदित्याः ये सप्त तेभिः सोम अभि रक्ष नः इंद्राय इंदो॑ परि स्रव ॥३॥ यत् ते राजन् घृतं हविः तेन सोम अभि रक्ष नः अरातिऽवा मा नः तारीत् मो॑ च नः किं चन आममत् इंद्राय इंदो॑ परि स्रव ॥ ४ ॥ २८ ॥ ७ ॥ ९ ॥

॥ इति नवमं मंडलं समाप्तं ॥

॥१॥ अयं बृहन् उषसाँ ऊर्ध्वः अस्थात् निः ऽजगन्वान् तमसः ज्योतिषा आ अगात् अग्निः भानुना रुशता सु ऽअंगः आ जातः विश्वा सद्मानि अप्राः ॥१॥ सः जातः गर्भः असि रोदस्योः अग्ने चारुः विऽभृतः ओषधीषु चित्रः शिशुः परि तमाँसि अक्तून् प्र मातृऽभ्यः अधि कनिक्रदत् गाः॥२॥ विष्णुः इत्था परमं अस्य विद्वान् जातः बृहन् अभि पाति तृतीयं आसा यत् अस्य पयः अक्रत स्वं सऽचेतसः अभि अर्चति अर्चं ॥३॥ अतः ऊं त्वा पितुऽभृतः जनित्रीः अन्नऽवृधं प्रति चरंति अन्नैः ताः ई प्रति एषि पुनः अन्यऽरूपाः असि त्वं विक्षु मानुषीषु होता ॥४॥ होतारं चित्रऽरथं अध्वरस्य यज्ञस्यऽयज्ञस्य केतुं रुशंतं प्रतिऽअर्धि देवस्यऽदेवस्य महा श्रिया तु अग्निं अतिथिं जनानां ॥५॥ सः तु वस्त्राणि अध पेशनानि वसानः अग्निः नाभा पृथिव्याः अरुषः जातः पदे इळायाः पुरःऽहितः राजन् यक्षि इह देवान् ॥६॥ आ हि द्यावापृथिवी अग्ने उभे सदा पुत्रः न मातरा ततंथ प्र याहि अच्छ उशतः यविष्ठ अथ आ वह सहस्य इह देवान् ॥ ७ ॥ २९ ॥

॥२॥ पिप्रीहि देवान् उशतः यविष्ठ विद्वान् ऋतून् ऋतुऽपते यज इह ये दैव्याः ऋत्विजः तेभिः अग्ने त्वं होतॄणां असि आऽयजिष्ठः॥१॥ वेषि होत्रं उत पोत्रं जनानां मंधाता असि द्रविणःऽदाः ऋतऽवा स्वाहा वयं कृणवाम हवींषि देवः देवान् यजतु अग्निः अहैन॥२॥ आ देवानां अपि पंथां अगन्म यत् शक्नवाम तत् अनु प्रऽवोळ्हुं अग्निः विद्वान् सः यजात् सः इत् ऊं होता सः अध्वरान् सः ऋतून् कल्पयाति॥३॥ यत् वः वयं प्रऽमिनाम व्रतानि विदुषां देवाः अविदुःऽतरासः अग्निः तत् विश्वं आ पृणाति विद्वान् ये-

भिः देवान् ऋतुऽभिः कल्पयाति ॥४॥ यत् पाकऽचा मनसा दीनऽदक्षाः न यज्ञस्य मन्वते मर्त्यासः अग्निः तत् होता क्रतुऽवित् विऽजानन् यजिष्ठः देवान् ऋतुऽशः यजाति ॥५॥ विश्वेषां हि अध्वराणां अनीकं चित्रं केतुं जनिता त्वा जजान सः आ यजस्व नृऽवतीः अनु क्षाः स्वाहाः इषः क्षुऽमतीः विश्वऽजन्याः ॥६॥ यं त्वा द्यावापृथिवी यं त्वा आपः त्वष्टा यं त्वा सुऽजनिमा जजान पंथां अनु प्रऽविद्वान् पितृऽयानं द्युऽमत् अग्ने संऽइधानः वि भाहि ॥७॥३०॥

॥३॥ इनः राजन् अरतिः संऽइद्धः रौद्रः दक्षाय सुषुऽमान् अदर्शि चिकित् विभाति भासा बृहता असिक्नी एति रुशंती अपऽअजन् ॥१॥ कृष्णां यत् एनीं अभि वर्पसा भूत् जनयन् योषां बृहतः पितुः जां ऊर्ध्वं भानुं सूर्यस्य स्तभायन् दिवः वसुऽभिः अरतिः वि भाति ॥२॥ भद्रः भद्रया सचमानः आ अगात् स्वसारं जारः अभि एति पश्चात् सुऽप्रकेतैः द्युऽभिः अग्निः विऽतिष्ठन् रुशत्ऽभिः वर्णैः अभि रामं अस्थात् ॥३॥ अस्य यामासः बृहतः न वग्नून् इंधानाः अग्नेः सख्युः शिवस्य ईड्यस्य वृष्णः बृहतः सुऽआसः भामासः यामन् अक्तवः चिकित्रे ॥४॥ स्वनाः न यस्य भामासः पवंते रोचमानस्य बृहतः सुऽदिवः ज्येष्ठेभिः यः तेजिष्ठैः क्रीळुमत्ऽभिः वर्षिष्ठेभिः भानुऽभिः नक्षति द्यां ॥५॥ अस्य शुष्मासः ददृशानऽपवेः जेहमानस्य स्वनयन् नियुत्ऽभिः प्रत्नेभिः यः रुशत्ऽभिः देवऽतमः विरेभत्ऽभिः अरतिः भाति विऽभ्वा ॥६॥ सः आ वक्षि महि नः आ च सत्सि दिवःऽपृथिव्योः अरतिः युवत्योः अग्निः सुऽतुकः सुऽतुकेभिः अश्वैः रभस्वत्ऽभिः रभस्वान् आ इह गम्याः ॥७॥३१॥

॥४॥ प्र ते यक्षि प्र ते इयर्मि मन्मभुवः यथा वंद्यः नः हवेषु धन्वनऽइव प्रऽपा असि त्वं अग्ने इयक्षवे पूरवे प्रत्न राजन्॥१॥ यं त्वा जनासः अभि संऽचरंति गावः उष्णंऽइव व्रजं यविष्ठ दूतः देवानां असि मर्त्यानां अंतः महान् चरसि रोचनेन॥२॥ शिष्युं न त्वा जेन्यं वर्धयंती माता बिभर्ति सचनस्यमाना धनोः अधि प्रऽवता यासि हर्यन् जिगीषसे पशुःऽइव अवंऽमृष्टः ॥३॥ मूराः अमूरं न वयं चिकित्वः महिऽत्वं अग्ने त्वं अंग वित्से शयें वव्रिः चरंति जिह्वया अदन् रेरिह्यते युवतिं विश्पतिः सन् ॥४॥ कूऽचित् जायते सनयासु नव्यः वने तस्थौ पलितः धूमऽकेतुः अक्ताता आपः वृषभः न प्र वेति सऽचेतसः यं प्रऽनयंत मर्तीः॥५॥ तनूत्यजांऽइव तस्करा वनर्गू रशनाभिः दशऽभिः अभि अधीतां इयं ते अग्ने नव्यसी मनीषा युक्ष्व रथं न शुचयंतऽभिः अंगैः॥६॥ ब्रह्म च ते जातऽवेदः नमः च इयं च गीः सदं इत् वर्धनी भूत् रक्ष नः अग्ने तनयानि तोका रक्ष उत नः तन्वः अप्रऽयुच्छन् ॥७॥३२॥

॥५॥ एकः समुद्रः धरुणः रयीणां असत् हृदः भूरिऽजन्मा वि चष्टे सिसक्ति ऊधः निण्योः उपऽस्थे उत्सस्य मध्ये निऽहितं पदं वेः॥१॥ समानं नीळं वृषणः वसानाः सं जग्मिरे महिषाः अर्वतीभिः ऋतस्य पदं कवयः नि पांति गुहा नामानि दधिरे परांणि ॥२॥ ऋतऽयिनीं॰ मायिनीं सं दधाते मित्वा शिष्युं जज्ञतुः वर्धयंती विश्वस्य नाभिं चरतः ध्रुवस्य कवेः चित् तंतुं मनसा विऽयंतः॥३॥ ऋतस्य हि वर्तनयः सुऽजातं इषः वाजाय प्रऽदिवः सचंते अधीवासं रोदसी ववसाने घृतैः अन्नैः ववृधाते मधूनां ॥४॥ सप्त स्वसृः अरुषीः वावशानः विद्वान् मध्वः

उत् जभारद्दशे कं अंतः येमे अंतरिक्षे पुराऽजाः इच्छन् वव्रिं अवि-
दत् पूषणस्य ॥५॥ सन्न मर्यादाः कवयः ततक्षुः तासां एकां इत् अ-
भि अंहुरः गात् आयोः ह स्कंभः उपऽमस्य नीळे पथां विऽसर्गे
धरुणेषु तस्थौ ॥ ६ ॥ असत् च सत् च परमे विऽओमन् दक्षस्य
जन्मन् अदितेः उपऽस्थे अग्निः ह नः प्रथमऽजाः ऋतस्य पूर्वे
आयुनि वृषभः च धेनुः ॥ ७ ॥ ३३ ॥ ५ ॥

॥ ६ ॥ अयं सः यस्य शर्मन् अवःऽभिः अग्नेः एधते जरिता अभिष्टौ
ज्येष्ठेभिः यःभानुऽभिः ऋषूणां परिऽएति परिऽवीतः विभाऽवा
॥ ७ ॥ यः भानुऽभिः विभाऽवा विऽभाति अग्निः देवेभिः ऋतऽवा
अजस्रः आ यः विवाय सख्या सखिऽभ्यः अपरिऽह्वृतः अत्यः न
सप्तिः ॥ २ ॥ ईशे यः विश्वस्याः देवऽवीतेः ईशे विश्वऽआयुः उषसः
विऽउष्टौ आ यस्मिन् मना हवींषि अग्नौ अरिष्टऽरथः स्रुक्षाति
पूषेः ॥ ३ ॥ पूषेभिः वृधः जुषाणः अर्कैः देवान् अच्छ रघुऽपत्वा जि-
गाति मंद्रः होता सः जुह्वा यजिष्ठः संऽमिश्वः अग्निः आ जिघर्ति
देवान् ॥ ४ ॥ तं उस्राः इंद्रं न रेजमानं अग्निं गीःऽभिः नमःऽभिः आ
कृणुध्वं आ यं विप्रासः मतिऽभिः गृणंति जातऽवेदसं जुह्वं सहा-
नां ॥ ५ ॥ सं यस्मिन् विश्वा वसूनि जग्मुः वाजे न अश्वाः सप्तिऽवंतः
एवैः अस्मे ऊतीः इंद्रवातऽतमाः अर्वाचीनाः अग्ने आ कृणुष्व
॥ ६ ॥ अध हि अग्ने महा निऽसद्य सद्यः जज्ञानः हव्यः बभूथ तं ते दे-
वासः अनु केतं आयन् अध अवर्धत प्रथमासः ऊमाः ॥ ७ ॥ १ ॥

॥ ७ ॥ स्वस्ति नः दिवः अग्ने पृथिव्याः विश्वऽआयुः धेहि यज-
थाय देव सचेमहि तव दस्म प्रऽकेतैः उरुष्य नः उरुऽभिः देव शंसैः

॥१॥ इमाः अग्ने मतयः तुभ्यं जाताः गोभिः अश्वैः अभि गृणंति राधः यदा ते मतैः अनुभोगं आनट् वसो दधानः मत्तिऽभिः सुऽजात ॥२॥ अग्निं मन्ये पितरं अग्निं आपिं अग्निं भ्रातरं सदं इत् सखायं अग्नेः अनीकं बृहतः सपर्य दिवि शुक्रं यजतं सूर्यस्य ॥३॥ सिधाः अग्ने धियः अस्मे सनुचीः यं चायसे दमे आ नित्यऽहोता ऋतऽवा सः रोहितऽअश्वः पुरुऽक्षुः द्युऽभिः अस्मै अहऽभिः वामं अस्तु ॥४॥ द्युऽभिः हितं मित्रंऽइव प्रऽयोगं प्रत्नं ऋत्विजं अध्वरस्य जारं बाहुऽभ्यां अग्निं आयवः अजनंत विक्षु होतारं निऽअसादयंत ॥५॥ स्वयं यजस्व दिवि देव देवान् किं ते पाकः कृणवत् अग्रंऽचेताः यथा अयजः ऋतुऽभिः देव देवान् एव यजस्व तन्वं सुऽजात ॥६॥ भव नः अग्ने अविता उत गोपाः भव वयःऽकृत् उत नः वयःऽधाः रास्व च नः सुऽमहः हव्यऽदातिं चास्व उत नः तन्वः अग्रंऽयुच्छन् ॥ ७ ॥ २ ॥

॥८॥ प्र केतुना बृहता याति अग्निः आ रोदसी वृषभः रोरवीति दिवः चित् अंतान् उपऽमान् उत आनट् अपां उपऽस्थे महिषः ववर्ध ॥१॥ सुमोदं गर्भः वृषभः ककुतऽमान् अस्रेमा वत्सः शिमौऽवान् अरावीत् सः देवऽतांति उतऽयंतानि कृण्वन् स्वेषु क्षयेषु प्रथमः जिगाति ॥२॥ आ यः मूर्धानं पित्रोः अरब्ध नि अध्वरे दधिरे सूरः अर्णीः अस्य पत्मन् अरुषीः अश्वऽबुधाः ऋतस्य योनौ तन्वः जुषंत ॥३॥ उषःऽउषः हि वसो अयं एषि त्वं यमयोः अभवः विभाऽवा ऋताय सप्न दधिषे पदानि जनयन् मित्रं तन्वे स्वायै ॥४॥ भुवः चक्षुः महः ऋतस्य गोपाः भुवः वरुणः यत ऋताय वेषि भुवः अपां नपात् जातऽवेदः भुवः दूतः यस्य हव्यं जुजोषः ॥५॥३॥ भुवः

यज्ञस्य रजसः च नेता यत् च नियुतऽभिः सचसे शिवाभिः दिवि मूर्धानं दधिषे स्वःऽसां जिह्वां अग्ने चकृषे हव्यऽवाहं ॥६॥ अस्य चितः क्रतुना वव्रे अंतः इच्छन् धीतिं पितुः एवैः परस्य सचस्यमानः पित्र्योः उपऽस्थे जामि ब्रुवाणः आयुधानि वेति ॥७॥ सः पित्र्याणि आयुधानि विद्वान् इंद्रऽइषितः आप्त्यः अभि अयुध्यत् त्रिऽशीर्षाणं सप्तऽरश्मिं जघन्वान् त्वाष्ट्रस्य चित् निः ससृजे त्रितः गाः ॥८॥ भूरिऽइत् इंद्रः उतऽइनक्षंतं ओजः अवं अभिनत् सतऽपतिः मन्यमानं त्वाष्ट्रस्य चित् विश्वऽरूपस्य गोनां आऽचक्राणः चीणि शीर्षा परा वर्क् ॥ ९ ॥ ४ ॥

॥९॥ आपः हि स्थ मयःऽभुवः ताः नः ऊर्जे दधातन महे रणाय चक्षसे ॥१॥ यः वः शिवऽतमः रसः तस्य भाजयत इह नः उशतीःऽइव मातरः ॥२॥ तस्मै अरं गमाम वः यस्य क्षयाय जिन्वथ आपः जनयथ च नः ॥३॥ शं नः देवीः अभिष्टये आपः भवंतु पीतये शं योः अभि स्रवंतु नः ॥४॥ ईशानाः वार्याणां क्षयंतीः चर्षणीनां अपः याचामि भेषजं ॥५॥ अप्ऽसु मे सोमः अब्रवीत् अंतः विश्वानि भेषजा अग्निं च विश्वऽशंभुवं ॥६॥ आपः पृणीत भेषजं वरूथं तन्वे मम ज्योक् च सूर्यं दृशे ॥७॥ इदं आपः प्र वहत यत् किं च दुःऽइतं मयि यत् वा अहं अभिऽदुद्रोह यत् वा शेपे उत अनृतं ॥८॥ आपः अद्य अनु अचारिषं रसेन सं अगस्महि पयस्वान् अग्ने आ गहि तं मा सं सृज वर्चसा ॥ ९ ॥ ५ ॥

॥१०॥ ओ चित् सखायं सख्या ववृत्यां तिरः पुरु चित् अर्णवं जगन्वान् पितुः नपातं आ दधीत वेधाः अधि क्षमि प्रऽतरं दी-

ध्यानः॥१॥ न ते सखा सख्यं वष्टि एतत् सऽलक्ष्मा यत् विषुऽरूपा भवाति महः पुचासः असुरस्य वीराः दिवः धर्तारः उर्विया परि ख्यन् ॥२॥ उशंति घ ते अमृतासः एतत् एकस्य चित् त्यजसं मर्त्यस्य नि ते मनः मनसि धायि असे जन्युः पतिः तन्वं आ विविश्याः॥३॥ न यत् पुरा चकृम कत् ह नूनं ऋता वदंतः अनृतं रपेम गंधर्वः अप्ऽसु अप्या च योषा सा नः नाभिः परमं जामि तत् नौ॥४॥ गर्भे नु नौ जनिता दंऽपती० कः देवः त्वष्टा सविता विश्वऽरूपः नकिः अस्य प्र मिनंति व्रतानि वेद नौ अस्य पृथिवी उत द्यौः॥५॥६॥ कः अस्य वेद प्रथमस्य अह्नः कः ईं ददर्श कः इह प्र वोचत् बृहत् मित्रस्य वरुणस्य धाम कत् ऊं ब्रवः आहनः वीच्या नॄन्॥६॥ यमस्य मा यम्यै कामः आ अगन् समाने योनौ सह-ऽशेय्याय जायाऽइव पत्ये तन्वं रिरिच्यां वि चित् वृहेव रथ्याऽइव चक्रा॥७॥ न तिष्ठंति न नि मिषंति एते देवानां स्पशः इह ये चरंति अन्येन मत् आहनः याहि तूयं तेन वि वृह रथ्याऽइव चक्रा॥८॥ राचीभिः असै अहऽभिः दशस्येत् सूर्यस्य चक्षुः मुहुः उत मिमीयात् दिवा पृथिव्या मिथुना सऽबंधू० यमीः यमस्य विभृयात् अजामि॥९॥ आ घ ता गच्छान् उत्ऽतरा युगानि यत्र जामयः कृणवन् अजामि उप बर्बृहि वृषभाय बाहुं अन्यं इच्छस्व सु-ऽभगे पतिं मत्॥१०॥७॥ किंभ्राता असत् यत् अनाथं भवाति किं ऊं स्वसा यत् निःऽऋतिः निऽगच्छात् कामंऽमूता बहु एतत् रपामि तन्वा मे तन्वं सं पिपृग्धि॥११॥ न वै ऊं ते तन्वा तन्वं सं पपृच्यां पापं आहुः यः स्वसारं निऽगच्छात् अन्येन मत् प्रऽमुदः कल्पयस्व न ते भ्राता सुऽभगे वष्टि एतत्॥१२॥ वतः वत असि यमन एव ते मनः हृदयं च अविदाम अन्या किल त्वां कक्ष्याऽइव

युक्तं परि स्वजाते लिबुजाऽइव वृक्षं ॥१३॥ अन्यं ऊं सु त्वं यमि अन्यः ऊं त्वां परि स्वजाते लिबुजाऽइव वृक्षं तस्य वा त्वं मनः इच्छ सः वा तवं अधं कृणुष्व संऽविदं सुऽभद्रां ॥ १४ ॥ ८ ॥

॥११॥ वृषा वृष्णे दुदुहे दोहसा दिवः पयाँसि यह्वः अदितेः अदाभ्यः विश्वं सः वेद वरुणः यथा धिया सः यज्ञियः यजतु यज्ञियान ऋतून ॥१॥ रपत गंधर्वीः अप्या च योषणा नदस्य नादे परि पातु मे मनः इष्टस्य मध्ये अदितिः नि धातु नः भ्राता नः ज्येष्ठः प्रथमः वि वोचति ॥२॥ सो चित नु भद्रा क्षुऽमती यशस्वती उषाः उवास मनवे स्वःऽवती यत ईं उशंतं उशतां अनु क्रतुं अग्निं होतारं विदथाय जीजनन ॥३॥ अधं त्यं दस्रं विऽभ्वं विऽचक्षणं विः आ अभरत इषितः श्येनः अध्वरे यदि विशः वृणते दस्रं आर्याः अग्निं होतारं अध धीः अजायत ॥४॥ सदा असि रण्वः यवसाऽइव पुष्यते होत्राभिः अग्ने मनुषः सुऽअध्वरः विप्रस्य वा यत शशमानः उक्थ्यं वाजं ससऽवान उपऽयासि भूरिऽभिः ॥५॥९॥ उत ईरय पितरा जारः आ भगं इयक्षति हर्यतः हृत्तः इष्यति विवक्ति वह्निः सुऽअपस्यते मखः तविष्यते असुरः वेपते मती ॥६॥ यः ते अग्ने सुऽमतिं मर्तः अक्षत सहसः सूनो अति सः प्रष्ठे इषं दधानः वहमानः अश्वैः आ सः द्युऽमान अमऽवान भूषति द्यून ॥७॥ यत अग्ने एषा संऽइतिः भवाति देवी देवेषु यजता यजत्रा च यत विऽभजासि स्वधाऽवः भागं नः अत्र वसुऽमंतं वीतात ॥८॥ श्रुधि नः अग्ने सदने सधऽस्थे युक्ष्व रथं अमृतस्य द्रविन्युं आ नः वह रोदसी देवऽपुत्रे० माकिः देवानां अप भूः इह स्याः ॥ ९ ॥ १० ॥

॥१२॥ द्यावा॑ ह क्षामा॑ प्रथ॒मे॑ ऋ॒तेन॑ अ॒भि ऽश्रा॒वे भ॒व॒तः स॒त्य॒ ऽवा॒चा दे॒वः यत् मर्ता॑न् य॒ज॒था॒य कृ॒ण्व॒न् सीद॑त् होता॑ प्र॒त्यङ् स्वं अस॑मुं यन् ॥१॥ दे॒वः दे॒वान् प॒रि ऽभूः ऋ॒तेन॑ वह॑ नः ह॒व्यं प्र॒थ॒मः चि॒कि॒त्वान् धूम॒ ऽकेतुः स॒म॒ ऽइ॒धा॒ भाः ऽऋ॒जी॒कः मं॒द्रः होता॑ नित्यः वा॒चा यजी॑यान् ॥२॥ स्वावृ॑क् दे॒वस्य॑ अ॒मृत॑ं यदि॑ गोः अत॑ः जा॒ता॒सः धा॒र॒यं॒ते॒ उ॒र्वी॑ विश्वे॑ दे॒वाः अनु॑ तत् ते॒ यजुः॑ गुः दु॒हे॒ यत् एनी॑ दि॒व्यं घृ॒तं वाः॑० ॥३॥ अर्चा॑मि वां॒ वर्धा॑य अप॑ः घृत॒ ऽस्नू॑० द्यावा॑भूमी॑ पृ॒णु॒तं रो॒द॒सी॒ मे॒ अहा॑ यत् द्यावः॑ अस॑मुं ऽनीति॑ं अय॑न् मध्वा॑ नः॒ अत्र॑ पि॒तरा॑ शिशीतां ॥४॥ किं स्वि॑त् नः॒ राजा॑ जगृहे॒ कत् अ॒स्य॒ अति॑ व्र॒तं च॒कृ॒म॒ कः वि वे॒द॒ मि॒त्रः चि॒त् हि स॒ जु॒हु॒रा॒णः दे॒वान् क्षोकः॑ न या॒तां अपि॑ वाजः॑ अस्ति॑ ॥५॥११॥ दुः ऽमं॑तु॒ अत्र॑ अ॒मृत॑स्य नाम॑ स ऽलक्ष्मा॑ यत् विषु॑ ऽरूपा॑ भवा॑ति॒ यम॑स्य॑ यः म॒न॒व॑ते सु ऽमं॑तु॒ अग्ने॑ तं॒ क्षु॒ष्व॒ पा॒हि॒ अप्र॑ ऽयुच्छन् ॥६॥ यस्मि॑न् दे॒वाः वि॒दथे॑ मा॒द॒यं॒ते॒ वि॒व॒स्व॒तः सद॑ने धा॒र॒यं॒ते॒ सूर्ये॑ ज्योतिः॒ अ॒-दधुः मा॒सि अ॒क्तून् परि॑ द्योत॒निं च॒र॒तः अज॑स्रा ॥७॥ यस्मि॑न् दे॒वाः मन्म॑नि सं ऽच॒रं॒ति॒ अपी॑च्ये॑ न वय॑ं अ॒स्य॒ वि॒द्म॒ मि॒त्रः नः॒ अत्र॑ अदि॑तिः अना॑गान् स॒वि॒ता दे॒वः व॒रु॒णा॒य वो॒च॒त् ॥८॥ श्रु॒धि नः॒ अग्ने॒ सद॑ने स॒धऽस्थे॑ युक्ष्व॒ रथ॑ं अ॒मृत॑स्य द्र॒वि॒त्नुं आ नः॑ व॒ह॒ रो॒द॒सी॒ दे॒व ऽपु॑चे० माकिः॑ दे॒वाना॑ं अप॑ भूः इ॒ह स्याः॑ ॥९॥१२॥

॥१३॥ युजे॑ वां॒ ब्रह्म॑ पू॒र्व्यं नमः॑ ऽभिः॒ वि श्लोकः॑ ए॒तु प॒थ्या॑ ऽइव सू॒रेः॑ शृ॒ण्व॒न्तु॒ विश्वे॑ अ॒मृत॑स्य पु॒त्राः॑ आ ये धामा॑नि दि॒व्यानि॑ त॒स्थुः॑ ॥१॥ यमे॑ ऽइव० यत॑माने॒ यत् ऐत॑ं प्र वां॑ भ॒र॒न् मानु॑षाः दे॒व॒ ऽय॒तः॑ आ सी॒द॒त॒ं स्वं ऊं॒ लो॒कं वि॒दा॒ने॒ सु॒ ऽआ॒स॒स्थे॒० भ॒व॒त॒ं इं॒द॒वे॒ नः॒

॥ २ ॥ पंच पदानि रुपः अनु अरोहं चतुःऽपदी अनु एमि व्रतेन अक्षरेण प्रति मिमे एतां ऋतस्य नाभौ अधि सं पुनामि ॥ ३ ॥ देवेभ्यः कं अवृणीत मृत्युं प्रऽजायै कं अमृतं न अवृणीत बृहस्पतिं यज्ञं अकृण्वत ऋषिं प्रियां यमः तन्वं प्र अरिरिचीत ॥ ४ ॥ सप्त क्षरंति शिशवे मरुत्वते पित्रे पुत्रासः अपि अवीवतन् ऋतं उभे इत् अस्य उभयस्य राजतः उभे यतेते उभयस्य पुष्यतः ॥ ५ ॥ १३ ॥

॥ १४ ॥ परेयिऽवांसं प्रऽवतः महीः अनु बहुऽभ्यः पंथां अनुऽपस्पशानं वैवस्वतं संऽगमनं जनानां यमं राजानं हविषा दुवस्य ॥ १ ॥ यमः नः गातुं प्रथमः विवेद न एषा गव्यूतिः अपऽभर्तवै ऊं यत्र नः पूर्वे पितरः पराऽईयुः एना जज्ञानाः पथ्याः अनु स्वाः ॥ २ ॥ मातली कव्यैः यमः अंगिरःऽभिः बृहस्पतिः ऋक्वऽभिः ववृधानः यान् च देवाः ववृधुः ये च देवान् स्वाहा अन्ये स्वधया अन्ये मदंति ॥ ३ ॥ इमं यम प्रऽस्तरं आ हि सीद अंगिरःऽभिः पितृऽभिः संऽविदानः आ त्वा मंत्राः कविऽशस्ताः वहंतु एना राजन् हविषा मादयस्व ॥ ४ ॥ अंगिरःऽभिः आ गहि यज्ञियेभिः यमं वैरूपैः इह मादयस्व विवस्वंतं हुवे यः पिता ते अस्मिन् यज्ञे बर्हिषि आ निऽसद्य ॥ ५ ॥ १४ ॥ अंगिरसः नः पितरः नवऽग्वाः अथर्वाणः भृगवः सोम्यासः तेषां वयं सुऽमतौ यज्ञियानां अपि भद्रे सौमनसे स्याम ॥ ६ ॥ प्रऽइहि प्रऽइहि पथिऽभिः पूर्व्येभिः यत्र नः पूर्वे पितरः पराऽईयुः उभा राजाना स्वधया मदंता यमं पश्यासि वरुणं च देवं ॥ ७ ॥ सं गच्छस्व पितृऽभिः सं यमेन इष्टापूर्तेन परमे विऽओमन् हित्वाय अवद्यं पुनः अस्तं आ इहि सं गच्छस्व तन्वा सुऽवर्चाः

॥८॥ अयं इत वि इत वि च सर्पत अतः असै एतं पितरः लोकं अक्रन् अहःऽभिः अतऽभिः अक्तुऽभिः विऽअक्तं यमः ददाति अवऽसानं असै ॥९॥ अति द्रव सारमेयौ श्वानौ चतुःऽअक्षौ शबलौ साधुना पथा अथ पितॄन सुऽविदत्रान उप इहि यमेन ये सधऽमादं मदंति ॥१०॥१५॥ यौ ते श्वानौ यम रक्षितारौ चतुःऽअक्षौ पथिऽरक्षी॰ नृऽचक्षसौ ताभ्यां एनं परि देहि राजन स्वस्ति च असै अनमीवं च धेहि॥११॥ उरुऽनसौ असुऽतृपौ उदुंबलौ यमस्य दूतौ चरतः जनान् अनु तौ असभ्यं दृशये सूर्याय पुनः दातां असुं अद्य इह भद्रं॥१२॥ यमाय सोमं सुनुत यमाय जुहुत हविः यमं ह यज्ञः गच्छति अग्निऽदूतः अरंऽकृतः॥१३॥ यमाय घृतऽवत हविः जुहोत प्र च तिष्ठत सः नः देवेषु आ यमत दीर्घं आयुः प्र जीवसे॥१४॥ यमाय मधुमतऽतमं राज्ञे हव्यं जुहोतन इदं नमः ऋषिऽभ्यः पूर्वऽजेभ्यः पूर्वेभ्यः पथिकृतऽभ्यः॥१५॥ चिऽकित्वभिः पतति षट् उर्वीः एकं इत बृहत चिऽस्तुप् गायत्री छंदांसि सर्वा ता यमे आऽहिता ॥ १६ ॥ १६ ॥

॥१५॥ उत ईरतां अवरे उत परासः उत मध्यमाः पितरः सोम्यासः असुं ये ईयुः अवृकाः ऋतऽज्ञाः ते नः अवंतु पितरः हवेषु ॥१॥ इदं पितृऽभ्यः नमः अस्तु अद्य ये पूर्वासः ये उपरासः ईयुः ये पार्थिवे रजसि आ निऽसत्ताः ये वा नूनं सुऽवृजनासु विक्षु॥२॥ आ अहं पितॄन सुऽविदत्रान अवित्सि नपातं च विऽक्रमणं च विष्णोः बर्हिऽसदः ये स्वधया सुतस्य भजंत पित्वः ते इह आऽगमिष्ठाः॥३॥ बर्हिऽसदः पितरः ऊती अर्वाक् इमा वः हव्या चकृम जुषध्वं ते आ गत अवसा शंऽतमेन अथ नः शं योः अरपः दधात

॥४॥ उपऽहूताः पितरः सोम्यासः बर्हिष्येषु निऽधिषु प्रियेषु ते आ गमंतु ते इह श्रुवंतु अधि ब्रुवंतु ते अवंतु अस्मान् ॥५॥१७॥ आऽअचा जानु दक्षिणतः निऽसद्य इमं यज्ञं अभि गृणीत विश्वे मा हिंसिष्ट पितरः केन चित् नः यत् वः आगः पुरुषता करांम ॥६॥ आसीनासः अरुणीनां उपऽस्थे रयिं धत्त दाशुषे मर्त्याय पुत्रेभ्यः पितरः तस्य वस्वः प्र यच्छत ते इह ऊर्जं दधात ॥७॥ ये नः पूर्वे पितरः सोम्यासः अनुऽऊहिरे सोमऽपीथं वसिष्ठाः तेभिः यमः संऽरराणः हवींषि उशन् उशतऽभिः प्रतिऽकामं अत्तु ॥८॥ ये तातृषुः देवऽत्रा जेहमानाः होत्राऽविदः स्तोमऽतष्टासः अर्कैः आ अग्ने याहि सुऽविदत्रेभिः अर्वाङ् सत्यैः कव्यैः पितृऽभिः घर्मसत्ऽभिः ॥९॥ ये सत्यासः हविःऽअदः हविःऽपाः इंद्रेण देवैः सऽरथं दधानाः आ अग्ने याहि सहस्रं देवऽवंदैः परैः पूर्वैः पितृऽभिः घर्मसत्ऽभिः ॥१०॥१८॥ अग्निऽस्वात्ताः पितरः आ इह गच्छत सदःऽसदः सदत सुऽप्रनीतयः अत्त हवींषि प्रऽयतानि बर्हिषि अथ रयिं सर्वऽवीरं दधातन ॥११॥ त्वं अग्ने ईळितः जातऽवेदः अवाट् हव्यानि सुरभीणि कृत्वी प्र अदाः पितृऽभ्यः स्वधया ते अक्षन् अद्धि त्वं देव प्रऽयता हवींषि ॥१२॥ ये च इह पितरः ये च न इह यान् च विद्म यान् उं च न प्रऽविद्म त्वं वेत्थ यति ते जातऽवेदः स्वधाभिः यज्ञं सुऽकृतं जुषस्व ॥१३॥ ये अग्निऽदग्धाः ये अनग्निऽदग्धाः मध्ये दिवः स्वधया मादयंते तेभिः स्वऽराट् असुंऽनीतिं एतां यथाऽवशं तन्वं कल्पयस्व ॥ १४ ॥ १९ ॥

॥१६॥ मा एनं अग्ने वि दहः मा अभि शोचः मा अस्य त्वचं चिक्षिपः मा शरीरं यदा शृतं कृणवः जातऽवेदः अथ ईं एनं प्र हिणु-

तात् पितृऽभ्यः ॥१॥ घृतं यदा करसि जातऽवेदः अथ ईं एनं परि दत्तात् पितृऽभ्यः यदा गच्छाति असुऽनीतिं एतां अथ देवानां वशऽनीःभवाति॥२॥ सूर्यं चक्षुः गच्छतु वातं आत्मा द्यां च गच्छ पृथिवीं च धर्मणा अपः वा गच्छ यदि तत्र ते हितं ओषधीषु प्रतिं तिष्ठ शरीरैः ॥३॥ अजः भागः तपसा तं तपस्व तं ते शोचिः तपतु तं ते अर्चिः याः ते शिवाः तन्वः जातऽवेदः ताभिः वह एनं सुऽकृतां ऊं लोकं॥४॥ अवसृज पुनः अग्ने पितृऽभ्यः यः ते आऽहुतः चरति स्वधाभिः आयुः वसानः उप वेतु शेषः सं गच्छतां तन्वा जातऽवेदः ॥५॥२०॥ यत् ते कृष्णः शकुनः आऽततोद पिपीलः सर्पः उत वा श्वापदः अग्निः तत् विश्वऽअत् अगदं कृणोतु सोमः च यः ब्राह्मणान् आऽविवेश॥६॥ अग्नेः वर्म परि गोभिः व्ययस्व सं प्र ऊर्णुष्व पीवसा मेदसा च न इत् त्वा धृष्णुः हरसा जहेषाणः दधृक् विऽधक्ष्यन् परिऽअंखयाते ॥७॥ इमं अग्ने चमसं मा वि जिह्वरः प्रियः देवानां उत सोम्यानां एषः यः चमसः देवऽपानः तस्मिन् देवाः अमृताः मादयंते ॥८॥ क्रव्यऽअदं अग्निं प्र हिणोमि दूरं यमऽराज्ञः गच्छतु रिप्रऽवाहः इह एव अयं इतरः जातऽवेदाः देवेभ्यः हव्यं वहतु प्रऽजानन्॥९॥ यः अग्निः क्रव्यऽअत् प्रऽविवेश वः गृहं इमं पश्यन् इतरं जातऽवेदसं तं हरामि पितृऽयज्ञाय देवं सः घर्मं इन्वात् परमे सधऽस्थे॥१०॥२१॥ यः अग्निः क्रव्यऽवाहनः पितॄन यक्षत् ऋतऽवृधः प्र इत ऊं हव्यानि वोचति देवेभ्यः च पितृऽभ्यः आ ॥११॥ उशंतः त्वा नि धीमहि उशंतः सं इधीमहि उशन् उशतः आ वह पितॄन् हविषे अत्तवे ॥१२॥ यं त्वं अग्ने संऽअदहः तं ऊं निः वापय पुनः कियांबु अच रोहतु पाकऽदूर्वा विऽअल्कशा ॥१३॥ शीतिके

शीतिकाऽवति ह्लादिके ह्लादिकाऽवति मंडूक्या सु संगमः इमं सु अग्निं हर्षय ॥ १४॥ २२॥ १॥

॥१७॥ त्वष्टा दुहित्रे वहतुं कृणोति इति इदं विश्वं भुवनं सं एति यमस्य माता परिऽउह्यमाना महः जाया विवस्वतः ननाश ॥१॥ अपं अगूहन् अमृतां मर्त्येभ्यः कृत्वी सऽवर्णा अददुः विवस्वते उत अश्विनौ अभरत् यत् तत् आसीत् अजहात् ऊं इति मिथुना सरण्यूः ॥२॥ पूषा त्वा इतः च्यवयतु प्र विद्वान् अनष्टऽपशुः भुवनस्य गोपाः सः त्वा एतेभ्यः परि ददत् पितृऽभ्यः अग्निः देवेभ्यः सुऽविदत्रियेभ्यः ॥३॥ आयुः विश्वऽआयुः परि पासति त्वा पूषा त्वा पातु प्रऽपथे पुरस्तात् यत्र आसते सुऽकृतः यत्र ते ययुः तत्र त्वा देवः सविता दधातु ॥४॥ पूषा इमाः आशाः अनु वेद् सर्वाः सः अस्मान् अभयऽतमेन नेषत् स्वस्तिऽदाः आघृणिः सर्वेऽवीरः अप्रऽयुच्छन् पुरः एतु प्रऽजानन् ॥५॥२३॥ प्रऽपथे पथां अजनिष्ट पूषा प्रऽपथे दिवः प्रऽपथे पृथिव्याः उभे अभि प्रियऽतमे० सधऽस्थे० आ च परा च चरति प्रऽजानन् ॥६॥ सरस्वती देवऽयंतः हवंते सरस्वती अध्वरे तायमाने सरस्वती सुऽकृतः अह्वयंत सरस्वती दाशुषे वार्यं दात ॥७॥ सरस्वति या सऽरथं ययाथ स्वधाभिः देवि पितृऽभिः मदंती आऽसद्यं अस्मिन् बर्हिषि मादयस्व अनमीवाः इषः आ धेहि अस्मे ॥८॥ सरस्वती यां पितरः हवंते दक्षिणा यज्ञं अभिऽनक्षमाणाः सहस्रऽअर्घं इळः अत्र भागं रायः पोषं यजमानेषु धेहि ॥९॥ आपः अस्मान् मातरः शुंधयंतु घृतेन नः घृतऽप्वः पुनंतु विश्वं हि रिप्रं प्रऽवहंति

देवीः उत इत आभ्यः शुचिः आ पूतः एमि॥१०॥२४॥ द्रप्सः चस्कंद प्रथमान अनु द्यून इमं च योनिं अनु यः च पूर्वः समानं योनिं अनु संऽचरंतं द्रप्सं जुहोमि अनु सप्त होत्राः ॥११॥ यः ते द्रप्सः स्कंदति यः ते अंशुः बाहुऽच्युतः धिषणायाः उपऽस्थात् अध्वर्योः वा परि वा यः पवित्रात् तं ते जुहोमि मनसा वषट्ऽकृतं ॥१२॥ यः ते द्रप्सः स्कन्नः यः ते अंशुः अवः च यः परः स्रुचा अयं देवः बृहस्पतिः सं तं सिंचतु राधसे ॥१३॥ पयस्वतीः ओषधयः पयस्वत् मामकं वचः अपां पयस्वत् इत् पयः तेन मा सह सृंधत ॥१४॥२५॥

॥१८॥ परः मृत्यो अनु परा इहि पंथां यः ते स्वः इतरः देवऽयानात् चक्षुष्मते शृण्वते ते ब्रवीमि मा नः प्रऽजां रिरिषः मा उत वीरान्॥१॥ मृत्योः पदं योपयंतः यत् एत द्राघीयः आयुः प्रऽतरं दधानाः आऽप्यायमानाः प्रऽजया धनेन शुद्धाः पूताः भवत यज्ञियासः॥२॥ इमे जीवाः वि मृतैः आ अववृचन अभूत भद्रा देवऽहूतिः नः अद्य प्राचैः अगाम नृतये हसाय द्राघीयः आयुः प्रऽतरं दधानाः॥३॥ इमं जीवेभ्यः परिऽधिं दधामि मा एषां नु गात् अपरः अर्थं एतं शतं जीवंतु शरदः पुरूचीः अंतः मृत्युं दधतां पर्वतेन ॥४॥ यथा अहानि अनुऽपूर्वं भवंति यथा ऋतवः ऋतुऽभिः यंति साधु यथा न पूर्वं अपरः जहाति एव धातः आयूंषि कल्पय एषां ॥५॥२६॥ आ रोहत आयुः जरसे वृणानाः अनुऽपूर्वं यतमानाः यति स्थ इह त्वष्टा सुऽजनिमा सऽजोषाः दीर्घं आयुः करति जीवसे वः॥६॥ इमाः नारीः अविधवाः सुऽपत्नीः आऽअंजनेन सर्पिषा सं विशंतु अनश्रवः अनमीवाः सुऽरत्नाः आ रोहंतु जनयः योनिं

अयै॥ ७॥ उत् ईर्ष्व नारि अभि जीवऽलोकं गतऽअसुं एतं उप शेषेआ इहि हस्तऽग्राभस्य दिधिषोः तव इदं पत्युः जनिऽत्वं अभि सं बभूथ॥८॥ धनुः हस्तात् आऽददानः मृतस्य असे क्षत्राय वर्चसे बलाय अयं एव त्वं इह वयं सुऽवीराः विश्वाः स्पृधः अभिऽमातीः जयेम॥९॥ उप सर्प मातरं भूमिं एतां उरुऽव्यचसं पृथिवीं सुऽशेवां ऊर्णऽम्रदाः युवतिः दक्षिणाऽवते एषा त्वा पातु निःऽऋतेः उपऽस्थात्॥१०॥२७॥ उत् ष्वंचस्व पृथिवि मा नि बाधथाः सुऽउपायना असै भव सुऽउपवंचना माता पुत्रं यथा सिचा अभि एनं भूमे ऊर्णुहि॥११॥ उतऽष्वंचमाना पृथिवी सु तिष्ठतु सहस्रं मितः उप हि श्रयंतां ते गृहासः घृतऽश्चुतः भवंतु विश्वाहा असै शरणाः संतु अयं॥१२॥ उत् ते स्तभ्नामि पृथिवीं त्वत् परि इमं लोगं निऽदधत् मो अहं रिषं एतां स्थूणां पितरः धारयंतु ते अयं यमः सदना ते मिनोतु॥१३॥ प्रतीचीनं मां अहनि इष्वाः पर्णऽइव आ दधुः प्रतीचीं जयभ्वाचं अश्वं रथ्यनया यथा ॥ १४ ॥ २८ ॥ ६ ॥

॥१९॥ नि वर्तध्वं मा अनु गात अस्मान् सिसक्त रेवतीः अग्नीषोमा पुनःऽवसू॰ असे धारयतं रयिं॥१॥ पुनः एनाः नि वर्तय पुनः एनाः नि आ कुरु इंद्रः एनाः नि यच्छतु अग्निः एनाः उपऽअजतु॥२॥ पुनः एताः नि वर्तंतां अस्मिन् पुष्यंतु गोऽपतौ इह एव अग्ने नि धारय इह तिष्ठतु या रयिः॥३॥ यत् निऽयानं निऽअयनं संऽज्ञानं यत् पराऽअयनं आऽवर्तनं निऽवर्तनं यः गोपाः अपि तं हुवे॥४॥ यः उतऽआनट् विऽअयनं यः उतऽआनट् पराऽअयनं आऽवर्तनं निऽवर्तनं अपि गोपाः नि वर्तंतां॥५॥

आ निऽवर्त नि वर्तय पुनः नः इंद्र गाः देहि जीवाभिः भुनजामहै ॥६॥ परि वः विश्वतः दधे ऊर्जा घृतेन पयसा ये देवाः के च यज्ञियाः ते रय्या सं सृजंतु नः ॥७॥ आ निऽवर्तन वर्तय नि निऽवर्तन वर्तय भूम्याः चतसः प्रऽदिशः ताभ्यः एनाः नि वर्तय ॥ ८ ॥ १ ॥

॥२०॥ भद्रं नः अपि वातय मनः॥१॥ अग्निं ईळे भुजां यविष्ठं शासा मिचं दुःऽधरीतुं यस्य धर्मन् स्वः एनीः सपर्यंति मातुः ऊधः ॥२॥ यं आसा कृपऽनीळं भासाऽकेतुं वर्धयंति भाजंते श्रेणिऽदन् ॥३॥ अर्यः विशां गातुः एति प्र यत् आनंद् दिवः अंतान् कविः अभं दीद्यानः॥४॥ जुषत् हव्या मानुषस्य ऊर्ध्वः तस्थौ ऋभ्वा यज्ञे मिन्वन् सध्र पुरः एति ॥५॥ सः हि क्षेमः हविः यज्ञः श्रुष्टी इत अस्य गातुः एति अग्निं देवाः वाशीऽमंतं ॥६॥२॥ यज्ञऽसहं दुवः इषे अग्निं पूर्वस्य शेवस्य अद्रेः सूनुं आयुं आहुः ॥७॥ नरः ये के च अस्मत् आ विश्वा इत ते वामे आ स्युः० अग्निं हविषा वर्धतः॥८॥ कृष्णः श्वेतः अरुषः यामः अस्य बध्नः ऋजः उत शोणः यशस्वान् हिरण्यऽरूपं जनिता जजान ॥९॥ एव ते अग्ने विऽमदः मनीषां ऊर्जः नपात् अमृतेभिः सऽजोषाः गिरः आ वक्षत् सुऽमतीः इयानः इषं ऊर्जं सुऽक्षितिं विश्वं आ अभाः० ॥ १० ॥ ३ ॥

॥२१॥ आ अग्निं न स्ववृक्तिऽभिः होतारं त्वा वृणीमहे यज्ञाय स्तीर्णऽबर्हिषे वि वः मदे शीरं पावकऽशोचिषं विवक्षसे॥१॥ त्वां ऊं ते सुऽआभुवः शुंभंति अश्वऽराधसः वेति त्वां उपऽसेचनी वि वः मदे ऋजीतिः अग्ने आऽहुतिः विवक्षसे॥२॥ त्वे धर्माणः आ-

सते जुहूभिः सिंचतीःऽइव कृष्णा रूपाणि अर्जुना वि वः मदे विश्वाः अधि श्रियः धिषे विवक्षसे ॥३॥ यं अग्ने मन्यसे रयिं सहसाऽवन् अमर्त्य तं आ नः वाजंऽसातये वि वः मदे यज्ञेषु चित्रं आ भर विवक्षसे ॥४॥ अग्निः जातः अथर्वणा विदत् विश्वानि काव्या भुवत् दूतः विवस्वतः वि वः मदे प्रियः यमस्य काम्यः विवक्षसे ॥५॥४॥ त्वां यज्ञेषु ईळते अग्ने प्रऽयति अध्वरे त्वं वसूनि काम्या वि वः मदे विश्वा दधासि दाशुषे विवक्षसे ॥६॥ त्वां यज्ञेषु ऋत्विजं चारुं अग्ने नि सेदिरे घृतऽप्रतीकं मनुषः वि वः मदे शुक्रं चेतिष्ठं अक्षऽभिः विवक्षसे ॥७॥ अग्ने शुक्रेण शोचिषा उरु प्रथयसे बृहत् अभिऽक्रंदन् वृषऽयसे वि वः मदे गर्भं दधासि जामिषु विवक्षसे ॥ ८ ॥ ५ ॥

॥२२॥ कुह श्रुतः इंद्रः कस्मिन् अद्य जने मित्रः न शूयते ऋषीणां वा यः क्षये गुहा वा चकृषे गिरा ॥१॥ इह श्रुतः इंद्रः अस्मे अद्य स्तवे वज्री ऋचीषमः मित्रः न यः जनेषु आ यशः चक्रे असामि आ ॥२॥ महः यः पतिः शवसः असामि आ महः नृम्णस्य तूतुजिः भर्ता वज्रस्य धृष्णोः पिता पुत्रंऽइव प्रियं ॥३॥ युजानः अश्वा वातस्य धुनी देवः देवस्य वज्रिऽवः स्यंता पथा विरुक्मता सृजानः स्तोषि अध्वनः ॥४॥ त्वं त्या चित् वातस्य अश्वा आ अगाः ऋज्रा तमना वहध्यै ययोः देवः न मर्त्यः यंता नकिः विदाय्यः ॥५॥६॥ अधं गमंता उशना पृच्छते वां कतऽअर्था नः आ गृहं आ जग्मथुः परावात् दिवः च ग्मः च मर्त्यं ॥६॥ आ नः इंद्र पृक्षसे अस्माकं ब्रह्म उतऽयतं तत् त्वा याचामहे अवः शुष्णं यत् हन् अमानुषं ॥७॥ अकर्मा दस्युः अभि नः अमंतुः अन्यऽव्रतः अमानुषः त्वं तस्य अ-

मिचऽहन् वधः दासस्य दंभय ॥८॥ त्वं नः इंद्र शूर शूरैः उत त्वाऽऊतासः बर्हणा पुरूऽचा ते वि पूर्तयः नवंत क्षोणयः यथा ॥९॥ त्वं तान् वृचऽहत्ये चोदयः नॄन् कार्पाणे शूर वज्रिऽवः गुहा यदि कवीनां विशां नक्षचऽशवसां ॥१०॥७॥ मक्षु ता ते इंद्र दानऽअंप्रसः आक्षाणे शूर वज्रिऽवः यत् ह शुष्णस्य दंभयः जातं विश्वं सयावंऽभिः ॥११॥ मा अकुध्यक् इंद्र शूर वस्वीः अस्मे भूवन् अभिष्टयः वयंऽवयं ते आसां सुम्ने स्याम वज्रिऽवः ॥१२॥ अस्मे ता ते इंद्र संतु सत्या अहिंसंतीः उपऽस्पृशः विद्याम यासां भुजः धेनूनां न वज्रिऽवः ॥१३॥ अहस्ता यत् अपदी वर्धत क्षाः शचीभिः वेद्यानां शुष्णं परि प्रऽदक्षिणित् विश्वऽआयवे नि शिश्नथः ॥१४॥ पिबंऽपिब इत इंद्र शूर सोमं मा रिषण्यः वसवान वसुः सन् उत चायस्व गृणतः मघोनः महः च रायः रेवतः कृधि नः ॥ १५ ॥ ८ ॥

॥२३॥ यजामहे इंद्रं वज्रंऽदक्षिणं हरींणां रथ्यं विऽवंतानां प्र श्मश्रु दोधुवत् ऊर्ध्वऽथा भूत् वि सेनाभिः दयमानः वि राधसा ॥१॥ हरी नु अस्य या वनें विदे वसुं इंद्रः मघैः मघऽवा वृचऽहा भुवत् ऋभुः वाजः ऋभुक्षाः पत्यते शवः अव क्ष्णौमि दासस्य नाम चित् ॥२॥ यदा वज्रं हिरण्ययं इत् अथ रथं हरी यं अस्य वहतः वि सूरिऽभिः आ तिष्ठति मघऽवा सनंऽश्रुतः इंद्रः वाजस्य दीर्घऽश्रवसः पतिः ॥३॥ सो चित् नु वृष्टिः यूथ्या स्वा सचा इंद्रः श्मश्रूणि हरिता अभि प्रुष्णुते अव वेति सुऽक्षयं सुते मधु उत इत् धूनोति वातः यथा वनं ॥४॥ यः वाचा विऽवाचः मृध्रऽवाचः पुरु सहस्रा अशिवा जघान ततऽतंत् इत् अस्य पौंस्यं गृणीमसि पिताऽइव

यः तविषी ववृधे शवः ॥ ५ ॥ स्तोमं ते इंद्र विऽमदाः अजीजनन् अपूर्व्यं पुरुऽतमं सुऽदानवे विश्म हि अस्य भोजनं इनस्य यत् आ पशुं न गोपाः करामहे ॥ ६ ॥ माकिः नः एना सख्या वि यौषुः तव च इंद्र विऽमदस्य च ऋषेः विश्म हि ते प्रऽमतिं देव जामिऽवत् असे ते संतु सख्या शिवानि ॥ ७ ॥ ९ ॥

॥२४॥ इंद्र सोमं इमं पिव मधुऽमंतं चमू सुतं असे रयिं नि धारय वि वः मदे सहस्रिणं पुरुऽवसो० विवक्षसे ॥१॥ त्वां यज्ञेभिः उक्थैः उप हव्येभिः ईमहे शचीऽपते शचीनां वि वः मदे श्रेष्ठं नः धेहि वार्यं विवक्षसे ॥२॥ यः पतिः वार्याणां असि रध्रस्य चोदिता इंद्र स्तोतॄणां अविता वि वः मदे द्विषः नः पाहि अंहसः विवक्षसे ॥३॥ युवं शक्रा मायाऽविना संऽईची० निः अमंथतं विऽमदेन यत् ईळिता नासत्या निःऽअमंथतं ॥४॥ विश्वे देवाः अकृपंत संऽईच्योः निःऽपतंत्योः नासत्यौ अब्रुवन् देवाः पुनः आ वहतात् इति ॥५॥ मधुऽमत् मे पराऽअयनं मधुऽमत् पुनः आऽअयनं ता नः देवा देवतया युवं मधुऽमतः कृतं ॥ ६ ॥ १० ॥

॥२५॥ भद्रं नः अपि वातय मनः दक्षं उत क्रतुं अध ते सख्ये अंधसः वि वः मदे रणन् गावः न यवसे विवक्षसे ॥१॥ हृदिऽस्पृशः ते आसते विश्वेषु सोमधामऽसु अध कामाः इमे मम वि वः मदे वि तिष्ठंते वसुऽयवः विवक्षसे ॥२॥ उत व्रतानि सोम ते प्र अहं मिनामि पाक्या अध पिताऽइव सूनवे वि वः मदे मृळ नः अभि चित् वधात् विवक्षसे ॥३॥ सं ऊं प्र यंति धीतयः सगोसः अव-

तान्ऽइव ऋतुं नः सोम जीवसे वि वः मदे धारयं चमसान्ऽइव विवक्षसे ॥४॥ तवं त्ये सोम शक्तिऽभिः निऽकामासः वि ऋणिरे गृत्सस्य धीराः तवसः वि वः मदे व्रजं गोऽमंतं अश्विनं विवक्षसे ॥५॥११॥ पष्पुं नः सोम रक्षसि पुरुऽचा विऽस्थितं जगत् संऽआ कृणोषि जीवसे वि वः मदे विश्वा संऽपश्यन् भुवना विवक्षसे ॥६॥ त्वं नः सोम विश्वतः गोपाः अदाभ्यः भव सेधं राजन् अप स्रिधः वि वः मदे मा नः दुःऽशंसः ईशत विवक्षसे ॥७॥ त्वं नः सोम सुऽक्रतुः वयःऽधेयाय जागृहि क्षेचवित्ऽतरः मनुषः वि वः मदे दुहः नः पाहि अंहसः विवक्षसे ॥८॥ त्वं नः वृचहनऽतम इंद्रस्य इंदो शिवः सखा यत् सीं हवंते संऽइये वि वः मदे युध्यमानाः तोकऽसातौ विवक्षसे ॥९॥ अयं घ सः तुरः मदः इंद्रस्य वर्धत प्रियः अयं कक्षीवंतः महः वि वः मदे मतिं विप्रस्य वर्धयत् विवक्षसे ॥१०॥ अयं विप्राय दाशुषे वाजान् इयर्ति गोऽमंतः अयं सप्तऽभ्यः आ वरं वि वः मदे प्र अंधं श्रोणं च तारिषत् विवक्षसे ॥ ११ ॥ १२ ॥

॥२६॥ प्र हि अच्छ मनीषाः स्पार्हाः यंति निऽयुतः प्र दस्रा नियुतऽरथः पूषा अविष्टु माहिनः ॥१॥ यस्य त्यत् महिऽत्वं वाताप्यं अयं जनः विप्रः आ वंसत् धीतिऽभिः चिकेत सुऽस्तुतीनां ॥२॥ सः वेद सुऽस्तुतीनां इंदुः न पूषा वृषा अभि पुरः प्रुषायति व्रजं नः आ प्रुषायति ॥३॥ मंसीमहि त्वा वयं अस्माकं देव पूषन् मतीनां च साधनं विप्राणां च आऽधवं ॥४॥ प्रतिऽअर्धिः यज्ञानां अश्वऽहयः रथानां ऋषिः सः यः मनुःऽहितः विप्रस्य यवयत्ऽसखः ॥५॥१३॥ आऽधीषमाणायाः पतिः सुचायाः च सुचस्य च वासःऽवायः अवीनां आ वासांसि ममृजत् ॥६॥ इनः वाजानां प-

तिः इनः पुष्टीनां सखा प्रशस्तुः हर्यतः दूधोत् वि वृषा यः अदाभ्यः ॥७॥ आ ते रथस्य पूषन् अजाः धुरं ववृत्युः विश्वस्य अर्थिनः सखा सनः अजाः अनपऽच्युतः ॥८॥ अस्माकं ऊर्जा रथं पूषा अविष्टु माहिनः भुवत् वाजानां वृधः इमं नः शृणवत् हवं ॥९॥१४॥

॥२७॥ असत् सु मे जरितः सः अभिऽवेगः यत् सुन्वते यजमानाय शिक्षं अनाशीःऽदां अहं अस्मि प्रऽहंता सत्यऽध्वृतं वृजिनऽयंतं आभुं ॥१॥ यदि इत अहं युधये संऽनयानि अदेवऽयून् तन्वा शूशुजानान् अमा ते तुम्रं वृषभं पचानि तीव्रं सुतं पंचऽदशं नि सिंचं ॥२॥ न अहं तं वेद यः इति ब्रवीति अदेवऽयून् संऽअरणे जघन्वान् यदा अवऽअख्यत् संऽअरणं ऋघावत् आत इत् ह मे वृषभा प्र ब्रुवंति ॥३॥ यत् अज्ञातेषु वृजनेषु आसं विश्वे सतः मघऽवानः मे आसन् जिनामि वा इत् क्षेमे आ संतं आभुं प्रतं क्षिणां पर्वते पादऽगृह्यं ॥४॥ न वै ऊं मां वृजने वारयंते न पर्वतासः यत् अहं मनस्ये ममत् स्वनात् कृधुऽकर्णः भयाते एव इत् अनु द्यून् किरणः संऽएजात् ॥५॥१५॥ दर्शन् नु अत्र शृतऽपान् अनिंद्रान् बाहुऽक्षदः शरवे पत्यमानान् घृषुं वा ये निनिदुः सखायं अधि ऊं नु एषु पवयः ववृत्युः ॥६॥ अभूः ऊं औक्षीः वि ऊं आयुः आनट् दर्षत् नु पूर्वः अपरः नु दर्षत् इमे पवस्ते परि तं नभूतः यः अस्य पारे रजसः विवेष ॥७॥ गावः यवं प्रऽयुताः अर्यः अक्षन् ताः अपश्यं सहऽगोपाः चरंतीः हवाः इत् अर्यः अभितः सं आयन् कियत् आसु स्वऽपतिः छंदयाते ॥८॥ सं यत् वयं यवसऽअदः जनानां अहं यवऽअदः उरुऽअजे अंतः अत्र युक्तः अवऽसातारे इच्छात् अधीं अयुक्त युनजत् ववन्वान् ॥९॥ अत्र इत् ऊं मे मंससे

सत्यं उक्तं द्विऽपात् च यत् चतुःऽपात् संऽमृजानि स्त्रीभिः यः अचं वृषणं पृतन्यात् अयुद्धः अस्य वि भजानि वेदः ॥१०॥१६॥ यस्य अनक्षा दुहिता जातु आस कः तां विद्वान् अभि मन्यात् अंधां कतरः मेनिं प्रति तं मुचाते यः ईं वहाते यः ईं वा वरेऽयात् ॥११॥ कियती योषा मर्यतः वधूऽयोः परिऽप्रीता पन्यसा वार्येण भद्रा वधूः भवति यत् सुऽपेशाः स्वयं सा मित्रं वनुते जने चित् ॥१२॥ पत्तः जगार प्रत्यंचं अत्ति शीर्ष्णा शिरः प्रति दधौ वरूथं आसीनः ऊर्ध्वा उपसि क्षिणाति न्यङ् उत्तानां अनु एति भूमिं ॥१३॥ बृहन् अच्छायः अपलाशः अवीं तस्थौ माता विऽसितः अत्ति गर्भः अन्यस्याः वत्सं रिहती मिमाय कया भुवा नि दधे धेनुः ऊधः ॥१४॥ सप्त वीरासः अधरात् उत् आयन् अष्ट उत्तरात् तात् सं अजग्मिरन् ते नव पश्चात् तात् स्थिविऽमंतः आयन् दश प्राक् सानु वि तिरंति अश्नः ॥१५॥१७॥ दशानां एकं कपिलं समानं तं हिन्वंति क्रतवे पायायै गर्भं माता सुऽधितं वक्षणासु अवेनंतं तुषयंती बिभर्ति ॥१६॥ पीवानं मेषं अपचंत वीराः निऽउप्नाः अक्षाः अनु दीवे आसन् द्वा धनुं बृहतीं अप्ऽसु अंतः पविचंऽवंता चरतः पुनंता ॥१७॥ वि क्रोशनासः विष्वंचः आयन् पचाति नेमः नहि पक्षत् अर्धः अयं मे देवः सविता तत् आह दुऽअंचः इत् वनवत् सर्पिःऽअंचः ॥१८॥ अपश्यं यामं वहमानं आरात् अचक्रया स्वधया वर्तमानं सिसक्ति अर्यः प्र युगा जनानां सद्यः शिष्ठा प्रऽमिनानः नवीयान् ॥१९॥ एतौ मे गावौ प्रऽमरस्य युक्तौ मो सु प्र सेधीः मुहुः इत् ममंधि आपः चित् अस्य वि नशंति अर्थं सूरः च मर्कः उपरः बभूवान् ॥२०॥१८॥ अयं यः वज्रः पुरुधा विऽवृत्तः अवः सूर्यस्य बृहतः पुरीषात् अवः इत् एना परः अन्यत् अस्ति तत् अभ्य-

थी जरिमाणः तरंति ॥२१॥ वृक्षेऽवृक्षे निऽयंता मीमयत् गौः ततः वयः प्र पतान् पुरुषऽअदः अथ इदं विश्वं भुवनं भयाते इंद्राय सुन्वत् ऋषये च शिक्षत ॥२२॥ देवानां माने प्रथमाः अतिष्ठन् कृंतत्रात् एषां उपराः उत् आयन् चयः तपंति पृथिवी अनूपाः ह्वा बृबूकं वहतः पुरीषं ॥२३॥ सा ते जीवातुः उत तस्य विद्धि मा स्म एताहक् अप गूहः सऽमर्ये आविः स्वः॰ कृणुते गूहते बुसं सः पादुः अस्य निःऽनिजः न मुच्यते ॥ २४ ॥ १९ ॥

॥२८॥ विश्वः हि अन्यः अरिः आऽजगाम मम इत् अह श्वपुरः न आ जगाम जक्षीयात् धानाः उत सोमं पपीयात् सुऽआंशितः पुनः अस्तं जगायात् ॥१॥ सः रोरुवत् वृषभः तिग्मऽशृंगः वर्ष्मन् तस्थौ वरिमन् आ पृथिव्याः विश्वेषु एनं वृजनेषु पामि यः मे कुक्षी सुतऽसोमः पृणाति ॥२॥ अद्रिणा ते मंदिनः इंद्र तूयान् सुन्वंति सोमान् पिबसि त्वं एषां पचंति ते वृषभान् अत्सि तेषां पृक्षेण यत् मघऽवन् हूयमानः ॥३॥ इदं सु मे जरितः आ चिकिद्धि प्रतिऽइदं शापं नद्यः वहंति लोपाशः सिंहं प्रत्यंचं अत्साः क्रोष्टा वराहं निः अतक्त कक्षात् ॥४॥ कथा ते एतत् अहं आ चिकेतं गृत्सस्य पाकः तवसः मनीषां त्वं नः विद्वान् ऋतुऽथा वि वोचः यं अर्धं ते मघऽवन् क्षेम्या धूः ॥५॥ एव हि मां तवसं वर्धयंति दिवः चित् मे बृहतः उत्ऽतरा धूः पुरुसहस्रा नि शिशामि साकं अशत्रुं हि मा जनिता जजान ॥६॥२०॥ एव हि मां तवसं जज्ञुः उग्रं कर्मन्ऽकर्मन् वृषणं इंद्र देवाः वधीं वृत्रं वज्रेण मंदसानः अप व्रजं महिना दाशुषे वं ॥७॥ देवासः आयन् परशून् अबिभ्रन् वना वृश्चंतः अभि विदऽभिः आयन् नि सुऽद्वं दधतः वक्षणासु यत्र कृ-

पीटं अनु तत् दहंति ॥८॥ शशः क्षुरं प्रत्यंचं जगार अदिं लोगेन वि अभेदं आरात् बृहंतं चित् ऋहते रंधयानि वर्यत् वत्सः वृषभं भू-ष्णुवानः ॥९॥ सुऽपर्णः इत्था नखं आ सिसाय अवऽरुद्धः परिऽपदै न सिंहः निऽरुद्धः चित् महिषः तर्ष्याऽवान् गोधा तस्मै अयथं कर्षत् एतत् ॥१०॥ तेभ्यः गोधा अयथं कर्षत् एतत् ये ब्रह्मणः प्रति-ऽपीयंति अन्नैः सिमः उक्षणः अवऽसृष्टान् अदंति स्वयं बलानि तन्वः पृणानाः ॥११॥ एते शमीभिः सुऽशमी अभूवन् ये हिन्विरे तन्वः सोमे उक्थ्यैः नृऽवत् वदन् उपनः माहि वाजान् दिवि श्रवः दधिषे नाम वीरः ॥ १२ ॥ २१ ॥

॥२९॥ वने न वा यः नि अधायि चाकन् शुचिः वां स्तोमः भुर-ण्यो अजीगः यस्य इत् इंद्रः पुरुऽदिनेषु होता नृणां नरयैः नृऽतमः क्षपाऽवान् ॥१॥ प्र ते अस्याः उषसः प्र अपरस्याः नृतौ स्याम नृऽतमस्य नृणां अनु चिऽशोकः शतं आ अवहत् नृन् कुत्सेन रथः यः असत् ससऽवान् ॥२॥ कः ते मदः इंद्र रंत्यः भूत् दुरः गिरः अभि उग्यः वि धाव् कत् वाहः अर्वाक् उप मा मनीषा आ त्वा शक्यां उपऽमं राधः अन्नैः ॥३॥ कत् ऊं द्युम्नं इंद्र त्वाऽवतः नृन् कया धिया करसे कत् नः आ अगन् मित्रः न सत्यः उरुऽगाय भृत्यै अन्ने सम-स्य यत् असन् मनीषाः ॥४॥ प्र ईरय सूरः अर्थं न पारं ये अस्य कामं जनिधाःऽइव ग्मन् गिरः च ये ते तुविऽजात पूर्वीः नरः इंद्र प्रतिऽशिक्षंति अन्नैः ॥५॥२२॥ माचे नु ते सुऽमितेः इंद्र पूर्वी द्यौः मज्मना पृथिवी काव्येन वरांय ते घृतऽवंतः सुतासः स्वाद्मन् भवंतु पीतये मधूनि ॥६॥ आ मध्वः अस्मै असिचन अमंचं इंद्राय पूर्णं सः हि सत्यऽराधाः सः ववृधे वरिमन् आ पृथिव्याः अभि

कृत्वा नर्यः पौंस्यैः च ॥७॥ वि आनट् इंद्रः पृतनाः सुऽओजाः आ अस्मै यतंते सख्याय पूर्वीः आ स्म रथं न पृतनासु तिष्ठ यं भद्रया सुऽमत्या चोदयासे ॥ ८ ॥ २३ ॥ २ ॥

॥३०॥ प्र देवऽच्छा ब्रह्मणे गातुः एतु अपः अच्छ मनसः न प्रऽयुक्ति महीं मित्रस्य वरुणस्य धासिं पृथुऽज्रयसे रीरधसुऽवृक्तिं॥१॥ अध्वर्यवः हविष्मंतः हि भूत अच्छ अपः इत उशतीः उशंतः अवयाः चष्टे अरुणः सुऽपर्णः तं आ अस्यध्वं ऊर्मिं अद्य सुऽहस्ताः॥२॥ अध्वर्यवः अपः इत समुद्रं अपां नपातं हविषा यजध्वं सः वः ददत् ऊर्मिं अद्य सुऽपूतं तस्मै सोमं मधुऽमंतं सुनोत॥३॥ यः अनिध्मः दीदयत् अप्ऽसु अंतः यं विप्रासः ईळते अध्वरेषु अपां नपात् मधुऽमतीः अपः दाः याभिः इंद्रः ववृधे वीर्याय॥४॥ याभिः सोमः मोदते हर्षते च कल्याणीभिः युवतिऽभिः न मयैः ताः अध्वर्यो अपः अच्छ परा इहि यत् आऽसिंचाः ओषधीभिः पुनीतात् ॥५॥२४॥ एव इत् यूने युवतयः नमंत यत् ईं उशन् उशतीः एति अच्छ सं जानते मनसा सं चिकित्रे अध्वर्यवः धिषणा आपः च देवीः॥६॥ यः वः वृताभ्यः अकृणोत् ऊं लोकं यः वः मह्याः अभिऽशस्तेः अमुंचत् तस्मै इंद्राय मधुऽमंतं ऊर्मिं देवऽमादनं प्र हिणोतन आपः॥७॥ प्र अस्मै हिनोत मधुऽमंतं ऊर्मिं गर्भः यः वः सिंधवः मध्वः उत्सः घृतऽपृष्ठं ईड्यं अध्वरेषु आपः रेवतीः शृणुत हवं मे॥८॥ तं सिंधवः मत्सरं इंद्रऽपानं ऊर्मिं प्र हेत यः उभे इयर्ति मदऽच्युतं औशनं नभःऽजां परि चिऽततुं विऽचरंतं उत्सं॥९॥ आऽववृत्ततीः अध नु द्विऽधाराः गोषुऽयुधः न निऽयवं चरंतीः ऋषे जनित्रीः भुवनस्य पत्नीः अपः वंदस्व सऽवृधः सऽयोनीः

॥१०॥२५॥ हिनोत नः अध्वरं देवऽयज्या हिनोत ब्रह्म सनये धनानां ऋतस्य योगे वि स्यध्वं ऊधः मुष्टीऽवरीः भूतन अस्मभ्यं आपः ॥११॥ आपः रेवतीः क्षयथ हि वस्वः ऋतुं च भद्रं बिभृथ अमृतं च रायः च स्थ मुऽअपत्यस्य पत्नीः सरस्वती तत् गृणते वयः धात् ॥१२॥ प्रति यत् आपः अदृश्रं आऽयतीः घृतं पयांसि बिभ्रतीः मधूनि अध्वर्युऽभिः मनसा संऽविदानाः इंद्राय सोमं सुऽसुतं भरंतीः ॥१३॥ आ इमाः अग्मन् रेवतीः जीवऽधन्याः अध्वर्यवः सादयत सखायः नि बर्हिषि धत्तन सोम्यासः अपां नप्त्रा संऽविदानासः एनाः ॥१४॥ आ अग्मन् आपः उशतीः बर्हिः आ इदं नि अध्वरे असदन् देवऽयंतीः अध्वर्यवः सुनुत इंद्राय सोमं अभूत ऊं वः मुऽशका देवऽयज्या ॥ १५ ॥ २६ ॥

॥३१॥ आ नः देवानां उप वेतु शंसः विश्वेभिः तुरैः अवसे यजत्रः तेभिः वयं मुऽसखायः भवेम तरंतः विश्वा दुःऽइता स्याम ॥१॥ परि चित् मर्तः द्रविणं ममन्यात् ऋतस्य पथा नमसा आ विवासेत् उत स्वेन क्रतुना सं वदेत श्रेयांसं दक्षं मनसा जगृभ्यात् ॥२॥ अधायि धीतिः असमृत्यं अंशोः तीर्थे न दस्मं उप यंति ऊमाः अभि आनशुः सुवितस्य भूषं नवेदसः अमृतानां अभूम ॥३॥ नित्यः चाकन्यात् स्वऽपतिः दमूनाः यस्मै ऊं देवः सविता जजान भगः वाः गोभिः अर्यमा ईं अनज्यात् सः अस्मै चारुः छदयत् उत स्यात् ॥४॥ इयंसा भूयाः उषसांऽइव क्षाः यत् ह क्षुऽमंतः शवसा संऽआयन् अस्य स्तुतिं जरितुः भिक्षमाणाः आ नः शग्मासः उप यंतु वाजाः ॥५॥२७॥ अस्य इत् एषा सुऽमतिः पप्रथाना अभवत् पूर्व्या भूमना गौः अस्य सऽनीळाः असुरस्य योनौ समाने आ भरणे

बिभ्रमाणाः॥६॥ किंस्वित् वनैकः कुं सः वृक्षः आस यतः द्यावा-पृथिवी निःऽततक्षुः संऽतस्थाने० अजरे इतःऽऊती० अहानि पूर्वीः उषसः जरंत॥७॥ न एतावत् एना परः अन्यत् अस्ति उक्षा सः द्यावापृथिवी बिभर्ति त्वचं पविं कृणुत स्वधाऽवान् यत् ईं सूर्यं न हरितः वहंति॥८॥ स्तेगः न क्षां अति एति पृथ्वीं मिहं न वातः वि ह वाति भूम मित्रः यत्र वरुणः अज्यमानः अग्निः वने न वि असृष्ट शोकै॥९॥ स्तरीः यत् सूत सद्यः अज्यमाना व्यथिः अव्यथीः कृणुत स्वऽगोपा पुत्रः यत् पूर्वैः पित्रोः जनिष्ट शम्यां गौः जगार यत् ह पृच्छान्॥१०॥ उत कर्णे नृऽसदः पुत्रं आहुः उत श्यावः धनं आ अदत्त वाजी प्र कृष्णाय रुशत् अपिन्वत् ऊधः ऋतं अत्र नकिः अस्मै अपीपेत्॥११॥२८॥

॥३२॥ प्र सुग्मंता धियसानस्य सक्षणिं वरेभिः वरान् अभि सु प्रऽसीदतः अस्माकं इंद्रः उभयं जुजोषति यत् सोम्यस्य अंधसः बुबोधति॥१॥ वि इंद्र यासि दिव्यानि रोचना वि पार्थिवानि रजसा पुरुऽस्तुत ये त्वा वहंति मुहुः अध्वरान उप ते सु वन्वंतु वग्वनान् अराधसः॥२॥ तत् इत् मे छंत्सत् वपुषः वपुःऽतरं पुत्रः यत् जानं पित्रोः अधिऽइयति जाया पतिं वहति वसुना सुऽमत् पुंसः इत् भद्रः वहतुः परिऽकृतः॥३॥ तत् इत् सधऽस्थं अभि चारु दीधयत् गावः यत् शासन् वहतुं न धेनवः माता यत् मंतुः यूथस्य पूर्व्या अभि वाणस्य सप्नऽधातुः इत् जनः॥४॥ प्र वः अच्छ रिरिचे देवऽयुः पदं एकः रुद्रेभिः याति तुर्वणिः जरा वा येषु अमृतेषु दावने परि वः ऊमेभ्यः सिंचत मधु॥५॥२९॥ निऽधीयमानं अपऽगूळ्हं अप्ऽसु प्र मे देवानां व्रतऽपाः उवाच इंद्रः विद्वान् अनु

हि त्वा चचक्ष तेन अहं अग्ने अनुऽशिष्टः आ अगां ॥ ६ ॥ अक्षेचऽवित् क्षेचऽविदं हि अप्रात् सः प्र एति क्षेचऽविदा अनुऽशिष्टः एतत् वै भद्रं अनुऽशासनस्य उत स्तुतिं विंदति अंजसीनां ॥ ७ ॥ अद्य इत् ऊं प्र आनीत् अमंमन इमा अहा अपिऽवृतः अधयत मातुः ऊधः आ ईं एनं आप जरिमा युवानं अहेळन् वसुः सुऽमनाः बभूव ॥ ८ ॥ एतानि भद्रा कलश क्रियाम कुरुऽश्रवण ददतः मघानि दानः इत् वः मघऽवानः सः अस्तु अयं च सोमः हृदि यं बिभर्मि ॥ ९ ॥ ३० ॥ ७ ॥

॥ ३३ ॥ प्र मा युयुज्रे प्रऽयुजः जनानां वहामि स्म पूषणं अंतरेण विश्वे देवासः अध मां अरक्षन् दुःऽशासुः आ अगात् इति घोषः आसीत् ॥ १ ॥ सं मा तपंति अभितः सपत्नीःऽइव पशवः नि बाधते अमतिः नग्नता जसुः वेः न वेवीयते मतिः ॥ २ ॥ मूषः न शिश्ना वि अदंति मा आऽध्यः स्तोतारं ते शतऽक्रतो° सकृत् सु नः मघऽवन् इंद्र मृळय अध पिताऽइव नः भव ॥ ३ ॥ कुरुऽश्रवणं अवृणि राजानं चासदस्यवं महिष्ठं वाघतां ऋषिः ॥ ४ ॥ यस्य मा हरितः रथे तिस्रः वहंति साधुऽया स्तवै सहस्रंऽदक्षिणे ॥ ५ ॥ १ ॥ यस्य प्रऽस्वादसः गिरः उपमऽश्रवसः पितुः क्षेचैं न रण्वं ऊचुषे ॥ ६ ॥ अधि पुत्र उपमऽश्रवः नपात् मित्रऽअतिथेः इहि पितुः ते अस्मि वंदिता ॥ ७ ॥ यत् ईशीय अमृतानां उत वा मर्त्यानां जीवेत् इत् मघऽवा ममं ॥ ८ ॥ न देवानां अति व्रतं शतऽआत्मा चन जीवति तथा युजा वि ववृते ॥ ९ ॥ २ ॥

॥ ३४ ॥ प्र वेपाः मा बृहतः मादयंति प्रवातेऽजाः इरिणे ववृ-

तानाः सोमस्यऽइव मौजऽवतस्य भक्षः विऽभीदकः जागृविः मह्यं अच्छान॥१॥ न मा मिमेथ न जिहीळे एषा शिवा सखिऽभ्यः उत मह्यं आसीत् अक्षस्य अहं एकऽपरस्य हेतोः अनुऽव्रतां अपं जायां अरोधं॥२॥ द्वेष्टि श्वश्रूः अप जाया रुणद्धि न नाथितः विंदते मर्डितारं अश्वस्यऽइव जरतः वस्यस्य न अहं विंदामि कितवस्य भोगं॥३॥ अन्ये जायां परि मृशंति अस्य यस्य अगृधत् वेदने वाजी अक्षः पिता माता भ्रातरः एनं आहुः न जानीमः नयंत बद्धं एतं॥४॥ यत् आऽदीध्ये न दविषाणि एभिः परायतऽभ्यः अव हीये सखिभ्यः निऽउप्राः च बभ्रवः वाचं अक्रत एमिं इत् एषां निःऽकृतं जारिणीऽइव॥५॥३॥ सभां एति कितवः पृच्छमानः जेष्यामि इति तन्वा शूशुजानः अक्षासः अस्य वि तिरंति कामं प्रतिऽदीव्ने दधतः आ कृतानि॥६॥ अक्षासः इत् अंकुशिनः निऽतोदिनः निऽकृत्वानः तपनाः तापयिष्णवः कुमारऽदेष्णाः जयंतः पुनःऽहनः मध्वा संऽपृक्ताः कितवस्य बर्हणा॥७॥ चिऽपंचाशः क्रीळति व्रातः एषां देवःऽइव सविता सत्यऽधर्मा उग्रस्य चित् मन्यवे न नमंते राजा चित् एभ्यः नमः इत् कृणोति॥८॥ नीचा वर्तंते उपरि स्फुरंति अहस्तासः हस्तऽवंतं सहंते दिव्याः अंगाराः इरिणे निऽउप्ताः शीताः संतः हृदयं निःदहंति॥९॥ जाया तप्यते कितवस्य हीना माता पुत्रस्य चरतः क्व स्वित् क्रूणऽवा बिभ्यत् धनं इच्छमानः अन्येषां अस्तं उपनक्तं एति॥१०॥४॥ स्त्रियं दृष्ट्वाय कितवं ततापं अन्येषां जायां सुऽकृतं च योनिं पूर्वाह्णे अश्वान् युयुजे हि बभ्रून् सः अग्नेः अंते वृषलः पपाद॥११॥ यः वः सेनाऽनीः महतः गणस्य राजा व्रातस्य प्रथमः बभूव तस्मै कृणोमि नमधना रुणध्मि दशं अहं प्राचीः तत् कृतं वदामि॥१२॥ अक्षैः

मा दीध्यः कृषिं इत् कृषस्व वित्ते रमस्व बहु मन्यमानः तत्र गावः कितव तत्र जाया तत् मे वि चष्टे सविता अयं अर्यः॥१३॥ मित्रं कृणुध्वं खलु मृळत नः मा नः घोरेण चरत अभि घृष्णु नि वः नु मन्युः विशतां अरातिः अन्यः बभ्रूणां प्रऽसितौ नु अस्तु॥१४॥५॥

॥३५॥ अबुध्रं ऊं त्ये इंद्रऽवंतः अग्नयः ज्योतिः भरंतः उषसः विऽउष्टिषु मही द्यावापृथिवी चेततां अपः अद्य देवानां अवः आ वृणीमहे॥१॥ दिवःपृथिव्योः अवः आ वृणीमहे मातृन् सिंधून पर्वतान् शर्यणाऽवतः अनागाःऽत्वं सूर्ये उषसं ईमहे भद्रं सोमः सुवानः अद्य कृणोतु नः॥२॥ द्यावा नः अद्य पृथिवी अनागसः मही चायेतां सुविताय मातरा उषाःउच्छंती अप बाधतां अघं स्वस्ति अग्निं संऽइधानं ईमहे॥३॥ इयं नः उस्राः प्रथमा सुऽदेव्यं रेवत् सनिऽभ्यः रेवती वि उच्छतु आरे मन्युं दुःऽविदत्रस्य धीमहि स्वस्ति अग्निं संऽइधानं ईमहे॥४॥ प्र याः सिस्रते सूर्यस्य रश्मिऽभिः ज्योतिः भरंतीः उषसः विऽउष्टिषु भद्राः नः अद्य श्रवसे वि उच्छत स्वस्ति अग्निं संऽइधानं ईमहे॥५॥६॥ अनमीवाः उषसः आ चरंतु नः उत अग्नयः जिहतां ज्योतिषा बृहत अयुक्षातां अश्विना तूतुजिं रथं स्वस्ति अग्निं संऽइधानं ईमहे॥६॥ श्रेष्ठं नः अद्य सवितः वरेण्यं भागं आ सुव सः हि रत्नऽधाः असि रायः जनित्री धिषणा उप ब्रुवे स्वस्ति अग्निं संऽइधानं ईमहे॥७॥ पिपर्तु मा तत् ऋतस्य प्रऽवाचनं देवानां यत् मनुष्याः अमंन्महि विश्वाः इत् उस्राः स्पृद् उत एति सूर्यः स्वस्ति अग्निं संऽइधानं ईमहे॥८॥ अद्वेषः अद्य बर्हिषः स्तरीमणि याव्ना यागे मन्मनः साधे ईमहे आदित्यानां शर्मणि स्थाः भुरण्यसि स्वस्ति अग्निं संऽइ-

धानं ईमहे ॥९॥ आ नः बर्हिः सधऽमादे बृहत् दिवि देवान् ईळे सादयं सप्त होतॄन् इंद्रं मित्रं वरुणं सातये भगं स्वस्ति अग्निं संऽइधानं ईमहे ॥१०॥७॥ ते आदित्याः आ गत सर्वतातये वृधे नः यज्ञं अवत सऽजोषसः बृहस्पतिं पूषणं अश्विना भगं स्वस्ति अग्निं संऽइधानं ईमहे ॥११॥ तत् नः देवाः यच्छत सुऽप्रवाचनं छर्दिः आदित्याः सुऽभरं नृऽपाय्यं पश्वे तोकाय तनयाय जीवसे स्वस्ति अग्निं संऽइधानं ईमहे ॥१२॥ विश्वे अद्य मरुतः विश्वे ऊती विश्वे भवंतु अग्नयः संऽइद्धाः विश्वे नः देवाः अवसा आ गमंतु विश्वं अस्तु द्रविणं वाजः अस्मे ॥१३॥ यं देवासः अवथ वाजऽसातौ यं चायध्वे यं पिपृथ अति अंहः यः वः गोऽपीथे न भयस्य वेद् ते स्याम देवऽवीतये तुरासः ॥१४॥८॥

॥३६॥ उषसानक्ता बृहती सुऽपेशसा द्यावाक्षामा वरुणः मित्रः अर्यमा इंद्रं हुवे मरुतः पर्वतान् अपः आदित्यान् द्यावापृथिवी अपः स्वः० ॥१॥ द्यौः च नः पृथिवी च प्रऽचेतसा ऋतऽवरी० रक्षतां अंहसः रिषः मा दुःऽविद्वा निःऽऋतिः नः ईशत तत् देवानां अवः अद्य वृणीमहे ॥२॥ विश्वसात् नः अदितिः पातु अंहसः माता मित्रस्य वरुणस्य रेवतः स्वःऽवत् ज्योतिः अवृकं नशीमहि तत् देवानां अवः अद्य वृणीमहे ॥३॥ यावा वदन् अप रक्षांसि सेधतु दुःऽस्वप्न्यं निःऽऋतिं विश्वं अचिणं आदित्यं शर्म मरुतां अशीमहि तत् देवानां अवः अद्य वृणीमहे ॥४॥ आ इंद्रः बर्हिः सीदतु पिन्वतां इळा बृहस्पतिः सामऽभिः ऋक्वः अर्चतु सुऽप्रकेतं जीवसे मन्म धीमहि तत् देवानां अवः अद्य वृणीमहे ॥५॥९॥ दिविऽस्पृशं यज्ञं अस्माकं अश्विना जीरऽअध्वरं कृणुतं

सुम्नं इष्टये प्राचीनऽरश्मिं आऽहुतं घृतेन तत् देवानाँ अवः अद्य वृणीमहे ॥६॥ उपह्वये सुऽहवँ मारुतं गणं पावकं ऋष्वं सख्याय शंऽभुवँ रायः पोषँ सौश्रवसाय धीमहि तत् देवानाँ अवः अद्य वृणीमहे ॥७॥ अपां पेरुँ जीवऽधन्यं भरामहे देवऽअव्यँ सुऽहवँ अध्वरऽश्रियँ सुऽरश्मिं सोमँ इंद्रियं यमीमहि तत् देवानाँ अवः अद्य वृणीमहे ॥८॥ सनेमं तत् सुऽसनितां सनित्वऽभिः वयं जीवाः जीवऽपुचाः अनागसः ब्रह्मऽद्विषः विष्वक् एनः भरेरत तत् देवानाँ अवः अद्य वृणीमहे ॥९॥ ये स्थ मनोः यज्ञियाः ते शृणोतन यत् वः देवाः ईमहे तत् ददातन जैत्रँ क्रतुं रयिमत् वीरऽवत् यशः तत् देवानाँ अवः अद्य वृणीमहे ॥१०॥१०॥ महत अद्य महतां आ वृणीमहे अवः देवानाँ बृहतां अनर्वणाँ यथा वसु वीरऽजातं नशामहै तत् देवानाँ अवः अद्य वृणीमहे ॥११॥ महः अग्नेः संऽइधानस्य शर्मणि अनागाः मित्रे वरुणे स्वस्तये श्रेष्ठे स्याम सवितुः सवीमनि तत् देवानाँ अवः अद्य वृणीमहे ॥१२॥ ये सवितुः सत्यऽसवस्य विश्वे मित्रस्य व्रते वरुणस्य देवाः ते सौभगं वीरऽवत् गोऽमत् अग्नेः दधातन द्रविणं चित्रं अस्मे ॥१३॥ सविता पश्चातात् सविता पुरस्तात् सविता उत्तरात्तात् सविता अधरात्तात् सविता नः सुवतु सर्वऽतातिं सविता नः रासतां दीर्घं आयुः ॥ १४ ॥ ११ ॥

॥३७॥ नमः मित्रस्य वरुणस्य चक्षसे महः देवाय तत् ऋतं सपर्यत दूरेऽदृशे देवऽजाताय केतवे दिवः पुत्राय सूर्याय शंसत ॥१॥ सा मा सत्यऽउक्तिः परि पातु विश्वतः द्यावा च यत्र ततनन् अहानि च विश्वं अन्यत् नि विशते यत् एजति विश्वाहा आपः

विश्वाहा उत एति सूर्यः॥२॥ न ते अदेवः प्रऽदिवः नि वासते यत् एतशेभिः पतरैः रथ्यसि प्राचीनं अन्यत् अनु वर्तते रजः उत् अन्येन ज्योतिषा यासि सूर्य ॥३॥ येन सूर्य ज्योतिषा बाधसे तमः जगत् च विश्वं उतऽइयर्षि भानुना तेन अस्मत् विश्वां अनिरां अनाहुतिं अप अमीवां अप दुःऽस्वप्न्यं सुव॥४॥ विश्वस्य हि प्रऽइषितः रक्षसि व्रतं अहेळयन उतऽचरसि स्वधाः अनु यत् अद्य त्वा सूर्य उपऽब्रवामहै तं नः देवाः अनु मंसीरत क्रतुं॥५॥ तं नः द्यावापृथिवी तत नः आपः इंद्रः शृण्वंतु मरुतः हवं वचः मा प्रूनै भूम सूर्यस्य संऽदृशि भद्रं जीवंतः जरणां अशीमहि॥६॥१२॥ विश्वाहा त्वा सुऽमनसः सुऽचक्षसः प्रजाऽवंतः अनमीवाः अनागसः उतऽयंतं त्वा मित्रऽमहः दिवेऽदिवे ज्योक् जीवाः प्रति पश्येम सूर्य॥७॥ महि ज्योतिः बिभ्रतं त्वा विऽचक्षण भास्वंतं चक्षुषेऽचक्षुषे मयः आऽरोहंतं बृहतः पाजसः परि वयं जीवाः प्रति पश्येम सूर्य॥८॥ यस्य ते विश्वा भुवनानि केतुना प्र च ईरते नि च विशंते अक्तुऽभिः अनागाःऽत्वेन हरिऽकेश सूर्य अह्नाऽअह्ना नः वस्यसाऽवस्यसा उत इहि ॥९॥ शं नः भव चक्षसा शं नः अह्ना शं भानुना शं हिमा शं घृणेन यथा शं अध्वन् शं असत् दुरोणे तत सूर्य द्रविणं धेहि चित्रं ॥१०॥ अस्माकं देवाः उभयाय जन्मने शर्म यच्छत द्विऽपदे चतुःऽपदे अदत पिबत ऊर्जयमानं आशितं तत अस्मे शं योः अरपः दधातन॥११॥ यत वः देवाः चकृम जिह्वया गुरु मनसः वा प्रऽयुती देवऽहेळनं अरावा यः नः अभि दुच्छुनऽयते तस्मिन् तत एनः वसवः नि धेतन॥१२॥१३॥

॥३८॥ अस्मिन नः इंद्र पृत्सुतौ यशस्वति शिमींऽवति क्रंदसि

प्र अव सातये यच गोऽसाता धृषितेषु खादिषु विष्वक् पतंति दिद्यवः नृऽसह्ये ॥१॥ सः नः क्षुऽमंतं सदने वि ऊर्णुहि गोऽअर्णसं रयिं इंद्र श्रवाय्यं स्याम ते जयंतः शक्र मेदिनः यथा वयं उश्मसि तत् वसो कृधि ॥२॥ यः नः दासः आर्यः वा पुरुऽस्तुत अदेवः इंद्र युधये चिकेतति अस्माभिः ते सुऽसहाः संतु शत्रवः त्वया वयं तान् वनुयाम संऽगमे ॥३॥ यः द्रुभेभिः हव्यः यः च भूरिऽभिः यः अभीके वरिवःऽवित् नृऽसह्ये तं विऽखादे सश्चिं अद्य श्रुतं नरं अर्वाचं इंद्रं अवसे करामहे ॥४॥ स्वऽवृजं हि त्वां अहं इंद्र शुश्रव अननुऽदं वृषभ रध्रऽचोदनं प्र मुंचस्व परि कुत्सात इह आ गहि किं ऊं त्वाऽवान् मुष्कयोः बद्धः आसते ॥ ५ ॥ १४ ॥

॥३९॥ यः वां परिऽज्मा सुऽवृत् अश्विना रथः दोषां उषसः हव्यः हविष्मता शश्वत्ऽतमासः तं ऊं वां इदं वयं पितुः न नाम सुऽहवं हवामहे ॥१॥ चोदयंतं सूनृताः पिन्वंतं धियः उत् पुरंऽधीः ईरयंतं तत् उश्मसि यशसं भागं कृणुतं नः अश्विना सोमं न चारुं मघवत्ऽसु नः कृतं ॥२॥ अमाऽजुरः चित् भवथः युवं भगः अनाशोः चित् अवितारा अपमस्य चित् अंधस्य चित् नासत्या कृशस्य चित् युवां इत् आहुः भिषजा रुतस्य चित् ॥३॥ युवं च्यवानं सनयं यथा रथं पुनः युवानं चरथाय तक्षथुः निः तौग्र्यं ऊहथुः अत्ऽभ्यः परि विश्वा इत् ता वां सवनेषु प्रऽवाच्या ॥४॥ पुराणा वां वीर्या प्रऽब्रवजने अथो ह आसथुः भिषजा मयःऽभुवा ता वां नु नव्यौ अवसे करामहे अयं नासत्या श्रुत् अरिः यथा दधत् ॥५॥ १५ ॥ इयं वां अह्वे शृणुतं मे अश्विना पुचायंऽइव पितरा महीं शिक्षतं अनापिः अज्ञाः असजात्या अमंतिः पुरा तस्याः अ-

भिऽशस्तेः अवं स्पृतं ॥६॥ युवं रथेन विऽमदाय शुंध्युवं नि ऊहथुः पुरुऽमित्रस्य योषणां युवं हवं वध्रिऽमत्याः अगच्छतं युवं सुऽसुतिं चक्रथुः पुरंऽधये ॥७॥ युवं विप्रस्य जरणां उपऽईयुषः पुनः कलेः अकृणुतं युवत् वयः युवं वंदनं ऋश्यऽदात् उत ऊपथुः युवं सद्यः विश्पलां एतवे कृथः ॥८॥ युवं ह रेभं वृषणा गुहा हितं उत ऐरयतं ममृऽवांसं अश्विना युवं ऋबीसं उत तप्तं अचये ओमनऽवंतं चक्रथुः सप्तऽवध्रये ॥९॥ युवं श्वेतं पेदवे अश्विना अश्वं नवऽभिः वाजैः नवती च वाजिनं चर्कृत्यं ददथुः द्रवयतऽसखं भगं न नृऽभ्यः हव्यं मयःऽभुवं ॥१०॥१६॥ न तं राजानौ अदिते कुतः चन नंहः अश्नोति दुःऽइतं नकिः भयं यं अश्विना सुऽहवा रुद्रऽवर्तनी॰ पुरःऽरथं कृणुथः पत्न्या सह ॥११॥ आ तेन यातं मनसः जवीयसा रथं यं वां ऋभवः चक्रुः अश्विना यस्य योगे दुहिता जायते दिवः उभे अहनी सुऽदिने॰ विवस्वतः ॥१२॥ ता वर्तिः यातं जयुषा वि पर्वतं अपिन्वतं शयवे धेनुं अश्विना वृकस्य चित् वर्तिकां अंतः आस्यात् युवं शचीभिः यसितां अमुंचतं ॥१३॥ एतं वां स्तोमं अश्विनौ अकर्म अतक्षाम भृगवः न रथं नि अमृक्षाम योषणां न मयै नित्यं न सूनुं तनयं दधानाः ॥ १४ ॥ १७ ॥

॥४०॥ रथं यांतं कुह कः ह वां नरा प्रति द्युऽमंतं सुविताय भूषति प्रातःऽयावानं विऽभ्वं विशेऽविशे वस्तोःऽवस्तोः वहमानं धिया शमि ॥१॥ कुह स्वित दोषा कुह वस्तोः अश्विना कुह अभिऽपित्वं करतः कुह ऊषतुः कः वां शयुऽचा विधवाऽइव देवरं मयै न योषा कृणुते सधऽस्थे आ ॥२॥ प्रातः जरेथे जरणाऽइव कापया वस्तोःऽवस्तोः यजता गच्छथः गृहं कस्य ध्वस्रा भवथः कस्य वा

नरा राजपुत्राऽइव सवना अव गच्छथः ॥३॥ युवां मृगाऽइव वारणा मृगण्यवः दोषा वस्तोः हविषा नि ह्वयामहे युवं होत्राँ ऋतुऽथा जुह्वते नरा इषे जनाय वहथः शुभः पती ॥४॥ युवां ह घोषा परि अश्विना यती राज्ञः ऊचे दुहिता पृच्छे वां नरा भूतं मे अहे उत भूतं अक्तवे अश्वऽवते रथिने शक्तं अवते ॥५॥१८॥ युवं कवी स्थः परि अश्विना रथे विशः न कुत्सः जरितुः नशायथः युवोः ह मक्षा परि अश्विना मधु आसा भरत निःऽकृतं न योषणा ॥६॥ युवं ह भुज्युं युवं अश्विना वशं युवं शिंजारं उशनां उप आरथुः युवोः ररांवा परि सख्यं आसते युवोः अहं अवसा सुम्नं आ चके ॥७॥ युवं ह कृशं युवं अश्विना शयुं युवं विधंतं विधवां उरुष्यथः युवं सनिऽभ्यः स्तनयंतं अश्विना अप व्रजं ऊर्णुथः सप्तऽआस्यं ॥८॥ जनिष्ट योषा पतयंत् कनीनकः वि च अरुहन् वीरुधः दंसनाः अनु आ अस्मै रीयंते निवनाऽइव सिंधवः अस्मै अहे भवति तत् पतिऽत्वनं ॥९॥ जीवं रुदंति विमयंते अध्वरे दीर्घा अनु प्रऽसितिं दीधियुः नरः वामं पितृऽभ्यः येऽइदं संऽएरिरे मयः पतिऽभ्यः जनयः परिऽस्वजे ॥१०॥१९॥ न तस्य विद्म तत् ऊं सु प्र वोचत युवा ह यत् युवत्याः क्षेति योनिषु प्रियऽउं स्रियस्य वृषभस्य रेतिनः गृहं गमेम अश्विना तत् उश्मसि ॥११॥ आ वां अगन् सुऽमतिः वाजिनीऽवसू० नि अश्विना हृतऽसु कामाः अयंसत अभूतं गोपा मिथुना शुभः पती प्रियाः अर्यम्णः दुर्यान् अशीमहि ॥१२॥ ता मंदसाना मनुषः दुरोणे आ धत्तं रयिं सहऽवीरं वचस्यवे कृतं तीर्थे सुऽप्रपानं शुभः पती स्थाणुं पथेऽस्थां अप दुःऽमतिं हतं ॥१३॥ क्वस्वित् अद्य कतमासु अश्विना विक्षु दस्रा मादयेते शुभः पती कः ईं नि येमे कतमस्य जग्मतुः विप्रस्य वा यजमानस्य वा गृहं ॥१४॥२०॥

॥४१॥ समानं ऊं त्यं पुरुऽहूतं उक्थ्यं रथं चिऽचक्रं सवना गनिग्मतं परिऽज्मानं विद्थ्यं सुवृक्तिऽभिः वयं विऽउष्टौ उषसः हुवामहे ॥१॥ प्रातःऽयुजं नासत्या अधि तिष्ठथः प्रातःऽयावानं मधुऽवाहनं रथं विशः येन गच्छथः यज्वरीः नरा कीरेः चित् यज्ञं होतृऽमंतं अश्विना॥२॥ अध्वर्यु वा मधुऽपाणिं सुऽहस्त्यं अभिधं वा धृतऽदक्षं दमूनसं विप्रस्य वा यत् सवनानि गच्छथः अतः आ यातं मधुऽपेयं अश्विना ॥ ३ ॥ २१ ॥

॥४२॥ अस्ताऽइव सुप्रऽतरं लायं अस्यन् भूषन्ऽइव प्र भरस्तोमं अस्मै वाचा विप्राः तरत वाचं अर्यः निरमयजरितः सोमं इंद्रं॥१॥ दोहेन गां उप शिक्ष सखायं प्र बोधय जरितः जारं इंद्रं कोशं न पूर्णं वसुना निऽऋष्टं आ च्यवय मघऽदेयाय शूरं॥२॥ किं अंग त्वा मघऽवन् भोजं आहुः शिशीहि मा शिश्रयं त्वा शृणोमि अग्रस्वती मम धीः अस्तु शक्र वसुऽविदं भगं इंद्र आ भर नः॥३॥ त्वां जनाः ममऽसत्येषु इंद्र संऽतस्थानाः वि ह्वयंते संऽईके अत्र युजं कृणुते यः हविष्मान् न असुन्वता सख्यं वष्टि शूरः॥४॥ धनं न स्यंद्रं बहुलं यः अस्मै तीव्रान् सोमान् आऽसुनोति प्रयस्वान् तस्मै शचून्सुऽतुकान् प्रातःअहः नि सुऽअष्ट्रान् युवति हंति वृत्रं ॥५॥२२॥ यस्मिन् वयं दधिम शंसं इंद्रे यः शिष्राय मघऽवा कामं अस्मे आरात् चित् सन् भयतां अस्य शत्रुः नि अस्मै द्युम्ना जन्या नमंतां॥६॥ आरात् शत्रुं अप बाधस्व दूरं उग्रः यः शंबः पुरुऽहूत तेन अस्मे धेहि यवऽमत् गोऽमत् इंद्र कृधि धियं जरित्रे वाजऽरत्नां॥७॥ प्र यं अंतः वृषऽसवासः अग्मन् तीव्राः सोमाः बहुलऽअंतासः इंद्रं न अह दामानं मघऽवा नि यंसत् नि सुन्वते वहति

भूरि वामं ॥८॥ उत प्रऽहा अतिऽदीव्यं जयाति कृतं यत् श्वऽघ्नी विऽचिनोति काले यः देवऽकामः न धना रुणद्धि समित् तं राया सृजति स्वधाऽवान् ॥९॥ गोभिः तरेम अमतिं दुःऽएवां यवेन क्षुधं पुरुऽहूत विश्वां वयं राजऽभिः प्रथमाः धनानि अस्माकेन वृजनेन जयेम ॥१०॥ बृहस्पतिः नः परि पातु पश्चात् उत उतऽतरस्मात् अधरात् अघऽयोः इंद्रः पुरस्तात् उत मध्यतः नः सखा सखिऽभ्यः वरिवः कृणोतु ॥ ११ ॥ २३ ॥ ३ ॥

॥४३॥ अच्छ मे इंद्रं मतयः स्वःऽविदः सधीचीः विश्वाः उशतीः अनूषत परि स्वजंते जनयः यथा पतिं मयि न शुंध्युं मघऽवानं ऊतये ॥१॥ न घ त्वत् रिक् अप वेति मे मनः त्वे इत् कामं पुरुऽहूत शिश्रय राजाऽइव दस्म नि षदः अधि बर्हिषि अस्मिन् सु सोमे अवऽपानं अस्तु ते ॥२॥ विषुऽवृत् इंद्रः अमतेः उत क्षुधः सः इत् रायः मघऽवा वस्वः ईशते तस्य इत् इमे प्रवणे सप्त सिंधवः वयः वर्धंति वृषभस्य पुष्मिणः ॥३॥ वयः न वृक्षं सुऽपलाशं आ असदन् सोमासः इंद्रं मंदिनः चमूऽसदः प्र एषां अनीकं शवसा दविद्युतत् विदत् स्वः मनवे ज्योतिः आर्यं ॥४॥ कृतं न श्वऽघ्नी वि चिनोति देवने संऽवर्गं यत् मघऽवा सूर्यं जयत् न तत् ते अन्यः अनु वीर्यं शकत् न पुराणः मघऽवन् न उत नूतनः ॥५॥२४॥ विशंऽविशं मघऽवा परि आशायत जनानां धेनाः अवऽचाकशत् वृषा यस्य अह शक्रः सवनेषु रण्यति सः तीव्रैः सोमैः सहते पृतन्यतः ॥६॥ आपः न सिंधुं अभि यत् संऽअक्षरन् सोमासः इंद्रं कुल्याःऽइव हृदं वर्धंति विप्राः महः अस्य सदने यवं न वृष्टिः दिव्येन दानुना ॥७॥ वृषा न क्रुद्धः पतयत् रजःऽसु आ यः अर्यऽपत्नीः अकृणोत् इमाः अपः

सः सुन्वते मघऽवा जीरऽदानवे अविंदत् ज्योतिः मनवे हविष्मते ॥८॥ उत् जायतां परशुः ज्योतिषा सह भूयाः ऋतस्य सुऽदुघा पुराणऽवत् वि रोचतां अरुषः भानुना शुचिः स्वः न शुक्रं शुशुचीत सतऽपतिः ॥९॥ गोभिः तरेम अमतिं दुःऽएवां यवेन क्षुधं पुरुऽहूत विश्वां वयं राजऽभिः प्रथमाः धनानि अस्माकेन वृजनेन जयेम ॥१०॥ बृहस्पतिः नः परि पातु पश्चात् उत उतऽतरस्मात् अधरात् अघऽयोः इंद्रः पुरस्तात् उत मध्यतः नः सखा सखिऽभ्यः वरिवः कृणोतु ॥ ११ ॥ २५ ॥

॥४४॥ आ यातु इंद्रः स्वऽपतिः मदाय यः धर्मणा तूतुजानः तुविष्मान् प्रऽत्वक्षाणः अति विश्वा सहांसि अपारेण महता वृष्ण्येन ॥१॥ सुऽस्थामा रथः सुऽयमा हरी ते मिम्यक्ष वज्रः नृऽपते गभस्तौ शीभं राजन् सुऽपथा आ याहि अर्वाङ् वर्धाम ते पपुषः वृष्ण्यानि ॥२॥ आ इंद्रऽवाहः नृऽपतिं वज्रऽबाहुं उप्यं उप्यासः तविषासः एनं प्रऽत्वक्षसं वृषभं सत्यऽशुष्मं आ ईं अस्मऽचा सधऽमादः वहंतु ॥३॥ एव पतिं द्रोणऽसाचं सऽचेतसं ऊर्जः स्कंभं धरुणे आ वृषऽयसे ओजः कृष्व सं गृभाय त्वे अपि असः यथा केऽनिपानां इनः वृधे ॥४॥ गमन् अस्मे वसूनि आ हि शंसिषं सुऽआशिषं भरं आ याहि सोमिनः त्वं ईशिषे सः अस्मिन् आ सत्सि बर्हिषि अनाधृष्या तव पाचांसि धर्मणा ॥५॥ २६ ॥ पृथक् प्र आयन् प्रथमाः देवऽहूतयः अकृण्वत श्रवस्यानि दुष्टरा न ये शेकुः यज्ञियां नावं आऽरुहं ईमा एव ते नि अविशंत केपयः ॥६॥ एव एव अपाक् अपरे संतु दुःऽध्यः अश्वाः येषां दुःऽयुजः आऽयुयुज्रे इत्था ये प्राक् उपरे संति दावने पुरूणि यत्र वयुनानि भोजना

॥७॥ गिरीन् अजान् रेजमानान् अधारयत् द्यौः क्रन्दत् अंतरिक्षाणि कोपयत संऽईचीने॰ धिषणे॑ वि ष्कभायति वृष्णः पीत्वा मदे उक्थानि शंसति॥८॥ इमं बिभर्मि सुऽकृतं ते अंकुशं येन आऽरुजासि मघऽवन् शफऽआरुजः अस्मिन सु ते सवने अस्तु ओक्यं सुते इष्टौ मघऽवन् बोधि आऽभगः॥९॥ गोभिः तरेम अमतिं दुःऽएवां यवेन क्षुधं पुरुऽहूत विश्वां वयं राजऽभिः प्रथमाः धनानि अस्माकेन वृजनेन जयेम॥१०॥ बृहस्पतिः नः परि पातु पश्चात् उत उतऽतरस्मात् अधरात् अघऽयोः इंद्रः पुरस्तात् उत मध्यतः नः सखा सखिऽभ्यः वरिवः कृणोतु ॥ ११ ॥ २७ ॥

॥४५॥ दिवः परि प्रथमं जज्ञे अग्निः अस्मत् द्वितीयं परि जातऽवेदाः तृतीयं अप्ऽसु नृऽमनाः अजस्रं इंधानः एनं जरते सुऽआधीः॥१॥ विश्म ते अग्ने चेधा चयाणि विश्म ते धाम विऽभृता पुरुऽचा विश्म ते नाम परमं गुहा यत् विश्म तं उत्सं यतः आऽजगंथ॥२॥ समुद्रे त्वा नृऽमनाः अप्ऽसु अंतः नृऽचक्षाः ईधे दिवः अग्ने ऊधन् तृतीये त्वा रजसि तस्थिऽवांसं अपां उपऽस्थे महिषाः अवर्धन्॥३॥ अक्रंदत् अग्निः स्तनयन्ऽइव द्यौः क्षामरेरिहत वीरुधः संऽअंजन् समद्यः जज्ञानः वि हि ईं इद्धः अख्यत् आ रोदसी भानुना भाति अंतः॥४॥ श्रीणां उत्ऽआरः धरुणः रयीणां मनीषाणां प्रऽअर्पणः सोमंऽगोपाः वसुः सूनुः सहसः अप्ऽसु राजा वि भाति अग्ने उषसां इधानः॥५॥ विश्वस्य केतुः भुवनस्य गर्भः आ रोदसी अपृणात् जायमानः वीळुं चित् अद्रिं अभिनत् पराऽयन् जनाः यत् अग्निं अयजंत पंच॥६॥२८॥ उशिक् पावकः अरतिः सुऽमेधाः मर्तेषु अग्निः अमृतः नि धायि इयर्ति धूमं अरुषं भरि-

भत उत शुक्रेण शोचिषा द्यां इनक्षन्॥७॥ दृशानः रुक्मः उर्विया वि अद्यौत् दुःऽमर्षं आयुः श्रिये रुचानः अग्निः अमृतः अभवत् वयःऽभिः यत् एनं द्यौः जनयत् सुऽरेताः॥८॥ यः ते अद्य कृणवत् भद्रऽशोचे अपूपं देव घृतऽवन्तं अग्ने प्र तं नय प्रऽतरं वस्यः अच्छ अभि सुम्नं देवऽभक्तं यविष्ठ॥९॥ आ तं भज सौश्रवसेषु अग्ने उक्थेऽउक्थे आ भज शस्यमाने प्रियः सूर्ये प्रियः अग्ना भवति उत जातेन भिनदत् उत जनिऽत्वैः॥१०॥ त्वां अग्ने यजमानाः अनु द्यून् विश्वा वसु दधिरे वार्याणि त्वया सह द्रविणं इच्छमानाः व्रजं गोऽमन्तं उशिजः वि वव्रुः॥११॥ अस्तावि अग्निः नरां सुऽशेवः वैश्वानरः ऋषिऽभिः सोमऽगोपाः अद्वेषे द्यावापृथिवी हुवेम देवाः धत्त रयिं अस्मे सुऽवीरं॥१२॥२९॥८॥७॥

॥४६॥ प्र होता॑ जा॒तः म॒हान् न॒भः॒ऽवित् नृ॒ऽसद्मा॑ सी॒द॒त् अ॒पां उ॒प॒ऽस्थे दधिः यः धायि॑ सः ते॒ वयाँ॑सि यं॒ता व॒सू॒नि वि॒धते॑ तनू॒ऽपाः॥१॥ इ॒मं वि॒धं॑तः अ॒पां स॒धऽस्थे॑ प॒स्यु॑ं न न॒ष्टं प॒दैः अनु॑ ग्म॒न् गुहा॑ चतँ॑तं उ॒शिजः॑ नमः॑ऽभिः इ॒च्छं॑तः धीराः॑ भृ॒गवः॑ अ॒वि॒ंद॒न्॥२॥ इ॒मं चि॒तः भूरि॑ अ॒वि॒ंद॒त् इ॒च्छन् वै॒भु॒ऽव॒सः मू॒र्धनि॑ अघ्याया॑ः सः शे॒ऽवृ॑धः जा॒तः आ ह॒र्म्ये॑षु नाभिः॑ युवा॑ भवति॒ रो॒च॒नस्य॑॥३॥ मं॒द्रं होता॑रं उ॒शिजः॑ नमः॑ऽभिः प्रांचँ॑ यज्ञं॑ नेतारँ॑ अ॒ध्व॒राणा॑ं वि॒शां अ॒कृ॒ण्व॒न् अ॒र॒तिं पा॒व॒कं ह॒व्य॒ऽवाहँ॑ दधतः मानु॑षेषु॥४॥ प्र भूः॑ जयँ॑तं म॒हां वि॒पः॒ऽधां मू॒राः॑ अमू॑रं पु॒रां द॒र्माणँ॑ नयँ॑तः गर्भं॑ व॒नां धियँ॑ धुः हिरि॑ऽश्मश्रुं॑ न अ॒र्वाणं॑ धन॑ऽअर्चँ॑॥५॥१॥ नि प॒स्त्या॑सु चि॒तः स्त॒भु॒ऽयन् परि॑ऽवीतः योनौ॑ सी॒द॒त् अं॒तः॑ अतः॑ सं॒ऽगृभ्य॑ वि॒शां द॒मू॒नाः॑ वि॒ऽअ॒र्य॒मणा॑ अ॒यं॒चैः ई॒य॒ते नृ॒न्॥६॥ अ॒स्य अ॒जरा॑सः द॒मां अ॒रि॒चाः॑ अ॒र्च॒त्ऽधू॒मासः॑ अ॒ग्न॒यः॑ पा॒व॒काः॑ श्वि॒ती॒चयः॑ श्वा॒चासः॑ भु॒र॒ण्य॒वः॑ व॒न॒ऽसदः॑ वा॒यवः॑ न सोमा॑ः॥७॥ प्र जि॒ह्वया॑ भ॒र॒ते॒ वेप॑ः अ॒ग्निः॑ प्र व॒यु॒नानि॑ चेतसा पृथि॒व्याः॑ तं आ॒य॒वः॑ शु॒चय॑ँतं पा॒व॒कं मं॒द्रं होता॑रं दधिरे॒ यजि॑ष्ठं॥८॥ द्यावा॑ यं अ॒ग्निं पृ॒थि॒वी॑ जनि॑ष्टां आपः॑ त्वष्टा॑ भृ॒गवः॑ यं सहः॒॑ऽभिः ई॒ळेन्यँ॑ प्र॒थ॒मं मा॒त॒रिश्वा॑ देवाः॑ त॒त॒क्षुः॑ मन॑वे यज॑त्रं॥९॥ यं त्वा॒ देवाः॑ दधिरे ह॒व्य॒ऽवाहँ॑ पुरु॒ऽस्पृहः॑ मानु॑षासः यज॑त्रं सः याम॑न् अग्ने॒ स्तु॒व॒ते वयः॑ धाः॑ प्र देव॒ऽयन् य॒श॒सः॑ सं हि पू॒र्वीः॑॥१०॥२॥

॥४७॥ ज॒गृ॒भ्म ते॒ दक्षि॑णं इंद्र॒ हस्तँ॑ वसु॒ऽयवः॑ वसु॒ऽपते॒ वसू॑नां वि॒द्म हि त्वा॒ गोऽप॑तिं शूर॒ गोना॑ं अ॒स्मभ्यँ॑ चि॒त्रं वृष॑णं र॒यिं

दाः॥१॥ सुऽआयुधं सुऽअवसं सुऽनीथं चतुःऽसमुद्रं धरुणं रयीणां चर्कृत्यं शंस्यं भूरिऽवारं अस्मभ्यं चित्रं वृषणं रयिं दाः ॥ २॥ सुऽब्रह्माणं देवऽवंतं बृहंतं उरुं गभीरं पृथुऽबुधं इंद्र श्रुतऽऋषिं उग्रं अभिमातिऽसहं अस्मभ्यं चित्रं वृषणं रयिं दाः॥३॥ सनत्ऽवाजं विप्रऽवीरं तरुत्रं धनऽस्पृतं पूष्णुऽवांसं सुऽदक्षं दस्युऽहनं पूःऽभिदं इंद्र सत्यं अस्मभ्यं चित्रं वृषणं रयिं दाः॥४॥ अश्वऽवंतं रथिनं वीरऽवंतं सहस्रिणं शतिनं वाजं इंद्र भद्रऽव्रातं विप्रऽवीरं स्वःऽसां अस्मभ्यं चित्रं वृषणं रयिं दाः ॥५॥३॥ प्र सप्तऽगुं ऋतऽधीतिं सुऽमेधां बृहस्पतिं मतिः अच्छ जिगाति यः आंगिरसः नमसा उपऽसद्यः अस्मभ्यं चित्रं वृषणं रयिं दाः॥६॥ वनींवानः मम दूतासः इंद्रं स्तोमाः चरंति सुऽमतीः इयानाः हृदिऽस्पृशः मनसा वच्यमानाः अस्मभ्यं चित्रं वृषणं रयिं दाः ॥७॥ यत् त्वा यामि दधि तत् नः इंद्र बृहंतं क्षयं असमं जनानां अभि तत् द्यावापृथिवी गृणीतां अस्मभ्यं चित्रं वृषणं रयिं दाः ॥८॥४॥

॥४८॥ अहं भुवं वसुनः पूर्व्यः पतिः अहं धनानि सं जयामि शश्वतः मां हवंते पितरं न जंतवः अहं दाशुषे वि भजामि भोजनं ॥१॥ अहं इंद्रः रोधः वक्षः अथर्वणः चिताय गाः अजनयं अहेः अधि अहं दस्युऽभ्यः परि नृम्णं आ ददे गोचा शिक्षन् दधीचे मातरिश्वने ॥२॥ मह्यं त्वष्टा वज्रं अतक्षत् आयसं मयि देवासः अवृजन् अपि क्रतुं मम अनीकं सूर्यस्यऽइव दुस्तरं मां आयंति कृतेन कर्त्वेन च ॥३॥ अहं एतं गव्ययं अश्व्यं पशुं पुरीषिणं सायकेन हिरण्ययं पुरु सहस्रा नि शिशामि दाशुषे यत् मा सोमासः उक्थिनः अमंदिषुः ॥४॥ अहं इंद्रः न परा जिग्ये इत् धनं न

मृत्यवे अव तस्थे कदा चन सोमं इत् मा सुन्वंतः याचत वसु न मे पूरवः सख्ये रिषाथन ॥५॥५॥ अहं एतान् शाश्वसतः द्वा ऽद्वा इंद्रं ये वज्रं युधये अकृण्वत आ ऽह्वयमानान् अव हन्मना अहनं हव्हा वदन् अनमस्युः नमस्विनः ॥६॥ अभि इदं एकं एकः अस्मि निष्षाद् अभि द्वा किं ऊं चयः करंति खले न पर्षान् प्रति हन्मि भूरि किं मा निंदंति शत्रवः अनिंद्राः ॥७॥ अहं गुंगु ऽभ्यः अतिथि ऽग्वं इष्करं इषे न वृच ऽतुरं विक्षु धारयं यत् पर्णय ऽघे उत वा करंज ऽहे प्र अहं महे वृच ऽहत्ये अपुंस्यवि ॥८॥ प्र मे नमी साप्यः इषे भुजे भूत् गवां एषे सख्या कृणुत द्विता दिद्युं यत् अस्य सं ऽइत्थेषुं महयं आत् इत् एनं शंस्यं उक्थ्यं करं ॥९॥ प्र नेमस्मिन् दहशे सोमः अंतः गोपाः नेमं आविः अस्था कृणोति सः तिग्मऽशृंगं वृषभं युयुत्सन् दुहः तस्थौ बहुले वङ्कः अंतः ॥१०॥ आदित्यानां वसूनां रुद्रियाणां देवः देवानां न मिनामि धाम ते मा भद्राय शवसे ततक्षुः अपराऽजितं अस्तृतं अषाळ्हं ॥११॥६॥

॥४९॥ अहं दां गृणते पूर्व्यं वसु अहं ब्रह्म कृणवं मह्यं वर्धनं अहं भुवं यजमानस्य चोदिता अयज्वनः साक्षि विश्वस्मिन् भरे ॥१॥ मां धुः इंद्रं नाम देवता दिवः च ग्मः च अपां च जंतवः अहं हरी वृषणा वि ऽव्रता रघू अहं वज्रं शवसे धृष्णु आ ददे ॥२॥ अहं अत्कं कवये शिश्नथं हथैः अहं कुत्सं आवं आभिः ऊति ऽभिः अहं पुष्णस्य श्नथिता वधः यमं न यः ररे आयै नाम दस्यवे ॥३॥ अहं पिता ऽइव वेतसून् अभिष्टये तुयं कुत्साय स्मत् ऽइभं च रंधयं अहं भुवं यजमानस्य राजनि प्र यत् भरे तुजये न प्रिया आ ऽधृषे ॥४॥ अहं रंधयं मृगयं श्रुतर्वणे यत् मा अजिंहीत वयुना चन आ-

नुषक् अहं वेशं नमं आयवे अकरं अहं सव्याय पदऽगृभिं अरंधयं ॥५॥७॥ अहं सः यः नवऽवास्त्वं बृहत्ऽरथं सं वृचाऽइव दासं वृचऽहा अरुजं यत् वर्धयंतं प्रथयंतं आनुषक् दूरे पारे रजसः रोचना अकरं ॥६॥ अहं सूर्यस्य परि यामि आप्युऽभिः प्र एतशेभिः वहमानः ओजसा यत् मा सावः मनुषः आह निःऽनिजे ऋधक् कृषे दासं कृत्व्यं हथैः ॥७॥ अहं सप्नऽहा नहुषः नहुःऽतरः प्र अश्रवयं शवसा तुर्वशं यदुं अहं नि अन्यं सहसा सहः करं नव व्राधतः नवतिं च वक्षयं ॥८॥ अहं सप्त स्रवतः धारयं वृषा द्रविन्वः पृथिव्यां सीराः अधि अहं अर्णांसि वि तिरामि सुऽक्रतुः युधा विदं मनवे गातुं इष्टये ॥९॥ अहं तत् आसु धारयं यत् आसु न देवः चन त्वष्टा अधारयत् रुशत् स्माहं गवां ऊधःऽसु वक्षणासु आ मधोः मधु श्वाघ्यं सोमं आऽशिरं ॥१०॥ एव देवान् इंद्रः विव्ये नृन् प्र च्यौत्नेन मघऽवा सत्यऽराधाः विश्वा इत् ता ते हरिऽवः शचीऽवः अभि तुरासः स्वऽयशः गृणंति ॥११॥८॥

॥५०॥ प्र वः महे मंदमानाय अंधसः अर्चं विश्वानराय विश्वऽभुवे इंद्रस्य यस्य सुऽमखं सहः महि श्रवः नृम्णं च रोदसी सपर्यतः ॥१॥ सः चित् नु सख्या नर्यः इनः स्तुतः चर्कृत्यः इंद्रः माऽवते नरे विश्वासु धूःऽसु वाजऽकृत्येषु सत्ऽपते वृचे वा अप्ऽसु अभि प्र ऊर् मंदसे ॥२॥ के ते नरः इंद्र ये ते इषे ये ते सुम्नं सऽधन्यं इयक्षान् के ते वाजाय असुर्याय हिन्विरे के अप्ऽसु स्वासु उर्वरासु पौंस्ये ॥३॥ भुवः त्वं इंद्र ब्रह्मणा महान् भुवः विश्वेषु सवनेषु यज्ञियः भुवः नृन् च्यौत्नः विश्वस्मिन् भरे ज्येष्ठः च मंचः विश्वऽचर्षणे ॥४॥ अव नु कं ज्यायान् यज्ञऽवनसः महीं ते ओमांचां

कृष्टयः विदुः असः नु कं अजरः वधीः च विश्वा इत् एता सवना तूतुमा कृषे ॥५॥ एता विश्वा सवना तूतुमा कृषे स्वयं सूनो सहसः यानि दधिषे वराय ते पाचं धर्मणे तना यज्ञः मंचः ब्रह्म उत्ऽयतं वचः ॥६॥ ये ते विप्र ब्रह्मऽकृतः सुते सचा वसूनां च वसुनः च दावने प्र ते सुम्नस्य मनसा पथा भुवन् मदे सुतस्य सोम्यस्य अंधसः ॥७॥९॥

॥५१॥ महत् तत् उल्बं स्थविरं तत् आसीत् येन आऽविष्टितः प्रऽविवेशिथ अपः विश्वाः अपश्यत् बहुधा ते अग्ने जातऽवेदः तन्वः देवः एकः ॥१॥ कः मा ददर्श कतमः सः देवः यः मे तन्वः बहुधा परिऽअपश्यत् कं अहं मिचा वरुणा क्षियंति अग्नेः विश्वाः संऽइधः देवऽयानीः ॥२॥ ऐच्छाम त्वा बहुधा जातऽवेदः प्रऽविष्टं अग्ने अप्ऽसु ओषधीषु तं त्वा यमः अचिकेत् चित्ऽभानो° दशऽअंतरुष्यात् अतिऽरोचमानं ॥३॥ होचात् अहं वरुण बिभ्यत् आयं न इत् एव मा युनजन् अच देवाः तस्य मे तन्वः बहुधा निऽविष्टाः एतं अर्थं न चिकेत अहं अग्निः ॥४॥ आ इहि मनुः देवऽयुः यज्ञऽकामः अरंऽकृत्य तमसि क्षेषि अग्ने सुऽगान् पथः कृणुहि देवऽयानान् वह हव्यानि सुऽमनस्यमानः ॥५॥१०॥ अग्नेः पूर्वे भ्रातरः अर्थं एतं रथीऽइव अध्वानं अनु आ अवरीवुः° तस्मात् भिया वरुण दूरं आयं गौरः न क्षेप्नोः अविजे ज्यायाः ॥६॥ कुर्मः ते आयुः अजरं यत् अग्ने यथा युक्तः जातऽवेदः न रिष्याः अर्थ वहासि सुऽमनस्यमानः भागं देवेभ्यः हविषः सुऽजात ॥७॥ प्रऽयाजान् मे अनुऽयाजान् च केवलान् ऊर्जस्वंतं हविषः दत्त भागं घृतं च अपां पुरुषं च ओषधीनां अग्नेः च दीर्घं आयुः अस्तु

देवाः ॥८॥ तव प्रऽयाजाः अनुऽयाजाः च केवले ऊर्जस्वंतः हविषः संतु भागाः तव अग्ने यज्ञः अयं अस्तु सर्वः तुभ्यं नमंतां प्रऽदिशः चतस्रः ॥९॥११॥

॥५२॥ विश्वे देवाः शास्तन मा यथा इह होता वृतः मनवै यत् निऽसद्य प्र मे ब्रूत भागऽधेयं यथा वः येन पथा हव्यं आ वः वहानि ॥१॥ अहं होता नि असीदं यजीयान् विश्वे देवाः मरुतः मा जुनंति अहःऽअहः अश्विना आध्वर्यवं वां ब्रह्मा संऽइत् भवति सा आऽहुतिः वां ॥२॥ अयं यः होता किं ऊं सः यमस्य कं अपि जहे यत् संऽअंजंति देवाः अहःऽअहः जायते मासिऽमासि अथ देवाः दधिरे हव्यऽवाहं ॥३॥ मां देवाः दधिरे हव्यऽवाहं अप्ऽम्लुक्तं बहु कृच्छ्रा चरंतं अग्निः विद्वान् यज्ञं नः कल्पयाति पंचऽयामं चिऽवृतं सप्तऽतंतुं ॥४॥ आ वः यक्षि अमृतऽत्वं सुऽवीरं यथा वः देवाः वरिवः करांणि आ बाह्वोः वजं इंद्रस्य धेयां अथ इमाः विश्वाः पृतनाः जयाति ॥५॥ चीणि शता ची सहस्राणि अग्निं चिंशत् च देवाः नव च असपर्यन् औक्षन् घृतैः अस्तृणन् बर्हिः अस्मै आत् इत् होतारं नि असादयंत ॥६॥१२॥

॥५३॥ यं ऐच्छाम मनसा सः अयं आ अगात् यज्ञस्य विद्वान् परुषः चिकित्वान् सः नः यक्षत् देवऽतातां यजीयान् नि हि सत्सत् अंतरः पूर्वः अस्मत् ॥१॥ अराधि होता निऽसदा यजीयान् अभि प्रयांसि सुऽधितानि हि ख्यत् यजामहै यज्ञियान् हंत देवान् ईळामहै ईड्यान् आज्येन ॥२॥ साध्वीं अकः देवऽवीतिं नः अद्य यज्ञस्य जिह्वां अविदाम गुह्यां सः आयुः आ अगात् सुरभिः वसानः

भद्रां अकः देवऽहूतिं नः अद्य ॥३॥ तत् अद्य वाचः प्रथमं मसीय येन असुरान् अभि देवाः असाम ऊर्जऽअदः उत यज्ञियासः पंच जनाः मम होचं जुषध्वं ॥४॥ पंच जनाः मम होचं जुषंतां गोऽजाताः उत ये यज्ञियासः पृथिवी नः पार्थिवात् पातु अंहसः अंतरिक्षं दिव्यात् पातु अस्मान् ॥५॥१३॥ तंतुं तन्वन् रजसः भानुं अनु इहि ज्योतिष्मतः पथः रक्ष धिया कृतान् अनुल्बणं वयत जोगुवां अपः मनुः भव जनय दैव्यं जनं ॥६॥ अक्षऽनहः नह्यतन उत सोम्याः इष्कृणुध्वं रशनाः आ उत पिंशत अष्टाऽवंधुरं वहत अभितः रथं येन देवासः अनयन् अभि प्रियं ॥७॥ अश्मन्ऽवती रीयते सं रभध्वं उत् तिष्ठत प्र तरत सखायः अव जहाम ये असन् अशेवाः शिवान् वयं उत् तरेम अभि वाजान् ॥८॥ त्वष्टा मायाः वेत् अपसां अपःऽतमः बिभ्रत् पात्रा देवऽपानानि शंऽतमा शिशीते नूनं परशुं सुऽआयसं येन वृश्चात् एतशः ब्रह्मणः पतिः ॥९॥ सतः नूनं कवयः सं शिशीत वाशीभिः याभिः अमृताय तक्षथ विद्वांसः पदा गुह्यानि कर्तन येन देवासः अमृतऽत्वं आनशुः ॥१०॥ गर्भे योषां अदधुः वत्सं आसनि अपीच्येन मनसा उत जिह्वया सः विश्वाहा सुऽमनाः योग्याः अभि सिसासनिः वनते कारः इत् जितिं ॥११॥१४॥

॥५४॥ तां सुते कीर्तिं मघऽवन् महिऽत्वा यत् त्वा भीते रोदसी अह्वयेतां प्र आवः देवान् आ अतिरः दासं ओजः प्रऽजायै त्वस्यै यत् अशिक्षः इंद्र ॥१॥ यत् अचरः तन्वा ववृधानः बलानि इंद्र प्रऽब्रुवाणः जनेषु माया इत् सा ते यानि युद्धानि आहुः न अद्य शत्रुं ननु पुरा विवित्से ॥२॥ के ऊं नु ते महिमनः समस्य अस्मत्

पूर्वे ऋषयः अंतं आपुः यत् मातरं च पितरं च साकं अजनयथाः तन्वः स्वायाः॥३॥ चत्वारि ते असुर्याणि नाम अदाभ्यानि महिषस्य संति त्वं अंग तानि विश्वानि वित्से येभिः कर्माणि मघऽवन् चकर्थ॥४॥ त्वं विश्वा दधिषे केवलानि यानि आविः या च गुहा वसूनि कामे इत् मे मघऽवन् मा वि तारीः त्वं आऽज्ञाता त्वं इंद्र असि दाता॥५॥ यः अदधात् ज्योतिषि ज्योतिः अंतः यः असृजत् मधुना सं मधूनि अध प्रियं भूषं इंद्राय मन्म ब्रह्मऽकृतः वृहन्ऽउक्थात् अवाचि॥६॥१५॥

॥५५॥ दूरे तत् नाम गुह्यं पराचैः यत् त्वा भीते अह्वयेतां वयःऽधे उत् अस्तभ्नाः पृथिवीं द्यां अभीके भ्रातुः पुत्रान् मघऽवन् तित्विषाणः॥१॥ महत् तत् नाम गुह्यं पुरुऽस्पृक् येन भूतं जनयः येन भव्यं प्रत्नं जातं ज्योतिः यत् अस्य प्रियं प्रियाः सं अविशंत पंच॥२॥ आ रोदसी अपृणात् आ उत मध्यं पंच देवान् ऋतुऽशः सप्तऽसप्त चतुःऽचिंशता पुरुधा वि चष्टे सऽरूपेण ज्योतिषा विऽव्रतेन॥३॥ यत् उषः औच्छः प्रथमा विऽभानां अजनयः येन पुष्टस्य पुष्टं यत् ते जामिऽत्वं अवरं परस्याः महत् महत्याः असुरऽत्वं एकं॥४॥ विऽधुं दद्राणं समने बहूनां युवानं संतं पलितः जगार देवस्य पश्य काव्यं महिऽत्वा अद्य ममार सः ह्यः सं आन्॥५॥१६॥ शाकिना शाकः अरुणः सुऽपर्णः आ यः महः शूरः सनात् अनीळः यत् चिकेत सत्यं इत् तत् न मोघं वसु स्पार्हे उत जेता उत दाता॥६॥ आ एभिः ददे वृष्ण्या पौंस्यानि येभिः औक्षत् वृचऽहत्याय वज्री ये कर्मणः क्रियमाणस्य महा ऋतेऽकर्मे उतऽअजायंत देवाः॥७॥ युजा कर्माणि जनयन् विश्वऽओजाः

अशस्तिऽहा विश्वऽमनाः तुराषाट् पीत्वी सोमस्य दिवः आ वृधानः पूरः निः युधा अधमत् दस्यून् ॥ ८ ॥ १७ ॥

॥ ५६ ॥ इदं ते एकं परः ऊं ते एकं तृतीयेन ज्योतिषा सं विश स्व सं ऽवेशने तन्वः चारुः एधि प्रियः देवानां परमे जनित्वे ॥ १ ॥ तनूः ते वाजिन् तन्वं नयंती वामं अस्मभ्यं धातु शर्म तुभ्यं अहृतः महः धरुणाय देवान् दिविऽइव ज्योतिः स्वं आ मिमीयाः ॥ २ ॥ वाजी असि वाजिनेन सुऽवेनीः सुवितः स्तोमं सुवितः दिवं गाः सुवितः धर्म प्रथमा अनु सत्या सुवितः देवान् सुवितः अनु पत्म ॥ ३ ॥ महित्वः एषां पितरः चन ईशिरे देवाः देवेषु अदधुः अपि क्रतुं सं अविव्यचुः उत यानि अत्विषुः आ एषां तनूषु नि विविशुः पुनः ॥ ४ ॥ सहः ऽभिः विश्वं परि चक्रमुः रजः पूर्वा धामानि अमिता मिमानाः तनूषु विश्वा भुवना नि येमिरे प्र असारयंत पुरुध प्रऽजाः अनु ॥ ५ ॥ द्विधा सूनवः असुरं स्वः ऽविदं आ अस्थापयंत तृतीयेन कर्मणा स्वां प्रऽजां पितरः पित्र्यं सहः आ अवरेषु अदधुः तंतुं आऽततं ॥ ६ ॥ नावा न क्षोदः प्रऽदिशः पृथिव्याः स्वस्ति ऽभिः अति दुःऽगानि विश्वा स्वां प्रऽजां बृहत्ऽउक्थः महि ऽत्वा आ अवरेषु अदधात् आ परेषु ॥ ७ ॥ १८ ॥

॥ ५७ ॥ मा प्र गाम पथः वयं मा यज्ञात् इंद्र सोमिनः मा अंतः स्युः नः अरातयः ॥ १ ॥ यः यज्ञस्य प्रऽसाधनः तंतुः देवेषु आऽततः तं आऽहुतं नशीमहि ॥ २ ॥ मनः नु आ हुवामहे नाराशंसेन सोमेन पितॄणां च मन्मऽभिः ॥ ३ ॥ आ ते एतु मनः पुनः क्रत्वे दक्षाय जीवसे ज्योक् च सूर्यं दृशे ॥ ४ ॥ पुनः नः पितरः मनः द-

दातु दैव्यः जनः जीवं व्रातं सचेमहि ॥५॥ वयं सोम व्रते तव मनः तनूषु बिभ्रतः प्रजाऽवन्तः सचेमहि ॥६॥१९॥

॥५८॥ यत् ते यमं वैवस्वतं मनः जगाम दूरकं तत् ते आ वर्तयामसि इह क्षयाय जीवसे ॥१॥ यत् ते दिवं यत् पृथिवीं मनः जगाम दूरकं तत् ते आ वर्तयामसि इह क्षयाय जीवसे ॥२॥ यत् ते भूमिं चतुःऽभृष्टिं मनः जगाम दूरकं तत् ते आ वर्तयामसि इह क्षयाय जीवसे ॥३॥ यत् ते चतस्रः प्रऽदिशः मनः जगाम दूरकं तत् ते आ वर्तयामसि इह क्षयाय जीवसे ॥४॥ यत् ते समुद्रं अर्णवं मनः जगाम दूरकं तत् ते आ वर्तयामसि इह क्षयाय जीवसे ॥५॥ यत् ते मरीचीः प्रऽवतः मनः जगाम दूरकं तत् ते आ वर्तयामसि इह क्षयाय जीवसे ॥६॥२०॥ यत् ते अपः यत् ओषधीः मनः जगाम दूरकं तत् ते आ वर्तयामसि इह क्षयाय जीवसे ॥७॥ यत् ते सूर्यं यत् उषसं मनः जगाम दूरकं तत् ते आ वर्तयामसि इह क्षयाय जीवसे ॥८॥ यत् ते पर्वतान् बृहतः मनः जगाम दूरकं तत् ते आ वर्तयामसि इह क्षयाय जीवसे ॥९॥ यत् ते विश्वं इदं जगत् मनः जगाम दूरकं तत् ते आ वर्तयामसि इह क्षयाय जीवसे ॥१०॥ यत् ते परः पराऽवतः मनः जगाम दूरकं तत् ते आ वर्तयामसि इह क्षयाय जीवसे ॥११॥ यत् ते भूतं च भव्यं च मनः जगाम दूरकं तत् ते आ वर्तयामसि इह क्षयाय जीवसे ॥१२॥२१॥

॥५९॥ प्र तारि आयुः प्रऽतरं नवीयः स्यातराऽइव क्रतुऽमता रथस्य अधं चवानः उत् नवीति अर्थं पराऽतरं सु निःऽऋ-

तिः जिहीतां ॥१॥ सामन् नु राये निधिऽमत् नु अन्नं करामहे सु पुरुध श्रवाँसि ता नः विश्वानि जरिता ममत्तु पराऽतरं सु निः-ऽऋतिः जिहीतां ॥२॥ अभि सु अर्यः पौंस्यैः भवेम द्यौः न भूमिं गिरयः न अज्रान् ता नः विश्वानि जरिता चिकेत पराऽतरं सु निःऽऋतिः जिहीतां ॥३॥ मो' सु नः सोम मृत्यवे परा दाः पश्येम नु सूर्यं उत्ऽचरंतं द्युऽभिः हितः जरिमा सु नः अस्तु परा-ऽतरं सु निःऽऋतिः जिहीतां ॥४॥ असुऽनीते मनः अस्मासु धारय जीवातवे सु प्र तिर नः आयुः रंधि नः सूर्यस्य संऽदृशि घृतेन त्वं तन्वं वर्धयस्व ॥५॥२२॥ असुऽनीते पुनः अस्मासु चक्षुः पुनः' प्राणं इह नः धेहि भोगं ज्योक् पश्येम सूर्यं उत्ऽचरंतं अनुऽमते मृळय नः स्वस्ति ॥६॥ पुनः नः असुं पृथिवी ददातु पुनः द्यौः देवी पुनः अंतरिक्षं पुनः नः सोमः तन्वं ददातु पुनः' पूषा पथ्यां या स्वस्तिः ॥७॥ शं रोदसी' सुऽबंधवे यह्वी' ऋतस्य मातरा भरतां अपं यत् रपः द्यौः पृथिवि क्षमा रपः मो' सु ते किं चन आममत् ॥८॥ अवं द्रुके' अवं चिका दिवः चरंति भेषजा क्षमा चरिष्णु एककं भरतां अपं यत् रपः द्यौः पृथिवि क्षमा रपः मो' सु ते किं चन आममत् ॥९॥ सं इंद्र ईरय गां अनड्वाहं यः आ अवहत् उशीनराण्याः अनः भरतां अपं यत् रपः द्यौः पृथिवि क्षमा रपः मो' सु ते किं चन आममत् ॥१०॥२३॥

॥६०॥ आ जनं त्वेषऽसंदृशं माहीनानां उपऽस्तुतं अगन्म बिभ्रतः नमः ॥१॥ असमातिं निऽतोशनं त्वेषं निऽययिनं रथं भजेऽरथस्य सत्ऽपतिं ॥२॥ यः जनान् महिषान्ऽइव अतिऽतस्थौ पवीरवान् उत अपवीरवान् युधा ॥३॥ यस्य इक्ष्वाकुः उपं व्रते

रेवान् मरायी एधते दिविऽइव पंच कृष्टयः॥४॥ इंद्र क्षत्रा असमातिषु रथंऽप्रोष्ठेषु धारय दिविऽइव सूर्यं दृशे॥५॥ अगस्त्यस्य नत्ऽभ्यः सप्तीं युनक्षि रोहिता पणीन् नि अक्रमीः अभि विश्वान् राजन् अराधसः॥६॥२४॥ अयं माता अयं पिता अयं जीवातुः आ अगमत् इदं तवं प्रऽसर्पणं सुऽबंधो° आ इहि निःइहि॥७॥ यथा युगं वरत्रया नह्यंति धरुणाय कं एव दाधार ते मनः जीवातवे न मृत्यवे अथो अरिष्टऽतातये॥८॥ यथा इयं पृथिवी मही दाधार इमान् वनस्पतीन् एव दाधार ते मनः जीवातवे न मृत्यवे अथो अरिष्टऽतातये॥९॥ यमात् अहं वैवस्वतात् सुऽबंधोः मनः आ अभरं जीवातवे न मृत्यवे अथो अरिष्टऽतातये॥१०॥ न्यक् वातः अवं वाति न्यक् तपति सूर्यः नीचीनं अध्वा दुहे न्यक् भवतु ते रपः॥११॥ अयं मे हस्तः भगऽवान् अयं मे भगवत्ऽतरः अयं मे विश्वऽभेषजः अयं शिवऽअभिमर्शनः॥१२॥२५॥४॥

॥६१॥ इदं इत्था रौद्रं गूर्तऽवचाः ब्रह्म कृत्वा शच्या अंतः आजौ क्राणा यत् अस्य पितरा मंहनेऽस्थाः पर्षत् पक्थे अहन् आ सप्त होतॄन्॥१॥ सः इत् दानाय दभ्याय वन्वन् अवानः सूदैः अमिमीत वेदिं तूर्वयाणः गूर्तवचःऽतमः क्षोदः न रेतः इतःऽऊति सिंचत्॥२॥ मनः न येषु हवनेषु तिग्मं विपः शच्या वनुषः द्रवंता आ यः शर्याभिः तुविऽनृम्णः अस्य अश्रीणीत आऽदिशं गभस्तौ॥३॥ कृष्णा यत् गोषु अरुणीषु सीदत् दिवः नपाता अश्विना हुवे वां वीतं मे यज्ञं आ गतं मे अवं ववन्वांसा न इषं अस्मृतऽधू°॥४॥ प्रधिष्ट यस्य वीरऽकर्मे इष्णत् अनुऽस्थितं नु नयैः अप औहत् पुनः तत् आ वृहति यत् कनायाः दुहितुः आ अनु-

ऽभृतं अनर्वा॥५॥२६॥ मध्या यत् कर्वे अभवत् अभीके कामे कृ-
ण्वाने पितरि युवत्यां मनानक् रेतः जहतुः विऽयंता सानौ नि-
ऽसिक्तं सुऽकृतस्य योनौ॥६॥ पिता यत् स्वां दुहितरं अधिऽस्कन्
क्षया रेतः संऽजग्मानः नि सिंचत् सुऽआध्यः अजनयन् ब्रह्म
देवाः वास्तोः पतिं व्रतऽपां निः अतक्षन्॥७॥ सः ईं वृषा न फेनं
अस्यत् आजौ सत् आ परा एत् अप दभ्रऽचेताः सरत् पदा न
दक्षिणा पराऽवृक् न ताः नु मे पृश्न्यः जगृभ्रे॥८॥ मक्षु न वहिः
प्रऽजायाः उपब्दिः अग्निं न नग्नः उप सीदत् ऊधः सनिता इध्मं
सनिता उत वाजं सः धर्ता जज्ञे सहसा यविऽयुत्॥९॥ मक्षु कना-
यां सख्यं नवंऽग्वाः ऋतं वदंतः ऋतऽयुक्तिं अग्मन् द्विऽबर्हसः
ये उप गोपं आ अगुः अदक्षिणासः अच्युता दुधुक्षन्॥१०॥२७॥
मक्षु कनायां सख्यं नवीयः राधः न रेतः ऋतं इत् तुरण्यन् शुचिं
यत् ते रेक्णः आ अयजंत सवःऽदुघायाः पयः उस्रियायाः॥११॥
पप्था यत् पप्था विऽयुता वुधंत इति ब्रवीति वक्करि रराणः वसोः
वसुऽत्वा कारवः अनेहा विश्वे विवेष्टि द्रविणं उप क्षु॥१२॥ तत्
इत् नु अस्य परिऽसद्मानः अग्मन् पुरु सदंतः नार्मदं विभित्सन्
वि पुण्यस्य संऽयथितं अनर्वा विदत् पुरुऽप्रजातस्य गुहा यत्
॥१३॥ भगैः ह नाम उत यस्य देवाः स्वः न ये चिऽसधस्थे निऽसेदुः
अग्निः ह नाम उत जातऽवेदाः श्रुधि नः होतः ऋतस्य होता अ-
ध्रुक्॥१४॥ उत त्या मे रौद्रौ अचिऽमंता नासत्यौ इंद्र गूर्तये य-
जध्यै मनुष्वत् वृक्तऽबर्हिषे रराणा मंदू हितऽप्रयसा विक्षु यज्यू
॥१५॥२८॥ अयं स्तुतः राजा वंदि वेधाः अपः च विप्रः तरति
स्वऽसेतुः सः कक्षीवंतं रेजयत् सः अग्निं नेमिं न चक्रं अर्वंतः र-
घुऽदु॥१६॥ सः द्विऽबंधुः वैतरणः यष्टा सवःऽधुं धेनुं अस्वं दुह-

ध्यं सं यत् मिचावरुणा वृंजे उक्थैः ज्येष्ठेभिः अर्यमणं वरूथैः ॥१७॥ तत्ऽबंधुः सूरिः दिवि ते धियंऽधाः नाभानेदिष्ठः रपति प्र वेनन्सा नः नाभिः परमा अस्य वा घ अहं तत् पश्चा कतिथः चित् आस॥१८॥ इयं मे नाभिः इह मे सधऽस्थं इमे मे देवाः अयं अस्मि सर्वैः द्विऽजाः अहं प्रथमऽजाः ऋतस्य इदं धेनुः अदुहत् जायमाना॥१९॥ अध आसु मंद्रः अरतिः विभाऽवा अवं स्यति द्विऽवर्तनिः वनेषाट् ऊर्ध्वा यत् थ्रेणिः न शिश्नुः दन् मक्षु स्थिरं शेऽवृधं सूत माता ॥२०॥२९॥ अध गावः उपऽमातिं कनायाः अनु श्वांतस्य कस्य चित् परा ईयुः श्रुधि त्वं सुऽदृविणः नः त्वं याट् आश्वऽघस्य ववृधे सूनृताभिः॥२१॥ अध त्वं इंद्र विद्धि अस्मान् महः राये नृऽपते वज्रऽबाहुः रक्षा च नः मघोनः पाहि सूरीन् अनेहसः ते हरिऽवः अभिष्टौ॥२२॥ अध यत् राजाना गोऽईष्टौ सरत् सरण्युः कारवे जरण्युः विप्रः प्रेष्ठः सः हि एषां बभूव परा च वक्षत् उत पर्षत् एनान्॥२३॥ अध नु अस्य जेन्यस्य पुष्टौ वृथा रेभंतः ईमहे तत् ऊं नु सरण्युः अस्य सूनुः अश्वः विप्रः च असि श्रवसः च सातौ॥२४॥ युवोः यदि सख्याय अस्मे शर्धाय स्तोमं जुजुषे नमस्वान् विश्वं यस्मिन् आ गिरः संऽईचीः पूर्वीऽईव गातुः दाशत् सूनृतायै॥२५॥ सः गृणानः अत्ऽभिः देवऽवान् इति सुऽबंधुः नमसा सुऽउक्तैः वर्धत् उक्थैः वचःऽभिः आ हि नूनं वि अध्वा एति पयसः उस्रियायाः॥२६॥ ते ऊं सु नः महः यजत्राः भूत देवासः ऊतये सुऽजोषाः ये वाजान् अनयत विऽयंतः ये स्थ निऽचेतारः अमूराः॥२७॥३०॥१॥

॥६२॥ ये यज्ञेन दक्षिणया संऽअक्ताः इंद्रस्य सख्यं अमृतऽत्वं

आनश तेभ्यः भद्रं अंगिरसः वः अस्तु प्रति गृभ्णीत मानवं सुऽमेधसः॥१॥ ये उत्ऽआजन् पितरः गोऽमयं वसु ऋतेन अभिंदन् परिवत्सरे वलं दीर्घायुऽत्वं अंगिरसः वः अस्तु प्रति गृभ्णीत मानवं सुऽमेधसः॥२॥ ये ऋतेन सूर्यं आ अरोहयन् दिवि अप्रथयन् पृथिवीं मातरं वि सुप्रजाःऽत्वं अंगिरसः वः अस्तु प्रति गृभ्णीत मानवं सुऽमेधसः॥३॥ अयं नाभा वदति वल्गु वः गृहे देवंऽपुचाः ऋषयः तत् मृणोतन सुऽब्रह्मण्यं अंगिरसः वः अस्तु प्रति गृभ्णीत मानवं सुऽमेधसः॥४॥ विऽरूपासः इत् ऋषयः ते इत् गंभीरऽवेपसः ते अंगिरसः सूनवः ते अग्नेः परि जज्ञिरे॥५॥१॥ ये अग्नेः परि जज्ञिरे विऽरूपासः दिवः परि नवंऽग्वः नु दशंऽग्वः अंगिरःऽतमः सचा देवेषु मंहते॥६॥ इंद्रेण युजा निः सृजंत वाघतः व्रजं गोऽमंतं अश्विनं सहस्रं मे ददतः अष्टऽकर्ण्यः श्रवः देवेषु अक्रत॥७॥ प्र नूनं जायतां अयं मनुः तोकंऽइव रोहतु यः सहस्रं शतऽअश्वं सद्यः दानाय मंहते॥८॥ न तं अश्नोति कः चन दिवःऽइव सानु आऽरभं सावर्ण्यस्य दक्षिणा वि सिंधुःऽइव प्रप्रथे॥९॥ उत दासा परिऽविषे स्मतऽदिष्टी॰ गोऽपरीणसा यदुः तुर्वः च ममहे॥१०॥ सहस्रऽदाः ग्रामऽनीः मा रिषत् मनुः सूर्येण अस्य यतमाना एतु दक्षिणा सावर्णेः देवाः प्र तिरंतु आयुः यस्मिन् अश्नांताः असनाम वाजं॥११॥२॥

॥६३॥ पराऽवतः ये दिधिषंते आप्यं मनुंऽप्रीतासः जनिम विवस्वंतः ययातेः ये नहुष्यस्य बर्हिषि देवाः आसते ते अधि ब्रुवंतु नः॥१॥ विश्वा हि वः नमस्यानि वंद्या नामानि देवाः उत यज्ञियानि वः ये स्थ जाताः अदितेः अतऽभ्यः परि ये पृथिव्याः ते

मे इह श्रुत हवँम्॥२॥ येभ्यः माता मधुऽमत् पिन्वते पयः पीयूषँ द्यौः अदितिः अद्रिऽबर्हाः उक्थऽशुष्मान् वृषऽभरान् सुऽअ-ग्नयः तान् आदित्यान् अनु मद् स्वस्तयेँ॥३॥ नृऽचक्षसः अनि-ऽमिषंतः अर्हणा बृहत् देवासः अमृतऽत्वं आनशुः ज्योतिःऽर-थाः अहिऽमायाः अनागसः दिवः वर्ष्माणँ वसते स्वस्तयेँ॥४॥ संऽराजः ये सुऽवृधः यज्ञं आऽययुः अपरिऽह्वृताः दधिरे दिवि क्षयँ तान् आ विवास नमसा सुवृक्तिऽभिः महः आदित्यान् अ-दितिं स्वस्तयेँ॥५॥३॥ कः वः स्तोमँ राधति यं जुजोषथ विश्वे दे-वासः मनुषः यति स्थन कः वः अध्वरं तुविऽजाताः अरँ करत् यः नः पर्षत् अति अंहः स्वस्तयेँ॥६॥ येभ्यः होचाँ प्रथमां आऽयेजे मनुः समिद्धऽअग्निः मनसा सप्त होतृऽभिः ते आदित्याः अभयं शर्म यच्छत सुऽगा नः कर्त सुऽपथा स्वस्तयेँ॥७॥ ये ईशिरे भुव-नस्य प्रऽचेतसः विश्वस्य स्थातुः जगतः च मंतवः ते नः कृतात् अकृतात् एनसः परि अद्य देवासः पिपृत स्वस्तयेँ॥८॥ भरेषु इंद्रँ सुऽहवँ हवामहे अंहःऽमुचँ सुऽकृतं दैव्यँ जनँ अग्निं मित्रं वरुणं सातयेँ भगँ द्यावापृथिवी मरुतः स्वस्तयेँ॥९॥ सुऽचामाणं पृ-थिवीं द्यां अनेहसँ सुऽशर्माणं अदितिं सुऽप्रनीतिं दैवीं नावँ सु-ऽअरित्रां अनागसं अस्रवंतीं आ रुहेम स्वस्तयेँ॥१०॥४॥ विश्वे यजत्राः अधि वोचत ऊतये वायध्वं नः दुःऽएवायाः अभिऽह्रुतः सत्यया वः देवऽहूत्या हुवेम शृण्वतः देवाः अवसे स्वस्तयेँ॥११॥ अप अमीवां अप विषूँ अनाहुतिं अप अरातिं दुःऽविदचाँ अघऽयतः आरे देवाः द्वेषः अस्मत् युयोतन उरु नः शर्म यच्छत स्वस्तयेँ॥१२॥ अरिष्टः सः मर्तः विश्वः एधते प्र प्रऽजाभिः जायते धर्मणः परि यं आदित्यासः नयथ सुनीतिऽभिः अति विश्वानि

दुःऽइता स्वस्तये ॥१३॥ यं देवासः अवथ वाजऽसातौ यं शूरऽसाता मरुतः हिते धने प्रातःऽयावानं रथं इंद्र सानसिं अरिष्यंतं आ रुहेम स्वस्तये॥१४॥ स्वस्ति नः पथ्यासु धन्वऽसु स्वस्ति अप्ऽसु वृजने स्वःऽवति स्वस्ति नः पुत्रऽकृथेषु योनिषु स्वस्ति राये मरुतः दधातन ॥१५॥ स्वस्तिः इत् हि प्रऽपथे श्रेष्ठा रेक्णस्वती अभि या वामं एति सा नः अमा सो अरणे नि पातु सुऽआवेशा भवतु देवऽगोपा॥१६॥ एव ह्यस्तेः सूनुः अवीवृधत् वः विश्वे आदित्याः अदिते मनीषी ईशानासः नरः अमर्त्येन अस्तावि जनः दिव्यः गयेन ॥१७॥५॥

॥६४॥ कथा देवानां कतमस्य यामनि सुऽमंतु नाम शृण्वतां मनामहे कः मृळाति कतमः नः मयः करत् कतमः ऊती अभि आ ववर्तति ॥१॥ ऋतुऽयंति ऋतवः हृत्ऽसु धीतयः वेनंति वेनाः पतयंति आ दिशः न मर्डिता विद्यते अन्यः एभ्यः देवेषु मे अधि कामाः अयंसत ॥२॥ नराशंसं वा पूषणं अगोह्यं अग्निं देवऽइंद्रं अभि अर्चसे गिरा सूर्यामासा चंद्रमसा यमं दिवि चित्रं वातं उषसं अश्विना ॥३॥ कथा कविः तुविऽरवान् कया गिरा बृहस्पतिः ववृधते सुवृक्तिऽभिः अजः एकऽपात् सुऽहवेभिः ऋक्वऽभिः अहिः शृणोतु बुध्यः हवीमनि ॥४॥ दक्षस्य वा अदिते जन्मनि व्रते राजाना मित्रावरुणा आ विवाससि अतूर्तऽपंथाः पुरुऽरथः अर्यमा सम्राऽहोता विषुऽरूपेषु जन्मऽसु ॥५॥६॥ ते नः अर्वंतः हवनऽश्रुतः हवं विश्वे शृण्वंतु वाजिनः मितऽद्रवः सहस्रऽसाः मेधसातौऽइव त्मना महः ये धनं संऽइत्येषु जभ्रिरे ॥६॥ प्र वः वायुं रथऽयुजं पुरंऽधिं स्तोमैः कृणुध्वं सु-

ख्यायं पूषणं ते हि देवस्य सवितुः सवीमनि क्रतुं सचन्ते सऽचितः सऽचेतसः ॥७॥ चित्रं सप्त सस्राः नद्यः महीः अपः वनस्पतीन् पर्वतान् अग्निं ऊतये कृशानुं अस्तॄन् तिष्यं सधऽस्थे आ रुद्रं रुद्रेषु रुद्रियं हवामहे ॥८॥ सरस्वती सरयुः सिंधुः ऊर्मिऽभिः महः महीः अवसा आ यंतु वक्षणीः देवीः आपः मातरः सूदयित्नवः घृतऽवत् पयः मधुऽमत् नः अर्चत ॥९॥ उत माता बृहत्ऽदिवा शृणोतु नः त्वष्टा देवेभिः जनिऽभिः पिता वचः ऋभुक्षाः वाजः रथःपतिः भगः रयः शंसः शशमानस्य पातु नः ॥१०॥७॥ रयः संऽहृष्टौ पितुमान्ऽइव क्षयः भद्रा रुद्राणां मरुतां उपऽस्तुतिः गोभिः स्याम यशसः जनेषु आ सदा देवासः इळया सचेमहि ॥११॥ यां मे धियं मरुतः इंद्र देवाः अददात वरुण मित्र यूयं तां पीपयत पयसाऽइव धेनुं कुवित् गिरः अधि रथे वहाथ ॥१२॥ कुवित् अंग प्रति यथा चित् अस्य नः सऽजात्यस्य मरुतः बुबोधथ नाभा यत्र प्रथमं संऽनसामहे तत्र जामिऽत्वं अदितिः दधातु नः ॥१३॥ ते हि द्यावापृथिवी मातरा मही देवी देवान् जन्मना यज्जिये इ-तः उभे बिभृतः उभयं भरीमऽभिः पुरु रेतांसि पितृऽभिः च सिंचतः ॥१४॥ वि सा होचा विश्वं अश्नोति वायं बृहस्पतिः अरमतिः पनीयसी यावा यत्र मधुऽमुत् उच्यते बृहत् अवीवशंत मतिऽभिः मनीषिणः ॥१५॥ एव कविः तुविऽरवान् ऋतऽज्ञाः द्रविणस्युः द्रविणसः चकानः उक्थेभिः अत्र मतिऽभिः च विप्रः अपीपयत् गयः दिव्यानि जन्म ॥१६॥ एव स्तुतः सूनुः अवीवृधत् वः विश्वे आदित्याः अदिते मनीषी ईशानासः नरः अमर्त्येन अस्तावि जनः दिव्यः गयेन ॥१७॥८॥

॥६५॥ अग्निः इंद्रः वरुणः मित्रः अर्यमा वायुः पूषा सरस्वती सऽजोषसः आदित्याः विष्णुः मरुतः स्वः बृहत् सोमः रुद्रः अदितिः ब्रह्मणः पतिः॥१॥ इंद्राग्नी वृचऽहत्येषु सत्ऽपती० मित्यः हिन्वाना तन्वा संऽओकसा अंतरिक्षं महि आ पप्रुः ओजसा सोमः घृतऽश्चीः महिमानं ईरयन्॥२॥ तेषां हि महा महतां अनर्वणां स्तोमान् इयर्मि ऋतऽज्ञाः ऋतऽवृधां ये अप्सवं अर्णवं चित्रऽराधसः ते नः रासंतां महयं सुऽमित्र्याः॥३॥ स्वःऽनरं अंतरिक्षाणि रोचना द्यावाभूमी पृथिवीं स्कंभुः ओजसा पृक्षाःऽइव महयंतः सुऽरातयः देवाः स्तवंते मनुषाय सूरयः॥४॥ मित्राय शिक्ष वरुणाय दाशुषे या संऽराजा मनसा न प्रऽयुच्छतः ययोः धामं धर्मणा रोचते बृहत् ययोः उभे रोदसी नाधसी वृतौ॥५॥ ॥९॥ या गौः वर्तनिं परिऽएति निःऽकृतं पयः दुहाना व्रतऽनीः अवारतः सा प्रऽवुवाणा वरुणाय दाशुषे देवेभ्यः दाशत् हविषा विवस्वते॥६॥ दिवक्षसः अग्निऽजिह्वाः ऋतऽवृधः ऋतस्य योनिं विऽमृशंतः आसते द्यां स्कभित्वी अपः आ चक्रुः ओजसा यज्ञं जनित्वी तन्वि नि ममृजुः॥७॥ परिऽक्षिता पितरा पूर्वऽजावरी० ऋतस्य योना क्षयतः संऽओकसा द्यावापृथिवी वरुणाय सऽव्रते० घृतऽवत् पयः महिषाय पिन्वतः॥८॥ पर्जन्यावाता वृषभा पुरीषिणा इंद्रवायू वरुणः मित्रः अर्यमा देवान् आदित्यान् अदितिं हवामहे ये पार्थिवासः दिव्यासः अप्ऽसु ये॥९॥ त्वष्टारं वायुं ऋभवः यः ओहते दैव्या होतारौ उषसं स्वस्तये बृहस्पतिं वृचऽखादं सुऽमेधसं इंद्रियं सोमं धनऽसाः ऊं ईमहे॥१०॥ ॥१०॥ ब्रह्म गां अश्वं जनयंतः ओषधीः वनस्पतीन् पृथिवीं पर्वतान् अपः सूर्यं दिवि रोहयंतः सुऽदानवः आर्या व्रता विऽसृ-

जंतः अधि क्षमि॥११॥ भुज्युं अंहसः पिपृथः निः अश्विना श्यावं पुत्रं वध्रिऽमत्याः अजिन्वतं कमऽद्युवं विऽमदाय ऊहथुः युवं विष्णाप्वं विश्वकाय अवं सृजथः॥१२॥ पावीरवी तन्यतुः एकऽपात् अजः दिवः धर्ता सिंधुः आपः समुद्रियः विश्वे देवासः शृणवन् वचांसि मे सरस्वती सह धीभिः पुरंऽध्या॥१३॥ विश्वे देवाः सह धीभिः पुरंऽध्या मनोः यजत्राः अमृताः ऋतऽज्ञाः रातिऽसाचः अभिऽसाचः स्वःऽविदः स्वः गिरः ब्रह्म सुऽउक्तं जुषेरत॥१४॥ देवान् वसिष्ठः अमृतान् ववंदे ये विश्वा भुवना अभि प्रऽतस्थुः ते नः रासंतां उरुऽगायं अद्य यूयं पात स्वस्तिऽभिः सदा नः॥१५॥११॥

॥६६॥ देवान् हुवे बृहत्ऽश्रवसः स्वस्तये ज्योतिःऽकृतः अध्वरस्य प्रऽचेतसः ये ववृधुः प्रऽतरं विश्वऽवेदसः इंद्रेऽज्येष्ठासः अमृताः ऋतऽवृधः॥१॥ इंद्रेऽप्रसूताः वरुणेऽप्रशिष्टाः ये सूर्यस्य ज्योतिषः भागं आनशुः मरुत्ऽगणे वृजने मन्म धीमहि माघोने यज्ञं जनयंत सूरयः॥२॥ इंद्रः वसुऽभिः परि पातु नः गयं आदित्यैः नः अदितिः शर्म यच्छतु रुद्रः रुद्रेभिः देवः मृळयाति नः त्वष्टा नः ग्नाभिः सुविताय जिन्वतु॥३॥ अदितिः द्यावापृथिवी ऋतं महत् इंद्राविष्णू मरुतः स्वः बृहत् देवान् आदित्यान् अवसे हुवामहे वसून् रुद्रान् सवितारं सुऽदंससं॥४॥ सरस्वान् धीभिः वरुणः धृतऽव्रतः पूषा विष्णुः महिमा वायुः अश्विना ब्रह्मऽकृतः अमृताः विश्वऽवेदसः शर्म नः यंसन् चिऽवरूथं अंहसः॥५॥ ॥१२॥ वृषा यज्ञः वृषणः संतु यज्ञियाः वृषणः देवाः वृषणः हविःऽकृतः वृषणा द्यावापृथिवी ऋतऽवरी० वृषा पर्जन्यः वृषणः

वृष॒ऽस्तुभः॥६॥ अग्नीषोमा॑ वृषणा वाज॑ऽसातये पुरु॒ऽप्रश॑स्ता वृषणौ उप॑ ब्रुवे॒ यौ ई॒जि॒रे वृष॑णः दे॒व॒ऽय॒ज्यया॑ ता नः॒ शर्म॑ चि॒ऽवरू॑थं वि यं॑सतः॥७॥ धृत॑ऽव्रताः क्षु॒चिय॑ाः यज्ञनि॒ऽकृत॑ः बृ॒हत्ऽदि॑वाः अध्व॒राणा॑ अभि॒ऽश्रिय॑ः अग्नि॒ऽहो॑तारः ऋत॒ऽसाप॑ः अद्रुहः॒ अप॑ः असृजन् अनु॑ वृ॒च॒ऽतू॒र्यै॥८॥ द्यावा॑पृथि॒वी॑ जन॒य॒न् अभि व्र॒ता आप॑ः ओष॑धीः व॒निना॑नि य॒ज्ञिया॑ अं॒तरि॑क्षं स्व॑ः आ प॒प्रुः ऊ॒तये॑ वशं॑ दे॒वास॑ः त॒न्वे॑ नि मे॒मृ॒जुः॥९॥ ध॒र्ता॑रः दि॒वः ऋ॒भ॒वः सु॒ऽह॒स्ता॑ः वा॒ता॒प॒र्ज॒न्या॑ म॒हि॒ष॒स्य॑ त॒न्य॒तोः॒ आप॑ः ओष॑धीः प्र ति॒रं॒तु॒ नः॒ गिरः॑ भगः॑ रा॒तिः वा॒जिन॑ः यं॒तु॒ मे॒ ह॒वं॑॥१०॥१३॥ स॒मु॒द्रः सिं॑धुः रज॑ः अं॒तरि॑क्षं अ॒जः एक॑ऽपात् त॒न॒यि॒त्नुः अ॒र्ण॒वः अहिः॑ बु॒ध्न्यः॑ शृ॒ण॒व॒त् व॒चां॑सि मे॒ विश्वे॑ दे॒वास॑ः उ॒त सू॒र्यः॑ मम॑ ॥११॥ स्याम॑ वः मनवः दे॒व॒ऽवी॒तये॑ प्रांचं॑ नः॒ य॒ज्ञं प्र न॑यत॒ सा॒धु॒ऽया आदि॑त्याः रु॒द्राः॑ वस॑वः सु॒ऽदा॑नवः इ॒मा ब्रह्म॑ शस्यमा॑नानि जि॒न्व॒त॒॥१२॥ दैव्या॑ होता॑रा प्रथ॒मा पु॒रः॒ऽहि॑ता ऋ॒तस्य॑ पंथां॑ अ॒नु॑ ए॒मि॒ सा॒धु॒ऽया क्षे॒त्र॒स्य पति॑ं प्रति॑ऽवेशं ई॒म॒हे॒ विश्वा॑न् दे॒वान् अ॒मृता॑न् अप्र॑ऽयुच्छतः॥१३॥ वसि॑ष्ठासः पि॒तृ॒ऽवत् वाचं॑ अ॒क्र॒त॒ दे॒वान् ई॒ळा॑नाः ऋ॒षि॒ऽव॒त् स्व॒स्त॒ये॑ प्री॒ताः॒ऽइ॒व ज्ञा॒त॒यः॑ काम॑ं आ॒ऽइ॒त्य॑ अ॒स्मे॑ दे॒वा॒सः॒ अव॑ धूनुत॒ वसु॑ ॥१४॥ दे॒वान् वसि॑ष्ठः अ॒मृता॑न् व॒वं॒दे॒ ये विश्वा॑ भु॒व॒ना अ॒भि प्र॒ऽत॒स्थुः ते नः॒ रा॒स॒ंतां॒ उ॒रु॒ऽगा॒यं अ॒द्य यूयं पा॒त॒ स्व॒स्ति॒ऽभिः॒ सदा॑ नः॥१५॥१४॥

॥६७॥ इ॒मां धिय॑ं स॒प्त॒ऽशी॒र्ष्णी॑ पि॒ता नः॒ ऋ॒त॒ऽप्रजा॑तां बृ॒हतीं॑ अ॒वि॒ंद॒त् तु॒रीय॑ं स्वि॒त् ज॒न॒य॒त् विश्व॑ऽजन्यः अ॒यास्यः॑ उ॒क्थं इंद्रा॑य शंस॑न्॥१॥ ऋ॒तं शंस॑ंतः ऋ॒जु दी॒ध्या॑नाः दि॒वः पु॒चास॑ः असु॑रस्य

वीराः विप्रँ पदं अंगिरसः दधानाः यज्ञस्य धामं प्रथमं मनंत ॥२॥ हंसैःऽइव सखिंऽभिः वावदत्ऽभिः अश्मन्ऽमयानि नहना विऽअस्यन् बृहस्पतिः अभिऽकनिक्रदत् गाः उत प्र अस्तौत् उत् च विद्वान् अगायत् ॥३॥ अवः द्वाभ्यां परः एकया गाः गुहा तिष्ठंतीः अनृतस्य सेतौ बृहस्पतिः तमसि ज्योतिः इच्छन् उत् उस्राः आ अकः वि हि तिस्रः आवः० ॥४॥ विऽभिद्य पुरँ शयथा इंऽअपाचीं निः चीणिं साकं उद्ऽधेः अकृंतत् बृहस्पतिः उषसं सूर्यं गां अर्कं विवेद् स्तनयन्ऽइव द्यौः ॥५॥ इंद्रः वलं रक्षितारँ दुघानां करेणंऽइव वि चकर्त रवेण स्वेदाँजिऽभिः आऽशिरँ इच्छमानः अरोदयत् पणिं आ गाः अमुष्णात् ॥६॥१५॥ सः ईं सत्येभिः सखिंऽभिः शुचत्ऽभिः गोऽधायसं वि धनऽसैः अदर्दः० ब्रह्मणः पतिः वृषंऽभिः वराहैः घर्मंऽस्वेदेभिः द्रविणं वि आनट् ॥७॥ ते सत्येन मनसा गोऽपतिं गाः इयानासः इषणयंत धीभिः बृहस्पतिः मिथःऽअवद्यपेभिः उत् उस्रियाः असृजत स्वयुक्ऽभिः ॥८॥ तं वर्धयंतः मतिऽभिः शिवाभिः सिंहंऽइव नानदतं सधऽस्थे बृहस्पतिं वृषणं शूरऽसातौ भरेऽभरे अनु मदेम जिष्णुं ॥९॥ यदा वाजं असनत् विश्वऽरूपं आ द्यां अरुक्षत् उतऽतराणि सद्म बृहस्पतिं वृषणं वर्धयंतः नानां संतः बिभ्रतः ज्योतिः आसा ॥१०॥ सत्यां आऽशिषं कृणुत वयःऽधे कीरिं चित् हि अवथ स्वेभिः एवैः पश्चा मृधः अप भवंतु विश्वाः तत् रोदसी शृणुतं विश्वंऽइन्वे० ॥११॥ इंद्रः महा महतः अर्णवस्य वि मूर्धानं अभिनत् अर्बुदस्य अहन् अहिं अरिणात् सप्त सिंधून् देवैः द्यावापृथिवी प्र अवतं नः ॥१२॥१६॥

॥६८॥ उद्ऽप्रुतः न वयः रक्षमाणाः वावदतः अभ्रियस्यऽइव घोषाः गिरिऽभ्रजः न ऊर्मयः मदन्तः बृहस्पतिं अभि अर्काः अनावन् ॥१॥ सं गोभिः आंगिरसः नक्षमाणः भगःऽइव इत् अर्यमणं निनाय जनेभिः चः न दंऽपती० अनक्ति बृहस्पते वाजयं आप्नून्ऽइव आजौ॥२॥ साधुऽअर्याः अतिथिनीः इषिराः स्पार्हाः सुऽवर्णाः अनवद्यऽरूपाः बृहस्पतिः पर्वतेभ्यः विऽतूर्यं निः गाः ऊपे यवंऽइव स्थविऽभ्यः॥३॥ आऽप्रुषायन् मधुना ऋतस्य योनिं अवऽक्षिपन् अर्कः उल्कांऽइव द्योः बृहस्पतिः उद्धरन् अश्मनः गाः भूम्याः उद्नाऽइव वि त्वचं विभेद्॥४॥ अपं ज्योतिषा तमः अंतरिक्षात् उद्नः शीपालंऽइव वातः आजत् बृहस्पतिः अनुऽमृश्य वलस्य अभ्रंऽइव वातः आ चक्रे आ गाः ॥५॥ यदा वलस्य पीयतः जसुं भेत् बृहस्पतिः अग्नितपःऽभिः अर्कैः दृतऽभिः न जिह्वा परिऽविष्टं आदत् आविः निऽधीन् अकृणोत् उस्रियाणां॥६॥१७॥ बृहस्पतिः अमत हि त्यत् आसां नाम स्वरीणां सदने गुहा यत् आंडाऽइव भित्त्वा शकुनस्य गर्भं उत् उस्रियाः पर्वतस्य त्मना आजत्॥७॥ अश्मा अपिंऽनद्धं मधु परि अपश्यत् मत्स्यं न दीने उदनि क्षियंतं निः तत् जभार् चमसं न वृक्षात् बृहस्पतिः विऽरवेण विऽकृत्य ॥८॥ सः उषां अविंदत् सः स्वः० सः अग्निं सः अर्केण वि बबाधे तमांसि बृहस्पतिः गोऽवपुषः वलस्य निः मज्जानं न पर्वणः जभार॥९॥ हिमाऽइव पर्णा मुषिता वनानि बृहस्पतिना अकृपयत् वलः गाः अननुऽकृत्यं अपुनः' चकार् यात् सूर्यामासा मिथः उत्ऽचरातः॥१०॥ अभि श्यावं न कृशनेभिः अश्वं नक्षत्रेभिः पितरः द्यां अपिंशन् रात्र्यां तमः अदधुः ज्योतिः अहन् बृहस्पतिः भिनत् अद्रिं विदत् गाः॥११॥ इदं अ-

कर्म नमः अभियाय यः पूर्वीः अनु आऽनोनवीति बृहस्पतिः सः हि गोभिः सः अश्वैः सः वीरिभिः सः नृऽभिः नः वयः धात् ॥१२॥१८॥५॥

॥ ६९॥ भद्राः अग्नेः वध्रिऽअश्वस्य संऽदृशः वामी प्रऽनीतिः सुऽरणाः उपऽइतयः यत् ईं सुऽमिचाः विशः अयै इंधते घृतेन आऽहुतः जरते दविद्युतत् ॥१॥ घृतं अग्नेः वध्रिऽअश्वस्य वर्धनं घृतं अन्नं घृतं ऊं इति अस्य मेदनं घृतेन आऽहुतः उर्विया वि पप्रथे सूर्यःऽइव रोचते सर्पिःऽआसुतिः॥२॥ यत् ते मनुः यत् अनीकं सुऽमिचः संऽईधे अग्ने तत् इदं नवीयः सः रेवत् शोच सः गिरः जुषस्व सः वाजं दर्षि सः इह श्रवः धाः ॥३॥ यं त्वा पूर्वं ईळितः वध्रिऽअश्वः संऽईधे अग्ने सः इदं जुषस्व सः नः स्तिऽपाः उत भव तनूऽपाः दाचं रक्षस्व यत् इदं ते अस्मे इति ॥४॥ भव द्युक्षी वाध्रिऽअश्व उत गोपाः मा त्वा तारीत् अभिऽमातिः जनानां शूरःऽइव धृष्णुः च्यवनः सुऽमिचः प्र नु वोचं वाध्रिऽअश्वस्य नाम ॥५॥ सं अज्र्या पर्वत्या वसूनि दासा वृचाणि आर्या जिगेथ शूरःऽइव धृष्णुः च्यवनः जनानां त्वं अग्ने पृतनाऽयून् अभि स्याः ॥६॥ ॥ १९॥ दीर्घऽतंतुः बृहत्ऽउक्षा अयं अग्निः सहस्रऽअत्तरीः शतऽनीथः ऋभ्वा द्युऽमान् द्युमत्ऽसु नृऽभिः मृज्यमानः सुऽमिचेषु दीदयः देवयत्ऽसु ॥७॥ त्वे इति धेनुः सुऽदुघा जातऽवेदः असश्चतीऽइव समना सवःऽधुक् त्वं नृऽभिः दक्षिणावत्ऽभिः अग्ने सुऽमिचेभिः इध्यसे देवयत्ऽभिः ॥८॥ देवाः चित् ते अमृताः जातऽवेदः महिमानं वाध्रिऽअश्व प्र वोचन् यत् संऽपृच्छं मानुषीः विशः आर्यन् त्वं नृऽभिः अजयः त्वाऽवृधेभिः ॥९॥ पिताऽइव पुत्रं अ-

बिभः उपऽस्थे त्वां अग्ने वध्रिऽअश्वः सपर्यन् जुषाणः अस्य संऽइधं यविष्ठ उत पूर्वान् अवनोः व्राधतः चित् ॥१०॥ शश्वत् अग्निः वध्रिऽअश्वस्य शचून् नृऽभिः जिगाय सुतसोमवत्ऽभिः समनं चित् अदहः चिचऽभानोः अव व्राधंतं अभिनत् वृधः चित् ॥११॥ अयं अग्निः वध्रिऽअश्वस्य वृचऽहा सनकात् प्रऽईडः नमसा उपऽवाक्यः सः नः अजामीन् उत वा विऽजामीन् अभि तिष्ठ शर्धतः वाध्रिऽअश्व ॥१२॥२०॥

॥७०॥ इमां मे अग्ने संऽइधं जुषस्व इळः पदे प्रति हर्य घृताचीं वर्धन् पृथिव्याः सुदिनऽत्वे अह्नां ऊर्ध्वः भव सुऽऋतोः देवऽयज्या ॥१॥ आ देवानां अयऽयावा इह यातु नराशंसः विश्वऽरूपेभिः अश्वैः ऋतस्य पथा नमसा मियेधः देवेभ्यः देवऽतमः सुसूदत् ॥२॥ शश्वत्ऽतमं ईळते दूत्याय हविष्मंतः मनुष्यासः अग्निं वहिष्ठैः अश्वैः सुऽवृता रथेन आ देवान् वक्षि नि सद इह होता ॥३॥ वि प्रयता देवऽजुष्टं तिरश्चा दीर्घं द्राघ्मा सुरभि भूतु अस्मे अहेळता मनसा देव बर्हिः इंद्रऽज्येष्ठान् उशतः यक्षि देवान् ॥४॥ दिवः वा सानु स्पृशत वरीयः पृथिव्या वा माचया वि श्रयध्वं उशतीः द्वारः महिना महत्ऽभिः देवं रथं रथऽयुः धारयध्वं ॥५॥२१॥ देवी दिवः दुहितरा सुऽशिल्पे उषासानक्ता सदतां नि योनौ आ वां देवासः उशती उशंतः उरौ सीदंतु सुऽभगे उपऽस्थे ॥६॥ ऊर्ध्वः भावा बृहत् अग्निः संऽइद्धः प्रिया धामानि अदितेः उपऽस्थे पुरःऽहितौ ऋत्विजा यज्ञे अस्मिन् विदुःऽतरा द्रविणं आ यजेथां ॥७॥ तिस्रः देवीः बर्हिः इदं वरीयः आ सीदत चकृम वः स्योनं मनुष्वत् यज्ञं सुऽधिता हवींषि इळा देवी घृतऽपदी जुषंत ॥८॥

देवं त्वष्टः यत् ह् चारुऽत्वं आनट् यत् अंगिरसां अभवः सचाऽभूः सः देवानाँ पाथः उप प्र विद्वान् उशन् यक्षि द्रविणःऽदः सुऽरत्नः॥९॥ वनस्पते रशनया निऽयूय देवानाँ पाथः उप वक्षि विद्वान् स्वदाति देवः कृणवत् हवींषि अवतां द्यावापृथिवी' हवं मे ॥१०॥ आ अग्ने वह् वरुणं इष्टये नः इंद्रं दिवः मरुतः अंतरिक्षात् सीदंतु बर्हिः विश्वे आ यजत्राः स्वाहा देवाः अमृताः मादयंतां ॥११॥२२॥

॥७१॥ बृहस्पते प्रथमं वाचः अग्रं यत् प्र ऐरत नाम ऽधेयं दधानाः यत् एषां श्रेष्ठं यत् अरिप्रं आसीत् प्रेणा तत् एषां निऽहितं गुहा आविः॥१॥ सक्तुंऽइव तितउना पुनंतः यत्र धीराः मनसा वाचं अक्रत अत्र सखायः सख्यानि जानते भद्रा एषां लक्ष्मीः निऽहिता अधि वाचि ॥२॥ यज्ञेन वाचः पदऽवीयं आयन् तां अनु अविंदन् ऋषिषु प्रऽविष्टां तां आऽभृत्य वि अदधुः पुरुऽत्रा तां सप्त रेभाः अभि सं नवंते ॥३॥ उत त्वः पश्यन् न ददर्श वाचं उत त्वः शृण्वन् न शृणोति एनां उतो' त्वस्मै तन्वं वि सस्रे जायाऽइव पत्ये उशती सुऽवासाः॥४॥ उत त्वं सख्ये स्थिरऽपीतं आहुः न एनं हिन्वंति अपि वाजिनेषु अधेन्वा चरति मायया एषः वाचं शुश्रुऽवान् अफलां अपुष्पां॥५॥२३॥ यः तित्याज सचिऽविदं सखायं न तस्य वाचि अपि भागः अस्ति यत् ईं शृणोति अलकं शृणोति नहि प्रऽवेद सुऽकृतस्य पंथां॥६॥ अक्षण्ऽवंतः कर्णिऽवंतः सखायः मनःऽजवेषु असमाः बभूवुः आदघासः उपऽकक्षासः ऊं' त्वे हृदाःऽइव स्नात्वाः ऊं' त्वे ददृश्रे॥७॥ हृदा तष्टेषु मनसः जवेषु यत् ब्राह्मणाः संऽयजंते सखायः अत्र अह त्वं वि जहुः वेः

द्याभिः ओहऽब्रह्माणः वि चरंति ऊं त्वे ॥८॥ इमे ये न अर्वाक् न परः चरंति न ब्राह्मणासः न सुतेऽकरासः ते एते वाचं अभिऽपद्य पापया सिरीः तंत्रं तन्वते अप्रेऽजज्ञयः ॥९॥ सर्वे नंदंति यशसा आऽगतेन सभाऽसहेन सख्या सखायः किल्बिषऽस्पृत् पितुऽसनिः हि एषां अरं हितः भवति वाजिनाय ॥१०॥ ऋचां त्वः पोषं आस्ते पुपुष्वान् गायत्रं त्वः गायति शक्करीषु ब्रह्मा त्वः वदति जातऽविद्यां यज्ञस्य मात्रां वि मिमीते ऊं त्वः ॥११॥२४॥२॥

॥७२॥ देवानां नु वयं जाना प्र वोचाम विपन्यया उक्थेषु शस्यमानेषु यः पश्यात् उत्ऽतरे युगे ॥१॥ ब्रह्मणः पतिः एता सं कर्मारःऽइव अधमत् देवानां पूर्व्ये युगे असतः सत् अजायत ॥२॥ देवानां युगे प्रथमे असतः सत् अजायत तत् आशाः अनु अजायंत तत् उत्तानऽपदः परि ॥३॥ भूः जज्ञे उत्तानऽपदः भुवः आशाः अजायंत अदितेः दक्षः अजायत दक्षात् ऊं अदितिः परि ॥४॥ अदितिः हि अजनिष्ट दक्ष या दुहिता तव तां देवाः अनु अजायंत भद्राः अमृतऽबंधवः ॥५॥७॥ यत् देवाः अदः सलिले सुऽसंरब्धाः अतिष्ठत अर्च वः नृत्यंतःऽइव तीव्रः रेणुः अप आयत ॥६॥ यत् देवाः यतयः यथा भुवनानि अपिन्वत अर्च समुद्रे आ गूळ्हं आ सूर्यं अजभर्तन ॥७॥ अष्टौ पुत्रासः अदितेः ये जाताः तन्वः परि देवान् उप प्र ऐत् सप्तऽभिः परा मार्ताडं आस्यत् ॥८॥ सप्तऽभिः पुत्रैः अदितिः उप प्र ऐत् पूर्व्यं युगं प्रऽजायै मृत्यवे त्वत् पुनः मार्ताडं आ अभरत् ॥९॥२॥

॥७३॥ जनिष्ठाः उग्रः सहसे तुराय मंद्रः ओजिष्ठः बहुलऽअ-

भिमानः अवर्धन् इंद्रं मरुतः चित् अत्र माता यत् वीरं दधनत् धनिष्ठा॥१॥ दुहः निऽसत्ता पृश्नी चित् एवैः पुरु शंसेन ववृधुः ते इंद्रं अभिवृता ऽइव ता महा ऽपदेन ध्वांतात् प्र ऽपित्वात् उत् अरंत गर्भाः॥२॥ कृष्वा ते पादा प्र यत् जिगासि अवर्धन् वाजाः उत ये चित् अत्र त्वं इंद्र सालावृकान् सहस्रं आसन् दधिषे अश्विना आ ववृत्याः॥३॥ समना तूर्णिः उप यासि यज्ञं आ नासत्या सख्याय वक्षि वसाव्यौ इंद्र धारयः सहस्रा अश्विना शूर ददतुः मघानि॥४॥ मंदमानः कृतात् अधि प्र ऽजायै सखिऽभिः इंद्रः इषिरेभिः अर्थे आ आभिः हि मायाः उप दस्युं आ अगात् मिहः प्र तमाः अवपत् तमांसि॥५॥३॥ सऽनामाना चित् ध्वसयः नि अस्मै अव अहन् इंद्रः उषसः यथा अनः कृष्वैः अगच्छः सखिऽभिः निऽकामैः साकं प्रतिऽस्या हृद्या जघंथ॥६॥ त्वं जघंथ नमुचिं मखस्युं दासं कृष्णानः कृषये विऽमायं त्वं चकर्थ मनवे स्योनान् पथः देवऽत्रा अंजसाऽइव यानान्॥७॥ त्वं एतानि पप्रिषे वि नाम ईशानः इंद्र दधिषे गभस्तौ अनु त्वा देवाः शवसा मदंति उपरिऽबुध्नान् वनिनः चकर्थ॥८॥ चक्रं यत् अस्य अप्ऽसु आ निऽसत्तं उतो तत् अस्मै मधु इत् चच्छद्यात् पृथिव्यां अधिऽसितं यत् ऊधः पयः गोषु अदधाः ओषधीषु॥९॥ अश्वात् इयाय इति यत् वदंति ओजसः जातं उत मन्ये एनं मन्योः इयाय हर्म्येषु तस्थौ यतः प्रऽजज्ञे इंद्रः अस्य वेद॥१०॥ वयः सुऽपर्णाः उप सेदुः इंद्रं प्रियऽमेधाः कृषयः नाधमानाः अप ध्वांतं ऊर्णुहि पूर्धि चक्षुः मुमुग्धि अस्मान् निधयाऽइव बद्धान्॥११॥४॥

॥७४॥ वसूनां वा चर्कृषे इयक्षन् धिया वा यज्ञैः वा रोदस्योः

अर्वंतः वा ये रयिऽमंतः सातौ वनुं वा ये सुऽश्रुणुं सुऽश्रुतः धुः० ॥१॥ हवंः एषां असुरः नक्षत द्यां श्रवस्यता मनसा निंसत क्षां चक्षाणाः यत्र सुविताय देवाः द्यौः न वारेभिः कृणवंत स्वैः॥२॥ इयं एषां अमृतानां गीः सर्वऽताता ये कृपणंत रत्नं धियं च यज्ञं च साधंतः ते नः धांतु वसव्यं असामि॥३॥ आ तत् ते इंद्र आयवः पनंत अभि ये ऊर्वं गोऽमंतं तितृत्सान् सकृत्ऽस्वं ये पुरुऽपुचां महीं सहस्रऽधारां बृहतीं दुदुक्षन्॥४॥ शचीऽवः इंद्रं अवसे कृणुध्वं अनानतं दमयंतं पृतन्यून् क्षुभुक्षणं मघऽवानं सुऽवृक्तिं भर्ता यः वज्रं नर्यं पुरुऽक्षुः॥५॥ यत् ववानं पुरुऽतमं पुराषाट् आ वृचऽहा इंद्रः नामानि अप्राः अचेति प्रऽसहः पतिः तुविष्मान् यत् ईं उश्मसि कर्तवे करत् तत्॥६॥५॥

॥७५॥ प्र सु वः आपः महिमानं उत्ऽतमं कारुः वोचाति सदने विवस्वतः प्र सप्तऽसप्त चेधा हि चक्रमुः प्र सृत्वरीणां अति सिंधुः ओजसा॥१॥ प्र ते अरदत् वरुणः यातवे पथः सिंधो यत् वाजान् अभि अद्रवः त्वं भूम्याः अधि प्रऽवता यासि सानुना यत् एषां अयं जगतां इरज्यसि॥२॥ दिवि स्वनः यतते भूम्यां उपरि अनंतं शुष्मं उत् इयर्ति भानुना अभ्रात्ऽइव प्र स्तनयंति वृष्टयः सिंधुः यत् एति वृषभः न रोरुवत्॥३॥ अभि त्वा सिंधो शिश्युं इत् न मातरः वाश्राः अर्षंति पयसाऽइव धेनवः राजाऽइव युध्वा नयसि त्वं इत् सिचौ यत् आसां अयं प्रऽवतां इनक्षसि॥४॥ इमं मे गंगे यमुने सरस्वति शुतुद्रि स्तोमं सचत परुष्णि आ असिक्न्या मरुत्ऽवृधे वितस्तया आर्जीकीये शृणुहि आ सुऽसोमया॥५॥६॥ तृष्टऽआमया प्रथमं यातवे सऽजूः सुऽसर्वा रसया श्वेत्या त्या त्वं

सिंधो॑ कु॒भया॑ गो॒ऽम॒तीं क्रुमुं॑ मे॒हत्न्वा स॒ऽरथं॑ याभिः ई॒यसे॑ ॥ ६॥ ऋ॒जी॑ती एनी॑ रु॒शंती॑ म॒हि॒ऽत्वा परि॑ ज्रयाँसि भ॒र॒ते॒ रजाँ॑सि अ॒-दं॒व्या सिंधुः॒ अ॒पसा॑ अ॒पः॒ऽत॒मा अश्वा॑ न चि॒त्रा वपु॑षीऽइव दृ॒श्-ता॥ ७॥ सु॒ऽअश्वा॑ सिंधुः सु॒ऽरथा॑ सु॒ऽवासाः॑ हि॒र॒ण्ययी॑ सु॒ऽकृ॑ता वा॒जिनी॑ऽवती ऊर्णा॑ऽवती यु॒व॒तिः सी॒ल॒मा॑ऽवती उ॒त अधि॑ व॒ल्ले॒ सु॒ऽभगा॑ म॒धु॒ऽवृधं॑ ॥ ८॥ सु॒ऽखं रथं॑ युयुजे॒ सिंधुः॒ अ॒श्वि॒नं॑ तेन॑ वाजं॑ स॒नि॒षत् अ॒स्मिन् आ॒जौ म॒हान् हि अ॒स्य॒ म॒हि॒मा प॒न॒-स्यते॑ अदं॑व्यस्य स्व॒ऽयंश॑सः वि॒ऽरप्शि॑नः ॥ ९॥ ७॥

॥ ७६॥ आ वः॒ ऋ॒ञ्जे॒ ऊर्जा॑ वि॒ऽउ॒ष्टिषु॒ इंद्रं॑ मरुतः रोद॑सी॑ अ॒न॒क्तन॒ उभे॑ यथा॑ नः॒ अह॑नी॑ स॒चा॒ऽभुवा॑ सद॑ः॒ऽसदः॑ वरि॒व॒-स्यात॑ः उ॒त्ऽअ॒भिद॑ा ॥ १॥ तत् ऊं॑ श्रेष्ठं॑ सव॑नं सुनोतन॒ अत्यं॑ न ह॒-स्तं॑ऽयतः॒ अद्रिः॑ सोतरि॑ वि॒दत् हि अ॒र्यः॒ अ॒भि॒ऽभूति॑ पौंस्यं॑ म॒हः रा॒ये चि॒त् त॒रु॒ते॒ यत् अव॑ंतः ॥ २॥ तत् इत् हि अ॒स्य॒ सव॑नं वि॒वे॒ः अ॒पः॒ यथा॑ पु॒रा मन॑वे गा॒तुं अश्वै॑त् गो॒ऽअ॑र्णसि त्वा॒ष्ट्रे अश्वं॑ऽनि-र्नि॑जि प्र ई॒ं अ॒ध्व॒रेषु॑ अ॒ध्व॒रान् अ॒शि॒श्रयुः॑ ॥ ३॥ अप॑ हत॒ र॒क्षसः॑ भं॒गुर॑ऽवंतः स्क॒भा॒यत॑ निः॒ऽऋ॒तिं सेध॑त अम॑तिं॒ आ नः॒ र॒यिं स-र्वं॑ऽवीरं सुनोतन॒ देव॒ऽअ॒व्यं भ॒र॒त॒ श्लोकं॑ अ॒द्र॒यः॑ ॥ ४॥ दि॒वः चि॒त् आ वः॒ अम॑वत्ऽतरेभ्यः वि॒ऽभ्वना॑ चित् आ॒श्व॒पः॒ऽत॒रेभ्यः॑ वा॒योः चि॒त् आ सोम॑रभः॒ऽत॒रेभ्यः॑ अ॒ग्नेः चि॒त् अर्च॑ पितु॒कृत्ऽत॑रेभ्यः ॥ ५॥ ८॥ भुर॑ंतु नः॒ य॒शसः॑ सोतु॑ अं॒धसः॑ ग्रावा॑णः वा॒चा दि॒विता॑ दि॒वित्म॑ता नरः॑ यत्र॑ दुहते॑ काम्यं॑ मधु॑ आ॒ऽघो॒ष॒यं॑तः॒ अ॒भि॒त॒ः मि॒-थः॒ऽतु॒रः ॥ ६॥ सु॒न्वंति॑ सोमं॑ र॒थि॒रासः॑ अद्र॑यः निः॑ अ॒स्य॒ रसं॑ गो॒ऽइ॒षः॑ दु॒हं॒ति॒ ते दु॒हं॒ति॒ ऊध॑ः उप॒ऽसेच॑नाय कं॑ नरः॑ ह॒व्या न

मर्जयंते आसऽभिः॥७॥ एते नरः सुऽअपसः अभूतन ये इंद्राय सुनुथ सोमं अद्रयः वामंऽवामं वः दिव्याय धाम्ने वसुंऽवसु वः पार्थिवाय सुन्वते ॥८॥९॥

॥७७॥ अभ्रऽप्रुषः न वाचा प्रुष वसुं हविष्मंतः न यज्ञाः विऽजानुषः सुऽमारुतं न ब्रह्माणं अर्हसे गणं अस्तोषि एषां न शोभसे॥१॥ श्रिये मर्यासः अंजीन् अकृण्वत सुऽमारुतं न पूर्वीः अतिं क्षपः दिवः पुचासः एताः न येतिरे आदित्यासः ते अक्राः न ववृधुः॥२॥ प्र ये दिवः पृथिव्याः न बर्हणा त्मना रिरिचे अभात् न सूर्यः पाजस्वंतः न वीराः पनस्यवः रिशादसः न मर्यः अभिऽद्यवः॥३॥ युष्माकं बुधे अपां न यामनि विथुर्यति न मही अथुर्यति विश्वऽप्सुः यज्ञः अर्वाक् अयं सु वः प्रयस्वंतः न सचाचः आ गत॥४॥ यूयं धूःऽसु प्रऽयुजः न रश्मिऽभिः ज्योतिष्मंतः न भासा विऽउंष्टिषु श्येनासः न स्वऽयंशसः रिशादसः प्रवासः न प्रऽसितासः परिऽप्रुषः॥५॥१०॥ प्र यत् वहध्वे मरुतः पराकात् यूयं महः संऽवरणस्य वस्वः विदानासः वसवः राध्यस्य आरात् चित् द्वेषः सनुतः युयोत॥६॥ यः उत्ऽऋचि यज्ञे अध्वरेऽस्थाः मरुत्ऽभ्यः न मानुषः ददाशत् रेवत् सः वयः दधते सुऽवीरं सः देवानां अपि गोऽपीथे अस्तु॥७॥ ते हि यज्ञेषु यज्ञियासः ऊमाः आदित्येन नाम्ना शंऽभविष्ठाः ते नः अवंतु रथऽतूः मनीषां महः च यामन् अध्वरे चकानाः॥८॥११॥

॥७८॥ विप्रासः न मन्मंऽभिः सुऽआध्यः देवऽअव्यः न यज्ञैः सुऽअप्नसः राजानः न चित्राः सुऽसंदृशः क्षितीनां न मर्यः अ-

रेपसः॥१॥ अग्निः न ये भाजसा रुक्मऽवक्षसः वातासः न स्वऽयुजः सद्यःऽऊतयः प्रऽज्ञातारः न ज्येष्ठाः सुऽनीतयः सुऽशर्माणः न सोमाः ऋतं यते॥२॥ वातासः न ये धुनयः जिगत्नवः अग्नीनां न जिह्वाः विऽरोकिणः वर्मण्ऽवंतः न योधाः शिमीऽवंतः पितॄणां न शंसाः सुऽरातयः॥३॥ रथानां न ये अराः सऽनाभयः जिगीवांसः न शूराः अभिऽद्यवः वरेऽयवः न मर्याः घृतऽप्रुषः अभिऽस्वर्तारः अर्कं न सुऽस्तुभः॥४॥ अश्वासः न ये ज्येष्ठासः आशवः दिधिषवः न रथ्यः सुऽदानवः आपः न निम्नैः उदऽभिः जिगत्नवः विश्वऽरूपाः अंगिरसः न साम्नऽभिः॥५॥१२॥ यावाणः न सूरयः सिंधुऽमातरः आऽदर्दिरासः अद्रयः न विश्वहा शिश्नथूलाः न क्रीळयः सुऽमातरः महाऽयामः न यामन् उत त्विषा॥६॥ उषसौ न केतवः अध्वरऽश्रियः शुभंऽयवः न अंजिऽभिः वि अश्वितन् सिंधवः न ययियः भ्राजत्ऽऋष्टयः पराऽवतः न योजनानि मुमिरे॥७॥ सुऽभागान् नः देवाः कृणुत सुऽरत्नान् अस्मान् स्तोतॄन् मरुतः ववृधानाः अधि स्तोत्रस्य सख्यस्य गात सनात् हि वः रत्नऽधेयानि संति॥८॥१३॥

॥७९॥ अपश्यं अस्य महतः महिऽत्वं अमर्त्यस्य मर्त्यासु विक्षु नानां हनूं विऽभृतेᵒ सं भरंते असिन्वती बप्सती भूरि अत्तः॥१॥ गुहा शिरः निऽहितं ऋधक् अक्षी असिन्वन् अत्ति जिह्वया वनानि अचाणि अस्मै पट्ऽभिः सं भरंति उत्तानऽहस्ताः नमसा अधि विक्षु॥२॥ प्र मातुः प्रऽतरं गुह्यं इच्छन् कुमारः न वीरुधः सर्पत् उर्वीः ससं न पक्वं अविदत् शुचंतं रिरिह्वांसं रिपः उपऽस्थे अंतः॥३॥ तत् वां ऋतं रोदसी प्र ब्रवीमि जायमानः मातरा

गर्भः अत्ति न अहं देवस्य मर्त्यः चिकेत अग्निः अंग विऽचेताः सः प्रऽचेताः॥४॥ यः अस्मै अवं तृषु आ ऽदधाति आज्यैः घृतैः जुहोति पुष्यति तस्मै सहस्रं अक्षऽभिः वि चक्षे अग्ने विश्वतः प्रत्यङ् असि त्वं॥५॥ किं देवेषु त्यजः एनः चकर्थ अग्ने पृच्छामि नु त्वा अविद्वान् अक्रीळन् क्रीळन् हरिः अत्तवे अदन् वि पर्वऽशः चकर्त गांऽइव असिः॥६॥ विषूचः अश्वान् युयुजे वनेऽजाः ऋजीतिऽभिः रशनाभिः गृभीतान् चक्षदे मिचः वसुऽभिः सुऽजातः सं आनृधे पर्वऽभिः ववृधानः॥७॥१४॥

॥८०॥ अग्निः सप्तिं वाजंऽभरं ददाति अग्निः वीरं श्रुत्यै कर्मनिःऽस्थां अग्निः रोदसी वि चरत् संऽअंजन् अग्निः नारीं वीरऽकुक्षिं पुरंऽधिं॥१॥ अग्नेः अर्भसः संऽइत् अस्तु भद्रा अग्निः मही रोदसी आ विवेश अग्निः एकं चोदयत् समतऽसु अग्निः वृत्राणि दयते पुरूणि॥२॥ अग्निः ह त्यं जरंतः कर्णे आव अग्निः अत्ऽभ्यः निःअदहत् जरूथं अग्निः अर्चिं घर्मे उरुष्यत् अंतः अग्निः नृऽमेधं प्रऽजया असृजत् सं॥३॥ अग्निः दात् द्रविणं वीरऽपेशाः अग्निः ऋषिं यः सहस्रा सनोति अग्निः दिवि हव्यं आ ततान अग्नेः धामानि विऽभृता पुरुऽचा॥४॥ अग्निं उक्थैः ऋषयः वि ह्वयंते अग्निं नरः यामनि बाधितासः अग्निं वयः अंतरिक्षे पतंतः अग्निः सहस्रा परि याति गोनां॥५॥ अग्निं विशः ईळते मानुषीः याः अग्निं मनुषः नहुषः वि जाताः अग्निः गांधर्वीं पथ्यां ऋतस्य अग्नेः गव्यूतिः घृते आ निऽसत्ता॥६॥ अग्नये ब्रह्म ऋभवः ततक्षुः अग्निं महां अवोचाम सुऽवृक्तिं अग्ने प्र अव जरितारं यविष्ठ अग्ने महि द्रविणं आ यजस्व॥७॥१५॥

॥८१॥ यः इमा विश्वा भुवनानि जुह्वत् ऋषिः होता नि असीदत् पिता नः सः आऽशिषा द्रविणं इच्छमानः प्रथमऽछत् अवरान् आ विवेश ॥१॥ किं स्वित् आसीत् अधिऽस्थानं आऽरंभणं कतमत् स्वित् कथा आसीत् यतः भूमिं जनयन् विश्वऽकर्मा वि द्यां और्णोत् महिना विश्वऽचक्षाः ॥२॥ विश्वतःऽचक्षुः उत विश्वतःऽमुखः विश्वतःऽबाहुः उत विश्वतःऽपात् सं बाहुऽभ्यां धमति सं पतत्रैः द्यावाभूमी जनयन् देवः एकः ॥३॥ किं स्वित् वनं कः उ सः वृक्षः आस यतः द्यावापृथिवी निःततक्षुः मनीषिणः मनसा पृच्छत इत् उ तत् यत् अधिऽअतिष्ठत् भुवनानि धारयन् ॥४॥ या ते धामानि परमाणि या अवमा या मध्यमा विश्वऽकर्मन् उत इमा शिक्ष सखिऽभ्यः हविषि स्वधाऽवः स्वयं यजस्व तन्वं वृधानः ॥५॥ विश्वऽकर्मन् हविषा ववृधानः स्वयं यजस्व पृथिवीं उत द्यां मुह्यंतु अन्ये अभितः जनासः इह अस्माकं मघऽवा सूरिः अस्तु ॥६॥ वाचः पतिं विश्वऽकर्माणं ऊतये मनःऽजुवं वाजे अद्य हुवेम सः नः विश्वानि हवनानि जोषत् विश्वऽशंभूः अवसे साधुऽकर्मा ॥७॥१६॥

॥८२॥ चक्षुषः पिता मनसा हि धीरः घृतं एने अजनत् नम्नमाने यदा इत् अंतः अदहंत पूर्वे आत् इत् द्यावापृथिवी अप्रथेतां ॥१॥ विश्वऽकर्मा विऽमनाः आत् विऽहायाः धाता विऽधाता परमा उत संऽदृक् तेषां इष्टानि सं इषा मदंति यत्र सप्तऽऋषीन् परः एकं आहुः ॥२॥ यः नः पिता जनिता यः विऽधाता धामानि वेद भुवनानि विश्वा यः देवानां नामऽधाः एकः एव तं संऽप्रश्नं भुवना यंति अन्या ॥३॥ ते आ अयजंत द्रविणं सं

अस्मै ऋषयः पूर्वे जरितारः न भूना असूतै सूतै रजसि निऽसत्ते ये भूतानि संऽअकृण्वन् इमानि॥४॥ परः दिवा परः एना पृथिव्या परः देवेभिः असुरैः यत् अस्ति कं स्वित् गर्भं प्रथमं दध्रे आपः यत्र देवाः संऽअपश्यंत विश्वे॥५॥ तं इत् गर्भं प्रथमं दध्रे आपः यत्र देवाः संऽअगच्छंत विश्वे अजस्य नाभौ अधि एकं अर्पितं यस्मिन् विश्वानि भुवनानि तस्थुः॥६॥ न तं विदाथ यः इमा जजान अन्यत् युष्माकं अंतरं बभूव नीहारेण प्रावृताः जल्प्या च असुऽतृपः उक्थऽशसः चरंति॥७॥१७॥

॥८३॥ यः ते मन्यो अविधत् वज्र सायक सहः ओजः पुष्यति विश्वं आनुषक् सह्यामं दासं आर्यं त्वया युजा सहःऽकृतेन सहसा सहस्वता॥१॥ मन्युः इंद्रः मन्युः एव आस देवः मन्युः होता वरुणः जातऽवेदाः मन्युं विशः ईळते मानुषीः याः पाहि नः मन्यो तपसा सऽजोषाः॥२॥ अभि इहि मन्यो तवसः तवीयान् तपसा युजा वि जहि शचून् अमित्रऽहा वृत्रऽहा दस्युऽहा च विश्वा वसूनि आ भर त्वं नः॥३॥ त्वं हि मन्यो अभिभूतिऽओजाः स्वयंऽभूः भामः अभिमातिऽसहः विश्वऽचर्षणिः सहुरिः सहावान् अस्मासु ओजः पृतनासु धेहि॥४॥ अभागः सन् अप पराऽइतः अस्मि तव क्रत्वा तविषस्य प्रऽचेतः० तं त्वा मन्यो अक्रतुः जिहीळ अहं स्वा तनूः बलऽदेयाय मा आ इहि॥५॥ अयं ते अस्मि उप मा आ इहि अर्वाङ् प्रतीचीनः सहुरे विश्वऽधायः मन्यो वज्रिन् अभि मां आ ववृत्स्व हनाव दस्यून् उत बोधि आपेः॥६॥ अभि प्र इहि दक्षिणतः भव मे अध वृत्राणि जंघनाव भूरि जुहोमि ते धरुणं मध्वः अग्रं उभौ उपऽअंशु प्रथमा पिबाव॥७॥१८॥

॥८४॥ त्वया॑ म॒न्यो॑ स॒ऽरथ॑ꣳ आ॒ऽरु॒जं॑तः ह॒र्षमा॑णासः धृ॒षि॒ता॒ः म॒रु॒त्वः॒ ति॒ग्मऽइ॑षवः आयु॑धा सं॑ऽशिशा॑नाः अ॒भि प्र यं॑तु नरः॑ अ॒ग्निऽरू॑पाः॥१॥ अ॒ग्निः॑ऽइ॑व म॒न्यो॑ त्वि॒षि॒तः स॒ह॒स्व॒ से॒ना॒ऽनीः॑ नः॒ स॒हु॒रे॒ हू॒तः॒ एधि॑ ह॒त्वाय॑ शत्रू॑न् वि भ॒ज॒स्व॒ वेदः॑ ओजः॑ मिमा॑नः॒ वि मृधः॑ नुद॒स्व॒॥२॥ सह॑स्व म॒न्यो॑ अ॒भिऽमा॑तिं अ॒स्मे॑ रु॒जन् मृ॒ण॒न् प्र॒ऽमृ॒ण॒न् प्र इ॒हि॒ श॒त्रू॒न् उ॒ग्रं ते॒ पाजः॑ ननु आ रु॒रु॒ध्रे॒ व॒शी व॒शं न॒य॒से॒ एक॒ऽज॒ त्वं॥३॥ एकः॑ ब॒हू॒नां अ॒सि॒ म॒न्यो॑ ईळि॑तः विश॑ऽविशं यु॒धये॑ सं शि॒शा॒धि॒ अकृ॑त्तऽरुक् त्वया॑ युजा॒ व॒यं द्यु॒ऽमंतं॑ घोषं॑ वि॒ऽज॒याय॑ कृण्महे ॥४॥ वि॒जे॒ष॒ऽकृत् इंद्रः॑ऽइव॒ अन॑वऽब्रवः अ॒स्माकं॑ म॒न्यो॑ अधि॑ऽपाः भव॒ इ॒ह प्रि॒यं ते॒ नाम॑ स॒हु॒रे॒ गृ॒णी॒म॒सि॒ वि॒द्म॒ तं उत्सं॑ यतः॑ आ॒ऽब॒भू॒थ ॥५॥ आ॒ऽभू॒त्या स॒हु॒ऽजाः॒ व॒ज्र॒ सा॒य॒क॒ सह॑ः वि॒भ॒र्षि॒ अ॒भि॒ऽभू॒ते॒ उत्ऽत॑रं कृ॒त्वा नः॒ म॒न्यो॑ स॒ह मे॒दी॒ एधि॒ म॒हा॒ऽध॒न॒स्य॑ पुरु॒ऽहू॒त॒ सं॑ऽसृ॒जि॒॥६॥ सं॑ऽसृ॑ष्टं ध॒नं उ॒भयं॑ सं॑ऽआकृ॑तं अ॒स्मभ्यं॑ दत्तां॒ वरु॑णः च॒ म॒न्युः॒ भि॒यं द॒धा॒नाः॒ हृ॒द॒येषु॑ श॒त्रवः॒ परा॑ऽजिताः॒ अप॑ नि ल॒य॒ंता॒॥७॥१९॥६॥

॥८५॥ स॒त्येन॑ उत्ऽभि॒ता भूमिः॑ सू॒र्येण॒ उत्ऽभि॑ता द्यौः ऋ॒तेन॑ आ॒दि॒त्याः॒ ति॒ष्ठ॒न्ति॒ दि॒वि सोमः॑ अधि॑ श्रि॒तः॥१॥ सोमे॑न आ॒दि॒त्याः॒ ब॒लिनः॑ सोमे॑न पृथि॒वी म॒ही अथो॑ नक्ष॒त्राणां॑ ए॒षां उ॒प॒ऽस्थे सोमः॑ आ॒ऽहि॒तः॥२॥ सोमं॑ मन्यते॒ पपि॑ऽवान् यत् सं॑ऽपिं॒ष॒न्ति॒ ओष॑धिं सोमं॑ यं ब्रह्मा॑णः विदुः॒ न तस्य॑ अश्नाति॒ कः च॒न ॥३॥ आ॒च्छत्ऽविधा॑नैः गुपि॒तः बा॒र्हतैः॑ सो॒म॒ रक्षि॒तः॒ या॒व्ना॒ं

इत् मृणन् तिष्ठसि न ते अश्नाति पार्थिवः॥४॥ यत् त्वा देव प्रऽपिबंति ततः आ प्यायसे पुनः वायुः सोमस्य रक्षिता समानां मासः आऽकृतिः॥५॥२०॥ रैभी आसीत् अनुऽदेयी नाराशंसी निऽओचनी सूर्यायाः भद्रं इत् वासः गाथया एति परिऽकृतं॥६॥ चित्तिः आः उपऽबर्हणं चक्षुः आः अभिऽअंजनं द्यौः भूमिः कोशः आसीत् यत् अयात् सूर्या पतिं॥७॥ स्तोमाः आसन् प्रतिऽधयः कुरीरं छंदः ओपशः सूर्यायाः अश्विना वरा अग्निः आसीत् पुरःऽगवः॥८॥ सोमः वधूऽयुः अभवत् अश्विना आस्तां उभा वरा सूर्या यत् पत्ये शंसंतीं मनसा सविता अददात्॥९॥ मनः अस्याः अनः आसीत् द्यौः आसीत् उत छदिः शुक्रौ अनड्वाहौ आस्तां यत् अयात् सूर्या गृहं॥१०॥२१॥ ऋक्ऽसामाभ्यां अभिऽहितौ गावौ ते सामनौ इतः ओचं ते चक्रे आस्तां दिवि पंथाः चराचरः॥११॥ शुचीं ते चक्रे यात्याः विऽआनः अक्षः आऽहतः अनः मनसमयं सूर्या आ अरोहत् प्रऽयती पतिं॥१२॥ सूर्यायाः वहतुः प्र अगात् सविता यं अवऽअसृजत् अघासु हन्यंते गावः अर्जुन्योः परि उह्यते॥१३॥ यत् अश्विना पृच्छमानौ अयातं चिऽचक्रेण वहतुं सूर्यायाः विश्वे देवाः अनु तत् वां अजानन् पुचः पितरौ अवृणीत पूषा॥१४॥ यत् अयातं शुभः पती वरेऽयं सूर्या उप कं एकं चक्रं वां आसीत् कं देष्ट्राय तस्थथुः॥१५॥२२॥ द्वे ते चक्रे सूर्ये ब्रह्माणः ऋतुऽथा विदुः अथ एकं चक्रं यत् गुहा तत् अद्धातयः इत् विदुः॥१६॥ सूर्यायै देवेभ्यः मित्राय वरुणाय च ये भूतस्य प्रऽचेतसः इदं तेभ्यः अकरं नमः॥१७॥ पूर्वऽअपरं चरतः मायया एतौ शिशू क्रीळंतौ परि यातः अध्वरं विश्वानि अन्यः भुवना अभिऽचष्टे ऋतून् अन्यः विऽदधत् जायते पुनः॥१८॥

नवः ऽनवः भवति जायमानः अह्नाँ केतुः उषसाँ एति अग्रँ भागं देवेभ्यः वि दधाति आ ऽयन् प्र चंद्रमाः तिरते दीर्घं आयुः॥१९॥ सु-ऽकिंशुकं शल्मलिं विश्वऽरूपं हिरण्यऽवर्णं सु ऽवृतं सु ऽचक्रं आ रोह सूर्ये अमृतस्य लोकं स्योनं पत्ये वहतुं कृणुष्व॥२०॥२३॥ उत् ईर्ष्व अतः पतिऽवती हि एषा विश्वऽवसुं नमसा गीः ऽभिः ईळे अन्यां इच्छ पितृ ऽसदं विऽअक्तां सः ते भागः जनुषा तस्यं विद्धि ॥२१॥ उत् ईर्ष्व अतः विश्व ऽवसो॰ नमसा ईळामहे त्वा अन्यां इच्छ प्र ऽफर्व्यं सं जायां पत्या सृज॥२२॥ अनृक्षराः ऋजवः संतु पंथाः येभिः सखायः यंति नः वरे ऽयं सं अर्यमा सं भगः नः नि-नीयात् सं जाः पत्यं सु ऽयमं अस्तु देवाः॥२३॥ प्र त्वा मुंचामि वरुणस्य पाशात् येन त्वा अबध्नात् सविता सु ऽशेवः ऋतस्य योनौ सु ऽकृतस्य लोके अरिष्टां त्वा सह पत्या दधामि॥२४॥ प्र इतः मुंचामि न अमुतः सु ऽबद्धां अमुतः करं यथा इयं इंद्र मीढ्वः सु ऽपुत्रा सु ऽभगा असति॥२५॥२४॥ पूषा त्वा इतः नयतु हस्त ऽगृह्य अश्विना त्वा प्र वहतां रथेन गृहान् गच्छ गृह ऽपत्नी यथा असः वशिनी त्वं विदथं आ वदासि॥२६॥ इह प्रियं प्र ऽजया ते सं ऋध्यतां अस्मिन् गृहे गार्ह ऽपत्याय जागृहि एना पत्या तन्वं सं सृजस्व अधं जिव्रीं विदथं आ वदाथः॥२७॥ नील ऽलोहितं भवति कृत्या आसक्तिः वि अज्यते एधंते अस्याः ज्ञातयः पतिः बंधेषु बध्यते॥२८॥ परा देहि शामुल्यं ब्रह्म ऽभ्यः वि भज वसु कृत्या एषा पत् ऽवती भूत्वी आ जाया विशते पतिं॥२९॥ अश्रीरा तनूः भवति रुशंती पापया अमुया पतिः यत् वध्वः वासंसा स्वं अंगं अभि ऽधित्सते॥३०॥२५॥ ये वध्वः चंद्रं वहतुं यक्ष्माः यंति जनात् अनु पुनः तान् यज्ञियाः देवाः नयंतु यतः आ ऽगताः॥३१॥ मा

विद्न् परिऽपंथिनः ये आऽसीदंति दंऽपती० सुऽगेभिः दुःऽगं अति इतां अप दुरांतु अरातयः ॥३२॥ सुऽमंगलीः इयं वधूः इ-मां सं ऽएत पश्यत सौभाग्यं अस्यै दत्वाय अथ अस्तं वि परा इ-तन ॥३३॥ तृष्टं एतत् कटुकं एतत् अपाष्ठऽवत् विषऽवत् न एतत् अत्तवे सूर्या यः ब्रह्मा विद्यात् सः इत् वाधूंऽयं अर्हति ॥३४॥ आ-ऽशसनं विऽशसनं अथो अधिऽविकर्तनं सूर्यायाः पश्य रूपा-णि तानि ब्रह्मा तु शुंधति ॥३५॥२६॥ गृभ्णामि ते सौभगऽत्वाय हस्तं मया पत्या जरत्ऽअष्टिः यथा असः भगः अर्यमा सविता पुरंऽधिः मह्यं त्वा अदुः गार्हपत्याय देवाः ॥३६॥ तां पूषन् शिवऽतमां आ ईरयस्व यस्यां बीजं मनुष्याः वपंति या नः ऊरू उशती विऽश्रयाते यस्यां उशंतः प्रऽहरांम शेपं ॥३७॥ तुभ्यं अग्रे परि अवहन् सूर्या वहतुना सह पुनः पतिंऽभ्यः जायां दाः अग्ने प्रऽजया सह ॥३८॥ पुनः पत्नीं अग्निः अदात् आयुषा सह वर्चसा दीर्घऽआयुः अस्याः यः पतिः जीवाति शरदः शतं ॥३९॥ सोमः प्र-थमः विविदे गंधर्वः विविदे उत्ऽतरः तृतीयः अग्निः ते पतिः तु-रीयः ते मनुष्यऽजाः ॥४०॥२७॥ सोमः ददत् गंधर्वाय गंधर्वः ददत् अग्नये रयिं च पुचान् च अदात् अग्निः मह्यं अथो इमां ॥४१॥ इह एव स्तं मा वि यौष्टं विश्वं आयुः वि अश्नुतं क्रीळंतौ पुत्रैः नप्तृ-ऽभिः मोदमानौ स्वे गृहे ॥४२॥ आ नः प्रऽजां जनयतु प्रजाऽप-तिः आऽजरसाय सं अनक्तु अर्यमा अदुःऽमंगलीः पतिऽलोकं आ विश शं नः भव द्विऽपदे शं चतुःऽपदे ॥४३॥ अघोरऽचक्षुः अपतिऽघ्नी एधि शिवा पशुऽभ्यः सुऽमनाः सुऽवर्चाः वीरऽसूः देवऽकामा स्योना शं नः भव द्विऽपदे शं चतुःऽपदे ॥४४॥ इमां त्वं इंद्र मीढ्वः सुऽपुत्रां सुऽभगां कृणु दश अस्यां पुत्रान् आ

धेहि पतिं एकादशं कृधि ॥४५॥ सं ऽराज्ञी श्वश्रुरि भव सं ऽराज्ञी श्वश्र्वां भव ननांदरि सं ऽराज्ञी भव सं ऽराज्ञी अधि देवृषु॥४६॥ सं अंजंतु विश्वे देवाः सं आपः हृदयानि नौ सं मातरिश्वा सं धाता सं उ॑ देष्ट्री दधातु नौ ॥४७॥२८॥३॥

॥८६॥ वि हि सोतोः असृक्षत न इंद्रं देवं अमंसत यच्च अमदत् वृषाकपिः अयेः पुष्टेषु मत्ऽसखा विश्वस्मात् इंद्रः उत्ऽतरः ॥१॥ परा हि इंद्र धावसि वृषाकपेः अति व्यथिः नो अह प्र विंदसि अन्यच्च सोमऽपीतये विश्वस्मात् इंद्रः उत्ऽतरः॥२॥ किं अयं त्वां वृषाकपिः चकार हरितः मृगः यस्मिं इरस्यसि इत् उं नु अयेः वा पुष्टिऽमत् वसु विश्वस्मात् इंद्रः उत्ऽतरः॥३॥ यं इमं त्वं वृषाकपिं प्रियं इंद्र अभिऽरक्षसि श्वा नु अस्य जंभिषत् अपि कर्णे वराहुऽयुः विश्वस्मात् इंद्रः उत्ऽतरः ॥४॥ प्रिया तृष्टानि मे कपिः विऽअंक्ता वि अदूदुषत् शिरः नु अस्य राविषं न सुऽगं दुःकृते भुवं विश्वस्मात् इंद्रः उत्ऽतरः ॥५॥१॥ न मत् स्त्री सुभसत्ऽतरा न सुयाशुंऽतरा भुवत् न मत् प्रतिंऽच्यवीयसी न सक्थि उत्ऽयमीयसी विश्वस्मात् इंद्रः उत्ऽतरः॥६॥ उवे अंब सुलाभिके यथाऽइव अंग भविष्यति भसत् मे अंब सक्थि मे शिरः मे विऽइव हृष्यति विश्वस्मात् इंद्रः उत्ऽतरः ॥७॥ किं सुऽबाहो॰ सुऽअंगुरे पृथुंऽस्तो॰ पृथुंऽजघने किं शूरऽपत्नि नः त्वं अभि अमीषि वृषाकपिं विश्वस्मात् इंद्रः उत्ऽतरः ॥८॥ अवीरांऽइव मां अयं शरारुः अभि मन्यते उत अहं अस्मि वीरिणी इंद्रऽपत्नी मरुत्ऽसखा विश्वस्मात् इंद्रः उत्ऽतरः॥९॥ संऽहोचं स्म पुरा नारीं समनं वा अव गच्छति वेधाः ऋतस्य वीरिणी इंद्रऽपत्नी म-

हीयते विश्वस्मात् इंद्रः उत्ऽतरः ॥१०॥२॥ इंद्राणीं आसु नारिषु सुऽभगां अहं अश्रवं नहि अस्याः अपरं चन जरसा मरते पतिः विश्वस्मात् इंद्रः उत्ऽतरः ॥११॥ न अहं इंद्राणि ररण सख्युः वृषाकपेः ऋते यस्य इदं अप्यं हविः प्रियं देवेषु गच्छति विश्वस्मात् इंद्रः उत्ऽतरः ॥१२॥ वृषाकपायि रेवति सुऽपुत्रे आत् ऊं सुऽस्नुषे घसत् ते इंद्रः उक्षणः प्रियं काचित्ऽकरं हविः विश्वस्मात् इंद्रः उत्ऽतरः॥१३॥ उक्षणः हि मे पंचऽदश साकं पचंति विंशतिं उत अहं अद्मि पीवः इत् उभा कुक्षी प्रणंति मे विश्वस्मात् इंद्रः उत्ऽतरः॥१४॥ वृषभः न तिग्मऽशृंगः अंतः यूथेषु रोरुवत् मंथः ते इंद्र शं हृदे यं ते सुनोति भावयुः विश्वस्मात् इंद्रः उत्ऽतरः॥१५॥ ॥३॥ न सः ईशे यस्य रंबते अंतरा सक्थ्या कपृत् सः इत् ईशे यस्य रोमशं निऽसेदुषः विऽजृंभते विश्वस्मात् इंद्रः उत्ऽतरः॥१६॥ न सः ईशे यस्य रोमशं निऽसेदुषः विऽजृंभते सः इत् ईशे यस्य रंबते अंतरा सक्थ्या कपृत् विश्वस्मात् इंद्रः उत्ऽतरः॥१७॥ अयं इंद्र वृषाकपिः परस्वंतं हतं विदत् असिं सूनां नवं चरुं आत् एधस्य अनः आऽचितं विश्वस्मात् इंद्रः उत्ऽतरः॥१८॥ अयं एमि विऽचाकशत् विऽचिन्वन् दासं आर्यं पिबामि पाकऽसुत्वनः अभि धीरं अचाकशं विश्वस्मात् इंद्रः उत्ऽतरः॥१९॥ धन्व च यत् कृंतत्रं च कति स्वित् ता वि योजना नेदीयसः वृषाकपे अस्तं आ इहि गृहान् उप विश्वस्मात् इंद्रः उत्ऽतरः ॥२०॥ पुनः आ इहि वृषाकपे सुविता कल्पयावहै यः एषः स्वप्नऽनंशनः अस्तं एषि पथा पुनः विश्वस्मात् इंद्रः उत्ऽतरः ॥२१॥ यत् उदंचः वृषाकपे गृहं इंद्र अजगंतन क्व स्यः पुल्वघः मृगः कं अगन् जनऽयोपनः विश्वस्मात् इंद्रः उत्ऽतरः॥२२॥ पर्शुः ह नाम मानवी साकं सु-

सूव विंशतिं भद्रं भल त्यस्यै अभूत् यस्याः उदरँ आमंयत् विश्व-स्मात् इंद्रः उत्ऽतरः॥२३॥४॥

॥८७॥ रक्षःऽहनँ वाजिनँ आ जिघर्मि मित्रं प्रथिष्ठं उप यामि शर्मँ शिशानः अग्निः क्रतुऽभिः संऽइद्धः सः नः दिवा सः रिषः पातु नक्तँ॥१॥ अयःऽदंष्ट्रः अर्चिषा यातुऽधानान् उप स्पृश जातऽवेदः संऽइद्धः आ जिह्वया मूरऽदेवान् रभस्व क्रव्यऽअदः वृक्की अपि धत्स्व आसन्॥२॥ उभा उभयाविन् उप धेहि दंष्ट्रा हिंस्रः शिशानः अवरं परँ च उत अंतरिक्षे परि याहि राजन् जँभैः सं धेहि अभि यातुऽधानान्॥३॥ यज्ञैः इषूः संऽनममानः अग्ने वाचा शल्यान् अशनिऽभिः दिहानः ताभिः विध्य हृदये यातुऽधानान् प्रतीचः बाहून् प्रति भङ्धि एषां॥४॥ अग्नँ त्वचँ यातुऽधानस्य भिंधि हिंस्रा अशनिः हरसा हंतु एनं प्र पर्वाणि जातऽवेदः शृणीहि क्रव्यऽअत् क्रविष्णुः वि चिनोतु वृक्णं॥५॥ ॥५॥ यत्रं इदानीं पश्यसि जातऽवेदः तिष्ठँतं अग्ने उत वा चरँतं यत् वा अंतरिक्षे पथिऽभिः पतँतं तं अस्त्रा विध्य शर्वा शिशानः॥६॥ उत आऽलब्धं स्पृणुहि जातऽवेदः आऽलेभानात् ऋष्टिऽभिः यातुऽधानात् अग्ने पूर्वैः नि जहि शोशुचानः आमऽअदः क्ष्विंकाः तं अदंतु एनीः॥७॥ इह प्र ब्रूहि यतमः सः अग्ने यः यातुऽधानः यः इदं कृणोति तं आ रभस्व संऽइधा यविष्ठ नृऽचक्षसः चक्षुषे रंधय एनं॥८॥ तीक्ष्णेन अग्ने चक्षुषा रक्ष यज्ञं प्राचँ वसुऽभ्यः प्र नय प्रऽचेतः० हिंस्रं रक्षाँसि अभि शोशुचानं मा त्वा दभन् यातुऽधानाः नृऽचक्षः॥९॥ नृऽचक्षाः रक्षः परि पश्य विक्षु तस्य वीर्णि प्रति शृणीहि अस्या तस्य अग्ने पृष्टीः हरसा शृणीहि चेधा

मूलँ यातुऽधानस्य वृश्च ॥१०॥६॥ चिः यातुऽधानः प्रऽसितिं ते एतु चृतं यः अग्ने अनृतेन हंति तं अर्चिषा स्फूर्जयन् जातऽवेदः संऽअक्षं एनं गृणते नि वृङ्धि ॥११॥ तत् अग्ने चक्षुः प्रति धेहि रेभे शफऽआरुजँ येन पश्यसि यातुऽधानँ अथर्वऽवत् ज्योतिषा दैव्येन सत्यं धूर्वंतं अचितँ नि ओष ॥१२॥ यत् अग्ने अद्य मिथुना शपातः यत् वाचः तृष्टं जनयँत रेभाः मन्योः मनसः शर्व्या जायंते या तया विध्य हृदये यातुऽधानान् ॥१३॥ परा शृणीहि तपसा यातुऽधानान् परा अग्ने रक्षः हरसा शृणीहि परा अर्चिषा मूरऽदेवान् शृणीहि परा असुऽतृपः अभि शोशुचानः ॥१४॥ परा अद्य देवाः वृजिनं शृणंतु प्रत्यक् एनं शपथाः यंतु तृष्टाः वाचाऽस्तेनं शरवः ऋच्छंतु मर्मन् विश्वस्य एतु प्रऽसितिं यातुऽधानः ॥१५॥७॥ यः पौरुषेयेण क्रविषा संऽअंक्ते यः अश्व्येन पशुना यातुऽधानः यः अघ्न्यायाः भरति क्षीरं अग्ने तेषां शीर्षाणि हरसा अपि वृश्च ॥१६॥ संवत्सरीणं पयः उस्रियायाः तस्य मा अशीत् यातुऽधानः नृऽचक्षः पीयूषं अग्ने यतमः तितृप्सात् तं प्रत्यंचं अर्चिषा विध्य मर्मन् ॥१७॥ विषं गवां यातुऽधानाः पिबंतु आ वृष्यंतां अदितये दुःऽएवाः परा एनान् देवः सविता ददातु परा भागं ओषधीनां जयंतां ॥१८॥ सनात् अग्ने मृणसि यातुऽधानान् न त्वा रक्षाँसि पृतनासु जिग्युः अनु दह सहऽमूरान् क्रव्यऽअदः मा ते हेत्याः मुक्षत दैव्यायाः ॥१९॥ त्वं नः अग्ने अधरात् उदक्तात् त्वं पश्चात् उत रक्ष पुरस्तात् प्रति ते ते अजरासः तपिष्ठाः अघऽशँसं शोशुचतः दहंतु ॥२०॥८॥ पश्चात् पुरस्तात् अधरात् उदक्तात् कविः काव्येन परि पाहि राजन् सखे सखायं अजरः जरिम्णे अग्ने मर्तान् अमर्त्यः त्वं नः ॥२१॥ परि त्वा अग्ने पुरं वयं विप्रं

सहस्य धीमहि धृषत्ऽवर्णे दिवेऽदिवे हंतारं भंगुरऽवंतां॥२२॥ विषेण भंगुरऽवतः प्रति स्म रक्षसः दह अग्ने तिग्मेन शोचिषा तपुःऽअग्याभिः ऋष्टिऽभिः॥२३॥ प्रति अग्ने मिथुना दह यातुऽधाना किमीदिना सं त्वा शिशामि जागृहि अदब्धं विप्र मन्मऽभिः॥२४॥ प्रति अग्ने हरसा हरः शृणीहि विश्वतः प्रति यातुऽधानस्य रक्षसः बलं वि रुज वीर्यं॥२५॥९॥

॥८८॥ हविः पांतं अजरं स्वःऽविदि दिविऽस्पृशं आऽहुतं जुष्टं अग्नौ तस्य भर्मणे भुवनाय देवाः धर्मणे कं स्वधया पप्रथंत ॥१॥ गीर्णं भुवनं तमसा अपऽगूळ्हं आविः स्वः अभवत् जाते अग्नौ तस्य देवाः पृथिवी द्यौः उत आपः अरंणयन् ओषधीः सख्ये अस्य॥२॥ देवेभिः नु इषितः यज्ञियेभिः अग्निं स्तोषाणि अजरं बृहंतं यः भानुना पृथिवीं द्यां उत इमां आऽततान रोदसी अंतरिक्षं॥३॥ यः होता आसीत् प्रथमः देवऽजुष्टः यं सऽआंजन् आज्येन वृणानाः सः पतचि इत्वरं स्थाः जगत् यत् स्वाचं अग्निः अकृणोत् जातऽवेदाः॥४॥ यत् जातऽवेदः भुवनस्य मूर्धन् अतिष्ठः अग्ने सह रोचनेन तं त्वा अहेम मतिऽभिः गीःऽभिः उक्थैः सः यज्ञियः अभवः रोदसिऽप्राः॥५॥१०॥ मूर्धा भुवः भवति नक्तं अग्निः ततः सूर्यः जायते प्रातः उत्ऽयन् मायां ऊं तु यज्ञियानां एतां अपः यत् तूष्णीं चरति प्रऽजानन्॥६॥ दृशेन्यः यः महिना सऽइद्धः अरोचत दिविऽयोनिः विभाऽवा तस्मिन् अग्नौ सूक्तऽवाकेन देवाः हविः विश्वे आ अजुहवुः तनूऽपाः॥७॥ सूक्तऽवाकं प्रथमं आत् इत् अग्निं आत् इत् हविः अजनयंत देवाः सः एषां यज्ञः अभवत् तनूऽपाः तं द्यौः वेद् तं पृथिवी तं आपः॥८॥ यं दे-

वासः अजनयंत अग्निं यस्मिन् आ अजुहवुः भुवनानि विश्वा सः अर्चिषा पृथिवीं द्यां उत इमां ऋजु ऽयमानः अतपत् महि-ऽत्वा॥९॥ स्तोमेन हि दिवि देवासः अग्निं अजीजनन् शक्ति ऽभिः रोदसि ऽप्रां तं ऊं अकृण्वन् चेधा भुवे कं सः ओषधीः पचति विश्व ऽरूपाः॥१०॥११॥ यदा इत् एनं अदधुः यज्ञियासः दिवि देवाः सूर्यं आदितेयं यदा चरिष्णू मिथुनौ अभूतां आत् इत् प्र अपश्यन् भुवनानि विश्वा॥११॥ विश्वस्मै अग्निं भुवनाय देवाः वैश्वानरं केतुं अह्नां अकृण्वन् आ यः ततान उषसः वि ऽभातीः अपो ऊर्णोति तमः अर्चिषा यन्॥१२॥ वैश्वानरं कवयः यज्ञियासः अग्निं देवाः अजनयन् अजुर्यं नक्षत्रं प्रत्नं अमिनत् चरिष्णु यक्षस्य अधि ऽअक्षं तविषं बृहंतं॥१३॥ वैश्वानरं विश्वहा दीदि ऽवांसं मंचैः अग्निं कविं अच्छ वदामः यः महिम्ना परि ऽबभूव उर्वी उत अवस्तात् उत देवः परस्तात्॥१४॥ द्वे सुती अशृणवं पितॄणां अहं देवानां उत मर्त्यानां ताभ्यां इदं विश्वं एजत् सं एति यत् अंतरा पितरं मातरं च॥१५॥१२॥ द्वे सं ऽईची० विभृतः चरंतं शीर्षतः जातं मनसा वि ऽमृष्टं सः प्रत्यङ् विश्वा भुवनानि तस्थौ अग्रे ऽयुञ्छन् तरणिः भ्राजमानः॥१६॥ यच वदंते अवरः परः च यज्ञ ऽन्योः कतरः नौ वि वेद् आ शेकुः इत् सधऽमादं सखायः नक्षंत यज्ञं कः इदं वि वोचत्॥१७॥ कति अग्नयः कति सूर्यासः कति उषसः कति ऊं स्वित् आपः न उप ऽस्पिजं वः पितरः वदामि पृच्छामि वः कवयः विद्मने कं॥१८॥ यावत् ऽमात्रं उषसः न प्रतीकं सु ऽपर्ण्यः वसते मातरिश्वः तावत् दधाति उप यज्ञं आ ऽयन् ब्राह्मणः होतुः अवरः नि ऽसीदन्॥१९॥१३॥

॥८९॥ इंद्रं स्तव नृऽतमं यस्य महा विऽबबाधे रोचना वि जमः अंतान् आ यः पप्रौ चर्षणिऽधृत् वरःऽभिः प्र सिंधुऽभ्यः रिरिचानः महिऽत्वा॥१॥ सः सूर्यः परि उरु वरांसि आ इंद्रः ववृत्यात् रथ्याऽइव चक्रा अतिष्ठंतं अपस्यं न सर्गं कृष्णा तमांसि त्विषा जघान॥२॥ समानं अस्मै अनपऽवृत् अर्चे क्षमया दिवः असमं ब्रह्म नव्यं वि यः पृष्ठाऽईव जनिमानि अर्यः इंद्रः चिकाय न सखायं ईषे॥३॥ इंद्राय गिरः अनिशितऽसर्गाः अपः प्र ईरयं सगरस्य बुध्नात् यः अक्षेणऽइव चक्रिया शचीभिः विष्वक्तस्तंभ पृथिवीं उत द्यां॥४॥ आपांतऽमन्युः तृपलऽप्रभर्मा धुनिः शिमीऽवान् शरुऽमान् ऋजीषी सोमः विश्वानि अतसा वनानि न अर्वाक् इंद्रं प्रतिऽमानानि देभुः॥५॥१४॥ न यस्य द्यावापृथिवी न धन्व न अंतरिक्षं न अद्रयः सोमः अक्षाः यत् अस्य मन्युः अधिऽनीयमानः मृणाति वीक्रु रुजति स्थिराणि॥६॥ जघान वृचं स्वऽधितिः वनाऽइव रुरोज पुरः अरदत् न सिंधून् बिभेद गिरिं नवं इत् न कुंभं आ गाः इंद्रः अकृणुत स्वयुक्ऽभिः॥७॥ त्वं ह त्यत् ऋणऽयाः इंद्र धीरः असिः न पर्व वृजिना मृणासि प्र ये मित्रस्य वरुणस्य धामं युजं न जनाः मिनंति मित्रं॥८॥ प्र ये मित्रं प्र अर्यमणं दुःऽएवाः प्र संऽगिरः प्र वरुणं मिनंति नि अमित्रेषु वधं इंद्र तुम्रं वृषन् वृषाणं अरुषं शिशीहि॥९॥ इंद्रः दिवः इंद्रः ईशे पृथिव्याः इंद्रः अपां इंद्रः इत् पर्वतानां इंद्रः वृधां इंद्रः इत् मेधिराणां इंद्रः क्षेमे योगे हव्यः इंद्रः॥१०॥१५॥ प्र अक्तुऽभ्यः इंद्रः प्र वृधः अहःऽभ्यः प्र अंतरिक्षात् प्र समुद्रस्य धासेः प्र वातस्य प्रथसः प्र जमः अंतात् प्र सिंधुऽभ्यः रिरिचे प्र क्षितिऽभ्यः॥११॥ प्र शोशुचत्याः उषसः न केतुः अस्मिन्वा ते वर्ततां इंद्र हेतिः अश्मा-

ऽइव विध्य दिवः आ सृजानः तपिष्ठेन हेषसा द्रोघऽमित्रान्॥१२॥ अनु अहं मासाः अनु इत् वनानि अनु ओषधीः अनु पर्वतासः अनु इंद्रं रोदसी वावशाने अनु आपः अजिहत जायमानं ॥१३॥ कहि स्वित् सा ते इंद्र चेत्या असत् अघस्य यत् भिनदः रक्षः आऽईषत् मित्रऽक्रुवः यत् शसने न गावः पृथिव्याः आऽपृक् असुया शयंते ॥१४॥ शचुऽयंतः अभि ये नः ततस्रे महि व्राधंतः ओगणासः इंद्र अंधेन अमित्राः तमसा सचंतां सुऽज्योतिषः अक्तवः तान् अभि स्युः०॥१५॥ पुरूणि हि त्वा सवना जनानां ब्रह्माणि मंदन् गृणतां ऋषीणां इमां आऽघोषन् अवसा सऽहूतिं तिरः विश्वान् अर्चतः याहि अर्वाङ्॥१६॥ एव ते वयं इंद्र भुंजतीनां विद्याम सुऽमतीनां नवानां विद्याम वस्तोः अवसा गृणंतः विश्वामित्राः उत ते इंद्र नूनं॥१७॥ शुनं हुवेम मघऽवानं इंद्रं अस्मिन् भरे नृऽतमं वाजऽसातौ शृण्वंतं उग्रं ऊतये समत्ऽसु इंतं वृत्राणि संऽजितं धनानां॥१८॥१६॥

॥९०॥ सहस्रऽशीर्षा पुरुषः सहस्रऽअक्षः सहस्रऽपात् सः भूमिं विश्वतः वृत्वा अति अतिष्ठत् दशऽअंगुलं॥१॥ पुरुषः एव इदं सर्वं यत् भूतं यत् च भव्यं उत अमृतऽत्वस्य ईशानः यत् अन्नेन अतिऽरोहति॥२॥ एतावान् अस्य महिमा अतः ज्यायान् च पुरुषः पादः अस्य विश्वा भूतानि चिऽपात् अस्य अमृतं दिवि॥३॥ चिऽपात् ऊर्ध्वः उत् ऐत् पुरुषः पादः अस्य इह अभवत् पुनः तततः विष्वङ् वि अक्रामत् साशनानशने अभि॥४॥ तस्मात् विऽराट् अजायत विऽराजः अधि पुरुषः सः जातः अति अरिच्यत पश्चात् भूमिं अथो पुरः॥५॥१७॥ यत् पुरुषेण हविषा देवाः यज्ञं अतन्वत

वसंतः अस्य आसीत् आज्यं ग्रीष्मः इध्मः शरत् हविः॥६॥ तं यज्ञं बर्हिषि प्र औक्षन् पुरुषं जातं अग्रतः तेन देवाः अयजंत साध्याः ऋषयः च ये॥७॥ तस्मात् यज्ञात् सर्वऽहुतः संऽभृतं पृषत्ऽआज्यं पशून् तान् चक्रे वायव्यान् आरण्यान् ग्राम्याः च ये॥८॥ तस्मात् यज्ञात् सर्वऽहुतः ऋचः सामानि जज्ञिरे छंदांसि जज्ञिरे तस्मात् यजुः तस्मात् अजायत॥९॥ तस्मात् अश्वाः अजायंत ये के च उभयादतः गावः ह जज्ञिरे तस्मात् तस्मात् जाताः अजावयः॥१०॥ ॥१८॥ यत् पुरुषं वि अदधुः कतिधा वि अकल्पयन् मुखं किं अस्य कौ बाहू कौ ऊरू पादौ उच्येते॥११॥ ब्राह्मणः अस्य मुखं आसीत् बाहू राजन्यः कृतः ऊरू तत् अस्य यत् वैश्यः पत्ऽभ्यां शूद्रः अजायत॥१२॥ चंद्रमाः मनसः जातः चक्षोः सूर्यः अजायत मुखात् इंद्रः च अग्निः च प्राणात् वायुः अजायत॥१३॥ नाभ्याः आसीत् अंतरिक्षं शीर्ष्णः द्यौः सं अवर्तत पत्ऽभ्यां भूमिः दिशः श्रोत्रात् तथा लोकान् अकल्पयन्॥१४॥ सप्त अस्य आसन् परिऽधयः त्रिः सप्त समिधः कृताः देवाः यत् यज्ञं तन्वानाः अबध्नन् पुरुषं पशुं॥१५॥ यज्ञेन यज्ञं अयजंत देवाः तानि धर्माणि प्रथमानि आसन् ते ह नाकं महिमानः सचंत यत्र पूर्वे साध्याः संति देवाः॥१६॥१९॥७॥

॥९१॥ सं जागृवत्ऽभिः जरमाणः इध्यते दमे दमूनाः इषयन् इळः पदे विश्वस्य होता हविषः वरेण्यः विऽभुः विभाऽवा सुऽसखा सखिऽयते॥१॥ सः दर्शतऽश्रीः अतिथिः गृहेऽगृहे वनेऽवने शिश्रिये तक्ववीःऽइव जनेऽजनं जन्यः न अति मन्यते विशः आ क्षेति विश्यः विशेऽविशं॥२॥ सुऽदक्षः दक्षैः क्रतुना अ-

सि सुऽऋतुः अग्ने कविः काव्येन असि विश्वऽवित् वसुः वसूनां क्षयसि त्वं एकः इत् द्यावा च यानि पृथिवी च पुष्यतः॥३॥ प्रऽजानन् अग्ने तव योनिं ऋत्वियं इळायाः पदे घृतऽवंतं आ असदः आ ते चिकित्रे उषसाँऽइव एतयः अरेपसः सूर्यस्यऽइव रश्मयः॥४॥ तव श्रियः वर्षस्यऽइव विऽद्युतः चित्राः चिकित्रे उषसाँ न केतवः यत् ओषधीः अभिऽसृष्टः वनानि च परि स्वयं चिनुषे अन्नं आस्ये॥५॥२०॥ तं ओषधीः दधिरे गर्भं ऋत्वियं तं आपः अग्निं जनयंत मातरः तं इत् समानं वनिनः च वीरुधः अंतःऽवंतीः च सुवते च विश्वहा॥६॥ वातऽउपधूतः इषितः वशान् अनु तृषु यत् अन्ना वेविषत् विऽतिष्ठसे आ ते यतंते रथ्यः यथा पृथक् शर्धांसि अग्ने अजराणि धक्षतः॥७॥ मेधाऽकारं विदथस्य प्रऽसाधनं अग्निं होतारं परिऽभूतमं मतिं तं इत् अभि हविषि आ समानं इत् तं इत् महे वृणते न अन्यं त्वत्॥८॥ त्वां इत् अत्र वृणते त्वाऽयवः होतारं अग्ने विदथेषु वेधसः यत् देवऽयंतः दधति प्रयांसि ते हविष्मंतः मनवः वृक्तऽबर्हिषः॥९॥ तव अग्ने होत्रं तव पोत्रं ऋत्वियं तव नेष्ट्रं त्वं अग्निन् ऋतुऽयतः तव प्रऽशास्त्रं त्वं अध्वरिऽयसि ब्रह्मा च असि गृहऽपतिः च नः दमे॥१०॥२१॥ यः तुभ्यं अग्ने अमृताय मर्त्यः सं ऽइधा दाशत् उत वा हविःऽकृति तस्य होता भवसि यासि दूत्यं उप ब्रूषे यजसि अध्वरिऽयसि॥११॥ इमाः अस्मै मतयः वाचः अस्मत् आ ऋचः गिरः सुऽस्तुतयः सं अग्मत वसुऽयवः वसवे जातऽवेदसे वृञ्जासु चित् वर्धनः यासु चाकनत्॥१२॥ इमां प्रत्नाय सुऽस्तुतिं नवीयसीं वोचेयं अस्मे उशते शृणोतु नः भूयाः अंतरा हृदि अस्य निऽस्पृशे जायाऽइव पत्ये उशती सुऽवासाः॥१३॥ यस्मिन् अश्वासः

ऋषभासः उक्षणः वशाः मेषाः अवऽसृष्टासः आऽहुताः कीलालऽपे सोमंऽपृष्ठाय वेधसे हृदा मतिं जनये चारुं अग्नये॥१४॥ अहांवि अग्ने हविः आस्यै ते सुचिऽइव घृतं चम्विंऽइव सोमः वाजऽसनिं रयिं अस्मे सुऽवीरं प्रऽशस्तं धेहि यशसं बृहंतं ॥१५॥२२॥

॥९२॥ यज्ञस्य वः रथ्यं विश्पतिं विशां होतारं अक्तोः अतिथिं विभाऽवसुं शोचन् मुष्कासु हरिणीषु जभ्रुरत् वृषा केतुः यजतः द्यां अशायत ॥१॥ इमं अंजःऽपां उभये अकृण्वत धर्माणं अग्निं विदथस्य साधनं अक्तुं न यह्वं उषसः पुरःऽहितं तनूऽनपातं अरुषस्य निंसते॥२॥ वट् अस्य नीथा वि पणेः च मन्महे वयाः अस्य प्रऽहुताः आसुः अत्तवे यदा घोरासः अमृतऽत्वं आशत आत् इत् जनस्य दैव्यस्य चर्किरन्॥३॥ ऋतस्य हि प्रऽसितिः द्यौः उरु व्यचः नमः मही अरमतिः पनीयसी इंद्रः मित्रः वरुणः सं चिकित्रिरे अथो भगः सविता पूतऽदक्षसः॥४॥ प्र रुद्रेण ययिना यंति सिंधवः तिरः महीं अरमतिं दधन्विरे येभिः परिऽज्मा परिऽयन् उरु ज्रयः वि रोरुवत् जठरे विश्वं उक्षते॥५॥२३॥ क्राणाः रुद्राः मरुतः विश्वऽकृष्टयः दिवः श्येनासः असुरस्य नीळयः तेभिः चष्टे वरुणः मित्रः अर्यमा इंद्रः देवेभिः अर्वशेभिः अर्वशः ॥६॥ इंद्रे भुजं शशमानासः आशत सूरः दृशीके वृषणः च पौंस्ये प्र ये नु अस्य अर्हणा ततक्षिरे युजं वज्रं नृऽसदनेषु कारवः॥७॥ सूरः चित् आ हरितः अस्य रीरमत् इंद्रात् आ कः चित् भयते तवीयसः भीमस्य वृष्णः जठरात् अभिऽश्वसः दिवेऽदिवे सहुरिः स्तन् अवाधितः॥८॥ स्तोमं वः अद्य रुद्राय शिक्वसे क्षयत्ऽवीराय

नमसा दिदिष्टन येभिः शिवः स्वऽवान् एवयावऽभिः दिवः सिसक्ति स्वऽयंशाः निकामऽभिः ॥९॥ ते हि प्रऽजायाः अभरंत वि श्रवः बृहस्पतिः वृषभः सोमऽजामयः यज्ञैः अथर्वा प्रथमः विधारयत् देवाः दक्षैः भृगवः सं चिकिचिरे ॥१०॥२४॥ ते हि द्यावापृथिवी भूरिऽरेतसा नराशंसः चतुःऽअंगः यमः अदितिः देवः त्वष्टा द्रविणःऽदाः ऋभुक्षणः प्र रोदसी मरुतः विष्णुः अहिरे ॥११॥ उत स्यः नः उशिजाँ उर्विया कविः अहिः शृणोतु बुध्यः हवीमनि सूर्यामासा विऽचरंता दिविऽक्षिता धिया शमीनहुषी अस्य बोधतं ॥१२॥ प्र नः पूषा चरथे विश्वऽदेव्यः अपां नपात् अवतु वायुः इष्टये आत्मानं वस्यः अभि वातं अर्चत तत् अश्विना सुऽहवा यामनि श्रुतं ॥१३॥ विशां आसां अभयानां अधिऽक्षितं गीःऽभिः ऊं स्वऽयंशसं गृणीमसि ग्राभिः विश्वाभिः अदितिं अनर्वणं अक्तोः युवानं नृऽमनाः अध पतिं ॥१४॥ रेभत् अच जनुषा पूर्वः अंगिराः ग्रावाणः ऊर्ध्वाः अभि चक्षुः अध्वरं येभिः विऽहायाः अभवत् विऽचक्षणः पाथः सुऽमेकं स्वऽधितिः वनंनऽवति ॥१५॥२५॥

॥९३॥ महि द्यावापृथिवी भूतं उर्वी नारी यह्वी न रोदसी सदं नः तेभिः नः पातं सह्यसः एभिः नः पातं शूषणि ॥१॥ यज्ञेऽयज्ञे सः मर्त्यः देवान् सपर्यति यः सुम्नैः दीर्घश्रुत्ऽतमः आऽविवासाति एनान् ॥२॥ विश्वेषां इज्जयवः देवानां वाः महः विश्वे हि विश्वऽमहसः विश्वे यज्ञेषु यज्ञियाः ॥३॥ ते घ राजानः अमृतस्य मंद्राः अर्यमा मित्रः वरुणः परिऽज्मा कत् रुद्रः नृणां स्तुतः मरुतः पूषणः भगः ॥४॥ उत नः नक्तं अपां वृषण्ऽवसू°

सूर्यामासा सदनाय सऽधन्या सचा यत् सादि एषां अहिः बुध्नेषु बुध्नः॥५॥२६॥ उत नः देवौ अश्विना शुभः पती धामऽभिः मित्रावरुणौ उरुष्यतां महः सः रायः आ ईषते अतिं धन्वऽइव दुःइता॥६॥ उत नः रुद्रा चित् मृळतां अश्विना विश्वे देवासः रथः पतिः भगः ऋभुः वाजः ऋभुक्षणः परिऽज्मा विश्वऽवेदसः॥७॥ ऋभुः ऋभुक्षाः ऋभुः विधतः मदः आ ते हरी जूजुवानस्य वाजिना दुस्तरं यस्य साम चित् ऋधक् यज्ञः न मानुषः॥८॥ कृधि नः अह्रयः देव सवितः सः च स्तुषे मघोनां सहो नः इंद्रः वहिःऽभिः नि एषां चर्षणीनां चक्रं रश्मिं न योयुवे॥९॥ आ एषु द्यावापृथिवी धातं महत् अस्मे वीरेषु विश्वऽचर्षणि श्रवः पृक्षं वाजस्य सातये पृक्षं राया उत तुर्वणे॥१०॥२७॥ एतं शंस इंद्र अस्मऽयुः त्वं कूऽचित् संतं सहसाऽवन् अभिष्टये सदा पाहि अभिष्टये मेदतां वेदता वसो॥११॥ एतं मे स्तोमं तना न सूर्ये द्युतत्ऽयामानं ववृधंत नृणां संऽवर्ननं न अश्वं तष्टाऽइव अनपऽच्युतं॥१२॥ ववर्त येषां राया युक्ता एषां हिरण्ययी नेमऽधिता न पौंस्या वृथाऽइव विष्टऽअंता॥१३॥ प्र तत् दुःऽशीमे पृथवाने वेने प्र रामे वोचं असुरे मघवंत्ऽसु ये युक्ताय पंच शता अस्मऽयु पथा विऽश्रावि एषां॥१४॥ अधि इत् नु अचं सप्नतिं च सप्त च सद्यः दिदिष्ट तान्वः सद्यः दिदिष्ट पार्थ्यः सद्यः दिदिष्ट मायवः॥१५॥२८॥

॥९४॥ प्र एते वदंतु प्र वयं वदाम ग्रावंऽभ्यः वाचं वदत वदंत्ऽभ्यः यत् अद्रयः पर्वताः साकं आशवः श्लोकं घोषं भरथ इंद्राय सोमिनः॥१॥ एते वदंति शतऽवंत् सहस्रंऽवत् अभि क्रंदंति हरितेभिः आसऽभिः विष्टी ग्रावाणः सुऽकृतः सुऽकृत्यया होतुः

चित् पूर्वे हविःऽअद्यं आशत॥२॥ एते वदंन्ति अविदन् अना मधु नि ऊंखयंन्ते अधि पक्वे आमिंषि वृक्षस्य शाखां अरुणस्य बप्संतः ते सूभर्वाः वृषभाः प्रऽईं अराविषुः॥३॥ बृहत् वदंन्ति मदिरेण मंदिना इंद्रं क्रोशंतः अविदन् अना मधु संऽरभ्य धीराः स्वसृंऽभिः अनर्तिषुः आऽघोषयंतः पृथिवीं उपब्दिऽभिः॥४॥ सुऽपर्णीः वाचं अक्रत उप द्यविं आऽखरे कृष्णाः इषिराः अनर्तिषुः न्यंक् नि यंन्ति उपरस्य निःऽकृतं पुरुरेतः दधिरे सूर्यऽश्वितः॥५॥२९॥ उप्याःऽईव प्रऽवहंतः संऽआयमुः साकं युक्ताः वृषणः बिभ्रतः धुरः यत् श्वसंतः जग्मानाः अराविषुः मृळे एषां प्रोथथः अवंतांऽइव॥६॥ दशावनिऽभ्यः दशंऽकक्ष्येभ्यः दशंऽयोक्त्रेभ्यः दशंऽयोजनेभ्यः दशाभीशुऽभ्यः अर्चत अजरेंभ्यः दश धुरः दश युक्ताः वहंत्ऽभ्यः॥७॥ ते अद्रयः दशंऽयंचासः आशवः तेषां आऽधानं परि एति हर्यतं ते जं सुतस्य सोम्यस्य अंधसः अंशोः पीयूषं प्रथमस्य भेजिरे॥८॥ ते सोमऽअदः हरीं इंद्रस्य निंसते अंप्सु दुहंतः अधि आसते गवि तेभिः दुग्धं पपिऽवान् सोम्यं मधु इंद्रः वर्धते प्रथंते वृषऽयते॥९॥ वृषा वः अंप्सुः न किल रिषाथन इळाऽवंतः सदं इत् स्थन आशिताः रैवत्याऽइव महसा चारवः स्थन यस्य ग्रावाणः अजुषध्वं अध्वरं॥१०॥३०॥ नृदिलाः अनृदिलासः अद्रयः अश्रमणाः अपृथिताः अमृत्यवः अनातुराः अजराः स्थ अमंविष्णवःसुऽपीवसः अतृषिताः अतृष्णऽजः॥११॥ ध्रुवाःएव वः पितरः युगेऽयुगे क्षेमंऽकामासः सदंसः न युंजते अजुर्यासः हरिऽसाचः हरिद्रवः आ द्यां रवेंण पृथिवीं अपुश्रवुः॥१२॥ तत् इत् वदंन्ति अद्रयः विऽमोचने यामन् अंजःपाःऽईव घ इत् उपब्दिऽभिः वपंतः बीजंऽइव धान्यऽकृतः पृंचंन्ति सोमं न मिनंन्ति

वप्सतः॥१३॥ सुते अध्वरे अधि वाचँ अक्रत आ क्रीळयः न मातरँ तुदंतः वि सु मुंच सुसुऽवुषः मनीषां वि वर्तंतां अद्रयः चार्यमानाः॥१४॥३१॥४॥

॥ ९५ ॥ हये जाये मनसा तिष्ठ घोरे वचाँसि मिश्रा कृणवावहै नु न नौ मंत्राः अनुदितासः एते मयः करन् परऽतरे चन अहन् ॥१॥ किं एता वाचा कृणव तवं अहं प्र अक्रमिषं उषसाँ अग्रियाऽइव पुरूरवः पुनः अस्तँ परा इहि दुःऽआपना वातःऽइव अहं अस्मि ॥२॥ इषुः न श्रिये इषुऽधेः असना गोऽसाः शतऽसाः न रंहिः अवीरे क्रतौ वि दविद्युतत् न उरा न मायुं चितयंत धुनयः ॥३॥ सा वसु दधती श्वशुराय वयः उषः यदि वष्टि अंतिऽगृहात् अस्तं ननक्षे यस्मिन् चाकन् दिवा नक्तँ श्रथिता वैतसेन ॥४॥ चिः स्म मा अहः श्रथयः वैतसेन उत स्म मे अव्यत्यै पृणासि पुरूरवः अनु ते केतं आयं राजा मे वीर तन्वः तत् आसीः ॥५॥१॥ या सुऽजूर्णिः श्रेणिः सुम्नेऽआपिः हृदेऽचक्षुः न यंथिनी चरण्युः ताः अंजयः अरुण्यः न सस्रुः श्रिये गावः न धेनवः अनवंत ॥६॥ सं अस्मिन् जायमाने आसत माः उत ईं अवर्धन् नद्यः स्वऽगूर्ताः महे यत् त्वा पुरूरवः रणाय अवर्धयन् दस्युऽहत्याय देवाः॥७॥ सचा यत् आसु जहतीषु अत्कं अमानुषीषु मानुषः निऽसेवे अप स्म मत् तरसंती न भुज्युः ताः अचसन् रथऽस्पृशः न अश्वाः॥८॥ यत् आसु मर्तः अमृतासु निऽस्पृक् सं क्षोणीभिः क्रतुंऽभिः न पृंक्ते ताः आतयः न तन्वः शुंभत स्वाः अश्वासः न क्रीळयः दंदशानाः॥९॥ विऽद्युत् न या पतंती दविद्योत् भरंती मे अप्या काम्यानि जनिष्ठाः अपः नयैः सुऽजातः प्र उर्वशीं तिरत

दीर्घे आयुः॥१०॥२॥ जज्ञिषे इत्था गोऽपीच्याय हि दधाथ तत् पुरूरवः मे ओजः अशंसं त्वा विदुषी सस्मिन् अहन् न मे आ अप्नृणोः किं अभुक् वदासि॥११॥ कदा सूनुः पितरं जातः इच्छात् चक्रान् न अश्रु वर्तयत् विऽजानन् कः दंऽपती० सऽमनसा वि यूयोत् अध यत् अग्निः ष्वप्नरिषु दीदयत्॥१२॥ प्रति ब्रवाणि वर्तयते अश्रु चक्रान् न क्रंदत् आऽध्ये शिवायै प्र तत् ते हिनव यत् ते अस्मे परा इहि अस्तं नहि मूर मा आपः॥१३॥ सुऽदेवः अद्य प्रऽपतेत् अनावृत् पराऽवतं परमां गंतवै ऊं अध शयीत निःऽऋतेः उपऽस्थे अध एनं वृकाः रभसासः अद्युः॥१४॥ पुरूरवः मा मृथाः मा प्र पप्तः मा त्वा वृकासः अशिवासः ऊं क्षन् न वै स्त्रैणानि सख्यानि संति सालावृकाणां हृदयानि एता॥१५॥३॥ यत् विऽरूपा अचरं मर्त्येषु अवसं रात्रीः शरदः चतस्रः घृतस्य स्तोकं सकृत् अहः आश्नां तात् एव इदं ततृपाणा चरामि॥१६॥ अंतरिक्षऽप्रां रजसः विऽमानीं उप शिक्षामि उर्वशीं वसिष्ठः उप त्वा रातिः सुऽकृतस्य तिष्ठात् नि वर्तस्व हृदयं तप्यते मे॥१७॥ इति त्वा देवाः इमे आहुः ऐळ यथा ईं एतत् भवसि मृत्युऽबंधुः प्रऽजा ते देवान् हविषा यजाति स्वःऽगे ऊं त्वं अपि मादयासे॥१८॥४॥

॥९६॥ प्र ते महे विदथे शंसिषं हरी प्र ते वन्वे वनुषः हर्यतं मदं घृतं न यः हरिऽभिः चारु सेचते आ त्वा विशंतु हरिऽवर्पसं गिरः॥१॥ हरिं हि योनिं अभि ये संऽअस्वरन् हिन्वंतः हरी दिव्यं यथा सदः आ यं पृणंति हरिऽभिः न धेनवः इंद्राय सूषं हरिऽवंतं अर्चत॥२॥ सः अस्य वज्रः हरितः यः आयसः हरिः नि-

ऽकामः हरिः आ गभस्त्योः द्युम्नी सुऽशिप्रः हरिमन्युऽसायकः इंद्रे नि रूपा हरिता मिमिक्षिरे ॥३॥ दिवि न केतुः अधि धायि हर्यतः विव्यचत् वज्रः हरितः न रंह्या तुदत् अहिं हरिऽशिप्रः यः आयसः सहस्रऽशोकाः अभवत् हरिंऽभरः ॥४॥ त्वंऽत्वं अहर्यथाः उपऽस्तुतः पूर्वेभिः इंद्र हरिऽकेश यज्वऽभिः त्वं हर्यसि तव विश्वं उक्थ्यं असामि राधः हरिऽजात हर्यतं ॥५॥५॥ ता वज्रिणं मंदिनं स्तोम्यं मदे इंद्रं रथे वहतः हर्यता हरी पुरूणि अस्मै सवनानि हर्यते इंद्राय सोमाः हरयः दधन्विरे ॥६॥ अरं कामाय हरयः दधन्विरे स्थिराय हिन्वन् हरयः हरी तुरा अवंत्ऽभिः यः हरिऽभिः जोषं ईयते सः अस्य कामं हरिऽवंतं आनशे ॥७॥ हरिऽश्मश्रुः हरिऽकेशः आयसः तुरःऽपेये यः हरिऽपाः अवर्धत अवंत्ऽभिः यः हरिऽभिः वाजिनीऽवसुः अति विश्वा दुःऽइता पारिषत् हरी ॥८॥ स्रुवाऽइव यस्य हरिणी विऽपेततुः शिप्रे वाजाय हरिणी दविध्वतः प्र यत् कृते चमसे मर्मृजत् हरी पीत्वा मदस्य हर्यतस्य अंधसः ॥९॥ उत स्म सद्म हर्यतस्य पस्त्योः अत्यः न वाजं हरिऽवान् अचिक्रदत् मही चित् हि धिषणा अहर्यत् ओजसा बृहत् वयः दधिषे हर्यतः चित् आ ॥१०॥६॥ आ रोदसी हर्यमाणः महिऽत्वा नव्यंऽनव्यं हर्यसि मन्म नु प्रियं प्र पस्त्यं असुर हर्यतं गोः आविः कृधि हरये सूर्याय ॥११॥ आ त्वा हर्यतं प्रऽयुजः जनानां रथे वहंतु हरिऽशिप्रं इंद्र पिब यथा प्रतिऽभृतस्य मध्वः हर्यन् यज्ञं सधऽमादे दशऽओणिं ॥१२॥ अपाः पूर्वेषां हरिऽवः सुतानां अथो इदं सवनं केवलं ते मम्ऽदि सोमं मधुऽमंतं इंद्र सचा वृषन् जठरे आ वृषस्व ॥१३॥७॥

॥९७॥ याः ओषधीः पूर्वीः जाताः देवेभ्यः त्रिऽयुगं पुरा मनै नु बभ्रूणाँ अहं शतं धामानि सप्त च ॥१॥ शतं वः अंब धामानि सहस्रं उत वः रुहः अध शतऽक्रत्वः यूयं इमं मे अगदं कृत ॥२॥ ओषधीः प्रति मोदध्वं पुष्पतीऽवतीः प्रऽसूवरीः अश्वाःऽइव सऽजित्वरीः वीरुधः पारयिष्णवः ॥३॥ ओषधीः इति मातरः तत् वः देवीः उप ब्रुवे सनेयं अश्वं गां वासः आत्मानं तव पुरुष ॥४॥ अश्वत्थे वः निऽसदनं पर्णे वः वसतिः कृता गोऽभाजः इत् किलऽसथ यत् सनवथ पुरुषं ॥५॥८॥ यच्च ओषधीः संऽअगमत राजानः समितौऽइव विप्रः सः उच्यते भिषक् रक्षःऽहा अमीवऽचातनः ॥६॥ अश्वऽवतीं सोमऽवतीं ऊर्जयंतीं उत्ऽओजसं आ अवित्सि सर्वाः ओषधीः अस्मै अरिष्टऽतातये ॥७॥ उत् पुष्पाः ओषधीनां गावः गोस्थात्ऽइव ईरते धनं सनिष्यंतीनां आत्मानं तव पुरुष ॥८॥ इष्कृतिः नाम वः माता अथो यूयं स्थ निःऽकृतीः सीराः पतत्रिणीः स्थन यत् आमयति निः कृथ ॥९॥ अति विश्वाः परिऽस्थाः स्तेनःऽइव व्रजं अक्रमुः ओषधीः प्र अचुच्यवुः यत् किं च तन्वः रपः ॥१०॥९॥ यत् इमाः वाजयन् अहं ओषधीः हस्ते आऽदधे आत्मा यक्ष्मस्य नश्यति पुरा जीवऽगृभः यथा ॥११॥ यस्य ओषधीः प्रऽसर्पथ अंगंऽअंगं परुःऽपरुः ततः यक्ष्मं वि बाधध्वे उग्रः मध्यमशीःऽइव ॥१२॥ साकं यक्ष्म प्र पत चाषेण किकिदीविना साकं वातस्य ध्राज्या साकं नश्य निऽहाकया ॥१३॥ अन्या वः अन्यां अवतु अन्या अन्यस्याः उप अवत ताः सर्वाः संऽविदानाः इदं मे प्र अवत वचः ॥१४॥ याः फलिनीः याः अफलाः अपुष्पाः याः च पुष्पिणीः बृहस्पतिऽप्रसूताः ताः नः मुंचंतु अंहसः ॥१५॥१०॥ मुंचंतु मा शपथ्यात् अथो वरुण्यात्

उत अथो यमस्य पड्वीशात् सर्वस्मात् देवऽकिल्बिषात् ॥१६॥ अवऽपतंतीः अवदन् दिवः ओषधयः परि यं जीवं अश्नवामहै न सः रिष्याति पुरुषः ॥१७॥ याः ओषधीः सोमऽराज्ञीः बह्वीः शतऽविचक्षणाः तासां त्वं असि उत्ऽतमा अरं कामाय शं हृदे ॥१८॥ याः ओषधीः सोमऽराज्ञीः विऽस्थिताः पृथिवीं अनु बृहस्पतिऽप्रसूताः अस्यै सं दत्त वीर्यं ॥१९॥ मा वः रिषत् खनिता यस्मै च अहं खनामि वः द्विऽपत् चतुःऽपत् अस्माकं सर्वं अस्तु अनातुरं ॥२०॥ याः च इदं उपऽशृण्वंति याः च दूरं पराऽगताः सर्वीः संऽगत्य वीरुधः अस्यै सं दत्त वीर्यं ॥२१॥ ओषधयः सं वदंते सोमेन सह राज्ञा यस्मै कृणोति ब्राह्मणः तं राजन् पारयामसि ॥२२॥ त्वं उत्ऽतमा असि ओषधे तव वृक्षाः उपस्तयः उपस्तिः अस्तु सः अस्माकं यः अस्मान् अभिऽदासति ॥२३॥११॥

॥९८॥ बृहस्पते प्रति मे देवतां इहि मित्रः वा यत् वरुणः वा असि पूषा आदित्यैः वा यत् वसुऽभिः मरुत्वान् सः पर्जन्यं शंऽतनवे वृषय ॥१॥ आ देवः दूतः अजिरः चिकित्वान् त्वत् देवऽआपे अभि मां अगच्छत् प्रतीचीनः प्रति मां आ ववृत्स्व दधामि ते द्युऽमतीं वाचं आसन् ॥२॥ अस्मे धेहि द्युऽमतीं वाचं आसन् बृहस्पते अनमीवां इषिरां यया वृष्टिं शंऽतनवे वनाव दिवः द्रप्सः मधुऽमान् आ विवेश ॥३॥ आ नः द्रप्साः मधुऽमंतः विशंतु इंद्रं देहि अधिऽरथं सहस्रं नि सीद होचं ऋतुऽथा यजस्व देवान् देवऽआपे हविषा सपर्य ॥४॥ आर्ष्टिषेणः होचं ऋषिः निऽसीदन् देवऽआपिः देवऽसुमतिं चिकित्वान् सः उत्ऽतरस्मात् अधरं समुद्रं अपः दिव्याः असृजत् वर्ष्याः अभि ॥५॥ अस्मिन् समुद्रे अधि

उत ऽतरस्मिन् आपः देवेभिः निऽवृताः अतिष्ठन् ताः अद्रवन् आर्ष्टिषेणेन सृष्टाः देव ऽआपिना प्र ऽईषिताः मृक्षिणीषु ॥ ६ ॥ ॥ १२ ॥ यत् देव ऽआपिः शंऽतनवे पुरः ऽहितः होचाय वृतः कृपयन् अदीधित् देव ऽश्रुतं वृष्टिऽवनिं रराणः बृहस्पतिः वाचं अस्मै अयच्छत् ॥ ७ ॥ यं त्वा देव ऽआपिः शुशुचानः अग्ने आर्ष्टिषेणः मनुर्यः संऽईधे विश्वेभिः देवैः अनु ऽमद्यमानः प्र पर्जन्यं ईरय वृष्टिऽमंतं ॥ ८ ॥ त्वां पूर्वे ऋषयः गीःऽभिः आयन् त्वां अध्वरेषु पुरुऽहूत विश्वे सहस्राणि अधिऽरथानि अस्मे आ नः यज्ञं रोहित ऽअश्व उप याहि ॥ ९ ॥ एतानि अग्ने नवतिः नव त्वे आऽहुतानि अधिऽरथा सहस्रा तेभिः वर्धस्व तन्वः शूर पूर्वीः दिवः नः वृष्टिं इषितः रिरीहि ॥ १० ॥ एतानि अग्ने नवतिं सहस्रा सं प्र यच्छ वृष्णे इंद्राय भागं विद्वान् पथः ऋतुऽशः देव ऽयानान् अपि औलानं दिवि देवेषु धेहि ॥ ११ ॥ अग्ने बाधस्व वि मृधः वि दुःऽगहा अप अमीवां अप रक्षांसि सेध अस्मात् समुद्रात् बृहतः दिवः नः अपां भूमानं उप नः सृज इह ॥ १२ ॥ १३ ॥

॥ ९९ ॥ कं नः चित्रं इषण्यसि चिकित्वान् पृथुऽग्मानं वाश्रं ववृधध्यै कत् तस्य दातु शवसः विऽउष्टौ तक्षत् वज्रं वृत्रऽतुरं अपिन्वत् ॥ १ ॥ सः हि द्युता विऽद्युता वेति साम पृथुं योनिं असुरऽत्वा आ ससाद सः सऽनीळिभिः प्रऽसहानः अस्य भातुः न ऋते सप्नर्यस्य मायाः ॥ २ ॥ सः वाजं याता अपदुःऽपदा यन् स्वःऽसाता परि सदत् सनिष्यन् अनर्वा यत् शतऽदुरस्य वेदः भ्रन् शिश्नऽदेवान् अभि वर्पसा भूत् ॥ ३ ॥ सः यह्वीः अवनीः गोषु अर्वा आ जुहोति प्रऽधन्यासु सस्निः अपादः यत्र युज्यासः अरथाः द्रोणि-

ऽअंश्वासः ईरते घृतं वाः०॥४॥ सः रुद्रेभिः अशस्तऽवारः ऋभ्वा हित्वी गयं आरेऽअवद्यः आ अगात् वम्रस्य मन्ये मिथुना विऽवं-श्री० अवँ अभिऽइत्य अरोदयत् मुषायन्॥५॥ सः इत् दासं तुविऽरवँ पतिः दन् षट्ऽअक्षं चिऽशीर्षाणँ दमन्यत् अस्य चितः नु ओजसा वृधानः विपा वराहं अयःऽअयया हन्०॥६॥१४॥ सः दुह्वणे मनुषे ऊर्ध्वसानः आ साविषत् अशसानाय शरँ सः नृ-ऽतमः नहुषः अस्मत् सुऽजातः पुरः अभिनत् अहँन् दस्युऽहत्ये ॥७॥ सः अभ्रियः न यवसे उदन्यन् क्षयाय गातुं विदत् नः अस्मे उप यत् सीदत् इंदुं शरीरैः श्येनः अयःऽअपाष्टिः हंति दस्यून् ॥८॥ सः वार्धतः श्वसानेभिः अस्य कुत्साय शुष्णँ कृपणे परा अ-दात् अयं कविं अनयत् शस्यमानं अत्कँ यः अस्य सनिता उत नृ-णां॥९॥ अयं दशस्यन् नर्यैभिः अस्य दस्मः देवेभिः वरुणः न मा-यी अयं कनीनः ऋतुऽपाः अवेदि अमिमीत अरुँ यः चतुः-ऽपात्॥१०॥ अस्य स्तोमेभिः औशिजः ऋजिश्वा व्रजं दरयत् वृ-षभेण पिप्रोः सुत्वा यत् यजतः दीदयत् गीः पुरः इयानः अभि वर्पसा भूत्॥११॥ एव महः असुर वक्षथाय वम्रकः पट्ऽभिः उप सर्पत् इंद्रँ सः इयानः करति स्वस्तिं अस्मै इषँ ऊर्जं सुऽक्षितिं विश्वं आ अभाः०॥१२॥१५॥८॥

॥१००॥ इंद्र हव्यं मघऽवन् त्वाऽवंत् इत् भुजे इह स्तुतः सुत-ऽपाः बोधि नः वृधे देवेभिः नः सविता प्र अवतु श्रुतं आ सर्व-ऽतातिं अदितिं वृणीमहे॥१॥ भराय सुभरत भागं ऋत्वियँ प्र वा-यवे शुचिऽपे क्रंदत्ऽईड्ये गौरस्य यः पयसः पीतिं आनशे आ सर्वऽतातिं अदितिं वृणीमहे॥२॥ आ नः देवः सविता साविषत्

वयं: ऋजुऽयते यजमानाय सुन्वते यथा देवान् प्रतिऽभूयेम पाकऽवत् आ सर्वऽतातिं अदितिं वृणीमहे ॥३॥ इंद्रः अस्मे सुऽमनाः अस्तु विश्वहा राजा सोमः सुवितस्य अधि एतु नः यथाऽयथा मित्रऽधितानि संऽदधुः आ सर्वऽतातिं अदितिं वृणीमहे ॥४॥ इंद्रः उक्थेन शवसा परुः दधे बृहस्पते प्रऽनेतरीता असि आयुषः यज्ञः मनुः प्रऽमतिः नः पिता हि कं आ सर्वऽतातिं अदितिं वृणीमहे ॥५॥ इंद्रस्य नु सुऽकृत दैव्यं सहः अग्निः गृहे जरिता मेधिरः कविः यज्ञः च भूत् विदथे चारुः अंतमः आ सर्वऽतातिं अदितिं वृणीमहे ॥६॥१६॥ न वः गुहा चकृम भूरि दुःऽकृतं न आविःऽत्यं वसवः देवऽहेळनं माकिः नः देवाः अनृतस्य वर्पसः आ सर्वऽतातिं अदितिं वृणीमहे ॥७॥ अप अमीवां सविता साविषत् न्यक् वरीयः इत् अप सेधंतु अद्रयः यावा यच्च मधुऽसुत् उच्यते बृहत् आ सर्वऽतातिं अदितिं वृणीमहे ॥८॥ ऊर्ध्वः यावा वसवः अस्तु सोतरि विश्वा द्वेषांसि सनुतः युयोत नः देवः सविता पायुः ईड्यः आ सर्वऽतातिं अदितिं वृणीमहे ॥९॥ ऊर्जं गावः यवसे पीवः अत्तन ऋतस्य याः सदने कोशे अद्रुह्वे तनूः एव तन्वः अस्तु भेषजं आ सर्वऽतातिं अदितिं वृणीमहे ॥१०॥ ऋतुऽप्रावा जरिता शश्वतां अवः इंद्रः इत् भद्रा प्रऽमतिः सुतऽवतां पूर्णं ऊधः दिव्यं यस्य सिक्तये आ सर्वऽतातिं अदितिं वृणीमहे ॥११॥ चित्रः ते भानुः ऋतुऽप्राः अभिष्टिः संति स्पृधः जरणिऽप्राः अधृष्टाः रजिष्ठया रज्या पन्थः आ गोः तूतूर्षति परि अयं दुवस्युः ॥१२॥१७॥

॥१०१॥ उत् बुध्यध्वं सऽमनसः सखायः सं अग्निं इंध्वं बहवः सऽनीळाः दधिऽक्रां अग्निं उषसं च देवीं इंद्रऽवतः अवसे नि

हूये वः॥१॥ मंद्रा कृणुध्वं धियः आ तनुध्वं नावं अरित्रऽपरणीं कृणुध्वं इष्कृणुध्वं आयुधा अरं कृणुध्वं प्रांचं यज्ञं प्र नयत सखायः ॥२॥ युनक्त सीरा वि युगा तनुध्वं कृते योनौ वपत इह बीजं गिरा च श्रुष्टिः सऽभराः असत् नः नेदीयः इत् सृण्यः पक्वं आ इयात् ॥३॥ सीरा युंजंति कवयः युगा वि तन्वते पृथक् धीराः देवेषु सुम्नऽया ॥४॥ निः आऽहावान् कृणोतन सं वरत्राः दधातन सिंचाम हि अवतं उद्रिणं वयं सुऽसेकं अनुपऽक्षितं ॥५॥ इष्कृतऽआहावं अवतं सुऽवरत्रं सुऽसेचनं उद्रिणं सिंचे अक्षितं ॥६॥१८॥ प्रीणीत अश्वान् हितं जयाथ स्वस्तिऽवाहं रथं इत् कृणुध्वं द्रोणऽआहावं अवतं अश्मऽचक्रं अंसऽचक्रं कोशं सिंचत नृऽपानं॥७॥ व्रजं कृणुध्वं सः हि वः नृऽपानः वर्म सीव्यध्वं बहुला पृथूनि पुरः कृणुध्वं आयसीः अधृष्टाः मा वः सुस्रोत् चमसः हंहत तं ॥८॥ आ वः धियं यज्ञियां वर्तं ऊतये देवीः देवीं यजतां यज्ञियां इह सा नः दुहीयत् यवसाऽइव गत्वी सहस्रऽधारा पयसा मही गौः॥९॥ आ तु सिंच हरिं इंद्रो उपऽस्थे वाशीभिः तक्षत अश्मन्ऽमयीभिः परि स्वजध्वं दशं कक्ष्याभिः उभे धुरौ प्रति वहिं युनक्त ॥१०॥ उभे धुरौ वहिः आऽपिप्दमानः अंतः योनौऽइव चरति द्विऽजानिः वनस्पतिं वने आ अस्थापयध्वं नि सु दधिध्वं अखनंतः उत्सं ॥११॥ कपृत् नरः कपृथं उत् दधातन चोदयंत खुदत वाजऽसातये निष्टिग्र्यः पुत्रं आ च्यवय ऊतये इंद्रं सऽबाधः इह सोमऽपीतये ॥१२॥१९॥

॥१०२॥ प्र ते रथं मिथुऽकृतं इंद्रः अवतु धृष्णुऽया अस्मिन् आजौ पुरुऽहूत श्रवाय्यं धनऽभक्षेषु नः अव॥१॥ उत् स्म वातः

वहन्ति वासः अस्याः अधिऽरथं यत् अजयत् सहस्रं रथीः अभूत् मुद्गलानीं गोऽइष्टौ भरे कृतं वि अचेत् इंद्रऽसेना॥२॥ अंतः यच्छ जिघांसतः वज्रं इंद्र अभिऽदासंतः दासस्य वा मघऽवन् आर्यस्य वा सनुतः यवय वधं॥३॥ उद्नः हृदं अपिबत् जर्हृषाणः कूटं स्म तृंहत् अभिऽमातिं एति प्र मुष्कऽभारः अवः इच्छमानः अजिरं बाहू अभरत् सिसासन्॥४॥ नि अक्रंदयन् उपऽयंतः एनं अमेहयन् वृषभं मध्ये आजेः तेन सूभर्वे शतऽवत् सहस्रं गवां मुद्गलः प्रऽधने जिगाय॥५॥ ककर्दवे वृषभः युक्तः आसीत् अवावचीत् सारथिः अस्य केशी दुधेः युक्तस्य द्रवतः सह अनसा ऋच्छंति स्म निःऽपदः मुद्गलानीं॥६॥२०॥ उत प्रऽधिं उत् अहन् अस्य विद्वान् उप अयुनक् वंसगं अच शिक्षन् इंद्रः उत् आवत् पतिं अघ्यानां अरंहत पद्याभिः ककुत्ऽमान्॥७॥ पुनं अष्टाऽवी अचरत् कपर्दी वरत्रायां दारु आऽनह्यमानः नृम्णानि कृण्वन् बहवे जनाय गाः पस्पशानः तविषीः अधत्त॥८॥ इमं तं पश्य वृषभस्य युंजं काष्ठायाः मध्ये दुऽघनं शयानं येन जिगाय शतऽवत् सहस्रं गवां मुद्गलः पृतनाजयेषु॥९॥ आरे अघा कः नु इत्था ददर्श यं युंजंति तं ऊं आ स्थापयंति न अस्मै तृणं न उदकं आ भरंति उत्ऽअंतरः धुरः वहन्ति प्रऽदेदिशन्॥१०॥ परिवृक्ताऽइव पतिऽविद्यं आनट् पीप्यानाः कूचक्रेणऽइव सिंचन् एषऽएष्यां चित् रथ्यां जयेम सुऽमंगलं सिनऽवत् अस्तु सातं॥११॥ त्वं विश्वस्य जगतः चक्षुः इंद्र असि चक्षुषः वृषा यत् आजिं वृषणा सिसाससि चोदयन् वध्रिणा युजा॥१२॥२१॥

॥१०३॥ आप्सुः शिशानः वृषभः न भीमः घनाघनः क्षोभणः

चर्षणीनां सं ऽक्रंदनः अनि ऽमिषः एक ऽवीरः शतं सेनाः अज-
यत् साकं इंद्रः॥१॥ सं ऽक्रंदनेन अनि ऽमिषेण जिष्णुना युत् ऽका-
रेण दुः ऽच्यवनेन धृष्णुना तत् इंद्रेण जयत तत् सहध्वं युधः नरः
इषु ऽहस्तेन वृष्णा॥२॥ सः इषु ऽहस्तैः सः निषंगि ऽभिः वशी सं-
ऽस्रष्टा सः युधः इंद्रः गणेन संसृष्ट ऽजित् सोमऽपाः बाहु ऽशर्धी
उग्र ऽधन्वा प्रति ऽहिताभिः अस्ता॥३॥ बृहस्पते परि दीय रथेन
रक्षः ऽहा अमिचान् अप ऽबाधमानः प्र ऽभंजन् सेनाः प्र ऽमृणः
युधा जयन् अस्माकं एधि अविता रथानां॥४॥ बल ऽविज्ञायः
स्थविरः प्र ऽवीरः सहस्वान् वाजी सहमानः उग्रः अभि ऽवीरः
अभि ऽसत्वा सहः ऽजा जैत्रं इंद्र रथं आ तिष्ठ गो ऽवित्॥५॥ गोत्र-
ऽभित् गो ऽविदं वज्र ऽबाहुं जयंतं अज्मं प्र ऽमृणंतं ओजसा इमं
स ऽजाताः अनु वीरयध्वं इंद्रं सखायः अनु सं रभध्वं॥६॥२२॥ अ-
भि गोत्राणि सहसा गाहमानः अदयः वीरः शत ऽमन्युः इंद्रः दुः-
ऽच्यवनः पृतनाषाट् अयुध्यः अस्माकं सेनाः अवतु प्र युत्ऽसु
॥७॥ इंद्रः आसां नेता बृहस्पतिः दक्षिणा यज्ञः पुरः एतु सोमः
देव ऽसेनानां अभि ऽभंजतीनां जयंतीनां मरुतः यंतु अग्रं॥८॥
इंद्रस्य वृष्णः वरुणस्य राज्ञः आदित्यानां मरुतां शर्धः उग्रं महा-
ऽमनसां भुवन ऽच्यवानां घोषः देवानां जयतां उत् अस्थात्॥९॥
उत् हर्षय मघऽवन् आयुधानि उत् सत्वनां मामकानां मनांसि
उत् वृत्र ऽहन् वाजिनां वाजिनानि उत् रथानां जयतां यंतु घो-
षाः॥१०॥ अस्माकं इंद्रः सं ऽमृतेषु ध्वजेषु अस्माकं याः इषवः ताः
जयंतु अस्माकं वीराः उत्ऽतरे भवंतु अस्मान् उ देवाः अवत हवेषु॥११॥ अमीषां चित्तं प्रति ऽलोभयंती गृहाणं अंगानि अप्वे प-
रेहि अभि प्र इहि निः दह हृत्ऽसु शोकैः अंधेन अमित्राः तमसा

सचंतां ॥१२॥ प्र इत जयत नरः इंद्रः वः शर्म यच्छतु उग्राः वः संतु बाहवः अनाधृष्याः यथा असथ ॥१३॥२३॥

॥१०४॥ असावि सोमः पुरुऽहूत तुभ्यं हरिऽभ्यां यज्ञं उप याहि नूयं तुभ्यं गिरः विप्रऽवीराः इयानाः दधन्विरे इंद्र पिब सुतस्य ॥१॥ अप्ऽसु धूतस्य हरिऽवः पिब इह नृऽभिः सुतस्य जठरं पृणस्व मिमिक्षुः यं अद्रयः इंद्र तुभ्यं तेभिः वर्धस्व मदं उक्थऽवाहः ॥२॥ प्र उग्रां पीतिं वृषणे इयर्मि सत्यां प्रऽयै सुतस्य हरिऽअश्व तुभ्यं इंद्र धेनाभिः इह मादयस्व धीभिः विश्वाभिः शच्या गृणानः ॥३॥ ऊती शचीऽवः तव वीर्येण वयः दधानाः उशिजः ऋतऽज्ञाः प्रजाऽवत् इंद्र मनुषः दुरोणे तस्थुः गृणंतः सधऽमाद्यासः ॥४॥ प्रनीतिऽभिः ते हरिऽअश्व सुऽस्तोः सुऽसुम्नस्य पुरुऽरुचः जनासः मंहिष्ठां ऊतिं विऽतिरे दधानाः स्तोतारः इंद्र तव सूनृताभिः ॥५॥२४॥ उप ब्रह्माणि हरिऽवः हरिऽभ्यां सोमस्य याहि पीतये सुतस्य इंद्र त्वा यज्ञः क्षमंमाणं आनट् दाश्वान् असि अध्वरस्य प्रऽकेतः ॥६॥ सहस्रऽवाजं अभिमातिऽसहं सुतेऽरणं मघऽवानं सुऽवृक्तिं उप भूषंति गिरः अप्रतिऽइतं इंद्रं नमस्याः जरितुः पनंत ॥७॥ सप्त आपः देवीः सुऽरणाः अमृक्ताः याभिः सिंधुं अतरः इंद्र पूःऽभित् नवतिं स्रोत्याः नव च स्रवंतीः देवेभ्यः गातुं मनुषे च विंदः ॥८॥ अपः महीः अभिऽशस्तेः अमुंचः अजागः आसु अधि देवः एकः इंद्र याः त्वं वृत्रऽतूयं चकर्थ ताभिः विश्वऽआयुः तन्वे पुपुष्याः ॥९॥ वीरेण्यः क्रतुः इंद्रः सुऽशस्तिः उत अपि धेना पुरुऽहूतं ईट्टे आदंयत् वृत्रं अकृणोत् जं लोकं ससहे शक्रः पृतनाः अभिष्टिः ॥१०॥ श्रुतं हुवेम मघऽवानं इंद्रं अस्मिन् भरे नृऽतमं

वाजऽसातौ शृण्वंतं उग्रं ऊतये समत्ऽसु घंतं वृत्राणि संऽजितं धनानां॥११॥२५॥

॥१०५॥ कदा वसो॑ स्तो॒त्रं हर्यंते आ अवं श्मश्रु॑ रुधत् वाः० दीर्घं सुतं वाताप्याय ॥१॥ हरी॑ यस्य सुऽयुजा विऽवंता वेः अर्वंता अनु शेपा उभा रजी॑ न कृशिना पतिः दन्॥२॥ अप॑ योः इंद्रः पार्पजे आ मर्तः न शश्रमाणः विभीवान् शुभे यत् युयुजे तविषीऽवान्॥३॥ सचा आयोः इंद्रः चर्कृषे आ उपानसः सप॒र्यन् नदयोः विऽवंतयोः पूरः इंद्रः॥४॥ अधि यः तस्थौ केशऽवंता व्यचस्वंता न पुष्ट्यै वनोति शिप्राभ्यां शिप्रिणीऽवान्॥५॥२६॥ प्र अस्तौत् ऋभ्वऽओजाः ऋभ्वेभिः ततक्ष पूरः शवसा ऋभुः न क्रतुऽभिः मातरिश्वा॥६॥ वज्रं यः चक्रे सुऽहनाय दस्यवे हिरी॒मशः हिरीमान् अरुतऽहनुः अद्रुतं न रजः॥७॥ अव नः वृजि॒ना शिशीहि ऋचा वनेम अनृचः न अवह्वा यज्ञः ऋधक् जोषति त्वे॑॥८॥ ऊर्ध्वा यत् ते चेतिनी भूत् यज्ञस्य धूः ऽसु सद्मन् सऽजूः नावं स्वऽयशसं सचा आयोः॥९॥ श्रिये ते पृश्निः उपऽसेचनी भूत् श्रिये दर्विः अरेपाः यया स्वे पाजे सिंचसे उत्॥१०॥ शतं वा यत् असुर्य प्रति त्वा सुऽमिचः इत्था अस्तौत् दुःऽमिचः इत्था अस्तौत् आवः यत् दस्युऽहत्ये कुत्सऽपुचं प्र आवः यत् दस्युऽहत्ये कुत्सऽवत्सं॥११॥२७॥५॥

॥१०६॥ उभौ ऊं॑ नूनं तत् इत् अर्थयेथे॑ वि तन्वाथे॑ धियः वस्त्रा अपसाऽइव सधीचीना यातवे प्र ईं॑ अजीगः॑ सुदिनाऽइव पृक्षः आ तंसयेथे॑॥१॥ उष्टाराऽइव फर्वरेषु अयेथे॑ प्रायोगाऽइव

श्वाच्या शासुः आ इथः दूताऽइव हि स्थः यशसा जनेषु मा अप स्यातं महिषाऽइव अवऽपानात् ॥ २॥ साकंऽयुजा शकुनस्यंऽइव पक्षा पप्वाऽइव चिचा यजुः आ गमिष्टं अग्निःऽइव देवऽयोः दीदिऽवांसा परिज्मानाऽइव यजथः पुरुऽचा ॥ ३॥ आपी वः अस्मे पितराऽइव पुचा उग्याऽइव रुचा नृपतीऽइव तुर्ये इर्योऽइव पुष्ट्यै किरणाऽइव भुज्यै श्रुष्टीवानाऽइव हवं आ गमिष्टं ॥ ४॥ वंसगाऽइव पूषर्यो शिंबाता मिचाऽइव ऋता शतरा शातपंता वाजाऽइव उचा वयसा घर्म्येऽस्या मेषाऽइव इषा सपर्या पुरीषा ॥ ५॥ १॥ सूरयाऽइव जर्भरी तुर्फरीतू नैतोशाऽइव तुर्फरी पर्फरीका उदन्यजाऽइव जेमना मदेरू ता मे जरायु अजरं मरायु ॥ ६॥ पज्राऽइव चर्चरं जारं मरायु क्षद्मऽइव अर्यंषु तर्तरीथः उग्या ऋभू न आपत खरमजा खरऽजुः वायुः न पर्फरत् क्षयत् रयीणां ॥ ७॥ घर्माऽइव मधु जठरे सनेरू भगेऽअविता तुर्फरी फारिवा अरं पतराऽइव चचरा चंद्रऽनिर्निक् मनःऽऋंगा मनन्या न जग्मी ॥ ८॥ बृहंताऽइव गंभरेषु प्रतिऽस्थां पादाऽइव गाधं तरते विदाथः कर्णाऽइव शासुः अनु हि स्मरथः अंशाऽइव नः भजतं चिचं अग्नः ॥ ९॥ आरंगराऽइव मधु आ ईरयेथे सारघाऽइव गवि नीचीनऽबारे कीनाराऽइव स्वेदे आऽसिस्विदाना क्षामऽइव ऊर्जा सुयवसऽअत् सचेथे ॥ १०॥ ऋध्याम स्तोमं सनुयाम वाजं आ नः मंचं सऽरथा इह उप यातं यशः न पक्वं मधु गोषु अंतः आ भूतऽअंशः अश्विनोः कामं अप्राः ॥ ११॥ २॥

॥ १०७॥ आविः अभूत् महि माघोनं एषां विश्वं जीवं तमसः निः अमोचि महि ज्योतिः पितृऽभिः दत्तं आ अगात् उरुः पंथाः

दक्षिणायाः अदर्शि॥१॥ उच्चा दिवि दक्षिणाऽवंतः अस्थुः ये अश्वाऽदाः सह ते सूर्येण हिरण्यऽदाः अमृतऽत्वं भजंते वासःऽदाः सोम प्र तिरंते आयुः॥२॥ दैवी पूर्तिः दक्षिणा देवऽयज्या न कवऽअरिभ्यः नहि ते पूणंति अथ नरः प्रयंतऽदक्षिणासः अवद्यऽभिया बहवः पृणंति॥३॥ शतऽधारं वायुं अर्कं स्वःऽविदं नृऽचक्षसः ते अभि चक्षते हविः ये पृणंति प्र च यच्छंति संऽगमे ते दक्षिणां दुहते सप्तऽमातरं॥४॥ दक्षिणाऽवान् प्रथमः हूतः एति दक्षिणाऽवान् यामऽनीः अग्रं एति तं एव मन्ये नृऽपतिं जनानां यः प्रथमः दक्षिणां आऽविवाय॥५॥३॥ तं एव ऋषिं तं ऊं ब्रह्माणं आहुः यज्ञऽन्यं सामऽगां उक्थऽशसं सः शुक्रस्य तन्वः वेद तिस्रः यः प्रथमः दक्षिणया रराध॥६॥ दक्षिणा अश्वं दक्षिणा गां ददाति दक्षिणा चंद्रं उत यत् हिरण्यं दक्षिणा अन्नं वनुते यः नः आत्मा दक्षिणां वर्मं कृणुते विऽजानन्॥७॥ न भोजाः मम्रुः न निऽअर्ते ईयुः न रिष्यंति न व्यथंते ह भोजाः इदं यत् विश्वं भुवनं स्वः० च एतत् सर्वं दक्षिणा एभ्यः ददाति॥८॥ भोजाः जिग्युः सुरभिं योनिं अग्रे भोजाः जिग्युः वध्रिं या सुऽवासाः भोजाः जिग्युः अंतःऽपेयं सुरायाः भोजाः जिग्युः ये अहूताः प्रऽयंति॥९॥ भोजाय अश्वं सं मृजंति आप्सुं भोजाय आस्ते कन्या शुंभमाना भोजस्य इदं पुष्करिणीऽइव वेश्म परिऽकृतं देवमानाऽइव चित्रं॥१०॥ भोजं अश्वाः सुष्ठुऽवाहः वहंति सुऽवृत रथः वर्तते दक्षिणायाः भोजं देवासः अवत भरेषु भोजः शत्रून् संऽअनीकेषु जेता॥११॥४॥

॥१०८॥ किं इच्छंती सरमा प्र इदं आनट् दूरे ह्यध्वा जगुरिः

परा॒चैः का अ॒स्मेऽहि॑तिः का परि॑ऽतक्म्या आ॒सी॒त् कथं॑ र॒सायाः॑ अ॒तरः॒ पयाँ॑सि ॥१॥ इंद्र॑स्य दू॒तीः इ॒षि॒ता च॒रा॒मि॒ म॒हः इ॒च्छंती॑ पणयः नि॒ऽधीन् वः॒ अ॒नि॒ऽस्कदः॑ भि॒यसा॑ तत् नः॒ आ॒व॒त् तथा॑ र॒सायाः॑ अ॒तर॑ं॒ पयाँ॑सि॥२॥ कीदृ॑ङ् इंद्रः॑ सरमे॒ का दृ॒शी॒का यस्य॑ इ॒दं दू॒तीः अस॑रः परा॒कात् आ च॒ गच्छा॑त् मि॒चं ए॒न॒ द॒धा॒म॒ अथ॑ गवां॑ गोऽप॑तिः नः॒भ॒वा॒ति॒ ॥३॥ न अ॒हं तं वे॒द॒ दभ्यं॑ दभ॑त् सः यस्य॑ इ॒दं दू॒तीः अस॑रं परा॒कात् न तं गू॑हंति॒ स्रव॑तः गभी॒राः ह॒ताः इंद्रे॑ण पणयः शयध्वे ॥४॥ इ॒माः गावः॑ सरमे॒ याः ऐ॒च्छः॒ परि॑ दि॒वः अं-तान् सु॒ऽभ॒गे॒ पत॑ँन्ती कः॒ ते॒ ए॒नाः॒ अव॑ सृजात् अयु॑ध्वी उ॒त अ॒-स्माकं॑ आयु॑धा सं॑ति॒ ति॒ग्मा ॥५॥५॥ अ॒से॒न्या वः॒ प॒ण॒यः॒ वचाँ॑सि अ॒नि॒ष॒व्याः॒ त॒न्वः॑ संतु पापीः॒ अधृ॑ष्टः॒ वः॒ ए॒त॒वै अ॒स्तु॒ पंथाः॑ बृ॒ह॒स्प-तिः॒ वः॒ उ॒भया॑ न मृळात्॥६॥ अ॒यं नि॒ऽधिः॑ सरमे॒ अद्रि॑ऽबुध्नः गोभिः॒ अश्वे॑भिः॒ वसु॑ऽभिः नि॒ऽगु॒प्तः॒ र॒क्षंति॑ तं प॒ण॒यः॒ ये सु॒ऽगो॒पाः॑ रेकु॑ पदं॑ अ॒लक॑मं॒ आ ज॒गं॑थ ॥७॥ आ इ॒ह ग॒म॒न् ऋ॒ष॒यः॒ सोम॑ऽशि-ताः॒ अ॒या॒स्यः॑ अंगि॑रसः नव॑ऽग्वाः ते ए॒तं ऊ॒र्वं वि भ॒ज॒न्त॒ गोना॑ं॒ अथ॑ ए॒तत् वचः॑ पणयः॒ वम॑न् इत् ॥८॥ एव च॒ त्वं स॒र॒मे॒ आ॒ऽज॒-गंथ॑ प्र॒ऽबा॑धिता सहसा दैव्येन स्वसा॑रं त्वा॒ कृ॒ण॒वै॒ मा पुनः॑ गाः॒ अप॑ ते॒ गवां॑ सु॒ऽभ॒गे॒ भ॒जा॒म॒ ॥९॥ न अ॒हं वे॒द॒ भ्रातृ॑ऽत्वं नो॑ स्व॒सृ-ऽत्वं इंद्रः॑ विदुः॒ अंगि॑रसः च॒ घो॒राः गोऽका॑माः मे॒ अ॒च्छ॒दयन् यत् आय॑ँ॒ अप॑ आतः॑ इ॒त॒ प॒ण॒यः॒ वरी॑यः॥१०॥ दूरं॑ इ॒त॒ प॒ण॒यः॒ वरी॑यः उत् गावः॑ यंतु मि॒न॒तीः॒ कृ॒तेन॑ बृ॒ह॒स्पतिः॑ याः॒ अवि॑ंदत् नि॒ऽगू-व्व्हाः॑ सोमः॑ पाव॑ाणः॒ ऋष॑यः च॒ विप्राः॑॥११॥६॥

॥१०९॥ ते अ॒व॒दन् प्र॒थ॒माः ब्रह्म॑ऽकिल्बिषे अकू॑पारः सलि॒-

लः मातरिश्वा वीळुऽहराः तपः उग्रः मयःऽभूः आपः देवीः प्रथमऽजाः ऋतेन ॥१॥ सोमः राजा प्रथमः ब्रह्मऽजायां पुनः प्र अयच्छत् अहणीयमानः अनुऽअर्तिता वरुणः मित्रः आसीत् अग्निः होता हस्तऽगृह्य आ निनाय ॥२॥ हस्तेन एव ग्राह्यः आऽधिः अस्याः ब्रह्मऽजाया इयं इति च इत् अवोचन् न दूताय प्रऽहये तस्थे एषा तथा राष्ट्रं गुपितं क्षत्रियस्य ॥३॥ देवाः एतस्यां अवदंत पूर्वे सप्तऽऋषयः तपसे ये निऽसेदुः भीमा जाया ब्राह्मणस्य उपऽनीता दुःऽधां दधाति परमे विऽओमन् ॥४॥ ब्रह्मऽचारी चरति वेविषत् विषः सः देवानां भवति एकं अंगं तेन जायां अनु अविंदत् बृहस्पतिः सोमेन नीतां जुह्वं न देवाः ॥५॥ पुनः वै देवाः अददुः पुनः मनुष्याः उत राजानः सत्यं कृण्वानाः ब्रह्मऽजायां पुनः ददुः ॥६॥ पुनःऽदाय ब्रह्मऽजायां कृत्वी देवैः निऽकिल्बिषं ऊर्जं पृथिव्याः भक्तायं उरुऽगायं उप आसते ॥७॥७॥

॥ ११० ॥ संऽइद्धः अद्य मनुषः दुरोणे देवः देवान् यजसि जातऽवेदः आ च वह मित्रऽमहः चिकित्वान् त्वं दूतः कविः असि प्रऽचेताः ॥१॥ तनूऽनपात् पथः ऋतस्य यानान् मध्वा संऽअंजन् स्वदया सुऽजिह्व मन्मानि धीभिः उत यज्ञं ऋंधन् देवऽत्रा च कृणुहि अध्वरं नः ॥२॥ आऽजुह्वानः ईड्यः वंद्यः च आ याहि अग्ने वसुंऽभिः सऽजोषाः त्वं देवानां असि यह्व होता सः एनान् यक्षि इषितः यजीयान् ॥३॥ प्राचीनं बर्हिः प्रऽदिशा पृथिव्याः वस्तोः अस्याः वृज्यते अग्रे अह्नां वि ऊं प्रथते विऽतरं वरीयः देवेभ्यः अदितये स्योनं ॥४॥ व्यचस्वतीः उर्विया वि श्रयंतां पतिंऽभ्यः न जनयः शुंभमानाः देवीः द्वारः बृहतीः विश्वंऽइन्वाः देवेभ्यः भ-

वत सुप्रऽअयनाः॥५॥८॥ आ सुस्वयँती यजते उपाके उषसा-नक्ता सदतां नि योनौ दिव्ये योषणे बृहती सुऽरुक्मे० अधि श्रियँ शुक्रऽपिशं दधाने ॥६॥ दैव्या होतारा प्रथमा सुऽवाचा मिमाना यज्ञं मनुषः यजध्यै प्रऽचोदयँता विदथेषु कारू प्राचीनं ज्योतिः प्रऽदिशा दिशंता॥७॥ आ नः यज्ञं भारती तूयँ एतु इळा मनुष्वत् इह चेतयँती तिस्रः देवीः बर्हिः आ इदं स्योनं सरस्वती सुऽअयसः सदंतु॥८॥ यः इमे द्यावापृथिवी जनित्री रूपैः अपिँशत् भुवनानि विश्वा तं अद्य होतः इषितः यजीयान् देवं त्वष्टारं इह यक्षि विद्वान्॥९॥ उपऽअवसृज त्मन्या समंऽअंजन् देवानाँ पाथः ऋतुऽथा हवींषि वनस्पतिः शमिता देवः अग्निः स्वदँतु हव्यं मधुना घृतेन॥१०॥ सद्यः जातः वि अमिमीत यज्ञं अग्निः देवानाँ अभवत् पुरःऽगाः अस्य होतुः प्रऽदिशि ऋतस्य वाचि स्वाहाऽकृतं हविः अदंतु देवाः॥११॥९॥

॥१११॥ मनीषिणः प्रभरध्वं मनीषां यथाऽयथा मतयः संति नृणां इंद्रं सत्यैः आ ईरयाम कृतेभिः सः हि वीरः गिर्वणस्युः विदानः॥१॥ ऋतस्य हि सदसः धीतिः अद्यौत् सं गाष्टेयः वृषभः गोभिः आनट् उत् अतिष्ठत् तविषेण रवेण महांति चित् सं विव्याच रजाँसि॥२॥ इंद्रः किल श्रुत्यं अस्य वेद् सः हि जिष्णुः पथिऽकृत् सूर्याय आत् मेनां कृण्वन् अच्युतः भुवत् गोः पतिः दिवः सन्ऽजाः अप्रतिऽइतः॥३॥ इंद्रः महा महतः अर्णवस्य व्रता अमिनात् अंगिरःऽभिः गृणानः पुरूणि चित् नि ततान रजाँसि दाधार यः धरुणं सत्यऽतातां॥४॥ इंद्रः दिवः प्रतिऽमानं पृथिव्याः विश्वा वेद् सवना हंति शुष्णं महीं चित् द्यां आ अतनोत्

सूर्येण चास्कंभ चित् स्कंभनेन स्कभीयान् ॥५॥१०॥ वज्रेण हि वृत्रऽहा वृचं अस्तः अदेवस्य मूमुषानस्य मायाः वि धृष्णो अत्र धृषता जघंथ अथ अभवः मघऽवन् वाहुऽओजाः ॥६॥ सचेत यत् उषसः सूर्येण चिचां अस्य केतवः रां अविंदन् आ यत् नक्षंचं दहंशे दिवः न पुनः यतः नकिः अङ्गा नु वेद् ॥७॥ दूरं किल प्रथमाः जग्मुः आसां इंदस्य याः प्रऽसवे ससुः आपः कं स्वित् अत्र कं वुध्नः आसां आपः मध्यं कं वः नूनं अंतः ॥८॥ सृजः सिंधून् अहिना जग्धसानान् आत् इत् एताः प्र विविज्रे जवेन मुमुक्षमाणाः उत याः मुमुचे अध इत् एताः न रमंते निऽतिक्ताः ॥९॥ सध्रीचीः सिंधुं उशतीःऽइव आयन् सनात् जारः आरितः पूःऽभित् आसां अस्तं आ ते पार्थिवा वसूनि अस्मे जग्मुः सूनृताः इंद्र पूर्वीः ॥१०॥११॥

॥११२॥ इंद्र पिव प्रतिऽकामं सुतस्य प्रातःऽसावः तव हि पूर्वऽपीतिः हर्षस्व हंतवे शूर शचून् उक्थेभिः ते वीर्या प्र ब्रवाम ॥१॥ यः ते रथः मनसः जवीयान् आ इंद्र तेन सोमऽपेयाय याहि तूयं आ ते हरयः प्र द्रवंतु येभिः यासि वृषऽभिः मंदमानः ॥२॥ हरित्वता वर्चसा सूर्यस्य श्रैष्ठैः रूपैः तन्वं स्पर्शयस्व अस्माभिः इंद्र सखिऽभिः हुवानः सध्रीचीनः मादयस्व निऽसद्य ॥३॥ यस्य त्यत् ते महिमानं मदेषु इमे मही रोदसी न अविविक्तां तत् ओकः आ हरिऽभिः इंद्र युक्तैः प्रियेभिः याहि प्रियं अवे अच्छ ॥४॥ यस्य शश्वत् पपिऽवान् इंद्र शचून् अननुऽकृत्या रणया चकर्थ सः ते पुरंऽधिं तविषीं इयर्ति सः ते मदाय सुतः इंद्र सोमः ॥५॥१२॥ इदं ते पात्रं सनऽवित्तं इंद्र पिव सोमं एना शतऽक्रतो॰ पूर्णः आऽहावः मदिरस्य मध्वः यं विश्वे इत् अभिऽहर्यंति देवाः ॥६॥ वि हि त्वां

इंद्र पुरुधा जनासः हितऽप्रयसः वृषभ ह्वयंते अस्माकं ते मधुमत्ऽतमानि इमा भुवन् सवना तेषु हर्य ॥७॥ प्र ते इंद्र पूर्व्याणि प्र नूनं वीर्या वोचं प्रथमा कृतानि सतीनऽमन्युः अश्वथयः अद्रिं सुऽवेदनां अकृणोः ब्रह्मणे गां ॥८॥ नि सु सीद गणऽपते गणेषु त्वां आहुः विप्रंऽतमं कवीनां न ऋते त्वत् क्रियते किं चन आरे महां अर्कं मघऽवन् चित्रं अर्च ॥९॥ अभिऽख्या नः मघऽवन् नाधमानान् सखे बोधि वसुऽपते सखीनां रणं कृधि रणऽकृत् सत्यऽपुष्म् अभक्ते चित् आ भज राये अस्मान् ॥१०॥१३॥९॥

॥११३॥ तं अस्य द्यावापृथिवी सऽचेतसा विश्वेभिः देवैः अनुं षुष्मं आवतां यत् ऐत् कृण्वानः महिमानं इंद्रियं पीत्वी सोमस्य क्रतुऽमान् अवर्धत ॥१॥ तं अस्य विष्णुः महिमानं ओजसा अंशुं दधन्वान् मधुनः वि रप्शते देवेभिः इंद्रः मघऽवा सयावऽभिः वृत्रं जघन्वान् अभवत् वरेण्यः ॥२॥ वृत्रेण यत् अहिना बिभ्रत् आयुधा संऽअस्थिथाः युधये शंसं आऽविदे विश्वे ते अत्र मरुतः सह त्मना अवर्धन् उग्र महिमानं इंद्रियं ॥३॥ जज्ञानः एव वि अबाधत स्पृधः प्र अपश्यत् वीरः अभि पौंस्यं रणं अवृश्चत् अद्रिं अवं सऽस्यदः सृजत् अस्तभ्नात् नाकं सुऽअपस्यया पृथुं ॥४॥ आत् इंद्रः सचा तविषीः अपत्यत वरीयः द्यावापृथिवी अबाधत अव अभरत् धृषितः वज्रं आयसं शेवं मित्राय वरुणाय दाशुषे ॥५॥ ॥११४॥ इंद्रस्य अत्र तविषीभ्यः विऽरप्शिनः कृधायतः अरंहयंत मन्यवे वृत्रं यत् उग्रः वि अवृश्चत् ओजसा अपः बिभ्रतं तमसा परिऽवृतं ॥६॥ या वीर्याणि प्रथमानि कर्त्वा महिऽत्वेभिः यतमानौ संऽईयतुः ध्वांतं तमः अव दध्वसे हते इंद्रः महा पूर्वऽहूतौ अ-

पत्यत ॥ ७ ॥ विश्वे देवासः अध वृष्ण्यानि ते अवर्धयन् सोमऽवत्या वचस्यया रङ्गं वृचं अहिं इंद्रस्य हन्मना अमिः न जंभैः तृषु अच्चैं आवयत् ॥ ८ ॥ भूरि दक्षैभिः वचनेभिः ऋक्वऽभिः सख्येभिः सख्यानि प्र वोचत इंद्रः धुनिं च चुमुरिं च दंभयन् श्रद्धाऽमनस्या शृणुते दभीतये ॥ ९ ॥ त्वं पुरूणि आ भर सुऽअश्व्या येभिः मंसैः निऽवचनानि शंसन् सुऽगेभिः विश्वा दुःऽइता तरेम विदो सु नः उर्विया गाधं अद्य ॥ १० ॥ १५ ॥

॥ ११४ ॥ घर्मा संऽअँता चिऽवृतँ वि आपतुः तयोः जुष्टिं मातरिश्वा जगाम दिवः पयः दिधिषाणाः अवेषन् विदुः देवाः सहऽसामानं अर्कं ॥ १ ॥ तिस्रः देष्ट्राय निःऽऋतीः उप आसते दीर्घऽश्रुतः वि हि जानंति वह्नयः तासाँ नि चिक्युः कवयः निऽदानँ परेषु याः गुह्येषु व्रतेषु ॥ २ ॥ चतुःऽकपर्दा युवतिः सुऽपेशाः घृतऽप्रतीका वयुनानि वस्ते तस्याँ सुऽपर्णा वृषणा नि सेदतुः यत्र देवाः दधिरे भागऽधेयँ ॥ ३ ॥ एकः सुऽपर्णः सः समुद्रं आ विवेश सः इदं विश्वं भुवनं वि चष्टे तं पाकेन मनसा अपश्यं अंतितः तं माता रेळ्हि सः ऊं रेळ्हि मातरँ ॥ ४ ॥ सुऽपर्णे विप्राः कवयः वचःऽभिः एकँ संतं बहुधा कल्पयंति छंदाँसि च दधतः अध्वरेषु यज्ञान् सोमस्य मिमते द्वादश ॥ ५ ॥ १६ ॥ षट्ऽचिंशान् च चतुरः कल्पयंतः छंदाँसि च दधतः आऽद्वादशं यज्ञं विऽमायं कवयः मनीषा ऋक्ऽसामाभ्याँ प्र रथँ वर्तयंति ॥ ६ ॥ चतुःऽदश अन्ये महिमानः अस्य तं धीराः वाचा प्र नयंति सप्त आप्नानं तीर्थे कः इह प्र वोचत् येन पथा प्रऽपिबंते सुतस्य ॥ ७ ॥ सहस्रधा पंचऽदशानि उक्था यावत् द्यावापृथिवी तावत् इत् तत् सहस्रधा महिमानः

सहस्रं यावत् ब्रह्म विऽस्थितं तावती वाक् ॥८॥ कः छंदसां योगं आ वेद धीरः कः धिष्ण्यां प्रति वाचं पपाद् कं ऋत्विजां अष्टमं पूरं आहुः हरी इंद्रस्य नि चिकाय कः स्वित् ॥९॥ भूम्याः अंतं परि एके चरंति रथस्य धूःऽसु युक्तासः अस्थुः अमस्य दायं वि भजंति एभ्यः यदा यमः भवति हर्म्ये हितः ॥१०॥१७॥

॥११५॥ चित्रः इत् शिशोः तरुणस्य वक्षथः न यः मातरौ अपिऽएति धातवे अनूधाः यदि जीजनत् अध च नु ववक्ष सद्यः महि दूत्यं चरन् ॥१॥ अग्निः ह नाम धायि दन् अपःऽतमः सं यः वना युवते भस्मना दता अभिऽप्रमुरा जुह्वा सुऽअध्वरः इनः न प्रीयमानः यवसे वृषा ॥२॥ तं वः विं न दुऽसदं देवं अंधसः इंदुं प्रीयंतं प्रऽवपंतं अर्णवं आसा वह्निं न शोचिषा विऽरप्शिनं महिऽव्रतं न सरजंतं अध्वनः ॥३॥ वि यस्य ते जयसानस्य अजर धक्षोः न वाताः परि संति अच्युताः आ रण्वासः युयुधयः न सत्वनं चितं नशंत प्र शिषंतः इष्टये ॥४॥ सः इत् अग्निः कण्वऽतमः कण्वऽसखा अर्यः परस्य अंतरस्य तरुषः अग्निः पातु गृणतः अग्निः सूरीन् अग्निः ददातु तेषां अवः नः ॥५॥१८॥ वाजिन्ऽतमाय सह्यसे सुऽपित्र्य तृषु च्यवानः अनु जातऽवेदसे अनुद्रे चित् यः धृषता वरं सते महिन्ऽतमाय धन्वना इत् अविष्यते ॥६॥ एव अग्निः मंतैः सह सूरिऽभिः वसुः स्तवे सहसः सूनरः नृऽभिः मित्रासः न ये सुऽधिताः ऋतऽयवः द्यावः न द्युम्नैः अभि संति मानुषान् ॥७॥ ऊर्जः नपात् सहसाऽवन् इति त्वा उपऽस्तुतस्य वंदते वृषा वाक् त्वां स्तोषाम् त्वया सुऽवीरः द्राघीयः आयुः प्रऽतरं दधानाः ॥८॥ इति त्वा अग्ने वृष्टिऽहव्यस्य पुत्राः उपऽस्तुतासः

ऋषयः अवोचन् तान् च पाहि गृणतः च सूरीन् वषट् वषट् इति ऊर्ध्वासः अनक्षन् नमः नमः इति ऊर्ध्वासः अनक्षन्॥९॥१९॥

॥११६॥ पिब सोमँ महते इंद्रियाय पिब वृत्राय हंतवे शविष्ठ पिब राये शवसे हूयमानः पिब मध्वः तृपत् इंद्र आ वृषस्व॥१॥ अस्य पिव क्षुऽमतः प्रऽस्थितस्य इंद्र सोमस्य वरँ आ सुतस्य स्वस्तिऽदाः मनसा मादयस्व अर्वाचीनः रेवते सौभगाय॥२॥ मम त्तु त्वा दिव्यः सोमः इंद्र ममत्तु यः सूयते पार्थिवेषु ममत्तु येन वरिवः चकर्थ ममत्तु येन निऽरिणासि शत्रून्॥३॥ आ ह्यऽबर्हीः असिनः यातु इंद्रः वृषा हरिऽभ्यां परिऽसिक्तं अंधः गविं आ सुतस्य प्रऽभृतस्य मध्वः सचा खेदाँ अरुशऽहा आ वृषस्व॥४॥ नि तिग्मानि भाशयन् भाश्यानि अव स्थिरा तनुहि यातुऽजूनां उग्राय ते सहः बलँ ददामि प्रतिऽइत्य शत्रून् विऽगदेषु वृश्च॥५॥२०॥ वि अर्यः इंद्र तनुहि श्रवाँसि ओजः स्थिराऽइव धन्वनः अभिऽमातीः अस्मद्र्यक् ववृधानः सहःऽभिः अनिऽभृष्टः तन्वँ ववृधस्व॥६॥ इदं हविः मघऽवन् तुभ्यँ रातं प्रति संऽराट् अदंणानः गृभाय तुभ्यँ सुतः मघऽवन् तुभ्यँ पक्वः अडि इंद्र पिब च प्रऽस्थितस्य॥७॥ अडि इत् इंद्र प्रऽस्थिता इमा हवींषि चनः दधिष्व पचता उत सोमँ प्रयंस्वंतः प्रति हर्यामसि त्वा सत्याः संतु यजमानस्य कामाः॥८॥ प्र इंद्राग्निऽभ्यां सुऽवचस्यां इयमि सिंधौऽइव प्र ईरयं नावँ अर्कैः अयाःऽइव परि चरंति देवाः ये अस्मभ्यँ धनऽदाः उतऽभिदः च॥९॥२१॥

॥११७॥ न वै ऊं देवाः क्षुधं इत् वधं ददुः उत आशितं उप गच्छंति मृत्यवः उतो अमृतत्वं सुऽभगत्वं अस्य हि दक्षः पिता अदितिः अस्य योनिः॥१॥ दक्षस्य पितरं अदितिं दुहितरं च प्रजापतेः अनमन्ऽभिः अदितेः दक्षः अजायत दक्षात् अदितिः परि॥२॥ यत् देवाः अदः सलिलं अस्रवंत यत् अगच्छंत तत् आऽभवत् पुनः यत् पुनः यंति संऽयतं पुनः तत् अक्रताः पथः॥३॥ यत् अग्निः आपः दीदयत् यत् अंतरिक्षं अप्रथत् यत् देवीः अहभिः आऽवृताः तत् वः यज्ञियं अभवत्॥४॥ यत् वः पराऽयं पुरुषः जघानं हस्तयोः कृतं यत् वः पद्भ्यां चरंतः विऽतिष्ठिरे तत् वः पापं अकर्तृभिः अरंतां अस्तु तावते॥५॥ यत् वः पराऽयं मनसः जघानं दुष्कृतं कृतं यत् वः पद्भ्यां चरंतः विऽतिष्ठिरे तत् वः पापं अकर्तृभिः अरंतां अस्तु तावते॥६॥ यत् वः पराऽयं वाचः जघानं दुष्कृतं कृतं यत् वः पद्भ्यां चरंतः विऽतिष्ठिरे तत् वः पापं अकर्तृभिः अरंतां अस्तु तावते॥७॥ यत् वः पराऽयं चक्षुषः जघानं दुष्कृतं कृतं यत् वः पद्भ्यां चरंतः विऽतिष्ठिरे तत् वः पापं अकर्तृभिः अरंतां अस्तु तावते॥८॥ यत् वः पराऽयं कर्मणा जघानं दुष्कृतं कृतं यत् वः पद्भ्यां चरंतः विऽतिष्ठिरे तत् वः पापं अकर्तृभिः अरंतां अस्तु तावते॥९॥२२॥

च्छंति मृत्यवः उतो रयिः पृणतः न उप दस्यति उत अपृणन् मर्डितारं न विंदते ॥१॥ यः आध्राय चकमानाय पित्वः अन्नऽवान् सन् रफिताय उपऽजग्मुषे स्थिरं मनः कृणुते सेवते पुरा उतो चित् सः मर्डितारं न विंदते ॥२॥ सः इत् भोजः यः गृहवे ददाति अन्नऽकामाय चरते कृशाय अरं अस्मै भवति यामऽहूतौ उत अपरीषु कृणुते सखायं ॥३॥ न सः सखा यः न ददाति सख्ये सचाऽभुवे सचमानाय पित्वः अप अस्मात् प्र इयात् न तत् ओकः अस्ति पृणंतं अन्यं अरणं चित् इच्छेत् ॥४॥ पृणीयात् इत् नाधमानाय तव्यान् द्राघीयांसं अनु पश्येत् पंथां ओ हि वर्तंते रथ्याऽइव चक्रा अन्यंऽअन्यं उप तिष्ठंत रायः ॥५॥२२॥ मोघं अन्नं विंदते अप्रऽचेताः सत्यं ब्रवीमि वधः इत् सः तस्य न अर्यमणं पुष्यति नो सखायं केवलऽअघः भवति केवलऽआदी ॥६॥ कृषन् इत् फालैः आशितं कृणोति यन् अध्वानं अप वृंक्ते चरित्रैः वदन् ब्रह्मा अवदतः वनीयान् पृणन् आपिः अपृणंतं अभि स्यात् ॥७॥ एकऽपात् भूयः द्विऽपदः वि चक्रमे द्विऽपात् चिऽपादं अभि एति पश्चात् चतुःऽपात् एति द्विऽपदां अभिऽस्वरे संऽपश्यन् पंक्तीः उपऽतिष्ठमानः ॥८॥ समौ चित् हस्तौ न समं विविष्टः संऽमातरा चित् न समं दुहाते यमयोः चित् न समा वीर्याणि ज्ञानी चित् संतौ न समं पृणीतः ॥९॥२३॥

॥ ११८ ॥ अग्ने हंसि नि अचिणं दीद्यत् मर्त्येषु आ स्वे क्षये शुचिऽव्रत ॥१॥ उत तिष्ठसि सुऽआहुतः घृतानि प्रति मोदसे यत् त्वा सुचः संऽअस्थिरन् ॥२॥ सः आऽहुतः वि रोचते अग्निः ईळेन्यः गिरा सुचा प्रतीकं अज्यते ॥३॥ घृतेन अग्निः सं अज्यते मधु-

ऽप्रतीकः आऽहुतः रोचमानः विभाऽवसुः ॥४॥ जरमाणः सं इध्यसे देवेभ्यः हव्यऽवाहन तं त्वा हवंत मर्त्याः ॥५॥२४॥ तं मर्ताः अमर्त्य घृतेन अग्निं सपर्यत अदाभ्यं गृहऽपतिं ॥६॥ अदाभ्येन शोचिषा अग्ने रक्षः त्वं दह गोपाः ऋतस्य दीदिहि ॥७॥ सः त्वं अग्ने प्रतीकिन प्रति ओष यातुऽधान्यः उरुऽक्षयेषु दीद्यत् ॥८॥ तं त्वा गीःऽभिः उरुऽक्षयाः हव्यऽवाहं सं ईधिरे यजिष्ठं मानुषे जने ॥९॥२५॥

॥११९॥ इति वै इति मे मनः गां अश्वं सनुयां इति कुवित् सोमस्य अपां इति ॥१॥ प्र वाताःऽइव दोधतः उत् मा पीताः अयंसत कुवित् सोमस्य अपां इति ॥२॥ उत् मा पीताः अयंसत रथे अश्वाःऽइव आशवः कुवित् सोमस्य अपां इति ॥३॥ उप मा मतिः अस्थित वाश्रा पुत्रंऽइव प्रियं कुवित् सोमस्य अपां इति ॥४॥ अहं तष्टाऽइव वंधुरे परि अचामि हृदा मतिं कुवित् सोमस्य अपां इति ॥५॥ नहि मे अक्षिऽपत् चन अच्छौत्सुः पंच कृष्टयः कुवित् सोमस्य अपां इति ॥६॥२६॥ नहि मे रोदसी उभे अन्यं पक्षं चन प्रति कुवित् सोमस्य अपां इति ॥७॥ अभि द्यां महिना भुवं अभिऽइमां पृथिवीं महीं कुवित् सोमस्य अपां इति ॥८॥ हंत अहं पृथिवीं इमां नि दधानि इह वा इह वा कुवित् सोमस्य अपां इति ॥९॥ ओषं इत् पृथिवीं अहं जंघनानि इह वा इह वा कुवित् सोमस्य अपां इति ॥१०॥ दिवि मे अन्यः पक्षः अधः अन्यं अचीकृषं कुवित् सोमस्य अपां इति ॥११॥ अहं अस्मि महाऽमहः अभिऽनभ्यं उत्ऽईषितः कुवित् सोमस्य अपां इति ॥१२॥ गृहः यामि अरंऽकृतः देवेभ्यः हव्यऽवाहनः कुवित् सोमस्य अपां इति ॥१३॥२७॥६॥

॥१२०॥ तत् इत् आस॒ भुव॑नेषु ज्ये॒ष्ठं यतः॑ ज॒ज्ञे उ॒ग्रः त्वे॒षऽनृ॑म्णः स॒द्यः ज॒ज्ञा॒नः नि रि॑णाति॒ शत्रू॑न् अनु॑ यं विश्वे॑ मदे॑न्ति ऊमाः॑ ॥१॥ व॒वृ॒धा॒नः शव॑सा भूरि॑ऽओजाः॑ शत्रुः॑ दा॒साय॑ भि॒यस॑म् दधाति॒ अवि॑ऽअनत् च॒ वि॒ऽअ॒नत् च॒ सक्षि॑ सं ते॒ न॒व॒न्त॒ प्रऽभृ॑ता मदे॑षु ॥२॥ त्वे॑ क्रतु॑म् अपि॑ वृ॒ञ्ज॒न्ति॒ विश्वे॑ द्विः॑ यत् ए॒ते चिः॑ भव॑न्ति ऊमाः॑ स्वा॒दोः॑ स्वादी॑यः स्वा॒दुना॑ सृ॒ज॒ सं अ॒दः॑ सु मधु॑ मधु॑ना अ॒भि यो॒धीः॑ ॥३॥ इति॑ चित् हि त्वा॒ धना॑ जय॑न्तं मदे॑ऽमदे॑ अनु॑ऽमदे॑न्ति विप्राः॑ ओजी॑यः धृष्णो॑ स्थि॒रं आ त॒नु॒ष्व॒ मा त्वा॒ दभ॑न् यातु॑ऽधानाः॑ दुः॑ऽए॒वाः॑ ॥४॥ त्वया॑ व॒यं श॒श्म॒हे॒ रणे॑षु प्रऽपश्य॑न्तः युधे॒न्या॑नि भूरि॑ चो॒दया॑मि ते आयु॑धा वचः॑ऽभिः सं ते॒ शि॒श्ण॒मि॒ ब्रह्म॑णा व॒यां॑सि ॥५॥१॥ स्तु॒षे॒य्यं पु॒रु॒ऽव॒र्पस॑म् ऋभ्वं॑ इ॒नऽत॑मं आ॒शुं आ॒शाना॑ आ दु॑र्षते॒ शव॑सा स॒प्त दा॒नून् प्र सा॒क्ष॒ते॒ प्रति॑ऽमाना॑नि भूरि॑ ॥६॥ नि तत् द॒धि॒षे॒ अव॑रं परं॑ च॒ यस्मि॑न् आवि॑थ अव॑सा दुरो॒णे आ मा॒तरा॑ स्थापयसे जिगत्नू॑ अतः॑ इ॒नो॒षि॒ कवे॑रा पुरू॑णि ॥७॥ इ॒मा ब्रह्म॑ बृ॒हत्ऽदि॑वः विवक्ति॒ इंद्रा॑य शू॒षं अ॒यि॒यः स्वः॑ऽसाः॑ म॒हः गो॒चस्य॑ क्षयति॒ स्व॒ऽराजः॑ दुरः॑ च॒ विश्वाः॑ अ॒वृ॒णो॒त् अप॑ स्वाः ॥८॥ ए॒व म॒हान् बृ॒हत्ऽदि॑वः अथ॑र्वा अवो॑चत् स्वां त॒न्वं॑ इंद्रे॑ ए॒व स्वसा॑रः मा॒त॒रिभ्व॑रीः अ॒रि॒प्राः॑ हि॒न्व॒न्ति॒ च॒ श॒व॒सा व॒र्ध॒यं॑ति च॒ ॥९॥२॥

॥१२१॥ हि॒र॒ण्य॒ऽग॒र्भः सं अ॒व॒र्त॒त॒ अग्रे॑ भूत॑स्य जा॒तः पतिः॑ एकः॑ आ॒सी॒त् सः दा॒धा॒र॒ पृ॒थि॒वीं द्यां उ॒त इ॒मां कस्मै॑ दे॒वाय॑ ह॒विषा॑ वि॒धे॒म॒ ॥१॥ यः आ॒त्म॒ऽदाः॑ ब॒ल॒ऽदाः॑ यस्य॑ विश्वे॑ उप॒ऽआ॒स॒ते प्र॒ऽअ॒शि॒षं॑ यस्य॑ दे॒वाः॑ यस्य॑ छा॒या अ॒मृतं॑ यस्य॑ मृ॒त्युः॑ कस्मै॑ दे॒वाय॑ ह॒-

विषा विधेम ॥२॥ यः प्राणतः निऽमिषतः महिऽत्वा एकः इत् राजा जगतः बभूव यः ईशे अस्य द्विऽपदः चतुःऽपदः कस्मै देवाय हविषा विधेम ॥३॥ यस्य इमे हिमऽवंतः महिऽत्वा यस्य समुद्रं रसया सह आहुः यस्य इमाः प्रऽदिशः यस्य बाहू कस्मै देवाय हविषा विधेम ॥४॥ येन द्यौः उग्रा पृथिवी च दृळ्हा येन स्वः० स्तभितं येन नाकः यः अंतरिक्षे रजसः विऽमानः कस्मै देवाय हविषा विधेम ॥५॥३॥ यं क्रंदसी अवसा तस्तभाने अभि ऐक्षेतां मनसा रेजमाने यत्र अधि सूरः उत्ऽइतः विऽभाति कस्मै देवाय हविषा विधेम ॥६॥ आपः ह यत् बृहतीः विश्वं आयन् गर्भं दधानाः जनयंतीः अग्निं ततः देवानां सं अवर्तत असुः एकः कस्मै देवाय हविषा विधेम ॥७॥ यः चित् आपः महिना परिऽअपश्यत् दक्षं दधानाः जनयंतीः यज्ञं यः देवेषु अधि देवः एकः आसीत् कस्मै देवाय हविषा विधेम ॥८॥ मा नः हिंसीत् जनिता यः पृथिव्याः यः वा दिवं सत्यऽधर्मा जजान यः च आपः चंद्राः बृहतीः जजान कस्मै देवाय हविषा विधेम ॥९॥ प्रजापते न त्वदेतान्यन्यो विश्वा जातानि परि ता बभूव। यत्कामास्ते जुहुमस्तन्नो अस्तु वयं स्याम पतयो रयीणां ॥१०॥४॥

॥१२२॥ वसुं न चित्रऽमंहसं गृणीषे वामं शेवं अतिथिं अद्विषेण्यं सः रासते शुरुधः विश्वऽधायसः अग्निः होता गृहऽपतिः सुऽवीर्यं ॥१॥ जुषाणः अग्ने प्रति हर्य मे वचः विश्वानि विद्वान् वयुनानि सुऽक्रतो० घृतऽनिर्निक् ब्रह्मणे गातुं आ ईरय तव देवाः अजनयन् अनु व्रतं ॥२॥ सप्त धामानि परिऽयन् अमर्त्यः दाशन् दाशुषे सुऽकृते ममहस्व सुऽवीरेण रयिणा अग्ने सुऽआभुवा

यः ते आनट् संऽइधा तं जुषस्व ॥३॥ यज्ञस्य केतुं प्रथमं पुरःऽहितं हविष्मंतः ईळते सप्त वाजिनं पृणंतं अग्निं घृतऽपृष्ठं उक्षणं पृणंतं देवं पृणते सुऽवीर्यं ॥४॥ त्वं दूतः प्रथमः वरेण्यः सः हूयमानः अमृताय मत्स्व त्वां मर्जयन् मरुतः दाशुषः गृहे त्वां स्तोमेभिः भृगवः वि रुरुचुः ॥५॥५॥ इषं दुहन् सुऽदुघां विश्वऽधायसं यज्ञऽप्रियं यजमानाय सुऽक्रतो° अग्ने घृतऽस्तुः चिः ऋतानि दीद्यत् वर्तिः यज्ञं परिऽयन् सुक्रतुऽयसे ॥६॥ त्वां इत् अस्याः उषसः विऽउष्टिषु दूतं कृण्वानाः अयजंत मानुषाः त्वां देवाः महयाय्याय ववृधुः आज्यं अग्ने निऽमृजंतः अध्वरे ॥७॥ नि त्वा वसिष्ठाः अहुंत वाजिनं गृणंतः अग्ने विदथेषु वेधसः रायः पोषं यजमानेषु धारय यूयं पात स्वस्तिऽभिः सदा नः ॥८॥६॥

॥१२३॥ अयं वेनः चोदयत् पृश्निऽगर्भाः ज्योतिःऽजरायुः रजसः विऽमानं इमं अपां संऽगमे सूर्यस्य शिम्भुं न विप्राः मतिऽभिः रिहंति ॥१॥ समुद्रात् ऊर्मिं उत् इयर्ति वेनः नभःऽजाः पृष्ठं हर्यतस्य दृशिं ऋतस्य सानौ अधि विष्टपि भ्राट् समानं योनिं अभि अनूषत व्राः ॥२॥ समानं पूर्वीः अभि वावशानाः तिष्ठन् वत्सस्य मातरः सऽनीळाः ऋतस्य सानौ अधि चक्रमाणाः रिहंति मध्वः अमृतस्य वाणीः ॥३॥ जानंतः रूपं अकृपंत विप्राः मृगस्य घोषं महिषस्य हि ग्मन् ऋतेन यंतः अधि सिंधुं अस्युः विदत् गंधर्वः अमृतानि नाम ॥४॥ अप्सराः जारं उपऽसिष्मियाणा योषा बिभर्ति परमे विऽओमन् चरत् प्रियस्य योनिषु प्रियः सन् सीदत् पक्षे हिरण्ययें सः वेनः ॥५॥७॥ नाकें सुऽपर्णं उप यत् पतंतं हृदा वेनंतः अभि अचक्षत त्वा हिरण्यऽपक्षं वरु-

णस्य दूतं यमस्य योनौ शकुनं भुरण्युं ॥६॥ ऊर्ध्वः गंधर्वः अधि नाके अस्थात् प्रत्यङ् चित्रा बिभत् अस्य आयुधानि वसानः अर्कं सुरभिं दृशे कं स्वः न नाम जनत प्रियाणि ॥७॥ दृप्सः समुद्रं अभि यत् जिगाति पश्यन् गृध्रस्य चक्षसा विऽधर्मन् भानुः शुक्रेण शोचिषा चक्वानः तृतीये चक्रे रजसि प्रियाणि ॥८॥८॥

॥१२४॥ इमं नः अग्ने उप यज्ञं आ इहि पंचऽयामं त्रिऽवृतं सप्तऽतंतुं असंः हव्यऽवाट् उत नः पुरःऽगाः ज्योक् एव दीर्घं तमः आ अशयिष्ठाः ॥१॥ अदेवात् देवः प्रऽचतां गुहा यन् प्रऽपश्यमानः अमृतऽत्वं एमि शिवं यत् संतं अशिवः जहामि स्वात् सख्यात् अरणीं नाभिं एमि ॥२॥ पश्यन् अन्यस्याः अतिथिं वयाः यां ऋतस्य धामं वि मिमे पुरूणि शंसामि पित्रे असुराय शेवं अयज्ञियात् यज्ञियं भागं एमि ॥३॥ वह्वीः समाः अकरं अंतः अस्मिन् इंद्रं वृणानः पितरं जहामि अग्निः सोमः वरुणः ते च्यवंते परिऽआवर्ते राष्ट्रं तत् अवामि आऽयन् ॥४॥ निःऽमायाः ऊं इति ये असुराः अभूवन् त्वं च मा वरुण कामयासे ऋतेन राजन् अनृतं विऽविंचन् मम राष्ट्रस्य अधिऽपत्यं आ इहि ॥५॥९॥ इदं स्वः इदं इत् आस वामं अयं प्रऽकाशः उरु अंतरिक्षं हनावं वृचं निःऽएहि सोम हविः त्वा संतं हविषा यजाम ॥६॥ कविः कविऽत्वा दिवि रूपं आ असजत् अप्रेऽभूती वरुणः निः अपः सृजत् क्षेमं कृण्वानाः जनयः न सिंधवः ताः अस्य वर्णं शुचयः भरिभ्रति ॥७॥ ताः अस्य ज्येष्ठं इंद्रियं सचंते ताः ईं आ क्षेति स्वधया मदंतीः ताः ईं विशः न राजानं वृणानाः वीभत्सुवः अप वृचात् अतिष्ठन् ॥८॥

बीभत्सूनाँ सऽयुजँ हंसं आहुः अपां दिव्यानाँ सख्ये चरँतं अनु-ऽस्तुभँ अनु चर्चूर्यमाणं इंद्रँ नि चिक्युः कवयः मनीषा ॥९॥१०॥

॥१२५॥ अहं रुद्रेभिः वसुऽभिः चरामि अहं आदित्यैः उत विश्वऽदेवैः अहं मित्रावरुणा उभा बिभर्मि अहं इंद्राग्नी अहं अश्विना उभा ॥१॥ अहं सोमँ आहनसँ बिभर्मि अहं त्वष्टारं उत पूषणँ भगँ अहं दधामि द्रविणं हविष्मते सुप्रऽअय्ये यजमानाय सुन्वते ॥२॥ अहं राष्ट्री संऽगमनी वसूनां चिकितुषी प्रथमा यज्ञि-यानां तां मा देवाः वि अदधुः पुरुऽत्रा भूरिऽस्थात्रां भूरि आऽवे-शयँन्तीं ॥३॥ मया सः अन्नँ अत्ति यः विऽपश्यति यः प्राणिति यः ईं शृणोति उक्तं अमंतवः मां ते उप क्षियंति श्रुधि श्रुत श्रद्धिऽवं ते वदामि ॥४॥ अहं एव स्वयं इदं वदामि जुष्टँ देवेभिः उत मानु-षेभिः यं कामयेँ तंऽतँ उग्रं कृणोमि तं ब्रह्माणँ तं ऋषिँ तं सुऽमेधां ॥५॥११॥ अहं रुद्राय धनुः आ तनोमि ब्रह्मऽद्विषे शरवे हंतवे ऊं अहं जनाय समऽदँ कृणोमि अहं द्यावापृथिवी आ विवेश ॥६॥ अहं सुवे पितरँ अस्य मूर्धन् मम योनिः अप्ऽसु अंतः समुद्रे तता वि तिष्ठे भुवना अनु विश्वा उत अमूं द्यां वर्ष्मणा उप स्पृ-शामि ॥७॥ अहं एव वातःऽइव प्र वामि आऽरभमाणा भुव-नानि विश्वा परः दिवा परः एना पृथिव्या एतावती महिना सं बभूव ॥८॥१२॥

॥१२६॥ न तं अंहः न दुःऽइतं देवासः अष्ट मर्त्यं सऽजोषसः यं अर्यमा मित्रः नयति वरुणः अति द्विषः ॥१॥ तत् हि वयं वृणीमहे वरुण मित्र अर्यमन् येन निः अंहसः यूयं पाथ नेथ च मर्त्यं अ-

तिं द्विषः॥२॥ ते नूनं नः अयं ऊतये वरुणः मित्रः अर्यमा नयिं-
ष्ठाः ऊं नः नेषणिं पर्षिष्ठाः ऊं नः पर्षणिं अतिं द्विषः॥३॥ यूयं
विश्वं परिं पाथ वरुणः मित्रः अर्यमा युष्माकैं शर्मणि प्रिये
स्यामं सुऽप्रनीतयः अतिं द्विषः॥४॥ आदित्यासः अतिं स्रिधः
वरुणः मित्रः अर्यमा उग्रं मरुत्ऽभिः रुद्रं हुवेम इंद्रैं अग्निं स्व-
स्तयें अतिं द्विषः॥५॥ नेतारः ऊं सु नः तिरः वरुणः मित्रः अर्य-
मा अतिं विश्वानि दुःऽइता राजानः चर्षणीनां अतिं द्विषः॥६॥
ध्रुवं अस्मभ्यैं ऊतये वरुणः मित्रः अर्यमा शर्मं यच्छंतु सऽप्रथः
आदित्यासः यत् ईमंहे अतिं द्विषः॥७॥ यथा ह त्यत् वसवः गौर्यं
चित् पदि सितां अमुंचत यजत्राः एवो सु अस्मत् मुंचत वि अंहः
हः प्र तारि अग्ने प्रऽतरं नः आयुः॥८॥१३॥

॥१२७॥ राचीं वि अख्यत् आऽयती पुरुऽचा देवी अक्षऽभिः
विश्वाः अधि श्रियः अधित॥१॥ आ उरु अप्राः अमर्त्या निऽवतः
देवी उत्ऽवतः ज्योतिषा बाधते तमः॥२॥ निः ऊं स्वसारं अकृत
उषसं देवी आऽयती अपं इत् ऊं हासते तमः॥३॥ सा नः अद्य य-
स्याः वयं नि ते यामन् अविक्ष्महि वृक्षे न वसतिं वयः॥४॥ नि
यामासः अविक्षत नि पत्ऽवंतः नि पक्षिणः नि श्येनासः चित्
अर्थिनः॥५॥ यवयं वृक्यं वृकं यवयं स्तेनं ऊर्म्ये अथ नः सुऽतरा
भव॥६॥ उप मा पेपिशत् तमः कृष्णं विऽअक्तं अस्थित उषः ऋ-
णाऽइव यातय॥७॥ उप ते गाःऽइव आ अकरं वृणीष्व दुहितः
दिवः राचिं स्तोमं न जिग्युषें॥८॥१४॥

॥१२८॥ मम अग्ने वर्चः विऽहवेषु अस्तु वयं त्वा इंधानाः तन्वं

पुषेम मह्यं नमंतां प्रऽदिशः चतस्रः त्वया अधिऽअक्षेण पृतनाः जयेम ॥१॥ मम देवाः विऽहवे संतु सर्वे इंद्रऽवंतः मरुतः विष्णुः अग्निः मम अंतरिक्षं उरुऽलोकं अस्तु मह्यं वातः पवतां कामे अस्मिन् ॥२॥ मयि देवाः द्रविणं आ यजंतां मयि आऽशीः अस्तु मयि देवऽहूतिः दैव्याः होतारः वनुषंत पूर्वे अरिष्टाः स्याम तन्वा सुऽवीराः ॥३॥ मह्यं यजंतु मम यानि हव्या आऽकूतिः सत्या मनसः मे अस्तु एनः मा नि गां कतमत् चन अहं विश्वे देवासः अधि वोचत नः ॥४॥ देवीः षट् उर्वीः उरु नः कृणोत विश्वे देवासः इह वीरयध्वं मा हास्महि प्रऽजया मा तनूभिः मा रधाम द्विषते सोम राजन् ॥५॥१५॥ अग्ने मन्युं प्रतिऽनुदन् परेषां अदब्धः गोपाः परि पाहि नः त्वं प्रत्यंचः यंतु निऽगुतः पुनः ते अमा एषां चित्तं प्रऽबुधां वि नेशत् ॥६॥ धाता धातॄणां भुवनस्य यः पतिः देवं चातारं अभिमातिऽसहं इमं यज्ञं अश्विना उभा बृहस्पतिः देवाः पांतु यजमानं निऽअर्थात् ॥७॥ उरुऽव्यचाः नः महिषः शर्म यंसत् अस्मिन् हवे पुरुऽहूतः पुरुऽक्षुः सः नः प्रऽजायै हरिऽअश्व मृळय इंद्र मा नः रिरिषः मा परा दाः ॥८॥ ये नः सऽपत्नाः अप ते भवंतु इंद्राग्निऽभ्यां अव बाधामहे तान् वसवः रुद्राः आदित्याः उपरिऽस्पृशं मा उग्रं चेत्तारं अधिऽराजं अक्रन् ॥९॥१६॥ ॥ १० ॥

॥ १२९ ॥ न असत् आसीत् नो सत् आसीत् तदानीं न आसीत् रजः नो विऽओम परः यत् किं आ अवरीवः कुह कस्य शर्मन् अंभः किं आसीत् गहनं गभीरं ॥१॥ न मृत्युः आसीत् अमृतं न तर्हि न रात्र्याः अह्नः आसीत् प्रऽकेतः आनीत् अवातं स्वधया तत् एकं तस्मात् ह अन्यत् न परः किं चन आस ॥२॥ तमः आसीत्

